मुहूर्त चिन्तामणि ; पीयूषधारा टीका सहित ; १७८६ वि० लि० भिन्न पत्रक ॥ ल० अ० १८ पं० प्र० पृ०

ह० ल०

2

475

25

33

Mss. No. ..5.

Title of the Mss Piyush-dhara com. of Muhurt-Chintamani

subject Jotish

Charactor Deva-nagari

Author Govinda-Jotirvid

Commentator

Size 11x6 1/2 Folios 246 Lines 36

Recension Kasmir

Where from obtained Amritsar

When written 1796 V.S. age

C.C. Page 338

३५४

श्रीगणेशाय नमः गणेशं वाणीतनयमब्धाब्धिदावमीशं नत्वा श्रीगुरुपदभक्तिलब्धविद्यः गोविंदो विबुधजनप्र
हर्षिणीं तां संस्कारप्रकरणटिप्पणीं तनोति अथ संस्कारप्रकरणं व्याख्यायते तत्र संस्क्रियते येन श्रौतेन कर्म
णा स्मार्तेन च पुरुष इति संस्कारः स्वीयस्वीयजातौ सामान्यविशेषविहितवैदिकस्मार्तकर्मानुष्ठानद्वारा दृष्टवि
शेषाध्यायक इति यावत् लक्षणया तदोक्तदिनशुद्ध्यादिकं संस्कारशब्देनोच्यते तस्य प्रकरणमुपक्रमः ते च संस्का
राश्चाष्टाचत्वारिंशत् यदाह गौतमः गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं
चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पंचानां यज्ञानामनुष्ठानमष्टकापार्वणश्राद्धं श्रावण्याग्रहा
यणीचैत्र्याश्वयुजीति सप्त पाकसंस्थाः अग्न्याधानमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्याग्रायणेष्टिर्निरू
ढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमोत्यग्निष्टोमः उक्थ्यः षोडशी वाजपेयोतिरात्रो
ऽप्तोर्याम इति सप्त सोमयज्ञसंस्था इत्येते चत्वारिंशत्संस्काराः अष्टावात्मगुणाः दया सर्वभूतेषु क्षांतिरनसू
या शौचमनायासो मांगल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मण
सायुज्यमाप्नोति तत्रैते पुनः संस्काराः समीचीनदिवसेष्वनुष्ठिताः संतोभिहितफलदातारो भवंति तत्र प्रथमं
गर्भाधानाख्यसंस्कारोभिहितः स च रजस्वलाद्यधीनः उक्तं च भरद्वाजसंहितायां रजस्वला यदा नारी योग्या
स्याद्गर्भधारणे ततः कुर्वीत तत्संगं गर्भार्थं बुद्धिमान्नरः तत्रापि पुत्रोत्पत्त्यर्थमवश्यं संगः कार्यः अन्यथा परलोका
भावः उक्तं च श्रुतौ नापुत्रस्य लोकोस्तीति तत्सर्वे पशवो विदुरिति पशवो देवा मनुष्याः अत एव पुंनाम्नो नर
का त्रायत इति अवश्यं पुत्र इत्यन्वर्थतापि प्रतीयते तदुक्तं महाभारते आदिपर्वणि शाकुंतले यदागमवतां पुं
सां भाव एवोपजायते ततारयति संतत्या पूर्वप्रेतान्पितामहान् पुंनाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मा

श्री
वि॰
संस्का
प्र॰ २

राम
२

ऽपुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति अनेनामुष्मिकं फलमुक्तं संततेः ऐहिकमपि फलमुक्तं महाभारते इष्टं दत्तम
धीतं च यज्ञाश्च बहुदक्षिणाः सर्वमेतदपत्यस्य कलां नार्हति षोडशीं व्रतोपवासैर्बहुभिः कृतैर्भवति भीष्म यत् सर्वं
तदनपत्यस्य कलां नार्हति षोडशीं व्रतोपवासैर्बहुभिः मोघं भवति निःसुतस्य अतो गर्भाधानमवश्यं कर्तव्यं तच्च र
जोदर्शनतः प्राङ् न विधेयं तदुक्तं भविष्यत्पुराणे रजोदर्शनतः पूर्वं न स्त्रीसंगं समाचरेत् संसर्गं यदि कुर्वीत नरके प
रिपच्यत इति युक्तं चैतत् रजो हि पुष्परूपं तद्विना फलरूपसंतानानुत्पत्तेः न तु क्वचिद्रजोदर्शनं विनापि गर्भसंभ
वो दृश्यते क्वचित्तु सत्यपि रजसि गर्भाधानानुपलंभ इति नैष दोषः गर्भधारणं हि रजो विना न भवतीत्येषा व्याप्तिः
तच्च क्वचित्प्रकटं क्वचिदन्तरेव तिष्ठति तत्राप्रकटेऽपि रजस्यन्तर्गतरजःसत्त्वाद्गर्भधारणसंभवात् प्रागुक्तदोषाभावः उ
क्तं च कश्यपसंहितायां वर्षाद्द्वादशकादूर्ध्वं यदि पुष्पं बहिर्न हि अन्तःपुष्पं भवत्येव पनसोदुंबरादिवत् अतस्तत्र तु
कुर्वीत तत्संगं बुद्धिमान्नर इति यत्र तु सत्यपि रजसि गर्भधारणं न दृश्यते तत्र पुष्पबीजक्षेत्रादिदोषो द्रष्टव्यः तस्मा
न्निश्चितमेतत् रजोदर्शनानन्तरं स्त्रीसंगः कार्य इति तत्र प्रथमरजोदर्शनतः शुभाशुभं भवति सर्ववनितानामिति व
सिष्ठोक्तेः शुभफलसूचकं प्रथमरजोदर्शने मासाद्यनुष्टुभाह आद्यं रजः शुभं माघमार्गराधेषफाल्गुने ज्येष्ठश्रा
वणयोः शुक्ले सद्वारे सन्नक्षत्रे दिवा राधो वैशाखः इष आश्विनः शेषं स्पष्टं आद्यं प्रथमोद्भवं रजः स्त्रीधर्मो माघमार्ग
शीर्षवैशाखाश्विनफाल्गुनमासेषु तथा ज्येष्ठश्रावणमासयोश्चेत्स्यात्तदा शुभं भविष्यच्छुभसूचकं अर्थाच्चैत्राषा
ढभाद्रपदकार्त्तिकपौषमासा अशुभाः उक्तं च स्मृतिचंद्रिकायां चैत्रे स्यात्प्रथमर्तौ नारी वैधव्यभागिनी वैशाखे धन
पुत्राढ्या ज्येष्ठे रोगान्विता तथा शुचौ मृतिप्रदा प्रोक्ता श्रावणे धनधान्यदा नभस्ये दुर्भगा क्लिष्टा चाश्विने च तपस्विनी ऊर्जेप्या
पुष्पतौ नारी मार्गशीर्षे बहुप्रदा पौषे तु पुंश्चली नारी माघे पुत्रसुखान्विता फाल्गुने श्रीमती साध्वी क्रमान्मासफलं स्मृत
मिति तथा शुक्ले शुक्लपक्षे सत् अर्थात्कृष्णपक्षेऽनिष्टं यदुक्तं स्मृतिचंद्रिकायां शुक्लपक्षे सुशीला स्यात्कृष्णे सा कुलटा भवे

मु॰टी॰ त् कृतं स्यादशुभं मीयावन्मध्यमं फलमादिशेत् अतः कुलपदादशम्युत्तरं कुलटात्वं स्यादित्यर्थः अथ सद्वारे सतां चंद्रबुधगुरु
सं॰प्र॰ शुक्राणां वारे आद्यरजः शुभं मध्यादन्यवारेषु दुष्टफलं यदाह कश्यपः रोगिणी रविवारे तु सोमवारे पतिव्रता दुःखिता भौमवा
२ रे च बुधे सौभाग्यसंयुता श्रीसंयुता गुरोर्वारे पतिभक्ता भृगोर्दिने मलिना मंदवारे तु रात्राव पितथैव चेति वसिष्ठोपि सदागदार्ता सुप
तिव्रता स्याद्वंध्या प्रजावत्यन्नलाढ्ययुक्ता आनंदकर्त्री च सती च पुष्पवती क्रमाद्भास्करवासरेषु भास्करवासरेष्वित्यत्रार्धर्चाः पुं
सि चेत्यादिवचनाद्यथावगम्यते तेन भास्करवासरादिष्वित्यर्थः फलितः अथ सत्तनौ समीचीनलग्नेषु भस्वामिकराशौ वित्य
र्थ इति केचित् तत्र शुभमाद्यरजः यदाह नारदः कुलीरवृषचापांत्यनृयुक्कन्यातुलाधराः राशयः शुभदा ज्ञेया नारीणां प्रथमा
र्तवे केचित् सत्तनौ सद्भिर्दृष्टे युक्ते वा तनौ लग्ने इति व्याकुर्वते यदुक्तं दैवमनोहरे मेषे सव्यभिचारा स्याद्वृषभे परभोगिनी मिथु
ने धनभोगाढ्या कर्कटे व्यभिचारिणी पुत्राढ्या सिंहराशौ तु कन्यायां श्रीमती भवेत् विचक्षणा तुलायां च वृश्चिके तु पतिव्रता
दुश्चारिणी धनुःपूर्वे ह्यपरे च पतिव्रता मकरे मानहीना च कुंभे निर्धनवंध्यता मीने विलक्षणा लग्ने ग्रहसंस्थाविशेषवत् अशु
शुभफलापवादमाह वसिष्ठः अशुभमपि समस्तं याति नवेलंप्रयुक्तं [illegible] गुरुसितयुक्ते वीक्षिते वाथ लग्ने तिमिरमिव कठोरज्योति
रुत्पत्तिकाले क्षयमथ समुपैति प्राप्नुयादीप्सितानि कठोरज्योतिः सूर्यः अथ दिवा दिवसे आद्यरजः शुभं मलिना मंदवारे तु रा
त्राव पितथैव चेति नारदोक्तेः दिवारजोदर्शनं शुभमित्यर्थः स्मृत्यंतरे तु विशेष उक्तः प्रातःकाले तु धनासा याह्ने सर्वभोगि
नी मध्याह्ने च भवेद्वेश्या निशीथे विधवा भवेत् अथ प्रथमरजोदर्शने शुभमध्यानि शुभनक्षत्राण्यनुष्टुभाह [illegible] क्षिप्रमृदु
क्षिप्रध्रुवस्वातीसितांबरे मध्यं निऋतिदितिभपित्र्यमिश्रे परेष्वसत् [illegible] तिस्रः श्रवणधनिष्ठाशततारकाः मृदुक्षिप्रध्रुवा
णि चित्रानुराधामृगरेवत्यश्विनीपुष्यहस्तरोहिण्युत्तरात्रयं स्वाती च एतेषु भेष्वाद्यरजः शुभं रतिपूर्वेण संबंधः अत्र समाहा
रद्वंद्वे आगमशासनस्यानित्यत्वान्नुमभावः निऋतीति मूलपुनर्वसुमघाविशाखाकृत्तिकास्तु मध्यं मध्यफलं अपरेषु भरणी
ज्येष्ठार्द्राश्लेषापूर्वात्रयेष्वसदनिष्टफलं उक्तं नगर्गेण सुभगा चैव दुःशीला वंध्या पुत्रसमन्विता धर्मयुक्ता व्रतघ्नी च परसंतानमा राम २

सुपुत्रा चैव दुष्पुत्रा पितृवेश्मरता सदा दीना प्रज्ञावती चैव पुत्राढ्या चित्रकारिणी साध्वी पतिव्रता नित्यं सुपुत्रा कष्टचारिणी स्वक
र्मनिरता हिंस्रा पुण्या पौत्रादिसंयुता नित्यं धनकथासक्ता पुत्रधान्यसमन्विता मूर्खा धाढ्या गुणवती दस्त्राद्येः क्रमात्फले इति व्य
वहारनिबंधे श्रीपतिनापि कराद्विपंचोत्तरसूत्रपूर्वविशाखत्रयाश्विन्युपविधीन्दुभेषु आद्यं रजः सौख्यसुतायुरर्थसौभाग्यवृद्धिं कुरुते
गनानां मघेशयोः शोकमथादितेर्भे सर्वंबंधकीद्वेष्यनलेंदुरिद्रा पूर्वात्रयेयाम्यभुजंगधिष्ण्ये वैधव्यमस्माद्भवतीति नूनं अत्र
यद्यपि लिखितयोर्द्वयोरपि संततिवाक्ययोरैकार्थ्यं तथापि ग्रंथकृता विशाखामूलयोर्मध्यत्वाभिधानं वसिष्ठवाक्यानुरो
धात्कृतं उक्तं च वसिष्ठेन द्विदैवभे पुष्पवती प्रमत्ता त्वेवमाद्यामयवैरिसंघा मूलेप्रकामाधिकहीनसत्वा व्यसुर्बुभुक्षा
द्रुतदोषचित्ततेति अथ सितांबरेष्विति नवसेन आद्यं रजः शुभमिति च पूर्वेण संबंधः उपलक्षणं चैतत् हैमनूतनवस्त्रयोः यथा
दृष्ट्या दर्शेषु वस्त्रेषु रजोदर्शनं निंद्यमित्यर्थः तदाह वसिष्ठः शुभगा स्वेनवस्त्रा स्यात् दृढवस्त्रा पतिव्रता हैमवस्त्रा ह्विनीशा
स्यान्नवस्त्रा ...... न्विता दुर्भगा जीर्णवस्त्रा च क्षौहिणीरक्तवाससा नीलांबरधरा नारी विधवा पुष्पिता यदि मलिनांब
रा तां नारी दरिद्रा स्याद्रजस्वला हौमवस्त्रं पदृवस्त्रं क्वचिद्रक्तबिंदुभिः फलमुक्तं वस्त्रेषु विषमारक्तबिंदवः पुत्रमाप्नुयात् समाःक
न्यकां चैव निष्फलं स्यात्प्रथमार्तवे इति वसिष्ठोक्तेः अन्यच्च संमार्जनीकाष्ठतृणाग्निशूर्पोलूखलेदधानाञ्जलदानतदास्यात् तस्या
पभोगेन च पतिस्थितता चेदृष्टं रजो भाग्यवती नदा स्यात् अथ रजोदर्शने मालिन्याह भद्रानिद्रा संक्रमे दर्शरिक्तासंध्याषष्ठी
द्वादशीवैधृतेषु रोगेष्टम्यां चंद्रसूर्योपरागे पातेचाद्येनो रजोदर्शनं सत् भद्रा प्रसिद्धैव निद्रा स्वापः संक्रमः संक्रान्तिः दर्शा मावस्या
रिक्ताः प्रसिद्धाः संध्याप्रातःसंध्या मध्याह्नसंध्या सायंसंध्या च षष्ठीद्वादश्यौ प्रसिद्धे वैधृताख्यः सप्तदशो योगो महापातश्च ए
तेषु दुष्टयोगेषु आद्यं प्रथमं रजोदर्शनं नो सत् अनिष्टफलमित्यर्थः यदाह कश्यपः अष्टमीषष्ठ्यष्टमारिक्ताद्वादशीसंक्रमे पिवा
वैधृतौ व्यतिपाते च ग्रहणे चंद्रसूर्ययोः विष्ट्यां संध्यासु निद्रायां दुर्भगा प्रथमार्तवा नारदेन तु प्रतिपन्तिथिः परिघयोगस्पूर्वार्धं नि
षिद्धं अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि परिघस्य च पूर्वार्धे व्यतीपाते च वैधृतौ संध्यासूपप्लवे विष्ट्यामशुभं प्रथमार्तवं
रोगसंमतिर्नास्ति वसिष्ठेन तु स्थलभेदेन फलविशेषा भिहितः ग्रामाद्बहिः परग्रामे वा चत्वरा द्व्यभिचारिणी पतिव्रता पतिस्थ्या

मु.चि.
सं.प्र
२

नेऽस्त्रीस्नागृहमध्यमे ग्राममध्येतद्बहिश्च विधवा च दिगंबरा परागारे च दुःशीला आयुष्यं जलसंनिधौ धनमध्ये तु कन्याया
धनधान्यसमृद्धिदा प्रथमार्तवं स्यादिति पूर्वेण संबंधः अत्र रजस्वलायाः कन्यायाः मात्रादिकृतप्रश्नलग्नाच्छुभाशुभविशे
षाभूयान्वसिष्ठेनोक्तः सोऽस्माभिर्ग्रंथबाहुल्यभयान्नालेखि सततन एवावधार्यः अथ प्रथमरजस्वलास्नानमुहूर्तं वसंततिल
कयाह हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शक्रान्वितैः शुभतिथौ शुभवासरे च स्नायाद्यथार्तववती मृगपौष्णहस्ताश्विधा
भिरं लभते च गर्भं हस्तस्वात्यश्विनीमृगोत्तराधाधनिष्ठारोहिणीपुनरानुराधाज्येष्ठाभिः शुभतिथौ भद्रानिद्रासंक्रमेत्याद्यनिष्ट
दिनव्यतिरिक्तदिवसे शुभवासरे शुभानां सोमबुधगुरुशुक्राणां वासरे चार्तववती ऋतुरेवार्तवं प्रज्ञादित्वात्स्वार्थेऽण् तद्विद्यते
यस्याः सा तथोक्ता सार्तवावती स्नायात् उक्तं च दैवज्ञवल्लभे॥ ब्रह्मोत्तराधाश्विनसौम्यभेषु हस्तानिलाखंडलवासवेषु विष्णा
र्यमर्क्षोत्तरभाद्रभेषु वरांगनास्नानविधिः प्रदिष्टः आर्द्रं उत्तरोज्येष्ठा वासवं धनिष्ठा इत्यपुनरुक्तिः वारफलमपि तत्रैव सकृ
द्व्रतिव्रतादीनां पुत्रिणी भोगभागिनी पतिव्रता केशयुक्ता ऋतुस्नानेऽर्कवारत इति केचित्तु अन्यथा वारफलान्याहुः काकी
वंध्या भवतीह शुक्रे नष्टजा स्नानविधौ बुधे च सौरे च मृत्युः पयसोऽल्पतेन्दौ भौमार्कजीवे बहुपुत्रलाभ इति तत्प्रसूता स्ना
नविषयं तदुक्तं दैवज्ञवल्लभे॥ स्नाता प्रसूताप्यसुता बुधेन स्नाना च वंध्या भृगुनंदनेन सौरेऽष्टतिः स्त्री रहिता सोमे पुत्रार्थला
भोरविजीवभौमे इति अथ विशेषमाह मृगेति मृगरेवतीस्वातीहस्ताश्विनीरोहिणीभिर्नक्षत्रैः स्नातार्तववती आशु शीघ्रं गर्भं ल
भते तदुक्तं दैवज्ञवल्लभे नोहरे वायुः पूषा च सौम्यः शक्रो ब्राह्मं हस्तस्तथाश्विनी एभिः स्नानेन नारीणां गर्भः संपद्यते पुनरिति अत्रैका
दश नक्षत्राणि स्नानविधावुक्तानि तत्रापि षड्भेषु शीघ्रं गर्भोत्पत्तिर्भवेत् अन्येषु किंचिद्विलंबेनेत्यर्थः सर्वथा हि विहि
तभिन्नेषु स्नानं न कार्यमिति निष्कृष्टोऽर्थः उक्तं च कृत्तिकाभरणीमूलमार्द्रा पुष्यः पुनर्वसुः मघा चित्रा विशाखा च श्रवणो
दशमस्तथा एताः प्राणहरास्तारास्तासु स्नानं न कारयेत् यदि स्नानं प्रकुर्वीत पुनः सूतिर्न विद्यते इति अथोक्तनतारकाशे
षाप्यवीत्र्ययेषु मध्यममिति त्र्यं देशाचारतो व्यवस्थाऽनुसंधेया शिष्टाचारस्यापि स्मृतिवत्प्रामाण्यात् दाक्षिणात्यास्तु चतुर्थे
वदिवसे स्नानमाहुः स तु चतुर्थेऽह्नि शुध्यतीति मनुः स्पृश्या चतुर्थेऽह्नि स्नानेन स्त्री रजस्वलेति स्मृतिवचनात् अथ गर्भाधानमु

हूर्तं शार्दूलविक्रीडितमालिनीभ्यामाह गंडांतं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलांतकं दास्रं पौष्णमथोपरागदिवसान्पातं तत
था वैधृतिं पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्धं स्वपत्नीगतो भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभं भद्रां षष्ठीपर्वरिक्ताः
च संध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः गर्भाधानमुत्तरेंदुमैत्रब्राह्मस्वातीविष्णुव स्वभे सत् अथ यदि दुष्टफलतिथ्यादिषु
रजोदर्शनमुहूर्तं तत्र चतुर्थदिनानंतरं शांतिकं विधेयं यदाह वसिष्ठः प्रभूतदोषं यदि दृश्यते तत्तुर्थ्यं ततः शांतिककर्म कार्यं
विवर्जयेद्देवतदैकशय्यां यावद्रजोदर्शनमन्यवक्त्रे ईशानतो गोमयमंडले तु परिस्तृते गोऽत्रजुहुयात्सहुर्वा युग्मान्धृताग्रांच समि
त्प्रमाणं गायत्रिकामष्टसहस्रसंख्या शतप्रमाणमथवा च हजौ शुभे येवैव्याहृतिभिस्तिलैश्च ततः स्वरान्भूमिसुरान्पितृं
श्च संतर्पयेदन्नसुवर्णवस्त्रैरिति शांतिकप्रकारस्तत्पद्धत्यादौ द्रष्टव्यः एवं शांतिकं विधाय गर्भाधानं विधेयं तत्र स्वपत्नीगतो
स्वपत्नीगमने एतान्दोषांस्त्यजेदिति सर्वत्र संबंधः एतान्काह त्रिविधं गंडांतं गंडांतलक्षणं रत्नमालायां नक्षत्रतिथिलग्नानां
गंडांतं त्रिविधं स्मृतं इति निधनभं जन्मनक्षत्रात्सप्तमी वधतारा जन्मनक्षत्रं जन्म नक्षत्रत्रयं अंतकं भरणी दास्रमश्विनी पौ
ष्णं रेवती मघा उपरागदिवसं ग्रहणदिनं पातं व्यतीपातं महापातं च वैधृतं योगं महापातं च पित्रोः मातापित्रोः श्राद्धदिवसं
दिवा सूर्यावच्छिन्नकाले परिघयोगस्य पूर्वार्धं तथोत्पातैः दिव्यांतरिक्षभौमैस्त्रिविधैरुत्पातैर्हतं दूषितं जन्मर्क्षतः जन्मलग्ना
ज्जन्मराशेर्वा मृत्युभवनमष्टमलग्नं पापभं पापग्रहयुक्तं भं नक्षत्रं लग्नं वा भद्रेति भद्रा प्रसिद्धा षष्ठीतिथिं च पर्वाणि चतुर्द
श्यमावस्या पूर्णिमा संक्रमणानि उक्तं च विष्णुपुराणे चतुर्दश्यष्टमी चैव ह्यमावस्या च पूर्णिमा पर्वाण्येतानि राजेंद्र रविसंक्रां
तिरेव च रिक्ताः चतुर्थीनवमीचतुर्दश्यो संध्या प्रातःसंध्या सायंसंध्या च भौमं मंगलवारं अर्के मादित्यवारमार्किं शनैश्च
रवारं चतस्र आद्यरात्रीः रजोदर्शनदिनमारभ्य दिनचतुष्टयं त्यजेदित्यर्थः तदनंतरमपि पुत्रार्थी रजोदर्शनतो विषमं दि
वसं त्यजेत् उक्तं चाधानाध्याये वसिष्ठेन निषिद्धमुक्तं तत् पौष्णद्वये पैत्रभयाम्यसार्पे विष्णुद्वये नैधनजन्मभेषु उत्पातपापग्रहदू
षितेषु न कार्यमाधानमनिष्टलग्ने उपप्लवे वैधृतपातयोश्च विष्ट्यां दिवा पारिघपूर्वभागे संध्यासु पर्वस्वपि मातृपित्रोर्मृतेह्नि
पत्नीगमनं विवर्ज्यं दिनेषु युग्मेषु वदंति माल्ययोगैः सुतार्थी स्वसुता न येयात् दिनेषु युग्मेषु च कन्यकार्थी हित्वा च गंडांतविधि

मु॰दी॰ पापदृष्टापापैःचशेषंस्वविचिंत्यवाच्यमि एवमन्येपिपुंजन्मादियोगाजातकेद्रष्टव्याः एवंयस्मिन्कस्मिंश्चित्पुंजन्मयोगे
सं॰प्र॰ पुत्रार्थीयुग्मराशौपत्नींगच्छेत् कन्याजन्मयोगेतुकन्यार्थीविषमराशौपत्नींगच्छेदितिफलितोर्थः अथगर्भाधानेविहित
५ नक्षत्राप्राण्नैमध्यमनक्षत्राण्याह चित्रेति चित्रापुनर्वसुपुष्याश्विनीषुतुगर्भाधानेमध्यमेमध्यमफलंस्यात् यदाहबृहस्पतिः
चित्रादित्यौतथाविष्णुस्त्रयंगौचेतिमध्यमाः शेषाल्पद्वीलिकुष्टानिस्युर्निषेकाख्यकर्मणीति अत्रकेचित् दैवान्मानुष्याद्वा
प्रतिबंधादृतौरसन्निधानेनानेकऋतुष्वतीतेषुगर्भाधानाख्यःसंस्कारोनाभूदिदानींदैवान्मध्येभर्तृसमागमश्चेत्तस्याऋत
दक्षिणायश्चकालःगुर्वस्तन्यूनाधिमासादिमहादोषसद्भावस्तदागर्भाधानेनैवभवतीत्याहअतीतकालत्वात् यथाकाला
तीतेषुजातकर्मनामकर्मान्नप्राशनचौलादिसंस्काराःपूर्वोक्तदोषसद्भावेनैवभवंतीति उक्तंच वसिष्ठेन अतीतकालान्य,
खिलानियानिकार्याणिसौम्यायनगेदिनेशे गुरौभृगौवाप्यथदृश्यमानेतदुक्तपंचांगदिनेष्वखंडेइति सत्यं सत्यपिऋतुना
मतिक्रमेनिमित्तानंतरमेवनैमित्तिकमितिन्यायेनषोडशर्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेदिति याज्ञवल्क्यवचनात्षो
डशदिनमध्येएवचेदृतौसान्निध्यमभूत्तदातत्रैवयथाकथंचित्कालशुद्धिंविचार्यवाकार्यमेवतदाबहुकालव्यापिनीकाला
शुद्धिरूपेदैवयतोविज्ञानेश्वरेणतस्मिन्युग्मासुसंविशेदितिव्याख्यानावसरेकिमयंविधिर्नियमःपरिसंख्यावेतित्रयःपक्षाउ
पन्यस्तास्तत्रस्त्रीगमनेरागतएवप्राप्तेःनियमएवायमितिसिद्धांतितं अतोगच्छेदेवेतिनियमस्मरणात् अतावुयेधात्सर्वेत्रवाप्र
तिषिद्धवर्जंगौतमस्मरणात् अत्वगमनेप्रत्यवायोविस्मर्यते अतःस्नातांतुयोभार्यांसंनिधौनोपगच्छति घोरायांभ्रूणहत्या
यांयुज्यतेनात्रसंशयइतिशातातपोक्तेः अतएवैतद्दूषणभयादेवाधिकारिणापित्रादिनाकन्यागुणवतेवरायावच्छक्तिदेयेत्याह
याज्ञवल्क्यः पितापितामहोभ्रातासकुल्योजननीतथा कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः अप्रयच्छन्समाप्नोतिभ्रूण
हत्यामृतावृतौ इतिभीष्मोक्तिः कैमुक्तिकन्यायस्तुचनार्थं यत्रपित्रादेरदातृत्वंचेद्दोषस्तदैषदोषोभर्तुर्भवत्येवेतिकिंवाच्य
मित्यर्थः भ्रूणंगर्भः एवंगर्भाधानंविधायनिद्रासमयेपुंसाकिंकार्यमित्याह वसिष्ठः निद्रासमयमासाद्यतोतूलेवदनात्पनेत २
पर्यंकात्समरांभालात्पुंड्रंस्यापालिमस्तकादिति अथानयागर्भोधृतोनवेतिप्रश्ने गर्भधारणयोगाजातकेद्रष्टव्याः प्रस्तुते ८

प्रसंगान्न लिखितमस्माभिरिति गर्भाधानं समाप्तं अथ प्रसिद्धे गर्भे सीमंतोन्नयनाख्यसंस्कारमुहूर्तं शार्दूलविक्रीडितेन
नाह जीर्क्कारदिने मृगेज्ञनिऋतिश्चाज्ञादितिब्रह्मभैरिक्तामाकरसाष्टवर्ज्यैतिथिभिर्मासाधिपे पीवरे सीमंतोष्टम
षष्ठमासे शुभदैः केंद्रत्रिकोणे खलैः लाभारित्रिषु वाध्रुवान्यसदहे लग्ने च पुंभांशके जीवो बृहस्पतिः आरो मंगलः
अर्कः सूर्यः एषां वारे तथा ब्रध्नः सूर्यः भास्करो ब्रध्न इत्यभिधानात् तस्य भं हस्तः अन्यत्स्पष्टं नाम तएव एवं मृग
पुष्यमूलश्रवणपुनर्वसुहस्तनक्षत्रैः सीमंतो लक्षणया सीमंतोन्नयनाख्यः संस्कारः कार्यः सीमंत उन्नीयते यस्मिन्क
र्मणि सीमंतोन्नयनमिति शब्दव्युत्पत्तिः सीमंतः केशमध्यभाग उक्तं च सीमंताध्याये कश्यपेन शुक्लपक्षादिदिवसे
रिक्तां पक्षस्य मध्यमां तिथिं त्यक्त्वार्कभूसुतनगुरेज्यानां च वासर इति रत्नमालायां श्रवणः सकरः पुनर्वसुर्निऋतेर्भे
च सपुष्यकोमृगः रविभूसुतजीववासराः कथिताः पुंसवनादिकर्मसु आदिशब्देन सीमंतोन्नयनादि व्यासः पुरुष
ग्रहवाराः सुःशुभाः सीमंतकर्मणि मध्यास्त्रीग्रहवाराः तवर्ज्येयत्नेन पुंसकाविति तत्र तिथयो निषिद्धा उच्यंते रिक्तेति
रिक्ताः प्रसिद्धाः अमावस्या अर्को द्वादशी रसा षष्ठी अष्टा अष्टमी एताभिस्तिथिभिर्वर्ज्या न्यूना अवशिष्टा यास्तिथयः
ताभिः शुभपलक्षितेदिने वराहगुरुः पक्षच्छिद्रांच रिक्तांच विना पंचदशी शुभाः चतुर्दशी चतुर्थी च कदाचित्तु शुभप्रदे
शुभं लग्ने निशानाथे चतुर्थी च चतुर्दशी पौर्णमासी प्रशंसंति केचित्सीमंतकर्मणीति किंच मासाधिपे मासेश्वरे उत्य
ग्रिमश्लोकेन ज्ञाते गर्भमासस्वामिनि पीवरे पुष्टे उदिते सतीत्यर्थः यदाह नारदः चतुर्थे मासि षष्ठे वाप्यष्टमे तदीश्वरे
बलोपपन्ने दंपत्योः चंद्रताराबलान्विते कश्यपोपि मासेश्वरे ज्ञलोपेते न सूर्येणपराजिते इति यदि च मासाधिपे निर्बल
त्वदोषदृत्वाह गर्गः यस्य मासाधिपो रिक्तो नीचो वास्तंगतोपि वा तस्मिन्मासे हतं यं याति प्रसवो भविष्यति सचसीमंतो
गर्भधारणसमया रष्टमषष्ठमासि वा कार्यः अयं चेच्छया विकल्पः षष्ठेष्टमी वा सीमंतो मासीति याज्ञवल्क्योक्तेः नारदेन

मु.दी.
सं.प्र.
६

तच्च तुर्येऽपि मासेऽभ्यधायि तद्वाक्यं प्रदर्शितं शौनकेनापि चतुर्थे गर्भमासे स्यात्सीमंतोन्नयनक्रिया षष्ठेऽष्टमे वाऽ
पीनसूत्रांतरविधानत इति सूत्रांतरं स्वस्वगृह्यसूत्रं एवं स्वेच्छया क्रमासे एव विधेयं तच्च शुक्लपक्षे पूर्वाह्ण एव नापरा
ह्णे यदाह नारदः शुक्लपक्षे च पूर्वाह्णे सीमंतोन्नयनो विधिः स्मृत इति बृहस्पतिरपि पूर्वः पक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रि
कं विना पूर्वाह्ण एव तत्रापि नापराह्णे कथंचनेति अथ लग्नबलमुच्यते तत्र केंद्रत्रिकोणस्थानेषु १ ४ ७ १० ५ ९ शु
भदैः सौम्यग्रहैः तथा लाभारित्रिस्थानेषु ११ ६ ३ खलैः पापग्रहैरुपलक्षिते लग्ने तत्रापि च पुनः शुभांशकेषु पुरुष
राशिलग्नेषु पुरुषनवांशके च कार्यं यदाह वसिष्ठः केंद्रत्रिकोणोपगतैश्च सौम्यैर्दुश्चिक्यलाभारिगतैश्च पापैः षडष्टल
ग्नान्त्यविवर्जिते हि सीमंतकार्यं शुभदं तथैवेति रत्नमालायां षष्ठे मास्यथवाष्टमे तदधिपे वीर्यान्विते विधौ चेष्टेऽह्नि
तनेन्नामभवने पुंलग्नभागेऽपि च धीधर्मास्वचतुष्टये सुरगुरौ पापैश्च तद्वास्थगैर्मृत्युद्वादशवर्जितैश्च मुनिभिः सी
मंतकर्म स्मृतमिति अत्र विशेषमाह कश्यपः चंद्रोऽपि शुभदो ज्ञेयस्त्यक्त्वा षष्ठाष्टमव्ययान् सीमंतलग्नादेकोऽपि क्रू
रः पंचाष्टरिःफगः हंति सीमंतिनीं सापि तद्गर्भं वा न संशयः अत्रापि जन्मराशिर्जन्मलग्नाभ्यामष्टमभवनमष्टमभ
वनादष्टमलग्नं च शुद्धं ग्राह्यं यदाह सीमंतोन्नयनाध्याये कश्यपः न नैधने तयोर्लग्ने नैधने शुद्धिसंयुते पंचभिश्च चतुर्भिर्वा सूर्ये
ज्यगुरुपूर्वकैः ग्रहैः श्रेष्ठैः शुभैर्लग्ने राशौ वापि न नैधने इति सीमंतोन्नयनमित्यनुषंगः तयोः स्त्रीपुंसयोरस्यापवादः अथो
गपारिजाते च सिंहस्त्युक्तोक्तः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः यद्यप्यष्टमसंस्थोऽर्कदोषमाशु व्यपोहति अपि
शब्दो भिन्नक्रमोऽष्टमस्थोऽप्यनेनतरं द्रष्टव्यः स च केसुत्रिकन्यायेनान्यदोषनिवारणार्थोऽपि संपन्नः क्वचित्तत्त्यपि ग्रहबले
सिंहे वृश्चिके च लग्ने निंदिते मिहिते इत्ययमप्यत्र विशेषो ध्येयः यदाह गुरुः मूलर्क्षे केचिदिच्छंति सीमंतं शुभदं बुधाः सिंहा रा
ली वर्जयेल्लग्नं ग्रहैरष्टमवर्जितं ग्रहैः क्रूरग्रहैः क्वचिद्रात्रित्रयं निषिद्धं यदाह गर्गः सीमंतोन्नयने कार्ये शुभांशे शुभलग्नगे ६

ऊलीरमृगकन्याःचवर्ज्याः शेषाःचशुभनाइति अथमतांतरेण नक्षत्राणिवारांश्चाह ध्रुवेति ध्रुवाणिरोहिण्युत्तरा
त्रयमंत्यरेवती तथासदेहेसतांशुभग्रहाणां चंद्रबुधगुरुशुक्राणामह्निवारे ध्रुवांत्यनक्षत्रेषु प्रागुक्तनक्षत्रेषुवाकार्य
मित्यर्थः यदाह गुरुः रोहिण्यैंदवमादित्यंपुष्यहस्तोत्तरात्रयं पौष्णवैष्णवभंचैवसीमंतादिषुसंमतमिति श्रीधरः सौम्या
नांवारवर्गास्तुःसीमंतादिषुशुभनाइति अत्रजन्मनक्षत्रंयदिविहितमध्येपिसंभवेत्तदानदपिवर्ज्यमित्याहवसिष्ठः
बालान्नभुक्तौव्रतबंधनेचराज्ञाभिषेकेखलुजन्मधिष्ण्यं एवंत्वनिष्टंसततंविवाहसीमंतयात्रादिषुमंगलेषु एवंनि
र्णीतेसीमंतोन्नयनमुहूर्तेविचारोनास्तिविहितमासस्यविहितत्वात् तदाह गुरुः मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः
नदोषकृन्मलोमासोगुर्वादिकंतथेति अयमत्रतात्पर्यार्थः यत्रनियतएकएवकालोविहितोयथातृतीयेमासिपुंसवनं
तत्रशुक्रास्तादिदोषाभावएव यत्रतुसीमंतादौचतुर्थषष्ठाष्टममासरूपंकालत्रयविधानंतत्रशुक्रास्तादिदोषाहितेतरका
लोग्राह्यः संभवात्क्वचित्कुलाचारवशादेवतदतिरिक्तोनियतएवकालःस्यात्तदापिनदोषः यत्रबहुकालविधानेपिब
हुदिनव्यापकसिंहस्थगुर्वादिदोषसद्भावेसत्यनन्यगतिकत्वान्नैवदोषः एवंनामकर्मान्नप्राशनादिष्वपिद्रष्टव्यः उक्तं
च सीमंतजातकादीनिप्राशनांतानियानिवै दोषोनमलमासस्यमौढ्यस्यगुरुशुक्रयोरिति मौढ्येप्यत्यादिदोषोपल
क्षणं एकस्वकालप्रतीक्षायोगेषुचूडाकरणादिषु मलमासादिदोषोविचारणीयएवेति अथैतेगर्भाधानादयः संस्काराः
किंगर्भसंस्कारकत्वात्प्रतिगर्भावर्तंते उतसकृदेवकार्याइति तत्रदृष्टोभृगुवाक्ये प्राप्तेतृतीयमासेस्फुरदिंदुकलापप
क्षेच पुंसवनंपुत्रेषुगर्भेगर्भेप्रकुर्वीतेति पुंसवनमुपलक्षणं सर्वगर्भसंस्काराणां गर्भेगर्भइति वीप्साग्रहणात्प्रति
गर्भमावृत्तिरितिकेचिदाहुः अपरेतुसकृदेवकार्याइत्याहुः यदाह हारीतः सकृच्चकृतसंस्काराःसीमंतेनद्विजस्त्रियः
यंयंगर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदिति एतेनक्षेत्रसंस्कारकत्वमुक्तंभवति यथाभ्रूरेकवारंदाहाद्यनेकसंस्कारवती

मुटी॰ संस्त्र॰ ७

सती सर्वकाले कर्षणे योग्या भवतीत्यर्थः तद्वदत्रापि क्वचिद्बहुकौंकणदेशादौ प्रतिवर्षं दाहादिसंस्कारं विधाय कर्ष
णं क्रियत इत्येवं पक्षद्वयसंभवे देशाचारेणाव्यवस्था ध्येया ननु तृतीयमासविहितत्वादेव पुंसवनमुहूर्ते विचारणी
यस्तत्र चतुर्थषष्ठाष्टममासविहितः सीमंतमुहूर्तो विचार्यः वैपरीत्यापत्तौ किंबीजमिति ॥ उच्यते ॥ सीमंते विहितस्य
तिथिनक्षत्रवारलग्नादिसमुदायस्य पुंसवनेपि प्रयोगात्सर्वदेशप्रसिद्धसीमंतानुष्ठानाचारदर्शनाच्चादौ सीमंतस्यो
क्तिः पुंसवने त्वतंत्रकर्तव्यत्वेनोक्तमपि शिष्टाः सीमंतेन सहैव कुर्वंतीति ग्रंथकृदाशयः ॥ यदाह *जातूकर्ण्यः* द्वि
तीये वा तृतीये वा मासि पुंसवनं भवेत् व्यक्ते गर्भे भवेत्कार्यं सीमंते न सहाचरेदिति *नृसिंहोपि* सीमंतोन्नयनस्योक्ततिथिवा
रराशिषु पुंसवं कार्येहिह्मस्तहैवैकदिनेथवेति अतएवानवलोभनाख्यं कर्माप्यस्मिन्नेव दिने क्रियत इति शिष्टाचारो
प्यत्रार्थे प्रमाणं ॥ *इति सीमंतमुहूर्तविचारः* अथ प्रसंगतो मासेश्वरान् स्त्रीणां चंद्रबलं चैतत्तिलकयाह मासेश्वराः सितकु
जेज्यरवींदुसौरचंद्रात्मजात्संजउपचंद्रदिवाकराः स्युः स्त्रीणां विधोर्बलमुशंति विवाहगर्भसंस्कारयोरितरकर्मसु भर्तुरेव
गर्भप्रथममासमारभ्य दशममासपर्यंतं सितादयो मासेश्वरा ज्ञेयाः यथा प्रथमे मासे ईश्वरः शुक्रः द्वितीये भौमः
तृतीये गुरुः चतुर्थे रविः पंचमे चंद्रः षष्ठे शनिः सप्तमे बुधः अष्टमे आधानलग्नाधिपतिः नवमे चंद्रः दशमे सूर्यः अत्रप्र
थमं मासमारभ्य दशमं मासं यावद्गर्भस्य कललादिरूपावस्था भवतीति विशेषो ध्येयः यदाह *वराहः* कललघना
ङ्कुरास्थिचर्मांगजचेतनताः सितकुजजीवसूर्यचंद्रार्किबुधाः परतः उदयपचंद्रसूर्यनाथाः क्रमशो गदिता भवति शुभाशुभं
च मासाधिपतेः सदृशमिति शुक्रशोणितसन्निपातः कललं गर्भज्ञालो नामानि *वसिष्ठः* सितावनेयामरपूज्यसूर्यचंद्रा
र्किसौम्याः दयपेंदुसूर्याः मासाधिपाः स्युः क्रमशो दशैते निषेकदिनान्नाशयति स्वमासि स्त्रीणामिति गोचरस्य करणे यद्यपु
भयोः स्त्रीपुंसयोः सामान्यतो ग्रहबलमुक्तं तथाप्यत्र स्त्रीणां चंद्रबले विशेषोभिधीयते विवाहे गर्भसंस्कारे गर्भाधानपुंस

रा ७

वनसीमंतादिकृत्ये स्त्रीणामपि चंद्रबलं ग्राह्यं इतरकर्मसु वस्त्रपरिधानालंकारधारणादिषु कृत्येषु भर्तुर्बलमेव चंद्रब
लं ग्राह्यं न तु स्त्रीणां यदा तु भर्ता मृतस्तदा स्त्रीणामेव चंद्रबलं ग्राह्यमित्यर्थः उक्तं च पाणिपीडनविधेरनंतरं भर्तुरेव बल
मिंदुवादिकं चिंतनीयमिह योषितां क्रमादिष्टमंगलस्त्वनेन मनीषिभिरिति राजमार्तंडः विवाहकार्यं ऋतुस्नानप्रतिष्ठागर्भ
प्रतिष्ठावनिताविशुद्धौ अन्यानि कार्याणि धवस्य शुद्धौ पत्यौ विहीने प्रमदात्मशुद्ध्या अथ येषामाचारः पृथगेव पुंस
वनं विधेयमिति तदर्थं पुंसवनमुहूर्तं विष्णुपूजामुहूर्तं चैवं वक्तुमाह पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथवि
ष्णुपूजा मासेऽष्टमे विष्णुविधातृजीवे लग्ने शुभे मृत्युगृहे च शुद्धे पूर्वं सीमंतोन्नयने उदितैः प्रोक्तैस्तिथिवारनक्षत्रलग्नै
रुपलक्षिते तृतीयमासि पुंसवनाख्यं कर्म विधेयं पुमान्सूयतेऽनेन कर्मणेति व्युत्पत्त्या पुंसवनकर्मणः पुंस्त्वहेतुता
यदाह शौनकः व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत् गर्भेऽव्यक्ते तृतीये चेच्चतुर्थे मासि वा भवेत् नृसिंहः सीमंतोन्नयन
स्योक्ततिथिवासरराशिषु पुंसवं कारयेद्विद्वान्सहैवैकदिनेऽथवेति विशेषमाह वसिष्ठः कुर्यात्पुंसवनं प्रसिद्धविधये
गर्भे तृतीयेऽथवा मासि स्फीततनौ तुषारकिरणे पुष्ये यवा वैष्णवे हित्वा कर्कटकं च युग्ममबलामन्येषु रिक्तेतिथौ
शुद्धे निधननाम्नि शुक्रशशभृद्विज्जेंज्यमित्रेंद्रिणां वासरे इति निधननाम्नि अष्टमस्थाने शुद्धे सर्वग्रहरहिते वृद्धवसिष्ठः
अष्टमस्था ग्रहाः सर्वे नष्टाः स्युस्ते शुभावहाः एवं सम्यक्परीक्ष्यैव कुर्यात्पुंसवनक्रिया इति वारास्तत्र सौम्यग्रहाणा
मुक्ताः बृहस्पतिरत्र विशेषमाह गुरुशुक्रबुधेंदूनां द्रेक्काणदिवसांशकाः तेषामुदयहोरास्तु पुंसवेति शुभावहा इ
ति अन्यैस्तु श्रीपत्यादिभिः पुंवारा एव प्रशस्ता अभिहितास्तत्फलान्याह गर्गः सौरे मृतप्रजा मंदे मृत्युर्वंध्या च भार्गवे
सोमे दुग्धविहीना स्याच्छेषाः सर्वार्थसिद्धिदा इति अत्र वचनद्वयप्रामाण्याद्विकल्पः यदा तृतीये मासि पुंसवनं चिकी
र्षितं तदा सौम्यवारा एव ग्राह्या यदा च चतुर्थे मासि गर्भस्य व्यक्तत्वात्पुंसवनं चिकीर्षितं तदा पुंवारा एव ग्राह्याः नक्षत्रा
स्तत्र पुंनामानि ग्राह्याणि तानि श्रवणः सकर इति श्रीपतिनोक्तानि वसिष्ठेन तु पुंनामान्यन्यथाभिहितानि यथा पुंना
मश्रवणं तिष्यः स्वाती हस्तः पुनर्वसुः मूलप्रोष्ठपदं चानुराधा मृगशिरोऽश्विनी विशेषमाह [illegible] हस्तादितिष्यम्

मु.दी.
सं.प्र.
८

लानि सौम्या विष्णुः पुनर्वसुः प्रोष्ठपदाद्वयं प्राकमाषाढाद्वयमेव च श्रेष्ठानि कथितान्येव धिष्ण्यान्येकादशैव तु स्वाती
तथा मघा याम्या चरेवत्या फाल्गुनीद्वये अश्विन्यां चैव न त्वेतेयदा पुंसवनं भवेत् नरः संपद्यते दैवाद्यदा स्याद्गुरुनस्पृशः लब्धोद्ग
स्वनतः क्रूरो नारी चेत्कुलटा भवेत् शेषाणि दश धिष्ण्यानि निंदितानि विशेषतः इति तदेतयोर्विरुद्धार्थयोर्वाक्ययोर्देशा
चारतो व्यवस्था तत्र वसिष्ठवाक्येन दाक्षिणात्या व्यवहरंति प्राच्यास्तु अन्येषां वाक्येन अथ लग्नशुद्धिमाह श्रीपतिः
मीनवृश्चिककुंभमेषचापगोसिंहकन्यकाः युक्ताः पुंसवनाद्येषु स्वपुत्रादिकं द्वित्रिकोणभवनेषु शुभस्थितेषु पापेषु ष
ड्विदशलाभगृहस्थितेषु जीवेंदुभानुसुतभूमिजलग्नगेषु शुद्धेषु लग्नपरिशुद्धशुभांशकेषु अत्रापि स्त्रीपुंसयोः चंद्रब
लमावश्यकमित्याह नृसिंहः अपि पुंसवनं कार्यं दंपत्योरनुकूलभे जन्मादि वर्जयेद्धात्रिं चाष्टकं विपदादि चेति
अथ गर्भरक्षार्थं विष्णुपूजामुहूर्त उच्यते अथेति सीमंतानंतरमष्टमे मासि विष्णुविधानं जीवैः श्रवणरोहिणीपुष्येषु
पत्नीहिते दिवसे तथा लग्ने शुभे शुभस्वामिके शुभयुक्ते वा लग्ने सति तथा मृत्युगृहे अष्टमस्थाने शुद्धे सर्वग्रहरहिते च सति
विष्णुपूजा कार्या यदाह प्रयोगपारिजाते वसिष्ठः मास्यष्टमे च गर्भस्य कुर्याद्विष्णोर्बलिक्रिया श्रवणे चैव रोहिण्यां
पुष्ये चैव प्रशस्यते द्वितीया सप्तमी चैव द्वादशी च शुभा तिथिः शुभग्रहोदयः शस्तास्तेषां च दिवसा अपि पापाख्यायारि
गाः श्रेष्ठा नेष्टाः सर्वेऽष्टमे स्थिता इति अष्टमग्रहदोषवारमाह गुरुः रंध्रेशस्वांशगः स्वोच्चे स्वक्षेत्रोपचयर्क्षगः अष्टम
स्थस्य दोषाय विनश्यति न संशयः नारदोपि लग्नाष्टमेशयोर्मैत्रे लग्नेशे बलसंयुते अस्तगे निधनेशे च निधने पि शुभो ग्र
ह इति वसिष्ठसंहितायां तु संक्षिप्योक्तं रोहिण्यां वा वैष्णवे पूर्वपक्षे द्वादश्यां वा सप्तमे च तिथौ वा, मध्ये चाह्नः पूर्वभागे
नुकूले विष्णोः पूजां कारयेद्गर्भगुप्त्यै तत्र पूजाप्रकारस्तेनैवोक्तः पीतांबरं कमलवर्णं शंखचक्रगदांबुजं वैकुंठवासिनं
विष्णुमष्टकुंभे स्थापयेत्ततः विष्णोः वस्त्रं कनकेन कृत्वा तल्लिंगमंत्रैरथ गंधपुष्पैः वस्त्रान्नतैर्गुग्गुलधूपदीपैर्नैवेद्यतांबू
लफलैः च सम्यक् विष्णुं च देवतां पूजां गर्भिण्यां रक्षणाय च ब्राह्मणेभ्यः प्रदातव्या प्रतिमा वस्त्रसंयुता इति गर्भरक्षार्थं वि
ष्णुपूजा अथ जातकर्मनामकरणयोर्मुहूर्तं सुपद्यानुपात्याह तज्जातकर्मादि दिशात्र विधेयं पर्वरिक्तौ न तिथौ शुभे द्भि

मु.
८

एकादशे द्वादशे वापि घुस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात् नन्विदमयुक्तं यज्जातकर्म शुभदिने कार्यमिति यदाह वसिष्ठः य
स्मिन्मुहूर्ते जननितः कुमारस्तस्मिन्विधेयं खलु जातकर्म संतर्प्य देवान्स्वपितॄन्द्विजांश्च सुवर्णभूगोतिलकांस्यवस्त्रैरिति
विष्णुरपि जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितमिति यथोदितं स्वस्वगृह्यानुसारेणेत्यर्थः तच्च श्रवणानंतरं सचैलस्नानं
विधाय कार्यं उक्तं च ज्योतिर्वसिष्ठेन श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत् उत्तराभिमुखो भूत्वा नद्यां वा देवखातके इति
तच्च पिल्लालच्छेदात्प्रागेव कार्यं प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयत इति वर्धनं छेदनं हृच्छेदन इति धात्वर्थानु
सारात् अत्र हेतुमाह जैमिनिः यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति
तस्माज्जातकर्म मुहूर्तोऽनुपपन्नः उच्यते संक्रान्त्यादिदुष्टकालेष्वशुभकर्मानाचरणमस्ति यदाह गर्गः व्यतीपाते च संक्रा
न्तौ ग्रहणे वैधृतावपि श्राद्धं विनाशुभं कर्म अप्राप्तेकाले पिनाचरेत् अन्यत्र अमासंक्रान्तिविष्ट्यादौ प्राप्तकालेपि नाचरेत्
किंच मूलज्येष्ठाचतुर्दशी गंडांतादिषु जन्मसंभवे शांतिविधानात् अथवा पितादेशांतरंगतो राजगृहादौ निरुद्धो वा जात
कर्मादिकर्तुमशक्तो वन्यः च प्रतिबंधापवादेन न गृहमागतोपि तन्नैव करोति तदैव जन्माभावात्सूतकप्रवृत्तेश्च तदाह बीज
वापः जन्मनोऽनंतरं कार्यं जातकर्म यथाविधि दैवादतीतः कालश्चेदतीते सूतके भवेत् अत एव कालिकोऽप्यभिहि
तो नारदसंहितायां तस्मिन्जन्ममुहूर्तेपि सूतकांते यथा शिशोः जातकर्म च कर्तव्यं पितृपूजनपूर्वकमिति इदं च ना
म्न्यायत्वात् नामकर्मण्यपि विधेयं तस्मादतिक्रांतकाले वश्यं जातकर्मादिमुहूर्तो विचार्य इत्यलमतिप्रसंगेन तज्जा
तकर्मादि पर्वाण्युक्तानि मयारिक्ताः ४ ९ १४ ताभिन्नेवर्ज्जिते तिथ्यौ जात्यभिप्रायेणैकवचनं शुभेह्नि व्यतीपातादिदो
षरहिते दिवसे शुभग्रहवासरे वा तथैकादशे द्वादशके वा घुस्रे दिने तथा च मृदुध्रुवक्षिप्रचरभानि प्रसिद्धानि तेषु च वि
शेषाद्बालस्य तज्जन्मसमयादतिक्रांते जातकर्मादि आदिशब्देन नामकर्माप्युच्यते तद्विधेयं कर्तव्यं स्यात् उक्तं च वसिष्ठेन
मृदुध्रुवक्षिप्रचरेषु भेषु चारिक्तपर्वाख्यदिनेषु कार्यं शुभग्रहाणां दिनलग्नवर्गे तज्जातकर्मत्वथ नामधेयमिति रत्नमा
लायां मृदुध्रुवक्षिप्रचरेषु भेषु सूनोर्विधेयं खलु जातकर्म गौरो मृगो वापि च तद्वदेव स्यात्संततः प्रशंसंति च नामधेयमिति च

मुटी· सं·पु· ९ तदुक्तं केदारादि जातकर्मप्रयोजनमाह गुरुः जातकर्मक्रियां कुर्यात्पुत्रायुःश्रीविवृद्धये ग्रहदोषविनाशाय सूतकाशुभ
विच्छिदे कुमारग्रहनाशाय पुंसां सन्तानविवृद्धये इति अथ नामकर्मणि विशेषविचारः नारदः सूतकांते नामकर्म विधेयं
स्वकुलोचितमिति नक्षत्रादिनियमाभावान्नियतकालविहितत्वात् तदुक्तं सारसंग्रहे एकादशेह्नि विप्राणां क्षत्रिया
णां त्रयोदशे वैश्यानां षोडशे नाम मासांते शूद्रजन्मनः इति मनुस्तु नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् पुण्ये तिथौ
मुहूर्ते च नक्षत्रे वा गुणान्विते दशम्यामतीतायामेकादशादिदिवसे इत्यर्थः एतच्च ब्राह्मणविषयं पूर्वोदीरितवाक्यस्वरसा
त् अत्र नामकरणेपि विहितकालातिक्रमे शुक्रास्तादिदोषरहिते शुभकाले तत्कार्यं वराहकश्यपः उक्तकाले प्रकर्त
व्या छिन्नानामखिलाः क्रियाः अतीतेषु च कालेषु कर्तव्याश्चान्तरायेण सुरेज्येप्यसुरेज्ये वा नास्तगे न च वार्धके शु
भलग्ने शुभांशे च शुभेह्नि शुभवासरे चंद्रताराबलोपेते नैधनादयवर्जिते पूर्वोक्ते क्षिप्रनक्षत्रचरस्थिरमृदुषु ना
ममंगलघोषैःसुरहस्यं दक्षिणेकृतं बृहस्पतिः पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः अपराह्णं च रात्रिं च वर्जयेन्ना
मकर्मणि तथा जगन्मोहने गुरुः पक्षच्छिद्रा च नवमी रिक्ता पंचदशी तथा शेषास्तु तिथयः सर्वा नामकर्मणि पूजिताः
भास्करार्कजभौमानां वर्जयेदंशकोदयौ धनकर्मसुतस्थानस्थः शुभः शशी शुद्धव्ययाष्टमे लग्ने पापाः सुखहारिणः
भगाः शुभेषु शेषसंस्थेषु नामकर्म शुभावहमिति प्रयोजनमस्मिन् येन नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भा
ग्यहेतुः नाम्नैव कीर्तिं लभते मनुष्यः ततः प्रशस्तं खलु नामकर्म तच्च नाम जन्मनक्षत्रचरणलक्षितस्वरोदयाभिहितशतप
दचक्रांतर्गताक्षरादिकमेव कार्यं उक्तं च गृह्यपरिशिष्टे नक्षत्रादिकं नाम यस्मिन्धिष्ण्ये यदक्षरमिति शतपदचक्रसारो
द्धारे ज्योतिषार्के भिहितो यथा चूचेचोला परे दास्रे लीलूलेलो यमस्य भे आइउए इमे ग्नेभे ओवावीवू तथा कभे वे
वाकाकी स्यादगे आगुतःकूघङछा रौद्रभे केकोहाही त्वदितिभे हूहेहोडा च पुष्यभे डीडूडेडो इमे सार्पे मामीमूमे मघाभिधे
मोटाटीटू तथा भाग्ये टेटोपापी यमक्षाह्वके पूषाणठा तथा हस्ते पेपोरारी तिचित्रभे रूरेरोता तथा स्वातौ तीतूतेतो तु द्विदैव राम ९
भे नानीनूने क्रमान्मैत्रे नोयायीयू इतीन्द्रभे येयोभाभी विमूलाख्ये भूधाफाढा तत्त्वलस्य भे भेभोजाजी तिविश्वर्क्षे जूजेजोखा

भिजिद्भवेत् खी खू खे खो श्रुतौ ज्ञेया गा गी गू गे च वासवे गो सा सि सू शततारे से सो दा दी त्वजांघ्रिभे दू था झा ञा ततोऽर्यमे
दे दो चा ची पि पौष्णभे इति प्रोक्ता इमे पद्यवर्णा नामादिजाः स्फुटाः ज्ञेया मेषादिराशीनां नवभिर्नवभिः पदैः एतैरादिमा
क्षरैः चूडामणिरित्यादीनि नामानि स्थाप्यानि तदुक्तं शंखेन कुलदेवता नक्षत्रादिमाससंबद्धं पिता वा कुर्यादन्यो पि वा
कुलवृद्ध इति अत्र केचिज्जन्मनाम गोप्यमेवेति स्मरन्ति जन्मनक्षत्रसंबंधिनाम गुप्तं संस्थाप्य व्यवहारार्थमन्यन्नाम कार्यमि
त्यत्र नाम कीदृशं कार्यमित्याह तद्व्यक्षरं चतुरक्षरं वा यथेप्सितं वा तल्लकाररेफ विवर्जितं नामादिकमेव कार्यं स्फु
टं च देहलिणकर्णे रंध्रे इति याज्ञिका अपि पठंति घोषवदाद्यंतरंतस्थं त्रिपुरुषानूकमनरिप्रतिष्ठितं द्व्यक्षरं चतुरक्षरं
वा कृतं कुर्यान्न तद्धितमिति कृतं तेऽक्षरं तं तद्धितं तद्धितांतं घोषवदादीनां वर्णानां कृदंतं तद्धितांतानां च ज्ञानं व्याकरणशा
स्त्राज्ज्ञेयं विस्तरप्रकाशपद्धतौ तु विशेषः कुमार्या अयुग्वर्णाक्षरेण नाम सद्ध्यादिति नाम नामानि वसिष्ठेनोक्तानि चैत्रा
दिमासनामानि वैकुंठोऽथ जनार्दनः उपेंद्रो यज्ञपुरुषो वासुदेवस्त्रिविक्रमः योगीशः पुंडरीकाक्षः कृष्णोऽनंतोऽच्युतस्तथा
चक्रधारीति चैतानि क्रमादाहुर्मनीषिण इति कुलदेवतास्तु वंशपरंपरया प्रसिद्धाः अत्रान्यो नामसंयुक्तो विशेषः स्मृ
तिभ्योऽनुसंधेयः इति नामकर्म समाप्तं अथ बालजन्मानंतरं प्राप्तं शिष्टाचारप्राप्तं प्रसूतीस्नानं वसिष्ठेन तिलक आह पौ
ष्णध्रुवेंदुकरवातहयेषु सूती स्नानं समित्रभरवीज्यकुजेषु शस्तं नार्द्रात्रयश्रुतिमघांतकमिश्रमूलत्वाष्ट्रे ज्ञसौरवसु
षड्रिक्ततिथ्यां पौष्णं रेवती ध्रुवाणि प्रसिद्धानि इंदुर्मृगः करो हस्तः वातः स्वाती हयोऽश्विनी एषु समित्ररविकुजे
षु अनुराधानक्षत्रस्थे गुरुभौमवारसहितेषु सूत्याः प्रसूताया स्त्रियाः स्नानं शुभफलदं तदुक्तं दैवज्ञवल्लभे
उत्तरात्रयरोहिण्यः सौम्यः पवनरेवती प्रसूतावनितास्नायादस्त्रमैत्राश्विनीषु च स्नातां प्रसूताथ सुतां बुधेन स्नानाच
वंध्या भृगुनंदनेन सोमेऽस्रभिः स्त्री रहति स्म सोमपुत्रार्थलाभा रविजीवभौमे अन्ये तु पूर्वाफल्गुण्युत्तराषाढा धनिष्ठास्वपि प्रसू
तीस्नानं वदंति करेंद्रभाग्यानिलवासवांत्यमैत्रेंदवाश्विध्रुवभेषु किंपुंसां तिथावरिक्ते शुभमाममंति प्रसूतिकास्नानवि
धिं मुनींद्रा इति अथ निषिद्धनक्षत्राण्युच्यंते आर्द्रात्रयमार्द्रापुनर्वसुपुष्याः श्रुतिमघांतकमिश्रमूलत्वाष्ट्राणि सिद्धानि

मु.दी.
सं.प्र.
२०

द्वैकवद्भावः एवं दशानक्षत्रेषु सूतीस्नानं न शस्तं पुनः सूतेरभावादितात्पर्यार्थः तथाज्ञो बुधः सौरः शनिः तथा वसुरष्ट
मीषद् षष्ठी रविद्वादशी रिक्ताः ४ ६ ९ १४ बुधशनिवारयोरेतासु तिथिषु न शस्तं तदुक्तं दैवज्ञमनोहरे भरणी कृत्तिकाश्च
लमार्द्रा पुष्यः पुनर्वसुः मघा चित्रा विशाखा च श्रवणो दशमस्तथा एषु भे च बुधे वारे सूता स्नानं न कारयेत् यदि स्नानं
प्रकुर्वीत पुनः सूतिर्न विद्यत इति एतच्च दाक्षिणात्यानामनुमन्यंते यतः सूतिकास्नानं वरं न्यात हि नेष्टसूतका द्विर्वानाद्यः
कल्पः यदि सूतकमध्ये षष्ठिकाश्राद्धं क्रियमाणमपि स्नानं चंडालस्पृष्टतहस्तपुरुषवन्निष्फलमेव शुद्ध्यभावात् नापि द्वि
तीयः सूतकानंतरमेव शुद्ध्यापादकस्नानस्य विहितत्वात् यद्यपि दैवज्ञवल्लभवाक्यं तदाचारमूलकं न स्मृतिमूलक
मिति मत्वा संतोष्टव्यं अथ प्राच्यमते नैव जन्मानंतं बालस्य स्तनपानमुहूर्त उच्यतेऽस्माभिः रिक्तां भौमं परित्यज्य विष्टिं
यातं स वैधृतं मृदुध्रुवक्षिप्रभेषु स्तनपानं हि तं शिशोरिति दैवज्ञवल्लभोक्तेः अथ संस्कारानंतर्गत प्रथमादिमासोपप
न्नदंतफलप्रसंगतः शार्दूलविक्रीडितेनाह मासे चेत्प्रथमे भवेत्सदशनो बालो विनश्यत्स्वयं हन्यात्सक्रमतोऽनुजातभ
गिनीमात्रग्रजान्द्व्यादिके षष्ठादौ लभते हि भोगमतुलं तातात्सुखं पुष्टतां लक्ष्मीं सौख्यमथो जनौ सदशनो वाऽर्ध्वं स्वपित्रा
दिहा बालकश्चेज्जन्मानंतरं प्रथमे मासे सदशनो दंतयुक्तो भवेत्स्यात्तदा स्वयं विनश्येत् ततो द्व्यादिके द्वितीयमासे
स बालको दंतयुक्तो भवेत्स्यात्तदानुजातभगिनीमातृग्रजान्क्रमतो हंति यथा द्वितीयमासेऽनुजातं कनिष्ठभ्रातरं तृती
यमासे भगिनीं हंति चतुर्थे मातरं हंति पंचमे मासेऽग्रजं ज्येष्ठभ्रातरं हंति षष्ठादिमासेषु दंतजन्म समीचीनफलं यथा
षष्ठे तु लब्धकुलं भोगं लभते एवं सप्तमे तातात्पितृतः सुखं लभते नवमे लक्ष्मीं लभते दशमे सौख्यं लभते एतच्चो
पलक्षणं एकादशे मासेऽपि सौख्यमेव द्वादशे मासे सुखबाहुल्यं लभते इत्यर्थः यदाह चंडेश्वरः प्रथमे दंतजननात्स्वयमे
व विनश्यति द्वितीये भ्रातरं हंति तृतीये भगिनीं तथा चतुर्थे मातरं हंति पंचमे चात्मनोऽग्रजं षष्ठे च मंत्रजीवी स्यात्सप्तमे
पितृसौख्यदः अष्टमे पुष्टिजनको नवमे लभते धनं लभेत दशमे मासि सौख्यमेकादशेऽपि वा द्वादशे सुखसंपत्तिर्दंतानां जन
ने फलमिति अथोऽर्ध्व इति जनौ जन्मकाले एव सदशनो दंतयुक्तः स्यात्तदा स्वपित्रादिहा स्वमात्मानं पितरं च हंति अथादिशब्दे

राम
२०

शांतिः सर्वकृत्यानि भौमसंगरोयुडं बुधेशास्त्रमध्येतव्यमध्याप्यं वा गुरौ विवाहः शुक्रे गमागमनं शनौ दीक्षणं या
गादि दीक्षा विधेयेत्यर्थः उक्तं च श्रीपतिना रविनृपविलोकनेश्वरगुरुर्विवाहोत्सवे रणे धरणिनंदनो भृगुसुतः प्रयाणे बली
शनिश्रमखदीक्षणे सकलशास्त्रबोधे बुधः शशी सकलकर्मसु ध्रुवमुदाहृतः सूरिभिः वसिष्ठेनापि राज्ञा लोकनसमये
रविरार्यः करजलग्रहे सुबली रणसमये धरणिसुतप्रयाणे समर्था सतोतिबली दीक्षणसमयेर्कः सुतः शास्त्रितनयो ज्ञान
शिल्पविधौ निखिलेष्वपि कार्येषु तं द्बलं स्वारव्यमखिलनृणामिति एतान्यपि कार्याणि सबलग्रहवारे क्रियमाणानि
सिद्धं नीत्याह वसिष्ठः बलप्रदस्य ग्रहवासरे यच्चोपदिष्टं समुपैति सिद्धिं सुदुर्बलस्य ग्रहवासरे तत्प्रयत्नपूर्वं त्वयि नैव सा
ध्यमिति ग्रहे तिलप्तषष्ठीकं पृथक्पदं ग्रहस्येत्यर्थः बलप्रददुर्बलत्वे गोचरप्रकरणोक्तविहितानुक्तस्थानवशेन ज्ञेये तदा
ह श्रीपतिः वारे ग्रहस्योपचयावहस्य कार्यं यथोद्दिष्टमुपैति सिद्धिं भवेत्तदेवापचयावहस्य प्रयत्नतो निर्मितमप्यसा
ध्यमिति अथेति ताराबलतो विधुः शुभो ज्ञेयः यदा चंद्रसंक्रमणं स्यात्तदा ताराबलं चेत्स्यात्तदा सपाददिनद्वयं चंद्रः शुभो
पि शुभः ताराद्दोषादि शुभोप्यशुभ इत्यर्थः परे भौमादयः संक्रांतिं चिकीर्षवः संतस्तत्तु लतः सूर्यबलादशुभापि शु
भा ज्ञेयाः स्वस्वत्रिभोगकालावधि रविदोष्यत शुभा अप्यशुभा इत्यर्थः वराहकश्यपः ताराबलेन शीतांशुर्बलं वास्त
दुष्णाद्दविः बलीसंक्रममाणस्य वशात्तेषां ताराबलाधिकाः याद्दृशेनेंदुना भानोः संक्रांतिस्तादृशं फलं नरः प्राप्नोतित
द्वाशेः शीतांशोः साध्वसाधु तदिति संक्रममाणस्य रवेरित्यध्याहारः यत्तु दीपिकायां याद्दृशेन शशांकेन ग्रहः संचरेत्
नृणां तादृशं फलमाप्नोति शुभं वाप्यशुभमिति चंद्रवशेनैवाखिलग्रहसंबंधि शुभाशुभत्वमुक्तं तत्तु ग्रह इत्येकव
चननिर्देशाल्लिखितकश्यपवाक्यस्वरसाच्च सूर्य एव ग्राह्यो नान्य इति तट्टीकाव्याख्यातं अन्यथा संचरेत्सूर्ये हो नृणामि
त्यवक्ष्यत् अथाधिमासक्षयमासयोः संक्रांत्यधीनत्वात्तयोर्निर्णयः प्रस्तूयते तत्र तल्लक्षणमुपजात्याह स्पष्टार्कसं
क्रांतिविहीन उक्तो मासोधिमासः क्षयमासकस्तु द्विसंक्रमः तत्र विभागयोः स्युस्तिथ्यर्हि मासौ प्रथमोत्यसंज्ञौ शुक्ल
पक्षप्रतिपदादिदर्शांतः चांद्रोमासः स चेत्स्पष्टसूर्यसंक्रांत्या विहीनो भवेत्तदाधिकमास उक्तः उक्तं च ब्रह्मसिद्धांते चांद्रोमा

सं॰प्र॰
मुहू॰
२२

मासः द्वि॰ १

द्यसंक्रांतो मलमासः प्रकीर्तित इति न विशेषः कदाचित्क्षयापरपर्यायः कदाचित्त्वचांद्रो मासो द्विसंक्रमो द्वौ संक्रमौ
सूर्यसंक्रमौ यस्मिन् स द्विसंक्रमः स एव सूर्यसंक्रांतिद्वययुतः क्षयमास उक्तः यदाह वसिष्ठः यस्मिन्पक्षे सपातात् दर्शांगे वा
परं दर्शं उल्लंघ्य भवति भानोः संक्रांतिः सोधिमासः स्यात् आद्यंतयोर्दर्शयोर्मध्ये भानो रवेस्तयोर्यदा संक्रांतिद्वयं स्याच्चे
न्न्यूनमासः स उच्यते एतौ चाधिमासक्षयमासौ स्पष्टमानेनैव ज्ञेयौ यदाह कश्यपः यस्मिन्मासे र्कसंक्रांतिर्दर्शांतात्प्राक् पुनः
परं दर्शं मुल्लंघ्य भवति स समयोधिमासकः आरभ्य शुक्लप्रतिपत्प्रवेशात्संक्रमद्वयं ---- तान्प्राक् न्यूनाख्यस्तद
पतिः स्फुटार्कसंक्रमाद्वेद्याद्यूनमासाधिमासकौ मासौ न्यूनाधिकौ तौ न सर्वकर्मबहिष्कृताविति सिद्धांतशिरोमणाव
पि असंक्रांतिमासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्षयाख्यः कदाचित् इति स्फुटः स्फुटेंदुमासः स्फुटत्वमपि तत्रैव स्पष्टोधिमा
सः पतितोप्यलब्धो यदा यदा वा पतितोपि लब्धः सैकैर्नगैरकैः क्रमशोधिमासस्तदादिनौ चः सुधिया प्रसाध्य इति अत्राधिमा
सक्षयमासप्रयोजनं नोक्तं मानप्रकरणे वक्ष्यमाणत्वात् शिष्टत्वहेतुत्वमितयोर्न्यूनाधिमासे तत्रैत्यादिनोक्तत्वात् क्षयमासे
परं कश्चिद्विशेषो वक्तव्योस्ति सोत्रैवाभिधातुमुचित इत्याह तत्रेति तत्र क्षयमासे मासद्वयसंज्ञा शुक्लकृष्णविभेदेन त
स्याः सप्रयोजनविषयकत्वात् नोच्यते विभागयोरिति क्षयमासे हि जातानां वर्द्धापने मृतानां श्राद्धे च तिथेर्विभागयोः श
र्वोत्तरदलयोः संबंधेन प्रथमांत्यमासौ संज्ञौ तः स्यातां तिथिपूर्वार्द्धे जातानां मृतानां वा पूर्वमासे वर्द्धापने श्राद्धं च विधे
यं तिथेरुत्तरार्द्धे जातानां मृतानां चोत्तरमासे वर्द्धापने श्राद्धं च विधेयं तदुक्तं मरीचौ तिथ्यर्धे प्रथमे पूर्वोपरस्मिन्नपरः
तथा मासाविति बुधैः चिंत्यौ क्षयमासस्य मध्यगाविति अत्र न्यूनाधिमासविषयको भूयान्विचारो वक्तव्योस्ति सोस्म
त्पितृचरणैः शोडरानंदे कालशुद्धिसौख्ये सप्रपंचं निरूपितस्तत एवावधार्यः इह तु ग्रंथगौरवभयात्प्रस्तुतविचारानर्हत्वा
च्च नास्मद्विचारानर्हत्वाच्च नास्माभिः कृत इति शिवं अथ संक्रांतिप्रकरणं ग्रंथेनोपसंहरति ज्योतिर्विद्वरनीलकंठविदुषः
श्रीचंडिकायास्तथा पुत्रेण हि गवीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मितेन यतिनिधौ पीयूषधाराभिधे व्याख्या
नेऽखिलसंक्रमप्रकरणं संपूर्णतामध्यगात् इति श्रीगोविंददैवज्ञविरचितायां मुहूर्तचिंतामणिटीकायां संक्रांतिप्रकरणं
समाप्तं ३

षष्ठं च नवमीं तथा जन्माख्याष्टमीतारा नक्षत्रभा नापि निंदितेति इति चौलप्रकरणं अथ चौलाधिकृत्यैकालविशेष
निषेधमप्युष्टमाह ऋतुमत्याः सूतिकायाः सूनोः चौलादि नाचरेत् ज्येष्ठापत्यन ज्येष्ठे कैश्चिन्मार्गेपि नेष्यते ऋतुः स्त्रीधर्मः
स यस्या विद्यते सा ऋतुमती तस्याः सूतिकाया जातापत्यायाः सूनोः पुत्रस्योपलक्षणत्वात्कन्याया वा चौलोपनयन
विवाहाद्युक्तवक्ष्यमाणकृत्यं नाचरेन्नकारयेत् उक्तं च प्रचेतसा यस्य मांगलिकं कृत्यं तस्य माता रजस्वला वैधव्यं जाय
ते तत्र नूनार्यैः पाणिपीडने पाणिपीडने वैधव्यमन्यत्र मृत्युरित्यर्थः सूतिकायाश्चापि कर्मानर्हकाल उक्तो विष्णुस्मृतौ
सूतिकां पुत्रवतीं विंशतिरात्रेण कर्म कारयेत् मासेन स्त्रीजननीमिति अस्यार्थे केचिदाहुः सर्ववर्णस्त्रीणां पुंप्रसूतौ
बालकजन्मदिनाद्विंशतिमदिनं यावदशुचिता ततः शुद्धिः एवं कन्याप्रसूतौ तासां स्त्रीणां कन्याजन्मदिनात्त्रिंशद्दिनं
यावदशुचिता ततः शुद्धिरित्यर्थः एतदन्ये नानुमन्यंते यतः शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशा
हेन शूद्रो मासेन शुद्ध्यति इति ह्येवं वर्णपुरस्कारेणाशुचिताहान्युक्तानि तत्र पुंजननयित्र्या ब्राह्मण्याः सूतकनिर्ग
मनदिनाद्दशैवाशुचितादिनान्यवशिष्यंते कन्याजननयित्र्यास्तु तस्यास्तस्मादेव विंशतिर्दिनानि क्षत्रियायास्तु पुंक
न्याजननयित्र्याः क्रमादष्टदश दिनानि तस्मात्कालादवशिष्यंते वैश्यायास्तु पुंकन्याजननयित्र्याः पंचपंच दिनान्यवशि
ष्यंते शूद्रायाः पुंजननयित्र्याः दश दिनानि सूतककालेन्यूनानि जायंते कन्याजननयित्र्यास्तु दिनसाम्यमेवेति सर्वव
र्णाननुगतमशौचमिति प्रसक्तमव्यापकं च लक्षणमापतितमस्तीति चेन्न यद्येषाभिप्रेतः स्यात्तदा महता वाक्येनेममर्थं
स्पष्टं निर्दिशेत् अतोनुगतमर्थांतरमाहुरन्ये यथा स्वस्ववर्णपुरस्कारेण यत्राशौचकालोभिहितः स सर्वेषां तत्कुल
जानां तत्र एव तदग्रे सर्वेपि शुचयः पुंजननयित्र्यास्तु सूतिकायास्तदग्रे विंशतिदिनानि अशुचिता कन्याजननयित्र्या
स्त्रिंशद्दिनान्यशुचितेत्यर्थः अत एव सूतिकाया उक्तकालपर्यंतं कर्मानर्हत्वात्तदपत्यस्यापि मंगलकृत्यनिषेधः ज्ये
ष्ठेति ज्येष्ठापत्यस्याद्यगर्भस्य पुत्रस्य कन्याया व्रतबंधविवाहादिशुभकृत्यं ज्येष्ठमासे न भवति तदुक्तं रत्नमालायां आ
द्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु जातु मंगलमिति कैश्चिदिति मार्गेपि मार्गशीर्षमासेपि कैश्चिदाचार्यैराद्य

मु.टी.
सं.प्र.
२

गर्भस्तनकन्ययोर्मंगलकृत्यं नेष्यते यदाह वात्स्यः मार्गे मासे तथा ज्येष्ठे विवाहं चौलमेव च ज्येष्ठपुत्रदुहित्रोश्च नकु
र्वीत व्रतं तथा भारद्वाजोपि मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयं व्रतं आद्यपुत्रदुहित्रोश्च यत्नेन परिवर्जयेत् अस्मादेव वच
नकाद्द्वितीयादिगर्भपुत्रदुहित्रोः ज्येष्ठे मार्गशीर्षे च न मंगलकृत्यानां निषेधः किंतु विधिरिति प्रतिभाति अत्र क
श्चिद्विशेषो वक्तव्योस्ति स व्रतबंधप्रकरणे वक्ष्यते अथ प्रसंगतः सामान्यक्षौरादि मुहूर्तं तन्निषिद्धकालं च शार्दू
लविक्रीडितेनाह दंतक्षौरनखक्रियात्र विहिता चौलोदिते वारभे पातंग्यार रवीन्विहाय नवमं षष्ठं च संध्यां तथा
रिक्तां पर्वनिशां निरासनरणग्रामप्रयाणे दित स्नाताभ्यक्तकृताशनैर्न हि पुनः कार्या हितप्रेप्सुभिः चौलोदि
ते चौलप्रोक्तेषु वारेषु नक्षत्रेषु उपलक्षणत्वान्तदुक्तलग्ने च दंतक्षौरनखक्रिया च विहिता उक्ता उक्तं च येषु येषु प्रश
स्तं निक्षुरकर्म महर्षयः तेषु तेषु प्रशंसंति नखदंतविलेखनमिति येषु येषु वारनक्षत्रलग्नादिष्वित्यर्थः अथ क्षौरे निषिद्ध
काल उच्यते पातंगीति पतंगः पक्षिसूर्ययोरित्यभिधानात् पतंगः सूर्यस्तस्यापत्यं पातंगिः शनिः आर रवीश्च सिद्धो एषां
वारान्विहाय तत्काल उपलक्षणत्वात् एषां लग्नानि मकरकुंभमेषवृश्चिकसिंहाख्यानि अंशकांश्च विहायेत्यर्थः उ
क्तं च वसिष्ठेन हस्तत्रये पुष्यपुनर्वस्वोश्च शशांकविष्णुविष्णुत्रितये श्विनीषु पौष्णे च धिष्ण्ये क्षुरकर्म शस्तं नार्कारमं
दाकवारलग्नेश्विति अतः शुभग्रहाणां वारलग्नेषु क्षौरं कार्यमिति फलितोर्थः वारफलानि गर्गोक्तानि भानुरायुःक्षणय
ति मासं सप्त शनैश्चरः भौमो मासाष्टकं हंति ज्ञो यच्छेत्पंचमासकं सप्तमासानूददातीडः सरेजोपदशमासकं एकादश
क विदध्यात्सोमो तेन क्षौरकर्मणीति तत्स्वल्पायत्वाल्लग्नभानामेशानां चैतानि फलान्यूह्यानि न केवलमायुर्हानिः किंतु श
स्त्रपातोपि पापवारेषु तदुक्तं वसिष्ठेन आदित्यभौमार्कि दिनेषु धीमान्दंतकाष्ठक्षुरकर्म कार्यं कुर्वन्नवाप्नोति फलं समग्रं
शास्त्रेण सम्यक्स्वशरीरघातं तथा नवमं षष्ठं संच विहाय यद्दिने क्षौरं कृतं तेनान्मदिने क्षौरं न कार्यं उक्तं च भूषिते चैव या
नेनानवमे हनीति नारदोक्तेः यत्तु नवमेन वम्यामिति व्याकुर्वंति तदयुक्तं दिनपदानुपादानप्रसंगात् दिनपदं तिथिपरमि राम:
ति चेन्न रिक्ता यावत्प्रमाणत्वं तत्र निषेधानुपपत्तेः ननु षष्ठ्यष्टम्यादानां नवम्यां सर्वथा क्षौरं निंद्यमेव चतुर्थी चतुर्दश्यो स्तत २

ध्यानेति चेत् चतुर्थी चैव षष्ठी चाष्टमी च चतुर्दशी तथा पंचदशी चैव ब्रह्मचारी भवेत्तदा श्मश्रुकर्म शिरोऽभ्यंगं दंतधाव-
नं मैथुनं जंतश्चैतानि यः कुर्याल्लक्ष्मीस्तस्य नश्यतीति क्षौरव्यासवचनेन चतुर्थीचतुर्दश्योः सर्वथा निषेधाभिधाना-
त् अत एवामुमर्थं स्फुटमाह पराशरः क्षौरार्हा न नवमे तथा रिक्ते नेष्टमात्यापि केष्वपि इति तथा संध्यां प्रातः संध्यां सायंसंध्यां
च विहाय रिक्तां ४ ९ १४ विहाय पर्वाण्यपि निशां रात्रिमपि विहायेत्यर्थः अथाधिकारिणो निरूप्यंते हितप्रभृभिः
स्वश्मश्रुभोरकैर्मिरुक्ष्णिरेताहश्रैः क्षौरक्रिया हि निश्चयेन कार्या कीदृशैर्निरासनैरासनं कंबलादि तद्रहितैः रलः सं
ग्रामः ग्रामो जनपदविशेषः प्रयाणमर्थयात्रा एतदर्थमुद्यतैः कृतोद्योगैः स्नातैः अनुष्ठितनित्यनैमित्तिकस्नानैः य-
तः क्षौरार्थमेव स्नानं विधीयते प्रायश्चित्तादौ च तत्र नायं निषेधस्तत्रैव तस्य विधानात् अभ्यक्तैः कृततैलाभ्यंगैः कृताश-
नैः कृतभोजनैः सुवर्णालंकारभूषितैरित्यपि ध्येयं यदाह वराहः न स्नातमात्रगमनोत्कटभूषितानामभ्यक्तभुक्तरणका-
लनिरासनानाम् संध्यानिशाशनिकुजार्कदिने च रिक्ते क्षौरं हितं न नवमेऽह्नि तथापि विष्ट्यामिति उत्कटानां कुक्कुटासनवद-
स्थितानां संध्यालक्षणमपि वराहेणोक्तं अर्धास्तमितादुदितात्स्पष्टं न भो यावत् वृद्धगर्गः शुन्यारविवारेषु राज्ञा
पातेव्रते हनि श्राद्धाहे प्रतिपद्रिक्ता भद्राः क्षौरेऽपि वर्ज्येयत् षष्ठ्यां माघपूर्णिमापातश्च चतुर्दश्यष्टमी तथा आप्तसन्निहि-
तपार्वतिले मासे क्षौरे भगोऽइति अथ केषांचिन्निमित्तविशेषे क्षौरस्य विधिनिषेधौ मंजुभाषिणी(?)कृद्दसाह अनुपाणिपी-
ड्मृतिबंधमोक्षणे क्षुरकर्म च द्विजनृपाज्ञया चरेत् शववाहतीर्थगमसिंधुमज्जनक्षुरमाचरेत्त्वनुगर्भिणीपतिः अत्र व-
धोरत्यपि निषिद्धवारादौ एषु कर्मसु क्षुरकर्म क्षौरं सद्यः कार्यमिति वाक्यार्थः क्व अतो यत्र विप्राज्ञया क्षौरं तथापि पा-
णिपीडा विवाहो लक्षणया ततः प्राग्भाविनि गोदानकर्मणि केचित्तु विवाहे श्मश्रुकर्मप्राशस्त्यपरं क्षौरमित्याहुः अ-
परे शाखाविशेषेण विवाहे क्षौरमित्यूचुः तथा वाहस्मृतिः मुंडयित्वाः आविष्टायनाव धूम्रद्धामित्यादि मृते माता पित्रो-
र्मरणे बंधमोक्षणे कारागृहे बद्धस्य यदा मोचनं भवेत्तदा द्विजाज्ञया यद्वा राजाज्ञयापि तत्राख्यातं नृपो राजा तस्याज्ञ-
या चौरादेः क्षौरं कार्यमेव यदाह नारदः नृपविप्राज्ञया यज्ञे मरणे बंधमोक्षणे उद्वाहे खिलवारर्क्षे तिथिषु क्षौरमिष्टमि

मु॰टी॰
सं॰प्र॰
२२

ति धर्मशास्त्रेपि गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि आधाने च सोमपानेषु क्षौरं विधीयत इति अन्यत्रैव
राजकार्यनियुक्तानां नटानां दूरपत्नीविनां श्मश्रुरोमनखच्छेदे नास्ति कालविशोधनमिति अथ शावेति गर्भिणी गर्भवती तस्याः
पतिर्भर्ता शववाहं मृतकवहनं तीर्थगमनं तीर्थयात्रां उपलक्षणत्वाद्दूरदेशगमनमपि सिंधुमज्जनं समुद्रस्नानं क्षौरकर्मैता
निकर्माणि नाचरेन्न कुर्वीत यदाह वसिष्ठः गृहनिर्माणमुदधिस्नानं चौलमुत्सवमप्यत्र तीर्थयात्रां नखश्मश्रु न कुर्याद्गुर्विणी
पतिः अयं च क्षौरादिनिषेधो गुर्विणीपतेः सप्तमासादूर्ध्वं न प्राक् यदुक्तं नारदीये वपनं मैथुनं तीर्थं वर्जयेद्गुर्विणीप
तिः श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित् श्राद्धं श्राद्धभोजनं इदमुत्तरार्धं गगनप्रमेयं गर्भाधानप्रकरणे वक्तव्यमपि
प्रसंगादत्रैवोक्तं ग्रंथगुरुतेति अथ क्षौरे राज्ञां विशेषं सर्वथा वर्ज्यान् क्षणनक्षत्राणि च भुजंगप्रयातेनाह नृपाणां हितं क्षौर
भे श्मश्रुकर्मे दिने पंचमे पंचमे स्योदये वा षडग्निस्त्रिमैत्राष्टकः पंचपित्र्यावृता यमात् क्षौरकृन्मृत्युमेति क्षौरभविहि
ते क्षौरनक्षत्रे सति पंचमे पंचमे एव दिने श्मश्रुकर्म सुवेशाभाकारि क्षौरकर्म नृपाणां राज्ञां हितं प्रशस्तं यदाह वसिष्ठः
महीक्षितां पंचमे पंचमेऽह्नि क्षौरं च कार्यं हितमुक्तमेभ्यः ननु पंचमे पंचम इति वीप्सान्नयानियमप्रतीतेर्विहितनक्षत्राभावे च
सन्ति श्मश्रुकर्माकरणमेव स्यादित्यत आह स्योदये वेति वा अथवा क्षौरभस्योदये श्मश्रुकर्म कार्यमिति उक्तं च वसिष्ठेन
न लभ्यते चेन्नु नक्षधिष्ण्यं तदाऽऽदये वा निखिलं विधेयमिति उदयप्राप्तेन मुहूर्तेन इति अत्र केचिद्व्याकुर्वंते तदाह गर्गः क्षौरकर्म
महेशानां पंचमे पंचमेऽहनि कर्तव्यं क्षौरनक्षत्रेप्यथवा तन्मुहूर्तके इति तेषां क्षौरनक्षत्राणां ये स्वामिनस्तेषां मुहूर्ते उत्प
ष्टेः तान्मुहूर्तान्विवाहप्रकरणे वक्ष्यति अत्र क्षौरकर्मपदं श्मश्रुकर्मपरं राज्ञा योगी पुरंध्री च मातापित्रास्तुजीवनाः
मुंडनं सर्वतीर्थेषु न कुर्याद्गर्भिणीपतिरिति राज्ञां मुंडननिषेधात् अत एवोक्तं श्रीपतिना श्मश्रुकर्म पंचमे पंचमेऽह्नि भूभृतां
क्षौरभे स्वोदये नियतारकान्वेदिति नियतारकाः जन्मत्रिपंचसप्ततारा: अन्ये त्वेवं व्याचक्षते स्योदये वेति अस्य क्षौर
भस्योदये लग्ने यथा मेषलग्नं त्रिंशद्भागात्मकं तत्राद्यास्त्रयोदशभागाः सप्तविंशतिलिप्ता यावता कालेन मेषलग्ने उदयं
यांति तावदश्विनी नक्षत्रमुदयं यातीति ध्येयं तदनंतरं तावंत एवांशा तावता कालेनोदयं यांति तावद्भरण्युदय इत्यनु

६७ =

रा॰
२२

नमातरं च हंति नाशयतीति स्वपित्रादिहातृके चित्रादिशब्देन आद्वारीनपि चव्याचष्टने वोध्यमिति वाथवा उर्ध्वमूर्ध्वपंक्तौ स्वजन्मानंतरं निषिद्धे विहितेपि वा काले सदशनःचेत्स्यात्तदा स्वपित्रादिहा आत्मपितृमातृनाशकद्दत्यर्थः उक्तं चपद्मपुराणे विष्णुधर्मोत्तरखंडे परशुरामंप्रत्याह पुष्करः दंतजन्मनि बालानां लक्षणं तन्निबोधमे उपरिप्रथमं यस्यजायंते च शिशोर्द्विजाः उपर्युपरि पंक्तौ द्विजादंताः दंतविप्रांडजा द्विजाइत्यभिधानात् दंतैः सह यस्यस्याज्जन्मभार्गवसत्तम मातरं पितरं वाथ खादेदात्मानमेव चेति एवंविधे दंतजनने शांतिरप्युक्ता तत्रैव तत्र शांतिं प्रवक्ष्यामि तन्मे निगदतः शृणु गजपृष्ठगतं बालं नौस्थं वा स्थापयेद्द्विजः तदभावे तु कांचने तु वरासने तदभावे गजाभावे सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा पंचगव्येन रत्नैश्च मृत्तिकाभिश्च भार्गव स्थालीपाकेन दातारं पूजयेत्तदनंतरं सप्ताहं चाप्यकर्तव्यं तथा ब्राह्मणभोजनं अष्टमेहनि विप्राणां तथा देयाश्च दक्षिणाः कांचनं रजतं गाश्च भुवं वसनमेव वा दंतजन्मनि सामान्यं शृणु चान्यदतःपरं भद्रासने निवेश्यैनं स्वच्छैर्मूलफलैस्तथा सर्वौषधैः सर्वबीजैः सर्वगंधैस्तथैव च स्नापयेत्पूजयेच्चात्र वह्निहोमसमीरणं समीरणं वायुं प्रथमं स्थापयेत्तत्र देवदेवं च केशवं एतेषामेव जुहुयाद्दश सम्यग्यथाविधि ब्राह्मणानां दातव्या यथाशक्ति च दक्षिणाः तत्र स्वलंकृतं बालमासने तूपवेशयेत् वसनच्छन्नमूर्धानं बीजैः संस्नापयेत्ततः सधवाभिर्बालकानां च हस्तैः कार्यं च पूजनं शुद्धाश्च विधवा नार्यो ब्राह्मणास्तु हरस्तथेति एवं पुराणोक्ता सदंतजननशांतिर्विधेया तेनाशुभफलनाशपूर्वकशुभफलावाप्तिर्भवतीति अथदोलारोहणमुहूर्तं विवक्षुस्तत्रादौ विधिशुभाशुभफलदां दोलाचक्रमनुष्टुभाह दोलारोहेर्कभात्त्र्यब्धिशरपंचेषुसप्तभैः नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमात् शिशोः काष्ठलोहाद्याधारोपनिबद्धः पुष्पशाया सचपश्चाद्यंतरितोगतागतं कुर्वंस्त्याबालकयोग्यः पल्यंकविशेषादोलाशब्देनोच्यते तत्र शिशोर्बालकस्य दोलारोहे दोलायां स्थापने चिकीर्षिते सति अर्कभात्सूर्यनक्षत्रात्त्यचनक्षत्रैर्नैरुज्यं नीरोगता स्यात् तदग्रिमपंचनक्षत्रैर्मरणं स्यात् तदग्रिमपंचभैःकार्श्यं देहकृशत्वं स्यात् तदग्रिमैरिषुभिः पंचनक्षत्रैर्व्याधिःस्यात् तदग्रिमसप्तनक्षत्रैः सौख्यं स्यात् इति यथासंख्येयोजना फलं च दंशिशोरेव संस्कार्यत्वात् उक्तं च सूर्यभाच्चंद्र

मु.दी.
सं.प्र.
२२

भयावत्पंचपंचदशसु मध्ये तु सप्तदेयानि दोलिकाचक्रमुच्यते नीरोगत्वं पूर्वभागे दक्षिणे मरणं ध्रुवं पश्चिमे तु कृशोबा
लउत्तरे व्याधिसंभवः शेषेषु सप्तधिष्ण्येषु बालकस्य सुखं भवेदिति अथावसरप्राप्तं दोलामुहूर्तं वसंततिलकयाप्युवोर्ध
नोत्तरार्धेन निष्क्रमणमुहूर्तं चाह रंतार्कभूपधृतिदिङ्मितवासरे स्याद्वारे शुभे मृदुलघुध्रुवभैः शिशूनां दोलाधिरूढि
रथ निष्क्रमणं च तुर्थमासे गमोक्तदिवसे र्कदिनेक्षिवासत् रंता द्वात्रिंशत् अर्काः द्वादश भूपाः षोडश धृतयो ष्टादश
दिशो दश एतन्मितदिवसेषु तथा शुभे वारे सोमबुधगुरुशुक्राणां वासरे तथा मृदुगणलघुगणध्रुवगणनक्षत्रे रुपल
क्षिते शिशूनां बालानां दोलाधिरूढिः दोलायामधिरूढिरारोहः स्यात् यदाह प्रयोगपारिजाते गुरुः दोलारोहस्तु कर्त
व्यो दशमे द्वादशेपि वेति भविष्यपुराणे अभीष्टे पुण्यदिवसे चंद्रताराबलान्विते मृदुध्रुवक्षिप्रभेषु मालावाऽऽलयोषितः
याग शायि हरिं स्मृत्वा प्राक्शीर्षं विन्यसेच्छिशुमिति अत्र प्रसंगतोन्येषामपि दोलारोहणमुहूर्तः प्रोच्यते तत्र दीपिका
उत्तरेंद्रमूलाहिशिवाश्विवर्त्तं शस्तेंदुतारा तिथिलग्नयोगे विष्टिं त्यमा... माहवर्जं दोलिकारोहणमत्र शस्तमिति य
मःशनिः अथ निष्क्रमणमुहूर्तं चतुर्थमासे गमोक्तसमये यात्राभिहितसमीचीनतिथिवारनक्षत्रादिसहिते काले
शिशूनां निष्क्रमणं कुर्यात् यदाह मनुः चतुर्थमासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् गुरुरपि गृहान्निष्क्रमणं सूनोश्च
तुर्थमासि कारयेत् यात्रोक्तसमये मासि तृतीये द्वादशेह्नि वेति अत्र तृतीयमासोप्युक्तः राजमार्तंडेनापि मासे तृती
ये शुक्ले हि पक्षे तथा करे शोभनगोचरस्थे उत्पातपापग्रहवर्जिते भे निष्क्रमणं सौख्यकरं शिशूनां तदेतयोः पक्ष
योर्यथागृह्यं व्यवस्था मुहूर्तसंग्रहे तु विशिष्टतिथ्याद्युक्तं निष्क्रमणे पूर्वः पक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना रि
क्ता षष्ठ्यष्टमी दर्श द्वादशीश्च विवर्जयेत् चत्वार्यर्यमतस्त्रीणि वैश्वानराहिर्बुध्न्यभात् बुध्न्याभाङ्नरभाद्वयात् ...त्री
णि मैत्रमादित्यपुष्यौ च रोहिणी च शुभावहः कुंभालिमेषावृषौ तुलास्थैवा धोमुखानि च संतानवारवर्गाणि शुभ
दास्तद्वास्तथा केंद्रत्रिकोणगाः सौम्याः पापाः षष्ठत्रिलाभगाः शिशुनिष्क्रमणे शस्ता मातुलो वाहयेच्छिशुमिति
अधोमुखानि मूला हि श्वाश्लिश्नमघोमुखं मे ...... दिमुक्तानि उदयालग्नानि एवं विधे सुलग्ने क्रियमाणस्य शि

राम
२२

नन्वाधेन सर्वेषां नक्षत्राणामुदयो ज्ञेयः इयं च व्याख्या वराहपद्यव्याख्यावसरे बहोत्पले नाभ्यधायि पितृचरणैस्त्वेवं
व्याकुर्वते यस्मिन्काले अश्विन्या उदयक्षितिजसंबंधः संपद्यते तं समयमारभ्य यावद्भरण्या उदयक्षितिजसंबंधस्तदंतरा
ले यावत्कालः सोऽश्विन्या उदय उच्यते एवं सत्युदयलग्नांशांतरालाङ्गुलिन मार्गेण यावानिष्टकाल आगच्छेत्स एव तन्नन
क्षत्रोदय इति निष्कृष्टोर्थः नक्षत्रस्योपलक्षणत्वात्कुभवासंभवे पितृद्धारा यांकार्य उक्तं च नारदेन यस्य खेटस्य यत्क
॥ मवारे प्रोक्तं विधीयते ग्रहस्य क्षणवारेऽपि तस्य तत्कर्म सर्वदेति क्षणवारः कालहोरा एवं सति निषिद्धनक्षत्रवारेष्वपि
प्रसस्तुकर्म कार्यमिति युक्तमन्यत्र पश्यामः षडग्निरिति अग्निः कृत्तिका हीरावच्छ्याषड्डारं कृत्तिकायस्य सः एवं त्रीणि
मैत्राण्यनुराधा यस्याष्टौ का रोहिण्या यस्य पंच पित्र्याणि मघा यस्य अ ···· यः चत्वारो ये भगण उत्तराफल्गुण्या यस्य सः ए
तादृशः हीरकं दद्यात् वर्षानंतरं मृत्युं मरणमेति प्राप्नोति पराहवसिष्ठः अष्टाक्तुत्तराः पितृ पंचक स्वषड्डू क्ष्मिधिष्ण्याः च चतुर
र्थमैत्रैः त्रिमैत्रभः पश्चत्तम त्रिभोपि हीरीन रो बृहन्निधनं गतः स इति पद्मेना ब्रह्मा तन्नक्षत्रिभस्ता हीरा न द्युपादानं केसुतिक
न्यायसूचनार्थं ननु रत्नमालायां षट्कृत्तिकाः पंचमघास्त्रिमैत्रा बाह्माष्टपश्च चतुरुत्तरस्त्र हीरीसवर्षं च तु रानेनापि न
प्राप्नोतीति प्रकटः प्रवाद इत्यत्र सामान्यतस्त्रिरुत्तरा मघयुत्तराणां ग्रहणाद्विरोध इति चेन्मैवं वोचः अत्राप्युत्तरापदेन प्र
ष्ठापस्थितिकत्वाद्वसिष्ठवाक्येन सहैकवाक्यतानुरोधाच्चोत्तराफल्गुण्या वग्रह्यते नाषाढाभाद्रपदे यत्र तु वचनान्तर वि
रोधो नास्ति यो ज्ञमारुतमघोत्तराग्निवैरित्यादौ तत्र सामान्यतः सर्वासामुत्तराणां ग्रहणं भवति इति हीरप्रकरणम् ॥ ॥
अथ प्राप्तकालत्वाद्वतारंभमुहूर्ते पंचचामरवृत्तेनाह गणेशविष्णुवाग्रमाः प्रपूज्य पंचमाद्बके तिथौ शिवार्क
दिग्द्विषट्शरत्रिके रवावुदक्लघु ध्रुवेऽनिलांत्यभादितीज्यमित्रभे चरेऽनसत्तनौ शिशौ लिपिग्रहः सतां दिने ग
णेशविष्णू प्रसिद्धौ वाक् सरस्वती रमा लक्ष्मीः एता देवताः प्रपूज्य पंचमेवर्षे सति शिवा एकादशी अर्का द्वादशी दि
ग्दशमी द्वि द्वितीया षट्षष्ठी शरापंचमी त्रयस्तृतीया एताः सामान्यतमतिथ्यामसति रवौ उदग्गते उत्तरायणस्थिते सति तथा
लघुनक्षत्राणि हस्ताश्विपुष्याः ध्रुवः श्रवणः अनिलांत्यभादितयः प्रसिद्धाः ईज्य आद्रौ तज्ञाश्चित्रा मित्रमनुराधा अत्र

मु.दी.
सं.प्र.
२२

माहा रहुहः एतेषामन्यतमनक्षत्रे सति तथा सतां सोमबुधगुरुशुक्राणां दिने दिवसे तथा चरराशयो मेषकर्कतुलामकरा
स्तद्धिते शुभस्वामिके वृषमिथुनकन्याधनुर्मीनानामन्यतमलग्ने सति शिशोर्लिपिग्रहो नूतनाक्षरलिखनप्रारंभः का
र्यः उक्तं च वसिष्ठेन उदग्गते भास्वति पंचमेऽब्दे प्राप्तेऽक्षरस्वीकरणं शिशूनां सरस्वतीं विघ्नविनायकं च गुरुं देवानाद्यैरभिपूज्य कु
र्यात् मार्कंडेयः प्रपूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं स्वविद्यासूत्रकारांश्च स्वां च विद्यां विशेषतः प्राप्ते तु पंचमे वर्षेऽ
प्रसुप्ते जनार्दने षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीं रिक्तां पंचदशीं चैव सौरभौमदिनं तथा एवं सुनिश्चिते काले विद्या
रंभं तु कारयेत् अत्र षष्ठी निषिद्धा ग्रंथे स्वीकृतेति चिंत्यं प्रयोगपारिजाते श्रीधरः हस्तादित्यसमीरमित्रपुरजित्त्वाष्ट्रा
श्विचित्राच्युतेष्वारार्कीशदिनाद्यादिरहिते लग्ने स्थिरे चोभये पक्षे पूर्णे निशाकरे प्रतिपदं रिक्तां विहायाष्टमीं षष्ठीम
ष्टमशुद्धिभाजि भवने प्रोक्ताक्षरस्वीकृतिरिति पुरजिदार्द्रा उभये द्विस्वभावराशौ अत्र वचने षष्ठ्या अनुपादानं ग्रंथेल
घुपदेन कृतमिति चिंत्यं अथैवमक्षरग्रहणे दृढे संजाते सति विद्यारंभमुहूर्तप्रपंचश्चामरेणाह मृगात्कराच्छ्रुतेस्त्रयेऽश्वि
मूलपूर्विकात्रये गुरुद्वयेऽर्कजीववित्सितेऽह्नि षट्स्मरत्रिके शिवार्कदिग्द्विके तिथौ ध्रुवान्त्यमित्रभे परैः शुभैरधीतिरु
त्तमा त्रिकोणकेंद्रगैः स्मृता मृगात्त्रये मृगार्द्रापुनर्वसुषु करात्त्रये हस्तचित्रास्वातिषु श्रुतेः श्रवणत्रये श्रवणधनिष्ठा
शततारकासु अश्विन्यां मूले पूर्विकात्रये पूर्वाफाल्गुनी पूर्वाषाढा पूर्वभाद्रपदासु गुरुद्वये तिष्याश्लेषयोः तथाह
र्कगुरुशुक्रवासराणां च दिने सति अधीतिः सर्वविद्यानामध्ययनमुत्तमा स्मृता यदाह श्रीपतिः मृगादिपंचस्वपि भे
षु मूले हस्तादिके च त्रितयेऽश्विनीषु पूर्वात्रये च श्रवणे च तद्वद्विद्यासमारंभमुशंति सिद्ध्यै इति तद्वदिति श्रवणत्रये अथ
ध्यैः तत्स्पष्टमुक्तं महेश्वरेण हस्तादित्रितये तथानिलतिभे पूर्वान्त्यभे षट्स्विभे मित्रर्क्षे च मृगादिपंचसु शुभः प्रारंभ आद्यैः
स्मृतः विद्यानां हरिभात्रये च दिवसे सूरेर्भृगोर्वा दिने त्वध्याख्यातदा घवर्जिततिथौ केंद्रस्थितैः सद्ग्रहैरिति अयमेव वचनं
व्यक्तदाशयः अत एवाह विश्वप्रकाशे पद्मनाभगुरुः मृगादिपंचके हस्तत्रिके विष्णुत्रिकाश्विने मित्रांत्यमूलपूर्वासु विद्या
रंभः शुभे दिने इति वयं तु तद्वदिति पदं विद्यारंभपदेन संबद्धमस्तीति व्याकुर्मः अत एवाह वसिष्ठः पूर्वात्रयमूलमृगादि

राम.
२२

पंचस्वथाश्विनीषु त्रितयेच हस्तात् सविष्णुधिष्ण्येऽथ सर्वविद्यारंभ इष्टः शुभवासरेष्विति यद्येकोभिप्रायो नस्यात्तदा
पूर्वात्रये च श्रवणत्रये चेति ब्रूयात् श्रोणतिरनेयोर्वाक्ययोर्यथासंख्यत्वं व्यवस्था शुभवासरेष्वित्यत्र चंद्रव्यतिरिक्ताः शुभ
वासरा गृह्यंते यदुक्तं रत्नमालायां विद्यारंभः सुरगुरुसितज्ञैरभीष्टार्थदायी कर्तुः स्वायुः श्रियमपि करोत्यंशुमान्मध्यमो
ऽत्र नीहारांशुर्न भवति जडता पंचता हि मिथुनेऽत्रक्रायामस्तनावपिच मनयः कीर्तयत्येवमाद्याइति नीहारो हिमं यत्तु भोजेनोक्तं
विद्यारंभे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ मरणं सौरभौमाभ्याम विद्यात्तु धसोमयोरिति अविद्या अनवधारणम
न्यथाज्ञानं वा एतद्धनुर्विद्याविषयं तद्वाक्यमध्ये नेवमयावद्यते षडिति षष्ठीपंचदशीतृतीयैकादशीद्वादशीद्विती
यानामन्यतमतिथ्यां अधीतिः कार्या अनाध्यायाख्यतदाख्यवर्जिततिथावितिमहेश्वरोक्तेः अनध्यायास्तु ... बंधे
वदंतीति ध्रुवेति अत्रापि शब्दाध्याहारेण ग्रंथाध्यायोऽन्यस्तथा सत्यन्यैराचार्यैः प्रज्ञात्यमित्ररोहिणीपुनात्त्रये रेवत्यनुराधा
स्वधीनिरुक्तमा एतदपि धनुर्विद्याविषयं तदुक्तं दीपिकायां अदितिगुरुयमार्कस्वातिचित्राग्निपित्र्यध्रुवहरिवसुमूला
श्वीडभागात्यभेषु विंशतिशशिबुधाहे विष्णुबोधे विषोषसमसमयतिथ्यियोगेचापविद्याप्रधानमिति ग्रंथेनुराधोक्तिमिहे
ग्ने- ष्टुरवाक्यालोचनेन अथ लग्नेशुभैर्ग्रहैस्त्रिकोणकेंद्रगैः सद्भिरधीतिरुक्तमा स्मृता केंद्रस्थितैः सद्भिर्हेरितु केः केंद्रग्रह
णं त्रिकोणेणपलक्षणं विशेषमाह नृसिंहः शुभाः पापाश्चरंध्रस्थाः सर्वे .... सदाग्रहाः भ्रातृषष्ठायकर्मस्थाः पापाः
सर्वेशुभावहाः शुभाः केंद्रत्रिकोणस्था धनभ्रातृगताः शुभाः सर्वेलाभेव्ययशालासुरज्ञाय्यहणे श्रेष्ठा इति अत्र
ग्रहणं विद्योपलक्षणमिति विद्यामुहूर्तः अथ समस्तशुभकर्मभ्यः प्राग्विहितो ऽक्षरोपणमुहूर्तो ग्रंथकृदनुक्तो
ऽस्माभिरुच्यते तत्र प्राक् तृतीयपंचमसप्तमनवमदिवसे सौम्यवारेषु बीजवापनोक्तनक्षत्रेषु अंकुरारोपणं शुक्ता
र्यं यदाह नारदः कर्तव्यं मंगलस्यादौ मंगलायांकुरार्पणं नवमे सप्तमे वापि पंचमे दिवसेऽपि वा तृतीये बीजनक्षत्रे शु
भवारे शुभोदये सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणैः आशिषावाचने कार्यं द्विजैः पुण्याङ्गनादिभिः सहवादि
त्रनृत्ताद्यैर्गत्वा प्रागुत्तरांदिशं प्रागुत्तरां मेशानीं तत्र मृत्तिकं तस्मिन् ... गृहीत्वा पुनरागतः मृत्तिकामध्ये ...

मु.दी.
सं.प्र.
२३

पात्रेषु प्ररोपयेत् अनेकबीजसंयुक्तं तोयपुष्पोपशोभितं शौनकः आधानं गर्भसंस्कारं जातकर्म च नाम च हित्वान्य
त्र विधातव्यं मंगलेऽङ्कुरवापनं प्रदोषकाले कुर्वीत पूर्वाह्णे वा न रात्रिषु वास्तुकर्मणि काले च स्याद्दिवैवाङ्कुरार्पणं
गुरुः आत्यंतिकेषु कार्येषु कार्यं सद्योऽङ्कुरार्पणं काश्यपकालविधाने तु विशेषोऽभिहितः हस्तस्वातीविरिंचाश्वैरपि
तपुरत्निन्मित्रपौष्णार्यमापि पाथोनाथोत्तराख्यैः क्षियप्युवति धन्वहोरिश्चिकाङ्गे द्विरिक्ते हित्वा पर्वाह्नरेज्योमरगुरुश
श्चिविद्वारलग्नांशकेस्यादुप्तबीजवापः शशिनि शुभखगेते चाष्टमे शुद्धियुक्ते इति अस्तोरेमूलं पाथोनाथः श
ततारका इत्यंकुरारोपणप्रकृतिः अथ व्रतबंध इति विंशतिपद्यैः प्रोच्यते इति शेषः तत्र व्रतबंधप्रयोजनमाह कश्य
पः अथातः संप्रवक्ष्यामि चोपनायनमुत्तमं द्विजत्वकरणं श्रौतस्मार्तकर्मप्रसाधनं आद्यं सर्वाश्रमाणां च देहसंस्का
रकारणं अनेन कर्मणा सर्वसंस्कृताः सर्वदेहिनः तत्संस्कारं लग्नवशात्तस्मात्तद्यं प्रवक्ष्यते इति तस्य कालस्त्रि
विधो नित्यः काम्यो गौणश्च तत्र क्रमेण त्रिविधमपि कालं शार्दूलविक्रीडितेनाह विप्राणां व्रतबंधनं निगदितं गर्भा
ज्जनेर्वाष्टमे वर्षे वाप्यथ पंचमे क्षितिभुजां षष्ठे तथैकादशे वैश्यानां पुनरष्टमेप्यथ पुनः स्याद्द्वादशे वत्सरे कालेथ द्वि
गुणे गते निगदिते गौणं तदाहुर्बुधाः अत्र नित्यकाम्ये तावदुच्यते विप्राणां ब्राह्मणानां गर्भाष्टमे गर्भदिनमारभ्याष्टमे
सौरवर्षे अथवा जननेऽप्यजन्मदिनात् सौरवर्षेऽष्टमे सति व्रतबंधनं निगदितं इदं नित्यं अथ काम्यं विप्राणामेव पंचमे ग
र्भाज्जनेर्वा एकादशे सौरवर्षे नित्यमुपनयनं क्षत्रियाणां वैश्यानां तु वत्सरेष्टवाष्टमवर्षे काम्यं तथैव पुनर्द्वादशे वत्सरे नि
त्यमुपनयनं यदाह नारदः आधानादष्टमे वर्षे जन्मनो वाग्र्यजन्मनां राज्ञामेकादशे मौंजीबंधनं द्वादशे विशामिति
अत्राविष्याधिकरणन्यायेन राजपदं क्षत्रियपरं अत्र फलश्रवणान्नित्यमित्यवसीयते तथा काम्यकालमाह मनुः
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे इति अत्र फलश्रवणात्काम्यकाल
तापैनसिना गर्भपंचमेपि व्रतबंधनमुक्तं गर्भपंचमेष्टे ब्राह्मणमुपनयेदिति तुल्यन्यायत्वात्क्षत्रियविशोरपि गर्भ राम
षष्ठे गर्भाष्टमे चेति द्रष्टव्यं यत्तु गर्भाष्टमेषु ब्राह्मणमुपनयेद्गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमित्यापस्तंबः २३

ह्यस्त्येव गर्भाष्टमेष्वित्युक्तं तत्र गर्भाष्टमेष्विति बहुत्वन्यायानुपपत्त्या गर्भषष्ठगर्भसप्तमगर्भाष्टमेषु सौरवर्षेष्विति वृत्तिरि
त्याख्यानमात्रब्राह्मणमपि नित्यकालता एवं गर्भैकादशेष्वित्यादावपि व्याख्यानं ध्येयं तच्छाखाध्यायिविषयं केचित्तु पंच
मवर्षाण्येषोडशपर्यंतं काम्यकाल इत्याहुः यदाह विष्णुप्रकाशपद्धतावापस्तंभः पंचमे विद्यापुत्रकामः षष्ठे तद्धनका
मः सप्तमे ब्रह्मवर्चसकामः अष्टमे ह्यायुष्कामः नवमे तेजस्कामः दशमे अन्नकामः एकादशे इंद्रियकामः द्वादशे पशु
कामः त्रयोदशे ज्ञानकामः चतुर्दशे पौरुषकामः पंचदशे पुष्टिकामः षोडशे राज्यकाम इति तदप्यपास्तं च शाखा
ध्यायिविषयं द्रष्टव्यं अथ गौणकाल उच्यते निगदिते प्राक् गर्भाज्जन्मनो वाष्टम इत्यादिके तस्मिन्मुख्ये गौणे गते गप्रह
ते श्रादिकर्मलिप्सुः तथासति तद्व्रतबंधनं गौणकालमाहुः यथाश्वलायनोक्ते नित्यकालाद्ब्राह्मणस्य षोडशवर्षप
र्यंतं क्षत्रियस्य द्वाविंशतिपर्यंतं वैश्यस्य चतुर्विंशतिपर्यंतं गौणमित्याहुः यदाह मनुः आषोडशाद्ब्राह्मणस्य सावित्री
नातिवर्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः ब्रह्मबंधोः क्षत्रियस्य अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृ
ताः सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिता इति गौणकालातिक्रमेपि याज्ञवल्क्येन विशेषोभिहितः अत ऊर्ध्वं पत
येते सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोरिति अत एव न ब्राह्मणः पतनमृच्छतीति गौण
मस्मरणमपि संगच्छते अत्र ब्राह्मणग्रहणं त्रैवर्णिकोपलक्षणमन्यथा सावित्रीपतिता व्रात्या इति बहुवचनमान
र्थक्यमापद्येत अथ व्रतबंधेन दक्षादिकं वसंततिलकयाह क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वा रौद्रेर्कविद्गुरुसितेंदुदि
ने व्रतं सत् द्वित्रिषुरुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेपि न चापराह्णे नन्विदमयुक्तं प्रतिभाति त्रैवर्णिकस्य
त्रिविधमपि कालमभिधायेदानीमेतेषु मासेषु व्रतबंधः कार्य इति वक्तुमुचितं तद्विहायैव नक्षत्राद्युक्तमिति चेत् उच्य
ते अहो देवानां प्रियस्य महदज्ञानविलसितं गीर्वाणगुरुप्रतिष्ठित्वादिपत्यं न बुद्ध्वा वज्जागरीवरामिति यतो द्विविधः का
लः उत्तरायणदक्षिणायनरूपश्चेति व्रतबंधनिषेधाउत्तरायणं मासषट्कात्मकं प्रशस्तमित्यर्थात्प्राप्तमत एव यथा श्रम
दाग्रामसक्कारस्तुक्तोरण्यः स्मृक्तोभयत्र इति गम्यते शुक्कास्तेन कर्तव्यमित्युक्ते शुक्रोदये कर्तव्यमिति भवति वचनादेवा,

वसीयेन अतएवव्रतबंधे नारदेनोक्तं दृश्यमाने गुरौ शुक्रे वैशाखे चोत्तरायणे इति एवं सत्यपि किंचिद्विशेषावगत्यर्थं मा
मु.दी. साउच्यतेऽस्माभिः तत्र वसंते ब्राह्मणस्य ग्रीष्मे क्षत्रियस्य शरदि वैश्यस्य मुख्यकालमुपनयने माघादिपंचमासेषु तत्रैव
सं.प्र. लिकस्य साधारणकालमिति यदाह वसिष्ठः विप्राणामुपनयनं वसंतसमये धराधिनाथानां ग्रीष्मे तौ शरदि विशां मा
२५ सः साधारणश्च माघाद्या इति कश्यपोपि अतो वसंते विप्राणां ग्रीष्मे राज्ञां शरद्यथ विशां मुख्यं च सर्वेषां द्विजानां चोपनायनं
साधारणं च मासेषु माघादिषु च पंचसु एषां मासानां फलान्याह नारदः स्वकुलाचारधर्मज्ञो माघमासेन फाल्गुने विधित्त
स्वार्थवांश्चैत्रे वेदवेदांतपारगः वैशाखे धनवान्वेदविद्याशास्त्रविशारदः उपनीतः कुलाढ्यः स्याज्ज्येष्ठे विधिविदांवरेति अत्र
केश्चिच्चंडेश्वराद्यैर्माघादिषण्मासानां फलान्यभिहितानि माघे द्रविणशीलाढ्यः फाल्गुणे च दृढव्रतः चैत्रे भवति मेधावी
वैशाखे कोविदो भवेत् ज्येष्ठे तु गृहनीतिज्ञ आषाढे क्रतुभाग्भवेत् मार्गशीर्षे भवेद्दुष्टः पौषे दुःखमवाप्नुयात् अत्राषा
ढो हरिशयनात्प्रागेवांगीकार्यः न पुरस्तान्नापि मिथुनस्थे सूर्ये कर्कस्थे दक्षिणायनांतःपातित्वात्तस्येति तदेतदुपेक्ष्य
प्राशक्तार्थिवाक्यस्वरसात् किंच मिथुनस्थेपि सूर्ये सति ततः सार्धषड्दिवसानंतरं व्रतबंधादिनिषेधात् आर्द्रारिके
स्यातिवरामकालेन हेत्रदृदशके रविश्चेत् विवाहचौलव्रतबंधनाद्यं सुरप्रतिष्ठादिनकार्यमेवेति वसिष्ठादिवचना
दुत्तरायण इति नारदवाक्यं तद्दक्षिणायननिषेधपरमित्यालं प्रसक्तानुप्रसक्तेः क्षिप्रेति क्षिप्राणि अश्विनीपुष्यहस्ताः
ध्रुवाणि प्रसिद्धानि अहिरश्लेषा चराणि श्रवणधनिष्ठाशतभपुनर्वसुस्वात्यः मूलशक्रनि प्रसिद्धानि तिस्रः पूर्वाः रुद्र
माद्री एतेषु विंशतिभेषु व्रतबंधं सत् शुभफलदायकं भवेत् उक्तं च प्राजापत्यादिषट्केश्च भगर्क्षादिषु पंचसु मूलादिद
पूर्के चैव समैत्रे व्रतबंधनमिति अर्थाद्भरणी कृत्तिका मघा विशाखा ज्येष्ठास्तु न कार्यमित्यर्थः एतानि सर्वशाखानां द्वि
त्रमेलकाभिप्रायेणोक्तानि मुख्यानि त्वाह वसिष्ठः हस्तत्रये च श्रवणत्रये च धातृद्वये चोत्तरमैत्रभेषु पौष्णद्वये चादिति
मृद्वये च शस्तं द्विजानां खलु मौंजिकर्मेति द्विजानां ब्राह्मणक्षत्रियवैश्यानां कश्यपोपि मैत्रे त्रिविस्त्रये हस्तत्रये दर्शपूर्वराद्र राम.
ये धातृद्वयादितीज्यांतदस्रेषूपनायनमिति अर्थादार्द्राश्लेषाभरणीकृत्तिकाज्येष्ठाविशाखामघापूर्वात्रयमूलानि २५

नियानि ऋषिमते तदाह गुरुः कृत्तिकाभरणीमूलज्येष्ठार्द्रासु विशाखयोः पूर्वात्रये च सार्पर्क्षे न कुर्याद्दोपनायनं चका-
रान्मज्ञायां ब्राह्मणस्य पुनर्वसौ निषेधमाह राजमार्तण्डः चंद्रताराबलोपेते ग्रहादौ शुभेष्वपि पुनर्वसौ कृतो विप्रः पुनः-
संस्कारमर्हतीति अन्यत्रापि स्मर्यते अहः स्पृशि मलेमासि श्रुतं त्वमधिगच्छति अत्र विप्रः क्षत्रपदद्वयोपादानाद्दिनयोः
क्षत्रियविशोः पुनर्वसौ व्रतबंधो ब्राह्मणस्य मेखलामात्रस्य प्रशस्त इत्यर्थः केचित्तु नकेचिन्निमित्तेन कर्मनाशानदी-
तरणाद्यनेकदुष्टकृत्येन पुनः संस्कारप्रसक्तौ सत्यां विप्रः पुनर्वसौ पुनः संस्कारमर्हतीति नव्रतबंधनिषेध इत्येवं व्या-
चक्षाणेन तन्न चिंत्यं यतः जीवार्कचंद्रलग्नशुद्धौ हरिशयनहि ... भास्करेंद्वोर्नरस्थे स्वाध्याये वेदवर्णाधिपइह शुभदे ज्ञोरभे-
नादितौ च शुक्रार्कज्यर्द्रलग्नेरविमदननिधिं प्राह्य षष्ठाष्टमे ज्ञो जीवास्तातिचारे कसितगुरुदिने कालशुद्धो व्र-
तं स्यादिति दीपिकायां पुनर्वसुव्रतत्र विषयकव्रतबंधस्यैव सामान्येन निषेधोक्तेर्विशेषवचनाद्ग्रहण एव निषिद्धः
पर्यवसन्न एकवाक्यताबलात् पुनर्वसुनिषेधश्लोकद्वयेपि पूर्वार्धस्यानन्वयात् अयं चाचारः प्राच्यानां दाक्षिणा-
त्यास्त्वनन्तगौडत्वेन देशाचाराभावात् उक्तं च वराहेण देशाचारस्तावदादौ विचिंत्यो देशे देशे या स्थितिः सैव कार्या लो-
के दुष्टं पंडिता वर्जयंति दैवज्ञो नो लोकमार्गेण यायात् अत्र विहितनक्षत्रेषु वेधादिदोषास्त्याज्याः तदुक्तं दीपिकायां
कर्णवेधे विवाहे च व्रते पुंसवने तथा प्राशने चाद्यचूडायां विद्धमृक्षं परित्यजेदिति अत्र वेधः सप्तशलाकाचक्रस्थाद्र-
ष्टव्यः तदाह वसिष्ठः पंचशलाकाचक्रे पाणिग्रहणे च भवेद्विधिरुक्तः शास्त्रः शुभमित्युक्ततः सप्तशलाकाजञ्जतरेति
तरत्र यज्ञोपवीतचौलान्नप्राशनसीमंतादिष्वित्यर्थः चक्रन्यासः स्वरोदये तिर्यगूर्ध्वगता रेखाः सप्तसंख्या लिखे-
द्बुधः कृत्तिकादीनि भान्यत्र साभिजिन्ति क्रमेण च उक्तं भार्गवतयाक्रांतं विद्धं पाणिग्रहे णच शुभाशुभेषु कार्ये-
षु वर्जनीयं प्रयत्नतः यस्याभिधाननक्षत्रं विद्धं क्रूरग्रहेण तु देशो ग्रामः पुरं सैन्यं नरो नारी विनश्यतीति अशुभेषु यु-
द्धादिषु दीपिकायामपि कृत्तिकादि च लस्मन्नरेखासु शोपरिभ्रमन् ग्रहः चेदेकरेखास्थो वधः सप्तशलाकजं तदिति ग्रं-
थकर्त्रा तु विवाहप्रकरणे सप्तशलाकाचक्रोक्तिं विनैव परस्य वेधकं नक्षत्रं हुं सिद्धवत्कृत्याभिहितमनन्यावसर

प्रसंगात् अत्र कृतो नोक्तमिति चेत्सत्यं यस्याः शशी सप्तशलाकभिन्नः पापैरपापैरथ वा विवाहे रक्तांशुके नैव च रोह
मु॰दी॰ मानाश्मशानधूममिव सदा स्यादिति दीपिकाकारवचनात् एवं सति विवाहनक्षत्रमेव वेधज्ञानार्थं पंचशलाकाचक्रे
सं॰प्र॰ विचार्यं सप्तशलाकाचक्रं तु पुनर्विवाहादिसकलकर्मविहितनक्षत्रवेधज्ञानार्थं ज्ञेयमिति निष्कृष्टोऽर्थः अथमे
२५ वविवाहप्रकरणे चक्राणि ग्रंथकर्तुराशयः इत्यलं प्रसक्तानुप्रसक्तेन वेधउपलक्षणं तेन युतिर्लत्तापातादयो विवाहा
क्ता अपि दोषास्त्याज्याः तदुक्तं वसिष्ठेन निहतं त्रिविधोत्पातैः क्रूराक्रान्तं च विद्धभं त्वखिलं त्याज्यं तत्कुंभकमेलितपा
रतः वधिष्ण्यं चेति नारदोपि वीक्षितो वाथ कविद्यान्महादोषविवर्जित इति व्रतबंधप्रकरणे उक्तवान् वीक्षित इति
पूर्वेण संबंधः ते च दोषा विवाहप्रकरणे वक्ष्यंते ग्रंथकृता कैति सूर्यबुधगुरुशुक्रचंद्रदिवसेषु व्रतं सत्स्यात् अर्थो
क्रामशनी निषिद्धौ तदाह नारदः आचार्यकाव्यसौम्यानां वाराः शस्ताः शशीनयोः वारौ तौ मध्यफलदौ निंदिता वित
रौ व्रते इत्यति आचार्यो गुरुः काव्यः शुक्रः जगन्मोहने गुरुस्तु पापग्रहाणां वाराः स्युर्नेष्टशुभः चंद्रवासरः सितेपक्षे
प्रशस्तः स्यात्कृष्णे वारो विधोर्नहि शुभो बुधो नास्तमितः पापग्रहयुतोपि चेति रविवारं निषेधति स्म अत्र सूर्यस्य
प्राबल्यदौर्बल्ययोर्व्रतबंधस्य विधिनिषेधौ इति विवेकः भौमस्तु निषिद्धोपि सामवेदिनामति प्रसंगः यदाह नार
दः शाखाधिपतिवारश्च शाखाधिपबलं शिशोः शाखाधिपतिलग्नं च त्रितयं दुर्लभं व्रते इति ग्रंथकृदपि अग्रे वक्ष्यति
द्वीति द्वितीया तृतीया पंचम्येकादशी द्वादशी दशमी संज्ञासु तिथिषु व्रतं सत्स्यात् यदाह नारदः शुक्लपक्षे द्वि
तीया च तृतीया पंचमी तथा त्रयोदशी च दशमी सप्तमी व्रतबंधने श्रेष्ठास्त्वेकादशी षष्ठी द्वादश्यपि तास्तु मध्यमाः
एकां चतुर्थीं संत्यज्य कृष्णपक्षेपि मध्यमा इति तिथिफलान्याह बादरायणः प्रतिपदि मदिरासक्तः श्रुतिधरमेधादि
को द्वितीयायां नीतिज्ञो मेधावी जितसकलारिस्तृतीयायां मंदधिया हृतवित्तो दीनः चपलः चतुर्थ्यां स्यात् पंचम्यां
बहुवित्तः शूरणयुर्धनपतिर्मतिमान् षष्ठ्यामशुचिः सततं सप्तम्यां व्याधिसंतप्तः अल्पायुरष्टम्यां नवम्यां धनवर्जि रा॰
तः सदा प्रकुपः दशम्यामथ संपन्निरेकादश्यां गुणान्वितः द्वादश्यां नीतिशास्त्रज्ञो निधनाय त्रयोदशी चतुर्दश्यां भवेत्त्रा २

अनिष्क्रमणकर्मणः फलमाह बृहस्पतिः अथ निष्क्रमणं नाम गृहात्प्रथमनिर्गमः अक्षतायां क्रियायां स्यादा
युःश्रीनाशनं शिशोः कृते संपद्यते वृद्धिः स्यादायुर्वर्धनमेव चेति अत्र विशेषमाह तृतीये मासि कर्तव्यं शिशोः सूर्यस्य
दर्शनं चतुर्थे मासि कर्तव्यमग्नेश्चंद्रस्य दर्शनं इति निष्क्रमणं मुहूर्तः अथ सूतिकायाः जलपूजामुहूर्तं भुजंगप्रया
तेनाह कवीज्यास्तचैत्राधिमासे न पौषे जलं पूजयेत्सूतिका मासषट्कौ बुधे हीज्यवारे विरिक्ते तिथौ हि श्रुतीज्या
दितीबुर्क नैरृत मैत्रैः कविः शुक्रः इज्यो गुरुः अनयोरस्ते चैत्रमासि तथाधिकमासे तथा पौषमासे सूतिकाज
नयित्री मासषट्कैः सत्या जलं न यादेव पूजयेत् तथा बुधे हीज्यवारे बुधचंद्रगुरुवारे तथा विरिक्ते रिक्तारहितेति
थ्याहि निश्चितं तथा श्रुतिः श्रवणं इज्यः पुष्यः अदितिः पुनर्वसुः इंदुर्मृगः अर्कः हस्तः नैरृतं मूलं मैत्रमनुराधा
एतैर्नक्षत्रैः सहिते दिने सूतिका जनयित्री मासषट्कैः सत्या न यादे जलं पूजयेत् अत्र मूलानुपलंभः नत्वयं मुहूर्तो
निष्क्रमणात्प्राक् कर्मानंतरं वक्तव्यः प्राप्तकालत्वात् क्रमकारणं न पश्याम इति चेत् शृणु क्रमस्त्वत्र शास्त्री
यो विवक्षितो जलपूजाख्याचारप्राप्तालौकिकी निष्क्रमानपेक्षत्वात् कालांतरे केचित् जलपूजामाहुः अथ मासा
नंतरं विहितो गवादिदुग्धपानविधिस्तन्मुहूर्तः प्रोच्यते मया श्रीधरीये एकत्रिंशे वासरे वा द्वितीये जन्मर्क्षे वा शु
द्धलग्ने मुहूर्ते शंखे क्षीरं संनिरुध्यात्कृष्णं शिशुं तत्र वक्त्रे धात्री पूज्य पूजां विधाय नृसिंहोपि एकत्रिंशद्दिने चैव पयः शंखे
न पाययेत् अन्नप्राशनन क्षत्र दिवसादयः शिशोः वक्ष्यमाणेनान्नप्राशनोक्तशुभदिवसे एकत्रिंशत्तमे धात्र्युपमाता
गवादिक्षीरं शंखे निधाय मातृपूजां च विधाय शिशुमुखे दुग्धं निदध्यादित्यर्थः अथान्नप्राशनमुहूर्तं स्रग्धर
याह रिक्तानंदाष्टदर्शं हरिदिवसमथो सौरभौमार्कवारांल्लग्नं जन्मर्क्षलग्नाष्टमगृहलवगं मीनमेषालिकं च
हित्वा षष्ठाष्टमासे प्यथ हि मृगदृशां पंचमादौजमासे नक्षत्रैः स्यात्स्थिराख्यैः समृदुलघुचरैर्बालकान्नाशनं सत् अथो
क्तो मध्ये दर्शितो विपर्यायो ज्ञेयः अथो निष्क्रमणानंतरमेवं विधे काले बालकानामन्नाशनं सम्यग् मे भोजनं सतत्शु
भफलदायि स्यादित्यन्वयः तत्रैतेवर्ज्यपदार्थाः रिक्ताः ४ ९ १४ नंदाः १ ६ ११ अथाष्टमी दर्शः प्रसिद्धः हरिदिवसो द्वा

दशीएतास्तिथीर्हित्वा उपलक्षणत्वात्तिथिद्वयं च तथा सौरभौमार्कवारांश्च हित्वेत्यर्थः यदाह नारदः रिक्तां तिथिद्वयं नं
मु.टी. दां द्वादशीमष्टमीमपि त्यक्त्वा ततिथयः श्रेष्ठाः प्राशने शुभवासराः कश्यपोपि द्वादशीमष्टमीं रिक्तां नंदां वैवदिनक्षयं सू
सं.प्र. र्यार्किभौमवारांश्च त्यक्त्वान्यदिनवासरे नवान्नप्राशनमित्यनुवर्तते अत एवोक्तं श्रीधरेः द्वितीया च तृतीया च पंचमी सप्त
२२ मी तथा त्रयोदशी च दशमी प्राशने तिथयः शुभाः क्वचित्सूर्यबुधगुरुवासराः प्रशस्ता उक्ताः अन्ये निषिद्धाः उक्तं च श
शिशुक्रे च मंदाग्निः शनिभौमे बलक्षयः बुधार्कगुरुवारेषु प्राशनं हि शुभावहमिति नैतन्निर्मूलत्वादुपेक्ष्यं दोषांतरम
प्युक्तं नारदेन न वैधृतौ व्यतीपाते विष्ट्यां गंडातिगंडयोः शुक्रे वक्रेन परिघे बालान्नप्राशनं हितमिति अत्रैषां दोषापवा
दानां निषेधे सामान्यतः सिद्धे पुनर्वचनं विष्टिरंगारकश्चैव वज्रविष्कंभयोस्तिस्रः इत्यनयोरप्यपवादार्थं तेन स्वीयभो
गणयेत्तं निषेधः लग्नमिति जन्मर्क्षलग्ने जन्मराशिलग्ने त्येताभ्यामष्टमगृहमष्टमलग्नं वाप्यष्टमनवांशः चेत्तौ गच्छति प्रा
श्नातीत्येवं द्विधं लग्नं हित्वा जन्मराशिजन्मलग्नाभ्यामष्टमलग्नमष्टमनवांशं च त्यजेदित्यर्थः उक्तं च कश्यपेन जन्मरा
शिविलग्नाभ्यां निधनं शं विवर्जयेदिति तथा मीनमेषालिकं च मीनमेषवृश्चिकलग्नानि हित्वा वराह मृगन्माहने कश्यपः
गोश्विकं भतुलाकन्यासिंहकन्यानृयुग्मृगाः शुभदाराशयः चैतेन मेषकर्कवृश्चिकाः इति नृयुग्मिथुनं मृगो मकरेः
षष्ठादिति षष्ठादितिलब्धोपि पंचमी षष्ठमासमासमारभ्य समासे षष्ठाष्टमद्वादशमासेषु बालानां प्राशने पुंबाल
विषयमेतत् अथानंतरं हि निश्चयेन मृगदृशां कन्यकानां पंचमादौ जमासे विषममासे पंचमसप्तमनवमैकादशमा
सेषु च प्राशने उक्तं वशिष्ठेन युग्मेषु मासेषु च षष्ठमासात्संवत्सरे वा नियतं शिशूनां अयुग्ममासेषु च कन्यकानां
नवान्नसंप्राशनमिष्टमेतत् अत्रायुग्ममासत्वं पंचममासादिति ध्येयं यदाह नारदः षष्ठेमास्यष्टमे वाथ पुंसां स्त्रीणां च
पंचमे सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभं मनुस्तु षष्ठे न प्राशनं मासीत्याह एकमनेककालाभिधाने कस्मिन्काले राम
न्नप्राशनं विधेयमिति संदेहः किं समबलत्वात्सर्वेपि मुख्या एव काला उत कश्चिन्मुख्यो गौणभाव इति अत्र ब्रूमः स्व स्व २२
गृहे विशिष्टायः कालोन्नप्राशने उक्तः समुख्यस्तत्र गुरुशुक्रास्तादिविचारं नैव विधेयं इतरेषु गौणकालेषु विहितकाला
वि

ननुष्ठाने सति निर्दोषे हि काले विधेयं इतरेषु गौणकालेषु यत्र स्वगृह्योक्तविहितविशिष्टकालो नाभिहितस्तत्र तेषां सांहि-
तिककालानां तुल्यबलत्वाद्विकल्पो भवति तत्रापि सदोषकालं विहाय निर्दोषकाले न्नप्राशनं विधेयमिति फलितोर्थः
तत्रापि शुक्लपक्षे पूर्वाह्णे विधेयं शुक्लपक्षे तु पूर्वाह्णे इति नारदोक्तेः नक्षत्राणीति मृदुगणलघुगणचरगणयुक्तैः स्थिरर्क्षै-
र्नक्षत्रैर्बालकान्नप्राशनं स्यात् चरस्थिरमृदुक्षिप्रनक्षत्रेषु शुभे दिने इति कश्यपोक्तेः तथा जन्माह्ने वसिष्ठोपि विष्णुरह्व-
किरणैर्हि रश्मिभिर्वायुभिन्नवरुणादितिचित्राः अश्विनितिष्यवसुपौष्णभरोहिण्युत्तराश्च शिशुभोजनतारा इति अत्र वि-
हितनक्षत्रेषु जन्मनक्षत्रं प्रशस्तमुक्तं नारदेन पट्टबंधनचौलान्नप्राशने चोपनायने शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्म-
णीति बालान्नभुक्तौ व्रतबंधनेपि राज्याभिषेके खलु जन्मधिष्ण्यं शुभं त्वनिष्टं सततं विवाहसीमंतयात्रादिषु मंगलेष्विति
वसिष्ठोक्तेश्च यत्तु गर्गवचनं जन्मर्क्षे कर्मनक्षत्रे आधानर्क्षे च वर्जयेत् कर्णवेधं तथा यात्रां न क्षौरं कमान्नभोजनमिति एकाल-
नुगणमुक्तं हि मुहूर्तसंग्रहे जन्मभं जन्मनक्षत्रं दशमं कर्मसंज्ञितं एकोनविंशमाधानं त्रयोविंशं विनाशुभमिति तदेतद्वा-
र्षिकनवान्नभोजनविषयं अत एव लोके न्नभोजनान्नप्राशनशब्दयोः साधारण्यासाधारण्येन व्यवहारोपलंभात् जन्मन-
क्षत्रगः चंद्रः प्रशस्तः सर्वकर्मसु क्षौरभेषजवादाध्वकर्तनेषु विवर्जयेदिति दीपिकायां निषेधानुपलंभाच्च तस्मात्प्रथ-
दशमैकोनविंशेषु जन्मनक्षत्रेषु बालकान्नप्राशनं प्रशस्ततरमिति वयं ब्रूमः यत्तु पितामहः वाक्यं हित्वैकं जन्मर्क्षं तु तारे जन्मसंज्ञि-
ते शुभदे उद्वाहे चोपनये यात्रायामन्नभोजने क्षौरे कार्ये इति यत्तु नक्षत्रे जन्म तज्जन्मनक्षत्रं दशमैकोनविंशं च जन्मतारेत्यु-
च्यते लोकैः एतदपि प्रागुक्तविषयमेवेत्यलमतिप्रसंगेन तत्रापि विद्धनक्षत्रं सर्वथा निषिद्धमेव यदुक्तं दीपिकायां क-
र्णवेधे विवाहे च व्रते पुंसवने तथा प्राशने चाद्यचूडायां विद्धर्क्षं परिवर्जयेत् वेधप्रकारो विवाहप्रकरणे वक्ष्यते अथा-
न्नप्राशने लग्नबलं परमेतेन निधननक्षत्राणि वसंततिलकयाह केंद्रत्रिकोणसहजेषु शुभैः खशुद्धे लग्ने त्रिलाभरिपुगैः
च वरं तिपापैः लग्नाष्टषष्ठरहिते शशिनं प्रशस्तं मैत्रांबुपानिलजनुर्भमसच्च केचित् यद्यपि केंद्रशब्देन दशमस्यापि स्था-
नमुच्यते तथापि न शुद्धे खशुद्धे लग्ने इति वक्ष्यमाणत्वात् एवं सति केंद्राणि १ ४ ७ त्रिकोणं ९ ५ सहजं ३ एषु

स्थानेषु स्थितैः शुभग्रहैस्तथा त्रि ३ लाभ ११ रिपु ६ गैः पापग्रहैश्चोपलक्षिते लग्ने खशुद्धे दशमशुद्धिसहिते सर्वग्रहर
मु॰टी॰ हितइति यावत् एवंविधे लग्ने लग्नाष्ट ८ षष्ठ ६ स्थानरहितमर्थादन्यस्थानस्थिते शशिनि प्राशनं वदंति मुनय इति शेषः
सं॰प्र॰ यदाह कश्यपः त्रिकोणकेंद्रस्थानेषु शुभैस्त्र्यायारिगैः परैः अलग्ननिधनांत्यारिस्थेन हिमांशुना अन्नप्राशनं ऊर्ध्वादित्य
२३ तु वर्तते अत्र लग्नस्थचंद्रनिषेधः क्षीणचंद्रविषयः नारदोपि दशमे शुद्धिसंयुक्ते शुभलग्ने शुभांशके शुक्लपक्षे च पूर्वा
ह्ने सौम्ययुक्तनिरीक्षिते त्रिषष्ठलाभगैः पापैः केंद्रधीधर्मगैः शुभैः व्ययारिनिधनस्थेन चंद्रेण प्राशनं शुभमिति अत्र द
शमशुद्धिः सर्वग्रहराहित्यं दशमस्थानरहितेकेंद्रं च केंद्रशब्देन विवक्षितं यदाह प्रयोगपारिजाते एवं दशस्थानगा
न्सर्वान्वर्जयेन्मतिमान्नरः अन्नप्राशनकृत्येषु मृत्युक्लेशभयावहान् अत्र लग्नस्थचंद्रः प्रशस्तः पूर्णचंद्रविषयत्वात् एत
द्वाग्रिमपद्ये वक्ष्यते विशेषमाहात्र गुरुः शुक्रारज्ञाः क्रमाद्याताः सप्तमाष्टमधर्मभे भोज्यभोक्तनवत्वेषु सर्वथा मरणप्र
दाइति शुक्रः सप्तमः भौमोष्टमः बुधो नवमः वभोज्यभं गोधूमादित्स्य नवत्वेन नवान्नत्वेन भक्षणीये सति भोक्तुरन्नप्राश
नकर्तुर्बालकस्य नवत्वे सति वा एते ग्रहा मरणप्रदाइत्यर्थः मैत्रेति मैत्रांबुपानिलाः अनुराधाशततारकास्वात्यो निषिद्धा
इति केचिदाहुरिति परमतेनोपन्यासः यथोक्तं श्रीपतिना रेवतीकृतिपुनर्वसुहस्तब्राह्मनः पृथगपिष्ठितयेच उत्तरेष्वग
दितेः पृथुकानां प्राशनं हि सनवान्नविधानं अस्यार्थः रेवत्यादिभ्यः षड्भ्यश्च भेभ्यो ह्रितयेपि नक्षत्रेकोर्थः रेवती अश्विनीच
श्रवणं धनिष्ठा च पुनर्वसुः पुष्य हस्तश्चित्रा च रोहिणी मृगश्च उत्तरात्रयेच एवं त्रयोदशर्क्षेषु पृथुकानां बालकानाम
न्नप्राशनं वार्षिकं नवान्नविधानं च गदितमिति नारदादिभिस्तु चरस्थिरमृदुक्षिप्रनक्षत्रेषु इति षोडशनक्षत्राणामभिधा
नात्त्रयाणामनुराधाशततारकास्वातीनामाधिक्यात् ततः श्रीपतिमतमाश्रित्यैषां निषिद्धत्वमुक्तं ग्रंथकृता च पुनर्जन्मभंत
न्मनक्षत्रं चासत् यदाह गुरुः जन्मर्क्षे कर्मनक्षत्रे आधानर्क्षे च वर्जयेत् कर्णवेधं तथायानं क्षुरकर्मान्नभोजनमिति विशेषान
वधारणं ज्ञानं तामनमेतत् वस्तुतस्तु अन्नस्य भोजनमन्नभोजनमिति व्युत्पत्त्या वार्षिकनवान्नभोजनविषयमेवैतदित्युक्त राम॰
मस्माभिः पूर्वपद्ये अथ ग्रहाणां स्थानवशात्फलान्यनुष्टुप्छन्दसाह क्षीणेंदुपूर्णचंद्रेज्यज्ञभौमार्कार्किभार्गवैः त्रिकोण २३

व्ययकेंद्रादिस्थितैरुक्तंफलंग्रहैः भिन्नराशीयत्र हि द्विवज्ञीवीज्ञानीचपित्तरुक् उष्णीवातक्लेशवानव्याधिमान्भोगभागि
निति त्रिकोणव्ययः केंद्राणिदशामरहितानि १४७ अष्टौ एषुस्थानेषुस्थितैः क्षीणेंदुर्कादिभिरष्टभिर्ग्रहैर्भिन्नराशी
त्यादिकंफलंयथासंख्येनोक्तंमुनिभिरितिशेषः यथा एषूक्तस्थानेषुस्थितः क्षीणचंद्रः चेत्तदान्नप्राशनकर्त्ताभि
न्नराशीदरिद्रः स्यात् भौमश्चेत्पित्तरुक् पित्तकृताद्रोगस्यासौपित्तरुक् अर्कःचेत्कुष्टीस्यात् आर्किःशनिःचेत्तदावाभा
वसंबंधीक्लेशात्क्लेशः वातप्रधानोव्याधिर्वातव्याधिः एतौविद्येतेयस्यासौ अतःक्लेशवानव्याधिमान्स्यात् उपलक्ष
णत्वाद्राहुकेत्वोरप्येतत्फलंद्रष्टव्यं भोगवः शुक्रःचेत्तर्हि भोगभाक्स्यादित्यर्थः उक्तंच रत्नमालायां रवौलग्नेकुष्टीधनिक्षन
येपित्तगदभाक्कुजेनोवातव्याधिःकृशशशिनिभिन्नाटनरतः बुधेज्ञानीभोगीह्युशनसिचिरायुःसरगुरौ विधौपूर्णेयज्वाभ
वतिच नरः सत्रदइह कंटकांत्यनिधनत्रिकोणगास्तत्फलंददतियत्ननावमी षष्ठइंदुरशुभस्तथाष्टमःकेंद्रकोणगत
एननिरत्नहृत् इनःसूर्यःतस्यापत्यंसौरिः अत्रलग्नस्थितानांग्रहाणांफलाभिधानादन्यकेंद्रादिषु नददतिदेशान्फलेपि
महत्वाल्पत्वकृतोविशेषोध्येयइतिनिष्कृष्टोर्थः अन्यथासर्वकेंद्राद्यनुवादेन कुष्टादिफलमेवब्रूयात् अतएववसिष्ठ
लग्नस्थितानामेवफलमुक्तं कुष्टीलग्नगतेसूर्येक्षीणचंद्रेचभिक्षुकः सवदःपूर्णचंद्रेस्यात्कुजेपित्तरुजार्दितः बुधेज्ञानी
गुरौभोगीदीर्घायुर्भोग्यवाक्सिते वातरोगीशनौराहौकेतौचान्नविवर्जित इति नारदादिभिरप्येवमुक्तं लग्नंविहायान्यकें
द्रस्थितानांग्रहाणांतुसामान्यतएवफलंशुभाशुभमुक्तं तद्वाक्यप्रागभिहितमस्माभिर्ग्रंथकर्त्रा तुल्यत्वात् रत्नमाला
पद्यमप्युक्तमेवमुक्तमित्यदोषः पूर्णचंद्रक्षीणचंद्रयोर्लक्षणमन्नप्राशनप्रकरणे उक्तं वसिष्ठेन संपूर्णेंदुर्भयाष्टम्योर्मध्येंदुः
पूर्णसंज्ञकः विनष्टेंदुभयाष्टम्योर्मध्येसौक्षीणसंज्ञक इति संपूर्णेंदुःपूर्णिमा मध्येंदुरित्यत्रकांदसःसमासः कृतःसमर्थः
पदविधिरितिसापेक्षमसमर्थंभवतीतिचस्मरणात् अथवामध्येइंदुरित्यत्र छांदसः तत्रायादेशायलोपचपूर्वत्रासिद्धमित्य
सिद्धत्वमाद्गुणेकर्तव्येनभवति नमुनइत्यत्रनेतियोगविभागात्तस्यचेष्टसिद्धिविषयत्वात् विनष्टेंदुरमावस्या असाविति क्षी
णपरिच्छेदमध्येंदुः शाद्गस्यइंदुरित्यन्नप्राशनं अथभूम्युपवेशनमुहूर्तंवसंततिलकयाह पृथ्वीवराहमभिपूज्यकुजेविशुद्धे

मुटी॰ सं॰प्र॰ २४

रिक्तेतिथौव्रजतिपंचममासिबालं वध्वाःशुभेह्निकटिकटिसूत्रमथध्रुवेंदुज्येष्ठर्क्षमैत्रलघुभैरुपवेशयेत्कौ पृथ्वींचवरा
हःचावयोःसमाहारेद्वंद्वः पृथ्वींवराहंचाभिपूज्य कुजेविशुद्धेभौमबलेसतीत्यर्थः अरिक्तेरिक्तारहितेतिथौसति तथाचपंच
ममासिव्रजतिलगतिसतितथाशुभेह्निशुभग्रहवासरेषु तथाध्रुवेंदुज्येष्ठर्क्षमैत्रलघुभैरोहिण्युत्तरात्रयमृगज्येष्ठानुराधा
श्विनीपुष्यहस्तैर्दर्शननक्षत्रैरुपलक्षितेकाले बालंकटिसूत्रं पट्टसूत्रादिनिर्मितंकटिस्थलेबध्वाःकौपृथिव्यां उपवेश
येन्मंत्रपाठपूर्वकमुपवेशनाख्यसंस्कारंकुर्यात् उक्तंच पद्मपुराणे पंचमेचतथामासिभूमौतमुपवेशयेत् तत्रसर्वग्रहाःशु
स्ताःभौमाराम विशेषतः तिथिंचवर्जयेद्रिक्तांशस्तानिशृणुभानिमे उत्तरात्रितयंसौम्यंपुष्यंद्वौशाक्रदैवतं प्राजापत्यंचह
स्तंचशस्तंस्याश्विनमित्रभं वराहंपूजयेद्देवंपृथिवींचतथाद्विजान् मंत्राअपितत्रैवोक्ताःतेलिख्यंतेस्माभिः रक्षैनंवसुधे
देविसदासर्वगतंशुभे आयुष्प्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये अचिरत्यर्थिनः जीववारोगपवित्रेषुनिदेहस्वाचिरे
णतान् त्वारिपशेषभूतानांमातस्त्वमेधिशास्यसि कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां तस्योपवेशनंकृत्वाभूमौब्रह्म
सभोजनं ततःश्रुत्वाततःकार्यमुक्तस्वंपूर्ववद्द्विजेति उक्तवानीरायणनादि यद्यपिग्रंथकर्त्रापंचममासिकर्तव्यंभूम्युपवे
शनमन्नप्राशनंततःप्रागुक्तं तथापित्रैपातिकशास्त्रकर्तृवसिष्टाद्युक्तत्वात्क्रमवादमंगीकृत्योक्तं सांप्रतंशिष्टानांत्वन्नप्रा
शनसमयएवभूम्युपवेशनानुष्ठानदर्शनाच्च अथपरमतेनैवभूम्युपवेशनकालएवजीविकापरीक्षामालिन्याह त
स्मिन्कालेस्थापयेत्तत्पुरस्तादस्त्रंशास्त्रंपुस्तकंलेखनींच स्वर्णंरूप्यंयवग्रहणातिबालस्तेनजीवेत्सतस्यवृत्तिःप्रतिष्ठा
स्पष्टार्थंपद्यं आजीवैर्जीविकाभिः आजीवोजीविकावार्तेत्यभिधानात् यदाह मार्कंडेयः अग्रतोथप्रविन्यस्यशिल्प
भांडानिसर्वशः शास्त्राणिचैववस्त्राणि ततःपश्येत्तुलक्षणं प्रथमंयत्स्पृशेद्बालोरिंगमाणःस्वयंतदा जीविकातस्यबाल
स्यतेनैवतुभविष्यतीति बहुधाजीविकापरीक्षामन्नप्राशनसमयएवकुर्वंतीतिशिष्टाचारः इदंपद्यंग्रंथकर्तुर्मुहूर्तेवि
चारार्थंप्रवृत्तस्यहिवक्तुमनुचितंमुहूर्तेविचारस्यात्रप्रतिपादनात् किंतुधर्मशास्त्रकर्तृणामुचितोयंविचारोयतस्तत्संस्का राम॰ २४
रार्थंप्रवृत्ताइति अथशिशोस्तांबूलमुहूर्तंस्रग्धरयाह वारेभौमार्किहीनेध्रुवमृदुलघुभेविप्रमूलादितींद्रस्वातीवस्वे

बुभे॰ मिथुनमृगसुताकुंभगोमीनलग्ने सौम्यैः केंद्रत्रिकोणैरशुभगगनगैः शत्रुलाभत्रिसंस्थैस्तांबूलं सार्धमासद्वय
मितसमये प्राक्तमन्नाशने वा भौमार्किभ्यां मंगलशनिभ्यां हीने रहिते वारे सति श्रवणमूलपुनर्वसुज्येष्ठास्वातीधनिष्ठा
युक्तैर्ध्रुवमृदुलघुनक्षत्रैरुपलक्षिते काले तथा मिथुने मृगो मकरः सुता कन्या कुंभः गो वृषः मीनः एषामन्यतमे
लग्ने सौम्यैः सौम्यग्रहैः केंद्रत्रिकोणगैरशुभैः खगनगैः पापग्रहैः शत्रुलाभत्रिसंस्थितैः षष्ठैकादशतृतीयस्थानस्थितैः
सहिते सति बालकस्य तांबूलं लक्षणया तांबूलभक्षणं प्राक्तमित्यर्थः यदाह दीपिकाकारः [illegible] मूलादितिद्विचित्रातिष्य
करोत्तरासु पौष्णाश्विवसुरजनीकरशाक्रभेषु वारेषु सूर्यशशिजीवसितेंदुजानां तांबूलभक्षणविधिः कथितः शिशूनां
दुश्चिक्यलाभभवनारिगताः च पापाः सौम्यग्रहा नवमपंचमकंटकस्थाः आरोग्यपुंगतिशुभभाग्यसुखापयुक्तैस्तां
बूलभक्षणविधौ मुनिभिः प्रदिष्टाः इति श्रवणधनिष्ठाचित्रानुराधयोर्ग्रहणं राजमार्तंडवचनात् दिनकरचंद्रसमीरणमैत्र
पुष्यपुनर्वसुरेवतिचित्रे हरमृगमन्मथकन्यकलग्ने पूगफलाशनमेभिरिहेष्टं पूगग्रहणं तांबूलोपलक्षणं रोहि
णीस्वात्योर्ग्रहणं मूलं नास्ति एतच्च कस्मिन्काले कार्यमित्यत आह सार्धेति जन्मकालात्सार्धमासद्वयमिते समये तां
बूलचर्वणं प्रोक्तं यदाह [illegible] सार्धमासद्वये शस्तं तांबूलं वा शिशोर्हितं षड्भिरन्नभुजि मासैर्भोगभागी भवेन्नरः वा अथ
वान्नाशने अन्नप्राशनसमये वा प्रोक्तं एतच्च शिष्टाचारदर्शनादुक्तं तदा तन्मुहूर्तविचारानुन्मेषः यदा सार्धमासद्वये तां
बूलभक्षणं विहितं तदा मुहूर्तविचारो युक्त एव अथ प्रसंगतोऽन्येषामपि तांबूलभक्षणमुहूर्तः प्रोच्यतेऽस्माभिः तदुक्तं
दीपिकायां मूलाश्विमैत्रकरतिष्यहरींदुभेषु पौष्णे तथा मृगशिरोदितवासवेषु तांबूलभूतनदलाद्यशनं शुभाय त्र्य
केंद्रजीवभृगुबोधनवासरेषु दत्तेति पर्णविशेषः स्मृतिभ्योऽनुसंधेयः यथा तांबूलं सुहृद्भ्यो दद्याद्ब्राह्मणेभ्यो निमंत्रितः
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते फलेन तत्प्रयत्नेन ब्रह्मापत्रेण भगवान्हरिः चूर्णमीश्वर तस्मै स्यात्तांबूलाशनदान
तः एकद्वित्रिचतुष्पंचषड्भिः पूगैः फलानि च लाभालाभौ सुखं दुःखं मायुर्मरणमेव च पर्णमूले भवेद्व्याधिः पर्णाग्रे धनसं
क्षयः चूर्णपर्णे हरत्यायुः सिरा बुद्धिविनाशिनी पर्णाग्रं पर्णपृष्ठं वा चूर्णपर्णद्विपर्णकं रात्रौ खदिरं तांबूले शक्रस्यापि श्रि

मु.दी.
मु.प्र.
२५

यं हरेत् अशास्त्रविधिना पर्णी शृंगं खादतियो नरः सप्तजन्मदरिद्रः स्यादंते विह्वलनं संस्मरेदिति अथ कर्णवेधमुहूर्तं संग्र
ह्याह हित्वैवं तांश्चैत्रपौषावमहरिशायनं जन्ममासं च रिक्तां युग्माब्दं जन्मतारामृतु ६ मुनि ७ वसुभिः ८ संमिते मास्यथो
वा जन्माहात्सूर्यभूपैः परिमितदिवसे ज्ञेज्यशुक्रेंदुवारे अथोजाब्दे विष्णुयुग्मादितिमृदुलघुभैः कर्णवेधः प्रशस्तः अत्रैतान्य
दोषान्हित्वा कर्णवेधः प्रशस्त इत्यन्वयः तत्र चैत्रपौषमासं च अवमदिनत्रयं जन्ममासमारभ्य जन्मदिवसं यावत्त्रिंशद्दिनम
वेत् जन्ममासः स विज्ञेयो गर्हितः सर्वकर्मस्विति लल्लोक्तेः हित्वा रिक्तां तिथिं ४ ९ १४ युग्माब्दं समवर्षं द्वितीयचतुर्थादि
कं जन्मतारा प्रथमदशमैकोनविंशात्मिकां च हित्वा तदुक्तं व्यवहारोच्चये न जन्ममासे न च चैत्रपौषे न जन्मतारासु हरौ
प्रसुप्ते तिथावरिक्ते न च विष्टिदुष्टे कर्णस्य वेधेन समेपि वर्षे इति अत्र चैत्रस्य निषेधो मीनार्के विषयः पौषनिषेधो धनु
र्के विषयः अन्यथा कार्तिकपौषमासे वा चैत्रे वा फाल्गुनेपि वा कर्णवेधं प्रशंसंति शुक्लपक्षे शुभेहनि इति व्यासवचन
मसंगतं स्यात् अत्र कार्तिकशुक्लपक्षैकादशीतः कार्तिकः प्रशस्तः पूर्वस्य देवशयनसत्त्वान्निषेधः अथ जन्मवर्ज्येतरा
ण्याह प्रयोगपारिजाते व्यासः यो जन्ममासे क्षुरकर्म यात्रां कर्णस्य वेधं कुरुते हि मोहात् स मूढः स रोगी धनपुत्रनाशं प्राप्नो
ति स्रुहं निधनं तदा चेति विहितकालमाह ऋत्विति ऋतवः षट् मुनयः सप्त वसवः अष्टौ एतैः संमिते गणिते सति षष्ठ
मासे सप्तममासेष्टममासे वा अथो वा जन्माहाज्जन्मदिवसात्सूर्यभूपैर्द्वादशभिः षोडशभिर्वा परिमिते गणिते दिवसे सो
रसावेन कर्णवेधः प्रशस्त उक्तः यदाह जगन्मोहने वसिष्ठः मासे षष्ठे सप्तमे वाष्टमे वा वेध्यौ कर्णौ द्वादशे षोडशेह्नि मध्ये
चाह्नः पूर्वभागे ह्नि रात्रावितिः यदा तु षष्ठमासादौ कर्णवेधश्चिकीर्षितस्तदा तिथीनाह जगन्मोहने वसिष्ठः द्वितीयाद
शमी षष्ठी सप्तमी च त्रयोदशी द्वादशी पंचमी शस्ता तृतीया कर्णवेधने इति ज्ञेज्यशुक्रेंदुवारे इति बुधबृहस्पतिशुक्र
चंद्रवारेषु शस्तः कर्णवेधः जगन्मोहने वसिष्ठः भूमिजार्कात्मजार्काणां वारान्संवर्जयेत्सुधीः जीवेंदुज्ञेंदुशुक्राणां दिवसाः
परिपूजिता इति अथेति अजाब्दे अयुग्माब्दे विषमवर्षे वा कर्णवेधः प्रशस्तः उक्तं च श्रीपतिना पौष्णवैष्णवकराश्विनचित्रा राम.
पुष्यवासवपुनर्वसुमैत्रैः सेंदवैः श्रवणवेधविधाने ·· सूर्यबले सतीत्यपि ध्येयं यदाह राजमार्तंडः अर्केचकूले शशिनि प्र २५

शस्ते ताराबले चंद्रविवृद्धपक्षे अयुग्मवर्षे शुभदं शिशूनां कर्णस्य वेधं मुनयो वदंति अत्र कर्णस्येत्येकवचनं ग्रहे कत्वाधि
करणन्यायेन विवक्षितं तेन द्वयोरपि कर्णयोर्वेधः विहित इति श्रवणधनिष्ठापुनर्वसुचित्रानुराधामृगरेवत्यश्विनीपुष्यह
स्तनक्षत्रैर्दशभिरुपलक्षिते काले कर्णवेधः प्रशस्तः उक्तं च श्रीपतिना पौष्णवैष्णवकराश्विनचित्रापुष्यवासवपुनर्वसुमै
त्रैः सेंदवैः श्रवणवेधविधानं निर्दिशंति मुनयो हि शिशूनामिति नारदेनापि चित्रादित्याश्विविष्णुंदुरविमित्रवसूडुषु
समेष्वप्यबालानां कर्णवेधक्रिया हितेति गर्गेणान्तरान्तयमप्युक्तं पुष्ये धनिष्ठास्वदितौ हरौ इन्द्वाष्ट्रके रेवत्येनिलभे त्र
राहु दस्रे समे चैव्यथ कर्णवेधो नेष्टाः च सर्वे ष्टमराशिसंस्था इति अत्रैकः कोविकल्पः अत्र जन्मनक्षत्रविशेषनिषेधः सर्वदा
दिसिद्धः तदुक्तं दीपिकायां जन्मनक्षत्रगः चंद्रः प्रशस्तः सर्वकर्मसु होरमेषजवादाधकर्तनेषु विवर्जयेत् इति छेदन इति
धात्वर्थानुसारात्कर्तनप्रायेन कर्णवेधो विवहितः तथा वसिष्ठः जन्मनि मासि विवाहः शुभदो जन्मर्क्षे जन्मराशौ पशूनां शुभ अशु
भं वदंति गर्गाः श्रुतिवेध क्षौर यात्रास्विति अथ कर्णवेधे लग्नशुद्धिं प्रहर्षिण्याह संशुद्धे मृतिभवने त्रिकोणकेंद्रत्र्यायस्थैः
शुभखचरैः कवीज्यलग्ने पापाख्यैररिसहजायगेहसंस्थैर्लग्नस्थे त्रिदशगुरौ शुभावहः स्यात् मृतिभवनेष्टमस्थाने संशु
द्धे सर्वग्रहरहिते सति यदाह जगन्मोहने वसिष्ठः कश्चिद्दिष्टोष्टराशिसंस्थक्षितिपिठयेचाष्टमसंज्ञकं चेति अत्र विहितल
ग्नानि प्रयोगपारिजाते नारद इत्युक्तानि वृषभे मिथुने मीने कुलीरे कन्यकासु च तुलाचापे तु कुर्वीत कर्णवेधं शुभोदये
मेषः च मकरः चैव मध्यमौ गुरुचोदितौ सिंहवृश्चिककुंभस्तु अधम त्वादि वर्जिता इति अत एवोक्तं वराहसंहितादि लाभे
तृतीये च शुभैः समेते क्रूरैर्विहीने शुभराशिलग्ने वेध्यौ तु कर्णौ त्रिदशेज्यलग्ने इति शुभाः चंद्रबुधगुरुशुक्रास्तेषां राशयः
कर्कमिथुनवृषतुलाधनुर्मीनास्तेषामन्यतमे लग्ने क्रूरैर्विहीने सतीत्यर्थः ग्रंथकृद्दीपिकाकारमतमाश्रित्याह कवीति
कवीज्ययोर्लग्ने वृषतुलाधनुर्मीनानामन्यतमे लग्ने सति त्रिकोण ९ ५ केंद्र १ ४ ७ १० आयस्थितैर्ग्रहैः शुभैः तथा पा
पाख्यैर्ग्रहैररिसहजायगेहसंस्थैः षष्ठतृतीयैकादशस्थानस्थितैरुपलक्षिते तथार्केंदसंस्थे त्रिदशगुरौ सति कर्णवेधः शु
भावहः शुभकारकः स्यात् उक्तं च दीपिकायां सौम्यैरायत्रिकोणकंटकगतैः पापैस्त्रिलाभारिगैर्गोज्यास्त्रे शुभतिथौ इज्यसितयो

लेग्रे तु कुलेऽशुभे इति गुरुः कर्णवेधादिकार्येषु नेष्टाः सर्वेष्टमस्थिताः कर्णवेधो विनिर्दिष्टो लग्नसंस्थे बृहस्पतौ तद
मु॰टी॰ भावे त्वन्यकेंद्रस्थे तदभावे त्रिकोणगे इति अत्र कर्णवेधप्रकारो रत्नमालायां शिशोरजातदंतस्य मातुरुत्संगसर्पिणः सूच्यो
सं॰प्र॰ ह्यां वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया कर्णरंध्रे विशेषमाह देवलः कर्णरंध्रे न विशेद्यस्य रविरश्मयः तं दृष्ट्वा विलयं यांति पुण्यौ
२९ घाश्च पुरातनाः शालंकायनः अविद्धकर्णं यद्भुक्तं लंबकर्णस्य चैव च दृश्यकर्णे प्रयद्भुक्तं [illegible] तद्वै रक्षांसि ग
च्छंतीति ब्राह्मणादिवर्णविशेषतन्नक्षत्राभिधानं तत्संबंधी विशेषश्च स्मृतिभ्योऽनुसंधेयः अत्र ग्रंथकारानुक्तोऽप्यवसरप्राप्तोऽब्द
पूर्तिमुहूर्तः प्रोच्यतेऽस्माभिः तत्र सौराब्दांते यद्दिने न जातं तद्दिनेऽब्दपूर्तिः कार्या उक्तं च विधिरत्ने अब्देन सौरेण शिशोः समांते बाल
स्तु संस्थाप्य च तज्जन्मधिष्ण्ये कृत्वायुषो वृद्धिकरं च कर्म तं धारयेत्कौतिसुवर्णसूत्रे नृसिंहोऽपि सौरेणाब्दांते जन्मर्क्षे शिशुं संस्थाप्य
शास्त्रतः अब्दे येहि मासे त्वेतु रायणादावनुकूलके नवहोमं वरादीनि यथार्हं धारयेन्नदेति तत्र खंडनक्षत्रादौ निर्णयमाह वृद्धगर्गः
उदयव्यापि जन्मर्क्षं तस्माद्ग्राह्यं तु जन्मतः संगमव्यापि खंडर्क्षे तत्र जन्मकरं शुभमिति न केवलं प्रथमवर्ष एवाब्दपूर्तिः किंतु
प्रत्यब्दांतेऽपि कार्या यदाह गर्गः यस्मिन्दिने सवितरि तन्नक्षत्रदिनं भवेत् प्रत्यब्दांते च नक्षत्रे विधिं वह्न्येनेणपरेमिति दाक्षि
णात्यशिष्टाचारस्तु जन्ममासीय जन्मतिथावब्दपूर्तिर्भवतीति दृश्यते अथ चूडावर्षादिस्त्यादिना चौलमुहूर्ते विवक्षुस्तन्नि
षेधकं प्रसंगतोऽन्यकर्मनिषेधकं कालमवधारयन्नाह गीर्वाणांबुप्रतिष्ठापरिणयदहनाधानचौलोपवीतद्रोणीपालाभिषेकादव
सितविशानं नैव याम्यायने स्यात् नो वा बालास्तवार्धे सुरगुरुसितयोर्नैव केतूदये स्यान्न्यूनो वार्धं च केचित्तु हतितमपरे या
वदीशांतरुग्रे गीर्वाणाद्देवाः अंबु जलं तन्नयाजलाशयस्तयोः प्रतिष्ठा गीर्वाणप्रतिष्ठा जलप्रतिष्ठा चेत्यर्थः परिणयो विवा
हः दहनाधानमग्न्याधानं चौलं प्रसिद्धं उपवीतं व्रतबंधः द्रोणीपालाभिषेको राज्ञाभिषेकः उदवसितविशनं गृहप्रवेशः गृहगे
हादवसितमित्यभिधानात् अत्र समाहारद्वंद्वः एतानि कर्माण्युपलक्षणत्वादन्यान्यपि नियतकालानि शुभकर्माणि याम्या
यने दक्षिणायने नैव स्युः स्यादित्येकवचनं तु समाहारद्वंद्वं कृत्वाभिप्रायं यदाह महेश्वरः चूडाकर्म नृपाभिषेकतिलयाम्याधा राम॰
नपाणिग्रहान्देवस्थापनमौंजिबंधनविधीन्कुर्यान्नयाम्यायने इति किंतूत्तरायण एव कुर्यात् तदुक्तं रत्नमालायां गृहप्रवेशस्त्रिदशा २९

प्रतिष्ठाविवाहचौलव्रतबंधपूर्वं सौम्यायने कर्म शुभं विधेयं यद्वहिर्नतत्खलुदक्षिणे स्यात् विशनमिति ल्युट् प्रत्ययस्य किं त्वा
द्यभावात्पुंगं न लघूपधस्य चेति गुणः प्राप्तः संज्ञापूर्वको विधिरनित्य इत्यनित्यत्वान्न भवतीति ज्ञापकं ओर्गुण इति सूत्रे यथा गो
रोरिति वक्तव्ये गुण इत्यंशसंज्ञापूर्वको विधिरनित्यो यथा स्यात् तेन स्वायंभुवमिति सिद्धं तथा च महेश्वरेणापि प्रयुक्तं भूपा
नां मृदुभैर्ध्रुवैः प्रविशनं यात्रानिवृत्तौ शुभमिति अथ वाक्यमेव पठितव्यं गीर्वाणां बुप्रतिष्ठापरिणयदहनाधानगेहप्रवेश
चौलं राज्याभिषेको व्रतमपि शुभं नैव याम्यायने स्यादिति अथ सुरगुरुसितयोः बृहस्पतिशुक्रयोर्बाल्यात्त्वार्धवा बा
लत्वे अस्तत्वे वार्धके चैतानि कर्माणि नो न कुर्यात् इदं प्रायुक्तमपि पुनर्लिखितं स्मरणाविक्षेपार्थं मूलवाक्यान्यपि प्रयो
वोक्तान्यस्माभिः वृद्धशब्दस्य गुणवाचित्वाद्गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् वार्द्धकमिति वुञ् तु मनोज्ञादिभ्यः
चेति मनोज्ञादेराकृतिगणत्वाद्वुञ् अथ केतूदये धूमकेतूदये शुभकर्माणि न भवंति तदुक्तं पराशरेण केतोरुत्पत्तिदिनादूर्ध्वं सप्ता
हं मंगलं त्यजेत् यावत्केतूदयस्तावदशुद्धः समयो हि स इति अत्र केचित्केतूदये ज्ञाते सप्त पंच दश दिनानि त्यजंतीव
दंति उक्तं च वराहेण दृष्टः शोऽप्युग्रावसरान्नशुभदः केचिच्चरिष्टः शिखीति शिखीकेतुः दृष्टवचनाद्यावन्न दृष्टस्तावद्दोष इत्यर्थः
अत्र ग्रंथकर्ता एकदिनत्यागोऽत्र रहाहृत्स्वभीतेः कृतः केचित्तु पापज्ञानेऽर्धपक्षं सप्तदिनानि केतूदयाद्यनंतरं त्यजंतीति तदप्यु
क्तं वराहेण केतूदये सप्तदिनानि चोर्ध्वं विवाहयात्रादिविगर्हितानि दिनानि शेषाणि शुभानि नूनं वदंति नैरप्य सुखावसुनींद्रा इति
ननु केचित्केतूदयदर्शनं यावन्मंगलकृत्यानि निषिद्धानि अन्यैस्तु केतूदयानंतरं षोडशाष्टौ दिनानि निषिद्धानि तत्कथम
नयोर्वाक्ययोरेकवाक्यत्वं तत्राह तमिति अपरे आचार्यास्तु केतुं यावद्दीप्तो यावद्दर्शनं यज्ञहति तदग्रे केतोर्द्विविधो नाम
सकीलकादयः अतिदुष्टफलदा द्रष्टव्याः तेन भिन्नविषयत्वाद्दोषाभावः तेषां केतूनां स्वरूपं फलानि च गर्गोक्तानि त्रिशिखाश्च त्रि
ताराश्च रक्तलोहितरश्मयः प्रायशस्ते तु रामाशंसेवं ते नित्यमेव ते लोहितांगात्मजा ज्ञेया ग्रहाः षष्टिः समासतः नामतः कौ
कुमाख्येयास्ते ज्ञेयाः संग्रामकारकाः क्षमाभाः स्नापयंतास्तु कुलाक्षसरश्मयः राहुपुत्रास्त्रयस्त्रिंशत्कीलकाख्या निदारुणाः
इत्यादि वयं तु ब्रूमः यथा वद्दर्शने केतूदये निषिद्धमुक्तं तदग्रे ब्रह्मपुत्राख्यकेतोर्महादुष्टफलत्वं ज्ञेयं उक्तं च लोमशसंहिता

मु.टी.
सं.प्र.
२२

यां चातुर्मास्येष्वथ पौषे मधुभवतिरवौ ब्रह्मपुत्रोऽङ्गमेवाद्यं पत्या रेवनाशः प्रचुरसुनिगणैः कीर्तितो वै विवाहे इति मधुर्भमीनः ब्र
ह्मपुत्रः केतुः विवाहस्योपलक्षणत्वात् अन्यान्यपि शुभकर्माणि निषिद्धानि केतोरस्तदिनादूर्ध्वं सप्तरात्राणि वर्ज्यत्वे ब्रह्मपुत्रोऽङ्गमे
वर्ज्यं व्रतं यात्रां मंगलमिति ज्योतिर्निबंधकृदुक्तेश्च ब्रह्मपुत्रलक्षणमेव वसिष्ठेनोक्तं त्रिशिखस्त्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्मदंड
निभः अयनदिक्प्रभवो सौ कांतकरो ब्रह्मदंडाख्यः को ब्रह्मा तस्यापत्यं केतोरिति तत्रान्येषां का कथेत्यर्थः अत एवोक्तं वरा
हेण ब्रह्मसुत एक एवाग्निशिखो वर्णैस्त्रिभिर्युगांतकरः अनियतदिक्संप्रभवो विज्ञेयो ब्रह्मदंडाख्य इति अथ गुरुशुक्रयो
र्बाल्ये वार्द्धके च शुभं कर्म त्याज्यमित्युक्तं तत्रावसरप्राप्तं तदीयदिनसंख्यमनुष्टुभाह पुरः पश्चात्तु बाल्यं त्रिदशाहं च वार्द्ध
के पक्षं पंचदिनं तेड्ये गुरोः पक्षं सदा हृतं भृगोः शुक्रस्य पूर्वस्यां दिशि उदितस्य पश्चात् ज्ञातव्यं यथासंख्यं बाल्यं स्यात् पूर्वस्यां शि शिशि
दिनं पश्चाद्दशाहं बालत्वं शुक्रस्येत्यर्थः च पुनर्भृगोर्वार्द्धकं वृद्धत्वं पूर्वस्यां पक्षं पंचदशादिनानि गुरोस्तद्वद्बाल्यवार्द्धके प
क्षमुदाहृते कथिते वराहनारदः पश्चात्त्वाग्युदितः शुक्रो दशत्रिदिवसं शिशुः वृद्धः पंचदिनं पक्षं गुरुः पक्षांतसर्वत इति अथ
परमतेन बाल्यवार्द्धकं चानुष्टुभाह नेदशाहं द्वयोः प्रोक्तं कैश्चित्सप्तदिनं परैः अहं त्वात्ययिकेप्यन्यैरर्धाहं च त्र्यहं विधाः
दिङ्नियममत्यक्त्वा द्वयोर्गुरुशुक्रयोस्तु बाल्यवार्द्धके गुरुशुक्रयोः प्रोक्ते तदाह महेश्वरः बालः शुक्रो दिवसदशकं पंचकं चैव
वृद्धः पश्चादर्कात् त्रितयमुदितः पक्षमैंद्र्यां क्रमेण जीवो वृद्धः शिशुरपि सदा पक्षमन्ये शिशुत्वे वृद्धो प्रोक्तो दिवसदशकं
चापरैः सप्तरात्रमिति केशवार्कोपि द्विपनिसप्तदिनान्युदयस्तयोः सगुरुभृगुजतः च गतेष्वयोरिति अन्यैरपि पुनरत्राहे
दिवसं बाल्यवार्द्धके प्रोक्ते उक्तं च गर्गेण शेषेषु देशेषु त्रिदिनं वदंतीति अथैषां वाक्यानां गतिमाह आत्ययिके इति अत्ययः
कार्यावष्टंभः स प्रयोजनं यस्येति प्रयोजनमिति ठक् लग्नांतराभावे समयशुद्ध्यभावे वातीतकालस्ववरो रवप्रदेयायाः क
न्यायाः गुण एव बहुनोपलब्धो वा यथासंभवं दशसप्तत्रिदिनानां त्याग उचितो नान्यथेत्यर्थः वयं तद्देशभेदेनैषां वाक्यानां व्यवस्थां
ब्रूमः तदाह गर्गः शुक्रो गुरुः प्राच्यरतश्च बालो विंध्ये दशाहं त्विषु सप्तरात्रं वंगेषु हूणेषु च षड्वं पंच शेषेषु देशे त्रिदिनं वदंतीति ॥ राम २२
चंद्रस्य विशेषमाह अर्धाहमिति विधास्ते बालवार्द्धके क्रमेणार्धाहं च भवतः बाल्यमर्धदिनं वार्द्धकं त्रिदिनं चंद्रस्येत्यर्थः उ

ऽंचवसिष्ठेन वृद्धत्वमिंदोस्त्रिदिने दिनार्धं बालत्वमस्तत्वमहः द्वयं च अस्तेविधौमृत्युमुपैतिकन्याबालेन्यसक्ताविधवात्व
वृद्धे नन्वत्रिविक्रमेणैकंदिनेचंद्रस्यबाल्यंप्रोक्तमिति तस्यवाकस्यकागतिः नकाचित् किंतुनिर्मूलत्वादुपेक्ष्यमेव तदुक्तं
माह्वाद्वसिष्ठेनापीदमहर्षि येनोक्तमेकंत्विहसंशिशुत्वमित्यनदिंदोस्तदयुक्तमत्र महत्त्वशीघ्रत्वसुधामयत्वाद्दिनार्धमेवार्ध
त्वनिष्टितत्वादितिकश्यपेनतु बालोपीदुःशुभएवोक्तः वृद्धश्चेंदुःस्त्रियंहंतिपतिंहन्त्यस्तमागतः यतस्त्वष्टनरश्मित्वाद्बालो
पिशुभःशशीति अतएवमहर्णीयांशुक्लप्रतिपदि द्वितीयदिनेद्वितीयायां प्रातर्यज्ञोपवीतादीनिशुभकृत्यानिशिष्टः
समाचरेदिति अथैवंनिषिद्धकालमुक्त्वेदानींचौलमुहूर्तंस्रग्धरार्धेनाहतावृत्ताभ्यामाह चूडावर्षात्तृतीयात्प्रभवतिवि
षमेष्टार्केरिक्ताद्यषष्ठीपर्वोन्नाहेविचैत्रोदगयनसमयेज्ञेंदुशुक्रेज्यकानां वारेलग्नांशयोश्चाशुभनिधनतनौनैधनेशु
द्धियुक्तेशाक्रोपेतेविमित्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः क्षीणचंद्रकुजसौरिभास्करैर्मृत्युशस्त्रमृतिपंगुताज्वराः सुक्र
मेणबुधजीवभार्गवैःकेंद्रगैःशुभमिष्टतारया तृतीयाद्वर्षादिति त्वब्दोपपंचमी तेनगर्भाधानकालाज्जन्मकालाद्वात्
तीयविषमवर्षेपंचमेवासप्तमेवा चूडाकरणंप्रभवति कृतेसत्युक्तमाद्रुकेभवतीत्यर्थः बृहद्वसिष्ठः तृतीयेपंचमेब्देवास्व
कुलाचारतोहितं चौलंशिशूनांयत्नेनस्वगृह्योक्तविधानतः आधानतोजन्मनोवासप्तमाब्देपिकारयेत् स्वकुलाचा
रस्त्वनेनयेषांकुले पार्थिकेनचूडाकरणंतत्रमुहूर्तविचारः येषांतूपनीत्यासहेष्यतइतिपक्षस्तेषामुपनयनमुहूर्तेन
सिद्धत्वान्नपृथग्मुहूर्तविचारानत्वन्येषः अतएवोक्तं याज्ञवल्क्येन चूडाकार्यायथाकुलमिति मनुनाप्रथममपिवर्षेतु
क्तं चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः प्रथमेब्देतृतीयेवाकर्तव्यंश्रुतिचोदनात् एवंबहुकालोक्तौयथाशक्त्यैव
वस्थाद्दृष्ट्वा स्वगृह्येविशेषकालानुक्तौतुसमबलत्वात्सर्वेषांविकल्पः विशेषमाहगुरुः तृतीयेब्देशिशोर्गर्भाज्जन्म
तोवाविशेषतः पंचमेसप्तमेवापिस्त्रियाःपुंसोथवासममिति अष्टेति अष्टाष्टमी अर्काद्वादशी रिक्ताःप्रसिद्धाः ४ ९ १४
आद्याप्रतिपत् षष्ठीप्रसिद्धा पर्वाण्यष्टमीचतुर्दशीपूर्णिमामावस्यासंक्रांतयः एतैरन्वितेहनि अत्रतत्पुरुषः रात्रा
हःसखिभ्यष्टजितिटच् नस्तद्धितइतिटिलोपः अष्टम्यादितिथीस्त्यक्त्वाशेषतिथिषु चूडास्यादित्यर्थः यदाह

मु.दी.
सं.प्र.
२५

र्भे पंचमासेऽधिके सति चौलं शुभफलदात्रेनैव स्यात् अतः पंचमासेभ्यः पूर्वं चौलं कृतं सत् शुभफलदमित्यर्थः तदुक्तं गृ
ह्यपरिशिष्टे चूडाकर्म न कर्तव्यं यस्य माता स्त्रि गर्भिणी करोति यदि मूढात्मा तदा गर्भनाशनं पित्रोर्मृतिं वदंत्येके चतर
ह्वानरे स्फुटमिति वसिष्ठः पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् विद्यते गुरुश्चैव दंपती शिशुरक्षतः गर्भमातुः कुमार
॥ स्य न कुर्याच्चौलकर्म च पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेदिति अस्यापवादमाह पंचेति पंचवर्षाधिकस्योक्तं हि
तं पंचवर्षस्य शिशोर्मातरि गर्भिण्यामपि सत्यां पंचमासादधऊर्ध्वं वा विहितकाले चौलमिष्टं कल्याणकारि भवेत् अन्ये
बाला पंचवर्षो यावन्न भवति तावत्पर्यंतं निषेध इत्यर्थः तदाह नारदः सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् पंचा
ब्दात्प्रागथोर्ध्वं तु गर्भिण्यामपि कारयेत् इति यदा तूपनयनेन सह चौलं चिकीर्षितं तदा विशेषमाह ज्योतिर्नारदः सहो
पनीत्या कुर्याच्चेत्तदा दोषो न विद्यत इति अत्र तु पंचवर्षाणां न्यूनाधिकभावो नापेक्षितः सर्वापवादकत्वादस्य एवम
पार्थ्यवेन मौंज्या समं भार्यां संस्कार्य बालमातरि सत्यां न भवति तदुक्तं सूनोर्मातरि गर्भिण्यां मौंजीचूडेन कारयेत्
गते तु पंचमे मासे गर्भोदीनां मृतिर्भवेत् अथ चौले ताराबलमावश्यकमित्युक्तं तत्र दुष्टायां तारायां सत्यामपवादं मालि
न्याह तारादोषेप्यब्जे त्रिकोणेथ गेवाहोरं सत्यां सौम्यमित्रस्ववर्गे सौम्येभेब्जे शोभने दुष्टतारा शस्ता ज्ञेया होरयाको
दिकृत्ये ताराणां दुष्टत्वं गोचरप्रकरणे अभिहितं तन्न एवावधार्यं तस्मात्तारादोषे सत्यपि होरां चौलं सशोभनं स्यात् कस्मि
न्हति अब्जे चंद्रे त्रिकोणगे नवपंचमस्थानस्थिते अथवोर्ध्वगते वृषराशिस्थिते अथवा सौम्यानां बुधगुरुशुक्राणां वर्गे
षड्वर्गे अथवा सुहृदां मित्राणां वर्गे अथवा स्वस्यैव षड्वर्गे सति उक्तं ज्योतिस्तत्वे सौम्यसुहृत्स्ववर्गे चंद्रे तुंगे त्रिकोण
गे वापि होरादिकोपकरणे तारादोषान्न दोषाय आदिशब्देन यात्रा विपत्तारा गुडं दद्यात् दद्यादित्यादयोपि तारादोषाप
वादाः प्रागुक्ताः स्वल्पत्वान्नेह्याः अत्र शुभताराया गुणमाह सौम्येति सौम्यविहिते नक्षत्रे सति अब्जे शोभने चंद्रे सति गोच
रोक्तेष्टस्थानस्थिते सति दुष्टतारा सुसमीचीना तारापि चेत्स्यात्तदा होरयात्रादि मंगलकृत्ये शस्ता इति प्रशस्ता निखि राम
लदोषापवादिका स्यादित्यर्थः एतदप्युक्तं ज्योतिस्तत्वे ज्ञात्वा रव्यं तिथी रिक्ता चंद्रश्चाष्टमगस्तथा तत्सर्वं नाशयेत्तारा २५

शः पंचदशं पात्तया भवेदिति अत्र वाक्ये मध्यमापि षष्ठी निषिद्धैव अत एव ग्रंथकृता कामधेनौ एकादशी द्वादश्यो
र्वपि प्रशस्ते ननु सप्तमी त्रयोदश्योरनेनवा गलग्रहा इति वसिष्ठेन गलग्रहत्वोक्तेश्च उच्यते वसंतविषयत्वात्तयो
र्निषेधः न उक्तं नारदेन विनर्तुना वसंतेन कृष्णपक्षे गलग्रहे अपराह्णे चोपनीतः पुनः संस्कारमर्हतीति अथवा
माघशुक्लसप्तमी मन्वादित्वस्यापि ग्रहणं यथा स्यात् अत एव मन्वाद्यपवादं माह वसिष्ठः याचैत्रवैशाखसितातृ
तीया माघे माघशुक्लसप्तमी मन्वादिः वैशाखशुक्लतृतीया युगादिः फाल्गुनपूर्णिमोत्तरं द्वितीया चात्तमास्य द्विती
या आसामनध्यायत्वेपि व्रतबंधे प्राशस्त्यसद्भाव इत्यर्थः अनध्यायं च सप्रयोजनं शुचिशुक्रेत्यादि पद्यव्याख्या
नवसरे स्माभिर्वक्ष्यते कृष्णादिमेति विहितमासानां कृष्णपक्षस्यादिमे त्रिके पंचमीपर्यंतं व्रतं सत्स्यात् नारदवाक्ये
शुक्लपक्षस्योक्तेरापंचम्यास्तिथयः कृष्णे शुक्लवत्परिकीर्तिता इति वचनेनापवादनोक्तेश्च एकां चतुर्थीं संत्यज्य कृष्ण
पक्षेपि चोत्तमाः आपंचम्यास्तु तिथयः परास्तु रतिनिंदिता इति नारदस्योक्तेश्च वसिष्ठोपि त्यक्त्वा चतुर्थीमपि कृष्णप
क्षे त्वाद्यं त्रिभागं शुभदं व्रते चेति नेचेति त्रिधा विभक्तस्य दिवसस्य त्रयो विभागाः क्रमेण पूर्वाह्णमध्याह्नापराह्णसं
ज्ञका भवंति उक्तं च स्कंदपुराणे ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्तानां तु पंचकं पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परं
अपराह्णस्ततः प्रोक्तो मुहूर्तानां तु पंचकमिति तत्रापराह्णभागे व्रतं सन्नसत् अपराह्णे चोपनीतः पुनः संस्कारमर्ह
तीति उक्तेः युक्तं चैतत् तस्मिन्समये श्राद्धकर्तृसमुचितत्वेन विनरकुभक्तत्वं यथाह नारदः त्रिधा विभक्ते दिवसे तत्राद्ये
कर्म दैविकं द्वितीये मानुषं कार्यं तृतीये पैतृकमिति एतस्य फलमुक्तं मनुना सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपना
यनं मध्याह्ने मध्यमं प्रोक्तमपराह्णे च गर्हितमिति एवं सति पूर्वाह्णे कदाचिद्विघ्नसंभवे मध्याह्नसमये सति संभवे
लग्ने कार्यमपराह्णे तु सर्वथा न कार्यमिति निष्कृष्टार्थः अथ व्रतबंधे सामान्यतो लग्नशुद्धिं प्रामाणिकयाह कवीज्य
चंद्रलग्नपा रिपौ मृतौ व्रतेधमाः व्यये च भार्गवस्तथा तनौ मृतौ सुते खलाः अत्र लग्नार्थे राशयः सापवादा वसिष्ठेनो
क्ताः लग्नाय सौम्यग्रहराशयो यग्राह्या न पापग्रहराशयो यग्राह्याः चेन्नेपि प्रबले च सौम्यैरधिष्ठिता स्वामिनिरीक्षि

मु॰टी॰
सं॰प्र॰
२८

तावा अत एवाह नारदः राशयः सकलाः श्रेष्ठाः शुभग्रहयुतेक्षिता इति एवं सति जगन्मोहनेव सिष्टेन प्रत्येकं लग्नफलान्यु
क्तानि मेषभवनि वाङ्गे विज्ञविद्यायुतो वृषे युग्मे वेदी तरशीचकुली रेच षडंगवित् शिल्पकर्मकरः सिंहे षष्ठे भवति
पंडितः तुलायां वणिजः प्राप्तिः कांडपृष्ठलुब्धश्चिके कांडपृष्ठः शस्त्रजीवी सर्वत्र पूजितः चापस्थ इज्यज्ञो निष्ठेगे तथा रा
जन्मश्रेष्ठ्यो भवेत्कुंभे मीने वेदांतपारग इति तानि लग्नानां शुभाशुभग्रहाणां उत्तमनिंदाधिष्ठाननिरीक्षणाद्यभावेद
ष्टव्यानि यदाहुः संभवस्तद्दायथा हि योगादस्तत्तायते विषं विषायते मध्वपि सर्पिषा सममिति वचनाद्योगजमेव फलंभ
वतीति तत्र रिपौ षष्ठस्थाने चेत् कुक्रकृहस्पतिः चंद्रलग्नस्वामिनो भवंति तदा धमा मरणकारकाः स्युः यद्याह्नि भार्गे
वौ चंद्रशुक्रौ व्यये चेद्भवतस्तदा नेष्टा मारकाः स्युरित्यर्थः खलाः पापग्रहाः लग्नाष्टमपंचमस्थानेषु स्थिताश्चेत्तदा
तथा मरणकरा इत्यर्थः अथ सामान्यते लग्नशुद्धिमष्टशुभाह व्रतबंधे बृषड्रिप्फवर्जिताः शोभनाः शुभा त्रिषडायखेलाः
कर्के गोस्थः पूर्णे विधुस्तनौ शुभाः शुभग्रहा अष्टमषष्ठस्थानेषु स्थिताश्चेन्न स्युस्तदा शोभनाः शुभफलदाः खलास्तृ
तीयैकादशषष्ठस्थानस्थिताः शोभनाः यदाह नारदः त्रिषष्ठायगतैः पापैः षडष्टांत्यविवर्जितैः शुभैः षष्ठाष्टलग्नांत्यव
र्जिते नहि मा शुना दैक्षामनोरमे गुरुः लग्नस्थिषु चरंध्रे च पापेषु मरणं वटोः सौख्यस्यात्रिषडायेषु जडत्वमितरेषु च चंद्रक्रूरा
स्तनौ नेष्टाः सर्वे रंध्रे व्यये रविः सितेंदुलग्नपाः षष्ठे मौंजीविद्यादिकर्मसु मौंजीबंधे विशेषेण प्राग्लग्नं पंचमं तथा क्रूरग्रहैः
विमुक्तं च भृगुराह तथाष्टमं दाक्षिणात्यास्त्वित्यवादः चंद्रक्रूरास्तनौ नेष्टाः सर्वे रंध्रे व्यये रविः सितेंदुलग्नपाः षष्ठे वटोः प्रा
णापहारकाः इत्यत्र शुक्रस्य मरणरूपं फलमुक्तं तदेतदाचार्या न सहंते व्ययस्थानगताः सर्वे कुर्वंति व्ययशीलिनं खलं नी
चं पापरतं बंधुहीनं विदेशगमिति वसिष्ठादिस्मृतिविरोधात् नन्वेतादृशदुष्टफलश्रवणाद्द्वादशे शुक्रो निषिद्ध एवेति चेन्न
एवं सति द्वादशस्थानां सर्वेषामपि वर्जनीयत्वमापतेत् नचैतद्वापि संमतं नास्ति सर्वत्र शुभकृत् शुक्रः षष्ठसप्ताष्टमं विने
ति कश्यपोक्तेश्च विशेषा वसिष्ठेनोक्तः द्वादशस्थो रविर्भौमः पञ्चप्रज्ञाचार्यनेत्रहा बलिनं बलनाशनमचिरात्तत्र संशयः राम
सर्वग्रहाः चाष्टमगा निधनाधनशोकदाः विना स्वं तुंगराशिं वा दिमित्रमाद्यशुभवर्गगान् आचार्यमप्रभाग्नंति शिष्यघ्नं त्यशु २८

भेनगः अस्यापवादस्तेनोक्तः चंद्रात्स्मरारिरंध्रेषु यद्येकस्मिन् शुभग्रहे स्थिते धियोगसंज्ञः स्यात् शुभयोगो द्विजन्मनां केंद्र
त्रिकोणगे जीवे भानुः शुक्रोऽथवाव्यये द्वितीये तु शुभो योगो द्विजानामुपनायन इति गुरुः मेषगो कर्कटान्यानां भानुः शुक्रं द्ववः
क्रमात् यमोदये भवेद्योगो द्विजोपनयने शुभ इति यमोदये मिथुनलग्ने कर्केति पूर्णः शुक्लपक्षीयो विधुः कर्कस्थो वृषस्थःच
सन् तनौ लग्नस्थितो यदि भवेत्तदैव शुभे नान्यथा [यदाहवसिष्ठः] प्रालेयरश्मौ यदि लग्नसंस्थे वलक्षपक्षेपि भवेत्स रोगीति गु
रुश्च चंद्रोदये भिक्षुः स्यात्क्षयरोगी सितेतरे शुक्लपक्षे भवेद्यज्वा स्वभे तुंगे विशेषत इति चंद्रे उदये सति इति पदच्छेदः मध्यंदिरिति
वत्समाधिः युक्तं चैतत् उपनयनं द्वितीयजन्म तत्र हि राशिविशेषेचा,ज्ञलग्नस्य स्यचंद्रस्य प्राशस्त्यमभिहितं तथा लघुजातके [वराहः]
कर्कवृषाजोपगते लग्ने चंद्रे धनी स्वरूपश्च विकलांगश्च दरिद्रः शेषेषु विशेषतः कृष्णे इति कश्यपपक्षे ऊर्ध्वस्थे लग्नस्थे चंद्रे सदैव नि
षेधीत् यथा वर्धमानोपि वा चंद्रः पूर्णो वा यदि लग्नगः निःस्वं करोति व्रतिनं लग्नतः क्षयरोगिणं [नारदोपि] सौम्ये स्थितो विशीतां
शुव्रतिनो यदि लग्नगः तं करोति वटुं निःस्वं सततं क्षयरोगिणमिति तदेतयोः कृष्णे स्थितचंद्रसंबंधिनोः पक्षयोर्देशाचारतो व्यवस्था
स्वगृहस्थः चंद्रस्तु न तमप्य वक्ष्यामीति अथ वर्गेशशाखेशयोः प्रयोजनस्य वक्ष्यमाणत्वात् वर्णाधीशा शाखाधीशाश्च मालिन्याह वि
प्राधीशौ भार्गवेज्यौ कुजार्कौ राजन्यानामोषधीशो विशांच शूद्राणां ज्ञः चांत्यजानां शनिः स्याच्छाखेशाः स्युर्जीवशुक्रारसौम्याः
अत्र विप्राधीशाविति समासांतर्गतमप्यधीशपदमन्यत्रानुषज्यते तेन शुक्रबृहस्पती ब्राह्मणानां स्वामिनौ भौमसूर्यौ क्षत्रि
याणां स्वामिनौ चंद्रो वैश्यानां स्वामी बुधः शूद्राणां स्वामी शनिरंत्यजानां चंडालादीनां प्रतिलोमजानां स्वामी [यदाहवराहः]
विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोंत्यजानामिति स्वामिनाविति शेषः ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथ
र्वण इति इति वेदक्रमात् जीवशुक्रारसौम्याः शाखेशाः स्युः ऋग्वेदे गुरुः यजुषः शुक्रः साम्नो भौमः अथर्वणो बुधः स्वामीत्यर्थः
[यदाहनारदः] वेदानामधिपा जीवशुक्रभौमबुधाः क्रमादिति ऋग्यजुःसामशाखेशा गुरुशुक्रधरात्मजाः आथर्वणस्य
वेदस्य शाखेशाः चंद्रनंदन इति वसिष्ठोक्तेश्च अथानयोर्वर्णशाखेशयोः प्रयोजनं वसंततिलकयाह शाखेशवारतनुवीर्यम
तीवशस्तं शाखेशसूर्यशशिजीवबले व्रतं सत् जीवे भृगौ रिपुगृहे विजिते च नीचे स्याद्वेदशास्त्रविधिना रहितो व्रतेन यः स्वशाखाधि

प्तो जीवश्च शुक्रभौमबुधाः क्रमादिति अथयज्ञः सामशाखेशगुरुशुक्रधरात्मजेषु प्रशस्तस्यैव वारस्तनुर्लग्नं च वीर्यं च गोचरोक्तप्रकारेण गृ
मु॰दी॰ हाद्यवस्थितत्वेन वा बलवत्वं च तद्रुतं बंधे तौ विशस्तं यथा गुरुः अग्न्यादिनामीशोना गुरुवारे गुरुलग्ने धनुर्मीनाख्ये गुरुबले च तत्सुपनायने
सं॰प्र॰ शुभमेवं सर्वत्रापि ध्येयं तदुक्तं नारदेन शाखाधिपतिवारश्च शाखाधिपबलं शिशोः शाखाधिपतिलग्नं च त्रितयं दुर्लभं व्रते शाखेशः इति
२० शाखावेदस्तस्य पुः स्वामी तत्पन्यायत्वादूर्णेश्च गणापि ग्राह्यः सूर्यशशिजीवाः प्रशस्ताः एषां च बले सति व्रतं सत्स्या दन्यथा नेत्यर्थः उक्तं
च वसिष्ठेन शाखेशसूर्यवर्णेशगुरूणां बलपूर्वकं ततोन्येषां गुरुबलं मुख्यमाचार्यशिष्ययोः राजमार्तंडविशेषः पितुः सूर्यबलं
श्रेष्ठं शाखावर्णेशयोर्वटोः सर्वेषां गुरुचंद्रार्कबलं प्रोक्तं व्रतादिष्विति रत्नमालायां वर्णाधिपे बलोपेते ह्युपनीतिक्रिया हिता
सर्वेषां च गुरौ चंद्रे सूर्ये च बलशालिनीति भीमपराक्रमः विप्राणां गुरुसितयो राज्ञां रविभौमयोर्बले शस्तं इंदोर्विशां रवीडुत्रिदशेज्य
बले खिलानां तु नारदेन तु प्रत्येकं शाखेशादीनामुच्चादिस्थितत्वेन फलमुक्तं स्वोच्चसंस्थे तदंशे वा स्वराशौ वा तदंशके शाखेशे वा
गुरौ शुक्रे वेदवेदांतपारगः परमोच्चगते जीवे शाखेशे वाथवा सिते व्रती शिशुर्धनाढ्यः स्याद्वेदवेदांतपारगः मित्रराशिगते जीवे तदंशे
स्वशाखपे शुक्रे वाचाचार्यसंयुक्ते तदा तत्र व्रती शिशुः स्वाधिमित्रगृहस्थे वा तस्याश्च संस्थ तदंशके गुरौ भृगौ वा शाखेशे विद्याधन
समन्वितः शाखेशस्त्वत्युपलक्षणं तेन वर्णाधिपेप्येतदेव फलं अत्र प्रमाणं रत्नमालावाक्यं प्रागुक्तं अथ शाखेशादीनां निर्बलत्वे फल
माह जीवे वा भृगौ वा चकाराच्छाखेशे वर्णेशे वा विजिते युद्धे पराजिते नीचे स्वनीचराशिनः सति व्रते नानुष्ठितेन सता वेदशास्त्रविधिना
वेदो वेदाध्ययनं शास्त्रं चाध्ययनं विधिर्नित्यनैमित्तिकश्रौतस्मार्तकर्मानुष्ठानं तेषां समाहारद्वंद्वः तेन रहितो व्रती स्यात् तदुक्तं व
सिष्ठेन नीचस्थे नीचांशकसंस्थिते वा शाखेश्च रेवास्तजिते द्विपुर्धे व्रती शिशुर्हीनकुलप्रसूतः शास्त्रोपजीवी स्वकुलं विसृज्य नार
देनापि स्वनीचगे तदंशे वा स्वारिभे वा तदंशके गुरौ भृगौ वा शाखेशे शाकलाशीलविवर्जितः स्वाधिशत्रुगृहस्थे वा तदंशे वा तदा व्रती
शाखेशे वा गुरौ शुक्रे महापातककृद्भवेत् शाखेश इत्युपलक्षणं वर्णाधिपस्यापि तदुक्तं वसिष्ठेन शाखेशगुरुशुक्राणां मौढ्ये बाल्ये च
वार्द्धके नैवोपनयनं कार्यं वर्णेशे दुर्बले सतीति शाखेशगुरुशुक्राणामेकस्मिन्नपि शत्रुवर्जिते विद्याकृतार्थिभिस्तत्र न कार्यं चोपनायनं राम
अत्र नीचाद्यवस्थितत्वेपि शाखेशादेः परिमाणमाह वसिष्ठ एव शत्रुनीचाधिशत्रुस्थ स्वांशे वा स्वोर्ध्वभागगे शाखेशे वा गुरौ शुक्रे तेन नी २०

चफलमस्तुतइति उच्चादिसंज्ञामाह वराहः अथ वृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः मदशिखिमनुयु
क्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेस्तनीचाः अत्र मदशिखिमनुयुक् २८ तिथी १५ इन्द्रियांशैः ५ त्रिनवक २७ स्वस्वतुङ्गादिकं
यष्ठं द्विवाहप्रकरणेवक्ष्यति ननु शुक्रे शत्रुगृहस्थे नीचगृहस्थे वा वटोरुपनयनं निषिद्धमुक्तं तदयुक्तं शुक्रशत्रू रविचंद्रौ तद्गृहे
सिंहकर्कौ तन्नीचं च कन्या ततः कर्कसिंहकन्याराशिस्थिते शुक्रे वटोरुपनयनं न कार्यमिति तद्वाक्यार्थः संपद्यते तत्र यदा
शुक्रस्य कर्कादिराशित्रयावस्थितिस्तदा सामान्यतः सूर्यस्यापि दक्षिणायनगतत्वादेवोपनयननिषेधसिद्धे पुनर्निषेधो वृथा
अत्रेयं समाधिसरणिः यथा यद्यपि सामान्यतः सूर्यस्य दक्षिणायनगतत्वं संभवति तथापि विशेषतः कदाचित्संभवोप्यापतति
स्पष्टीकृतिवशतो हि सूर्यात्प्राक्पश्चादेकराश्यंतरितो राशिद्वयांतरितो वा शुक्रः संभवति तदा कर्कादिराश्यवस्थिते सूर्ये शुक्र
स्य स्पष्टीकृत्या कर्कसिंहराश्यवस्थितिः संभवतीत्युपनयनकालदूषिकाव्यर्थैव दक्षिणायनसद्भावात् यदा तु वृषमिथुनस्थि
ते सूर्ये स्पष्टीकृत्या कर्कसिंहराश्यवस्थितिः शुक्रस्य संभवती विहितकालदूषिकेति सार्थक एव निषेधः ननु शत्रुक्षेत्रावस्थितशु
क्रनिषेधोभिहितरीत्या युक्त एव नीचराश्यवस्थितशुक्रनिषेधो व्यर्थ एव यतः स्पष्टीकृत्या ज्ञातोपि कन्यास्थितः शुक्रः कदाचिद
पि दक्षिणायनं न व्यभिचरति सत्यं शरद्ग्रीष्मवसंतेषु व्युत्क्रमात् द्विजन्मनां मुख्यं साधारणं तेषां व्रतं माघादिपंचस्विति नारदा
दिवाक्येभ्यः शरत्काले वैश्यानामुपनयनं विहितमित्यवगम्यते तत्र कदाचिच्छुक्रस्य नीचराशिकन्यावस्थित्योपनयननिषे
धवचनसार्थक्यात् यदा तु विप्रस्य क्षत्रियस्यापि मौंजी स्यादुत्तरायणे दक्षिणे तु विशां कुर्यान्नानध्यायेन संक्रमे इति वृद्ध
वसिष्ठवाक्याद्दक्षिणायनेपि वैश्यानामुपनयनं प्रशस्तमुक्तं तदा तु सुतरां शुक्रस्य शत्रुगृहनीचगृहावस्थितत्वदोषोक्तिः सार्थ
कैवेति ननु शत्रुगृहस्थे गुरावप्युपनयनं निषिद्धमित्युक्तं तत्र गुरोः शत्रू बुधशुक्रौ तद्गृहाणि मिथुनकन्यावृषतुलाख्यानि त
त्स्थे गुरौ वटोरुपनयननिषेधो नीचस्थितगुरुवच्छिष्टैः कुतो नांगीक्रियत इति उच्यते तत्र शिष्टाशयः यथा गुरोरस्ते सिंहस्थे म
करस्थे वा गुरौ समस्तशुभकर्मणामारंभो निषिद्धो दोषप्रकरणे पाठात् स्वनीचगइत्यादिवाक्ये तूपनयनप्रकरण एव पाठा
दनावश्यकता प्रतीयते आवश्यकत्वे तु दोषप्रकरण एव निषेधो वक्तव्यः स्यात् न च तत्रोक्तौ सकलशुभकर्मणां निषेधः स्या

दितिवाच्यं स्वनीचइत्यस्यवाक्यस्यशेषे कलाशीलविवर्जितइतिचरणद्वये मौंजीबंधनं कारयेदिति पठितव्यमिति तस्यैव नि
मु॰टी॰ षेधः सेत्स्यति ननु मौंजीबंधपदस्योपलक्षणत्वेन व्याख्यास्यते यथा उपनयने गोदानं पाणिग्रहणं गृहप्रवेशगमनानि अत्र नि
सं॰ष॰ तेषु न कुर्यान्न हरगुरुभृगुपुत्रचंद्रे दृष्टित्यादिषूपनयनपदानि सत्यं सर्वत्रोपलक्षणत्वं वाक्यांतराणि विना व्याख्यानं दुर्घटानि अत्र
२८ हि वापीकूपतडागयागारामम् इत्याद्यतो वाद्विवाक्यैकवाक्यतावशादुपनयनादिपदान्युपलक्षणत्वेन व्याक्रियंते न केवलानि स
दृशवाक्यांतराभावात् एवं सति दोषप्रकरण एव निषेधे वक्तव्ये यदुपनयनप्रकरणे दोषाभिधानं तद्धेतोः कालांतरे संभवति दृष्टमि
शुनकन्यातुलास्थयोः राबुपनयनं न कार्यमित्येवं परंतदसंभवे तु भवत्येव कालांतराभावात् नीचस्थितश्शैःत सर्वथा न भवति दो
षप्रकरणे पाठकुर्वीयस्तवत् नीचराशिगतत्वेन निषेधे सिद्धे तदंशक निषेधो राश्यंतरे पि गुरौ नीचांशका हान्यर्थमित्यलमतिप्र
संगेन अथ सामान्यतो निषिद्धस्य जन्ममासादेर्व्रतबंधे अपवादमनुष्टुभाह जन्मर्क्षमासलग्नादौ व्रते विद्याकरो व्रती आद्यग
र्भे पि विप्राणां क्षत्रादीनामनादिमे जन्मनक्षत्रे जन्ममासे जन्मलग्ने वा दिशब्देन जन्मतिथिः एतेषु सत्स्वपि दोषेषु विप्रादीनामाद्य
गर्भे पि शब्दाद्द्वितीयगर्भादावपि व्रती बालो व्रतयज्ञोपवीती विद्याधिकः स्यात् क्षत्रादीनां क्षत्रियवैश्यानां पुनरनादिमे द्वितीयग
र्भादिबालके सति जन्मर्क्षमासलग्नादौ विद्याधिको व्रती स्यात् आद्यगर्भे तेषां सर्वथा प्रतिषेध एवेति अत्राय माशयः श्रीपतिः ज
न्ममासि न च जन्मभे तथा नैव जन्मदिवसे पि कारयेत् आद्यगर्भदुहितुः सुतस्य वा ज्येष्टमासि न तु जातु मंगलमिति अत्राद्यगर्भदुहि
तुः सुतस्य वेति देहलीदीपन्यायेनोभयत्रापि संबध्यते तेन जन्ममासादावाद्यगर्भस्यैव निषेधः तथा च संभवत्येकवाक्यत्वे वाक्य
भेदो हि दूषणमिति वाक्यभेदस्तापतेः अतएव महेश्वरः न जन्ममासे न च जन्मधिष्ण्ये न जन्मकालीयदिने विदध्यात् ज्येष्टे न मासि
प्रथमस्य सूनोः स्तथा सुतायाः अपि मंगलानीति वाक्यांते प्रथमस्येत्यायुक्तत्वात् अन्यच्च नारदोपि न जन्ममासे जन्मर्क्षे न जन्मदि
वसेपि वा आद्यगर्भस्य तस्याथ दुहितुर्वा करग्रहः इति विशेषाच्च अस्यापवादमाह शौनकः जन्मोदये जन्मसु तारकासु मासेन
धाजन्मनि जन्मराशौ व्रतेन विप्रो पि बहुश्रुतोपि प्रज्ञाविशेषैः प्रथितः पृथिव्यां गर्गपराशराद्यैः फलं यदुक्तं व्रतबंधने तु तनोधि राम॰
कं जन्मसु तारकासु मासेथ वा जन्मनि वाडवानां वाडवानां ब्राह्मणानां द्विजात्यग्रजन्मभूदेववाडवा इत्यभिधानात् प्रथमस्य २८

मैकोनविंशतिनक्षत्राणांग्रहणलार्थं जन्मसुतारकास्वित्युक्तं व्रतबंधनेत्यादिनारद्वाक्यं प्रायुक्तमेव गर्भाष्टमोपनयनमह
राजमार्तंडः यत्त्वावसंतसमयेबद्धविन्नभोगीगर्भाष्टमेविविधशास्त्रविशारदस्तु वेदार्थपालनपरःखलुजन्ममासेऽप्येष्टौपिजन्म
निबद्धकृत्तुभाजनस्यात् नत्तुविवाहेचोपनयनेजन्ममासंचवर्जयेत् विशेषात्तुन्मपरोत्तुवसिष्टाद्यैरुदाहृतमिति जगन्मोहे
गर्गवाक्यंकथंसंगच्छेतेतिचेत् सत्यं क्षत्रियाणांविशांचाद्यगर्भनिषेधार्थंभविष्यति तथासति द्वितीयगर्भादावुपनयनादिमं
गलकृत्यसुखोदर्कंस्यात् विप्राणांतुवाउवानामितिविशेषोक्ते राद्यगर्भेनाद्यगर्भस्याधारणमुपनयनंजन्ममासादौकृतं इति
चेत् शृणु याजन्ममासादौनिषेधःसआद्यगर्भस्यैवसोप्युपनयनवाक्येनापोद्यते द्वितीयगर्भादौतुनिषेधएवनास्तिकिंत
दपवादेन अथगुरुबलमनुष्टुभाह वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः श्रेष्ठोगुरुःखषडाद्येपूजयान्यत्रनिंदितइति व
टुरुपनयनेधिकारी उपलक्षणत्वाद्वरोपि तथाकन्यास्त्रीजात्यपत्यं तज्जन्मराशेः नवमपंचमैकादशद्वितीयसप्तमस्थानस्थि
तोगुरुःश्रेष्ठउत्तमः यदाह श्रीपतिः स्वाद्यधर्मतनयद्युनस्थितोनाकनायकपुरोहितःशुभइति खेति दशमषष्ठतृतीयप्रथम
स्थानस्थितोगुरुः पूजयाधर्मशास्त्रोक्तपूजाविधानेनसमनुष्ठितेनश्रेष्ठः अन्यत्रचतुर्थद्वादशाष्टमाख्येनिंद्यस्थानस्थितःसन् द्वि
गुणत्रिगुणादिपूजयासमनुष्ठितयापि निंद्योनिषिद्धइत्यर्थः उक्तं चवराहेन उग्रिकयजन्मारिखमध्यमेषुजन्मर्क्षतोवाक्पतिव
त्रपाणेः पूजाप्रधानसएवकांक्षत्यथाष्टमप्राप्तरसातलस्थइति वसिष्टेनतुविशेषउक्तः बंधोऽत्यनीयेरिपुराशिसंस्थे
वांछंतिपूजांदशमेसुरेज्ये नेच्छंतिपूजांजनिगेव्ययस्थेपुरातनाअष्टमगेपिराशौ जनिगेजन्मराशिस्थेचतुर्थेजन्मस्थगुरोः
पूजत्वपूजानिरपेक्षत्वविषयिणीदेशभेदेनव्यवस्थाध्येया तत्रपूजानिरपेक्षेपिगुरौगुणएवद्वादशपक्षेकन्यायाःकालाति
क्रांतायाविवाहउचितः एतदप्युक्तंवराहेण पूजाभिलाषमभिनिस्पृहेति ऊर्ध्वादुरौशुद्धिविवर्जितेपि वराद्यलाभेशुभदंवि
वाहं वदंतिगर्गच्यवनादिमुख्याइति अत्रचतुर्थद्वादशाष्टमस्थानस्थितत्वेनगुरोर्द्विगुणत्रिगुणादिकांपूजांविधायविवाहः
शुभइतिसांप्रदायिकोर्थः विवाहइत्युपलक्षणं तेनव्रतबंधोप्येवमेवध्येयः तदुक्तं नारदेन बालस्यबलहीनोपिशांत्याजी
वोबलप्रदः यथोक्तवत्सरेकार्यमनुक्तेनोपनायनमिति वसिष्टेनापि उक्तंपिवर्षेनबलीगुरुश्चेच्छांत्याप्रशस्तंव्रतबंधकर्म अ

तुक्तवर्षे सुबलप्रदोपि नवैतयोरन्यबलं बलीय इति अत्र वेधेन ये गुरुशुद्धिमाहुस्तान्दूषयति गर्गः मौंजीबंधे विवाहे च प्रति
मु॰दी॰ ष्ठायां विशेषतः गोचरेणैव कर्तव्यं वेधादिकमकारणमिति प्राच्यास्तु गोचरबलाभावे अष्टवर्गबलेनैव व्रतबंधादिकमाहुः
सं॰प्र॰ यदाह रत्नमार्तण्डः अष्टवर्गविशुद्धेषु गुरुशुक्रेन्दुभानुषु व्रतोद्वाहौ च कर्तव्यौ गोचरे पि कदापि नेति उपलक्षणमेतत्
२९ यत्र कर्मणि यस्य यस्य ग्रहस्य शुद्धिरपेक्षिता तस्य तस्याष्टवर्गशुद्धिर्विचार्या एतदप्याह स एव अष्टवर्गेण ये शुद्धास्ते शुद्धाः
सर्वकर्मसु सूक्ष्माष्टवर्गसंशुद्धिः स्थूला शुद्धिस्तु गोचरे अभावतो गोचरशोभनानां शुद्धिं वदेज्ज्ञो गुरिरष्टवर्गात् वैधव्य
कन्याहृदयहेतुयोगे जीवाष्टवर्गस्य वदेत्तु शुद्धिमिति तत्र गुरोरष्टवर्गं लिख्यते बृहज्जातके वराहः दिक्स्वाद्याद्यूनमदायबंधु
षु कुजः ७ स्वात्मत्रिकेष्वंगिरसः स्वर्यान्त्यत्रिनवेषु ९ धीस्वनवदिग्लाभारिगो भार्गवात् जायायाद्योनवात्मजेषु हिमगोर्मदा
त्रिषट्धीव्यये दिग्धीषट्स्वसुखा ... पूर्वनवगोज्ञास्स्मरे पूर्वद्यादिति एवं सत्यामपेक्षायां सूर्यादीनामप्यष्टकवर्गोस्ततः
वध्येयाः एवं जन्मकालीनग्रहवशादुक्तस्थाने रेखाः देयाः सांप्रतं विरुद्ध फलदातृग्रहाधिष्ठितराशौ रेखाधिक्ये शुभमन्य
थानेति निष्कृष्टोर्थः उक्तं च लघुजातके विफलं गोचरगणितं ह्यष्टकवर्गेण निर्दिशेत्तस्मात् रेखाधिक्ये शुभदं बिंदुधिक्ये नि
वशोभनं प्रायः अत्र प्रत्येकं रेखाफलमुक्तं यवनाचार्यैः कष्टं स्यादेकरेखायां द्वाभ्यामर्थक्षयो भवेत् त्रिभिः क्लेशं विजानीया
च्चतुर्भिः समता मता पंचभिः क्षेममारोग्यं षड्भिरर्थागमो भवेत् सप्तभिः परमानंदस्त्वष्टाभिः सर्वसंपदः अत्पलमतिप्रसंगेन
अथ यं यं प्रत्युक्तमेतद्गुरुदोषापवादमनुष्टुभाह स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः रिःफाष्टतुर्यगो पीष्टानी
चारिस्थः शुभोप्यसत् गुरुः द्वादशाष्टचतुर्थाख्यानिंद्यस्थानस्थितोपि यदि स्वोच्चस्थाने कर्के स्वभे धनुर्मीनाख्ये स्वमैत्रे स्व
मित्रगृहे मेषवृश्चिकाख्ये स्वांशे यस्मिन्कस्मिंश्चिद्राशौ धनुर्मीननवांशे वर्गोत्तमे वर्गोत्तमनवांशे यथा वृषराशौ वृष
नवांशे गुरुर्वर्गोत्तम इति वर्गोत्तमलक्षणमुक्तं वराहेन वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यंतगाः शुभफला नवभागसं
स्था इति उपलक्षणत्वात्स्वोच्चादिनवांशेपि वा स्थितः स्यात्तदेष्टः शुभफलदाता कैमुतिकन्यायेनापि अन्येषु स्थानेषु ता ए॰
शो गुरुः शुभ एव यदाह भुजगबलः वर्गोत्तमे स्वभवने भवनेथ मैत्रे मित्रांशके स्वभवनांशनवांशके वा जन्माष्टरिःफरिपु २

खचिच तुर्यगोपि जीवः सुखार्थसुतवृद्धिकरो विवाहे व्यासोपि मित्रराशिगते जीवे स्वगृहे स्वोच्चगेपि वा उद्वाहिता
यदा कन्या भवेत्पुत्रार्थसंयुतेति तुल्यन्यायत्वाद्व्रतादावपि ज्ञेयं ननु गुरोः सूर्यचंद्रभौमा मित्राणि एवं सति सिंहकर्कावि
त्यपि उक्तोनव्याख्यानमिति चेन्न सिंहस्थस्य गुरोः स्वरूपेणैव निषेध इत्युक्तं प्राक् कर्कस्थो गुरुरुच्चस्थ एवेति पुनरुक्तिः
अतः साधीयः प्राच्यव्याख्यानं नीचेति नीचो मकरस्थः अरिस्थः मिथुनकन्यावृषतुलाराशिस्थो गुरुः गोचरेण शुभोप्यस
दनिष्टफलदातेत्यर्थः तदुक्तं ज्योतिर्निबंधे उच्चस्थः स्वगृहे सुहृद्गृहगो वाचस्पतिर्नित्यशः पूर्णायुर्विविधार्थसौख्यजनको
जन्माष्टमस्थोपि चेत् नीचस्थारिगृहे दिवाकरकरच्छायानुगामी सदापीष्टो निष्टफलं ददाति नियतं वैधव्यदुःखापदमि
ति अत्राष्टमस्थमित्यनेन सर्वथानिष्टफलत्वेन चाष्टमं लक्षणं गुणं प्रपूजयेदिति वचनात् पूजामनीहमानेष्युपनय
नादिशुभं स्यात् द्वादशचतुर्थस्थानस्थस्य तु द्विगुणपूजामिच्छंतस्तथा तृतीयादिस्थानस्थस्य पूजामात्रापेक्षास्य गुरोः
शुभफलदातृत्वं नास्तीति किं वक्तव्यमिति केचित् कन्यायाः वचनार्थोपि शाहुः न चाष्टममिति वाक्यं शत्रुगृहस्थितगुर्वभिप्रा
यं अस्याप्यपवादो रत्नकोशेभिहितः गोचराष्टकवर्गाभ्यां यदि शुद्धिर्न लभ्यते तदोपनयनं कार्यं चैत्रे मीनगते रवावि
ति गुरुः तेष्वत्र अथ व्रतबंधे वर्ज्यपदार्थाननुष्टुभाह क्षेत्रप्रदोषेनध्याये राशौ निष्कृपपराह्णके प्राक्संध्यागर्जितेनेष्टो
व्रतबंधे गलग्रहे एषु उक्तपदार्थेषु सत्सु व्रतबंधो नेष्ट इति वाक्यार्थः तत्र कृष्णप्रथमत्रिभागरहिते कृष्णपक्षे आपं
चम्यास्तु तिथयः पराः स्युरिति निंदिता इति नारदोक्तेः तथा प्रदोषे यस्मिन्दिने संध्याकाले प्रदोषो भवेत्तद्दिवसे व्रतबंधो नेष्टः
प्रदोषलक्षणं स्वयमेव वक्ष्यति अनध्यायेपि नेष्टः अनध्यानग्रे वक्ष्यति शनौ नेष्टः अत्र संमतिरुक्ता निशायां रात्रौ नेष्टः
अपराह्णकेपि नेष्टः अत्र संमतिवाक्यं प्रागलेखि इयं पुनरुक्तिः स्मरणविच्छेदार्थं तथा प्राक्संध्या प्रातःसंध्या तस्यां
गर्जिते मेघध्वनौ वानध्यायनिमित्ते सति नेष्टः यदाह वसिष्ठः व्रतेन्हि पूर्वसंध्यायां वारिदो यदि गर्जेति तद्दिने स्यादनध्या
यं व्रतं तत्र विवर्जयेदिति संध्यालक्षणं प्रागुक्तमस्माभिः तथा गलग्रहे गलग्रहाख्ये दिवसे व्रतबंधो नेष्टः गलग्रहाना
ह गर्गः त्रयोदश्यादिचत्वारि सप्तम्यादि दिनत्रयं त्रयोदशी चतुर्थी च ह्यष्टौ एते गलग्रहा इत्यत्र कृष्णपक्षपदीयचतुर्थीग्रहणं

मु.प्री. नं तद्दोषाधिक्यप्रतिपत्त्यर्थं ननु शुक्लपक्षे तीयच तदर्थग्रहणार्थं अतः गुरुवाक्यस्यैव यथार्थापत्तेः अत्रैव ज्ञमनो
सं.प्र. हरे प्रदोषे निशायामनध्यायेमंदेहकृत्स्नेगलग्रहे मधुं विनोपनीतस्तु पुनः संस्कारमर्हतीति मधुं चैवं ज्योतिर्मनुः अनध्यायोपनीतस्तु
३० पुनः संस्कारमर्हति गलग्रहे प्रदोषे च स्वल्पायुरुपजायते नन्वत्र रात्रिनिषेधो व्यर्थः यतो दिवसे पूर्वाह्णादयः त्रयः काला उपन
यने श्रेष्ठमध्यमाधमा उक्ताः यदाह मनुः सर्वदेशेषु पूर्वाह्णेसु खं स्यादुपनायनं मध्याह्ने मध्यमं प्रोक्तमपराह्णे च गर्हितमिति तत्र
अपराह्णोपनीतस्तु पुनः संस्कारमर्हतीति अपराह्णकालस्यातिनिषिद्धत्वात् कैमुतिकन्यायेन रात्रिरपि निषिद्धेति वाचनिको रा
त्रिनिषेधो व्यर्थ इति चेत्सत्यं अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च तीर्थयात्रां विना गच्छन्पुनः संस्कारमर्हतीति पुनः संस्कार
निमित्तापत्तौ निमित्तांतमेव नैमित्तिकमिति न्यायेन पुनरुपनयने प्राप्ते यदि रात्रिसद्भावस्तदोपनयं माभूदिति रात्रिपदोक्तिः
अनयैव रीत्या प्रदोषोक्तिरपि सार्थिका यतः सायंकालसमयः प्रदोषशब्दवाच्यः प्रदोषो रजनीमुखमित्यमरोक्तेः वयं तु प्रदोषग्र
हणाद्यद्दिने लक्षणविशिष्टः प्रदोषो भावी तद्दिनमुपनयने त्याज्यमिति ब्रूमः यत्रापराह्णकालो निंदितस्तत्र प्रदोषस्तु सुतरां निंद्य
इति प्रदोषग्रहणसामर्थ्यात् पुनरुपनयननिषेधार्थं प्रदोषग्रहणमिति चेन्न रात्रिपदस्य सर्वथा वैयर्थ्यसत्त्वेन गतिर्युक्ता न
च तदत्रप्रयासः अतएव निबंधकर्त्रभिरुपनप्रकरणएव प्रदोषलक्षणवाक्यानां लिखितत्वात् यद्यपि तानि सर्वविद्यावित्यार्थ
कृदिति ब्रह्मनाधीयते नरैरितिचेत्यादीनि सामान्यतो विद्यारंभेवेदारंभविषयकाणि तथापि प्रथमातिक्रमे कारणाभावादहा रखी
कारस्य लएव तल्लिखनस्यायुक्तत्वादतः शिष्टाः सायंयद्दिने प्रदोषस्तद्दिने गलग्रहरहिते प्युपनयनं न कुर्वंति उक्तं च शार्ङ्गधरे
ये पूर्वाह्णे स्वाध्याये प्रदोषरहिते तिथावरिक्ते च हित्वाशनिकुजवारौ स्वाध्याये पूर्वपरदिवसे चेति नन्वनध्यायेषु गलग्र
हेषु च व्रतबंधो निषिद्ध इत्युक्तं तदयुक्तं विहिततिथ्याभावादेव न भविष्यति विहितास्तु तिथयः इमाः द्वितीयातृतीयापंचमीष
ष्ठी दशम्येकादशी द्वादश्येषा द्विविधित्वादिनोक्ताः उच्यते द्विविधा हि अनध्याया नित्या नैमित्तिकाश्च नित्यास्त्वष्टम्यादयः नैमित्ति
कामन्वाद्या स्तत्र मन्वादिराषाढशुक्लदशमी स्वाध्याय एव सोयपदात्रापि स्वाध्याय एव संक्रांतिः कदाचित्स्वाध्याये प्रपि स्यादि राम
त्यतास्तिथिषु व्रतबंधो माभूदित्यस्वाध्यायतोक्तिः चैत्रशुक्लवैशाखशुक्लतृतीयेयो मन्वादिषु गणितास्तु याचैत्रवैशाखसिता ३०
त्यता तिथिषु व्रतबंधो माभूदित्यस्वाध्यायतोक्तिः चैत्रशुक्लवैशाखशुक्ल

तृतीयेत्यादिवसिष्ठवाक्येन वाचनिकं व्रतबंधविषयत्वं अन्यासां मन्वादिस्वाध्यायतिथीनां दक्षिणायनगतानामनध्यायत्वं पृ
थगेवदारंभोमाभूदितिप्रयोजनं ब्रह्मनाधीयतेनरैरितिवाक्यांतेभिधानात् वेदस्यापलक्षणात्मकत्वविद्यारंभोपि एतच्चसामा
न्यतः सर्वासामप्यनध्यायतिथीनांप्रयोजनं मन्वादितिथिषुदानादिकमपिप्रयोजनंतस्मर्यते मत्स्यपुराणे मन्वंतरादयश्चैते
तदस्याक्षयकारकाइति अथचतुर्दश्यादयो ययनध्यायानोच्यंतेतदाविहितप्रतिषिद्धत्वाभावान्मध्यमत्वावसायस्तिथीनां
स्यात्तत्रयथास्वशाखीयनक्षत्रालाभेन्यान्यपिनक्षत्राणिगृह्यंते तथाकदाचिद्विहिततिथ्यालाभेमध्यमतिथिष्वप्युपनयनंस्या
न्माभूदित्येवमर्थं चतुर्दश्यादीनामनध्यायत्वमेतदेवसमाधानंतुल्यन्यायत्वाद्गलग्रहेष्वपिध्येयं किंचविद्यारंभोव्रतोद्देशः
द्वारंचैवविशेषतः गलग्रहेनकर्तव्यंयदीच्छेत्पुत्रजीवितमिति गुरुणाद्वारादिनिषेधोक्तेश्च क्वचिद्वहून्यपिकर्माणिगलग्रहे
निषिद्धान्युक्तंच चूडाव्रतंतथोद्वाहंकर्णयोरपिवेधनं गलग्रहेनकर्तव्यंयदीच्छेत्पुत्रजीवितमित्यलमतिप्रसक्तानुप्रसक्तेन
अथव्रतबंधेरव्यंशकफलमनुष्टुभाह क्रूरोजडोभवेत्पापीपटुःषट्कर्मकृद्बटुः यज्ञार्थभाक्तथामूर्खोरव्यंशेतनोक्रमा
त् षट्कर्माणि अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाः उक्तंच यजनंयाजनंचैवतथादानप्रतिग्रहौ अध्यापनंचाध्यय
नंषट्कर्माधर्मभाग्द्विजइति अन्यत्स्पष्टार्थं तदुक्तं रत्नमालायां शस्तेंशेह्युदयतिमूर्खतार्कभागेक्रूरत्वंभवतिचपापधीर्जडां
शे चंद्रांशेत्वतिजडतावुधेपटुत्वं यज्ञत्वंगुरुभृगुभागयोर्गुणित्वमिति भौम पराशरोपि भवेत्क्रूरोजडःपापःपटुर्यज्वामखान्वि
तः मूर्खःस्यार्कादिकांशेषुक्रमेणोदयवर्तिष्विति एवंसति बुधगुरुशुक्रस्वामिकराशिनवांशाग्राह्याः एतच्चस्पष्टमुक्तंनार
देन लग्नेयराशयःश्रेष्ठाःशुभग्रहयुतेक्षिताः शुभानवांशानतथाग्राह्यास्तेशुभराशयः नकदाचित्कर्कटांशःशुभग्रहयु
तोपिवा तस्मात्कोमिथुनंत्याश्चतुलाकन्यांशकाःशुभाइति अश्वाधनुः तथासति वृषमिथुनकन्यातुलाधनुर्मीनांशाग्रा
ह्याइतिनिष्कृष्टार्थः अथात्रचंद्रनवांशफलेस्वनवांशेमोटनकश्लोकमाह विद्यानिरतेशुभराशिलवे पापांशगतेहिदरिद्रनरः चं
द्रेस्वबलेबहुदुःखयुतःकर्णादितिभेधनवान्स्वलवे यस्मिन्कस्मिंश्चिद्वाशांचंद्रोयदिशुभग्रहराशिनवांशेस्यात्तदाव्रतीविद्यानि
रतोभवेत् यदिपापग्रहराशिनवांशेचंद्रस्तदादरिद्रनरोधनधान्यरहितःस्यात् यदिस्वलवेकर्कांशेस्यात्तदाबहुदुःखसहितोभवे

तु उक्तं च कश्यपेन शुभग्रहांशके चंद्रे विद्यावान्धनवान्भवेत् तस्मिन्पापांशसंस्थे तु निर्धनोखिलदुःखभाक् स्वांशसंस्थे निशाना-
मुदी॰ थे दरिद्रः खलु दुर्जन इति वसिष्ठेन प्रत्येकं फलमुक्तं सूर्यांशकगते चंद्रे शस्त्राजीवी खलु भवेत् बुधांशकगते चंद्रे वेदवेदी भवेद्ध्रुवः
सं॰प्र॰ जीवांशकगते यज्वा सांगवेदविशारदः श्रिप्रोद्वाही यत्र कुत्र स्यात्तत्रैवो भोगवान्भवेत् सौरांशकगते चंद्रे महापातककृद्भवेत् पु-
३२ एपसेवी स्वांशसंस्थे नीचो निःस्वः खलः सदा उक्तांशकगते चंद्रे सदा चंडालसेवक इति अथ स्वांशस्थितस्य चंद्रस्यापवादमाह
कर्णेति यदि कर्णे श्रवणनक्षत्रे कर्कांशस्थे निशाकरे तदा भवेत् वेदशास्त्रवेदशास्त्रधनधान्यसमृद्धिमानिति अथ केंद्रस्थानां सूर्या-
दीनां फलमनुष्टुभाह राजसेवी वैश्यवृत्तिः शास्त्रवृत्तिः चपाठकः प्राज्ञोर्थवान्म्लेच्छसेवी केंद्रे सूर्यादिखेचरैः केंद्रे सूर्यादिग्रहैः प्र-
त्येकं स्थितैः क्रमादिदं फलं ज्ञेयमित्यर्थः अन्यत्स्पष्टं यदाह श्रीपतिः स्वानुष्ठाने रतः स्यात्प्रवरमतिधनः केंद्रसंस्थे सुरेड्ये विद्या-
सौख्यार्थयुक्तो भृगुतनसि शिशिरे ध्यापकश्च प्रदिष्टः सूर्ये राज्ञोपसेवी भवति धरणिजे शस्त्रवृत्तिर्द्विजन्मा शीतांशौ वैश्यवृत्ति-
र्दिनकरतनये सेवकश्चान्त्यजानां अन्त्यजानां चंडालानां अत्र लग्नस्थे चंद्रे केंद्रस्थे शनिं विना शुभाः पापाश्च शुभफला इत्य-
वगम्यते मुनिभिस्तु केंद्रे पापा निंद्या इत्युक्तं वराहनारदः स्फूर्जिते केंद्रगे भानौ भवति नो वंशनाशनं कुजान्विते केंद्रगे भौमे शिष्या-
चार्यविनाशनं करोति निहदिते केंद्रसंस्थे मंदे महागदं लग्नकेंद्रगते राहौ रंध्रे मातृविनाशनं उग्रे केंद्रगते केतौ ह्यग्निवित्तविनाशनं
तत्र सूर्यस्य सर्वशास्त्राधिपत्वात्केंद्रसंस्थत्वमावश्यकं विषयं द्रष्टव्यं उक्तं च दैवज्ञमनोहरे सर्वशास्त्राधिपं भानुं केचिद्वाहुर्महर्षि-
यः तस्मान्नत्वन्तराभावे लग्नस्थोर्कः प्रशस्यते लग्नग्रहणं केंद्रोपलक्षणं तथा स्वगृहोच्चाद्यवस्थिताः पापग्रहाः केंद्रस्थाः शु-
भफलदातारोन्यथा नेत्यर्थः इति विरुद्धार्थयोर्वचनयोर्विषयविवेकः अथ चंद्रगुरुशुक्राणां ग्रहयुतौ फलमनुष्टुभाह शु-
क्रे जीवे तथा चंद्रे सूर्ये भौमार्कि संयुते निर्गुणः क्रूरचेष्टः स्यान्निर्गुणः संयुते पटुः शुक्रे तथा जीवे चंद्रे च प्रत्येकं सूर्ये संयुते भवतीति
निर्गुणः स्यात् एवं भौमसंयुते मतिक्रूरचेष्टः क्रूरा हिंसनशीला चेष्टा हस्ताद्व्यापारो यस्य स तादृशः स्यात् तथार्किः शनिस्तेन
संयुते निर्घृणो निर्लज्जो निंद्यो वा स्यात् तथा तस्मिन्नेव शुक्रे जीवे चंद्रे वा प्रत्येकं सद्भिः चंद्रबुधगुरुशुक्रैर्युते पटुः सर्वविद्यानिपुणः राम॰
स्यात् उक्तं च रत्नमालायां सार्के जीवे निर्गुणोर्थेन हीनः क्रूरः सौरे वा कुदुःखस्त्रस्तमेते भौमेः पुत्रेणालसो निर्घृणश्च स्यात्कुकर्मा हृष्टो ३२

ववत्तंप्रकल्प्याविति। अथचंद्रवशेनशुभांशशुभयोगांशामाणिकयाह विधौसितांशकेसितेत्रिकोणगेगुरौतनौ समस्तवेदविद्
तीयमांशगेतिनिर्गुणः। विधौचंद्रे शुक्रांशगेसतिशुक्रेचनवमगंचमस्थानस्थितेगुरौलग्नस्थेचसति व्रतीवटुः समस्तशास्त्रवेदवे
दान्वेत्तिजानाति तादृशःस्यात् एवंयमांशगेशनिस्थितेगुरौचासतिसितेत्रिकोणगेचसत्यपि अतिनिर्गुणःस्यात् यदाहमहेश्व
रः जीवेलग्नमधिष्ठितेभृगुसुतेधर्मात्मजस्थेविधौ शुक्रांशेखिलवेदविद्विहृततस्यांशेकृतघ्नोधमइति अपरेतु शुक्रशुक्रे
पिष्टान्यशास्त्रेसचंद्रेतिनिर्गुणइतिव्याचक्षते तदुक्तंरत्नमालायां लग्नेजीवेभार्गवेचत्रिकोणेशुक्रांशस्थेस्याद्द्विधौवेदवेदी
सौरांशस्थेसूरिलग्नेसशुक्रे विद्याशीलःप्रोज्झितःस्यात्कृतघ्नइति सूरिलग्ने सूरिर्बृहस्पतिस्तद्युक्तेलग्ने इतिव्रतबंधेलग्नवि
चारः ननुव्रतबंधेवटुराशितोष्टमभवनादिशुद्धिरुक्ता यदाहवसिष्ठः ननैधनेनैधनशुद्धिमग्रे ननैधनर्क्षंनचतन्नवांशः ननैध
नेशेनतदंशकोवालग्नेप्रशस्तोनचराशिनाथइति साग्रंथकृतानोक्तानोक्तेति अत्रग्रंथकृदाशयंब्रूमः वीक्षितेत्वाथैक
विंशमहादोषविवर्जितइति इतिनारदोक्तेस्तेषांदोषाणांचविवाहप्रकरणेवक्ष्यमाणत्वात् तत्रापिदंपत्योरष्टमंलग्नमित्यपिदोषः
सलक्षणेणवक्ष्यते तत्रदंपत्योरितिसंस्कार्योपलक्षणं तेनवटोरष्टमभवनशुद्धिरुक्तैवेत्यत्रपुनर्नोक्ता यत्रत्वेकविंशतिदोष
विचारोनास्तिसीमंतादौ किंतुकतिपयदोषविचारस्तत्रतत्साक्षादष्टमभवनशुद्धिरुक्ता अग्रेपि यात्रादौवक्ष्यतेचेति एवंचैनै
धननवांशशुद्ध्यादिकृतेनोक्तं सत्यंवक्तव्यमितिब्रूमः परंतुनारदाद्यनेकमुनिभिरप्रणीतत्वान्नोक्तमितिग्रंथकृदाशयः एवं
विधेव्रतबंधलग्नेव्रतबंधंकुर्यात् तदाहनारदः शुभलग्नेशुभांशेवानैधनेशुद्धिसंयुते लग्नेत्रिकोणेसौम्यखेटैःसंयुतेवानिरी
क्षिते जीवार्कशुक्रचंद्राद्यैःपंचभिर्बलिभिर्ग्रहैः स्थानादिबलसंपन्नैःचतुर्भिर्वाबलान्वितैः वीक्षितेत्वाथैकविंशमहादोष
विवर्जितइति यदिसर्वथानिर्दूषणंलग्नंनलभ्यतेतदाकागतिरित्युच्यते वेधादिमहादोषराहित्येसत्यल्पदोषसत्वेगुणाधि
क्येचलग्नंसाधीयोभवति तदुक्तंनारदेन लग्नंसर्वगुणोपेतंलभ्यतेल्पदिनैर्नतत् दोषाल्पत्वंगुणाधिक्यंबहुसंमतमिष्यते दो
षदुष्टोहिकालोयःसोपमार्ष्टुंनशक्यतेइति दोषदुष्टत्वंवसिष्ठेनोक्तं दोषाप्येकोगुणानन्हंति तद्द्विराधीगुणेननचेत् पंचगव्यम
यपूर्णंकुंभंमांगलिकंयथेति दोषःपापग्रहवेधादिः अन्येपिदोषाअत्रव्रतबंधेवसिष्ठादिभिरुक्ताः ग्रहेरवींद्वारवनीश्वकंपेके

तद्भूमोल्कापतनादिदोषे व्रतेदशाहानिवदंति तज्ज्ञास्तद्वयोर्दशाहानिवदंतिकेचित् श्रीपतिनिबंधे पौषादिचतुरोमासान्प्राप्ता
दृष्टिरकालजा व्रतंयात्राविवाहंचवर्जयेत्सप्तवासरान् यत्तुगार्ग्यवाक्यं बहुवर्षेत्रिरात्रंस्यादल्पवर्षेतुवासरम् यदिवर्षेद्वनध्याये
तेनैवसहगच्छतीति तद्धुर्ज्येप्रकृत्याभिधानात् केवलवृष्टौनदोषः अकालवृष्टौतुदोषएव अथैवंव्रतबंधलग्नमभिधायेदानीं
दोषवत्त्वप्रतिज्ञातानानध्यायान्वक्तुंचपलार्थयाह शुचिशुक्रपौषतपसांदिगश्विहद्वार्कसंख्यसितनिथयः भूतादित्रितयाष्टमी
संक्रमणंचव्रतेष्वनध्यायाः द्विविधाह्यनध्यायानित्यानैमित्तिकाश्च तत्राषाढशुक्लानवमी ज्येष्ठशुक्लातृतीया पौषशुक्लै
कादशीमन्वादि माघशुक्लाद्वादशी एतात्र्यनध्यायाज्ञेयाःसोपपदाइति तदुक्तंस्मृतौ सितान्ज्येष्ठेद्वितीयाचआषाढेदशमीसि
ता चतुर्थीद्वादशी माघेएतासोपपदाःस्मृताइति भूतेति भूतचतुर्दशीतदादित्रितयं चतुर्दशीपूर्णिमाप्रतिपदः कृष्णपक्षेमावस्या
च तन्मध्येतद्याष्टमीभूतादित्रितयंचाष्टमीचतयोःसमाहारद्वंद्वत्वेनपुंसकत्वंह्रस्वत्वंध्येयं तथासंक्रमणंसूर्यस्यनिरयनसं
क्रांतिदिनंचकारान्मन्वाद्यायुगादितिथीर्मघादिवितिपद्योक्तमन्वादयोयुगादयःचानध्यायाज्ञेयाः व्रतेष्विनिपदमावश्यकत्वद्योत
नार्थं यदाहगौतमः पक्षद्वयेचतुर्दश्यामष्टमेद्वितयेतथा पञ्चाद्दावपिपक्षान्तेब्रह्मनाधीयतेनरैः ब्रह्मवेदः हारीतेनविशेषउक्तः
प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः श्वोनध्यायादिष्वेवपूर्वं (यत्रकार्ये) नाधीयीनकदाचनेति श्वानध्यायाद्यशब्दार्थमितिमदनरत्नाध्या
यविषयंचतुर्दश्यादिषुतत्पूर्वदिनेप्रदोषसत्त्वाद्वाध्ययनाभावः फलंच ज्योतिःसारसागरे अष्टमीहंत्युपाध्यायंशिष्यंहंतिच
तुर्दशी अमावस्योभयंहंतिप्रतिपत्पाठनाशिनीतिहड्डमतः चातुर्मास्यद्वितीयातुगर्गेणोक्ताः आषाढफाल्गुणोर्जेषुयाद्विती
याविधुक्षये चातुर्मास्यद्वितीयास्ताःप्रवदंतिमहर्षयइति विधुक्षयेकृष्णपक्षे ह्रास्वादिमासगणनया चैत्रश्रावणमार्गशीर्ष
मासकृष्णपक्षसंबंधिन्योपिद्वितीयाश्चातुर्मास्यद्वितीयाइत्यर्थः अतएवोक्तंज्योतिःसारसागरे चातुर्मास्यसमाप्तौतुयाद्विती
याभवेत्तदा सर्वास्वेतास्वनध्यायःपुराणैःपरिकीर्तितइति चत्वारोमासाःचातुर्मास्यमितियौगिकःशब्दःब्राह्मणादित्वात्स्वार्थे
ष्यञ् तथाचस्मृत्यर्थसागरे आषाढीकार्तिकीफाल्गुनीपूर्णिमासमीपस्थद्वितीयासुचेत्यनध्यायप्रकरणेभिहितं मन्वा रा
दयोयुगादयःचाग्रप्रकरणेउक्ताः अष्टावष्टकाःस्मृतौ पौषादिमत्रिमासेषुकृष्णेचैवाष्टकात्रयं एकाद्येयाश्विनेमासिहायनेच ३

न्वष्टकाः अष्टकाश्च समुद्दिष्टाः सप्तम्यादिदिनत्रयं नाधीयीत च शास्त्राणि व्रतबंधं च वर्जयेदिति अनध्यायप्रयोजनमाह
वसिष्ठः पापांशकगते चंद्रे स्वाध्यिनी च स्थितेपि वा अनध्याये चोपनीतः पुनः संस्कारमर्हतीति अत्रानध्याये इत्येतद्विहितान
ध्यायव्यतिरिक्तानाध्यायविषयमन्यथा नैमित्तिकमनध्यायं कृत्स्नं च प्रतिपद्दिने मेखलाबंधने शस्तं चोले वेदव्रतेष्वपि वसि
ष्ठवाक्यमानर्थक्यमापद्येत नैमित्तिकानध्यायानां तर्हि किं प्रयोजनमिति चेत् वेदाध्ययननिवृत्तिरित्यवगच्छ एवं सति ता
तःकालमेवेद्गत इति लौकिकन्यायात् तीनकालस्य वटोः कालांतरप्रतीक्षामसहमानस्या वपूपकोपनयनविषयमिति
निष्कृष्टोर्थः अतएवोक्तं व्यासेन अप्रशस्ता प्रतिपत्कोपि कदाचित्कुंभगो विधौ चंद्रे बलयुते लग्ने वर्षाणाम तिलंघितइति
प्रतिपद्ग्रहणं कैमुतिकन्यायसूचनार्थं नैमित्तिकानध्यायास्त्वस्माभिर्मन्वाद्याद्या इति पद्यविवरणावसरे निरूपिताः अथ दोष
वत्त्वप्रतिज्ञातानां प्रदोषानन्तष्टुभाह अर्केनर्के त्रितिथिषु प्रदोषः स्यात्तदग्रिमैः रात्र्यर्धसार्धप्रहरयाममध्यस्थितैः क्रमात्
तदग्रिमैरर्कादितिथिभ्यो ग्रिमैः त्रयोदशी सप्तमी चतुर्थी तिथिभिरिति रात्र्यर्धसार्धप्रहरयाममध्यस्थितैरर्केनर्के त्रितिथिषु
प्रदोषः स्यात् यथा द्वादश्यामर्धरात्रात्प्राक् त्रयोदशी प्रवृत्ता प्रदोषः षष्ठ्यां सार्धप्रहरमध्ये सप्तमी प्रवृत्तिस्तदा प्रदोषः तथा
तृतीयायां प्रहरमध्ये चतुर्थी प्रवेशे प्रदोष इत्यर्थः उक्तं च चतुर्थी प्रथमे यामे सार्धयामे च सप्तमी त्रयोदश्यर्धरात्रे च प्रदो
षः सर्वघातक इति इदं च निर्मूलत्वादुपेक्ष्यं दीपिकाटीकायां तु उपनयनपद्यव्याख्याने प्रदोषपरिज्ञाने चाह गर्गः तु उक्तं च
तुर्थीयामे मे कृत्त सार्धयामे च सप्तमी अर्धरात्रे त्रयोदश्यां प्रदोषा रजनीमुखे अत्र नाध्यापयेद्वेदं वेदांगानि च सर्वथा अध्या
यनशीलस्य प्रदोषः सर्वघातक इति गोबिलेनाप्येवमुक्तं षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका प्रदोषमिह कुर्वीत तृतीया
नवनाडिकेति स्थ मध्येसाशेषि चतुर्थ्याः पूर्वरात्रे तु नवनाड्यः प्रदर्शिने नाध्येयं पूर्वरात्रे स्यात्सप्तमी च त्रयोदशी अर्धरात्रात्तु
रा चेत्स्यान्नाध्येयं पूर्वरात्रके तदेतयोर्देशाचारतो व्यवस्थेति ननु रात्र्यर्धमित्यत्रार्धं समेंशक इत्यभिधानात्समांशवाचिनोर्धश
ब्दस्य नपुंसकलिंगत्वादर्धं नपुंसकमिति समासे प्रथमानिर्दिष्टं समास उपसर्जनमित्यर्धशब्दस्योपसर्जनसंज्ञकत्वादुपसर्जनं
पूर्वमिति पूर्वनिपाते च अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेरित्यच्प्रत्यये कृते यस्येति चेतीकारलोपे च रात्राह्नाहाः पुंसीति पुंस्त्वे

पु॰टी॰
सं॰प्र॰
३३

अर्धरात्रे इति भवितव्यं पुनः रात्र्यर्धमिति निर्देश इष्यते नात्र समांशवाच्यर्धशब्दः यथा ग्रामार्धं नगरार्धमित्यत्र किंतर्हि भिन्नांशक
लखंडेवा पुंस्यर्ध इत्यभिधानात्केवलविभागवाची कथं द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिका इत्ययुक्तः
कालः स्थूलो निशीथशब्दवाच्यः एतच्च जन्माष्टमीनिर्णये अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकान्विता रोहिणी चाष्टमी यास्या सु
पवासव्रतादिषु इति योगीश्वरपद्यव्याख्याने व्याख्यातं माधवेन ततः च समांशावाचित्वाभावादर्धशब्देनैकदेशिसमासः किं
नहिं षष्ठीत्यनेन समासे षष्ठ्यन्तस्य पूर्वनिपातः अत्रैव रात्रौ यामद्वयादर्वाग्यदि पश्येत् त्रयोदशी प्रदोषः स तु विज्ञेयो गर्हितः
सर्वकर्मस्विति गोभिलवाक्यमप्यनुकूलं इदमेवाभिप्रेत्य रात्र्यर्धपूर्वापरगा जयंती कलयापि चेति वराहेणापि रात्र्यर्ध
पदं प्रयुक्तं यत्र तु समांशावाचित्वं विवक्षितं सिद्धान्तपक्षस्तु परं दिनार्धोत्रिशाधीत्यरोनोहि नष्टीरिति विवाहवृंदावनपद्यादौ न
तत्र तादृशाः प्रयोगाः चिंत्याः अथ व्रतबंधानंतरं सायंकाले बटुकं वा ब्रह्मौदनाख्यः संस्कारोऽभिहितः तत्र विशेषमाधवीयाह
प्राग्ब्रह्मौदनपाकाद्व्रतबंधानंतरं यदि चेत् उत्पातानध्यायनोत्पत्तावपि शांतिपूर्वकं न तत्स्यात् यदि व्रतबंधात्प्रागाका
लिकानध्याय उत्पातो वा भवेत्तदा न कार्य एष एव व्रतबंधः दैवान्निर्दिष्टे काले व्रतबंधो निर्वृत्तस्तदनंतरं सायंकालीन
ब्रह्मौदनविधेः पूर्वमु[illegible]यान उत्पात प्रयुक्तः कालशुद्ध्यभावात् अथवानध्यायो वा स्यात्तदा
निष्टमुक्तं ३ [illegible] ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं भवेत् तदा विघ्नकरं ज्ञेयं वटोरध्ययनस्य तदिति तस्य
शांतिप्रकारं तु वक्ष्ये शास्त्रानुसारतः स्वस्तिवाचनपूर्वं तु हवनं कारयेद्बुधः प्रधानं पायसं साज्यं द्रव्यं शांतिस्तु जो भवेत् सू
क्तं तहस्यते विद्वान्पठेद्धिया समृद्धये गायत्रीयुक्तेन मंत्रैः प्रायश्चित्तं तु सर्पिषा धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीं
शिष्टाहोमविधेः पश्चात्स्यात् पयेनत्र संसदि ब्राह्मणान्भोजयेत्पश्चात्तेन ब्रह्मौदनं चरेदिति अत्रैतस्य विचारस्य मुहूर्ते वि
चारेणुपयोगान्मूलपद्यनिबंधो यद्यपि स्वयमवक्तव्यस्तथापि सकलजनप्रसिद्ध्यर्थमभिहितः अथ पूर्वं द्वाविंशतिन
क्षत्राण्यभिहितानि सामान्यतस्तेषां वेदपरत्वेन विशेषविधानं च वसंततिलकयाह वेदक्रमाच्छशिदिवाकरचित्रमूल
पूर्वाहयोत्तरकरमैत्रमृगादितीज्य धौ वेषु चाश्विवसुपुष्यकरोत्तरेशाकर्णमृगांत्यलघुमैत्रधनादितीशास्यात् मृगार्द्रामे

राम
३३

षा हस्त चित्रा स्वाती मूल पूर्वात्रयेषु ऋग्वेदाध्यायिनां रेवतीहस्तानुराधामृगपुनर्वसु पुष्यरोहिणीषूत्तरात्रयेषु यजुर्वेदा-
ध्यायिनां अश्विनीधनिष्ठापुष्यहस्तोत्तरात्रयार्द्राश्रवणेषु सामवेदाध्यायिनां मृगरेवतीपुष्याश्विहस्तानुराधाधनि-
ष्ठापुनर्वस्वथर्ववेदाध्यायिनां पूर्वस्मात्कानुष्ठितं तत्पदपरामृष्टमुपनयनं सम्यक् शुभमित्यर्थः उक्तं च ज्योतिर्निबंधे मूले हस्ते
त्रये सार्पे शैवे पूर्वात्रये तथा ऋग्वेदाध्यायिनां कार्यं मेखलाबंधनं बुधैः पुष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे शशांकभे ध्रुवेषु च प्रशस्तं
स्याद्यजुषां मौञ्जिबंधनं पुष्यवासवहस्ताश्विश्रविष्ठा श्रवणोत्तरात्रयं प्रशस्तं मेखलाबंधे बह्नो सामगायिनां मृग मैत्राश्विनीह-
स्तरेवत्यदितिवासवं अथर्ववेदविदां शस्तो भगणोयं व्रतार्पणे इति अथ धर्मशास्त्रीयं विशेषमनुष्टुभाह नांदीश्राद्धोत्तरं मातुः
पुष्पे लग्नांतरे न हि शांत्वा चौलं व्रतं पाणिग्रहः कार्यो न्यथा न सत् बहुतरे साध्यानां शुभकर्मणां प्रारंभे सकलशुभाशुभक-
र्मसाधारणं नांदीश्राद्धाख्यं कर्माभिहितं तत्कृत्यनंतरं यदि संस्कार्यमातुः पुष्पे रजोदर्शने जाते सति लग्नांतरे विवक्षितल-
ग्नादन्यस्मिन्लग्ने च न सति तदा वपुष्कत्वाद्दुर्मिश्रगस्त्रोक्तं शांतिं विधाय चौलं व्रतं यज्ञोपवीतं पाणिग्रहो विवाहः च कार्यः अ-
न्यथा समीचीने द्वितीयलग्ने सत्वे सति चौलादि शुभकर्म न सत् दुष्टफलदमित्यर्थः उक्तं च मेधातिथिना चौले च व्रतबंधे च वि-
वाहे यज्ञकर्मणि भार्या रजस्वला यस्य प्रायस्तस्य न शोभनं वधूवरान्यतरयोर्जननी चेद्रजस्वला तस्याः शुद्धेः परं कार्यं मा-
नव्यं मनुरब्रवीत् वृद्धमनुरपि विवाहव्रतचूडासु यदि माता रजस्वला तदा न तत्प्रकर्तव्यमायुःक्षयकरं यतः वैधव्यं च विवा-
हे स्यात् जडत्वं व्रतबंधने चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः रजो विषयमेतत्स्यं पितेताः पाप्यचाभ्युदयश्राद्धपूर्वसं-
स्कारकर्मणि पत्नी रजस्वला जाता न कुर्यात्तत्पिता तदेति पितेति नांदीश्राद्धकर्तुरित्युपलक्षणं तथा च वृद्धगार्ग्येण पितापिता-
महो भ्राता ज्ञातयो गोत्रजाग्रजाः उपायनेधिकारी स्यात्पूर्वाभावे परः परः इत्यादयोधिकारिण उपनयनेभिहिताः तस्मात्संस्कार्य-
मातरि रजस्वलायां लग्नांतरसद्भावे च न कार्यमेव चौलादि लग्नांतराभावे तु वाक्यसारेण शांतिप्रकारः अलाभे सुमुहूर्तस्य रजो-
दोषे ह्युपस्थिते श्रियं संपूज्य विधिवत्ततो मंगलमाचरेत् हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् प्रत्यृचं पायसं हुत्वाभिषि-
च्य हितमाचरेदिति अस्याविवादप्रवादस्तत्रैव उपवासेन शुध्यंति नार्यः सद्योरजस्वलाः एकाकिन्या विवाहादौ देशभंगेषु चाप-

मु.टी.
सं.प्र.
३४

दीति एतच्च पद्यं वक्ष्यमाणमनुचितं मुहूर्तविचारार्थं प्रवृत्तत्वाद्ग्रंथकर्तुः यतोऽत्र न कश्चिन्मुहूर्तविचारः प्रतिपाद्यते इति परं तु सकलजन
प्रसिद्धः शास्त्रार्थो भवत्विति युक्तं इति सपरिकरो व्रतबंधः समाप्तः अथैवं त्रैवर्णिकानां व्रतबंधमुक्त्वा इदानीं केशांतकर्मादि वक्ष्यति
तत्र विवाहात्क्षत्रियाणां क्षुरिकाबंधनं विहितं तन्मुहूर्तमनुष्टुभाह विप्रैश्च व्रतमासादौ भौमास्ते विधुभूमिजे क्षुरिकाबंधनं शस्तं नृ
पाणां प्राग्विवाहतः चैत्ररहिते दक्षिणायनमासेषु माघफाल्गुनवैशाखज्येष्ठेष्वित्यर्थः आदिशब्देन व्रतबंधनोक्तपक्षतिथिनक्षत्र
लग्नादीनां ग्रहणं तस्मिन्काले अभौमास्ते मंगलास्तरहिते गुरुशुक्रयोरस्तस्य वर्जनं सामान्यनिषेधेन सिद्धत्वान्नात्र पृथगुक्तं त
था विधुभूमिजे मंगलवाररहिते सूर्यादिवारे एतादृशे काले सति नृपाणां क्षत्रियाणां विवाहतः पूर्वं क्षुरिकाया अल्पशस्त्रविशे
षस्य बंधनं कुर्यात्कदाचिदिति च शेषः तदुक्तं हि तत्कारि उक्तं च नारदेन क्षुरिकाबंधनं वक्ष्ये नृपाणां प्राक्करग्रहात् विवाहोक्ते
षु मासेषु शुक्लपक्षेऽप्ययनस्तगे जीवे शुक्रे च भूपुत्रे चंद्रताराबलान्विते मौंजीबंधनर्क्षेषु भौमवर्जितवासरे व्रतलग्नादयेकेंद्रे
ष्टमोदयवर्जिते धनत्रिकोणगैः सौम्यैः पापैर्भवरिपुत्रिगैः क्षुरिकाबंधनं कार्यमर्चयित्वा सुरान्पितॄन् अर्चयेत्क्षुरिकां खड्गं देव
तानां च सन्निधौ ततः सुलग्ने बध्नीयात्कट्यां लक्षणसंयुतामिति लक्षणानि नारदवराहाभ्यामुक्तानि ग्रंथभूयस्त्वभयात्तु प्रदय
व्याख्यागम्यत्वादस्माभिर्नोक्तानि अत्र प्राग्विवाहतः इत्युक्तेरवधिस्वनिश्चयात्समावर्तनानंतरं क्षुरिकाबंधनं कार्यमर्चयित्वा सु
रान्पितॄन् विवाहभूषणत्वात्तस्य यदि यज्ञोपवीतानंतरमवचिकीर्षितं स्यात्तदोपनयनानंतरं कार्यमित्येव ब्रूयात् ग्रंथकर्त्रा तु नार
दोक्तक्रममंगीकृत्यैवमुक्तं तत्र पाठक्रमादर्थक्रमो बलीयानिति समाधिः अथ केशांतसमावर्तनमुहूर्तमनुष्टुभाह केशांतं षोड
शे वर्षे चौलोक्तदिवसे शुभं व्रतोक्तदिवसादौ हि समावर्तनमिष्यते षोडशे वर्षे चौलोक्तदिवसे चूडावर्षात्तृतीयात् प्रभव इत्यत्र
भवतीत्यादिना कथितशुभदिवसे गोदानापरपर्यायं केशांतसंज्ञं कर्म शुभं स्यात् रविः केशाः दीयंते खंड्यंते यस्मिन्निति व्युत्पत्तिः
यदाह केशांतं षोडशे वर्षे कुर्याच्चौलोक्तनादिकमिति महेश्वरोऽपि कर्म केशांतसंज्ञं हि वर्षे स्यात्षोडशे चौलकर्मोक्तधिष्ण्यादिक
मिति षोडश इत्येतद्ब्राह्मणविषयं द्रष्टव्यं क्षत्रियविशोस्तु द्वाविंशतिचतुर्विंशतितमवर्षयोः केशांत इत्यर्थः तदुक्तं मनुना केशांतं राम
षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः इति तत्र गोदानस्य महानाम्न्यादिव्रतपूर्वकत्वात्तानि प्रा २

गत्तुष्टाय ततो गोदानं विधेयं यदाहाश्वलायनः प्रथमं स्यान्महानाम्नी द्वितीयं च महाव्रतं तृतीयं स्यादुपनिषद्गोदानाख्यं ततः प
रमिति अतो जन्मनस्त्रयोदशे वर्षे महानाम्नी चतुर्दशे महाव्रतं पंचदशोपनिषद्व्रतं षोडशे गोदानमिति तदुक्तं एवं क्षत्रियविशो
र्युक्तो गोदानकालात्प्राग्वर्षचतुष्टयक्रमेण महानाम्न्यादि भवति अत्रापि मुहूर्तविचारश्चौलवदेव तदुक्तं श्रीधरीये तिथिनक्षत्र
वारांशवेगोदयनिरीक्षणं चौलवत्सर्वमाख्यातं सगोदानव्रतेषु चेति यदा पुनः दैवादतीतकालानि महानाम्न्यादिव्रतानि स्यु
स्तदा समावर्तनेन न कार्याणि व्रतोक्तेति हि निश्चयेन व्रतं यज्ञोपवीतं तत्रोक्तदिवसे आदिशाह्नेन वारनक्षत्रलग्नांशेषु सत्सु समाव
र्तनेन कर्मेष्यते यदाह गुरुशुद्धिं विना काले व्रतोक्ते व्रतमोक्षणमिति महेश्वरोपि खेचरशुद्धौ व्रतानां विसर्गो दिने कर्मनक्षत्रोक्ते चाधि
ष्ण्यादिके इति महेश्वरोपि विभौमभानुज्ञेवारे नक्षत्रे च व्रतादि चंद्रताराविशुद्धौ च स्यात्समावर्तनक्रियेति यत्तु हौरादितद्दो
दिविलग्नयोगे मौंजीविमोक्षः शुभदो द्विजानामिति दीपिकाकारादिभिरुक्तं तत्स्वदेशविषयविशेषो नारदेनोक्तः अथोत्तरा
यणे जीवशुक्रयोर्दृश्यमानयोर्द्विजातीनां गुरोर्गेहान्निवृत्तानां यतात्मनां चित्रोत्तरादितीज्यं डहरिमित्रविधातृषु मेषवर्केड
त्रायेषु क्रवारलग्नांशकेष्वपि अथवा वसुनक्षत्रवारलग्नांशकेष्वपि प्रतिपदं पर्व रिक्तामष्टमीं च दिनत्रयं हित्वान्यदिव
से कार्यं समावर्तनमुंडनं अत्र कश्यपेन चैत्रो वर्जितः चैत्रमासं विवर्ज्यैषु माघादिषु च पंचसु इति तदुक्तेः एतच्च गोदानानंतरं
विवाहात्प्राक्कार्यमित्याह वसिष्ठः अधीत्य वेदांश्च तदर्थशास्त्राण्यभ्यस्य लब्ध्वा स्वगुरोरनुज्ञां कुर्यात्समावर्तनकर्म पश्चाद्गो
दानतः पाणिनिपीडनाख्यात् तत्रापि सत्यावश्यकत्वे द्वितीयेन कार्यमेव तदुक्तं ग्रंथांतरे वधूप्रवेशो व्रतमोचनं च पुंसः पुनर्दा
रपरिग्रहं च नाब्दे द्वितीये विदधीत धीमान् वदंति गर्गात्रिवसिष्ठमुख्या इति स्त्रीमरणानंतरं पुनर्विवाहो द्वितीयवर्षे न भवती
त्यनंतरं द्वितीयविवाहो द्वितीयवर्षे न भवतीति कस्यचिद्व्याख्यानमपाकृतं भवति प्रमदामृतिवत्सरादितः पुनरुद्वाहविधि
र्वरस्य चेति विषमे परिवत्सरे भवेद्युगले चैव मृतिप्रदो भवेदिति संग्रहकारवचनादिति शिवं अथ संस्कारप्रकरणं गद्येनोपसं
हरति इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंतामणौ सपरिकरसंस्कारप्रकरणं समाप्तं॥ परिकरो लंकारः उक्त
गापवादरूपः शेषं स्पष्टार्थं ज्योतिद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेणाहिगवीप्रसारितधिया मौहूर्तचिंतामणेः

टी·
प्र·
५

गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने द्विजसंस्कृतिप्रकरणं संपूर्णमानंददं इतिश्रीविद्वद्दैवज्ञमुकुटालं
कार नीलकंठसुत गोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां सपरिकरसंस्कारप्रकरणं समाप्तिमगमत् शुभ
मस्तु सर्वत्र ॥ संस्कारप्रकरणं पंचमं ५ ॥

राम·
मु·

मु.टी.
वि.प्र.
२

श्रीगणेशाय नमः ॥ श्रीरस्तु ॥ गौरीनंदनमिष्टसिद्धिसदनं विघ्नावलीभेदनं नत्वा ज्योतिषकाव्यरामरचिते मौहूर्तिके चिंता
मणौ गोविंदो बुधनीलकंठविधिवत्तत्सूनुः सन्नामयन्नीक्षद्धर्यं करपीडनप्रकरणं व्याख्याति विद्वन्मुदे अथ विवाहप्रक
रणं व्याख्यायते तत्र विवाहशब्देन पाणिग्रहणाख्यः संस्कारविशेष उच्यते तेच विवाहा अष्टौ तदुक्तं मनुना चतुर्णाम
पि वर्णानां प्रेत्य चेह शुभाशुभान् अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथा
सुरः गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधम इति एवं लक्षणमाह याज्ञवल्क्यः ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता
तज्जः पुनात्युभयतः पुरुषानेकविंशतिं यज्ञस्थऋत्विजे दैवआदायार्षस्तु गोद्वयं चतुर्दश प्रथमजः पुनात्युत्तरतश्च षट्
इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने सकायः पावयेत्तज्जः षड्वंश्यान्सहात्मना आसुरो द्रविणादानाद्गांधर्वः समयान्मि
थः राक्षसो युद्धहरणात्पैशाचः कन्यकाछलादिति कायः प्राजापत्यः छलं वंचना एषां कालनियममाह नारदः प्राजा
पत्य ब्राह्मदैवविवाहा आर्षसंज्ञकाः उक्तकालेषु कर्तव्याः चत्वारः फलदायकाः गांधर्वासुरपैशाचराक्षसाख्यास्तु स
र्वदेति अतएव सर्वकालमेके विवाहमिति गृह्यकारवचनं गांधर्वादिविवाहविषयं सच विवाहः स्त्रीपुरुषद्वयायत्तस्त
त्रापि बहुधा पुरुषायत्तः अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विज इति आश्रमादाश्रमं गच्छेदेष धर्मः सनातन इति स्मरणा
द्गृहस्थाश्रमोपजीव्यतया प्राधान्याच्चेति समावर्तनात्पुरुषेणावश्यं विवाहे यतितव्यं किंच अग्निहोत्रादीनां नित्यानां कर्म
णां करणे पत्नीं विनानाधिकार इति स्मृतौ स्मरणात् नापुत्रस्य लोकोऽस्तीति श्रुत्या पुत्राभावे परलोकदुर्गतिनिबोधनाच्च त
त्र पुरुषाद्युत्पत्तिस्तु दंपत्योरानुकूल्यं विना न स्यात् उक्तं च याज्ञवल्क्येन यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धत इति त्रिवर्गो
धर्मार्थकामात्मकः सच ज्योतिःशास्त्रैकदेशविवाहपटलाधीन इत्येतत्सर्वमनस्यालोच्य तत्प्रयोजनं विवाहप्रकरणा
रंभे वसंततिलकयाऽऽप्रतिजानीते भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः तस्माद्विवाह
समयः परिचिंत्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः शुभं भर्त्रादेरनुकूलं शीलं स्वभावो भवति लग्नवशेन तस्याः तस्मा
द्विवाहसमयः तेन युक्ता भार्या त्रिवर्गस्य करणं स्थानमस्ति अत्र स्त्रीनपुंसकलिंगयोः समानाधिकरण्यं वेदाः प्रमाणं स्मृत

राम
२

यः प्रमाणमिति वचनाज्ज्ञानलिंगत्वादस्यानिखिलानामधीनतां शेषसंस्पष्टार्थं अधीनोनिखिलाश्रायतः त्रिवर्गो धर्मकामार्थैः चतु
र्वर्गः समोक्षकैरितिचामरः उक्तंच कश्यपेन अथातः संप्रवक्ष्यामि गृहस्थाश्रममुत्तमं यत्राधारोन्याश्रमाणां भूतानां प्रा
णिनां तथा ऋणत्रयच्छेदकारिधर्मकामार्थसिद्धिदः एतत्सर्वं स्थितं ह्यत्र स्त्रीषु शीलवतान्वितासु च तत्कालवृत्तिलब्धिलसु
लग्नवशतो भवेत् तस्मात्तस्य प्रलग्नशुद्धिं प्रवक्ष्याम्यनुपूर्वशः इति ऋणत्रयं वेदऋणं पितृऋणं ऋषिऋणंच वसिष्ठेना
पि कश्चिद्गृहाश्रमसमोस्तिपरो न धर्मः सोपि स्थितः सुगुणवृत्तयुतांगनासु उद्वाहलग्नवशतो गुणवृत्तलब्धिलासांत
थाविधसुलग्नमतः प्रवच्मि नतु जन्मकालीनखेचरवेरितशुभाशुभं इरतिक्रममिति विवाहलग्नानर्थक्यमितिचेन्न ज्योति
षस्मृत्योर्वेदितसमयारब्धजन्यापूर्वजनितशुभफलेन जन्मान्तरीयदुरितध्वंसो भवतीत्येवमर्थयासार्थक्यात् अतएवाह
सत्याचार्यः शुभलग्नक्रियारंभजनिताः पूर्वसंभवाः संपदस्तत्र लोकानां ज्योतिस्तत्र प्रयोजनमिति एवंव्रतबंधादावपि द्र
ष्टव्यं "अथतावत्प्रश्नलग्नाद्विवाहयोगद्वयं स्रग्धरयाह" आदौ संपूज्य रत्नादिभिरथगणकं वेदयेत्तत्वस्थचित्तं कन्योद्वाहं दि
गीशानिलहयविशिखेषु प्रश्नलग्नाद्यदीन्दुः दृष्टो जीवेन सद्यः परिणयनकरो गोतुलाकर्कटाख्यं वास्यात्प्रश्नस्य लग्नं शुभख
चरयुतालोकितं तनद्विदध्यात्तस्य प्रथश्लोको मंगलार्थं ग्रंथमध्यस्थत्वात् यथोक्तं ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणःपु
रा कंठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभाविति आदौ गणकं ज्योतिर्विदं रत्नादिभिः मणिरत्नसुवर्णवस्त्राभिः संपू
ज्य ततः प्रष्टा जनः कन्यायाउद्वाहं गणकं वेदयेत् ज्ञापयेत् गतिबुद्ध्यित्यादिना विदेर्बुद्ध्यर्थत्वाद्दैण्यकर्तुः कर्मत्वं कीदृशं सस्थचि
उ त्तमव्याकुलान्तःकरणं स्वस्थचित्ते बुद्धयः संभवंतीति लोकोक्तेः रत्नादिग्रहणमप्येतदर्थमेव यदाहवसिष्ठः शुभेदिने दैवविदं च
भित्तं ताम्बूलपुष्पाक्षतपूर्णपाणिः प्रष्टाच गत्वा प्रणिपत्य पृच्छेन्निवेद्य तस्मै वरकन्ययोर्भमिति" उत्पलोपि" प्रष्टामणिकनकयु
तैः फलकुसुमैराशिचक्रमभ्यर्च्य पृच्छेद्यथाभिलषितं भक्त्या विनयान्वितः प्रश्नमिति तत्रैको विवाहयोगउच्यते दिगिति य
दि प्रश्नलग्नाद्दशमैकादशतृतीयसप्तमपंचमानामन्यतमे स्थाने स्थितश्चंद्रो जीवेन गुरुणा दृष्टः सद्यः शीघ्रं परिणयनस्य क
र्तास्यात् वसिष्ठः लग्नात्त्रिपंचास्तदशायगस्तुहिमद्युतिर्जीवनिरीक्षितश्च तयोस्तु संबंधकरस्तदानीं नार्कोशलज्ञोनचनी

हृत्वा प्रयसा सौम्य दृष्टे अन्योन्यांशस्थयोश्चाहिति सुसितयोर्वैधव्ययोषिद्भक्ता चंद्रेर्वीक्ष कुसुक्राय दिमदनगृहे प्रेयसो ऽ जया
श्री सेति अन्यदपिसूत्राकं पठंति लग्नेव्यये धपाताले जामित्रे वाष्टमेकुजे कन्याभर्तृविनाशाय भर्ता कन्याविनाशदः इति अथ जात
कीयोवैधव्ययोगपरिहार उच्यते स्माभिः यूनाद्वा चेपनिश्चुभगेते रंध्रभाङ्गर्वे मृत्युनीहारांशेण ह दयगृहत ल दुःचिंतनीयमिति
पुराणकेरण सप्तमस्थानाद्भर्तृसौभाग्यं विचार्यं तत्रयो यो भावः स्वामिदृष्टो युतो वा सोमपर्वीस्यान्न स्पष्टस्पष्टिहृद्भिः यापैरेवंतस्य
भावस्य हानिर्निर्दिष्टव्याष्टक्कं तां जन्मनो वेति वराहसूक्तेः स्वस्वामिसौम्यहितं चेत्सप्तमस्थानं भवति तदा तद्भावसुखं
वाच्यं केचित्तु स्त्रीणां महत्यरिष्टयोगे भर्तुः च स्वल्पारिष्टयोगे तत्परिहारमाहुः अथापरिहार्यवैधव्ययोगे प्रतीकारमाह वि
धायेति रह इति वक्ष्यमाणमिहापकृष्टव्यं पित्रादिः सुतया कन्यया कृत्वा रह एकांते हि निश्चयेन सा विश्वाव तं विधाय का
रयित्वा उत्ताथ वा पैप्पलं पिप्पलसेवासंबंधिव्रतमेकांते विधाय पश्चादिमां कन्यां सुलग्ने चिरजीविने वराय दद्यात् उक्तं
च व्रतखंडे सावित्र्यादिव्रतादीनि भक्त्या कुर्वंति याः स्त्रियः सौभाग्यं च सुहृत्त्वं च भवेत्तासां सुसंततिः सावित्रीव्रतकरणप्रकार
स्तत्रैव प्रसिद्धः संहितासारे अवैधव्यकरे योगे विवाहपटलादितः वराद्याया पुष्पते देयाकन्या वैधव्ययोगजेति पिप्पलव
तमुक्तं ज्ञानभास्करे बलवद्वैधव्ययोगे बाल्ये सति मृगीदृशां पितारहसि कुर्वीत तद्गंगेशाख्यसंमतं सुदिने शुभनक्षत्रे चंद्र
ताराबलान्विते अवैधव्यकरे योगे लग्नेग्रहबलान्विते व्रतारंभं प्रकुर्वीत बालवैधव्यनाशकं स्वस्नाता चित्रवस्त्राढ्या क
३८ न्या पितृगृहाद्बहिः नीत्वाथ शमीस्थाने यद्वा बदरिकाश्रये आलवालं प्रकुर्वीत विपुलं सुदृढं कर्षितं कुमार्याचाथ नि
दिष्टं कृतसंकल्पमादरात् करकांबुप्रपूर्णेन सिंचनं प्रतिवासरं चैत्रे वाश्विनमासे च तृतीयासितपक्षतः यावत्कृष्णतृती
यान्या मासमेकं यथाविधि ब्राह्मणानां तथा स्त्रीणां भुक्तं नैव समाचरेत् तदाशिषा प्रयात्कन्या सौभाग्यं च सुखान्विते प्रति
मां पार्वतीशानी वैणव भाक्त्या नैर्वयेत् चंदनाक्षतदूर्वाद्यैर्बिल्वपत्रैस्तथाविधैः उपचारैर्यथाभक्ति नैवेद्यैः प्रतिवासरं एवं व्रत
प्रभावेण बालवैधव्यनिष्कृतिः जायते कन्यकानां च ततः पाणिग्रहक्रिया इत्यश्वत्थव्रतं अथान्यदप्यवैधव्यपरिहार्य बालवै राम
यो०गा० धव्यापहारकं प्रतीकारमाह वर इत्यादिवाथवा रह एकांते चुतमूर्तिर्विष्णुप्रतिमा पिप्पलश्चैते प्रसिद्धा एषां मध्ये अन्य ३

रेण मनोभीष्टेन साकं लग्ने वक्ष्यमाणदूषणरहिते सौभाग्यगुणान्विते च विवाहलग्ने विवाहं कारयित्वा पश्चात्तां कन्यां सुरं [?]
लोकप्रसिद्धं यथा भवति तथा चिरंजीविने आयुष्मते वराय दद्यात् पित्रादिरधिकारी तदुक्तं मार्कंडेयपुराणे बालवैधव्ययो
गेपि ॐ भद्रप्रतिमादिभिः कृत्वा लग्नं रहः पश्चात्कन्योद्वाहं चापरे इति ॐ भद्रं तु पलक्षणं तेन मंथन्यपि ग्राह्या दुर्लक्ष्यः पिप्पल
कुंडमागमाद्युत्तमः सर्वाश्वत्थ एव नान्यः प्रतिमा विष्णुप्रतिमा शिरोधृत्वा यव यववती सौवर्णी न सालिग्रामशिला सर्वत्रा
पि प्रमाणं वक्ष्यते, अश्वैव ॐ भविवाहः सूर्यारुणसंवादे विवाहात्पूर्वकाले च चंद्रताराबले शुभे विवाहोक्ते च मंथन्या ॐभे
''सहवाहं हेतु पिता संकल्पवाक्यं च विवाहं विधिपूर्वकं सूत्रेणावेष्टयेत्पश्चाद् दृष्ट्वा तं तद्विधानतः ॐ उमालेकृतं देहं त
योरेकांतमंदिरे ततः ॐ भं च निस्सार्य प्रभद्रसलिलाशये ततोभिषेचनेनार्घ्यांते च पल्लववारिभिः ततः सर्वं वस्त्रपूजाद्यं ब्राह्म
णाय निवेद्य च अन्यालंकारवस्त्राणि ब्राह्मणाय निवेदयेत् इति ॐ भविवाहः ॐ भप्रार्थना वनतैव वृक्षाणां गस्त्वंरूपत्वं जी
वनानां समाश्रय पतिं जीवय कन्यायाश्चिरं पुत्रसुखावह देहि विष्णुवरादेव कन्यां पालय दुःखतः इति अथाश्वत्थविवा
हस्तत्रैव द्विजान्गुरून्सुहृन्नारीमंगलाद्यैः रैः समं आहूयोद्वाहकाले च रम्ये भूमौ समंडपे गत्वा प्रणम्य गौरीं च गण
नाथं च भूरुहं भवानीं चैव मंथ्यानीं पिता मंत्रमुदीरयेत् उद्वाहयिष्ये विधिवदश्वत्थेन मनोरमां कन्यां सौभाग्यसौख्यार्थे
हेतवे हं द्विजोत्तमाः नमस्ते विष्णुरूपाय जगदानंदहेतवे पितृदेवमनुष्याणामाश्रयाय नमोनमः वनानां पतये तुभ्यं
विष्णुरूपाय भूरुह नमो निखिलपापौघनाशकाय नमोनमः पूर्वजन्मभवं पापं बालवैधव्यकारकं नाशयाशु सुखं दे
हि कन्यायां मम भूरुह इत्यश्वत्थेन सह विवाहसंकल्पप्रार्थने विवाहे ॐ भविवाहवद्विधेयः एवं विष्णुप्रतिमया सौ
वर्ण्या सह विवाहं विधाय प्रतिमादानं विधेयं अथ प्रतिमादानविधिस्तत्रैव शुभे मासि सिते पक्षे सानुकूलग्रहे दिने
ब्राह्मणं साधुमामंत्र्य संपूज्य विविधार्हणैः तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां शुद्धवर्णसुवर्णेन वित्तशक्त्या
वा पुनः निर्मितां सुचिरां शंखगदाचक्राब्जसंयुतां दधानां वाससी पीते कुमुदोत्पलमालिनीं सदक्षिणां च तां दद्यान्मंत्रमे
तमुदीरयेत् यन्मया पूर्वजन्मनि विघ्नं त्वापतिसमागमे विषोपविषशस्त्राद्यैर्हतो वाति विरक्तया प्राप्यमाणे महाघोरं यशः

टी. पु. ४

सौख्यधनापहं वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये बहुसौभाग्यलब्ध्यै च मम विप्रा रिमां तनुं सावित्रीं निर्मितां शास्त्रात् यानयं सं
प्रदद्दे द्विज अनवद्याहमस्मीति त्रिवारं प्रवदेदिति एवमस्त्विति विप्राः प्रतिगृहीत्वा स्वगृहे विसृजेत् ततो वैवाहिकं तोक्तो विधिं कुर्यात् स्मृती
दृशः इति प्रतिमादानविधिः एवं घटेनाश्वत्थेन विष्णुरूपेण वा एकांते विवाहं विधाय पश्चाद्धात्रि योषसुरस्मरं पित्रादिः कन्याधि
कारी कन्यामायुष्मते वराय दद्यात् कन्यादातृ नाहयाज्ञवल्क्यः पिता पितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः पूर्वना
शे प्रकृतिस्थः परात्परः इति ननु पुनर्भूर्दिधिषूरूढा द्विरित्यमरोक्तेः द्विः परिणीतायाः कन्यायाः पुनर्भूत्वेन महादोषसंभवात्तो
त्यत्राह अत्र न भवेदिति अत्रैवं विधेकुंभादिविवाहानंतरं कन्यायाः पुनरपुरुषांतरेण सह विवाहविषये पुनर्भूभवः पुनर्भू
संभूतो दोषो नास्ति कुतो दोषो नास्तीत्यपेक्षायामुच्यते विधानखंडे तथाभिधानात् स्वर्णं वृपिप्पलानां च प्रतिमा विष्णु
रूपिणी तया सह विवाहे च पुनर्भूत्वं न जायते चकारात् घटस्यापि लक्ष्मीरूपा सदा कन्या हरिरूपं सदा जलं हरेर्दत्तं च घट
नेदात्तुः पापहरं सदा लक्ष्मीनारायणप्रीत्यै यादत्ता कन्यका बुधैः नारोपयेत्सकलं दातुः कुलपूर्वापरं सदा चंद्रगंधर्ववह्नीनां बुद्धि
वे सोमस्मराद्द्वये पतयः कन्यकानां च बाल्यात्तांति सदैव ते तदुद्वाहविधिर्येन नाकृतो नौज न येद्द्वयं यथाति भुक्तं कमलं दे
वानां पूजनाय वै अर्हं भवति सर्वेषां कन्यारत्नं भवेदिति धर्मशास्त्रेऽपि यत्किंचित्कथितं शास्त्रे शांतिकं परिरक्षणं तत्याप
मपि नोपायं येन धर्मोभिरक्ष्यते ऋतावपि सोमादिभिः सहोद्वाहोभिहितः सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृ
तीयो अग्निष्टे पतिः तुरीयस्ते मनुष्यजः सोमो ददद्गंधर्वाय गंधर्वो दददग्नये रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां अतो दै
वतभोग्यानां कन्यानां पुरुषविवाहेन दोषः पुनर्भूभवस्तथापि अत एव हि लोकेपि शिष्टाचारोपि दृश्यते मंथन्याभाव
रो यत्नात्कृतवानुहितविधि रेणुकापि स्वकन्यायास्तदुद्वाहं चकारसा इति विधानखंडेभिधानात् अत एव पित्रामा
त्रा तथा भ्रात्रा दत्ता या तोयधारया विप्राग्निसुहृदां साक्ष्यं कृत्वा सोद्वाहिता भवेदिति कात्यायनादिभिर्विवाहस्य परिभाषि
तत्वादेकदा कन्या पुरुषैर्निर्वर्त्य पुनर्द्वितीयपुरुषविवाहे जाते सा पुनर्भूरेवेत्यलमिप्यता अथास्याः कन्यायाः कीदृश राम
मपत्यं प्रथमं संभवितेति प्रश्ने सविणीकेरसोत्तरमाह प्रश्नलग्ने हुलेण्यादृगपत्यमुक्तं स्वेच्छया कामिनी नवे दायजेन कं ५

विवाहं२

न्यका वा सुतो वा तदा पंडितैस्तद्दृष्टापत्यमस्याविनिर्दिश्यते तत्रज्योतिर्वित्समीपे यादृशापत्यं तद्दि ज्ञेते कन्यत्या
दि शेषं पद्यस्यार्थः यथाह शौनकः आलिंग्य शिशुं कन्यका पृच्छकमाश्रित्य तिष्ठति प्राक्चेत् स्त्री हस्ता स्त्री जननी पुंहस्ता
पुत्रजननी चेति कन्या यस्य कस्यापीति शेषः अथ सामान्यतो निमित्तवशेन शुभाशुभप्रश्नलक्षणमाह शंखभेरीविपं
चीरवैर्मंगलं जायते वैपरीत्यं तदा लक्षयेत् वायसो वा खरः श्वा सृगालोपि वा प्रश्नलग्ने यदि रौति नादं यदि शंखः प्रसि
द्धः भेरी वाद्यविशेषस्ताम्रादिनिर्मितः विपंची वीणा एतेषां रवैः प्रश्नलक्षणे श्रुतैर्मंगलं जायते उपलक्षणत्वान्मनोज्ञा
दि रागगजक्षत्रादिसान्निध्येपि शुभं इष्टव्यं शौनकः वादित्रतूर्यघोषा वीणा वेणुप्रगीतशब्दाश्च शंखध्वनिः प्रशस्तः पृ
च्छाकाले कुमारीणां वृषभो रथो गजो वा शंखपद्मध्वजा यथा वा छत्रं सर्पति पृच्छादेशे सा जन्मतो व्रजति सर्वलोकस्पृति सा
वि वाह्या अथाशुभयोग उच्यते वैपरीत्यमिति वायसः काकः खरो गर्दभः श्वा कुक्कुरः सृगालः प्रसिद्धः यदि प्रश्नक्ष
णे वायसादिना दंष्ट्राभू रौति तदा वैपरीत्यमशुभं लक्षयेत् उपलक्षणत्वाद् उलूकोष्ट्रमहिषनादोप्यशुभः उक्तं च शौनके
न श्वसृगालोलूकरवो महिषोष्ट्रगजाविकघूकनादो वा तत्रोद्वेगः कलहः प्रवासमरणे विनिर्दिष्टे हिति वसिष्ठसंहितायामपि सृ
गालमहिषोष्ट्राश्च शिवामेषाजकुक्कुराः खरकौशिकमार्जाराः न प्रशस्ताः समीपगा इति अत्र प्रसंगादस्माभिः शौनको
क्ता अशुभयोगा लिख्यन्ते हा किल सवानरोरगगर्दभसंश्लेषणं मिथ्यापि भवेत् देवज्ञपृच्छकानां कन्याएकत्र संरमते
कन्याएकत्रेत्यत्र संहितायामपि वचनाद्दृश्यभावः भिद्यति यद्युदकुंभशय्यासनपादुकादि भंगो वा प्रश्नसमये यस्या
स्तस्या वैधव्यमादेश्यं उदयान्सप्तमसंस्थे रविभृगुतनये शशांके वा वैधव्यं हि तितनये सप्तमगे कन्या म्रियते सप्तमेगार्कः
कन्यामृतप्रजां पुंश्चलीं करोति अस्यात् कथितं यथा द्वाहं योजपेत प्रश्नसमयेपि अथ शुभान्यपि पृच्छकवर्णात्रितय
समीपमाश्रित्य तिष्ठति काकः तस्यादेशं पुत्रिद्धेषायदा तदा यागभागित्वं यदि पृच्छालग्ने स्थाग्रहैः सौम्यैर्दीर्घजीवित्वं कुरु
तः पंचमसंस्थायाः पुत्राः जामित्र गतैर्धनं विपुलं संपत्तिं यदि कुमाराः समीपगाः पृच्छकस्य विगतभयाः सा कन्या पुत्रवतीकथ
नीयामंगलवतीव प्रमदात्मकद्रेक्काणे वनितांशे यदि विलग्नमायातः दृष्टः शुक्रेंदुभ्यां कन्यालाभं समादिशति प्रमदाभ

टी.
पृ.
१ ०प्राह

वननिविष्टाः प्रेष्टेनेयदि विलग्नमायातं योषिद्गृहैस्तु बलिभिः कन्यालाभं तदा ब्रूयात् एवं कुमारिकाणां पृष्टकाल एव शोभनलब्धिः
स्यात् द्रेष्काणेन भवनेन नवांशकेन गृहे बलिभिरिति एवं शुभाशुभं ग्रहसूचितं निमित्तसंभूतं च ज्ञात्वा वक्ता ज्योतिर्विदो माहा
त्म्यं स एव एवं कुमारिकाणां पृष्टकं गुणदोषतस्तु कथनीयं दौःशील्यं निर्धनता वैधव्यं वान्यथा त्वं वा दृष्ट्वा निमित्तवर्गानीचा
स्वविधिं तथा च जामित्रं कथयति फलमुद्वाहे तस्य न मिथ्या भवेद्वाणीति एवमन्यानि शुभाशुभनिमित्तानि हुतादिकं च
ग्रंथांतरेभ्यो ध्येयानि केचन विवाहे उपश्रुतिमपि विचारयंति तदुक्तं विवाह[illegible] आरोप्याक्षतपूरिते गणपतिं प्रख्या
दिपात्रे शनैः सम्मार्जन्यधिवेष्टिते युवतयश्चित्तस्थः सकन्या निशि निर्घातारत्नकादि विश्रमहकरे कृत्वा तमभ्यर्चितं यां वाचं स्पृ
एयुस्तदर्थं सदृशी लोके किलोपश्रुतिरिति तत्रोपश्रुतिमंत्रः उपश्रुति महादेवि चंडालगृहवासिनि यदर्थं ब्रूहि देवि विस्रेतिः ८
मयूर त्वं शाक्रराज्यप्रवर्धिनि इत्यलमतिप्रसंगेन अथ कन्यावरणमुहूर्तं कृदसाह विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वस्वाग्नेयैर्वा कर
पीडोचितसंज्ञहैः वस्त्रालंकारादिसमेतैः फलपुष्पैः संतोष्यादौ तदनु कन्यावरणं हि उत्तराषाढास्वातीश्रवणपूर्वात्रया
नुराधाधनिष्ठाकृत्तिकानक्षत्रैरथवा विवाहनक्षत्रैरुपलक्षिते काले वस्त्रालंकारादिभिरादिशब्देन खाद्यमधुरवस्तुभिः
समेतैः फलपुष्पैराढ्यैः कन्यां संतोष्य संतोषमुत्पाद्य तत्पश्चात्कन्यावरणं हि निश्चयेन स्यात् उचितसंज्ञहैरित्यत्र अत्यक
इतिप्रकृतिभावः यदाह वराहः पूर्वात्रयश्रवणमित्रभवैश्वदेवसौम्याशिवासवसमीरणदैवतेषु द्राक्षाफलेक्षुकुसुमाक्षत
पूर्णपाणिरभ्यागतः शान्तहृदयो वरयेत्कुमारीमिति फलानि पूगीफलानि कश्यपः पंचांगशुद्धिदिवसे चंद्रताराबलान्विते
विवाहोक्तेषु ऋक्षेषु क्रूरवर्जितवासरे मासाद्यद्विवसं रिक्तामष्टमीं नवमीं तिथिं त्यक्त्वान्यदिवसे गंधस्रक्तांबूलफला
न्वितैः सहहृद्द्विजगणैर्वरयेत्कन्यकां सतीं अत्र लग्नशुद्धिमदेश्वरेणोक्ता अशुभैस्त्रिषडायसंस्थितैः शुभखेटैः
सुतधर्मकेंद्रगैः यदि वोपचये गुरौ सिते हरिजंस्थे वरयेत्कुमारीमिति हरिजं लग्नं वरणं प्रार्थना वाचा दत्ता त्वया कन्या पुत्रा
र्थं स्वीकृता मया वराव लोकनविधौ निष्ठितस्त्वसखीभवेत्येवं रूपा वाग्दानाख्येति यावत् तत्र विवाह्यकन्यकालक्ष राम ५
णमाह मनुः अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियं नोद्वहेत्कपिलां

कन्यां नाधिकांगीं न रोगिणीं नालोमिकां नातिलोमां न वाचाटां न पिंगलां ऋक्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकां प
क्ष्यहिप्रेष्यनाम्नीं च न विभीषणनामिकामिति अंत्यः चंडालः शातातपः हंसस्वरां मेघवर्णां मधुपिंगललोचनां तादृशीं व
रयेत्कन्यां गृहस्थः सुखमेधते विष्णुपुराणेपि नश्मश्रुव्यंजनवतीं न चैव पुरुषाकृतिं नातिबद्धेक्षणां तद्वत्क्षामां चनोद्धते
न्द्रियं यस्यास्तु रोमशे जंघे गुल्फौ यस्यास्तथोन्नतौ गंडयोः कूपकौ यस्या हसंत्याश्चैव जायते नोद्वहेत्तादृशीं कन्यां प्राज्ञः का
र्यविचक्षणः इति अतिबद्धेक्षणां निमीलितप्रायनेत्रां इत्यादिसुद्रिकशुभाशुभलक्षणलक्षितां परीक्ष्य कन्यां वरयेदिति
सामुद्रिकलक्षणानि काशीखंडे वराहसंहितायामप्युक्तानि तत एव ध्येयानि अथ वरवरणमुहूर्तं कौंदसाह धरणिदेवोथ
वा कन्यासोदरः शुभदिने गीतवाद्यादिभिः संयुतः वरहतिं वहृदय उपवीतादिना ध्रुवयुतैर्वह्निपूर्वोत्तरैश्चरेत् धरणिदे
वो ब्राह्मणः पुरोहितादिः शेषं स्पष्टार्थं पद्यं उक्तं च व्यवहारचंडेश्वरेण स्वातित्रयमाग्नेयं पुनरुत्तरात्रितयं तथा रोहिणी तत्र
वरणे भगणः शस्तो न सदा उपवीतं फलं पुष्पं वासांसि विविधानि च देयं वराय वरणे कन्याभ्रात्रा द्विजेन वा कीदृशाय वराय
कन्या देयेत्याह वसिष्ठः कुलं च शीलं च सनाथतां च विद्यां च वित्तं च वपुर्वयश्च वरे गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेष
मचिंतनीयं कीदृशाय वराय न देयेत्याह चंडेश्वरः सितकुष्ठिन्यपस्मारे ब्रह्मघ्ने राजयक्ष्मिणि अंधे च परिवित्तौ च बधिरे
दूरदेशगे व्यसनासक्तचित्ते च न देया कन्यका बुधैरिति परिवित्तिलक्षणमाह मरीचिः परिवित्तानुजो गृहे ज्येष्ठे दारपरिग्र
हात् परिवित्तिस्तु तज्ज्यायानिति व्यसनं द्यूतादि वसिष्ठोपि अत्यासन्ने नातिदूरेप्यत्याढ्येप्यतिदुर्बले वृत्तिहीने च मूर्खे च षट्सु क
न्या न दीयते दूरस्थानामविद्यानां मोक्षधर्मानुवर्तिनां शूराणां निर्धनानां च न देया कन्यका बुधैरिति अत एव मनुः काम
मामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि न त्वेवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचिदिति अत्र हीनगुणाय कन्या न देया किंतु गु
णवते देयेत्यत्र तात्पर्यं न पुनरसंस्कृतायास्तस्या रजोदर्शनानंतरमवस्थाने दोषस्मरणात् यदाह व्यासः माता चैव पिता चैव
ज्येष्ठो भ्राता तथैव च त्रयस्ते नरकं यांति दृष्ट्वा कन्यां रजस्वलां यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः असंभाष्यो ह्य
पांक्तेयः स भवेद्वृषलीपतिरिति वृषली रजस्वला याज्ञवल्क्यः अप्रयच्छन्नवाप्नोति भ्रूणहत्यामृतावृतौ भ्रूणो बालकः

मु.टी.
प.
८

आनहजो दर्शने॥ नारदोपि॥ यावंतरूहनवस्तस्याः समतीयुः पतिं विना तावंत्यो भ्रूणहत्याः स्युस्तस्ययो नस्दानितामिति॥ अतए
वाहवसिष्ठः॥ रजोहिदृष्टैव दिकन्यकायाः कुलदूयं दुर्गनिमेनितस्याः तस्मान्निता नच तदुक्तकालेयो तुलंग्धपाणिग्रहणं विधेय
मिति॥ अथ कन्याविवाहकालं ग्रहशुद्धिं च वसंततिलकयाह॥ गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात्
रविशुद्धिवशाक्कभावराणामुभयोः चंद्रविशुद्धितो विवाहः॥ कन्यकानां विवाहः षडब्दकोपरिष्टात् षड्वर्षातिक्रमानंतरं स गुर्वितिर.
मवर्षेषु युग्मवर्षेषु सत्कुभः अथाद्विषमवर्षेषु पुरुषाणां विवाहः शुभः नरोहच्यवनः षडब्दमध्ये नोद्वाह्या कन्या वर्षद्व
ययतः सोमो भुंक्तेथ गंधर्वस्ततः पश्चाद्धुताशन इति इदमस्य व्याख्यानं जन्मानंतरं वर्षद्वयं सोमः कन्यां भुंक्ते तदनंतरं द्वे वर्षे
गंधर्वस्तदनंतरमग्निस्तेनामनुष्याधिकार इति षडब्दतः प्राग्विवाहो न कार्य इति षड्वर्षानंतरं समवर्षे विवाहः शुभः॥ यदाह
नारदः॥ युग्मेब्दे जन्मतः स्त्रीणां शुभमर्दयाणिपीडनं एतत्पुंसामयुग्मेब्दे व्यत्यये नाशनं तयोरिति॥ कश्यपोपि विवाहो जन्म
तः स्त्रीणां युग्मेब्दे पुत्रपौत्रदः अयुग्मे श्रीप्रदः पुंसां विपरीते तु मृत्युद इति एवं च सति स्त्रीणां विवाहोष्टमदशमवर्षयोर्भ
वतीयः॥ एतदाहव्यासः॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी दशवर्षा भवेत्कन्या द्वादशे वृषली स्मृता॥ अस्य फलश्रुति
माहवात्म्य॥ गौरीं ददद्ब्रह्मलोकं सावित्रं रोहिणीं ददत् कन्यां ददत्स्वर्गलोकमतः परमसद्गतिः प्राप्नोतीति शेषः॥ गौरीविवा
हिता सौख्यसंपन्ना स्यात्पतिव्रता रोहिणी धनधान्यादियुक्ता च सुभगा भवेत्॥ कन्याविवाहिता संपत्समृद्धा स्वामिपूजितेति॥
ननु नवमवर्षीया रोहिण्या अयुग्मवर्षत्वाद्विवाहनिषेधः संभवति गर्भतोपि नवमवर्षग्रहणे युग्मवर्षत्वात्परिहानाल
दोषस्तवस्य एव यत् अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेदिति चंडेश्वरवाक्यमप्यस्तीति तन्मते तत्र तो विवाहभावः उ
च्यते युग्मेब्दे संपदः सौख्यविद्याधर्मी युषः सदा मर्त्तईष्टा भवेत्र्त्वे निषेका नात्र संशय इति पराशरवाक्याद्गर्भगवर्षग्रह
णमप्यवसीयते नारदादिवाक्यात्तु जन्मनक्षत्रापि नत्रषष्ठवर्षानंतरं जन्मनो विषमवर्षीयमासत्रयानंतरं नवमासाः शुभाः
समवर्षीयमासत्रयं च इदमेव च मासत्रयं च नारदादिमतेन तत्र गृह्यते इति युक्ता व्यवस्थेत्युत्पश्यामः एतदेवाभिप्रेत्यानेोप्यो
पतिनिबंधे मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत् विवाहशुद्धिं प्रवदंति संतो वात्स्यादयो गर्गवराहमु

क्राचन्द्र टर्वे संस्थे माघद्वये माधवशुक्रयोश्च शुचौ वाथवा कार्तिकसौम्ययोश्चेति वृद्धस्तु लाभशुक्रो ज्येष्ठः सौम्यो मार्गशीर्षः
दी. विवाह इति निषेधः आर्द्रोदयादूर्ध्वमिन स्य कार्ये न तत्र दृष्टे दश केक दाचित् भौमान्तकर्मेतरमंगलाद्यं कुर्यान्न सुप्तेपि त
प्र. थाप्युरारौ एतद्धरिशयनाख्यः कालः साधीयानित्यभिहितं भवति तत्र मासशब्देन चान्द्र एव मासो गृह्यत इति इन्द्राग्नी यत्र
हूयेते इत्याद्युक्तेः अत्र तु सौरचान्द्रमासद्वयोपादानादुभयोरैक्ये विवाहफलमविकलं भवति तदुक्तं केशवार्केणाभिप्रायः
सौरमासमिष्टं विवाहे तत्किं चान्द्रमासः फलेन तस्मात्सम्यक्फलाप्तिस्तदैक्ये सौरो मासः केवलः किंचिद्धीन इति अस्या
र्थ इति कश्यपादिभिः सौरा एव मासा उक्ताः एतत्पाशस्त्यं च वसिष्ठेनोक्तं उद्वाहयज्ञोपनयप्रतिष्ठा निधिव्रतं सौरमहो
त्सवाद्यं पर्व क्रियावास्तुगृहप्रवेशः सर्वे हि चान्द्रेण विशुद्धमेतदिति अतो द्वयोः सौरचान्द्रमासयोरैक्ये विवाहादि शुभमे
कतरपक्षाश्रयेण मध्यममिति निष्कृष्टोर्थः एवं च मकरसंक्रान्तौ माघः कुंभे फाल्गुनः मेषे वैशाखः वृषे ज्येष्ठः मिथुने
आषाढः तृतीयांशः तुलायां कार्तिकाद्देवोत्थानादूर्ध्वं वृश्चिके मार्गशीर्षः शुभ इत्यर्थः केचित्तु चान्द्रमासमुख्यमा
हुः तेनायमर्थः फाल्गुणे विहित इति मीनसंक्रमणसद्भावेपि शुभः चैत्रे निषिद्ध इति मेषसंक्रमणसद्भावेप्यशुभः तदुक्तं
विवाहवृन्दावने कुंभो न निंद्यो यदि फाल्गुनः स्यात् तस्त्वैशाखगतो न निंद्यः मध्याश्रितो द्वावपि वर्जनीयो इत्यादि वाचा
यमे मित्युक्तिरिति अन्ये तु वैशाखगतो न निंद्य इति तन्निर्मूलमेव न हि मेषसंक्रमः क्वचिन्निषिद्धोस्ति तदेतद्विचारितरम
णीयं कुतः यन्मतं सौरमासस्यैव मुख्यत्वं तन्मेषः प्रशस्त इति चैत्रेपि विवाहः प्रसंगत इति विपरीतस्यापि वक्तुं शक्यत्वात् उक्तं
च वृद्धारत्ने पौषेपि मकरस्थेर्के चैत्रे मेषगते रवौ आषाढे मिथुनादित्ये प्याहुः करपीडनमिति किंच वसिष्ठवाक्यादि
नाधिपे मेषवृषेत्यादौ सौरचान्द्रमासद्वयोपादानस्य वैयर्थ्यापातात् तस्माद्द्वयोरैक्ये विवाहः प्रशस्तः तत्र माघफाल्गु
नवैशाखज्येष्ठा मुख्याः यत्र तु निषेधानंतरं प्रतिप्रसवो यथा दद्दिपिलायने विवाहं निषिध्य कार्तिकमार्गशीर्षौ विहितौ तत्र
मध्यमत्वं अत एव कार्तिकसौम्ययोश्च वसिष्ठेन पृथगुक्तं नारदवाक्यस्पष्टमेव मध्यमत्वं अतो विवाहपटले गर्गः पुत्रोपे रा
तत्कार्तिके धनधान्यसुतोपेता सौम्यभर्तृपरायणा तुक्केवान् तदपि धनुसंक्रान्तिविषयं द्रष्टव्यं हरिशयनाख्यागाषा ७

का

व्यतिरिक्त

स्यादिति अयुग्मे ऽर्भगा नारी युग्मे च विधवा भवेत् तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रतेति चंडेश्वरोक्तिः सार्थिका ए
वं च नवमस्य वर्षस्यायुग्मत्वप्रयुक्तनिषेधो ऽष्टमवर्षानंतरं मासत्रयमेव तस्मादनंतरं तु सुखेन विवाह इति व्यासवाक्येन विरो
धः एवं विहितवर्षे यस्मिन्काले गुरुशुद्धिर्भवेत्तदैव शुभः विवाहः कार्यः गुरुशुद्धिश्च वटुकन्याजन्मराशेः सा त्रिकोणायादि स
प्तगः श्रेष्ठो गुरुः खषडादिमः पूजयान्यत्र निंदितः इत्युपनयनप्रकरणे ऽभिहिता यदाह गुरुः स्त्रीणां गुरुबलेनैव विवाहः शोभनः
स्मृतः वरस्यार्कबलेनैव मैत्रं द्वंद्वमयोरपीति स्त्रीगुरुबलमबलानां पुरुषाणां तीक्ष्णरश्मिबलमेव चंद्रबलं दंपत्यो
रवेलोक्य विशोधयेल्लग्नमिति वराहमिहिरः एतच्चावश्यकत्वाद्दृष्टमभिहितं यद्वा द्वयोरपि गुरुबलमिष्टं भवेत्तदा पाणि ध्रौ०
ग्रहः शुभदः द्वयोरन्यतरस्य गुर्वेशुद्धौ विवाहकालांतरासंभवे च तत्पित्रादिना पूजां कारयेत् रविशुद्धौ करग्रहणं रविशु
कं हशुद्धौ व्रतोद्वाहौ होरंतारा शुद्धौ शेषचंद्राश्रितंकमेतिराजमार्तंडोक्तसामान्यवाक्यालोचनात् वराणां विवाह्यानां
पुंसां रविशुद्धवशेन विवाहः शुभः उभयोः स्त्रीपुंसयोः चंद्रशुद्धितो विवाहः शुभदः स्मृतः अत्र संमतिः प्रागुक्ता यदात
कन्याकालातिक्रांता भवति तदा गुरुबलमनावश्यकमित्याह व्यासः दशवर्षव्यतिक्रांता कन्या शुद्धिविवर्जिता तस्या
स्तारेंदुलग्नानां शुद्धौ पाणिग्रहो मत इति प्राप्ते काले हि गुरुशुद्ध्यादि विचार इति तत्त्वं स च रविचंद्रगुरुशुद्धिर्गोचरप्रक
रणे ऽभिहिता गोचरबलाभावे ऽष्टवर्गादिबलं ग्राह्यमित्याह नारदः गोचरं वेधजं चाष्टवर्गजं रूपजं बलं यथोत्तरं बलाधि
कं स्थूलं गोचरमार्गजमिति अथैवं गुरुशुद्धिसत्का विहितमासान् दुत विलंबितेनाह मिथुनकुंभमृगालि वृषाजगे मिथुनेति
मिथुनगेपि रवौ त्रिलवशुचेः अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि मिथुनकुंभौ प्रसिद्धौ मृगाम
करः अलिर्वृश्चिकः वृषः प्रसिद्धः अजो मेषः एतद्राशिगे रवौ सति तत्रापि मिथुनस्थितसूर्येपि शुचेराषाढस्य त्रिल
वेत्तृतीयांशे आषाढशुद्धप्रतिपदमारभ्य दशमीपर्यंतं करपीडने विवाहो भवति अर्थादितरराशिस्थिते सूर्ये सति आषा
ढशुक्लदशम्यनंतरं हरिशयने च सति विवाहो न स्यात् यदाह कश्यपः उत्तरायणगे सूर्ये मीने चैत्रं च वर्जयेत् अजगो ऽह
दूकुंभालिमृगराशिगते रवाविति यस्त्वंकस्थहंतव्याराशिगे न कदाचनेति वसिष्ठः दिनाधिपे मेषवृषालिकुंभनक्रमन

इत्ततीयांशः चममध्यमः हरिस्वापांतर्गताः आषाढश्रावणभाद्रपदाश्विनकार्तिकाः पौषः चैत्रे निषिद्धाः धनुषि पौषस्त्व
त्वत निषिद्धः मीने धनुषि सिंहे च स्थिते सप्ततुरंगमे सौरमत्रं न कुर्वीत विवाहं गुरुकर्म चेति गार्ग्योक्तेः अत्र मत्रप्राशनं वि मु०मु०२
हितकालातिक्रांतं सौरं चौलं स्वतंत्रं यद्गूणनयनं तं गृह्णाति तस्य न निषेधः चैत्रे मीनगते रवावित्ति विहितोपनयनस्य वि
षयालाभात् अथोत्तरार्धं व्याख्यायते अलीति अलि मृगाद्याः प्रागुक्ता व्याताः एतद्राशिगते सूर्ये सति कार्तिकपौष
मधुष्वपि करपीडने भवति यथा वृश्चिके कार्तिकः मकरे पौषेपि मेषे चैत्रेपीत्यर्थः इदं तु सौरमासपक्षे मासमते अतए
व धुनोक्तं झारत्नस्य वाक्ये कृपाङ्कुः करपीडनमिति के प्याडुरित्युक्तेः श्रीपतेरपि पौषे च ऊर्ध्वं मकरस्थिते के चैत्रे भवेन्मे
षगे तो यदा स्यात् प्रशस्तमाषाढकृतं विवाहं वदंति गर्गा मिथुनस्थिते र्के इति तदेतदुपदेशगर्हितत्वात् याडुपेक्ष्यं अथ
१० वा केवलमनंगीकारेण मध्यमत्वमंगीकृत्य कालांतरानपेक्षिण्यावश्यदेयकन्याविषयं अत्र गीर्वाणं बुधप्रतिष्ठेत्यादिनामा
सनिर्णयः सामान्यतः कृतोप्येतादृशविशेषाभिधानार्थं पुनर्ग्रंथकृतोक्तः अथ मासप्रसंगात् जन्ममासादिषु युक्तनिषेधवि
धीरवधाद्युताष्टकेनाह आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ करग्रहः नोचितोपि विबुधैः प्रशस्यते चेद्द्वितीय
जनुषोः सुतप्रदः यस्मिंश्चांद्रमासे जन्म स जन्ममासः जन्मतिथिमारभ्य त्रिंशत्तिथ्यात्मको मासो जन्ममासो वेत्युच्यते
हयमप्याद्यप्रकरणे जन्ममासतिथ्यवद्यइतिपद्यव्याख्यानावसरे विविच्य व्याकृतमस्माभिः यस्मिन् नक्षत्रे जन्म तज्जन्मभं यस्यां
तिथौ जन्म सा जन्मतिथिः समाहारद्वंद्वः आगमशासनस्यानित्यत्वान्नुमभावः उपलक्षणत्वात् जन्ममुहूर्तेपि तत्राद्यगर्भयोः
सुतकन्ययोर्द्वयोः करग्रहो विवाहो नोचितो निषिद्ध इत्यर्थः यदाह वसिष्ठः स्वजन्ममासर्क्षतिथिक्षणेषु वै नाशिकाद्य
द्यगणेषु वैवं नोद्वाह मात्मास्पुदयाभिकांक्षी नैवाद्यगर्भद्वितयं कदाचित् क्षणेष्विह तेः नारदोपि न जन्ममासे जन्मर्क्षे
न जन्मदिवसेपि वा आद्यगर्भसुतस्याथ दुहितुर्वा करग्रह इति जन्मदिवसे जन्मतिथौ आवश्यकत्वेपुवादा जगन्मोहने ज्ञा
तं दिनं इह प्रयत्नवसिष्ठः पंचैव गर्गः त्रिदिनं तथात्रिस्तज्जन्मपक्षं किल भागुरिस्तु व्रते विवाहे गमने क्षरं रंषेति अथैतिद्वितौ
यज्जनुषोरा द्यगर्भयोः चेद्विवाहस्त हि सुतप्रदो विबुधैः प्रशस्यते एतच्च तृतीयगर्भादावपि द्रष्टव्यं सर्वथाद्यगर्भराहित्यं विव
ना

ष्टिं तं केचिच्चेदनायजन्तुषोरिति प्रियंगति यदाह च्यवनः जन्मर्क्षे जन्ममासे वा नारीणामथ जन्मनि जन्मलग्ने भवेद्दाहा पुत्रात्मा
पतिवल्लभेति चंडेश्वरः जन्ममासे तु पुत्राढ्या धनाढ्या जन्मभे स्त्रियः जन्मलग्ने भवेद्दाहा हड्डा संततिसौख्यभागिति एतच्च ना
यगर्भविषयं आद्यगर्भसाहस्रनिषेधाभिधानात् अथ प्रसंगाज्ज्येष्ठमासप्रयुक्तं विशेषं शार्ङ्गिण्याह ज्येष्ठद्वंद्वं मध्यमं संप्रदि
ष्टं त्रिज्येष्ठं नैव युक्तं कदापि केचित्सूर्यं वह्निगं प्रोह्य चाङ्कं नैवान्योन्यं ज्येष्ठयोः स्याद्विवाह इति पुत्री ज्येष्ठः कन्या च ज्येष्ठा मा
सोपि ज्येष्ठ इत्येतत् त्रिज्येष्ठं ज्येष्ठत्रयमुच्यते तत्कदापि नैव युक्तं न प्रशस्तं ज्येष्ठमासयोर्ज्येष्ठयोर्वधूवरयोर्नैव विवाहः का
र्य इत्यर्थः यद्वैकतरस्य ज्येष्ठत्वे ज्येष्ठमासेपि भवति यदाह गुरुः ज्येष्ठे न ज्येष्ठयोः कार्यं नृनार्योः पाणिपीडनं तथान्य
तरे ज्येष्ठे ज्येष्ठमासेपि कारयेत् तद्व्यान्यतरेण ज्येष्ठत्वं द्विविधं ज्येष्ठो मासो ज्येष्ठो वरश्च ज्येष्ठो मासः कन्या च ज्येष्ठा ए
तज्ज्येष्ठत्वं द्वंद्वं मध्यमं संप्रदिष्टमगतिविषयकमित्यर्थः एको ज्येष्ठोऽन्यद्द्वयमज्येष्ठमुत्तममेव यदाह वराहः द्वौ ज्येष्ठौ मध्यमौ प्रोक्तौ
एको ज्येष्ठः शुभावहः ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतमिति पराशरोपि अज्येष्ठा कन्यका यत्र ज्येष्ठः पुत्रो वरो यदि व्यत्य
यो वा तयोस्तत्र ज्येष्ठमासोऽशुभप्रद इति केचित्तु ज्येष्ठमासाभावेपि वरकन्ययोर्ज्येष्ठत्वमपि मध्यममाहुस्तदसत् वधूवरान्यत
रज्येष्ठत्वरहितस्य विवक्षितत्वात् तद्वाक्यं प्रागुक्तं किंच जन्ममासज्येष्ठमासयोरभावेपि द्वयोर्वधूवरयोः सर्वथा निषिद्धो विवाहः य
दाह गर्गः ज्येष्ठायाः कन्यकायाश्च ज्येष्ठपुत्रस्य वै मिथः विवाहो नैव कर्तव्यो यदि स्यान्निधनं तयोरिति तदेतदुक्तं यत्कृता नैवा
न्योन्यं ज्येष्ठयोः स्याद्विवाह इति ज्येष्ठत्रयनिषेधस्त्वतिदोषाधिक्यसूचनार्थः त्रिज्येष्ठमिति कथमस्य साधुत्वं ज्येष्ठो मासः ज्येष्ठो यावता ६
वरः ज्येष्ठा च कन्येति त्रीणि पदानि तेषां ज्येष्ठश्च ज्येष्ठश्च ज्येष्ठा चेति द्वन्द्वापवादः सरूपाणामेकशेष एकविभक्तावित्येकशेषो
न प्राप्नोति सरूपत्वाभावात् अथोच्यते ज्येष्ठश्च वरः ज्येष्ठा च कन्येति विग्रहे यद्यपि सरूपाणामेकशेषो, साद्रूप्यान्न प्राप्नोति
तथापि सरूपाणामित्यनुवृत्तौ भ्रमान्द्वियेत्येकशेषः शिष्यते स निवर्तमानार्थमाचष्ट इति ज्येष्ठाविति पदं सिद्धं कृत्वा ज्येष्ठो
च ज्येष्ठा मासश्चेति विग्रहे सेत्स्यति तन्न असाद्रूप्यादेवात्राप्येकशेषाभावस्य सिद्धत्वात् अथ यमसे ज्येष्ठशब्दोस्ति वैरूप्यादेव माध राम ८
वारणधौ ज्येष्ठशब्दः श्रुचिस्त्वयमित्यमरोक्तेः दिदृक्षुः हितेन ज्येष्ठशब्देन साकमेकशेषो भविष्यति तदपि न अमरोक्तावेव ज्ये

ष्टेमूलर्क्षः शुचिस्तथमित्यादिवृद्धिं हितपागात् अनुशासनबलाच्च तथाहि ज्येष्ठानक्षत्रेण युक्ता पौर्णमासी यत्र नक्षत्रेण युक्तः कॅ काल १
त्यणि सति तद्धितेष्वचामादेरित्यादिवृद्धौ यस्येति च त्याकारलोपः ज्यैष्ठ इति सिद्धः ततः स्त्रियां टिड्ढाणञिति ङीपि कृते पुनर्य
स्येति लोपे इति सिद्धं ज्यैष्ठी तस्माज्ज्यैष्ठी विद्यतेऽस्मिन्नर्थे सास्मिन्पौर्णमासीति संज्ञायामित्यणि यस्येति च ईकारलोपे सिद्धं ज्यैष्ठ इ
ति अतएवाहामरसिंहोपि शुष्यशुक्तापौर्णमासी पौषे मासे तु यत्र सा नाम्ना स पौषो माघाद्यश्चैवमेकादश परे इत्यादि वृद्धिसहितानेव पा४
पौषादीनूचे कश्चित्तु ज्येष्ठ इति पाठः सप्रमादिकः तस्मादेकशेषः सर्वथानुपपन्नः एवमस्तु इत्येकशेषांगीकारे सत्यपि त्रिशब्दे
प्याणं ६ नसाकं ज्येष्ठानां समाहार इति तद्धितार्थोत्तरपदसमाहारे चेति तत्पुरुषे मासे संख्यापूर्वो द्विगुरिति द्विगुसंज्ञायां द्विगोरिति ङीपि
त्रिज्येष्ठीति भाव्यं न तु नत्रिज्येष्ठमिति दूषणद्वयमस्ति अत्रक्रमेण समाधिः ङेर्गुण इत्यत्र ङेरेरिति वक्तव्ये गुणपूर्वको विधिरनि गुणं सं
त्य इति परिभाषाज्ञापनार्थं तेन तद्धितेष्वचामादेरित्यादि वृद्धिरनित्या नामंगीकृत्य ज्येष्ठो मासः प्रयोगोपपत्तिः अतो ज्येष्ठाश्च ज्ये
ष्ठश्चेति सरूपत्वादेकशेषः सिद्धः तत्र त्रिशब्देन साकं समासे ङीपो निवृत्तिः पात्राद्येन्नेति पात्रादेराकृतिगणत्वादंगीकार्येः सिद्धं
त्रिज्येष्ठमिति अथास्यापवाद उच्यते केचिदिति सत्यावश्यकत्वे सूर्ये वृश्चिकगे हस्तिकास्थे प्राप्त्यत्यक्ता ज्येष्ठमासेपि ज्येष्ठस्य वरस्य
कन्याया विवाहः शुभ इति केचिदूचुः एतच्च तुल्यन्यायत्वाज्ज्येष्ठापत्यस्य न ज्येष्ठे इति सामान्यतो मंगलकृत्यनिषेधेपि दृष्टव्यं
यदाहभरद्वाजः ज्येष्ठे ज्येष्ठस्य जातीन भास्करे चानलस्थिते नोत्सवादीनि कार्याणि दिग्दिनानि च वर्जयेत् विशेषमाह स एव द
शाहं चैव गर्गोऽत्रिदशाहं बृहस्पतिः अर्कभोग्याग्निभं यावन्मुनिः प्राह दश इति तत्रान्तरेपि कृत्तिकास्थे रवौ त्यक्त्वा ज्येष्ठे ज्ये दश =
ष्ठस्य कारयेत् उत्सवादीनि कार्याणि दिनानि दश वर्जयेत् व्रतबंधं विवाहं च चूडाकर्णस्य वेधनं ज्येष्ठमासे न कर्तव्यं कल्याणं ज्ये
ष्ठपुत्रगमिति अत्र ज्येष्ठपुत्रदुहित्रोर्ज्येष्ठमासवन्मार्गशीर्षेपि मंगलकृत्यनिषेधमाह वात्स्यः मार्गशीर्षे तथा ज्येष्ठे क्षौरं प
रिणयं व्रतं आद्यपुत्रदुहित्रोश्च यत्नेन परिवर्जयेत् अतएव च स्वयं ग्रंथकर्त्रा ज्येष्ठापत्यस्य न ज्येष्ठे कैश्चिन्मार्गेपि नेष्यत इत्यु
क्तं प्राकृ कैः चिदूषणं शिष्टाचाराभावं सूचयितुं कृतं अथ नित्ययोरुत्यन्नानां तथैकोदराणामपि पुत्रकन्यानां विवाहादिमंग
लकृत्ये कालनियमपुरस्सरं पूर्वापरीभावनिषेधं विशेषांतरं च हरिणीवृत्तेनाह सुतपरिणयात्षण्मासांतः सुताकरपीडनं न च नि

त्रकुलेनद्वाहं मुंडनादपि मुंडनं नच सहजयोर्भ्रात्रोर्देये सहोदरकन्यके न सहजयोः सुतोद्वाहो द्वाभ्यां धर्मस्तंभेन पितृक्रिया देहलीदीपन्या
येनात्रापि नित्तकुले इति संबध्यते निजकुले स्ववंशे पुत्रस्य परिणयाद्विवाहानन्तरतः षण्मासांतः सोदरे द्वयमध्ये सुतायाः कन्या माह
याः विवाहो न स्यात् उक्तं च वसिष्ठेन पुत्रोद्वाहान्नैव पुत्र्याः कदाचिदपि षण्मासान्तः कार्यं शुद्धोद्वाहकर्मेति नारदेनापि पुत्रोद्वाहान्य
रं पुत्रीविवाहो न ऋतुत्रये कुर्यात् व्रतमुद्वाहान्मंगलेनाप्यमंगलमिति अयं निषेधः कुलपरो द्रष्टव्यः यदाह वात्स्यः स्त्रीविवाहः
कुले निर्गमः कथ्यते पुं विवाहः प्रवेशो वसिष्ठादिभिर्निर्गमाद्वाहादिनान्न प्रवेशो हितस्तत्र संवत्सरेणावधिकीर्तितः इति अत्र भेदेन ना
ये नियम इति चूडा व्रतं चेत्यत्र ग्रंथकृद् दूषयति निजकुले इति स्ववंशे पुत्रस्य कन्याया वा मंडलाद्विवाहान्मुंडनं चौलमुपनयनं
म हानान्याद्विव्रतं चतुष्टयं समावर्तनं वा तद्वत्षण्मासांतः न कार्यं यदाहाग्निः कुले ऋतुत्रयाद्वा मुंडनानन्तरं मुंडनमिति तस्मा
न्मुंडनान्मुंडनं न कार्यं तथा कन्याविवाहादनंतरं पुत्रस्य विवाहः कार्य इत्यर्थः यदाह नारदः मुंडनान्मुंडनं कार्यं मुंडनान्नैव मुंडनमि
ति वसिष्ठः पुत्रीविवाहान्तरतः सदैव शुभप्रदं पुत्रविवाहकर्मेति न चेति सहजयोः सोदरयोर्भ्रात्रोः सहोदरकन्यके नद्येनो
द्वाह्ये उक्तं च नारदेन नवैकजन्मनोः पुंसोरेकजन्मकन्यके कृते कदाचिदुद्वाह्ये नैकदा मुंडनद्वयमिति एकजन्ये तु कन्ये द्वे पुत्रयोर्न
कजन्ययोरिति वसिष्ठोक्तेश्च अत्र चकारेणानुक्तसमुच्चयार्थः तेनैकस्मै वराय सहोदरकन्याद्वयमपि न देयमित्यर्थः न पुत्रीद्वयमेकस्मै
प्रदद्यान्न कदाचनेति वसिष्ठोक्तेः नारदोपि प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयमिति प्रत्युद्वाहो विनिमयविवाहः मत्पुत्राय चेत्कन्या त्वया
न्यादीयते तदा मया त्वत्पुत्राय कन्यादीयत इत्येवं पणबंधरूपः कान्यकुब्जभाषया गुरावट इत्याहुः एतादृशः पणबंधो भगिन्यादिदानेन
द्रष्टव्यः न सहजसुतोद्वाहो भ्रात्रर्थ इति सुतश्च सुतश्च सुतौ सरूपाणामित्येकशेषः सुता च सुता च सुते पूर्ववदेकशेषः सुता च सुतश्च सुतौ
पुमान्स्त्रियेत्येकशेषः सुतौ च सुते च सुतौ सुता इतिकृतैकशेषाणां द्वंद्वः अत्रापि पुमान्स्त्रियेत्येकशेषः सहजाश्च ते सुताश्चेति कर्मधार
यः तेषां सोदराणां विवाहः अत्रार्थवशाद्धर्मो रषण्मासमध्ये न कार्यः विवाहस्त्वकन्यानां षण्मासाभ्यंतरे यदि अत्र संख्यायं त्रिभिर्वर्षैः नारदः
स्तत्रैका विधवा भवेत् विवाहस्तुपलक्षणं तेन समानसंस्कार एकमातृजयोः पुत्रयोः कन्ययोर्वा पुत्रकन्ययोर्वा न कार्य इत्यर्थः न ताम
दाहष्टमन्त्रः एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः न समानक्रिया कुर्यान्मातृभेदे विधीयत इति समानक्रियाः चूडाकरणादिका ह

एकवर्षमध्ये निषिद्धेत्यर्थः एकवत्सर इति कालसावकाशत्वद्योतनाय षण्मासमध्ये तु सर्वथैव न कार्यः विवाहस्त्वेककन्यानां षण्मासेभ्यन्तरे यदीति नारदस्मरणात् यमजातयोस्त्वपत्ययोर्नियतकालानां ज्ञानकर्मादिकर्मणामेकक्रियानिषेधाभावे विधिभेदेन तदसंभवात् न त्वत्र पुरुषस्त्रियोरित्युक्तेः पुरुषकन्ययोरेव समानक्रियानिषेधोवगम्यते न द्वयोः पुत्रयोः कन्ययोर्वेति नच पुरुषौ च स्त्रियौ चेति द्वयोः कन्ययोः पुत्रयोर्वा निषेधः सेत्स्यतीति वाच्यं यतः सकृदुच्चरितः सकृदर्थप्रत्यायक इति न्यायाः पुत्रकन्ययोरनिषेधः स्यात् आवृत्त्या विवक्षितार्थद्वयसिद्धिरस्त्विति आवृत्तौ प्रमाणाभावात् किंच पुरुषौ च स्त्रियौ चेति कृतैकशेषयोः पुरुषयोः स्त्रियोश्च वा चार्थे द्वंद्व इति द्वंद्वे चतुष्ट्वापत्तौ द्विवचनानुपपत्तेः ननु युगपदधिकरणवचनो द्वंद्व इति वार्तिककारवचनात् धवौ च खदिरौ च धवखदिरावित्यादौ वस्त्वन्यसाहित्यप्रतिपत्तये द्विवचनबहुवचनांतेन द्वंद्वांतःपातिना सर्वेण पदेन विगृहीतव्यमिति अतएव द्वंद्वापवादके एकशेषसूत्रे महाभाष्यकृताप्युक्तं सहविवक्षायामित्येकः षष्ठः पक्ष उपन्यस्तः तत्र तेनैवाशंक्य समाहितं न तर्हीदानीमिदं भवति वृक्षश्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति नैतत्सहविवक्षायां भवति अथापि निदर्शयितुं बुद्धिरेव निदर्शयितव्यं वृक्षौ च वृक्षौ च वृक्षौ वृक्षाश्च वृक्षाश्च वृक्षाश्च वृक्षा इति अतः साहित्यप्रतिपादनयोः पुरुषयोः स्त्रियोश्च द्विवचनांतयोर्द्वंद्वेनैव बहुवचनोत्पत्तिः एवं सति पुत्रकन्ययोः सोदरयोः समानक्रियानिषेधो न तु पुत्रयोर्द्वयोः स्त्रियोश्चेति वस्तुतस्तु तत्रैकवचनांतपदविग्रह एव साहित्यप्रतिपत्तिस्तु द्वंद्वात् त्वयोरुपपन्नेपि नानेकपदलक्षणदिक्लेशः सोढव्य इत्येतत्प्रपंचितं तत्रांतरे महतायासेन महाभाष्यकृदुक्तिस्तु यादीनामेव परस्परसाहित्येन द्विवचनाद्यर्थे संपन्नौ वचनांतानवसरप्रतिपादिकेत्यभियुक्ताः तथा च प्रागुक्तः चतुष्ट्वापत्तिरूपो दोषः स्यादेवेति अस्त्विति चेत् न एकमातृजयोरिति द्विवचनानुपपत्तिः स्यात् तत्रापि बहुवचनमस्तु एकमातृजानामेकवत्सरे पुरुषस्त्रीणामिति चेत् न उभयथापि छंदोभंगदोषापत्तेः किंच यद्ययमर्थो विवक्षितः स्यात्तदा छंदोभंगदूषणमपहाय स्पष्टैरेव पदांतरैर्नारदादिवाक्यवन्निषेधं कुर्यात् अत्र ब्रूमः एकमातृजयोः सोदरयोः ययोस्तु समानक्रियानिषेध इत्येतावानस्य वचसोर्थः द्विवचनोपादानं तु द्वयोरपि निषेधो यथा स्यात्तत्रैकेषत्रिकन्यायेन त्रयाणां सोदराणामपि मध्यात्त्रिष्वेव निषेधः पुरुषस्त्रियोरिति तु पदं दृष्टांतार्थं नारदादिवाक्येषु नोपादानं

मुही.
वि.प्र.
२०

ह्ननामपि सोदराणां संग्रहार्थं ननु बहुत्वविवक्षया बह्ननामेव सोदराणां निषेधार्थं तेन द्वयोर्बह्ननां वा निषेधः सिध्यति अत एव
पराशरोपि एकोदरप्रसूतानामेकस्मिन्वत्सरे यदि पाणिग्रहो भवेन्नूनं तत्रैका विधवा भवेदिति तुल्यन्यायत्वाद्यज्ञोपवीतसंस्का
र्येत्वा द्वयोरन्यतरस्य नाशइत्यर्थः नैकदा मुंडनद्वयमिति वसिष्ठोक्तेः एकदा एकस्मिन्वर्षे मुंडने चौलमुपनयने वा ननु कन्यावि
वाहकाल एवोपनयनमपि स्मर्यते यथाह हारीतः द्विधा स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्रह्मवादिनीनामुपनयनं वेदाध्य
यनं भिक्षाचर्या च सद्योवधूनां तूपस्थिते विवाहे यथाकथंचिदुपनमात्रं विधाय विवाहः कार्य इति एवं सति सोदरकन्याविवाह
स्य सोदरपुत्रोपनयनस्य च समानसंस्कारत्वात्तयोरेकवर्षे निषेधः स्यात् उच्यते गर्भाष्टमेषु ब्राह्मणमुपनयेद्गर्भैकादशेषु रा
जन्यं गर्भद्वादशेषु वैश्यमिति तथा वसंते ब्राह्मणमुपनयेद्ग्रीष्मे राजन्यं शरदि वैश्यमित्यापस्तंबादिसूत्रेषु स्वकुलाचारधर्मज्ञो
माघमासे तु फाल्गुने विधिज्ञश्चार्थवांश्चैव वेदवेदांतपारगः वैशाखे धनवान्दक्षः शास्त्रविद्याविशारदः उपनीतकुलानां स्याज्ज्ये
ष्ठे विधिविदां वर इति नारदादिसंहितास्वपि ब्राह्मणादिवर्णत्रयग्रहणात्पुंलिंगस्य विवक्षितत्वाच्च स्त्रीशूद्राणां व्रतबंधनिषेधा
वगमात् यानि तु विप्राणामुपनयनं वसंतसमये धराधिनाथानां ग्रीष्मे तौ शरदि विशां मासाः साधारणाश्च माघाद्या इत्यादि
वसिष्ठवाक्यानि तु स्त्रीसाधारण्येन प्रतीयंते तानि नारदादिवाक्यैकवाक्यताबलात्पुंविषयकान्येव विप्राश्च ब्राह्मण्याश्च विप्रा
श्च ब्राह्मणा इति पुमान्स्त्रियेत्येकशेषेपि प्रमाणाभावः अत एव याज्ञवल्क्यः गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरा षष्ठेष्ट
मे च सीमंतो मास्येते जातकर्म च अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलं एवमेनः
शमं याति बीजगर्भसमुद्भवमित्युक्त्वा मध्ये चोपनयनं विहाय तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु मंत्रक इत्याह ततो गतो गर्भाष्ट
मे,ष्टमे वाब्दे ब्राह्मणस्योपानयनं राज्ञामेकादशे सैके विशामेके यथाकुलमुपनयनमित्युवाच यद्येषामभिप्रायो नाभिमतः स्या
त्तदा चूडा कार्या यथाकुलमित्यस्याग्रे गर्भाष्टम इत्यर्धं पठेदुक्त्वा एवमेनः शमं याति बीजगर्भसमुद्भवं तूष्णीमेताः क्रियाः स्त्रीणां
विवाहस्तु समंत्रक इत्यवदत् तथाह यमः पुराकल्पे हि नारीणां मौंजीबंधनमिष्यते अध्यापनं च वेदानां सावित्रीवचनं तथा पिता रा
पितृव्यो भ्राता वा नैनामध्यापयेत्परः स्वगृहे चैव कन्याया भैक्षचर्या विधीयते इति ननु यद्यपि मुख्यमुपनयनं स्त्रीणां नास्ति तथापि

प्यातिदेशिकमस्ति यदाह मनुः वैवाहिको विधिः स्त्रीणामौपनायनिकः परः पतिसेवा गुरौ वासो गृहार्थोग्निपरिक्रियेति तेन
समानक्रियानिषेधः सेत्स्यतीति मतं अतिदेशायमुपनयनधर्मप्राप्त्यर्थः यथा यथा ब्राह्मणादीनामुपनयनाम्नायधर्मनिरसन
पूर्वकमनुष्ठानं यथास्ति तथा स्त्रीणामपि विवाहान्नाकामचारादिधर्मानदोषं कुर्वन्ति विवाहस्य तु द्विजत्वसिद्धिकरत्वादनुष्ठिते
विवाहे कामाचारादिधर्मनिरासपूर्वकं पतिसेवागुरौ सदृत्यादिकमनुष्ठानं भवेदिति नन्वतिदेशेनोपनयनधर्मप्रापणमपि स्त्री
णामस्तु समानसंस्कारत्वमप्युच्यते नात्र समानशब्दः सदृशार्थकः तेन तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वं सादृश्यमिति सा
दृश्यलक्षणं यथाकथंचित् सर्वत्र सादृश्यसंभवे न विजातीयसंस्काराणामपि चौलान्नप्राशनादीनां सोदरत्वभ्रातृसंबंधिना
निषेधप्रसंगात् शिष्टाचारविरोधाच्च किं त्वेकशब्दपर्यायः सदृशशब्दस्तेनैकजातीयक्रियानिषेधः उपनयनत्वेन विवाहत्वेनैकजा
तीयत्वं एवं सर्वेष्वपि कर्मस्वेकजातीयत्वं द्रष्टव्यं तस्मात्सोदरकन्यापुत्रसंबंधिना विवाहोपनयनयोः समानसंस्कारत्वाभा
वद्रूप्येव सिद्धान्तः फलितः अतः षाण्मासिको निषेधः तयोर्नास्ति तत्र प्रथममुपनयनं विधाय यथावकाशं कन्याविवाहस्तु
त्वेन कार्यः यदुक्तं पृथ्वीपरिणयादूर्ध्वं यावद्दिनचतुष्टयं पुत्र्यन्तरस्य कुर्वीत नोद्वाहमिति हारयइति तत्र भिन्नमातृविषयत्वा
द्गर्भवाक्यस्य पूर्वोक्तपराशरवाक्यस्वरसात् समानापि क्रिया कार्या मातृभेदे तथैव च विवाहेऽहितः कार्यो न विवाहस्त्वहर्दि
नमिति नारदोक्तेश्च वसिष्ठेन तु विशेषोभिहितः एकोदरप्रसूतानां नात्र कार्यत्रयं भवेत् भिन्नोदरप्रसूतानां नेति शातातपाब्र
वीदिति चौलोपनयनविवाहरूपं कार्यत्रयं तदुक्तं च्यवनेन आदौ चौलं ततो मौंजी विवाहश्चक्रमपरः भ्रातृभेदेषु धैर्येणोक्तो मातृ
रैक्येन कर्हिचिदिति एवं स्थिते भिन्नोदरमंगलसत्त्यावश्यकत्वे एकस्मिन्मंडपे न कार्यमेव किंतु गृहभेदादाचार्यभेदाद्वा कार्यं
यदाह वसिष्ठः द्विशोभनं त्वेकगृहेपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु आवश्यकं शोभनमुत्सुकस्य द्वारेथवाचार्यविभेदतो
वेति द्वारे द्वारभेदे यमलजातयोस्त्वयमपि निषेधो नास्ति एकस्मिन्वत्सरे प्राप्ते ऋतौ यमलजातयोः क्षौरं चैव विवाहे च मौं
जीबंधनमेव चेति पराशरोक्तेः क्षौरं चौलं भद्रकारिकायां च एकस्मिन्वत्सरे चैव वासरे मंडपे तथा कर्तव्यं मंगलं स्वस्रोर्भ्रात्रो
र्यमलजातयोः तत्रापि ज्येष्ठानुक्रमेण जन्मज्येष्ठेन चाह्नानं ब्राह्मणपादिष्वपि स्मृतं यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता मतेति

मनूक्तेः देवलोपि यस्यजातस्य यमयोः सत्वरं प्रपश्यति मुखं संतानः पितरश्चैव तस्मिन् श्रेष्ठे प्रतिष्ठितमिति संतानो वंशः शुभेऽद
ति शुभे विवाहादिमंगलकृत्ये पितृक्रियाश्राद्धक्रिया न कार्या विशेषाभिधानात्कुलेयं निषेधः मंडलेनाप्यमंगलमिति
नारदोक्तेः अमंगले श्राद्धं किं तु समाप्ते एव मंगले कार्यमित्यर्थः अथवा श्राद्धदिने समीपस्थिते तदनंतरं लग्ननिर्धारे विवा
हादिमंगलकृत्यं कार्यमित्यर्थः अथ विवाहे वाग्दानानंतरं कुलमध्ये कस्यचिन्मरणे प्रातिकूल्यनिर्णयमिंद्रवंशाकें दशाह
वद्धावरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कश्चन निश्चयोऽनंतरं मासोत्तरं तत्र विवाह इष्यते शांत्याथवा सूतकनिर्गमे परैः निश्च
यानंतरं वाग्दानानंतरं यदि वध्वाः कन्यायास्तथा वरस्यापि कुले वंशे तत्रापि त्रिपूरुषमध्ये कश्चन सपिंडो नाशं व्रजेत्तदानुयानंत्र
मासानंतरं मरणदिनमारभ्य त्रिंशद्दिने प्रतिकूलं ततः शांत्या स्वनुष्ठितया विवाहः सुखेनेष्यते उक्तं च स्मृतिचंद्रिकायां कृते
वाङ्निश्चये यदि स्यान्मृत्युर्भवति गोत्रिणः तदा न मंगलं कार्यं नारीवैधव्यदं ध्रुवमिति विशेषमाह मेधातिथिः पुरुषत्रयपर्यंतं प्र
तिकूलं स्वगोत्रिणां प्रवेशनिर्गमौ तद्वत्तथा मुंडनमंडने इदं तु पित्रादिभिर्विषयं न द्रष्टव्यं उक्तं च मांडव्येन अन्येषां तु सपिंड
नामाशौचं माससंमितं तदंते शांतिकं कृत्वा ततो लग्नं विधीयते इति पित्रादिमरणे तु विशेषमाह शौनकः वरवध्वोः पितामा
ता पितृव्यः सहोदरः एतेषां प्रतिकूलं चेन्महाविघ्नप्रदं भवेत् पिता पितामहश्चैव माता वापि पितामही पितृव्यः स्त्री सुतो भ्रा
ता भगिनी वाविवाहिता एभिरेव विपन्नैः स्वप्रातिकूल्यं बुधैः स्मृतं अन्यैरपि विपन्नैश्च केचिदूचुर्न तद्भवेत् उक्तेष्वन्यैः प्रतिकू
लस्य नियतं काल माहमांडव्यः वाग्दानानंतरं यत्र कुलस्य कस्यचिन्मृतिः तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् पितुराशौ
च महत्स्यात्तदर्धं मातुरेव हि मासत्रयं तु भार्याया तदर्धं भ्रातृपुत्रयोः दैवज्ञमनोहरे विशेषः प्रतिकूले सपिंडस्य मासमेकं वि
वर्जयेत् विवाहस्तु ततः पश्चात्तयोरेव विधीयते दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये प्रौढायामपि कन्यायां प्रातिकूल्यं
न दुष्यतीति मेधातिथिः दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च उदासवर्तिनश्चैव प्रातिकूल्यं न विद्यते संकटे समनुप्राप्ते याज्ञव
ल्क्येन योगिना शांतिं कृत्वा गणेशस्य कृत्वा तान् शुभमाचरेत् अकृत्वा शांतिकं यस्तु निषेधे सति दारुणे यः करोति शुभं तावद्विघ्नं
तस्य पदे पदे इति अथावश्यकत्वेपवादमाह अथवेति स्वस्ववर्णपुरस्कारेणाशौचनिर्गमे सति शांत्या तु स्वनुष्ठितया विवाहः

परे त्वाचार्यैरिष्यते यदाह मेधातिथिः प्रेतकार्याण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां इति ज्योतिःप्रकाशे प्रतिकूलेपि कर्तव्यो विवा
हो मासमेतरात् शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेद्ध्रुवं इति सत्यावश्यकत्वे स्वस्वाशौचाद् नन्तरं मासमध्येपि शान्तिं विधाय
विवाहः कार्य इत्यर्थः पूरुष इत्यत्रान्येषामपि दृश्यते इति दीर्घः पुरुषाः पूरुषा नरा इत्यमरश्च अथ प्रवेशनिर्गमौ तद्वन्नयाहेउ
नमेउनमिति प्रागुक्तं मेधातिथिश्लोकोत्तरार्धे सापवादमुपजातिकयाह चूडाव्रतं चापि विवाहतो व्रताच्चूडा च नेष्टा पुरुषत्रयान्त
रे वधूप्रवेशः चसुताविनिर्गमः षण्मासतो वाब्दमिये षतः शुभः चूडा चौलं व्रतमुपनयनं च अपिशब्दान्महानाम्न्यादिसमाव
र्तनान्तं च विवाहात्परतः पूरुषत्रयान्तरे एव नेष्टं तथा व्रतादुपनयनाच्चूडा च पुरुषत्रयपर्यन्तं नेष्टा तथा वध्वास्नुषायाः प्रवेशः सु
तायाः कन्याया विनिर्गमोपि पुरुषत्रयपर्यन्तं नेष्टः एतन्मूलवाक्यं पुरुषत्रयपर्यन्तं नेष्टः एतन्मूलवाक्यं पुरुषत्रयपर्यन्तमि[illegible]
त्यादि आदौ चौलं ततो मौञ्जीत्यादि च प्राग्लिखितं तस्मान्मूलपुरुषचतुर्थत्वादौ नायं दोषः सत्वायं दोषः पुरुषत्रयं [illegible]
नमेव अत एव षण्मासतः इति मासषट्कानन्तरमयं व्यत्यासोपि विवाहादिः सर्वो विधिः शुभः एतन्मूलवाक्यमपि कुले[illegible]
र्वीगित्यादि प्रागुक्तं अत्रापवाद उच्यते भवति वाब्दे वा भेदाद्वर्षभेदात् षण्मासमध्येपि शुभः यथा माघे मासि विवाहो वैशा
खे चौलं यज्ञोपवीतं वा भवत्येवेत्यर्थः तदुक्तं संहितासारावल्यां फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने भेदाद्वर्षस्य कुर्वीत नन्
र्तुत्रयविलम्बनमिति अत्र फाल्गुनपरं प्रागवृत्तमासान्तरस्याप्युपलक्षणं चैत्रपदं चोत्तरवर्षगतवैशाखाद्युपलक्षणं तत्रैके श्रुति
कन्यायेन यत्र स्वल्पं कालान्तरं तत्रापि चेन्निषेधाभावस्ततोधिकव्यवधाने किं वाच्यमब्दभेदस्यैव प्रयोजकत्वात् अथ प्रसंगान्मूला
दिनक्षत्रजातयोर्वरयोः श्वशुरादिपीडकत्वं वसन्ततिलकयाह श्वश्रूविनाशमहिजौ सुतरां विधत्तः कन्यासुतौ निऋतिजौ
श्वशुरं हतश्च ज्येष्ठाभजा ननु तनयास्वधवाग्रजं च शाक्राग्निजा भवति देवरनाशकर्त्री अहिजावश्लेषात्यन्तौ कन्यासुतौ श्वश्र्वाः
सादाडत्ने मातुर्विनाशं विधत्तः कुरुतः तथा निऋतिजौ मूलोत्पन्नौ कन्यासुतौ श्वशुरं हतो मारयतः उक्तं च वसिष्ठेन नैऋत्य
भाद्भूतसुतः सुता वा क्षिप्रं श्वशुरं निहन्ति तदन्त्यपादोद्भवनिर्मलोनि हन्ति नैवात्र मेना हिमवत्कलत्रमिति अहिभव इति पुंस्त्व
विवक्षितं सुता सुतो वा पूर्वत्रोक्तेः मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनामिति नारदोक्तेश्च तस्य श्व[illegible]रस्याग्रजं पत्नीवरस्य

टी.
प्र.

कन्याया वा साक्षान्मातरं न तु सपत्नमातरं हंतीत्यर्थः एतदेव स्पष्टमुक्तं वसिष्ठेनैव जनकं जननीं हंति मूलं मूलाहि हि थिश्च ज्येष्ठेति त
त्वन्यायत्वात्कन्याया अपि साक्षान्मातरं ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्ना कन्या स्वधवाग्रजं भर्तुर्ज्येष्ठभ्रातरं इति शक्राग्निजा विशा
खानक्षत्रोत्पन्ना कन्या देवरस्य भर्तुः कनिष्ठबंधोर्नाशकर्त्री भवति वसिष्ठः हरेशाना राजननि नाधवाग्रजं द्विदैवना राजननिता तु देव
रमिति हंतीत्यनुवर्तते मार्कंडेयः ऐंद्री पत्यग्रजं हंति देवरं तु द्विदैवजेति अथ विशाखामूलाश्लेषोत्पन्नप्रोक्तदोषापवादमनुष्टुभा
ह द्वीशाद्यपादत्रयजा कन्या देवरसौख्यदा मूलांत्यपादसार्पाद्यपादजौ तौ उभयोः शुभौ द्वीशं विशाखा अन्यत्सर्वार्थस्पष्टार्थे य
दाह च्यवनः विशाखांतुलयायुक्ता देवरस्य शुभावहा विशाखावृश्चिकोद्भूता देवरं हंत्यशायमिति वृद्धनारदोपि नहंति देवरं कन्या
तुलांशस्थद्विदैवजा तदंत्यपादजा त्याज्या ऽष्टावृश्चिकपक्षवत् तस्माद्विशाखाचतुर्थपादे निषेधः फलितइत्यर्थः मूलेति तयोः
श्वश्रुश्वशुरयोः मूलचतुर्थचरणोत्पन्नौ तौ कन्यासुतौ श्वशुरस्य सुखदौ अश्लेषाद्यचरणोत्पन्नौ कन्यासुतौ श्वश्र्वाः सौख्यदौ त
दुक्तं नारदेन सुतः सुता वा नियतं श्वशुरं हंति मूलजः तदंत्यपादजो नैव तथाश्लेषाद्यपादजः अत्र पुंस्त्वमविवक्षितं हेतुः मए
वेति वधूवरयोः सामान्यतो गुणदोषविचारः प्रस्तूयते तत्र केचिदष्टकूटानि राजमार्तंडः दिनगणं च माहेंद्रं स्त्रीदीर्घं योनिरेव च राशि
राशपथिपो रज्जुर्वेधं वश्यं वेधादशस्मृताः पुनश्च वर्णकूटं च माहेंद्रं च ततः परं एते द्वादश भेदाश्च प्रीतिभेदाः प्रकीर्तिताः इति अन्ये,
ष्टादशकूटान्याहुः य माहेंद्रं दिनकूटं च गणकूटं च योनिजं स्त्रीदीर्घं रज्जुकूटं च वश्यं वर्णाख्यकूटकं राशिराशपधिपा
ख्यं च वेधो नाड्याख्यकूटकं भूतलिंगाख्यकूटाख्यं जात्याख्यं पक्षिकूटकं योगिनीगोत्रकूटे च कूटान्यष्टादशैव तु दंपत्योरष्टद्विकाली
लि यत्नाच्चिंत्यानि शास्त्रत इति तत्र दशकूटानां नानादेशविशेषप्रसिद्धत्वात्तानि विहाय सर्वदेशप्रसिद्धानि अष्टौ कूटानि सलक्ष
८४ णानि विवक्षुराचार्यस्तान्यनुष्टुप्छंदसा प्रतिजानीते वर्णं वश्यं तथा तारा योनिश्च ग्रहमैत्रकं गणमैत्रं च कूटं च जात्याख्यं पक्षिकूटकं
योगिनीगोत्रकूटे च कूटान्यष्टादशैव तु दंपत्योरष्टद्विकालीलि यत्नाच्चिंत्यानि शास्त्रत इति तत्र दशकूटानां नानादेशविशेषप्रसि
द्धत्वात्तानि विहाय सर्वदेशप्रसिद्धानि नाडी चैते गुणाधिकाः एते राशिकूटभेदा वर्णादिमैत्र्यां सत्यां एकाधिगुणाधिकाः स्युः
यथा वर्णमैत्र्यामेको गुणः वश्ये द्वौ गुणौ तारामैत्र्यां त्रयो गुणाः योनिमैत्र्यां त्रयो गुणाः योनिमैत्र्यां चत्वारः ग्रहमैत्र्यां पंच ग

णमैत्र्यां षट् सद्भकूटे सप्तनाडीकूटे ष्टावित्यर्थः तदुक्तं वर्णो वश्यं तथा तारा योनिर्ग्रहगणमकूटनाडिश्च ज्ञेयाः यथोत्तरं ते
बलिनः स्त्रीपुंसयोर्ह्यदतः इति स्त्रीपुंसयोरित्यादिचन्द्रेत्यादिनानि दैवज्ञमनोहरेऽपि नाडीभेदे गुणाष्टौ सप्त सद्रा
शिकूटके षड्गुणा गणमैत्र्यां च सौहार्दे पंच खेटयोः योनिमैत्र्यां च चत्वारस्त्रयस्तारा बले गुणाः वश्यत्वे द्वौ गुणौ प्रो
क्तौ वर्ण एकः प्रकीर्तितः अथ प्रतिज्ञाक्रमेण वर्णकूटं तावत् मालिन्याह द्विजा झषालिकर्कटास्ततो नृपा विशों
घ्रिजाः वरस्य वर्णतोऽधिका वधूर्न शस्यते बुधैः मीनवृश्चिककर्कराशयो द्विजा ब्राह्मणाः तेनानंतरमन्ये मेषसिंह
धनूराशयो नृपाः क्षत्रियाः वृषकन्यामकरा विप्रा वैश्याः मिथुनतुलाकुंभाश्च अंघ्रिजाः शूद्राः तत्र वधूवरराशिवर्णे ज्ञा
त्वा वरस्य वर्णतः ब्राह्मणादिकाद्वधूरधिका ज्येष्ठवर्णा बुधैर्न शस्यते किं तु समा हीना वा शस्यत इत्यर्थः नारदः झषालि
कर्कटा विप्रास्तु हृद्ध्वाः क्षत्रियास्तथा पुंवर्णराशेः स्त्रीराशौ समे हीने तथा शुभं वर्णज्येष्ठा तु या नारी वर्णहीनस्तु यः पुमान्
विवाहं यदि कुर्वीत तस्या भर्ता विनश्यतीति अत्रैकोऽपि गुणो वर्णाधिके वरे वर्णसमे वा वर्णहीने तु गुणाभावः तदुक्तं दैवज्ञ
मनोहरे एको गुणः सद्गुणैस्तथा वर्णोत्तमे परे हीनवर्णे वरे शून्यं केऽप्याहुः सद्यो बलमिति इत्लमर्धमथ वश्याकूट
मिंद्रवज्रयाह हित्वा मृगेंद्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः सर्वेऽपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यव
हारतोऽन्यत् नरराशयो मिथुनकन्यातुलाः एषां सर्वेऽपि मेषादयः सिंहं हित्वान्ये वश्याः ननु मनुष्याणां जलचराः कथं
वश्याः यत उभयोः सहावस्थानाभाव इत्यत आह तथेति एषां नरराशीनां कर्कमकरकुंभमीनाः भक्ष्याः किं पुनर्वश्या
इति सूचयितुं शब्दः सिंहस्य वशे अलिं वृश्चिकं विना सर्वेऽपि राशयो वश्याः अन्यदप्युक्तं च तुष्पदानां जलचराणां वा व
श्यावश्यं नराणां मनुष्याणां व्यवहारतो ज्ञेयं वसिष्ठः वश्याः स्युः सर्वराशयोऽन्ये नृभानां सिंहं तस्याप्येकमन्ये विधेयाः
कीटं त्यक्त्वा लोकतोऽन्यत्र सिंहं वश्यावश्यं नैव तोयाश्रयः च तोयालयोऽज्जलचरा अलिश्चेते परस्परं वश्या नैव तु रि
त्यर्थः अथ गुणविभागो दैवज्ञमनोहरेऽभिहितः सख्यं वैरं च भक्ष्यं च सख्यमाद्यं त्रिधा बुधाः वैरे भक्ष्ये गुणाभावो द्वयोः
सख्ये गुणद्वयं वैश्ये वैरे गुणस्त्वेको वश्यभक्ष्ये गुणोऽधिक इति यद्यपीदं वधूवरयोः परस्परं [illegible]मेवोक्तं तथापि स

मु.टी. वि.प्र. २३

त्यावश्यकत्वे वरं प्रति भस्य त्वं च पूर्वत्वं वा स्त्रियोपेक्षितं न तु विपरीतं वर्णज्येष्ठा तु या नारीत्यनेन समानन्यायत्वात् अन्योन्यवश्य
त्वे तु तममेव अथ ताराकूटमनुष्टुभाह कन्यर्क्षाद् दूरभं यावत्कन्याभं वरभाद् अपि गणयेन्नवभिः शेषे स्त्रीत्रिभमसत्स्मृतं
कन्याजन्मनक्षत्राद् दूरनक्षत्रं यावद्गणयेत् तथा वरनक्षत्राद् अपि कन्यानक्षत्रं गणयेत् ततो वशिष्टे केन नवभिर्भक्ते यद्वशि
ष्टं तच्चेत् त्रिपंचसप्तमितं भवेत्तदा तत्क्षं भं स्मृतं अन्यथा द्वि चतुः षष्ठ नवमितं चेत्स्यात्तदा शुभमित्यर्थात् उक्तं भवति ना
रदः स्त्रीभमारभ्य गणनेन नवपर्यायतः क्रमात् जन्म त्रिपंच सप्तस्थं पुंभं स्याद् दूरनाशनं पुंभमारभ्य गणने स्त्रीभं ज
न्मादिके स्थले स्त्रीविनाशो भवेत्तस्माद् दिनकूटं विवर्जयेत् दिनकूटं ताराकूटं पूर्णञ्जीयेपि नरर्क्षाद् गणयेद्यावत्क
न्यर्क्षं कन्यभाद् अपि वरभं नवहृच्छेषास्ताराः संति परस्परं त्यक्त्वा त्रिपंचसप्ताख्याः शेषा द्वादे मिथः शुभा इति यत्तु कश्य
पेन गणयेत्कन्यकाधिष्ण्याद् दाहत्वं वरजन्मभं जन्मत्रिपंचसप्तर्क्षं हित्वान्यर्क्षं शुभप्रदमिति कन्यानक्षत्राद् एव गणनो
क्ता अत एव भीमभाद्दशपंचतृतीयाः शोकवैरविपदेव ``ताराइति केशवार्केणाप्युक्ता सार्थत्वद्योतनार्था तथा
हि द्वयोरपि परस्परनक्षत्रगणने शुभं चेच्छुभमेवाशुभं चेदशुभमेव तत्रैकस्मादन्यतरनक्षत्रगणनया शुभत्वेपि स्त्रीन
क्षत्राद् दूरनक्षत्रे त्वशुभं नापेक्षितमेवेति भावः अत्र गुणविभागो देवज्ञमनोहरे एकतो लभ्यते ताराशुभा चेद्वाशुभा
न्यतः तदा सार्धो गुणः चेद्वताराशुद्धा मिथस्त्रयः उभयोर्न शुभा तारा शून्यं समादिशेदिति अत्र यद्यपि नारदादिभिर्जन्म
तारापि निषिद्धोक्ता तदुक्तं वसिष्ठेन एकनक्षत्रेनावड्डाशेषैक्ये चेद्भिन्नपदर्क्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैवेति वदंपमा
एण्वात्रोक्तं दशमैकोनविंशताराया तु निषिद्धो दुष्टभकूटेज्ञेयः सद्भकूटे तु दोषाभाव इत्यर्थः अथ योनिकूटं पृथ्वी ह लवि श्र
क्रीडितेनाह अश्विवारुणयोर्हयो निगदितः स्वान्यर्क्षयोः कासरः सिंहो वस्वजपादयोः समुदितो याम्यान्तयोः कुंजरः
मेषोदेवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः स्याद्वैश्वाभिजितोस्तथैव नकुलः चान्द्राब्जयोन्योरहिः ज्येष्ठामैत्रभ
योः कुरंग उदितो मूलार्द्रयोः श्वा तथा मार्जारोदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरः व्याघ्रो द्वीशभचित्रयोरपि च
गौरर्यमाबुध्न्यर्क्षयोर्योनिः पादगयोः परस्परमहावैरं भयोन्याम्भवेत् अश्विनी शततारकयोर्हयो अश्वः योनिरुक्तः राम २३

स्वातीहस्तयोः कासरो महिषः लुलायो महिषो वाहद्विषत्कासारसैरिभा इत्यमरः वह्लजपाद्ययोः धनिष्ठापूर्वभाद्रपदयोः
सिंहः याम्यांतयोर्भरणीरेवत्योः ऊंजो हस्ती पुष्यकृत्तिकयोर्मेषोऽजः कर्णावुनोः श्रवणपूर्वाषाढयोः वानरः स्यात् उत्तराषा
ढाभिजितोर्नकुलः चांद्रमृगः आर्द्रयोनिर्ब्रह्मा तद्रोहिणी तयोरहिः सर्पो योनिः ज्येष्ठानुराधयोः कुरंगो हरिण उदितः
मूलार्द्रयोः श्वा कुक्कुरः तथा पुनर्वस्वश्लेषयोर्मार्जारः अथ मघापूर्वफाल्गुन्योः उंदुरुः मूषकः उंदुरुर्मूषकोऽप्याखुरि
त्यमरः द्वीशाविशाखाचित्रा च तयोः व्याघ्रः आर्यमोत्तराफल्गुनी बुध्न्यो हि उत्तराभाद्रपदा तयोर्योनिस्तथैव च अपि चेत्यादयः
शास्त्राः पादपूरणार्थाः फलमाह पादगयोरिति एकस्मिन्पादे चरणे उक्तनक्षत्रयोन्योः परस्परमहावैरं भवेत् अन्यथा
नेत्यर्थः यथा अश्विन्यनुराधयोर्हययोर्निगदितः स्वात्यर्कयोः कासर इति पादस्तत्रोक्तयोर्भयोर्भयोन्योरश्वमहिषयोर्महावै
रं भवेत् एवं सिंहहस्तिनोरित्यादिष्वपि द्रष्टव्यं वसिष्ठः अश्वेभमेषभुजगाह्वयकुक्कुरौतु मेषोन्दुमूषकमथौंडुरुगोलुलायाः
शार्दूलमाहिषगवारिमृगाह्वयश्वा कीशोऽथबभ्रुमृगकीशगजाश्वसिंहाः गोकुंजरावितियथाक्रममाश्विनादिभानां भू
वंतिखलु कल्पितयोनिरूपाः लुलायो महिषः गवारिर्व्याघ्रः अवडूसेफाटायनस्यति गोरवऊदेशः कीशो वानरः बभ्रुर्न
कुलः बभ्रुरगं श्वैण सिंभेंद्रमोत्वाखुसंज्ञं त्वजपानरं च गोव्याघ्रमश्वान्नम माहिषं च वैरं नृनार्योर्नृपपश्चत्ययोश्चेति बभ्रूरगमि
त्यादौ येषां च विरोधः शास्त्रांतिक इत्येकवद्भावः एतत्फलं सापवादमाह त्रिभिः एकयोनिषु संपत्तिर्दंपत्योः संगमः सदा मि
त्रयोनिमध्या स्यादरिभावो न चेत्तयोः योनेरभावे नोद्वाहः सत्कार्यो वियोगदः राशिवश्यं च यद्यस्ति कार्यं येन न तद्दोषभाक्
दोषो वियोगरूपः अत्र गुणविभागो दैवज्ञमनोहरे अष्टाविंशति ताराणां योनयस्तु चतुर्दश तत्र ज्ञेयं महद्वैरं वैरं चैरं चैव वल्ल
भावितं स्वभावितं वैरं मैत्रमुत्तमं मैत्रं चैवातिमैत्रं च विवाहे नरयोषितोः महद्वैरे वैरे च स्वभावे च यथाक्रमं मैत्रे चैवातिमैत्रे
च खंडद्वित्रिचतुर्गुणं इति अथ क्रमशाप्ताप्तमाह मैत्रीं शार्दूलविक्रीडितेनाह मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वै
रिणौ सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषन् शेषाश्चास्य समाः कुजस्य सुहृदः चंद्रेज्यसूर्या बुधः शत्रुः शुक्र
शनी समौ च शशिभृत्सूनोः सिताहस्करौ मित्रे चास्य रिपुः शशी गुरुशनी क्ष्माजः समा गीष्पतेर्मित्राण्यर्ककुजेंदवो बुधसितौ

मु.टी. शत्रू समः सूर्यजः मित्रे सौम्यशनी कवेः शशिरवी शत्रू ऊजेज्यौ समौ मित्रे शुक्रबुधौ शनेः शशिरविकुजाः शत्रवः गुरुः समः गुरुमतेन स्व
वि.प्र. र्यस्य भौमगुरुचंद्रा मित्राणि शुक्रशनी वैरिणौ अस्य सूर्यस्य सौम्यो बुधः समः शत्रुः न मित्रमेवं सर्वत्र व्याख्येयं अथ विधो
२७ र्बुधरवी मित्रे च पुनरस्य विधोर्द्विषन् शत्रुर्नास्ति किंतु मंगलगुरुशुक्रशनयः शेषाः समा एव अथ भौमस्य चंद्रगुरुसूर्याः सु
हृदः बुधस्तु शत्रुः शुक्रशनैश्चरौ समौ अथ शशभृत्सूनोर्बुधस्य सितार्कौ शुक्रसूर्यौ मित्रे अस्य बुधस्य शशी चंद्रः
शत्रुः गुरुशनिभौमाः समाः अथ गीष्पतेर्गुरोः सूर्यभौमचंद्रा मित्राणि बुधसितौ शत्रू सूर्यजः शनिः समः अथ कवेः शु
क्रस्य बुधशनी मित्रे चंद्रसूर्यौ शत्रू कुजगुरू समौ अथ शनेः शुक्रबुधौ मित्रे रविचंद्रभौमाः परे शत्रवइत्यर्थः अन्यावशि
ष्टः गुरुस्पतिः समः यदा कश्यपः रवेः समो ज्ञो मित्राणि चंद्रारीज्याः परावरी इंद्रेन शत्रवो मित्रे रविज्ञावितरे समाः समौ कुज
स्य शुक्रार्कौ बुधोरिः सुहृदः परे ज्ञस्य चंद्रो रिपु मित्रे शुक्रार्कौ इतरे समाः गुरोरारेंदुना मित्राण्यार्कि मध्यः परावरी भृगोः स
मौ ऽज्यकुजौ मित्रे ज्ञार्कीपरौ रिपू शनेर्गुरुः समो मित्रे शुक्रज्ञौ शत्रवः परे इति एतत्फलं सापवादमाह ज्ञानमोहने वसिष्ठः
अन्योन्यमित्रं शस्तं स्यात्सममित्रं तु मध्यमं उदासीनेन कनिष्ठं स्यादतिद्वेषात् शत्रवः स्मृतं शत्रु मित्रं च विज्ञेयं दंपत्योः कलहप्रदं
अन्योन्यसमशत्रुत्वं दंपत्योर्विरहप्रदं विरहो वियोगः अस्यापवादस्तत्रैव राशिनाथे विरुद्धेपि मित्रत्वेंशाशनाथयोः विवा
हं कारयेद्धीमान् दंपत्योः सौख्यवर्धनमिति अत्र गुणविभागो दे वज्ञमनोहरे ग्रहमैत्रं सप्तविधं गुणाः पंचप्रकीर्तिताः तत्रैकाधि
पतित्वे च मित्रत्वे गुणपंचकं चत्वारः सममित्रत्वे द्वयोः साम्येत्रयो गुणाः मित्रवैरे गुणश्चैकः समवैरे गुणार्धकं परस्परं खेटवैरेगु
णशून्यं विनिर्दिशेत् असद्भे सममित्रादौ वैकाद्याद्यायथोदिताः चैकाद्यथोदिताः चत्वार इत्यर्थः अत्र शुक्रार्क ज्ञौ शुक्ररवी इ
त्यादिष्वज्ञाद्यंतमिति द्वंद्वे ... त्यर्करविशशाङ्कयोः पूर्वनिपातः पूर्वनिपातप्रकरणस्यानित्यत्वान्न भवति एवमपि रेवतादंद्वे चेत्यान
ङ् प्राप्नोति सत्यं एकद्वविभक्तेन प्रसिद्धसाहचर्ययोरेव द्वंद्वे आनङ् विधीयते अत्र तु तदभावान्नानङ् परे इति परं हृत्यन्यगुणत्वे
षु परो रिपरमात्मनो रितियादवोक्तेः परशब्दो नानार्थः तत्र परशब्दस्य परावरेत्यादिना व्यवस्थार्थवाचित्वे त्वेज्जसि वैकल्पिक सर्व राम
संज्ञात्वेः व्यवस्थानाम स्वाभिधेयापेक्षावधिनियमः स्वाभिधेयं च दिग्देशकालाः अत्र तु शत्रुवाचके परशब्दे व्यवस्थार्थाभा २९

वा वैकल्पिकी सर्वनामसंज्ञा न प्राप्नोति ततश्च जसः शीतिसर्वनामकार्याभावो तोनुपपन्नः परे इति प्रयोगः यथैवं विनेतुरिंगा
लमिव यशाः परे इति नैषधः तथा परेषां युधि चेति पार्थिव इति कालिदासः इत्यादिषु हि शत्रुवाचकस्य परशब्दस्य तथा प्रयुक्त प्र
कारेण सर्वनामसंज्ञाया अप्रवृत्तेः कथं सर्वनामप्रसंग उच्यते गुणरत्नमहोदधिकारादयस्तु चिंत्य एवैष प्रयोग इत्याहुः अन्ये त्वे
वमाहुः परे इति शिष्टप्रयोगदर्शनात्परशब्दस्य नानार्थत्वादेवं विधविषये व्यवस्थावाचीपरशब्दः कथं स्वस्मात्परः परदेशा
वस्थित इति देशवाचित्वात् तच्च परदेशावस्थितत्वं यद्यपि पुत्रमारभ्य शत्रुपर्यंतं साधारणं तथापि विनेतुरिंगालमिवा
यशाः परे इत्यादिषु युद्धप्रस्तावाच्छत्रुरूपपरशब्दस्य वृत्तिरेव मत्रापि पद्ये मित्रसमानार्थकेनाभिधानात्परशब्दस्य शत्रुवृत्ते
निरिति निग्रंथकृदाशयः अथवा यत्नमेवं पठितव्यं रविशशिक्ष्माजा द्विषोन्यः समम् इत्यलमतिप्रसंगेनेति अथ गणकूटं वसंत
तिलकयामालिनीभ्यामाह रक्षोनरामरगणाः क्रमतो मघाहिवस्विंद्रमूलवरुणानलतक्षराधाः पूर्वोत्तरात्रयविधातृयमे
शभानि मैत्रादितींदुहरिपौष्णमरुल्लघूनि निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा अ
सुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकांततोत्र क्रमतः रक्षोनरामरगणाः वाक्यद्वयेनोच्यते मघा प्रसि
द्धा अहिरश्लेषा वसवो धनिष्ठा इंद्रो ज्येष्ठा मूलं प्रसिद्धं वरुणः शततारकाः अनलः कृत्तिका तक्षा चित्रा राधा विशाखा एता
नि भानि रक्षोगणः पूर्वोत्तरात्रयमुत्तरात्रयं चेत्येवं षड्भानि विधाता रोहिणी यमो भरणी ईशा आर्द्रा एतानि भानि नरगणो मनुष्यग
णः मैत्रमनुराधा अदितिः पुनर्वसुः इंदुर्मृगः हरिः श्रवणः पौष्णं रेवती मारुतः स्वाती लघूनि अश्विनीपुष्यहस्ताः एतानि भा
नि अमरगणो देवगण इति यदाह नारदः रक्षोगणः पितृत्वाष्ट्रद्विदैवत्येंद्रतारकाः इति मर्त्यगणस्त्रयः स्यादमर्त्यगणः परः हर्या
दित्यार्कवाय्वंत्यमित्राश्वीज्येंदुतारका इति निजनिजगणमध्य इति स्वस्वगणविद्यमानस्त्रीपुरुषनक्षत्रयोः सतोरत्युत्कृष्टोत्तमा
प्रीतिः स्यात् यथा राक्षसगणयोः स्त्रीपुंसयोः तथा मनुष्यगणयोः स्त्रीपुंसयोः परस्परमत्युत्कृष्टा प्रीतिः स्यादित्यर्थः अमरा
देवा मनुजा मनुष्याः देवमनुष्यगणयोः स्त्रीपुंसयोः परस्परं प्रीतिर्मध्यमा नोत्कृष्टा नाधमा प्रीतिः संप्रदिष्टा असुरमनुजयो
राक्षसमनुष्यगणयोः स्त्रीपुंसयोर्मृत्युरेव प्रदिष्ट उक्तः द्वयोर्वान्यतरस्य वेत्याकांक्षायां प्रबलेन दुर्बलं बाध्यत इति न्यायेन मनु

मु.टी.
वि.प्र.
२५

ष्यगणस्यैव नाशः दनुजविबुधयोः राक्षसदेवगणयोः स्त्रीपुंसयोरेकांततो निश्चयेन परस्परं वैरं स्यात् अत्र गणकूटे नारदः॥
दंपत्योर्जन्मभे चैकगणे प्रीतिरनेकधा मध्यमा देवमर्त्यानां मृत्युर्मानुषरक्षसोः कश्यपस्त्वेवमाह स्वगणे चोत्तमा प्रीतिर्मध्य
मा देवमर्त्ययोः मर्त्यराक्षसयोर्वैरं समसासुरयोरपीति अयमर्थः पुरुषो रक्षोगणः स्त्री मनुष्यगणा तदा वैरं यदि वैपरीत्यं तदा
मृत्युः तथा पुरुषो रक्षोगणः स्त्री देवगणा अपि वैरं वैपरीत्ये मृत्युः उक्तं च राक्षसो यदि वा नारी नरो भवति मानुषः मृत्युस्त
त्र न संदेहो विपरीतः शुभावहः प्राङ्गीये रक्षोगणः पुमांश्चेत्स्यात्कन्या भवति मानवी केपीच्छंति तदोद्वाहं व्यस्तं कोपीह नेच्छतीति
एतत्तुल्यन्यायत्वाद्देवराक्षसयोरपि द्रष्टव्यं अत्र गुणविभागो देव ज्ञमनोहरे षड्गुणाः पणमादृष्टपंचस्युः सुरमानुषे नार्या देवो न
रः पुंसः चत्वारो वा गुणास्त्रयः देवराक्षसयोः शून्यं तथैव नररक्षसोः पुंसो रक्षोगणो यत्र नार्या देवो यथा वा नरः गुणौ द्वौ क्रमतः चै
को गुणो ग्राह्यो न्यथा न हीति अस्यापवादमाह गर्गः ग्रहमैत्री च राशिश्च विद्यते नियतं यदि नगणाभावजनितं दूषणं स्या
द्विरोधदं अत्रिरपि राशीशयोः सुहृद्भावे मित्रत्वे वांशनाथयोः गणादिदोषेप्युद्वाहः पुत्रपौत्रप्रवर्धनः अमुं परिहारं ग्रंथ
कृदप्यग्रे वक्ष्यति मनुरपि ग्रहमैत्री च रज्जुश्च यदि नाडीपृथक्तयोः विवाहः शुभदः कन्या राक्षसी वा नरो नर इति स्त्रुकूटं तु
ग्रंथकर्त्रोक्तं षष्ठराशिकूटमनुष्टुभाह मृत्युः षडष्टके ज्ञेयोपत्यहानिर्नवात्मनोः द्विद्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्य
कृत् स्त्रीपुंसराश्योः परस्परं षष्ठाष्टमराशित्वे सति मृत्युर्ज्ञेयः यथा मेषकन्ययोः एवं नवात्मजे नवमपंचमे पत्यानां बा
लकानां हानिर्नाशः स्यात् यथा सिंहधनुषोः एवं द्विर्द्वादशे सति निर्द्धनं दारिद्र्यं स्यात् यथा मेषवृषयोः अन्यत्र तृतीयै
कादशे च तुर्यदशमे समसप्तमे वा सति सौख्यकृत् न्यापीडनं स्यात् यदाह नारदः षडष्टके मृतिर्निःस्वं पंचमे नवमे त्वनप
त्यता नैःस्वं द्विर्द्वादशे त्वेषु दंपत्योः प्रीतिरुत्तमेति अत्र विशेषो ज्योतिःप्रकाशे पुंसोऽष्टमात्सुतगृहे सुतहा च कन्या धर्मस्थि
ता सुतवती पतिवल्लभा च द्विर्द्वादशे धनगृहे धनहा च कन्या व्यये स्थिता धनवती पतिवल्लभा चेति अन्यच्च मृगः कुली
रेण घटेन सिंहो वैरप्रदः स्यात्समसप्तकोयं तुलामृगेणाथ वृषेण सिंहो मेषेन कीटो मिथुनेन मीनः चापेन कन्या[illegible] राम.
घटभेन चालिर्हरिर्भिर्गृपदैन्यदः स्यात्तुर्यकेस्मिन्निति अथ स्याद्दुष्टकूटस्य परिहारं शार्दूलविक्रीडितेनाह प्रोक्तो दुष्टकूटकेप २५

न।

रिणय स्यैकाधिपत्ये शुभोथो राशीश्वरसौहृदे पि गदितो नाडी दोषस्तु हिर्यदि अन्यदंशपयोर्बलित्वमखिले नाडी दोषस्तु हीनस्तथा
ताराशुद्धिवशोथ राशिवशताभावे निरुक्तो बुधैः प्रोक्तेडुष्टराशिकूटे सत्यपि चेद्दूयोः स्त्रीपुरुषराश्योरेकाधिपत्ये एकस्य वा मित्रत्वे परि
णयो विवाहः शुभो गदितो यथा षडाष्टके मेषवृश्चिकयोः तुलावृषयोर्वा नवमपंचमे त्वेकाधिपत्याभावः द्विर्द्वादशे मकरकुंभ
योः अथवा राशीश्वरयोः राशिस्वामिनोः सौहृदे मैत्रे पि परिणयः शुभो गदितः यथा षडाष्टके मीनसिंहयोरित्यादौ नवमपं
चमे मेषधनुषोरित्यादौ द्विर्द्वादशे मीनमेषयोरित्यादौ

मे	वृ	मि	क	सिं	कं	तु	वृ	ध	मं	कुं	मी	
मी	मे	वृ	मि	क	सिं	कं	तु	वृ	धं	मं	कुं	द्विर्द्वा
सिं	कं	तु	वृ	ध	म	कुं	मी	मे	वृ	मि	क	नवपंच
कं	तु	वृ	धं	मं	कुं	मी	मे	वृ	मि	क	सिं	षडष्ट
क	सिं	कं	तु	वृ	धं	मं	कुं	मी	मे	वृ	मि	[illegible]
मि	क	सिं	कं	तु	वृ	धं	मं	कुं	मी	मे	वृ	[illegible]

यदाह वसिष्ठः द्विर्द्वादशे वा नव पंचमे वा षडाष्टके रा
शि स्वयोषितो वा एकाधिपत्ये भवनेश मैत्रे शुभाय पा
णिग्रहणं विधेयमिति राजमार्तंडः भवेत्रिकोणे च
चतुर्विन्ना द्विर्द्वादशे चार्थ सुपैति कन्या षडाष्टके सौख्य
फलं विधत्ते स्त्रीणां विवाहो ग्रहमैत्रभावे इति एकाधिप
वि = त्येपि शोभा ध्येयः अत एव ग्रहमैत्रेकाधिपत्याभावे वैर षडाष्टकमित्यादि वदंति वराहनारदः वैर षडाष्टकं मेषकन्ययोर्घटमीन
योः चापोक्षयोर्नृयुक्कीटभयोः कुंभकुलीरयोः पंचास्यमृगयोर्जन्मराशेः शोकोशुभप्रद इति उक्षो वृषः चापोक्षयोरित्यका
रांतनिर्देशः क्वांदसः एतद्भिन्नं मित्रषडाष्टकमित्याहुः तदुक्तं नारदेन मित्रषडाष्टकं चैव मेषयोर्वृषजूकयोः कर्किचापभ
योर्मीनसिंहयोर्मृगयुग्मयोः कन्यकाकुंभयोरन्यत्प्रयत्नादिह वर्जयेदिति एवं च ग्रहमैत्र्यभावे वैरं नवमपंचममित्याहुः तथा
च शार्ङ्गधरीये शुक्रः मीनालिभं यायुते कीटे कुंभे मिथुनसंयुते मकरे कन्यकायुक्ते नक्रयोर्नवपंचममिति कीटः कर्कः एतादृशस्य
नवपंचमस्य फलं नरसुतं केचित् न याचयंति तिनिवंधे शार्ङ्गधरः वरवधोर्मातृपित्रोर्जीवतोस्तद्विनाशकृत् त्रिकोणे मीनकी
टाद्यं न स्यादन्यत्रदोषदमिति एतच्च फलमनार्षत्वादुपेक्ष्य इतोन्यच्च मेषसिंहादिकं नवमपंचमे ग्रहमैत्रीसत्वात् मित्रनवपंचम
मिति ननु मीनकर्कादिकमपि त्रिकोणे ग्रहमैत्रीसत्वात् मित्रनवपंचममिव कथं गुरोश्चंद्रो मित्रमेव चंद्रस्य तु गुरुः समोपि मित्र
मिव अल्पदोषनैव विगुणे स्वगुण इति न्यायात् तथा सति त्रिकोणदोषो क्के दापत्तिः स्यादिति चेन्न उच्यते यत्रह्येकस्य मित्रत्वमपरस्य

मु॰ दी॰ वि॰ प्र॰ २६

सप्तत्वं तत्र द्विर्द्वादश नवपंचममिति व्यवहारः तादृशं मीनकर्कादिकं त्रिकोणचतुष्टयमेव संभवति यत्तत्भयतोपि ग्रहमैत्री तत्रैव मेषसिंहा
दिके मित्रनवपंचममिति व्यवहृतिः अयं च परिहारो वरवध्वोर्मातृपित्रोरित्यस्यापि दोषांतरस्य सत्यमसत्यं सतिवा सत्फलत्वे नाप्रकाश
वति तुल्यन्यायत्वात् मृतमातापितृकयोस्तु वरवध्वोर्नायं दोषोन्येषः एवं द्विर्द्वादशेपि तथा ज्ञग ज्योहने कश्यपव सिंहे द्विर्द्वा
दशे शुभं प्रोक्तं मीनादौ युग्मराशिषु मेषादौ युग्मराशौ तु निर्धनत्वं न संशयः आयुष्यसंपत्सुतभोगसंपत्पुत्रार्थसंपत्यतिसौख्य
संपत् सौभाग्यसंपद्धनधान्यसंपत् झषादियुग्मे क्रमतः फलानि अजादियुग्मे क्रमतः फलानि वैधव्यदुष्टत्वुर्वधनानि वियोगसंता
पमतीव दुःखं वसिष्ठगर्गप्रमुखैः स्मृतानीति अथैवं विधेपि प्रीतिषडष्टादिकादिविषये नाडीदोषः सर्वथा त्याज्य एवेत्याह नाड्यंशेषु
द्वियदीति ज्येष्ठार्यमेशनीराधिपभयुगमित्यादिना वक्ष्यमाणेन त्रिविधनाडीनक्षत्राणां मध्ये स्त्रीपुरुषनक्षत्रस्थितिरेकस्यां
कस्यामपि नाड्यां यदि न भवति तदा प्रीतिषडष्टकादि विधेयं यद्येकस्यां नाड्यां स्त्रीपुरुषनक्षत्रस्थितिः तदा तु नैव विवाहः उक्तं
च रत्नमालायां भवनपतिसुहृत्त्वं स्यात्तथैकाधिपत्यं यदि भवति वशित्वं चैव षडष्टकेपि शुभकृदिह विवाहोन्योन्यताराविशुद्धौ
यदि खलु फणिचक्रे स्यात्तु नाडीसमाज इति अपिशब्दात् पंचमद्विर्द्वादशयोरपि
अत्र कश्चित् षडष्टकस्यैव मरणाद्यनिष्टफलश्रवणात्तस्यापवादकः षडष्ट
कप्रीतिपरिहारः किंतु निंदाप्रतिपादयोरपि शास्त्रं तस्य वाक्यस्याधिपतिमै
त्र्यादिगुणप्रसंगद्वारा नवमपंचमद्विर्द्वादशयोरेव दुष्टकूटयोर्विधानपर्यवसा

अ आ पु उ ह ज्ये मू श पू
भ मृ पु पू चि अ पू ध उ
कृ रो अ मे स्वा वि उ श्र रे

नात् तयोरेवापवादक इति यथा ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनमिति अत्र वाक्ये धनस्तु धनवन्नरपूज्यापरानतथ्य
नवन्नरपूज्यापरान तु धनवद्ब्रह्मघ्नपूज्यापरापीति मेवं वोचः द्विर्द्वादशे वा नवपंचमे वा षडष्टके दुष्टादि वसिष्ठवाक्यानि
दुष्टभकूटापवादपराणि अधिपतिमैत्र्यादि विशिष्टं षडष्टकादि विदधते षडष्टके मृत्युः मृत्युरित्यादिनिंदार्थवादवाक्यानि
तु ग्रहवैरयुक्तषडष्टकादिविषयाणि अन्यथा दुष्टफलषडष्टकनिराकरणस्य नवमपंचमद्विर्द्वादशयोरपि तुल्यत्वेनापवाका
नांविषयालाभात् दृष्टांते तु ब्रह्महप्रायश्चित्तविधानस्य वैयर्थ्यापातात् न तु निर्द्धनवत्प्रशंसापरैवेति युक्तमुत्पश्यामः अथ
नाडीसमाजपदस्यार्थः अश्विन्यादित्रिकगणनया त्रिविधानां नाडीनक्षत्राणां वेधो नाडीसमाजः यदाह श्रीपतिः नाड्यस्तिस्रो राम २६

न्यस्तानिःशेषधिष्ण्यास्त्रिभ्यः चाश्व्यादिभ्य एव प्रसूतः सर्पाकारस्तत्रनाडीसमाजो नक्षत्राणामेकनाडीस्थपुंसां स्यादिति एवं
चयत्र भकूटादयः सप्तभेदाः शुभा भवंति तत्र नाडीदोषश्चेत्तदा विवाहो न विधेयः उक्तं च सप्तर्षिमते विवाहपटले सदा नाशयत्ये
कनाडीसमाजो भकूटादिकान्सप्तभेदाञ्शुभानिति अत्र केचिन्नाडीसमाजशब्दो यादानान्त्यमाजशब्दस्य समुदायवाचि
त्वात् त्रिचतुष्पंचपर्वनाडीत्रयसमुदाये स्त्रीपुरुषनक्षत्रयोरेकनाड्यां पातस्तदा समस्तवश्यादिगुणसत्त्वेऽपि विवाहो नैव भ
वेत् यदा त्रिचतुष्पंचपर्वनाडीष्वेकैकनाडी स्त्रीपुरुषयोः स्यात्तदा भवत्येव विवाहः अत एव भकूटादिकान्सप्तभेदांश्च ने
ताइति विपरीतं वचनमनुकूलं अस्यायमाशयः नेइति बहुत्वात्सप्तभकूटादयः शुभास्तामित्येकवचनानुरोधात् एका
मेव नाडीं परिहरेयुर्नाडीसमाजमित्याहुः तच्चिंत्यं यतश्चतस्त्रिंशद्द्विभोत्थायाइति वाक्याच्चतुश्चरणेन नक्षत्रोत्पन्नायाः
त्रिपर्वं च त्रिचरणेन त्वन्नक्षत्रोत्पन्नायाः कन्यायाः चतुःपर्वं द्विचरणेन नक्षत्रोत्पन्नायाः पंचपर्वनाडीगणनेति नियमाद्यु
गपन्नाडीत्रयविचारासंभव एव किंच रत्नमालादिवाक्येषु पार्थक्येन नाडीत्रयानभिधानं तत्रत्यसमाजपदं नाडीसं
स्थनक्षत्रसमुदायपरं तथाहि अश्व्यादिभ्यस्त्रिभ्य एव नक्षत्रेभ्यः प्रसूतानि अस्तनिःशेषधिष्ण्याः सर्पाकारास्तिस्रो
नाड्यः स्युस्तत्रैकनाडीस्थपुंनक्षत्राणां समाजो नाडीस्यादिति ननु यस्मादनर्थकलहागमस्तयोः स्युः पाणिग्रहाद
नु तयोः खलु नाडियोगे तस्माच्च तत्त्रियमलं त्रिषु भेषु नूनं नाडीसमाज इति चिंत्यमनुक्रमेण निहड्डगर्गवचनान्नाडी
समाज एव स्थिते दोषः नैकस्यां नाड्यामितिचेदुच्यते स्वयमेव चतुस्त्रियमलं त्रिषु भेष्विति परिगणितविषयत्वेनाभि
धानात्समाजपदं नाडीसंस्थनक्षत्रसमुदायविषयकमिति किंच पंचपर्वचतुःपर्वनाड्योर्देशविशेषविषयत्वेनाभि
धानात् त्रिनाड्यास्तु सर्वदेशविषयत्वादेतस्याएव निषेधो युक्तः तानि च देशविशेषवाक्यानि अग्रेभिधास्यंते अतो भ
कूटादिकान्सप्तभेदांश्च नेतामित्यत्र पाठे प्रशस्तानितिपदं त्यमियुक्ताः शार्ङ्गधरदेवपातिर्निबंधकारादयस्तस्मान्नाडी
समाजपदस्य प्राग्वदेव व्याख्यानं ज्यायः ननु यत्र नाडीनक्षत्रशुद्धिरस्ति यथा भरणीहस्तयोः षडष्टकं च वर्तते यद्गृहमैत्र्य
पि नास्ति तत्र किं कार्यमत आह अन्यर्क्षेंशपयोरिति अन्यर्क्षे प्रीति षडष्टकादिभ्यो न्यराशीशाकार्यः राशिस्वामिनोः परस्प

मु·टी·
वि·प्र·
२७

रंशात्रुत्वे सममशत्रुत्वे समत्वे वा षष्ठाष्टकादौ च सति अंशपयोस्तन्नवांशस्वामिनोर्बलित्वसखित्वे स्यातां बलित्वं च सखि
ता च प्रमाद्विवचनांतं पदं बलित्वं सबलित्वं उच्चादिस्थितत्वेन सखिता परस्परं मैत्री ते उभे चेद्भवतः सखितायाः उपलक्षणत्वा
देकाधिपत्यमपि तदा विवाहः शुभो निरुक्तः उक्तं च जगन्मोहने वसिष्ठः राशिनाथे विरुद्धेपि सबलांवंशकाधियौ तन्मैत्रेपि च
कर्तव्यं दंपत्योः सुखमिच्छतेति नन्वयं परिहारो राशिनाथे विरुद्धेपीत्यनुवादात्केवलग्रहदोषस्यापवादको न तु दुष्टभकूटग्रस्त
ग्रहवैरस्य उच्यते खेटारित्वं नाशयेत्सद्भकूटमित्यग्रे ग्रंथकृद्वक्ष्यति तत्र न भोगारिभावं हरेत्सद्भकूटमिति सप्तर्षिमत वि
वाहपटलीयवाक्यसंमतित्वेनास्माभिरध्यास्यते तदेव केवलग्रहवैरापवादकमस्ति न त्विदमपि नन्वनयोर्वाक्ययोर्यथा
श्रुतशब्दस्वरसेनार्थो ज्ञातस्तत्एकस्मिन्नेव ग्रहदोषस्यापेर्थे परिहारद्वयं दृश्यते यथैकस्मिन्नेव दुष्टभकूटे भवनपतिसु
हृत्त्वं इत्यादिनानेकपरिहाराभिधानमित्यतो वचनेन किंचिन्नादृशं विशेषं पश्यामः सत्यं न भोगारिभावं हरेत्सद्भकूटमिति
तु निःसंदेहं ग्रहवैरस्यापवादकं परं तु राशिनाथे विरुद्धेपि मित्रत्वे चांशनाथयोः विवाहं कारयेद्धीमान्दंपत्योः सौख्यवर्धनमि
ति जगन्मोहनस्थवसिष्ठवाक्यं प्रागुक्तं वसिष्ठवचः समानार्थकं सदुष्टभकूटग्रस्तग्रहवैरापवादकं तथा हि न्यूनार्थकए
कस्मिन्वाक्ये राशिनाथयोः परस्परविरोधे सति तन्नवांशस्वामिनोः परस्परमैत्री चेच्छुभो विवाह इत्यर्थः अत्रांशना
थयोः सबलत्वविचारो नास्ति यत्र त्वंशनाथयोरुच्चादिस्थितत्वेन सबलत्वं परस्परमैत्री चेति द्वयमस्ति तद्दुष्टभकूटग्रस्त
ग्रहवैरापवादकमित्यधिकार्थवचनस्यार्थः नन्वनयोर्वाक्ययोः सामान्यविशेषाभावान्न्यूनार्थकवाक्यार्थोनुवादेनाप
रवाक्यस्य सबलत्वविधानपुरस्सरैकवाक्यत्वादुपसंहारन्यायेन विशेष एव पर्यवसानं कस्मान्न भवति यथा पुरोडाशं चतु
र्धा करोत्याग्नेयं चतुर्धा करोतीति इति वाक्यद्वये अत्र हि सामान्यतो यत्किंचिद्देवताकस्य पुरोडाशस्य चतुर्धाकरणं प्राप्त
अग्निर्देवताक एव पुरोडाशे चतुर्धीकरणं पर्यवस्यतीति चेत् उच्यते वेदे हि कर्तुरस्मरणान्नादृशवैदिकवाक्येषु तथाभिन्नभि
न्नकर्तृकेषु स्मृतिवाक्येष्वेवं विधा गतिरुचिता न त्वेककर्तृकेषु स्मृतिवाक्येषु अन्यतरवाक्यानर्थक्यापत्तेः तत्र किमनर्थक राम·
मित्याकांक्षायामधिकार्थकेन न्यूनार्थकमित्यतोत्रानयोर्वाक्ययोरेककर्तृकयोरेकप्रकरणपठितयोः चावश्यं भिन्नार्थ २७

कत्वं वाच्यं तत्र कस्य कोर्थ इति संदेहे त्रूनार्थकं केवलं ग्रहवैरापवादकमेव ननु पिशब्दस्यानुक्तसमुच्चयार्थत्वादिष्टवि
षयो लभ्यत इति चेन्न तदर्थकवचनांतरस्यास्पष्टस्याभावेपि शब्दस्य समुच्चयपरताया दुर्लभत्वात् एवंच धनभोगादिभा
वंहरेत्सङ्कटमित्यपिवाक्यं ग्रहवैरापवादकं तस्यबलत्वात् व्रीहियववत् अंशनाथस्य बलत्वाभिधायकं तद्राशिना
थविरुद्धपीत्येतद्वाक्यमुभयविधविरोधपरिहारार्थकं तथाहि राशीच नाथौ चेत्येषां समाहारो राशिनाथं तस्मिन् राशि
नाथ इत्येवं समाहारद्वंद्व आश्रीयते तथासत्ययमर्थः राशी विरुद्धौ षडष्टकादिना नाथौ विरुद्धौ कयोर्नाथयोरित्याकां
क्षायां ययोः षडष्टकादिविचारस्तयोरेव संनिहितत्वाद्ग्रहणमिति तयोराश्योर्नाथौ विरुद्धौ मित्राणि युग्मेणेरित्यादि
नापरस्परं शत्रूस्यातां तद्राशिनवांशस्वामिनोः सबलत्वे मित्रत्वे च समुचिते सति विवाहः शुभदः ननु तिङ्क्षेष्ट समाहारद्वं
द्वे किंप्रमाणमुच्यते अंशनाथस्य बलत्वस्याधिककरणमेव तच्च युगपदुत्पन्नस्य दोषद्वैविध्यस्य राशिविरोध ग्रहविरोध
रूपस्य परिहारकमित्यवगम्यते अतएव ज्योतिःशास्त्राभियुक्ताः एवं विधे उभयविरोधे एवं विधं समाधिमाश्रित्य विवाहं
कारयंतीत्यास्तां प्रसक्तानुप्रसक्तं अस्मिन्नपि पद्ये नाडीशुद्धिरपेक्षितैवेत्याह नाड्यृक्षशुद्धौ तथेति प्रागुक्तप्रकारेण ना
डीनक्षत्रेषु स्त्रीपुरुषनक्षत्रयोरेकस्यां नाड्यामवस्थित्यभावः चेत्तदा विवाहः शुभः यथा भरणीहस्तयोः सत्यप्युभयविरो
धे राशिनवांशयोः क्रमेण पंचमचतुर्थयोर्यौ स्वामिनौ सूर्यभौमौ तयोर्मैत्र्यपि अस्ति स्वनवांशस्थत्वात् सबलत्वमपि तत्र वि
वाहः शुभफलदो निगदितः यत्तात्र स्त्रीपुंसनक्षत्रयोरेकनाड्यवस्थित्यभावः यदा त्वश्विनीहस्ताख्ये द्वयोर्नक्षत्रे स्यातां
तदा नाडीनक्षत्रशुद्ध्यभावात्सकलगुणवत्त्वेपि विवाहो न भवति किंपुनरेवं विधे विषये इति सदानाडी यत्रैकनाडीसमा
ज्ञो भकूटादिकान्सन्न भेदानुशास्त्रानित्युक्तेः अथैतत्परिहारासंभवे परिहारांतरमाह ताराशुद्धिवशादिति अत्रान्यदनु
वर्तते प्राग्वदेव व्याख्येयमिति एवं विधे विषये षडष्टकादौ च सति यदि स्त्रीपुंसनक्षत्रयोः परस्परं ताराशुद्धिवशकन्यादी
दूरसंख्यावदित्यादिना ताराशुद्धिरूपे वशेव पूर्णत्वे द्वितीयचतुर्थषष्ठाष्टमनवमारसंज्ञके सति बुधैर्विवाहः शुभो निगदितः
अत्रोदाहरणान्यनेकानि बुधैर्ध्येयानि अत्रसंमतिरन्यान्यताराविशुद्धौ इत्युक्ता राज मार्तंडेनाप्ययमर्थः स्पष्टमभिहितः
तारामित्रसु ८ मित्र ९ जन्म २ शुभदा च क्षेमा संपत्करी षष्ठाष्टनवपंचमेप्ययशनेयोगेषु पुंयोषितोः प्रीत्यायुःसुतवृद्धि

वितज्जनकः कार्यो विवाहस्तदेति चकारात्षष्ठीच जन्मतारा यद्युत्पत्तितारा तदा राशिभेदाच्चरणभेदे वा शुभा प्रेष्या दशमैको
मु.दी. नविंशतितारे शुभे एव [illegible] अत्रापि पक्षे नाडीशुद्धिरपेक्षितैव नाडीशुद्ध्यभावे विवाहो नैव भवेत् उक्तं
वि.प्र. वात्र संमतिः अथैतस्यापि परिहारस्यासंभवे परिहारांतरमाह अथ राशिवश्यताभावे इति अत्रापि द्वयोः स्त्रीपुंसयोः राशि
२८ नाथाविरोधादिके विषये षडष्टकादौ च सति हित्वा मृगेंद्रं नरराशिवश्या इत्यादिनोक्तपुरुषराशेः स्त्रीराशिवश्यताया भावे
सत्वे सति विवाहः शुभो निगदितः यदि भवनवशित्वमिति श्रीपत्युक्तेः अस्मिन्नपि पक्षे नाडीशुद्धिरपेक्षितैवोक्तादेव हेतोः
तदयमत्र निष्कृष्टोऽर्थः षडष्टकनवमपंचमद्विर्द्वादशाख्येषु दुष्टभकूटेषु सत्सु परस्परं ग्रहमैत्र्यं एकः परिहारः ऐकाधिपत्यं
द्वितीयः ग्रहवैरेप्यंशपयोः सबलत्वं मैत्री च तृतीयः ताराशुद्धिश्चतुर्थः राशिवश्यत्वं पंचमः सर्वेष्वपि परिहारेषु नाडी
शुद्धिरपेक्षितैव नाडीसत्वे तु विवाहो नैव स्यादिति एवं च ग्रंथकर्त्रा भवनपतिसुहृत्त्वं इत्यस्य श्रीपतिश्लोकस्य वाक्यचतुष्टय
मंगीकृत्य नावत्परिहाराभिधानं कृतं तट्टीकाकृन्महादेवोप्येवमेव व्याख्यात् यत्र हि प्रत्येकं परिहारकत्वं तत्र गुणसमुदायः
परिहारकः स्यादिति किं वाच्यं तत्र तु तस्य मैत्री हि तत्र पयोर्द्वयोरपि तयोरैकाधिपत्येपि चेत्ताराः मित्रत्वं मित्रजन्मशुभदा ह्येमा च सं
पत्करीत्यादि प्राग्लिखितेन राजमार्तंडवाक्येन दुष्टभकूटे ग्रहमैत्र्या सहानष्टैकाधिपत्येन सह ताराशुद्धिरेव परिहारिका
समुचिता अर्थादेकस्य मित्रत्वे परस्य समत्वे वश्यत्वापेक्षा अत एव तद्वाक्यं ज्योतिःसारसागरकृता पितृचरणैश्चैवं विवृतं अत्रा
न्यान्यमित्रत्वे तुल्याधिपतित्वे वा ताराशुद्धिरेव चिंत्या एकांतरमित्रतायां तु वशित्वादिगुणांतरापेक्षा शत्रुत्वे तु सर्वथा त्यागः
इति अत एव तस्मिन्नाद्ये चेत्यभिधानादेकवाक्यतावसायः एवं श्रीपतिवाक्यमपि व्याकर्तव्यमेकवाक्यताबलात् तत्र ष
डष्टके पुनर्भवनपतिसुहृत्त्वमिति सकलगुणसत्वमेव परिहारकं अन्ययोर्दुष्टभकूटयोर्द्वयमेव यदाह ज्योतिर्निबंधे गर्गः
ग्रहमैत्र्यं शुभा तारा राशिवश्यं त्रिभिः शुभं षडष्टकं बुधाः प्राहुर्द्वाभ्यां द्यर्के त्रिकोणकमिति द्यर्कं द्विद्वादशे वा नवपंचमे
वा इत्यादीनि वसिष्ठादिवाक्यानि उपलक्षणपरतया व्याख्येयानि अत्र यथासंप्रदायं व्यवस्था ध्येयेत्यलमियता सौहृदे
ति सुष्ठु हृदयं यस्य स सुहृन्मित्रं सुहृद्दुर्हृदौ मित्रयोरिति साधुः सुहृदो भावः सौहृदं हायनांतयुवादिभ्योऽण् तद्धितेष्व राम.
चामादेरित्यादिवृद्धिः केचित्तु सुष्ठु हृदयं यस्य स सुहृदयस्तस्य भावः सौहृदमिति युवादित्वादणि हृदयस्य हृल्लेखयदण्ला २८

सेष्विति हृदादेश इत्याहुः अपरे तु स्वांतं हृन्मानसं मन इत्यभिधानान्मनोवाची हृच्छब्दः सुहृद् हृन्मनो यस्येति सुहृत् तस्य भा
वः प्राग्वदणि रूपं सिद्धमित्यभिदधुः तदुभयमपि चिंत्यं यतो हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धौ सत्यां सौहार्दमि
त्येव स्यात् ननु सौहृदमिति ननु प्रथमपक्षेप्यनेनैव सूत्रेणोभयपदवृद्धिः कस्मान्न भवति न हि तत्र कश्चिद्विशेष उपा
दीयते उच्यते गोर्गुण इत्यत्र गोरादिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यादिति ज्ञापकात् हृद्भगे
त्यस्यानित्यत्वे नाप्रवर्तनादादिवृद्धिरेवात्रेति अन्ये तु वः समादधते अपरे तु प्रतिपदोक्तस्य हृदयपर्यायस्य हृच्छब्दस्य
हृद्भगेत्यत्र ग्रहणात् हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशस्यादिवृद्धौ साधयंति तद्धृदयस्य हृल्लेखेत्या
दिग्रंथविरुद्धं तथाहि वाशोक ष्यञ् रोगेष्वित्यत्र सौहार्द्यं सौहृद्यं ब्राह्मणादित्वात् ष्यञ् हृदादेशपक्षे हृद्भगसिंध्वंते
पूर्वपदस्य चेति उभयपदवृद्धिरिति काशिकाकारव्याख्यानात् वयं तु ब्रूमः हृद्भग इत्यत्रार्थवद्ग्रहणेनानर्थकस्येति परि
भाषया हृदयवाचिना हृदयादेशस्य वा हृच्छब्दस्यैव ग्रहणं तेनात्र सुहृद् दुर्हृदौ मित्रामित्रयोरिति निपातितस्य सुहृच्छब्द
स्य मित्रवाचित्वेनार्थवत्त्वात्तदवयवो हृच्छब्दस्तदंतस्योत्तरपदस्य वृद्धिर्न भवत्यवयवस्यानर्थक्यादिवृद्धिरेव भवति
अनुभवाशयं मनसि निधाय विनयं विशेषयति सौहृदेन सह इति माघः सौहृदं हि मनसा न गेहयोरिति केशवार्कोपि
सौहृदशब्दं प्रायुंक्तेति निरवद्यमिति अथ दुष्टानां गणकूट ग्रहकूट भकूटानां परिहारं शालिन्याह मैत्र्यां राशिस्वा
मिनोरंशनाथद्वंद्वस्यापि स्याद्गणानां न दोषः खेटारित्वं नाशयेत्सद्भकूटं खेटप्रीतिश्चापि दुष्टं भकूटं स्त्रीपुंसराशि
स्वामिनोर्मैत्र्यां सत्यां तथा राशिनवांशनाथयोर्द्वंद्वस्य युग्मं तस्यापि मैत्र्यां गणानां दुष्टगणानां दोषो न स्यात् स्त्रीरक्षोग
णा पुमान्मनुष्यगणो देवगणो वा तदा गणदोषो न स्यादित्यर्थः यदाहात्रिः राशीशयोः सुहृद्भावे मित्रत्वे वांशनाथयोः
गणादिदोषेप्युद्वाहः पुत्रपौत्रप्रवर्धन इति अथ सद्भकूटं शुभफलदं राशिकूटं तृतीयैकादशादिकं खेटारित्वं ग्रह
योः शत्रुता संबंधिनं दोषं नाशयेदित्यर्थः तदुक्तं सप्तर्षिमते विवाहपटले न भोगारिभावं हरेत्सद्भकूटं त्रिरुद्धं भकूटं हरे
त्सद्भमैत्री सदा नाशयत्येकनाडीसमोत्था भकूटादिकान्सप्तभेदांश्च नेतां अत्र चतुर्थः चरणः प्रोक्तो दुष्टं भकूटकं इत्या

मु॰ पी॰ वि॰ प्र॰ २९

दिनापुनरुक्तोपि मरणादिकं दातुं प्रभवति । यदुक्तं नारदेन एकाधीशे मित्रभावे शुभदं पाणिपीडनं । द्विर्द्वादशे त्रिकोणे
च नकदाचित्षडष्टके इति तन्नाडीदोषे सत्येव द्रष्टव्यं अधुनादितवाक्यस्वरसात् भवनपतिसुहृत्त्वे स्यान्नयैकाधिपत्ये
यदि भवनवशित्वे वैषडष्टकेपि शुभकृदिह विवाहो म्योन्यताराविशुद्धौ यदि खलु फणिचक्रे स्यान्ननाडीसमाज्ञे
ति श्रीपत्युक्तेश्च अन्यथा प्रागभिहितवसिष्ठादिवाक्यान्यनर्थकान्यापद्येरन्निति अथ क्रमप्राप्तं सकलकूटप्रधानं ना
डीकूटं स्रग्धरयाह ज्येष्ठार्यम्णेशनीराधिपभयुगयुगं दस्रभं चैकनाडी पुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभं योनिबुध्न्ये
च मध्या वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरा स्याद्दंपत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृ
त्युः ज्येष्ठाप्रसिद्धा अर्यम्ण उत्तराफल्गुनी ईशा आर्द्रा नीराधिपा वरुणस्तद्देशततारका एभ्यो नक्षत्रेभ्यो युगयुगं द्वयं द्वयं
ज्येष्ठामूलं च उत्तराफल्गुनी हस्तश्च आर्द्रा पुनर्वसुश्च शततारका पूर्वाभाद्रपदा चेत्यर्थः दस्रभमश्विनी च एतन्नक्ष
त्रनवकं परस्परमेकनाडीत्युच्यते अथ पुष्यः प्रसिद्धः इंदुर्मृगः त्वाष्ट्रं चित्रा मित्रोऽनुराधा अंतकं भरणी वसुर्धनि
ष्ठा जलभं पूर्वाषाढा योनिः पूर्वाफल्गुनी बुध्न्यो हिर्बुध्न्य उत्तराभाद्रपदा एतन्नक्षत्रनवकं परस्परं मध्यनाडीत्युच्यते
अथ वायुः स्वाती अग्निः कृत्तिका व्यालोऽश्लेषा विश्वोडु उत्तराषाढा एभ्यो युगयुगं स्वाती विशाखा च कृत्तिका रोहि
णी च अश्लेषा मघा च उत्तराषाढा श्रवणश्चेत्यर्थः अथो पौष्णभं रेवती च एतन्नक्षत्रनवकमपरांत्येति एकनाडीत्युच्य
ते एतत्फलमाह दंपत्योः स्त्रीपुंसयोरेकनाड्यां परिणयनमसदुष्टफलं स्यात् मध्यनाड्यां हि निश्चयेन मृत्युर्द्वयोरपि
स्यात् यदाह गर्गः नाडीकूटं तु संग्राह्यं कूटानां तु शिरोमणिः ब्रह्मणा कन्यकाकंठसूत्रत्वेन विनिर्मितमिति वराहः
आद्यैकनाडी कुरुते वियोगं मध्याख्यनाड्यामुभयोर्विनाशः अंत्या च वैधव्यमतीव दुःखं तस्माच्च तिस्रः परिवर्जनीया
इति अत्र च कश्चिदपवादो वसिष्ठेनोक्तः आद्यंत्रिभिर्भैस्त्रिभिरश्विभाद्यैः क्रमोत्क्रमात्संगणयेद्धि नाडी यद्येकपर्वण्युभये
वधिष्ण्ये नेष्टान्यनाड्योऽर्थशुभे कनाडी यथाफलापि विशेषमाह वसिष्ठः सा मध्यनाडी पुरुषं निहंति तत्पार्श्वनाडीव मु॰ २९
लकन्यकां तु आसन्नपर्यायसमागतानां दूषणं साप्यंतरिता त्रिवर्षैरिति उत्तरार्धस्यायमर्थः आसन्नसमीपस्थि

तेपर्यायेऽप्यष्टनीचेदेकनाडी समागता यथाश्विन्यार्द्रयोः भरणीमृगयोः रोहिण्यश्लेषयोः वा सा नाडी वर्षैरेकेन हंत्री प्रस
योरुक्ता अशुभफलदात्री स्यात् यदात्वश्विन्युत्तराफल्गुन्यादिवांतरिता नक्षत्रांतरकृतव्यवधाना सा नाडी त्रिभिर्वर्षै
रुक्ता अशुभफलदात्री स्यात् अत्र समफलेनाडीनक्षत्रक्रमे, स्मडकं पद्यद्वयं दस्रेन्द्रादित्यर्यमार्केंद्रमूलतोयाधीशा
ज्रांघ्रिभान्येकनाडी मध्यायामेवद्वीज्ययोन्यूह्नचित्रामित्रद्वौ भौवास्वहिर्बुध्न्यभानि वह्निब्राह्मद्वौ हि पित्र्यानि
लद्वीशाविश्वविष्णुपौष्णपराच दंपत्योर्मृत्युनिकृष्टे हि डःखं वर्षैरस्यात्सांतराले त्रिवर्षैरिति ग्रंथकर्तात्तना
डीदोषस्यतावदवस्थाक्रममनंगीकृत्य नाडीनक्षत्राण्येवोक्तानि अश्विनीमृगयोरिव नाडीभेदेऽपि दोषाभाव
एवेनैताष्टौ गुणाइत्यर्थः इयं चाश्विन्यादित्रिकगणनाकन्यायाश्च तस्यश्च रेण जन्मनक्षत्रे सति यदा तु त्रिचरणे
नक्षत्रं तदा हन्ति कामारभ्य चतुष्पर्वगणना साभिजित् द्विचरत्वे तु कन्यानक्षत्रस्य मृगशीर्षतः पंचपर्वगणना
यदाह नारदः चतुस्त्रिद्व्यंघ्रिभोत्थायाः कन्याया यथा चतुष्पर्वे नाडी पंचपर्वनाडीयाः क्रमशोऽश्विभात् वह्निभादिंद
भानाडी त्रिष्वतुष्पंचपर्वसु

कृ	रो	मृ	आ
म	अ	पु	पु
पू	उ	ह	चि
ज्ये	अ	वि	स्वा
मू	पू	उ	श्र
पू	श	ध	अ
उ	रे	अ	भ

मृ	आ	पु	पु	अ
ह	उ	पू	म	।०।
चि	स्वा	वि	अ	ज्ये
श्र	उ	पू	मू	। ।
ध	श	पू	उ	रे
रो	कृ	भ	अ	। ।

गणयेत्संख्यया वैकनाड्यां मृत्युर्न संशयः अ
स्य मध्यस्पष्टमाह गर्गः वत्स ष्यात्कन्यकाजन्मगणयेदाश्विनादिकं कन्य
कर्द्विपाद्वे त्वाद्गणयेत् सौम्यभादिकं पंचभिस्त्ववरोहेत्पंचमांगुलिवर्जितमि
ति एतत्फलमप्याह गर्गः संश्लिष्टा मध्यनाडीत्वस्य हंति वेगतः संश्लिष्टा पार्श्वना
डीतु कन्यकां हंत्यसंशय मिति आसन्ना त्वेव नाडी स्यादासन्नमृत्तिदायिनी दूरस्था
पैकनाडी स्याद्दूरस्थानिष्ट कारिणीति दूरं बहुकाले ज [illegible] नारदः एकनाडी
विवाहस्तु गुणैः सर्वैः समन्वितः वर्जनीयः प्रयत्नेन दंपत्योर्निधनं यतः इति आसां नाडीनां देशभेदेन व्य
वस्थामाह [illegible] नारदः चतुर्नाडीत्वहल्यायां पांचाले पंचनाडिका त्रिनाडी सर्वदेशेषु वर्जनीया प्रयत्नतः इति अ
हल्यापंचालौ देशविशेषौ ननु चतुस्त्रिद्व्यंघ्रिभोत्थायाः इति चतुर्नाडीत्वहल्यायां इत्यनयोर्वाक्ययोः सामान्यविशेषभा
वमापन्नयोर्यथ सर्थ्यैः संपन्नः कन्यर्क्षे चतुष्पादे सति अश्विन्यादित्रिनाडी अहल्यापंचालव्यतिरिक्तसर्वदेशेषु स्यात् तथा

अ	भ	कृ
आ	मृ	रो
पु	पु	आ
उ	पू	म
ह	चि	स्वा
ज्ये	अं	वि
मू	पू	उ
श	ध	श्र
पू	उ	रे
ए	म	ए

एकनाडीचक्रं

कन्यर्क्षेत्रिपादेकृत्तिकादिचतुष्कवेनाडी अहल्यायामेवस्यात् तथाकन्यर्क्षेद्विपादेरेष्टगादिपंचपर्वनाडी, पंचालएवस्या
मु·दी· त् एवंदेशभेदेननाडीनैयत्येसतितत्तद्देशेषुप्रोक्तभिन्नांघ्र्युत्पन्नायांकन्यायांनाडीविचारोनस्यादेव यथा त्रिपादेद्विपादेवाक
प्र·प्र· न्यर्क्षेसति सर्वेष्वपिदेशेषुत्रिनाडीविचारोनस्यात् एवंसतिपुनर्वसुकृत्तिकाप्रभृतीनांत्रयाणामुभयपार्श्वधिष्ण्यानांतत्तन्ना
२· डीस्थैःसर्वनक्षत्रैःसहनाडीविचाराभावःप्रसज्येत तथाहस्तगचित्राधनिष्ठानांत्रयाणांमध्यनाडीधिष्ण्यानांमध्यनाडीसंस्थैः
सर्वैर्भरण्यादिभैःसहच तथाचतुष्पादभेतत्तद्देशविशेषेत्रिनाड्यभावएवप्रसज्येत नचेष्टापत्तिरितिवाच्यं आर्यावर्तनिवासि
सकलशिष्टाचारविरोधप्रसंगात् नचत्रिनाडीसर्वदेशेषुवर्जनीयाप्रयत्नतइत्युक्तेरहल्यापंचालयोरपिदेशयोस्त्रिनाड्यस्त्ये
वेतिवाच्यं चतुर्नाडीत्वहल्यायांपंचालेपंचनाडिकाइत्येतद्विशेषसाहचर्यात्सर्वदेशशब्दोऽहल्यापंचालव्यतिरिक्तदेशेषुव
र्तते विशेषसंनिधानेआम्नातंसामान्यंतद्व्यतिरिक्तेसामान्येवर्ततइतिन्यायात् ब्राह्मणाआयातावसिष्ठोप्यायातइतिव
त् अत्रेमांसमाधिसरणिंपश्यामः चतुर्दिग्द्विभात्यायाःकन्यायाःक्रमशोऽश्विभात् वह्निभादिंदुभान्नाडीत्रिचतुष्पंचप
र्वभिरितिपद्येनकन्यायानाडीत्रयविचारमभिधायानुपदमेवरेखास्तिस्रोविरच्याश्विभदस्रभाद्यानिविन्यसेत् एकरेखा
स्थयोर्मृत्युर्दंपत्योर्जन्मधिष्ण्ययोरिति पुनरपित्रिनाडीमुपन्यस्तवान् साचत्रिनाडीसर्वेष्वपिकन्यानक्षत्रेषुसर्वेष्वपिअहल्या
पंचालसहितेषुदेशेषुवश्यंविचार्यास्यादित्येतदर्थमुक्ता नचेदंत्रिनाड्यालक्षणवाक्यमिदमितिवाच्यंएवंचतुर्नाडीपंचनाड्यो
रपिलक्षणाभिधानेकर्तव्यंस्यात् किंच यदिलक्षणवाक्यमंगीक्रियेततदावसिष्ठवाक्यावनुलोमविलोमगणनावक्तव्या
स्यात्साचनोक्तेतिविधिवाक्यमेवैतत् अस्माद्वसिष्ठादिभिर्देशनक्षत्रभेदेनअनित्यप्रवृत्तिकेचतुष्पंचनाड्यावुपेक्ष्यसक
लदेशव्यापित्वात्त्रिनाड्येवोक्ता नचैतावताचतुष्पंचनाड्यौस्वस्वदेशव्यतिरिक्तान्यदेशेषुनैवावलोक्यो किंतुसर्वेष्वपिदे
शेषुतेविचार्येतत्रस्वदेशेदोषमहत्त्वमन्यदेशेदोषाल्पतात्रिनाडीतुसर्वत्रैवसमानदोषा वराहमतं: अहल्यायांचतुर्ना
डीसंयोगःकालमृत्युदः एषयोगोन्यदेशेषुह्यपमृत्युफलप्रदः पंचनाडीसमायोगःपांचालेकालदंडदः इतरत्रसमायोगा
दुःखदारिद्र्यदोषकृत् त्रिनाड्यांतुसमायोगःसर्वत्रानिष्टकारकइति यमुनाज्योतिर्निबंधे ज्योतिषप्रकाशश्चिन्त्यादित्रिनाडीप्र राम
कृत्याभिहितं निधनेमध्यमनाड्यांदंपत्योर्नैवपार्श्वयोर्नाड्योरिति अत्रपार्श्वनाड्योर्मृत्युरूपमहादोषाभावंमत्वा विवाह २

ति केचिदाहुः उभयथापि पाठे छंदोभंगदोषः प्राप्नोति नहि द्वितीयः समाहारद्वंद्वस्य सर्वो द्वंद्वो विभाषयैकवद्भवतीत्येक
वद्भावविधानान्नपुंसकमिति नपुंसकलिंगतायां सत्यां समाहारस्यैकत्वादेकवचने ङि-स्तस्मिन्परत इत्येकोके
चिद्विभक्ताविति ङमागमे उग्रविलीस्यात् तादृशपाठेपि छंदोभंग एव दूषणं अत्र समाधिः इतरेतरयोगद्वंद्वो
त्र न कार्यः किंतु समाहारद्वंद्वः कार्यः तत्र हि स्नोश्च नाम्नुरित्यत्र सूत्रे स्नोरिति ज्ञापकादनुशासनस्यानित्यत्वा
वगनेन समभावे अचघेरित्यौत्वे आत्वे च सिद्धमुग्रवाविति अथवोग्रैः सहितो रविस्तु उग्ररविरिति शाकपार्थिवादे
राकृतिगणत्वान्मध्यमपदकलोपेन तत्पुरुषः समासस्ततः सप्तम्येकवचने पूर्ववत्सिद्धमिष्टं अनेन मत्के छंदोभंगाभावोपि
सिद्धः एवं लघुवृत्तावित्यावपि समाधेयं अनेनैवोपायेन मर्यादाभिविध्योश्चंद्रवारे वा सूर्यसंक्रांतिर्ध्वांक्षीनाम्नी वि
प्राणवैश्यान्सुखयेत् मृदुमैत्रे बुधे मैत्रसंज्ञनक्षत्रे वा संक्रांतिर्मंदाकिनीनाम्नी नृपतीन् राज्ञः सुखयेत् चरसंज्ञे चरनक्षत्रे
भौमे मंगलवारे वा संक्रांतिर्महोदरसंज्ञा महोदरीनाम्नी चौरान्सुखयेत् स्थिरनक्षत्रे गुरुवारे वा संक्रांतिर्मंदानाम्नी वि
प्रान्सुखयेत् मिश्रनक्षत्रे भृगुवारे वा संक्रांतिस्तदा मिश्रानाम्नी पशून् गाः सुखयेत् तीक्ष्णनक्षत्रे कुजे शनिवारे वा
संक्रांतिः खलु निश्चयेन राक्षसीनाम्नी अंत्यजान्श्वचांडालान्सुखयतीत्यंत्यजग्रहणेलक्षणा स्यादित्यर्थः वराहकश्यपौ घोराध्वां
क्षी लघुभचरभे महोदरी मृदुभे मंदाकिन्यचरर्क्षे मंदा मिश्रा मिश्रे च राक्षसी तीक्ष्णे अत्र छंदोभंगस्त्वार्षः देवीपुराणे
मंदा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्तिता चरे महोदरी ज्ञेया क्रूरे स्यात्तु च राक्ष
सी मिश्रिता चैव विज्ञेया मिश्रर्क्षे रविसंक्रमे इति रत्नमालायां च उग्रक्षिप्रचरैर्मैत्रध्रुवमिश्राख्यदारुणैः क्रमेणसं
क्रांतिरर्कस्य घोराद्याः क्रमशो भवेत् नारदकश्यपौ शूद्रतस्करवैश्यद्विजदेवभूपगवां क्रमात् अनुक्तानां च सर्वेषां घो
राद्याः सुखदाः स्मृताः स्मार्देवा ब्राह्मणाः अनुक्तानां चंडालादीनां न नूक्तं वक्ष्यमाणं वा शुभाशुभफलं सायनांशसं
क्रांतितः उक्तेन विचार्यं इति चेत् उच्यते सायनांशसंक्रांतेः स्नानजपादेव कार्येन सर्वत्र वराहपुत्रस्य: स्नानदानज
पश्राद्धव्रतहोमादिकर्मसु सुकृतं चलसंक्रांताववाप्यं पुरुषाः स्नाते इति चलसंक्रमः सायनांशसंक्रांतिः तत्रस्थल

मु० दी०
संक्रां०
प्र० २

संक्रांते परिगणितस्नानादिकविषयत्वादेव कृत्यांतरेषु विवाहादिशुभकर्मसु संक्रांतमासांगीकारे शुभाशुभफलकथनेऽपि नास्य उपयोग इति युक्तमुत्पश्यामः इदं चाग्रे सम्यक्तया निर्णेयं अथ दिनरात्रिविभागेन संक्रांत्यशुभफलमुत्तरायणदक्षिणायनसंज्ञां च सार्द्धवसंततिलकयाह अंशे दिनस्य नृपतीन्प्रथमे निहंति मध्ये द्विजानपि विशोऽपरके च शूद्रान् अस्ते निशाप्रहरकेषु पिशाचकादीन् नक्तंचरान्पितृनरान्पशुपालकांश्च सूर्योदये सकललिंगिजनं च सौम्ययाम्यायनं मकरकर्कटयोर्निरुक्तं अत्रार्कसंक्रमणमित्यनुवर्तते दिनप्रमाणं त्रिभिर्भक्तं यद्यात्मकस्तत्रीयांशो भवति तत्र दिनस्य प्रथमेंऽशेऽर्कसंक्रमणं नृपतीन्हंति मध्ये द्वितीयेंऽशे द्विजान्ब्राह्मणान्हंति अपरके तृतीयेंऽशे वैश्यान्हंति एवं सर्वत्र व्याख्येयं अस्ते सूर्यास्तमयेऽर्कसंक्रमणं शूद्रान् अथ रात्रिसंक्रांतिफलं ॥ तत्र रात्रिप्रथमप्रहरे पिशाचकान् आदिशब्देन भूतादीन् द्वितीयप्रहरे नक्तंचरान्राक्षसान् तृतीयप्रहरे नटान्नर्तकान् चतुर्थप्रहरे पशुपालकान् अर्कोदयसमयकालेऽर्कसंक्रमणं सकललिंगिजनं पाखंडादिकं हंतीत्यर्थः पाखंडाः सर्वलिंगिन इत्यभिधानात् यदाह नारदकश्यपौ पूर्वाह्णे नृपतीन्हंति विप्रान्मध्यंदिने विशः अपराह्णेऽस्तगे शूद्रान्प्रदोषे च पिशाचकान् निशि रात्रिंचरान्नाट्यकारानपररात्रके गोपान्रा[illegible] सुसिद्धायां लिंगिनो रविसंक्रममिति संक्रांतेः क्रूरसौम्यवारपरत्वेन फलविशेषमाह वसिष्ठः रविरविजभौमवारे संक्रांतौ दिनकरस्य तन्मासे पितृकफानिलजामयनरपतिकलहस्ववृष्टिश्च बुधगुरुचंद्राहे संति संक्रांतावनामयं नृणां क्षितिपतिनिकरे क्षेमं सस्यविवृद्धिर्विधर्मिणां पीडा अथ मेषसंक्रांतौ विशेषमाह कश्यपः यदा मेषगतः सूर्यो भरण्यादिचतुष्टये सस्यवृद्धिर्भवेत्तत्र वृद्धिरार्द्रा च तुष्टये मघादिदशके[illegible] निःक्षेमं चानुक्रमेषु च अस्यार्थः यस्मिन्दिने मेषसंक्रमस्तद्दिने चंद्रो यदि भरण्यादिनक्षत्रचतुष्टये स्यात्तदा सस्यवृद्धिः फलमेवमग्रे विव्याख्येयं अथ जन्मनक्षत्रे संक्रांतिफलं दीपिकायां यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् तन्मासाभ्यंतरे तस्य रोगक्लेशधनक्षय इति तत्प्रांतिकमपि दीपिकायां उक्तं नगरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः स्नानं जन्मर्क्षे रविसंक्रांतौ नृणां शुभदमिति अथ संक्रांतिषु दृष्टादृष्टायां फलमुक्तं वसिष्ठेन आजकन्याकुम

सित्

दाम

कर्किणि संक्रान्तौ यदि भवेद्वर्षं आमयडामरसस्यहृद्भयदुष्टमनर्घं त्वदृष्टिश्च वृषवृश्चिककतुलामकरे वृष्टिः स्यात्संक्रमे समये वि
स्फोटामयतस्करपीडा वृष्टिः स्यात् क्षुच्छान्तुभयमिति अथ सौम्येति मकरकर्कटयोः संक्रान्तिश्च तदा क्रमेण सौम्ययाम्या
यनं निरुक्तं कथितं मकरे उत्तरायणं कर्कटे याम्यायनं स्यादित्यर्थः यदाह नारदः सौम्ययाम्यायने नूनं भवतो मृगकर्किणो
रिति अथावशिष्टानां दशसंक्रान्तीनां षडशीतिमुखाः संज्ञाः अनुष्टुभाह षडशीत्याननं चापनृयुक्कन्याझषे भवेत् तु
लाजौ विषुवं विष्णुपदं सिंहालिगोघटे धनुर्मीनकन्यामिथुनेषु संक्रान्तिश्चेत्तदा षडशीतिमुखनाम्नी संक्रान्तिश्च तुलामे
षयोः संक्रान्तिर्विषुवनाम्नी सिंहवृश्चिककुंभवृषेषु संक्रान्तिर्विष्णुपदाख्या उक्तं च नारदेन स्थिरभेष्वर्कसंक्रान्तिर्ज्ञेयं
विष्णुपदाह्वयं षडशीतिमुखं ज्ञेयं द्विस्वभावेषु राशिषु तुलाधरान्तयोर्ज्ञेयं विषुवत्सूर्यसंक्रमः संज्ञाप्रयोजनं चया
म्यायने विष्णुपदे चाद्यामध्यात्तुलाजयोः षडशीत्यानने सौम्ये परा नाड्योऽतिपुण्यदा इति ग्रंथकृदग्रे वक्ष्यति अथ नवसं
क्रान्तौ यानि दत्तानि हव्यकव्यानि धातृभिः तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि रविसंक्रमणे पुण्ये न स्नायाद्यदि मा
नवः सप्तजन्मसु रोगी स्याद्दुःखभागिह जायते इति शातातपोक्तेः स्नानदानश्राद्धादिकृत्यस्य संक्रान्तिकालेऽवश्यकर्तव्य
ताप्रतीयते तत्र श्राद्धादेरनुष्ठानलक्षणमप्रामाण्यमापद्येत संक्रान्तिकालस्यातिसूक्ष्मत्वात् तदुक्तं देवीपुराणे सुस्थे
नरे सुखासीने यावत्स्पंदति लोचनं तस्य त्रिंशत्तमो भागः तत्परः परिकीर्तितः तस्माच्छततमो भागः त्रुटिरित्यभिधीयते
त्रुटेः सहस्रभागो यः स कालो रविसंक्रमे इति देवलोपि संक्रान्तिसमयः सूक्ष्मः दुर्ज्ञेयः पिशितेक्षणैरिति पिशितेक्षणैर्मनु
ष्यैः अतो मुख्यकालात्तूपलक्षितो गौणकालेपि कार्यं वचनप्रामाण्यात् स च गौणकालो निरवधिरित्यतो गौणकालमुप
ज्ञातिकाङ्क्षन् पूर्वार्द्धेनाह संक्रान्तिकालादनले उभयत्र नाडिकाः पुण्या मताः षोडश षोडशोष्णगोः गणितमार्गेण यदुक्त
गाः सूर्यस्य संक्रान्तिकालस्त्वागतः स्यात्तत उभयत्र पूर्वतः परतश्च षोडश नाड्यो घट्यः पुण्यसंपादकत्वात्पुण्याः स्मृताः संमताः सू
र्यसंक्रान्तिसमयात्पूर्वं षोडश पश्चाच्च षोडश घटिकाः पुण्यकालो मिलित्वा द्वात्रिंशद्घटिका भवंतीत्यर्थः यदाह वसिष्ठः
दिनपतिसंक्रमणात्प्राक् षोडश नाड्यः च पुण्यकालः सः परतः षोडश नाड्यः सर्वत्र स्नानकार्येषु ब्रह्मसिद्धान्तेपि संक्रान्तेः

मुदी·
स.प्र.
२

प्राकारस्नाच सार्द्धषोडशनाडिकाः त्रयस्त्रिंशत्संक्रमस्य पुण्याः सर्वस्य नाडिकाः अनेन संक्रांतेः पुण्यकालस्तु षोडशो
भयतः कला इति ज्ञाबालिवाक्यं येः पूर्वतः परतश्चाष्टौ घटिकाः पुण्यकाल इत्येवं षोडशेति व्याख्याते तदपास्तं भवति
किंचायमर्थो वासनासिद्धः सूर्यसिद्धांतेभिहितः अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः तदर्धनाड्यः संक्रांतेर
र्वाक् पुण्यं तथा परे सिद्धांतशिरोमणावपि षष्टिघ्नं बिंबं ग्रहभुक्तिभाक्तं संक्रांतिनाड्योखिलधर्मकृत्ये रवेस्तु ताः पुण्य
तमा ग्रहस्तु संक्रांतिगो मिश्रफलं विधत्त इति वासना चेयं यदि ग्रहस्य षष्टिगतितुल्यकलाभिरहोरात्रमानरूपाः षष्टिघटि
कालभ्यंते ग्रहबिंबकलाभिः किमिति त्रैराशिकेन ग्रहबिंबकलानां षष्टिगुणको ग्रहभुक्तिभाजको निष्पन्न इत्य
र्थः एवं सर्वत्र ग्रहाणामपि संक्रांतिः स्यात् तत्र सामान्यतः सूर्यबिंबं त्रयस्त्रिंशत्कलाः ग्रहगते ह्रीसवृद्धिभ्यां बिंबस्या
द्वा ससंभवात् तदुक्तं सिद्धांत एवात्र तु विस्तरभयादनुपयुक्तत्वाच्च नास्माभिर्लेखि अत एव त्रिंशदेकत्रिंशद्द्वात्रिंश
त् त्रयस्त्रिंशदादिभेदेन स्मृतिषु पुण्यघटिकाभिधानं स्पष्टीकृत्य भेदसंभवाद्धूत्वं भिन्नं तदेवं सामान्यतः संक्रांतिषु द्वा
त्रिंशद्घटिकारूपः पुण्यकालो निर्णीतः देवीपुराणे तु मंदादिसंज्ञाभेदात्पुण्यकालविशेष एवोक्तः द्विचतुष्पंचस
प्ताष्टनवद्वादशैव च क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकमिति अस्यार्थः मंदायामंतरालवर्तिघटीद्वयं
मंदाकिन्यां चतस्रो घटिकाः ध्वांक्ष्यां पंच घोरायां सप्त महोदर्यामष्टौ राक्षस्यां नव मिश्रायां द्वादश प्रागभिहित
देवीपुराणोक्त मंदादिसंज्ञावाक्यान्नंदा त्वन्नितसंज्ञा तु मंदादिषु यविचारो वारप्रयुक्ता स्ववचनात् एवं संक्रांतिषु पु
ण्यकालमभिधायेदानीं रात्रिसंक्रांतौ विशेषमुखवज्ञान्युत्तरार्द्धेनाह निशीथतोर्वागथ परत्र संक्रमे पूर्वापराह्नां
तिमपूर्वभागकौ निशीथमर्द्धरात्रं तस्मादर्वाक् पूर्वमपरत्र पश्चाच्च संक्रमे संक्रांतिकाले सति पूर्वापरयोरह्नोः
क्रमेणांतिमपूर्वभागकौ पुण्यौ स्यातां भागकाविति स्वार्थेकः यद्यर्द्धरात्रात्प्राक् संक्रांतिस्तदा पूर्वदिनस्यांत्यार्धपु
ण्यं यद्यर्द्धरात्रादुपरि संक्रांतिस्तदोत्तरदिनस्य पूर्वार्द्धमेव पुण्यमित्यर्थः उक्तं च ब्रह्मसिद्धांते भवनांते बिंबमध्यरात्रा
र्द्धोत्याउदेति चेत् स्नानदानादिमध्याह्नात्पूर्वं स्नानादि पुण्यदमि भवने राशिः बिंबमध्ये रवेः होत्रं राशिः पूर्ववत्सिष्टोपि २

अह्निसंक्रमणेपुण्यमहःकृत्स्नंप्रकीर्तितं रात्रौसंक्रमणेभानोर्दिनार्द्धंस्नानदानत अर्धरात्राद्धस्तस्मिन्मध्याह्न
स्योपरिक्रिया ऊर्ध्वमुदयात्प्रहरद्वयमिति नवरात्रौदिनसंक्रांतिवद्रात्रावपिपुण्यकालसत्वात्तदास्नानादिकं तेनक्रि
यते यदर्धभयमुद्यमत्रारभ्यःउच्यते रात्रौस्नानंनकुर्वीतदानंचैवविशेषतइति सुमंतुवाक्याद्रात्रौस्नानाद्यधिकाराभ
वात् यत्तुनैमित्तिकंग्रहणादिप्रयुक्तंभवत्येतत् नैमित्तिकंचकुर्वीतस्नानंदानंचरात्रिषुइति सुमंतुवाक्यशेषात् अ
थार्धरात्रसमयसंक्रमणेमकरकर्कटयोस्तुविशेषमुपजातिकयाह पूर्णेनिशीथेयदिसंक्रमःस्याद्दिनद्वयंपुण्य
मथोदयास्तात् पूर्वंपरस्तायदिसौम्ययाम्यायनेदिनेपूर्वपरेतुपुण्ये अर्धरात्रनिशीथौद्वौ यामप्रहरौस
मावित्यभिधानात् अर्धरात्रंनिशीथशब्दवाच्यं तस्मिन्निशीथेपूर्णेरात्रिद्वितीयप्रहरांतिमपलावच्छिन्नेयदिसं
क्रमःस्यात्तदाप्रागपरंदिनद्वयंपुण्यमुक्तं उक्तंच वृद्धवसिष्ठेन पूर्णेचेदर्धरात्रेतुयदासंक्रमतेरविः प्राहुर्दिनद्वयं
पुण्यंमुक्त्वामकरकर्कटाविति ब्रह्मसिद्धांतेपि यद्यर्धरात्रएवस्यात्संपूर्णेसंक्रमोरवेः तदादिनद्वयंपुण्यंस्नानदाना
दिकर्मसु अथमुक्त्वामकरकर्कटयोस्तुकथमित्यतआहाथेति अथानंतरमुदयास्तात्सूर्योदयात्सूर्यास्ताच्चय
दियाम्यसौम्यायनेकर्कमकरसंक्रांतीभवतस्तदापूर्वापरदिनेपुण्येस्यातां यदिसूर्योदयात्पूर्वंकर्कसंक्रमणंस्या
त्तदापूर्वदिनएवपुण्यकालोनोत्तरदिनेतथायदिसूर्यास्तादनंतरंमकरसंक्रांतिःस्यात्तदोत्तरदिनएवपुण्यकालो
नपूर्वदिने तदा वृद्धगार्ग्यः यदास्तमयवेलायांमकरंयातिभास्करः प्रदोषेवार्धरात्रेवास्नानदानंपरेहनि अर्ध
रात्रेतदूर्ध्वंवासंक्रांतौदक्षिणायने पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति अस्तमयवेलायाइतिपंचम्यंतंपदंवाश
ब्दार्थेभविष्योत्तरेपि कार्मुकंचपरित्यज्यझषंसंक्रमतेरविः प्रदोषेवार्धरात्रेवास्नानंकुर्यात्परेहनि मिथुनात्क
र्केसंक्रांतिर्यदिस्यादंशुमालिनः प्रभातेवानिशीथेवाकुर्यादहनिपूर्वतइति प्रदोषलक्षणंस्कंदपुराणेप्रियमुहू
र्तैः प्रदोषःस्याद्रवावस्तंगतेसतीति अथयाम्योदयास्तादितिवचनस्याप्यपवादमिंदुवज्रार्द्धेनाह संध्यात्रिनाडी
प्रमितार्कबिंबादस्तेदुदितास्तादधऊर्ध्वमत्रचेद्याम्यसौम्येअयनेक्रमात्ताःपुण्यास्तदानीपरपूर्वघस्रौ अर्कबिंबा

मु.दी.
सं.प्र.
४

सूर्यमंडलार्धोदितात्सूर्यार्धोदितादर्धास्ताच्चाध ऊर्ध्वं च क्रमात् त्रिनाड्यस्त्रिघटिकास्ताभिः प्रमिता संध्याकालः स्या
त् अर्धोदितादर्कबिंबात्पूर्वं त्रिघटीप्रमितः प्रातःसंध्या तथार्धास्तादर्कबिंबादुपरि त्रिनाडीप्रमिता सायंसंध्ये
त्यर्थः तदाह वराहः अर्धास्तमितानुदितात्सूर्यास्पष्टभं नभो यावत् तावत्संध्याकालश्छिद्रैरेतैः फलं ब्रूयादिति
तत्प्रमाणमाह नारदः अर्धास्तमनसंध्या हि घटिकात्रयसंमिता तथैवार्धोदयात्प्रातर्घटिकात्रयसंमितेति स्कंद
पुराणेपि उदयात्प्राक्तनी संध्या घटिकात्रयमिष्यते सायंसंध्या त्रिघटिकास्तादुपरि भास्वत इति अत्र संध्यालक्ष
णे अर्धास्तमितानुदितवाक्यस्य च ब्रीहियववाक्यकल्पः अथ संध्यालक्षणप्रयोजनमाह अत्रेति अत्र संध्यायां सा
यंसंध्यायां च क्रमाद्वे याम्यसौम्ये अयने ते दक्षिणोत्तरायणे स्तस्तदानीं परपूर्वाघस्रौ दिवसौ पुण्यौ याम्यसौम्येत्र
यने इत्यत्र ईदूदेद्द्विवचनं प्रगृह्यमिति प्रगृह्यत्वात्प्लुतप्रगृह्यमिति प्रगृह्यत्वात्प्लुतप्रगृह्या अचीति प्रकृतिभावः
यदि प्रातःसंध्यायां दक्षिणायनप्रवृत्तिस्तदा सूर्योदयादनंतरं संपूर्णमहः पुण्यं तथा यदि सायंसंध्यायामुत्तराय
णप्रवृत्तिस्तदा सूर्यास्तात्पूर्वं संपूर्णमहः पुण्यं स्यादित्यर्थः यदाह नारदः सूर्योदयस्य संध्यायां यदि याम्यायनं
भवेत् तदहः पुण्यकालः स्यात्परतश्चेत्परेहनीति अत्र यद्युदयसंध्यातः प्राक् कर्कसंक्रमस्तदा प्राग्दिन एव पु
ण्यकालो नोत्तरदिने तथा यद्यस्तसंध्यामतिक्रम्य मकरसंक्रांतिस्तदोत्तरदिन एव पुण्यकालो नोत्तरदिन इति निष्कृ
ष्टार्थः अतो वृद्धगार्ग्यादिवाक्यनारदवाक्ययोः प्रदोषसंध्यापदोपादानेन सामान्यविशेषभावोवगंतव्यः यत्तु हे
माद्रौ स्कंदपुराणीयं वाक्यं धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा पूर्वापरविभागेन रात्रौ संक्रमते यदा दिनांते पं
चनाड्यस्तु तदा पुण्यतमाः स्मृताः उदये च तथा पंच दैवे पित्र्ये च कर्मणीति तदपि संध्याविषयकमेवेत्याहुरभियुक्ताः
विषुवे तु यथाश्रुतमेवेति अन्यदपि संध्यालक्षणप्रयोजनं प्राक् संध्यागर्जित इत्यादिषु द्रष्टव्यमिति ननु नायमयन
पुण्यकालो युक्तः सफलः शास्त्रांतरविरुद्धत्वात् तथा हि अर्कसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ संक्र मु.
मणे भानोर्दिनार्धं स्नानदानयोः अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहर

द्वयं पूर्वे चेदर्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति इति वृद्धवसिष्ठेनायनव्यतिरिक्ते
षु दशसु संक्रमेषु रात्रिगतेषु याम्याः सन्निहितानाद्यस्तास्ताः पुण्यतमाः स्मृता इति कश्यपोक्तसामान्यवाक्याद्रात्रावेवा
नुष्ठानं प्रसक्तं महःसंक्रमण इत्यादिनापोद्य दिने वानुष्ठानं कर्तव्यमित्युक्तं भवति अत एवाह याज्ञवल्क्यः राहुदर्शन
संक्रांतिविवाहात्ययवृद्धिषु इत्यादिकं कार्यं स्नानदानादिषु निशि काम्यव्रतेषु चेति ज्योतिर्वसिष्ठोपि सूतत्तने सं
क्रांतावुपरागे चंद्रसूर्ययोः नियतं रात्रावपि कर्तव्यं स्नानं दानं विशेषतो नृणामिति सुमंतुश्च ग्रहणेऽप्याह संक्रां
तिर्यात्रातिप्रसवेषु च श्रवणाच्चेतिहासस्य रात्रौ दानं प्रशस्यत इति एषु वाक्येषु सामान्यवाचिनोपि संक्रांतिपदस्य
मकरसंक्रांतिपरत्वमवसीयते यत्तु रात्रौ स्नानं न कुर्वीत दानं चैव विशेषत इति निषेधः स संक्रांत्यंतरेष्ववतिष्ठते
अत एवोक्तं कश्यपेन स्नानं दानं ग्रहणवत्सौम्ययाम्यायनद्वय इति तस्मादयनसंक्रमे रात्रौ सत्यां तत्रैव स्नानदानाद्य
नुष्ठातव्यमिति अत्राहुः शास्त्रद्वयेन तत्स्वबलत्वाद्विकल्पसिद्धौ तत्तद्देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्या न
त्रैगौडेरास्तु कश्यपादिवाक्यमनुसृत्य रात्रावयनसंभवे सति रात्रावेव स्नानदानादिकं कुर्वंतीति अलमतिप्रसंगे
न यदा तु दिने कर्कमकरसंक्रमेण पूर्वोत्तरघटिकानियममाह वृद्धवसिष्ठः अतीतानागते द्वे तु उदग्दक्षिणायने
त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृता इति उत्तरायणमतीतं तु पुण्यं कर्कटायनमागामि पुण्यं तत्र कर्कसंक्रा
न्तेः प्राक् त्रिंशद्घटिकाः पुण्याः मकरे तूत्तरा विंशतिर्घटिकाः पुण्या इत्यर्थः अत्र वाक्ये यद्यपि दिनपादानुपादानं तथा
पि यदास्तमयवेलायामिति रात्रिपरवाक्यालोचनादिदं दिनपरं प्रतिभाति तथा सति केनापि हेतुना समीपघटीषु
श्राद्धाद्यनुष्ठानासंभवे परमावधित्वेन त्रिंशदादयो घटिका अभ्यनुज्ञायंते यदा तु प्रतिबंधाभावस्तदा सन्निहिता
यायाः नाड्यस्तास्ताः पुण्यतमाः स्मृता इति कश्यपोक्तेः समीपघटिकास्वेव श्राद्धादिविधेयं सन्निहितपरित्यागका
रणाभावादिति न्यायाच्च अथ पूर्वापराः षोडश घटिकाः पुण्या इति पूर्वं सामान्येनोक्तमिदानीं विष्णुपदादिसंक्रमेषु
विशेषमनुष्टुभाह याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः षडशीत्यायने सौम्ये परा नाड्योऽतिपुण्यदा इति या

मु॰दी॰
सं॰प्र॰
५

म्यायने कर्कसंक्रांतौ तथा विष्णुपदे सिंहवृश्चिककुंभसंक्रांतिषु संक्रांतिकालादाद्याः प्रथमाः षोडशघटिकाश्च
तिपुण्यदाः स्नानदानेन तु फलदा ज्ञेयाः अग्रिमास्तु न तथेति निष्कृष्टोर्थः तुलाजयोस्तु तुलामेषयोर्मध्या उभयतः षो
डश षोडशघटिकाः पुण्याः अथवा षोडशैव घटिकाः पुण्याः षडशीत्यानने मिथुनकन्याधनुर्मीनसंक्रांतिषु त
द्यासौ मध्ये संक्रांतौ संक्रांतिकालात्परा अग्रिमाः षोडशघटिकाः अतिपुण्यदाः प्रथमास्तु न तथेति निष्कृष्टोर्थः बृद
हश्रीपतिः याम्यायने विष्णुपदे तथादौ दानाद्यनंतं विषुवे च मध्ये वदंत्यतीते षडशीतिवक्त्रे महर्षयः खल्वयने च सौ
म्ये तत्र कर्के प्रागेव मकरसंक्रांतौ पश्चादेव पुण्यकाल इति प्राङ्निरणयि विष्णुपदे तु अग्रिमादिमघटीनां पुण्यकाले
तरतमभावः पुण्या या विष्णुपद्यां च प्राक्पश्चादपि षोडशेति हृद्वसिष्ठोक्तवाक्येनास्यैकवाक्यवशात् विषुवे
तु सामान्यनिर्णय एवेति केचित् दीपिकाटीकाकारस्त्वेवमाह मेषे तुलायां च संक्रांतिमध्य एव संक्रांतिकाला
त्पूर्वमष्टौ घटिकाः परतश्चाष्टौ घटिकाः पुण्यकाल इति युक्तं चैतत् विषुवे च मध्य इति मध्यपदोपादानात् मध्ये षो
डशघटिकाः पुण्या इत्युच्यते कस्मात्कालान्मध्यादित्यपेक्षायां संक्रांतिकालादेवेत्यतः पूर्वमष्टौ पश्चाच्चाष्टौ घ
टिकाः पुण्या इत्यर्थः यदुक्तं बृहस्पतिना वर्तमाने तुलामेषे नाड्यस्तूभयतो दशेति तुलामेषसंक्रांतिकालात्प्राक्
पश्चाच्च पंच पंच नाड्यः पुण्या इति एतदपि युक्तं आद्यंतसापेक्षत्वान्मध्यशब्दस्य गणितपुण्यकालघटिकानां मध्य
त्रिभागः स्थूलदृष्ट्या पुण्यकाले तरतमभावः यत्तु षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः इति वसिष्ठवाक्यं
तत्पाश्चात्येषु प्रतिबंधवशात् आद्यादेरसंभवे सत्यग्रिमघटीषु श्राद्धादिक्रियाभ्यनुज्ञायाः परमावधिकायत्ता
र्थं इदं सर्वं दिनसंक्रांतिविषयं वेदितव्यं अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितमिति सामान्यवाक्यस्य याम्या
यने विष्णुपदे इत्यस्य च विशेषवाक्यस्य वाक्यैकवाक्यतावशात् अत एव रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयो
रिति रात्रिपरविशेषस्य सत्वाच्च एवं निर्णीते पुण्यकाले स्नानदानाद्यवश्यं विधेयमिति फलितोर्थः तत्र स्नानदानाद्यक
र्तृत्वे प्रत्यवायमाह वसिष्ठः इति संचिंत्य विनिर्णयमादेष्टव्यं सरेवदेवज्ञैः विष्णुवत्ययने ग्रहणे संक्रांतौ पुण्यदि राम॰ ५

वसे वापि त्वत्र श्राद्धं न करोति तदिह दत्वा श्राद्धं व्रजति तस्य पिता आगतागतसमये पिंडं करोति यद्दानजपहोमाद्यं पु
रुषवापितबीजं यद्वत्तद्वच्च निष्फलं भवतीति अयने अयनप्रवृत्त्यारंभे चलसंक्रमे आगतसमये निर्णीतपुण्यकाला
तिरिक्तसमये स्नानदानादि निष्फलमित्यर्थः संक्रांतिषु स्नानदानादेः फलमाह भरद्वाजः षडशीत्यां तु यद्दानं विषु यद्दानं ३
तस्यांतो ४ वद्द्वये इष्यते सागरस्यान्तो नैव दृश्यते इह वसिष्ठोपि अयने कोटिपुण्यं च सहस्रं विषुवे फलं षडशीत्यां सहस्रं तु फ
लं विष्णुपदेषु चेत्यलमतिप्रसंगेनेति सूर्यसंक्रांतिनिर्णयः अथ नायं केवलं सूर्यसंक्रमण एव पुण्यकालः किं
तु चंद्रादीनां ग्रहाणां नक्षत्रसंक्रमे राशिसंक्रमे च पुण्यकालोस्ति सोपि सोपपत्तिः प्रसंगतः प्रोच्यतेस्माभिः यदा
ह जैमिनिः नक्षत्रराशेण्यरविसंक्रमेस्युरर्वाक्परत्रापि रसेंदुनाड्यः पुण्याख्यमर्थं दोह्निधरापलैर्युगेकैरेवनाडीभिः
मुनिभिः शुभोक्ता नाड्यः चतस्रः सफलाः कुजस्य बुधस्य तिस्रो मनवः फलानि अब्धाब्धिनाड्यः फलसप्तयुक्ता गुरो
च शुक्रे सफलाश्च नस्रः द्विनागनाड्यः पलसप्तयुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः आद्यंतमध्ये जपदानहोमं
कुर्वन्नवाप्नोति सुरेंद्रधाम यद्यत्र यस्यार्थः सूर्यस्य नक्षत्रसंक्रमे राशिसंक्रमे प्रागापरतश्च षोडश घटिकाः पुण्याः
एवं चंद्रस्यैका घटी त्रयोदश पलानि भौमस्य चतस्रो घटिकाः एकं पलं बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि गुरो
श्चतुश्चत्वारिंशत् घटिकाः सप्त पलानि शुक्रस्य तिस्रो घटिकाः पलमेकं शनेः द्व्यशीति घटिकाः सप्त पलानि चो
भयतः पुण्यकाल इत्यर्थः यथा सू चं भौ बु गु शु श ग्रहा अत्रोपपत्तिः भानोर्गतिः स्वदशभागयुताद्विनोवा
बिंबविधो २६ २० २२ ४२ ३३ ४४ ७ ४२ ८३ २ घटी त्रिगुणितायुगशैलभक्तेति सिद्धांतशिरोमणौ ००२२
३२०२२० ४१० ७२०२२ ०७२ पलात्मकरेण रविचंद्रयोर्मानकला आनेया २ चंद्रीषवः सचरणा अतवह्निभागयुक्ता
द्व्योनवचसत्रिलवेषवः च स्युर्मेध्यमास्त तु कला द्विगतिघ्नादिकानामिति तत्रैवोक्ताः भौमादीनां मानकलाः त
त्रक्रमेण मानकलाः सूर्यः चं मं बु गु शु श तत्र षष्टिघ्नं बिंबं ग्रहभुक्तिभक्तं संक्रांतिनाड्यो खिलधर्मकृत्ये
ष्वेवं ३२ ३२ २० ४२ ६२ ७२ ८२ ५२ ताः पुण्यतमाः ग्रहस्य संक्रांतिगो मिश्रफलं विधत्ते इति भास्करोक्ता ३२ ९ ४

सू.टी.
सं.प्र.
६

४५ २२ ५२ ३० ०००२२· २ दिग्रासंक्रांतिनाग्ग्रः स्युः तत्र ग्रहरश्म्यक्रान्त्यः सोमेनैवोक्ताः नंदाश्राभुजगाश्ववेः श्राशिगतिः खोकाद्रयो शानग्रयस्तुंगस्यागकलाः ऊवं दविकलाः पातस्य एमाभवाः माहेयस्यमहीगुणारसकराज्ञस्येषुसिद्धारदाः पंचेज्यस्य सितस्य षखवमिता अष्टोष्माने र्दूकलेधति बुधस्य शुक्रयोस्तु संक्रांतिघटीकानयने सूर्यगतिरेवहारः कल्प्यस्तत्प्रतिबल्पत्वा त्रयोः वासनाभाष्ये हि बुधस्य क्रांतिरवेराशन्नावेव कदाचिदग्रतः कदाचित्पृष्टतः तस्यानुचराविवसदावृत्ते तौ दृश्येते, तत्सयोरपि रविभगणतुल्याएवभगणा इत्युपपन्नमिति भास्करेण भिहितत्वात् पठ्यमानानु गतिस्तत्क्रीय्याबयोः शीघ्रफलानयनार्थंवा सनासिद्धान्तीयैः कल्पिताः तरेवं ग्रहगतयइमाः र चं मं बु गु शु श अतो यथोक्त प्रकारेण साधिताः पुण्यकालघटिकाः सूर्यस्य त्रयस्त्रिंशत् २९ ४९ ०० · २ ३२ २२ ५१ २५९ ५९ २२२ घटिका एव चंद्रस्य द्वे घटिके षड्विंशतिः पलानि भौमस्य नवघटिकास्तु ७ ३५ १२ ६२ ७२· २७२· २ त्वारिपलानि पलानि बुधस्य षट्घटिका विंशतिपलानि गुरोरष्टाशीतिघटिका एवं वक्रस्य नवघटिका अष्टौ पलानि षट्शूनेः षष्ट्यधिकशतं घटिकाः पूर्वापरकालौ मिलित्वा पुण्यकाल इत्यर्थः यथा सू चं मं बु गु शु श अत्रवासनाप्रागुक्ता एतदर्थ नाद्याः प्राक् परतः च पुण्याः अत्र ग ३३१· २१· ५२· ६२ ७७ १· ५ २५· २ णि तागतघटीपलेषु लिखित जैमिनिवाक्य वक्वचित्किंचित्पातभेदो ··२२ ६२ ७२२· २०८ ६२· · २ सू चं मं बु बृ शु श घटिकाभेदस्तु सगीत्स्यष्टीकृतिवशातः युक्तंचैतत् आकाशे २२६२· २२ ४२ ३२ ४४ २७ २७ · २ हिवेधादिनास्पष्टाएव खगादृश्यंते नमध्यमाः दिनद्वयस्पष्टखगा २३· २२ ३२ ३२ २२९· २३ ४२ · २ तत्कालः स्फुटस्तुस्फुटभुक्तिबिंबैरिति अपिशब्दात्सूर्याचंद्रमसोर्ग्रहणं तथा सति मध्यमापेक्षायां स्पष्टगतिबिंबयो रुपचयस्य च यसाम्येस्तत्तद्घटिकानामप्युपचयापचयसाम्यानिक्रमेण पतंति तेषां चानियतत्वात्पद्ये उपनिबंधायोगात्तीर्णैर्नियतमध्यमगत्या सूर्यादीनां ग्रहाणां पुण्यकालघटीरानीयोपनिबंधः कृतः अत्र मत्कृतं पद्यं नाड्यो रामगुणा ३३ रवेरथविधोः षड्बोः पलैर्युग्मयुग् २१ ३६ भौमस्याब्धिपलैर्युता नव ५ १४९ विदो युक्ताः पलैः खाश्विभिः षण्ना ड्योऽह २२·२ एगज्ञाग्गुरो ७७ २ रथभृगोर्नंदाः पलैरष्टभिः २९

राम.
६

१८। पुण्याः स्युः खरूपाः शनेरुभयतो राश्यन्तयोः संक्रमे अतो योज्ज्ञेमिति वाक्ये सार्द्धं स्वात्मत्वः पलसन्नयुक्ता गौरि
तिपाठे माधवादिभिरपाठि तथा हेमाद्रिणापि द्विनागता इति पदं नागा अष्टौ द्विरावृत्ता नागा द्विनागाः षोडश ना
डिकाः शनैश्चरसंक्रान्तौ पुण्यकाल इति याख्यातं चिन्त्यमुभयमपाकृतं भवति तथा च रामचंद्राचार्या अपि कालनि
र्णयदीपिकायां हेमाद्र्याद्युक्तमर्थं स्वग्रन्थे नोपनिबध्नन्ति स्म त्योऽजयोऽज्ञेयाः तस्मात्सर्वग्रहाणां राश्यन्तद्वय
योः संक्रान्तिषु दिनरात्रिविष्णुपदादिभेदेन सूर्यसंक्रमणवन्निर्णयो ध्येयः पुण्यकालनास्ति भास्करोपि रवेरुक्ता
ताः पुण्यतमा इति वदं श्चंद्रादिसंक्रान्तिनाड्यः पुण्या इत्यसूचयत् अनिष्टायेनेन मविष्टना वितिपाणिनिवचना
नुग्रहः स्वसंक्रान्तिगोमिश्रफलं विधत्ते इति सूर्यादिसंक्रान्तिसाधारणं तत्र सकलसंक्रान्तिषु दिनरात्रिविष्णुप
दादिभेदेन सूर्यसंक्रमवन्निर्णयो ध्येयः एतत्संक्रान्तिमान्यता हि गुर्जरदेशेऽस्तीत्यलं प्रसक्तानुप्रसक्तेन इति स
कलग्रह संक्रान्तिनिर्णयः अथैवं निरयनांशसंक्रान्तिपुण्यकालमभिधायेदानीं सायनांशसंक्रान्तिं सपुण्यकाल
मुपजातिकयाह तथायनांशाः खरसाहतास्त्वस्य षष्ट्यार्कगत्या विहृतादिनाद्यैः मेषादितः प्राक्चलसंक्रमाः स्युः
दानेजपादौ बहुपुण्यदास्ते तथागणेयत्रा यथा राशिसंक्रमा बहुपुण्यदास्तथा चलसंक्रमा अपीति व्यवहिता
स्तथा शब्दः अयनांशाः षष्ट्या गुणाः स्पष्टया सूर्यगत्या विहृता लब्धा दिनघटीपलैः कृत्वा मेषादिद्वादशराशिसं
क्रान्तिकालात्प्राक् चलसंक्रमाः स्युस्ते चलसंक्रमा दाने ब्राह्मणेभ्यो दक्षिणादाने जपादौ जपहोमश्राद्धादौ बहु
पुण्यदा भवंति तदुक्तं वसिष्ठसिद्धान्ते चलसंज्ञकं तनिग्मांशोः संक्रमो यः स संक्रमः अज्ञातगलस्तु न खराशिसंक्रान्ति
रुच्यते इति पलभाः अयनांशसंस्कृतो भानुर्गोले चरति सर्वदा अमुख्या राशिसंक्रान्तिस्तस्य कालविधिस्तयोः मा
नदानजपश्राद्धव्रतहोमादिकर्मभिः सुकृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते इति रत्नमालायां यावद्भिरंशैरयनच्युतिः
स्यात्तद्भोग्यकालेन दिवाकरस्य च्युतिर्भवेद्विष्णुपदादिकानां रहस्यमेतन्मुनिभिः प्रदिष्टमिति ज्ञा बालिरपि संक्रान्ति
षु यथाकालः तदीये प्ययनेन तथा अयने विंशतिः पूर्वं मकरे विंशतिः परेति अयने चलसंक्रमे अत्र चलसंक्रमाख्ये

मुहू॰
सं॰ प्र॰
७

मकरायणे पूर्वा विंशतिघटिकाः पुण्यकालः मकरसंक्रांतौ तु परा विंशतिघटिकाः पुण्यकालः मकरव्यतिरिक्ते,
कादशसु चरसंक्रमेषु तत्तत्संक्रमवत् पुण्यकालो ज्ञेय इत्यर्थः इति माधवो व्याख्याती अयनांशानयनं तु पूर्वं सिद्धांते त्रिं
शत्कृत्यो युगे भानां चक्रं प्राक् परिलंबते तद्गुणाद्भूदिनैर्भक्ताद्युगणाद्यदवाप्यते तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः
प्राक्चक्रं चलितं हीने छायार्कात्करणागते अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके इति तेच सांप्रतं प्रोद्दशायनांशाः
धनगताः संति छायार्कात्करणगतसूर्यस्याल्पत्वात् अतएव प्रागित्युक्तं ग्रंथकर्त्रा अत्र प्रागित्युपलक्षणं कदा
चित्संक्रांतिकालात्यातोप्ययनांशवशेन चलसंक्रमसंभवात् तथाच पश्चाच्छेषैस्तथाधिक इत्युक्तं वेदांगज्योति
षेपि प्रपद्येते श्रविष्ठादौ सूर्याचंद्रमसावुदक् सार्पार्द्धे दक्षिणार्कस्तु माघश्रावणयोः सदेति तत्र मेषादिसंक्रांति
कालस्य सौरसावनघटिकात्मकस्य अयनांशानां च सौराणाम तुल्यजातीयत्वाद्योगवियोगौ न स्तः इत्ययनांशा
नां दिनीकरणया नु प्रतीतः यदि सूर्यस्य स्पष्टगतिभोगेन षष्टिघटिकात्मकं दिनं तं लभ्यते तदायनांशैः किमिति
तत्रायनांशायनं षष्टिर्गुणकः सूर्यस्य स्पष्टगतिभाजक इत्युपपन्नं लब्धानि सौरसावनदिनानि सघटीपलानि अतस्तु
ल्पजात्या [illegible] योगवियोगो वा कार्यः ननु चैकस्यैव सूर्यस्यैकस्मिन्नेव राशौ राशिसंक्र
मणे चलसंक्रमणं च कथं संभवति अतः स्वकक्षास्थितांशभागस्य द्वादशधा विभक्तस्य राशिरिति संज्ञा तत्र
विमंडलस्य तत्तद्राश्यादिमप्रदेशस्पर्शो राशिसंक्रमणमित्युच्यते तस्मिन्नेव राशौ चलसंक्रमस्तु कीदृश इति चेत्
शृणु ईश्वरेच्छा लोकादृष्टवशात्तत्तद्राश्यादिभागस्य सूर्यतेजः संपर्कः चलसंक्रमो मंडलमध्यसंपर्कस्तु राशि
संक्रम इति विषयविवेकः तद्यथा रथ्यायां प्राक्पश्चान्नीयमानस्य दीपस्याग्रे दीपप्रभा यस्मिन् प्रदेशे गच्छति
तस्मिन्नेव प्रदेशे लक्षणांतरेण दीपोपि गच्छति एवं सर्वेषामपि ग्रहाणां चलसंक्रमो द्रष्टव्यः एवं चलसंक्रमस्य पु
ण्यत्वमुक्तं रोमशसिद्धांतेपि दिनरात्रिप्रमाणानां निर्णयो न भसंक्रमात् यतः शाकलकर्माणि पुण्यपातश्चलसं
क्रमः नन्वेवमयनसंक्रमस्य मुख्यत्वे तेन मानेन पंचांगगणनास्यात् चंद्रादीनामप्ययनचलनदर्शनात् नचसा

सा६

रामः
७

यनांशाभ्यां निरयनांशाभ्यां वा सूर्याचंद्रमोभ्यां तिथ्येतत्तुल्यत्वादत्र पंचांगगणने निवाच्यं अश्विन्यादिभानां विष्कंभा
दियोगानां च विसंवादात् किंच सायनसंक्रमरहितस्य चांद्रमासस्याधिमासत्वव्यवहारप्रसंगः विवाहादौ च सौर
गणनाप्यनेनाभिमानेन स्यादिति चेत् उच्यते सायनसंक्रमस्तु पुण्यकालार्थमेवोपयुज्यते न सर्वत्र स्नानदानजप
श्राद्धेति परिगणितविषयफलस्य वाक्यालोचनात् तेन पंचांगगणना न्यूनाधिमाससौरमासाधिकमप्यनेनमा
नेन भवति तथा सति यात्रादिमुहूर्तेषु भरणीव्यतीपातादिदुष्टयोगानां गुरुपुष्यादिशुभानां च व्यवहारो निरयने
नैवोपपद्यते सायनेन किंच सायनेन गणनायां सर्वथा ग्रहणविसंवादः तद्यथा षोडशोत्तरपंचदश १५ १६ प्राती
मिते शालिवाहनशाककाले वैशाखशुक्लपूर्णिमायां पंचत्रिंशन्नाडीमितायां इंदूपराग उपलब्धः तत्र चंद्रः ६।२।२६
२२।७ राहुः ५।२।२।५९।२ अत्र निरयनगणनया शरांगुलानि १५ मानैक्यखंडं ३ ग्रासांगुलानि ८ यद्यत्रायनांशान्
योजयित्वा शर आनीयेत तदा शरांगुलादिः ३।२२ अस्य मानैक्यखंडाधिक्याद्ग्रहणं नायातीति सर्वजनप्रत्यक्षो विसंवा
दः सायनगणनया त्वयोग्येऽपि काले नागतत्वात् तत्र समीप एवोपलभ्यते प्रत्यक्षतः सायनत्वे हि ग्रहः कदाचिद्
कनक्षत्रांतरे नक्षत्रद्वयांतरे वोपलभ्येत सूर्यचंद्रयोस्तत्र ज्ञो बाहुल्यान्नक्षत्रे तेऽतः परिभवान्नक्षत्रसन्निधौ उपलंभाभा
वो यद्यपि तथापि क्षीणचंद्रस्याप्युपलंभो दृश्यते एवं संहितासु मीनशनैश्चरादिविषयकदुष्टफलानि एकरा
श्युपवस्थितग्रहयोगफलानि च निरयनेनैव तथा वसिष्ठसंहितायां षट्पौष्णभाद्यादशरौद्रधिष्ण्यास्तराधिपाज्ञा
निनचक्रभोग पूर्वार्धमध्यापरभागतद्ध्वं भुंक्ते खिलव्योमचरास्तथैवेति ग्रहाणां पूर्वार्द्धमध्यापरभागयोगित्वमपि
निरयनेनैवोपलभ्यते तस्मान्निरयनगणनयैव सर्वोपि व्यवहारो युक्तः ननु सायनगणनादत्र तिलाञ्जलिरिति चेत्
उच्यते सायनगणना हि नियतविषया उक्तं च अयनांशाः प्रदातव्याः लग्ने क्रांतौ चरागमे सन्निभे चित्रभे पाते तथा
दृक्कर्मणोर्द्वयोरिति सूर्यसिद्धांतेऽपि तत्संस्कृद्ग्रहात्क्रांतिच्छायाचरदलादिकं स्फुटं दृक्तुल्यतां गच्छेत् अयने विषुव
द्द्वये इति आदिशब्देन लग्नमतो युनांशानां वासनासिद्धनियतविषयत्वात् द्वयोरपि मानयोरसंकीर्णो व्यवहार इ

मु.दी. ति सर्वमनाकुलं पुण्यकालस्तूभयविधसंक्रमे ज्ञेयः पूर्वलिखितवसिष्ठादिवाक्यस्वरसात् यत्तु वसिष्ठसिद्धांते पुण्य
सं.प्र. दो राशिसंक्रांतिं केचिदाहुर्मनीषिणः नैतन्मम मतं यस्मान्नस्पृष्टा क्रांतिकक्षयेति तदयनसंक्रमपुण्यकालाति
८ स्तुतिपरं न तु राशिसंक्रांतिपुण्यकालनिराकरणार्थमन्यथा दिनपतिसंक्रमणात्प्राक्षोडशनाड्यः पुण्यका
लः सः परतः सः परतः षोडशनाड्यः सर्वत्र स्नानदानकार्येष्विति स्वसंहितोक्तराशिसंक्रमणपुण्यकालप्रतिपादक
वचनस्यानेन सह विरोधोऽपरिहरः स्यादित्यलमतिप्रसंगेन अथ संक्रांत्युपयोगित्वाज्जघन्यबृहत्समनक्षत्राणि उप
जात्याह समं मृदुक्षिप्रवसुश्रवोग्निमघाश्विपूर्वात्रयमं बृहत्स्यात् ध्रुवद्विदैवादितिभं जघन्यं सार्पाम्बुपार्द्रानिलश
क्रयाम्याः मृदूनि मृगरेवत्यनूराधाचित्राः क्षिप्राणि अश्विनीपुष्यहस्ताः वसुः धनिष्ठा श्रवः श्रवणः अग्निः कृत्तिकाः
मघाप्रसिद्धा त्रिपूर्वाः पूर्वाफल्गुनी पूर्वाषाढा पूर्वाभाद्रपदाः असृपो राक्षसः राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्र
प आशर इत्यमरः तस्य भं मूलं अत्र समाहारद्वंद्वः एतानि पंचदश भानि समसंज्ञानि ध्रुवाणि रोहिणी उत्तराः द्वि
दैवं विशाखा अदितिभं पुनर्वसुः एतानि षड्भानि बृहत्संज्ञानि सार्पमश्लेषा अंबुपः शततारका आर्द्रा प्रसिद्धा अनि
लः स्वातिः शक्रो ज्येष्ठा याम्यं भरणी एतानि षड्भानि जघन्यसंज्ञानि उक्तं च नारदेन ताराजघन्याः सार्पेंद्रवातार्द्रांतक
तोयपाः ध्रुवादितिद्विदैवत्यं बृहत्तारा परा समा इति वसिष्ठेनापि जघन्यधिष्ण्यानि जलेशसार्परौद्रेंद्रयाम्यानि
लदैवतानि अथ ध्रुवेंदुधिष्ण्यान्यदितिद्विदैवस्थिराणि शेषाणि समाख्यानीति अथ संज्ञाप्रयोजनमप्युपेंद्रवज्रयाह
जघन्यभे संक्रमणे मुहूर्ताः शरेंदवो बाणकृता बृहत्सु खरामसंख्याः सममे महार्घसमर्घसाम्यं विश्लिष्टदर्शनेऽपि जघ
न्यनक्षत्रे यदि संक्रमणं तदा शरेंदवः पंचदश मुहूर्ता ज्ञेयाः बृहन्नक्षत्रे संक्रमणे सति बाणकृताः पंचचत्वारिंशन्मु
हूर्ता ज्ञेयाः समनक्षत्रे संक्रमणे सति खरामसंख्याः त्रिंशन्मुहूर्ता ज्ञेयाः उक्तं च नारदेन तासां प्रमाणं घटिकास्त्रिं
शन्नवति षष्टय इति अतएव त्रिंशद्घटिकाः पंचदश मुहूर्ता नवतिघटिकाः पंचचत्वारिंशन्मुहूर्ताः षष्टिघटिकास्त्रिं राम.
शन्मुहूर्ताः स्युरित्यर्थः अथास्य फलमुच्यते महार्घसमर्घसाम्यमिति यदा पंचदशमुहूर्ता संक्रांतिस्तदा साम्यं न ६

महार्घं न समर्घं किंतु यथास्थितमित्यर्थः इदं तु मुहूर्त्तो नान्यूनाधिकसमभावाज्ज्ञायते उक्तं च संवित्प्रकाशे मुहू
र्ताः पंचदश १५ तुल्याजघन्यानां पराभिधावहतां पंचवेदाः ४५ समानां खवह्नयः ३० पंचेंदुभुमुहूर्त्तैस्तु द्विभिर्हीनैर्वि
संक्रमे पंचाब्धिषु समहार्घं त्रिंशत्सु समतामेतीति अथ विधुदर्शनेपि इति चंद्रदर्शनेप्येवमेव फलं वाच्यं अयमर्थः
यदि ज्ञत्यनक्षत्रे चेच्चंद्रोदयस्तदा समर्घं समनक्षत्रे चेच्चंद्रोदयस्तदा साम्यमनस्य इह न्यधान्यं ऊहते समर्घं तदू
न्नधिष्ण्याभ्युदितो महार्घं समेषु धिष्ण्येषु समं हिमांशुं वदंत्यसंदिग्धमिदं महांतः वसिष्ठोपि ज्ञात्वैवमेवं मणिजी
वधान्नमूल्योर्णकर्पूररसादिकानां अर्घं वदेज्ज्यौतिषिकः प्रजानां समर्घवस्तूनमसंग्रहार्थमिति अथ प्रसंगात्क
र्कसंक्रांतौ माहृविंशोपकाननुष्टुभाह अर्कादिवारे संक्रांतौ कर्कस्याहृविंशोपकाः दिशानखामत्राः सूर्याध्ट
त्याष्टादशसायकाः कर्कस्य संक्रांतौ सूर्यादिवारे सत्यामेते वक्ष्यमाणा अहृविंशोपका ज्ञेयाः तद्यथा रविवा
रे दश सोमवारे विंशतिः भौमेऽष्टौ बुधे द्वादश गुरौ धृत्याष्टादश शुक्रेप्यष्टादश शनिवारे कर्कसंक्रांतौ सत्या
मष्ट विंशोपकाः पंचेत्यर्थः उक्तं च अथ कीदृशस्य रवेः संक्रमो जातसंज्ञाफलमिंद्रवज्रयाह स्यान्नौतिले नागचतु
ष्पदे रविः सुप्तो निविष्टस्तु गरादिपंचके किंस्तुघ्न ऊर्ध्वः शकुनौ सकौलवे निष्टः समः श्रेष्ठ इहार्घवर्षणे करण
नि भद्राव्याख्याने मयोक्तानि तत्र रविः नौतिलनागचतुष्पदाख्यकरणे सुप्तः सन् संक्रमितः स्यात् गरादिपंच
के गरवणिक्भद्राववबालवाख्यकरणेषु निविष्ट उपविष्टः सन् संक्रमितः स्यात् किंस्तुघ्नशकुनिकौलवाख्ये
करणेषु ऊर्ध्व ऊर्ध्वस्थितः सन् संक्रमितः स्यात् इह करणाधिकरणकसंक्रांतौ रविरर्घवर्षणे अर्घस्थले वर्षणे
दृष्टे अनयोः फलज्ञानत्वादुक्तं विपक्रमात् निष्टः समः श्रेष्ठः स्यात् अयमर्थः सुप्तरविसंक्रमोर्घवर्षणधान्ये
ष्वनिष्टः महार्घदृष्ट्यभावधान्याभावकारको भवति एवं निविष्टरविसंक्रमो र्घवर्षणधान्येषु समो न शुभो नाप्यशु
भः तथोर्ध्वरविसंक्रमोर्घवर्षणधान्येषु श्रेष्ठः समर्घदृष्टिबाहुल्यधान्यबाहुल्यकारक इति उक्तं च नारदेन निविष्टो
वणिजे विष्ट्यां बालवे च ववे गरे कौलवे शकुनौ भानुः किंस्तुघ्ने चोर्ध्वसंस्थितः चतुष्पान्नौतिलेनागे सुप्तः संक्रांतिं करोति

मुहू॰ सं॰प्र॰ २०

इद्रूण वधाद्यवस्था कथिता मुनींद्रैः एवं च संक्रमकाले यानि वस्त्राशनवाहनादीनि अभिहितानि आदिशब्देना
नुलेपनजातिपुष्पाणि तेषां नाशो भवेत् च पुनः हृदुपजीविनां वस्त्रादिहृदुपजीविनां नाशो भवेत् स्थितोप
विष्टस्वपतां च स्यान्नैति लक्ष्म्यादिना सुप्तत्वादीन्युक्तानि तद्गुणविशिष्टानां नाशः स्यादित्यर्थः उक्तं च नारदेन आयु
धं वाहनाहारीयजातीयं धनं चयत् सुप्तोपविष्टतिष्ठंतः लोकेऽनयमाप्नुयुरिति अथ संक्रांतिवशेन प्रतिमनुष्यं
शुभाशुभफलमुपजात्याह संक्रांतिधिष्ण्याधरधिष्ण्यतस्त्रिभे स्वभे निहक्रं गमनं ततोंगभे सुखं त्रिभे पीडनमंगभे
शुभं त्रिभेर्थहानी रसभे धनागमः संक्रांतिधिष्ण्ये नक्षत्रे स्याद्यतो धरधिष्ण्यं पूर्वं नक्षत्रं तस्मात्स्वजन्मनक्षत्रं गण्यं यतः
चेत् प्रथमत्रिभे भवति तदा गणना च स्यात् ततः प्रथमत्रिकादनंतरमंगभे षण्नक्षत्रेषु यदि शुभं स्यात् तदा सुखं
स्यात् ततस्त्रिभे स्वभे धनागमो द्रव्यप्राप्तिः स्यात् इत्यर्थः उक्तं च नारदेन संक्रांतेर्ग्रहणर्क्षं वा जन्मन्युभयपार्श्वयोः ने
क्षत्रत्रयं षट्शुभदं पर्यायाच्च पुनः पुनः हानिर्वृद्धिः स्थानहानिस्तत्प्राप्तिरिति चक्रमात् संक्रांतेर्यन्नक्षत्रं ग्रहणनक्षत्रं वा
यदि जन्मभं भवेदथवा ताभ्यामुभयपार्श्वगतं जन्मभं भवेत्तदानिष्टमेवं नक्षत्रत्रयं निषिद्धं ततो नक्षत्रषट्कं शुभदं त
तस्त्रिकेर्थहानिः ततः षट्के वृद्धिः ततस्त्रिके स्यात् हानिः ततः षट्के स्थानप्राप्तिरिति अत एव पठंति दाक्षिणात्याः
संक्रांतिधरनक्षत्राद्गण्ये जन्मभावधि त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कमिति क्रमात् पंथा भोगो व्यथा वस्त्रं हानिस्त्रि
विपुलं धनमिति त्रिकं शुभं षट्कमशुभं इति फलितोर्थः अत्राशुभफलदायां संक्रांतौ सत्यां दानमाह नारदः तिलो
परि लिखेच्चक्रं त्रित्रिशूलं त्रिकोणकं तत्र हेम विनिक्षिप्य दद्याद्दोषापनुत्तये इति अत्र संक्रांतिरिति
एवं संक्रांतिसंबंधिफलमभिहितं अथ कार्यविशेषग्रहविशेषबलमभिहितं अथ कार्ये विशेषे
सामान्यतः संक्रमणमानग्रहबलं चोपजात्याह नृपेक्षणासवेक्षितिश्च संगरः शास्त्रविवाहागमदीक्षा
णे रवेः वीर्यथ नाराबलतो विधुर्विधोः पलाद्रवि साद्बलतः शुभाः परे रवेरिति लघुश्लोपपंचमी रविमारभ्य
त्यर्थः रवेः सूर्यस्य वीर्यबले सति सूर्यवारे वार्यपेक्षणं राजदर्शनं विधेयं एवं चंद्रादावपि व्याख्येयं ततः चंद्रे सर्वं

२ ३ २ ६ ६ २ ३ २
इति संक्रांति चक्रम्

राम॰ २०

दिकरणंशुभमित्यर्थः तन्नक्षत्रियादिविषयं गोदावर्यास्तो दक्षिणवासिविषयं वा तदप्युक्तं तत्रैव कारग्रेहेष्टनाड्यो न निंद्ये
तियद्वचः तन्नक्षत्रियादिविषयं गोतम्यायाम्यतस्तथेति गोतमी गोदावरी अत्रार्थे आर्षमूलं मृग्यं इयं चाश्विन्यादित्रिनाडीग
वादिष्वपि अनिष्टाप्रभुपरणागमनादौ तु शुभमेव उक्तं चस्वरोदये एकनाडीस्थिता यत्र गुरुर्मंत्रश्च देवता तत्र द्वेषं रुजं मृत्युं क्र
मेणफलमादिशेत् प्रभुःपरंपागमनामित्रे देशं ग्रामं पुरं गृहं एकनाडीस्थितं भव्यं विरुद्धं वेधवर्जितमिति अत्र नाडीवेधे चर
णवेधे आवश्यकविषयः स्याद्यः एतदप्युक्तं तत्रैव आद्यांशे न चतुर्थांशं चतुर्थांशे न चादिमं द्वितीये न तृतीयं तु तृतीये
न द्वितीयकं एवं भांशाव्यधो येषां जायते वरकन्ययोः तेषां मृत्युर्न संदेहः शेषांशाः स्वल्पदोषदा इति तत्राप्यावश्यकत्वे गु
रुः दोषापनुत्तये नाड्याग्मृत्युंजयजपादिकं विधाय ब्राह्मणेभ्यश्च वस्त्रधेनुकांचनादिना हिरण्मयीं दक्षिणां च दद्यात् द
र्णादिकूटके गावोन्नं वसनं हेम सर्वदोषापहारकमिति एवं सर्वसंमतत्वाद्दुष्टाः कूटभेदा अभिहिता नान्ये माहेंद्रगोडदेवो
चमालवेरऊसंज्ञकमित्यादि बादरायणवाक्येनक्तानां तन्नदेशविषयतापादनात् तेषु कूटभेदा वसिष्ठसंहितायामस्म
त्पितृचरणकृते टोडरानंदे च सामान्यविशेषभावसहिता द्रष्टव्याः अथ प्राच्यसंमतं वर्गकूटं भार्ययाह अकचटतपय
शावर्गखगेशमार्जारसिंहशुनां सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ नामकमेप्रकरणे चूलेपोलापदेशेषु आय
इत्य लूरूपाः सर्वे वर्णा अस्माभिरभिहितास्तत्राद्यन्नपो वर्गः कुचुटुतुपुवर्गा इति पंच वर्गाः एकोयवर्गः अन्त्यःशवर्गः ए
वमष्टौ वर्गाः तत्रावर्गः खगेशस्य गरुडस्य कवर्गो मार्जारस्य चवर्गः सिंहस्य टवर्गः शुनः कुक्कुरस्य तवर्गः सर्पस्य पव
र्गः आखोर्मूषकस्य यवर्गो मृगस्य शवर्गः अवेर्मेषस्य अत्र निजात्स्वस्मात्पंचमो वैरी एषां तेन तथा ज्ञाः गरुडसर्पयोः
मार्जारमूषकयोः सिंहमृगयोः श्वमेषयोः परस्परं महावैरमित्यर्थः अत्र स्त्रीपुंसयोर्नक्षत्रद्वयं भद्र्यमक्षकवर्गःचेद्भवे
त्तदाशुभं यदा त्वेकवर्गे उदासीनवर्गे वा स्यात्तदाशुभमेव एतच्च स्वामिसेवकयोरपि विचार्यं उक्तं च ज्योतिर्निबंधे वर्गेशाला
र्क्षोमार्जारसिंहश्वव्यालमूषकाः मृगश्वपशाकलत्रस्ववर्गात्पंचमारिपुरिति अथैवं कूटानभिधायेदानीं नक्षत्रराश्यै
क्ये विशेषं शालिन्याह राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव नाडीदोषो गणानांश्च दोषो नक्षत्रैक्ये पादभे
दे शुभं स्यात् द्वयोः स्त्रीपुंसयोः एकराशित्वे सति यदि भिन्नमृक्षं नक्षत्रं स्यात्तदा नाडीदोषाणां च राक्षसमनुष्याणां च दोषो ना

मु॰ दी॰
वे॰ प्र॰
६२

स्ति यथैकस्मिन्नेव कुंभराशौ पूर्वाभाद्रपदापादत्रयं चेत्येवं द्वयो नक्षत्रभेदः तथैव नक्षत्रैक्ये राशियुग्मं राशि
द्वयं चेत्स्यात्तदापि प्रागुक्तो दोषो न स्यात् उपलक्षणत्वान्नाडीदोषोपि न भवेत् यथा एकस्मिन्नेव नक्षत्रे पूर्वाभाद्रपदाख्ये प्र
थमपादत्रयं कुंभे तुरीयचरणं मीने इत्येवं द्वयो राशिभेदः यदाह नारदः एकराशौ पृथग्धिष्ण्ये दंपत्योः पाणिपीडनं उत्तमम
ध्यमं भिन्नराशौ एकर्क्षगयोस्तयोः एकर्क्षे चैकराशौ च विवाहः प्राणहानिद इति वसिष्ठः दंपत्योर्जन्मभे चैकं राशौ पादनिध
ने तयोः एकस्य च न यथाद्वादाह किंचिद्भेदेपि वा न वेति किंचिद्भेदे नक्षत्रभेदे राशिभेदे न गर्गः एकराशिं विना भांउ योगमायो
विवर्जयेत् न दोषस्त्वेकराशिस्थस्य भकूटे न्यषष्ठष्टके इति भृगुरपि दंपत्योरेकराशिश्चेन्नक्षत्रं पृथक् यदा भवेत् विशिष्टा
क्तो विवाहः स्यान्न गणनाडीं न योजयेदिति अत एवाह केशवार्कः नक्षत्रमेकं यदि भिन्नराश्योरभिन्नराश्योर्यदि भिन्नमृ
क्षं प्रीतिस्तदानीं निविडा न नाडी शुभा कृत्तिकारोहिणिवन्न नाडीति चतुर्थचरणस्यायमर्थः चेद्यदि कृत्तिकारोहिणीव
त्स्यात्तदापि नाडीदोषो न स्यात् उपलक्षणत्वाद्गणदोषोपि यथा कृत्तिकारोहिण्योरेकनाडीत्वेपि गणदोषेपि तत्फलं चि
त्वाशुभफलं नैव स्यात् अत्रापि प्रथमतः पुंतारा पश्चिता द्वितीया स्त्रीतारेत्यपि विशेषो ध्येयः यदाह गर्गः एकराशौ पृ
थग्धिष्ण्ये पुंतारा प्रथमा भवेत् अतीव शोभना प्रोक्ता स्त्रीतारा चेत्तु शोभनेति तदेवं केशवोक्त्या येन यत्र नाडीगणदोषा
द्यभावो यथा रोहिणीमृगयोर्हस्तचित्रयोर्वा तत्र पाणिपीडनं शुभं स्यात् इति किं वाच्यमित्यर्थः अथैकराशिनक्षत्रे पुंवा
दमाह नक्षत्रैक्ये इति स्त्रीपुंसयो राशैक्ये नक्षत्रैक्ये यदि चरणभेदो यथा भरण्यां प्रथमपादे पुंसो जन्म द्वितीयपादे स्त्रियाः
तदापि शुभं कल्याणं स्यात् तदुक्तं केशवार्केण पराशरः प्राह नवांशभेदादेकर्क्षराशेरपि सौमनस्यमिति सौमनस्यं प्री
तिः वसिष्ठेनापि एकर्क्षे एकांशे समदोनी भवति विवाहः सुतार्थसंपत्यै यद्युभयोरेकर्क्षं भवति यदा चांशको भिन्न इति एतच्च सं
कोच विषयं वेदितव्यं तथा जगन्मोहने एकर्क्षे चैकराशौ च विवाहस्त्वशुभप्रदः संकोचे तु तदा कार्यो भिन्नपादो यदा तयो
रिति अत्रापि विशेषो ज्योतिर्निबंधे विधिरत्ने रोहिण्याद्रा मघेंद्राग्नि निष्ठा श्रवणपौष्णभं उत्तराप्रोष्ठपाच्चैव नक्षत्रैक्येपि
शोभना इति इंद्राग्नी विशाखा तदेतत्स्पष्टमुक्तं नैवं कालनिर्णये विशाखिकार्द्रा श्रवणप्रजेशेति ष्ण्यात्य तत्पूर्वमथाप
शास्ता स्त्रीपुंसतारैक्यपरिग्रहेतु शेषा विवर्ज्या इति संगिरंते इति शेषास्तारा इत्यर्थः अत्र द्वयोरन्यतरस्य वर्जिकराशिनक्ष

राम
६२

ज्ञादाने उपायमाह वसिष्ठः अज्ञातजन्मनां नृणां नामभे परिकल्पना तेनैव चिंतयेत्सर्वं अश्विन्यादि जन्मवत् जन्मभं जन्म
धिष्ण्येन नामधिष्ण्येन नामभं व्यत्ययेन यद्दोयाद्यदं मत्यानिर्धनप्रदमिति ऊर्यात्वाउशाकर्माणि जन्मराशौ बलान्विते सर्वा
ण्यन्यानि कर्माणि नामराशौ बलान्विते इति बृहस्पतिरपि व्यवहारे राजसेवासग्राम ग्राम धाम मंत्रेषु ज्ञाते पि जन्मराशौ फल
मुक्तं नामराशिवशादिति नाम्नः सकाशाज्जन्मनक्षत्रं ज्ञानं स्वरोदयाभिहित शतपदचक्रांतर्गतस्वीयनामादिवर्णवशात्
ज्ञेयमिति यतु अकारादिवर्णे नास्ति ऋषभादिना महचदृश्यते तत्र यथासंप्रदायं व्यवस्था अथ विवाह एवं मासशु
२५० द्धिं दंपत्योराशिकूटस्य शुद्धिं चोक्त्वेदानीं निर्दोषं दिनलग्नविचारं वक्ष्यति तत्रैकविंशतिः सर्वसंमता दोषा नारदेन परिगणि
ताः एकविंशतिदोषाणां नामरूपफलानि च पितामहोक्तं संवीक्ष्य तानि बुद्धेष समासतः पंचांगशुद्धिरहितो दोषस्त्वाद्यः
प्रकीर्तितः उदयास्तशुद्धिहीनो द्वितीयः सूर्यसंक्रमः तृतीयः पापषड्वर्गो भृगुः षष्ठः कुजोऽष्टमः गंडांतं कर्तरी रिफ षडष्टं
उष्ट्रसंग्रहः दंपत्योरष्टमं लग्नं राशिर्विषघटीनथा दुर्मुहूर्तो वारदोषः खार्जूरिकसमांघ्रिभं ग्रहणोत्पातभं क्रूरविद्धर्क्षं
क्रूरसंयुतं कुनवांशो महापातो वैधृतश्चैकविंशतिरिति अन्ये तु दश दोषा उक्ताः वेधः च लत्ता च तथा च पातः खार्जूरयो
गाद्दशयोगचक्रं युतिश्च जामित्रमुपग्रहाश्च बाणाख्यवज्रौ दश चैव दोषा इति व्यवहारोच्चयेभिधानात् दुर्मुहूर्तो दाव
यमेत्यादिः वारदोषः कुलिकादिः क्रूरसंयुतमित्यस्योपलक्षणत्वात् अकालवृष्टिनामको पि दोषो गृह्यते यदाह वसि
ष्ठः पंचांगशुद्धिरहिताश्चोत्पाताकालवृष्टिजा इति एषां दोषाणां क्रमेण विशेषफलविशेषमाह वसिष्ठ एव एकविंशन्म
हादोषास्त्वेते ब्रह्ममुखोदिताः कदाचिन्नैव सीदंति गुणानां कोटिकोटिभिः तस्मादेतेषु दोषेषु कदाचिन्नाचरेच्छुभं वि
वाहे विधवा नारी मरणं व्रतबंधने ग्रामनाशः प्रतिष्ठायां सीमंते गर्भनाशनं नवान्नभोजने मृत्युः कृषौ तत्फलनाशनं कृते
नौ शोगृहारंभे प्रवेशे पतिनाशनं यात्रायां कर्तृनाशः स्यात् युद्धयाने विशेषतः लभ्यते तु महत्स्वल्पे मध्वश्राद्धादिकर्मभिरि
ति ग्रंथकर्तातु दोषलक्षणस्य वक्ष्यत्वात् प्रथग्दोषनामानि नोक्तानि तत्र पंचांगदोषदुर्मुहूर्तवारदोषग्रहणोत्पातनक्ष
त्रदोषा आद्ये शुभाशुभप्रकरणे निरूपिता एवेति पुनर्नोच्यंते दुर्मुहूर्तवारदोषयोः पुनरभिधाने प्रयोजनं तत्रैवावद्यं वक्ष्या
मः अतोन्यान्दोषान्सलक्षणान्विवक्षुरादौ मासाख्यानिरपेक्षत्वेन सुगमं षड्वर्गदोषमाह कुजेज्यकेत्वादि चतुर्भिः पद्यैः तत्र गृहनवां

शस्वामिनश्चाहिमेनमंत्रभाषिलीहनेनाह कुजशुक्रसौम्यशशिसूर्यचंद्रज्ञाः कविभौमजीवशनिसौरयोगुरुः इहराशिपाःक्रि
मु.टी. यमृगास्यतौलिकेंदुमतोनवांशविधिरुच्यतेबुधैः अत्रलग्नादीनांलक्षणंनारदेनोक्तं त्रिंशद्भागात्मकंलग्नं होरातस्यार्धमु
.प्र. च्यते लग्नत्रिभागोद्रेष्काणोनवमांशोनवांशकः षड्वर्गाःकथिताह्येतेतेषामीशाश्चमेस्मृता इति तत्रैतेभौमशुक्रबुधचंद्रसूर्य
२२ बुधशुक्रभौमगुरुशनि गुरवःक्रमेणेह षड्वर्गेराशिपामेषादिराशीनांस्वामिनः क्रियेति क्रियोमेषः मृगास्यंमकरः तौलि
कंतुला इंदुभंकर्कः एभ्योराशिभ्योद्वादशस्वपिराशिषुनवांशविधिर्बुधैरुच्यते मेषोमेषादेव वृषोमकरादेव मिथुनेतु
लातः कर्कीकर्कादेव एवंसिंहेपिमेषादेव एवंकन्यादिष्वपिराशिषु मकरादितएवमेवधनुरादिष्वपीत्यर्थः यदाहनारदः
सिंहस्याधिपतिर्भानुश्चंद्रःकर्कटकेश्वरः मेषवृश्चिकयोर्भौमःकन्यामिथुनयोर्बुधः धनुर्मीनयोर्देवेज्यःशुक्रोवृषतुलेश्वरः
शनिर्मकरकुंभेशइत्येतेराशिनायकाइति नवमांशामेषसिंह मेषसिंहचापेमेषादयःक्रमात् क्रमाद्गोमृगकन्यासुज्ञेयाःस्यु
र्मकरादयः तुलामिथुनकुंभेषुस्युःक्रमेणतुलादयः अलिकर्कटमीनेषुक्रमात्स्युःकर्कटादयइति अथहोराविधिंगाय
त्रीछंदोभेदेनशशिरवस्त्वाहतेनाह समगृहमध्येशशिरविहोराविषमभमध्येरविशशिनोःस्यात् पंचदशभागात्मिकैका
होरासमराशिमध्येप्रथमाचंद्रस्यापरासूर्यस्यविषमराशिमध्येप्रथमारवेरपराचंद्रस्येत्यर्थः होरार्केंद्वोरोजराशौसम
मेचंद्रस्यसूर्ययोरितिनारदोक्तेः अथत्रिंशांशद्रेष्काणान्वसंततिलकयाह शुक्रज्ञजीवशनिभूतनयस्यबाणशैलाष्टपंच
विशिखाः समराशिमध्येत्रिंशात्मकाविषमभेविपरीतमस्मात् द्रेष्काणकाः प्रथमपंचमनवाधिपानांसमराशिमध्ये
क्रमेणप्रथमतःपंचानामंशानांशुक्रःस्वामी ततःशैलानांसप्तानांज्ञोबुधः ततोष्टानांजीवोगुरुः ततःपंचानांशनिः
ततोविशिखाबाणाःपंचतेषांभूतनयोभौमः शुक्रज्ञेत्यादिसमाहारद्वंद्वः विषमभेत्वस्मात्समराशेर्विपरीतं विशेषाश्र
वणात्स्वामिनोभागाःचविपरीताइत्यर्थः यथा प्रथमतःपंचानांभौमः ततःपंचानांशनिः ततोष्टानांगुरुः ततःसप्तानांबु
धः ततःपंचानामंशानांस्वामीशुक्रइत्यर्थः अयमेवत्रिंशांशसंज्ञइति यदाहनारदः कुजार्कीज्यज्ञशुक्राणांबाणेषुवस्वद्रि
मार्गणाः भागास्तुविषमेतेतुसमराशौविपर्ययादिति अत्रकेचिदाहुः तुविशेषे तेशाब्दोहिप्रथमाबहुवचनांतस्ततःप्र राम
थमातसमानाधिकरण्यानुरोधादानंतर्याच्चबाणादिकाभागाएवपरामृश्यंते नस्वामिनआनंतर्योद्भिन्नविभक्तिकत्वाच्च २२

तथा सत्ययमर्थः समराशेर्गात्तु विशेषाः तेनाणादिका भागादिपर्ययाद्व्यत्यस्तस्थिताः यथास्थितानामेव कुजादीनां
ज्ञेयाः यथा प्रथमतः पंचानां स्वामी भौमः ततः सप्तानां शनिः ततोष्टानां गुरुः ततः पंचानां बुधः ततः पंचानां शुक्र इत्यर्थः
मूलेप्येवमेव वक्तुमुचितं तत्कस्य हेतोः द्वयोरपि वैपरीत्यं उच्यते अव्ययानामनेकार्थत्वात् तोः समुच्चयार्थत्वांगीकरणा
त् कुजादयोपि समुच्चीयंते तथा सति बाणादिका भागाः कुजादिकाः स्वामिनोपि विपर्यस्ता ज्ञेया इत्यर्थः अत्रार्थे प्रमाणं
श्रुतकीर्तिवचनं यथा पंचाथ पंच चाष्टौ च सप्त च पंचैव चौजभवनेषु धरणिसुतमंदसुरगुरुबुधशुक्राणां क्रमेणं
युग्मेः पंचैव सप्त चाष्टौ पंच पंचाथ युग्मभवनेषु भागा भार्गवशशिसुतसुरेज्यशनिभूमिपुत्राणामिति अत एव वराहेणा
पि युजितने विपर्यस्था इत्यत्र तुशब्दः प्रयुक्तः यदि सायमर्थोभिप्रेतः स्यात् तदानेकेपि तुशब्दं प्रयुंजीरन्निति सर्वमनव
द्यं द्रेष्काणका इति अस्य प्रमाणं दर्शयति द्वादशराशिषु प्रथमो द्रेष्काणः स्वराशितः पंचमराशीशस्य तृतीयः स्वराशितो न
वमाधीश्वरस्य यथा वृषे प्रथमो द्रेष्काणो वृषाधीशशुक्रस्य द्वितीयः कन्याधीशबुधस्य तृतीयो मकराधीशशनेरित्यर्थः
स्वद्रेष्काणलग्नपंचनवराशीश्वराः क्रमादिति नारदोक्तेः अथ द्वादशांशादन्यद्वर्गोपसंहारं सफलं वसंततिलकयाह स्वाद्वा
दशांश इह राशित एव गेहं होरार्धकान्नवमांशकसूर्यभागाः त्रिंशांशकाश्च षडिमे कथितास्तु वर्गाः सौम्ये शुभं भवति चा
शुभमेव पापैः इह षड्वर्गे द्वादशांशाः सार्धमंशद्वयं तत्स्वराशित एव द्वादशांशतं गणितं सद्यस्तद्राशिस्वामी स द्वादशांशेश्वरः
आरभ्य लग्नराशेस्तु द्वादशांशेश्वराः क्रमादिति नारदोक्तेः अन्यच्च रणात्र यत्स्पष्टतरं तदुक्तं वसिष्ठेन लग्नं तदर्द्धं च ततस्त्रिभा
गो नवांशकश्च द्विर्दशांशकश्च त्रिंशांशकश्चेति हि वर्गषट्कं शुभं शुभव्याम च राधिपत्यं यः पापषड्वर्गो भवो हि दोषः
पंचांगसौम्यग्रहलग्नजातं गुणोत्तमं भाधिममोघबाणैः शुष्यत्यशेषं खलु राववस्येति तस्मात्सौम्यपापग्रहषड्वर्गसांक
र्ये सति सौम्यषड्वर्गस्त्रिभ्योधिकश्चेत् शुभः त्रिभ्यो हीनश्चेन्न शुभद इत्यर्थ इति दैवज्ञसंप्रदायः अथ गंडांतदोषं शार्दूल
विक्रीडितेनाह ज्येष्ठापौष्णभसार्पभांत्यघटिकायुग्मं च मूलाश्विनीपित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गंडांतकं कर्कालय
उत्तभांततोर्धघटिकासिंहाश्वमेषादिगा पूर्णानेघटिकात्मकं त्वशुभदं नंदातिथेश्चादिगं गंडांतनामसंधिविशेषः स चाने
कविधः नक्षत्रसंधिस्तिथिसंधिर्लग्नसंधिश्च तथा योगसंधिकरणसंधिर्वर्षसंधिरयनसंधिर्ऋतुसंधिर्माससंधिर्दिनसं

टी॰
॰प्र॰
२२

धिरात्रिसंधिर्मध्याह्नप्रातः सायंसंधिर्निशीथसंधिश्च तत्र तिथिनक्षत्रलग्नविशेषाणां यः संधिर्नियतकालः स गंडांतसं
ज्ञः अन्येषां तु संधिर्नियतकालः संधिशब्दवाच्य एव तत्रादौ नक्षत्रगंडांतमुच्यते ज्येष्ठा प्रसिद्धा पौष्णं रेवती सार्पमश्लेषा
एषामंते घटिकाद्वयं तथा मूलाश्विन्योः प्रसिद्धे पितरो देवता यस्येति पित्र्यं मघा वाक्यं तु पितृष सोयदिति यत् एषामादौ
घटिकाद्वयं गंडांतं नाम यथा रेवत्यश्विन्योरश्लेषामघयोर्ज्येष्ठामूलयोरंतरालवर्तिघटीचतुष्टयं नक्षत्रगंडांतमशुभदं
इत्युत्तरार्द्धेनान्वयः तदुक्तं रत्नमालायां पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतराले तद्गंडांतं स्याच्चतुर्नी
डिकाहयात्राजन्मोद्वाहकालेष्वनिष्टमिति यत्तु वसिष्ठेनोक्तं यदंतरालं पितृसार्पयोश्च मूलेंद्रयोरश्विनपौष्णयोश्च
मसंधिर्गंडांतमिति त्रयं तत्र यामप्रमाणं शुभकर्महंतृ इति यामः प्रहरो नक्षत्रभोगस्येति शेषः नारदोपि सार्पेंद्रपौष्णधि
ष्ण्यांते षोडशांशा भसंधयः तदग्रभेष्वाद्यजाताः पापा गंडांतसंज्ञकाः उग्रं भसंधित्रितयं गंडांतत्रितयं महत् मृत्युदं जन्मया
नादिविवाहस्थापनादिषु षोडशांशा नक्षत्रभोगस्यार्धप्रहर इति यावत् आद्यजाताः षोडशांशाः तदेतद्दोषमहत्त्वाल्पत्व
सूचनार्थं तथाहि चतुर्घटिके नक्षत्रगंडांते महान्दोषः तदधिके त्वष्टघटिकात्मके मध्यमो दोषः ततोप्यधिके चरणा
वधिके त्वल्पो दोषः अत एवोक्तं सूर्यसिद्धांते सार्पेंद्रपौष्णधिष्ण्यानामंत्याः पादा भसंधयः तदग्रभेषु चार्धांशा गंडांतं नाम
कीर्त्यते व्यतीपातत्रयं घोरं गंडांतत्रितयं तथा एतद्भसंधित्रितयं सर्वकर्मसु वर्जयेदिति अर्धांशाश्चरणार्धं प्रहर इत्यर्थः
दीपिकायां च आद्ये मघाचतुर्भागे मूलपादाद्य एव च रेवत्यंते चतुर्भागे विवाहः प्राणनाशक इति अथ लग्नगंडांत
च्यते कर्केति कर्कः प्रसिद्धः अलिर्वृश्चिकः अंडजो मीनः मीनो वैसारिणोंडज इत्यभिधानात् एषामानां लग्नानामंत
तः सप्तम्यंतात्तसिः अंतेर्धघटिका तथा सिंहमेषौ प्रसिद्धौ अश्वो धनुः एषां लग्नानामादिभूतार्धघटिका गंडांतं ना
म यथा कर्कसिंहयोर्वृश्चिकधनुषोर्मीनमेषयोर्वा लग्नयोरंतरालवर्तिन्येका घटिका लग्नगंडांतमशुभदमित्यर्थः यदा
ह कश्यपः सिंहकर्कटयोश्चापकीटयोर्मीनमेषयोः गंडांतमंतरालं तन्नाडिका निधनप्रदेति यत्तु नारदेनोक्तं कुलीरसिं
हयोः कीटचापयोर्मीनमेषयोः गंडांतमंतरालं स्याद्घटिकार्धं मृतिप्रदमिति वसिष्ठेनापि लग्नांतराले घटिकार्धमितं कु राम॰
लीरहर्योरलिचापयोश्च मीनाजयोः सर्वगुणान्निहंति लोभो यथा सर्वगुणान्नरस्येति तद्दोषाधिक्यसूचनार्थं अथ ति २२

थिगंडांतमुच्यते पूर्णांतइति पूर्णाः पंचमीदशमीपंचदश्यः तासामंते घटिकैका तथा नंदाः प्रतिपत्षष्ठ्येकादश्यस्ता
सामादिभूतैका घटिका तिथिगंडांतं नाम यथा पंचमीषष्ठ्योर्दशम्येकादश्योः पंचदशीप्रतिपदोर्वा तिथ्योरंतरालवर्ति
घटिकाद्वयं तिथिगंडांतमशुभदमित्यर्थः ब्रह्मनारदः पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं सदा गंडांतं मृत्युदं ज
न्मयात्रोद्वाहव्रतादिषु इति यत्तु कश्यपेनोक्तं पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीचतुष्टयं उद्वाहजन्मयानेषु गंडांतं निध
नप्रदमिति तद्दोषतारतम्यसूचनार्थं एवं गंडांतसंज्ञः संधिरुक्तः तत्र तिथिलग्नगंडांतपरिहारः शाकल्यसंहितायां तथै
व तिथिगंडांतं नाशंनीतौ बलशालिनि तथैव लग्नगंडांतं नास्ति जीवे बलान्विते इति अथात्र प्रसंगादन्येषामपि संधिरु
च्यतेस्माभिः यदा गुरुः घटिकाद्वयमृक्षांते मासांते तु दिनत्रयं वर्षांते वर्जयेत्पक्षं ग्रहणाद्दिनसप्तकमिति तिथ्यादिसं
धिमथाह वसिष्ठः पक्षोक्तसंधिस्त्रिदिनं च मासस्य संधिस्त्रिनाड्यः खलु संध्ययोश्च नाड्यश्च तस्मात्तिथिभद्वययोगसंधिस्तद
र्धकरणस्य संधिः वर्षेषु विशेषमाह स एव सौराद्व्यंते त्वयनेत्वहं चांद्रे तु नवमं त्यजेत् सावनांते षष्ठमंत्याज्यं नाक्षत्रे पौष्ण
भात्वहमिति अत्रापि विशेषमाह स एव अब्दाः स्युस्त्रिविधा जीवसौरचांद्रार्क्षयाः सदा तेषामादौ तथा चांते त्रिदिनं वर्जयेच्छु
भे इति अयं च सर्वकार्यसाधारणनिषेधो न्यथा मीनादित्ये विवाहप्रसंगाभावादेव वर्षांतनिषेधस्य वैयर्थ्यापातात् गु
रुः ऋक्षांते पुत्रनाशः स्यान्मासांते तु धनक्षयः वर्षांते वर्गनाशः स्यात् ग्रहणे सर्वनाशनमिति आवश्यकत्वेन नक्षत्र
योगतिथिसंधिषु नाडिकैका तिथ्यष्टविंशतिपलैः सहिता भयत्र कर्कालिमीनतनुसंधिषु दिक्पलानि त्याज्यानि शेषवि
वरेषु च पंच पंचेति वासनासिद्धं केशवार्कवाक्यमत्र सर्वत्र वासना च सिद्धांतशिरोमणावभिहिता शशितनुविकला
भ्यस्त्रं दुभुक्त्यैंदुभान्वोर्गतिविवरकलाभिर्भूयएताभिरेव पृथगथगतियुक्ता नाडिकासंधिरासां भतिथिकरणयोगा
नां फलं तत्रमिश्रमिति संधिफलमप्याह केशवार्कः संधौ पुरंध्रीश्च चिमेति वंध्या मृतप्रजा वायदि संधिः संधिः वदंतिवा
त्पाक्षतुभाविसृष्टां निशीथमध्ये दिनसंधिरूढामिति अर्धरात्रमध्यंदिनसंधिर्मध्येनिशाह्नोर्घटीत्रयं प्रागित्याद्येक ग्रंणोभि
हितः संधिसंधिस्तु केशवार्केणोक्तः खेभवेदे कृतहाधिकस्य यदंशकेंदं खलु साभ्रमस्य तदत्र राशिद्वयभागनष्टस्य ष्टवसं
ताहतवो भवंति तत्तांगयोगा गघटी समाः स्युर्द्विसंगुणाश्च द्विषवायनीयाः ससंधिसंधिः खलु यत्र शेषं शून्यं भवेदेषविशेषपु

मु॰टी॰
वि॰प्र॰
२४

ण्यमिति मीनसंक्रांतिमारभ्य वसंताख्य लगणेनेपत्नमंगीकृत्य कथं हा धिकस्येत्युक्तं ग्रंथकृद्यद्येतद्दुष्टत्वायनेष्वितिपद्येन संक्रां
तिदोषं वदत्यनीत्यलमतिप्रसंगेन गंडांतपरिहारदोषमाह वसिष्ठः गंडांतदोषमखिलं मुहूर्तो भिजिदाह्वयः हंति यद्वन्मृगव्याधः
पक्षिसंघमिवाखिलं तदेतद्दोषापवादाख्यस्य प्रकरणस्य नियामकत्वाद्विवाहादिविषयं ज्ञातकादौ अथ कर्तरीदोषमनु
ष्टुभाह लग्नात्पात्या दृज्व वृज्व व्ययार्थस्थौ यदा तदा कर्तरीनाम सा ज्ञेया मृत्युदारिद्र्यशोकदा यदा पापग्रहो लग्नाद्व्यया
र्थस्य वृज्व वृज्व द्वादशस्थः पापग्रहो मार्गी द्वितीयस्थः पापग्रहो वक्री स्यात्तदा कर्तरीनाम दोषः कृंततिस्त्रीपुंसयोः प्राणान्छे
दयतीति कृतीछेदन इति धात्वर्थानुसारादन्वयासंयुक्त कर्तरीयं मृत्युदारिद्र्यशोकदा भवेत् यदाह नारदः लग्नाभिमुखयोः पा
पग्रहयोर्ऋजुवक्रयोः सा कर्तरीति विज्ञेया दंपत्योर्गलकर्तरी कर्तरीदोषसंयुक्तं यत्नेन तत्परित्यजेत् अपि [illegible]ग्रहैर्युक्तं
गुणैः सर्वैः समन्वितमिति गर्गोपि व्यये मार्गगतिः क्रूरो वक्री क्रूरो धने यदि तौ च लग्नात्प्रातल्यौ चेत् [illegible]घोरा[illegible]र्तरीति यदा
तु द्वितीये मार्गी द्वादशे च वक्री अथवा द्वावपि क्रूरौ व्ययार्थस्थौ सं तौ शीघ्रेण वक्रिणा वा स्यातां तदा कर्तरी नास्त्येव य
दाह वसिष्ठः लग्नस्य पृष्ठाग्रगयोरसाध्वोः सा कर्तरी स्यादृजुवक्रगत्योः तावेव शीघ्रौ यदि वक्रचारौ न कर्तरी चेति पिनाम हो कि
रिति इयं च कर्तरी चंद्रस्यापि द्रष्टव्या यदाह कश्यपः चंद्रस्य कर्तरीत दृक्कुंभ दृष्टा नदोषदेति परं तु लग्नस्य चंद्रस्य वा क्रूरग्रहम
ध्यगतत्वदोषास्त्येव कर्तरीतोल्पफलः कन्यानाशकरत्वात् यदाह वसिष्ठः क्रूरग्रहमध्यगते लग्ने चंद्रे थवा करग्रहणे तेय
मसदनाभिमुखं गमनं ननेच्छति कन्याया इति कर्तरीदोषेत्वन्यदपवादांतरं पापौ कर्तरिकाख्यावित्यादिना स्वयं वक्ष्यति अ
त्र लग्नादित्युपलक्षणं तेषां मपि भावानां कर्तरीदोषो ध्येयः यो यो भावः स्वामिदृष्टो युतो वेत्यादिना तुल्यन्यायत्वात्
तत्र लग्नकर्तरी महादोषकरी लग्नभंगाधायकत्वात् तस्या अन्यत्र तादृशो दोषाभाव इति तत्वम् अत्र केचित् द्वादशे यः क
श्चित्पापग्रहो भवतु मार्गी द्वितीयस्थाने यदि राहुः केतुर्वा स्यात्तदा कर्तर्येव नास्तीत्याहुः ते प्रष्टव्याः किं राहुकेत्वोः ग्रह
त्वाभावात्क्रूरग्रहत्वाभावाद्वा दशपग्रहत्वाभावाद्वा कर्तरी नास्तीति नाद्यः राहोर्ग्रहत्वं श्रुतिस्मृतिप्रामाण्यसिद्धं तथा
हि स्वर्भानुर्ह वा आसुरिः सूर्यं तमसा विव्याधेति माध्यंदिनी श्रुतिः कश्यपश्च छिन्नोपि विष्णुचक्रेण स धामयशिरस्तमः राम
केशवस्य वरेणासौ तथापि ग्रहतां गत इति नारदोपि अमृतास्वादनाद्राहुः शिरश्छिन्नोपि सोमृतः विष्णुना तेन चक्रेण तथा २५

पिग्रहत्वं नागतमिति यद्यप्यच्छायासूनुः कालस्य मूर्तयो भगणाश्रिताः शीघ्रमंदोच्चपाताख्या ग्रहाणां गतिहेतव इति सू
र्यसिद्धांते पातानामदृश्यत्वोक्ता तथापि चंद्रपातस्य हि ग्रहत्वं वाचनिकमेवेति भास्कराचार्योक्तेश्च अत एव राहोर्नैव
न दिव्यामित्वं दानं च संहिताकर्तृभिरुक्तं राहोरधः शरीरमाहमतः केतुसंज्ञ इति पुराणप्रसिद्धं न द्वितीयः ननु केन वचनेन
राहुकेत्वोः क्रूरत्वमुच्यते न च क्षीणेंदुर्कयमाराः पापास्तैः संयुतः सौम्य इति वराहेणोक्तमिति वाच्यं तदुपादानाभावादेव किं
च पापग्रहत्वानभिधानाच्छुभग्रहत्वमेवावसीयते न च गुरुबुधशुक्राः सौम्याः सौरिकुजार्का निसर्गतः पापाः शशिज्ञोऽशु
भसंयुक्तः क्षीणेऽपि निशाकरः पाप इति कल्याणवर्मवाक्ये शुभग्रहमध्ये गणनाभावात् क्रूरत्वमिति वाच्यं पापग्रहमध्येऽपि ग
णनास्तीति शुभग्रहत्वस्यापि सुवाच्यत्वात् उभयभ्रष्टत्वेन वा नरसिंहवत्त्वान्यतरस्यापि वक्तुं शक्यत्वादिति चेत्सत्यं सूर्यभौ
मशनिराहुकेतवः पापसंज्ञखेचराः शुक्लपि चंद्रः सूर्यचंद्रगुरुशुक्रसौमज्ञाः सर्वकर्मसु हि सौम्यखेचरा इति वसिष्ठेन कंठतः क्रू
रत्वाभिधानादस्ति क्रूरत्वं स्वरोदयेऽपि बुधशुक्रेंदुजीवाश्च सदा सौम्यग्रहा मताः शन्यर्कराहुमाहेयाः केतुः क्रूरग्रहा मता इति
न तृतीयः ननु त्वयमशक्तः कथं परान्साधयिष्यतीति न्यायात्तदा चाक्षुषदर्शनाभावमित्यस्य राहोः केतोर्वा फलदातृत्व
सामर्थ्यात् न अमावास्यायां प्रतिपदि वा तत्रस्य लग्नादिदुष्टस्थानस्थितचंद्रस्यारिष्टमशुभफलजनकं भवन्मतेन निरर्थक
मापद्येत ननु षष्ठेऽष्टमे च चंद्रः सद्यो मरणाय पापसंदृष्टः अष्टाभिः शुभदृष्टो मिश्रैर्वर्षैस्तदर्धेनेति वराहोक्तिर्भविष्यतीति चे
त् इहापि स्वल्पं दत्वे कदशनरतिर्वह्निभत्वविशीर्णस्वव्याधिः सुश्रीमृतिरथ सुखं गर्भपात प्रद्व निर्धूमासक्तिर्भवति रिपुजे वैभव
वक्त्रयोगं स्वभीनौ षाण्यष्टशिखिनि वा लग्नभावादिसंस्थ इति वसिष्ठपद्ये शशिनिवद्राहुकेत्वोः शुभाशुभफलदातृत्ववचनं किं
वा यसे भविष्यति सारावल्यां राहुश्च तुष्ठस्थो निधनाय निरीक्षितो भवति पापैः वर्षैर्वदंति दशभिः षोडशभिः केचिदाचार्याः
अष्टेष्वकं केंद्रलग्ने रहूति राहुः समस्तपीडाभयः पृथ्वीपतिः प्रसन्नः कृतापराधं यथापुरुषमिति राहोरशुभस्याशुभफलाभि
धानमस्ति ननु वराहेण राहोः फलं कुत्रापि नोक्तमिति चेन्न सोपप्लवे शशांके सक्रूरे लग्नगे कुजेऽष्टमगे मात्रा सार्धं म्रियते चंद्र
वदर्के सशस्त्रेणेति वराहपद्येऽपि राहुकेत्वोरन्यतराभिधानमस्ति तथा हि किमिदं चंद्रग्रहणं राहुसाहित्यकृतमुत केतुसाहि
त्यकृतमिति तत्र ग्रहणीयचंद्रे लग्नगे सक्रूरे इत्यत्र क्रूरसाहित्यमभिहितं क्रूरास्तु सूर्यभौमप्रमुखा न यदेव विवक्षिता इति चेत्सूर्यस्य

मु·टी·
वि·प्र·
२५

तावद्योगाभावश्चंद्रग्रहणे हि सप्तमराशिस्थत्वात् भौमस्यापि योगः उक्तेष्टमग इत्युक्तेर्नास्ति पारिशेष्याद्राहुणैव योगो वाच्यः
तत्रस्पष्टत्वार्थं शनिग्रहणमेकस्मान्नाकारि अतः सामान्यवाचिनः क्रूरशब्दस्य प्रयोगाद्राहुकेत्वोरन्यतरयोगोपि विवक्षितो
पातस्य सप्तमराशिस्थत्वात् योगोप्येकराशिस्थत्वे स्यान्न तु भिन्नराशिस्थत्वे इति एवं चंद्रग्रहणसंबंधिलग्नस्य सूर्यारिष्टोपि
राहुकेत्वोरन्यतरयोगो व्याख्येयः अत एव राहुस्तमो गुरुरसुरश्च शिखी इति केतुरिति पर्यायाभिधानेन कृतं विवाहपटलेपि
मरणं लग्ना राहोः शुभाशुभफलदातृत्वं कार्यं विनाशं मृगो वेदनौ नित्रिकं च तेन राहुलग्नाप्युक्ता तस्माद्राहुमतेपि राहुके
त्वोर्योगे विवक्षित एव एवं सति जातके यथा राहोः शुभाशुभफलदातृत्ववचनाद्बोध्यते तथा विवाहेपि प्रागुक्तवसिष्ठवाक्या
दपि तत्र तुल्यन्यायत्वात्कर्तरीदोषसत्त्वपि अदृष्टफलदातृता त्वयापि वक्तव्यैव ननु पापयोः कर्तरीकर्त्रोः शत्रुनीचगृह
स्थयोः यद्वा चास्तगयोर्वापि कर्तरी नैव दोषदेति कश्यपाद्युक्तेरस्तंगतत्वेन राहुकेत्वोः कर्तरीदोषो नास्तीति चेत् भ्रांतोसि
शृणु संभवव्यभिचारे च स्याद्विशेषणमर्थवदिति न्यायादस्तंगतत्वविशेषणं भौमस्य क्रूरयुक्तबुधस्य शनेर्वेति त्रयाणामे
व संभवति न संभवति च सूर्यस्तु नित्योदित एव राहुकेतू नित्यास्तमिताविति व्यभिचाराभावात्त्रयाणां नैव विशेषणं यथा
एत्येधत्यूठ्स्विति पंचानुवर्तमानमेव ग्रहणं संभवव्यभिचाराभ्यामेतैरेव विशेषणं यथा उपैति उपेत इति नन्वेधतेरेजादित्वा
देवनाप्यूह्यतेने ज्ञादित्वादेवेति तस्मादीदृशे विषयेयं परिहारो न प्रवर्तते किंच किमस्तगतत्वं हितिज्ञसन्निधिकृतमुत स्वत
सूर्यसान्निध्यकृतं वेति तत्र हितिज्ञसन्निधिकृतं यत्तु सूर्यादिसकलग्रहसाधारणं तथासत्यस्तंगतत्वविशेषणवैयर्थ्यं
प्रागुक्तन्यायात् राहोस्तु नारदादिवाक्याद्विक्षेपरूपमंडलावगते रविर्कमंडलाकृतिरसितत्वात्किल न दृश्यते गगने इति वरा
होक्तेस्तमोरूपत्वान्नारकस्यपातुलक्षे रगोचरत्वपरं स्थानमप्यस्य चंद्रशरमंडलक्रांतिमंडलस्वस्तिके यदाह केशवार्कः
वेश्म चास्य शशांशुद्धिमंडलक्रांतिमंडलमिलच्चतुष्पथ इति अत एव न विद्यंते गावः किरणा यस्येत्यगुरित्यन्वर्थताप्यव
सीयते अथ यदि सूर्यसंनिधिकृतमित्युच्यते तिचेन्न इतरग्रहवद्राहोरप्युदयास्तप्रसिद्ध्यताभावात् किंच कालांशानभिधा
नात्कदोदितः कदास्तमितः चेति निर्णयत्वमशक्यत्वात् एवं केतोरप्येतद्बोध्यं ननु केतूदयोस्तुत्पातादौ प्रत्यक्षतो दृश्यत इति राम
चेन्न तस्यानियतदिक्कभवत्वादनियतत्वान्न त्वप्रमेयत्वाच्च गणितेप्राग्नमनदृष्टे अप्राप्यासिद्धप्रपते चान्यस्मिन् किंच केतूना २५

नो हि लोकदूरदृष्टसूचके अनियतेन बहुना स्वल्पेनापि वा कालेन भवेत् सूर्यसान्निध्यकृतोदयास्तानुनियतकालावेवेति
तयोः केत्वोर्भेदः स्वीकर्तव्य एव तस्माद्राहुकेतू सदा दृश्यावेवेति प्रागुक्तदोषानवसरः तस्मात्स्थिते राहुकेत्वोर्द्वितीयस्थान
स्थितत्वेन वक्रित्वात्कर्तरीदोषोस्त्येवेति सिद्धान्तः ननु ग्रहाणां कथं शुभाशुभप्रदानदातृत्वमरिष्टपरिहारकर्तृत्वं च येनाय
ऽउपचितमन्यजन्मनि शुभाशुभं तस्य तस्य कर्मणः पंक्तिं व्यंजयति शास्त्रमेतत्तमसि द्रव्याणि दीप इवेति स्वसिद्धान्तव्याख्यातः
सत्यमुपरिष्टाद्विचिंतयिष्यते, स्माभिरेतदित्यलमतिप्रसंगेन अथ ग्रहदोषमनुष्टुभाह चंद्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शु
भे सौख्यं सापत्न्यं वैराग्यं पापद्वययुते मृतिः सूर्ययुक्ते चंद्रे दारिद्र्यं स्यात् भौमादियोगे मरणादिफलं क्रमेण स्यादित्यर्थः पा
पग्रहसाहित्ये शुभफले राहुकेत्वोरपि द्रष्टव्यं यदाह नारदः शशांके ग्रहसंयुक्ते दोषः स ग्रहसंज्ञकः सूर्येण संयुते चंद्रे दारिद्र्यं भ
वति ध्रुवं कुजेन मरणव्याधी सौम्येन त्वनपत्यता दौर्भाग्यं गुरुणा युक्ते सापत्न्यं भार्गवेण तु प्रव्रज्या सूर्यपुत्रेण राहुणा कलहः
सदा केतुना संयुते चंद्रे नित्यं कष्टं दरिद्रता तस्मिन्सग्रहदोषे तु विवाहं नैव कारयेदिति सापत्न्यं सपत्न्याभावः सापत्न्यं मतस्त्री
तरं स्यात् अत्र गुरुबुधसाहित्यफले अशुभमुक्तं ग्रंथकर्त्रा तु वसिष्ठवाक्ये केचिन्मताभिप्रायेण शुभफलमुक्तं तदुक्तं वसिष्ठे
न दारिद्र्यं रविणा कुजेन मरणं सौम्येन न सुप्रजाः दौर्भाग्यं गुरुणा सितेन सहिते चंद्रे ससापत्नकं प्रव्रज्यार्कसुतेन सैंहुगुरो
र्वाऽर्केतिके चित्कुभं द्याद्यैः स्त्युरसद्ग्रहैः शशियुते दीर्घप्रवासः शुभैरिति अत एव श्रीपतिनोक्तं शुभं च दंभोलिभृदिंद्रलग्नस्पृज्यः
ष्ट्येव बृहस्पतिरित्यर्थः पापेति पापद्वयेन युते उपलक्षणत्वात् पापत्रयादिभिर्युते मृतिरेव स्यात् पापद्वययुते चंद्रे दंपत्योर्म
रणं ध्रुवमिति नारदोक्तेः बहुसौम्यग्रहयोगे तु बहुकालं पत्युर्देशांतरे वस्थानं स्यात् तद्वाक्यमधुनैवाभिहितं अथास्य परि
हारो नारदेनोक्तः स्वक्षेत्रगः स्वोच्चगो वा मित्रक्षेत्रगतो विधुः युतिदोषाय न भवेद्दंपत्योः श्रेयसे तदेति क्वचिद्गोत्तमरतिप
क्ष्यते कश्यपेनापि तुंगमित्रस्वराशिस्थः शुभयुक्तः शुभप्रदः एवंविधः क्रूरयुतः संपूर्णफलदः शशीति अथाष्टमलग्नदो
षं सापवादमाहानुष्टुभा जन्मलग्नभयोरष्टेतु राशौ नेष्टः करग्रहः एकाधिपत्ये राशीशमैत्रे वा नैव दोषदा जन्मलग्नजन्मराशेपाः
संबंधिनि ष्टत्तु राशौ वष्टमलग्ने करग्रहो नेष्टः यदाह नारदः दंपत्योरष्टमं लग्नं त्वष्टमो राशिरेव च यदि लग्नगतः सोपि दंपत्योर्नि
धनप्रदः सराशिः शुभयुक्तोपि लग्नं वाशुभसंयुतं लग्नं विवर्जयेद्यत्नात्तदंशांश्च तदीश्वरानिति निधनं मरणं अत्र जन्मलग्नेज

मु.दी.
९६
वि.प्र.

न्मराशेशाच विशेषमाह कश्यपः इष्टं स्वजन्मलग्नं तज्जन्मराशिर्निष्टदः लग्नगस्तु तयोः स्थानात् शुभासु पचयानि वै इति नारदोपि
जन्मराश्युद्गमेनैव जन्मलग्नादयः शुभाः तयोरुपचयस्थानं यदि लग्नगतं शुभमिति अथाष्टमलग्नदोषपरिहारमुच्यते एके
ति जन्मराशिजन्मलग्नयोरन्यतरस्य विवाहलग्नस्य च स्वाम्यैक्ये सति यथा मेषवृश्चिकयोः तथा तयो राशीश्वरयोर्मैत्रे य
था मीनसिंहयोः अत्र हि सूर्यगुरू रन्योन्यप्रीतिरस्ति एतादृशविषये लग्नाष्टमदोषकृद्विवाहो न स्यात् यदाह कश्यपः ज
न्मराश्यष्टमलग्नेशौ मित्रामित्रे व्यवस्थितौ जन्मराश्यष्टमल्लोत्थदोषा न स्युरिति भावः इति अथोक्तार्थोक्तमेवार्थं स्पष्टमुप
ज्ञातिकयाह मीनोऽलिकर्कालिमृगस्त्रियोऽष्टमं लग्नं यदा नाष्टमगेहदोषकृत् अन्योन्यमित्रत्ववशेन सा वधूर्भवेत्सुतायुर्गृ
हसौख्यभागिनी उक्ताष्टकः स्त्री कन्या अन्ये प्रसिद्धाः एते राशयो यथाष्टमलग्नेषु यथा सिंहान्मीनः तुलाज्जो वृषः धनु
षः कर्कः मेषाद्वृश्चिकः मिथुनान्मकरः कुंभात्कन्या पुष्टमलग्नं तदाष्टमगेहदोषकृन्न भवेत् कुत इत्यत आह अन्योन्येति प्रागु
क्तपरस्परप्रीतिवशेनेदं चोपलक्षणं मेषवृश्चिकयोस्तुला वृषयोरैकाधिपत्यात् एवं सति सा वधूः परिणीता कन्या सुता
युर्गृहसौख्यभागिनी स्यात् उक्तं च झषकुलीरवृषालिमृगांगना जननराशिविलग्नगृहाष्टमाः शुभफलाय गुणैकाधिता
स्तयोरधिपतीसुहृदौ हि परस्परं इति परिहारांतरमप्याह गुरुः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः यद्यष्टमगतस्यांके
दोषमाशु व्यपोहति रंध्रेशः स्वशुभांशस्थस्तुंगस्थो हेत्रमित्रगः अष्टमस्थानदोषो हि विनश्यति न संशय इति अथाष्टमलग्न
दोषप्रसंगाज्जन्मराशिजन्मलग्नाभ्यामष्टमेशस्य तदंशस्य च लग्नस्थितत्वे दोषं तथा द्वादशभवनदोषं वक्तुमाह विचित्राश्छंद
साह षष्ठतिभवनांशो यदि च विलग्ने तदधिपतिर्वा न शुभकरः स्यात् व्ययभवने वा भवति तदंशस्तदधिपतिर्वा व्ययकलहकरः
स्यात् अष्टमभवननवांशो यदि विलग्ने स्यादथवा ष्टमभवनस्वामी विलग्ने स्यात्तदाशुभकरो न स्यात् यदाह कश्यपः दंप
त्योरष्टमे लग्ने तदंशो वापि तदंशके तदीशो वा लग्नगतो योर्मृत्युर्न संशय इति अथ व्ययभवनं जन्मराशिजन्मलग्नाभ्यां द्वाद
शंभवनं अथवा व्ययांशो थवा व्ययस्वामी यदि लग्ने स्यात्तदा कलहकृत् उक्तं चक्रप्रवेशेन तथैव द्वादशे लग्ने तदंशे वा तदीश्वरे
विवाहलग्नगे नैव सुखं नित्यं स्यात्कलहो द्वयोरिति नारदेनापि दंपत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नगः अर्थहानिस्तयोस्तस्मा राम
त्तदंशस्वामिनं त्यजेदिति अथ विषघटीदोषं वंशस्थाख्याभ्यामिंद्रवज्रयाह खरामतोत्यादितिवह्नि पित्र्यभे खवेदतः केरदतश्च २३

सार्पभे खबाणतोऽश्वेष्ट्वतिनोर्यमांबुपेंद्रनेर्भगात्वष्ट्रमजीवविश्वभे मनो १५ ह्रिं देवानिलसौम्यपूर्वाक्रमे कुपक्षनःशैव
करेष्टिनोऽग्निभे युगाश्विनोबुध्न्यभतोययाम्यभे खचंद्रतोमित्रभवासवर्क्षतो मूलेंगबाणा. विषनाडिकाः क्रतावर्ज्याः शुभ
थ्या विषनाडिकाध्रुवाः निघ्नाभभोगेन खतर्कभाजिताः स्पष्टाभवेयुर्विषनाडिकास्तथा रेवतीपुनर्वसुहस्तानिकामघानक्षत्रेषु
खरामतत्त्विंशाद्धटिकोत्तरं स्तनाऽऽस्ततस्ताघटिका विषनाडिकाः शुभकार्ये वर्ज्याः स्युरिति तृतीयश्लोकेनान्वयः एवं सर्वत्रव्याख्ये
यं केरोहिण्याक्रने विशाखे रजभेपूर्वाभाद्रपदायां अन्यानिपदानि स्पष्टानि तदेवं षष्टिघटीरूपे नक्षत्रभोगे ध्रुवकास्तत्तोवि
षनाडिकास्तुप्रोक्ता न्यूनाधिकत्वेतु स्पष्टीकरणमुच्यते अष्टा इति विषनाडीनां ध्रुवाः खरामतदुत्पेवमाद्यानक्षत्रभोगे
नेष्टेन निघ्नाः षष्ट्याभाजिता तत्तो विषनाडिकाध्रुवाः स्पष्टाभवेयुरित्यर्थः तथा विषनाडिका अपिभभोगेन निघ्नाः षष्ट्याभा
ज्याः लब्धास्पष्टाभवेयुरित्यर्थः अत्रोपपत्तिस्त्रैराशिकेन यदि घटीषष्ट्यात्मकभभोगेनेमेध्रुवकाइमाश्चनस्तो विषनाडिका
स्तलभ्यंते तदेष्टभभोगेन किमिति तत्रध्रुवा विषनाडिकाश्चेष्टभभोगेन गुण्याः षष्ट्याभाज्याइतिफलितं [illegible] वि
यद्बाणवेददस्ताः खरामाव्योमसागराः वेदचंद्राश्च दस्ताः खरामव्योमबाहवः नेत्राग्नयोव्योमगुणाः शून्यदस्तागजेंदवः
रूपाबाहवो वियद्दस्ताः शून्याश्चेंद्राः खभूमयः वेदचंद्रास्तर्कबाणावेददस्ताः खबाहवः व्योमेंदवोव्योमचंद्राश्चतयस्तर्कभूमयः
वेदाश्विनः खरामास्युर्दस्ताः द्विघटिकाःक्रमात् आभ्यापरस्तो नष्टतस्तो विषनाडिकाः ज्ञात्वायं तद्घटीनिघ्नाः षष्टिभक्ताःस्फु
टास्मृताः विषनाडीदोषदुष्टंलग्नंसर्वगुणान्वितं शुभैः सर्वैश्च संयुक्तमपि पंचेष्टकं त्यजेत् इति वसिष्ठः कुर्वंतु द्वाहितां क
न्यां विधवां वत्सरत्रयात् अन्यस्मिन्मंगलेनाशं निधनं चाप्यनिर्धनमिति ता विषनाडिकाः अथप्रसंगाद्दष्यातरोक्तास्ति
थिवारविषनाडिकाःप्रोच्यंतेऽस्माभिः दैवज्ञमनोहरे तिथौ १५ षु ५ नागा ८ द्रि ७ गिरीषु वारिधिः ४ गजा ८ द्रि ७ दिक्पावक ३
विश्ववासवाः १४ मुनी ७ भ ८ संख्याप्रथमातिथेः क्रमात्परं विषंस्याद्घटिकाचतुष्टयं नखाद्वयं द्वादशदिक्च शैलाः ७ बाणा
श्चतत्त्वानियथाक्रमेण सूर्यादिवारेषु पराश्चतस्त्रो नाड्यो विषं स्यात्खलु वर्जनीयं ज्योतिस्सारे विवाहव्रतचूडासु गृहारंभप्रवे
शयोः यात्रादिशुभकार्येषु विषदा विषनाडिकेति अस्यपरिहारमाह दैवज्ञमनोहरेगुरुः चंद्रोविषघटीदोषंहंतिकेंद्रत्रिकोणगः
लग्नं विनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथेति फलप्रदीपे विषनाड्युत्थितं दोषं हंति सौम्यदृग्गः शशी मित्रदृष्टोथवास्वीयवर्गस्थाल

गिरिशभुजगमित्राः पित्र्यवस्वंबुविश्वे भिजिदथच
अथेपापिचेति अथदुर्मुहूर्ते दोषं विवक्षुरादौ दिवामुहूर्तान्मालिनीछंदसाह गिरिशभुजगमित्राः पित्र्यवस्वंबुविश्वे भिजिदथच
चविधाताधीइंद्राग्नीसोच निरृतिरुदकनाथोप्यर्यमाथोभगःस्युः क्रमतइहमुहूर्ता वासरेबाणचंद्राः अत्रबाणचंद्रा इत्युक्ते मुहू
मु.टी. र्ते विधाताथेंद्राग्नी निलोच निरृतिरुदकनाथोप्यर्यमाथोभगःस्युः मित्रःसूर्यविशेषः पितरवस्वंबुविश्वेप्रसिद्धाः पितरश्चतथेमुहूर्त
प.प. तेस्यपाधेक्येनलक्षणेनोक्तं गिरिशोमहादेवः भुजगःसर्पः मित्रःसूर्यविशेषः पितृवस्वंबुविश्वेप्रसिद्धाः दोषचारात्स्वामिनिर्हतिःछंदोनुरोधात्त
२२ स्वामिनइतिवक्तुमपेक्षितं पित्र्यमितितुनक्षत्राभिधानमयुक्तं अथवानक्षत्रनदीशयोरभेदोपचारात्स्वामिनिर्हतिः इंद्रशब्दस्यास्याग्नेरत्वात्पूर्वनिपातः
थ्याग्निः अष्टमोभिजित् ततोविधाताब्रह्मा इंद्राग्नी सौ अत्रसमुदितयोव्यासक्तयोरुक्तिदेवतात्वं इंद्रशब्दस्यास्याग्नेरत्वात्पूर्वनिपातः
निरृती राक्षसः उदकनाथोवरुणः अर्यमाभगःचैमौसूर्यविशेषौ इत्येते बाणचंद्राः पंचदशवासरे दिवसे मुहूर्ताःस्युः यदाहनारदः
दः दिवामुहूर्ताःरुद्राहिमित्राःपितृवसूदकं विश्वेविधातृब्रह्मेंद्राइंद्राग्न्यसुरतोयपाः अर्यमाभगसंज्ञश्च विज्ञेयादशपंचचेति अथ
रात्रिमुहूर्तानतुष्टुभाह शिवोजपादादष्टौसुर्भेशाअदितिर्जीवकौ विष्णुर्कत्वष्टृमरुतोमुहूर्तानिशिकीर्तिताः प्रथममुहूर्तेस्य
मीशिवः ततोजपादादष्टौभेशाः नक्षत्रस्वामिनोमुहूर्तेशाःस्युः यथा अजपादः अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निः ब्रह्मा सो
मःस्त्वष्टौ ततोदशभेशादिति जीवकोगुरुः स्वार्थेकः विष्णुर्कत्वष्टृमरुतःप्रसिद्धाः एतेनिशिमुहूर्ताःमुनिभिरितिशेषः यदाह
नारदः ईशाजपादहिर्बुध्न्यपूषाश्विग्नियमवह्नयः धातृचंद्रादितीज्याख्यविष्णुर्कत्वष्टृवायवइति मुहूर्तालक्षणंकश्यपेनोक्तं अ
ह्नःपंचदशोभागोमुहूर्तोथतथानिशइति प्रयोजनमाहनारदः यस्मिन्दिशेहियान्कर्मकथितंतन्निखिलंचयत् तद्दैवत्येतन्मुहूर्तेका
र्यंयात्रादिकंसदेति यात्रेत्युपलक्षणं देवस्थापनाद्यपिकार्यं पिहिप्रोक्तंस्वामितिथ्यंशकेस्यतिग्रंथकृतामुक्तं अथावसर
प्राप्तान्दुर्मुहूर्तान्भुजंगप्रयातेनाह रवावर्यमाब्रह्मरक्षश्चसोमे कुजेवह्निपित्र्यंबुधेचाभिजित्स्यात् गुरौतोयरक्षौभृगोब्रह्मपित्र्येश
नौईशसर्पौमुहूर्तानिषिद्धाः एवंसोमवारेब्राह्मरक्षः इंदुकेकवन्नावः ब्राह्मरक्षःस्वामिकौनवमद्वादशौमुहूर्तौनिषिद्धौ एवंसर्वत्रव्या
ख्येयं पदानिस्पष्टार्थानि ईशोमहादेवः यदाहनारदः अर्यमाराक्षसब्राह्मौपित्र्याग्नेयौतथाभिजित् राक्षसार्पौब्राह्मपित्र्यौभो
न्नेगेशानिनादिषु वारेषुवर्जनीयालेमुहूर्ताःशुभकर्मस्विति ननुदुर्मुहूर्तोपलक्षिताः तिथ्यंशाः सूर्यषट्स्वरनागेत्यादिनोक्ता रा
इतिपुनरेवाभिधानमयुक्तमितिचेत् सत्यं अग्रेकुलिकाअपिवक्तव्याः संतितत्पुनरुक्तिपरिहारावसरेसमाधास्ये अथैवेव २५
दोषंविवक्षुर्विहितनक्षत्रादिकमभिजिन्मानेनचप्रहर्षिण्याह निर्वंधेः शशिकरपूलमैत्रपित्र्यब्राह्मांत्योत्तरपावनैः शुभोविवाहः

रिक्तारहिततिथौ शुभेह्नि वैश्वप्रांत्यांघ्रिश्रुतितिथिभाभागतोभिजित्स्यात् मृगशिरोहस्तमूलानुराधामघारोहि
ण्युत्तराषाढोत्तराफल्गुन्युत्तराभाद्रपदास्वातीनक्षत्रैर्निर्वेधैर्वेधाख्यदोषरहितैर्विवाहः शुभः शुभफलदः यदाह वसिष्ठः
स्वातौ मघायां निरृतौ ध्रुवांत्यमित्रेंदुहस्तेषु च कन्यकानां पाणिग्रहः त्विष्टफलप्रदः स्यादविद्धभेष्वेव गुणान्वितानामिति
नारदोपि पौष्णभाद्युत्तरामैत्रमरुच्चंद्रार्कपित्र्यभैः समूलभैरविद्धैस्तु स्त्रीकरग्रह इष्यते इति स्त्रीग्रहणं शुभत्वसूचना
र्थं गृहस्थाश्रमस्य तदायत्तत्वात् रिक्तेति रिक्ताख्याः प्रसिद्धाः आभिर्वर्जिततिथिषु शुभेह्नि शुभग्रहवासरेपि विवाहः
शुभः यदाह वसिष्ठः शुक्ले द्वितीयादितएव कृष्णपक्षे दशम्यंतगताः प्रशस्ताः तास्वष्टमीस्कंदगणेशदुर्गाचतुर्दशी
चापि तिथिर्विवर्ज्या वाराः प्रशस्ताः शुभखेचराणां सूर्यार्किवारावपि मध्यमौ तौ त्याज्यः सदा भूमिसुतस्य वारः कामार्क
तिथ्योरपितौ प्रदोषाविति तौ सूर्यार्किवारौ त्रयोदशीद्वादश्यौ प्रदोषौ प्रकृष्टदोषावित्यर्थः गणेशः चतुर्थी अत्र यदि वि
वाहित विवाहदिनमारभ्य चतुर्थीकर्मपर्यंतं पित्राद्यावश्यकश्राद्धदिनममावास्या वा भवतीति ज्ञायते तदा विवाहो नैव का
र्यः उक्तं च विवाहमारभ्य चतुर्थीमध्ये श्राद्धं दिनं दर्शो दिनं यदि स्यात् वैधव्यमाप्नोति तदा तु कन्या जीवेत्पतिश्चेदनपत्यता
स्यादिति अन्यच्च विवाहमध्ये यदि तत्स्याह स्वत्राश्च मुख्याः पितरो न यांति छत्रे विवाहपरतस्तु ऊर्ध्वं न श्राद्धं स्वधाभि
र्न तु दूषयेत्तमिति अथ वैश्वेति वैश्वमुत्तराषाढा तस्या अंत्यांघ्रिः चतुर्थचरणः श्रुतेः श्रवणस्य पंचदशांशो मिलि
त्वा अभिजिन्नामा योगः स्यात् यदाह वसिष्ठः अभिजिद्भभोगमेतद्वैश्वदेवांत्यपादमखिलं तत् आद्यः चतस्रो नाड्यो हरिभस्यैत
च्च रोहिणी प्रयोक्तनमप्यधुनैव वक्ष्यति अथ वेधचक्रं पंचशलाकाचक्रोद्धारनिरपेक्षं स्पष्टार्थं शार्दूलविक्रीडितेनाह
वेधोन्योन्यमसौ विरिंच्यभिजितोर्याम्यानुराधर्क्षयोर्विश्वेंद्वोर्हरिपित्र्ययोर्ग्रहवशात् हस्तोत्तराभाद्रयोः स्वातीवारु
णयोर्भ वह्निरात्रिमादित्योस्तथा पांत्ययेः खेटे तत्रगते तृतीयचरणाद्योर्वान्तृतीयद्वयोः विरिंचिः रोहिणी रोहिण्यभिजितोः
ग्रहैः क्रूराक्रूरैः हृतौ वेधोन्योन्यं परस्परं भवेत् रोहिणीस्थे ग्रहे भिजिद्विद्धः अभिजित्स्थे रोहिणी विद्धेत्यर्थः एवं सर्व
त्र व्याख्येयं यदाह नारदः तिर्यक्पंचोर्ध्वगाः पंच रेखे द्वे द्वे च कोणयोः द्वितीयशंभुकोणाग्निधिष्ण्यं चक्रे तु विन्यसेत् भा

न्यतः साभिजित्येकरेखाखेटेन विद्धमिति चक्रोद्धारे यथा वसिष्ठः चक्रे तस्मिन्नेकरेखा
स्थितैस्तु धिष्ण्यं खेचरेण प्रदिष्टं क्रूरैर्विद्धं सर्वथा धिष्ण्यं विवर्ज्यं सौम्यैर्विद्धं नाखिलं पादएवेति
नन्वष्टाविंशतिनक्षत्राणि चक्रेऽत्र द्वयोः परस्परवेधे चतुर्दश युग्मानि वक्तव्यानि स्युः क
थमष्टावेवाभिहितानि उच्यते विवाहे ह्येकादश नक्षत्राणामेव प्राशस्त्याभिधानाद्वे
धोपयोगीन्येतावंत्येव युग्मानि संभवंतीति तावत्तामेवाभिधानं अत एव दैवज्ञमनो
हरे रोहिण्यभिजितोर्मूलादित्ययोः शतभिषग्वैश्वयोः रेवत्युत्तरफाल्गुन्योर्मघाश्रवण
योर्भवेत् हस्तोत्तराभाद्रपदोः स्वातीवरुणयोर्मिथः अनुराधाभरण्योश्च वेधोयं
चैरेखजइति वराहीयविवाहपटले प्रत्येकं वेधफलानि रविवेधे वैधव्यं पुत्रविनाशं
करोतिकुजवेधः वंध्यात्वं इति वेधे दीक्षाकरणं करोति गुरुवेधः भृगुसुतवेधे पुत्री दासी रविजेंदु राहुसंभूत इति पं
डितो बुधः दीक्षाकरणं प्रव्राजिकात्वं चरणविधमाह खेट इति तत्र तस्मिन्नक्षत्रे विद्यमाने ग्रहे सति यदि चतुर्थे पादे
स्ति तदा परनक्षत्रस्य प्रथमपादे वेधः यदि तृतीयपादे तदा द्वितीयचरणस्य वेधः एवं यदि द्वितीयपादे तदा तृतीयपा
दस्य वेधः यदि यदा प्रथमपादे तदा चतुर्थपादस्य वेध इत्यर्थः यदाह वसिष्ठः अंतोंत्यपादमादिगो द्वितीयगस्तृतीयकं
तृतीयको द्वितीयगं चतुर्थगस्तु चादिमं भिनत्ति वेधकृद्ग्रहो न चान्यपादमादरात् एतदपि शुभाशुभग्रहसाधार
णं प्रतीयते तथापि सौम्यग्रहपरं द्रष्टव्यं यतो वसिष्ठेनैव खार्जूरदोषाभिधानावसरे विषप्रदिग्धेन हतस्य पत्रि
णा मृगस्य मांसं शुभदं ज्ञातादृते तथैव पादो शुभदो वसिष्ठः पादाशुभाख्ये निपितामहेनेत्याशंक्य समाहितं
पादएव न शुभः शुभग्रहे विद्ध इत्यखिलशास्त्रसंमतं क्रूरविद्धमयुतं न शोभनं शोभनेऽशुभादितं न पादत इति नारदः पा
दमेव शुभैर्विद्धमशुभैर्नैव कृत्स्नत इति कश्यपोपि क्रूरविद्धं च यद्धिष्ण्यं क्रूराक्रांतं च कृत्स्नभं मलिनं मन्मथं धूमितं
क्रांतमिव त्यजेदिति कृत्स्नभं सकलं नक्षत्रं तस्मात् क्रूरग्रहविद्धे संपूर्णनक्षत्रत्यागः शुभविद्धे चरणत्याग इति सिद्धं राम॰ २८

तः तत्र विवाहे पंचशलाकावेध एव यदाह वसिष्ठः पंचशलाकाचक्रे पाणिग्रहणे भवेधविधिरुक्तः शलौवि
धःपंचशलाकाख्ये शुभमित्रकृतः सप्तशलाकाजन्दतरत्रेति श्रीपतिः वधूप्रवेशनेदानेवरणेपाणिपीडने वेधः
पंचशलाकाख्येन्यत्र सप्तशलाकके इति अथ केचित्सप्तशलाकाचक्रे पिवेधमाहुस्तदर्थं चक्रन्यासं विनैव वे
धदोषं शार्दूलविक्रीडितेनाह शाक्रेज्येशतभानिलेज्जलशिवे पौष्णार्यमर्क्षे वसुद्वीशे वैश्वसुधांशुभे हयभ
गेसार्पानुराधे मिथः हस्तोपांतिमभे विधातृविधिभे मूलादितीत्वष्टृभाज्जाम्बीयाम्यमघे कृशान्वहरिभे विद्धे
उभद्रे खिवेदे ऽभ्यन्तः पर्वताः सप्तऋभ्दे खिके सप्तशलाकाचक्रे शाक्रेज्ये ज्येष्ठापुष्यानक्षत्रे मिथः परस्परं
ग्रहाधिष्ठितत्वेन विद्धे ज्ञेये एवं जलशिवे पूर्वाषाढार्द्रे ज्ञेये एवं सर्वत्र व्याख्येयं वैश्वसुधांशुभे उत्तराषाढा
मृगशिरसी हयभगे अश्विनीपूर्वाफल्गुन्यो उपांतिमभं अंत्यस्य समीपमुपांतिममुत्तराभाद्रपदा॥ अन्यत्स्प
ष्टं अत्र मूलवाक्यं स्वरोदयस्थयज्ञोपवीतप्रकरणेभिहितं चक्रोद्धारो यथा व्यवहारोच्चयेपि सप्तसप्तविनिपात्य रे
खिकास्तिर्यगूर्ध्वमथ कृत्तिकादिकं लेखयेदभिजिता समन्वितं चेकरेखगमनेन विद्ध्यते इति दीपिकायां यस्याः
शष्पीसप्तशलाकभिन्नः पापैरपापैरथवा विवाहे उद्वाहवस्त्रेणतु संवृतांगी श्मशानभूमिं रुदती प्रयातामिति त
थाच भोजः विद्धे सप्तशलाकाख्ये विधवा लग्नवाससा पुनर्यात्यचिरान्नारी मुखाग्नौ शुखचंडिका वैधव्यं चन
दात्रसंख्यातुल्याब्दैर्भवति न तु केवराहेण नक्षत्रं तु मुद्वाहे पलमप्येकतारकाभितः सदसद्दिति अत्रापि तुल्यन्याय
त्वात् क्रूरवेधे संपूर्णनक्षत्रं त्याज्यं शुभग्रहवेधे तु पादस्त्याज्य इति ध्येयं नन्वत्र प्रागुक्तहेतोरष्टावेव नक्षत्रयुग्मा
निमभिधाने उच्यते सप्तशलाकाजन्दतरत्रेति वचनात्सकलशुभकर्मसु विचार्यमाणत्वादेतावतामुक्तिः भं
क्तं भोग्यं तथाक्रांतं विद्धं पापग्रहेणच शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नत इति स्वरोदयेपि सामान्यतोभिधा
नात् अथ क्रूराक्रांतादिनक्षत्रदोषं सापवादमनुष्टुभाह आक्रांतक्रूरविद्धानि क्रूरमुक्तादिकानि च शुक्लार्ध
द्रेणशुक्तानि शुभाहानि प्रचक्षते क्रूरग्रहैर्विद्धानि आक्रान्तानि तथा क्रूरैर्मुक्तानि त्यक्तानि आदिशब्दात्क्रूराक्रा

नानिक्रूरगंतव्यानिच चकारस्यानुक्तसमुच्चयार्थः। त्रिविधोत्पातदूषितानि ऋक्षाणिदूषितानिज्ञेयानि तानिय
दिचंद्रेणभुक्ता भुक्तानि तदा शुभार्हाणि प्रचदंतेनवदंतिमुनयइतिशेषः य
द्राह कश्यपः भुक्तं भोग्यंतथाक्रांतं विद्धंपापग्रहेणभं मांगल्येषुचकार्येषु
यत्नतःपरिवर्जयेत् दिति वसिष्ठोपि उत्पातभंग्रहणभंक्रूरविद्धं स्थितंचयत्
दहत्येवशुभंक भेराघवाग्निश्शरीवंधिरिति शार्ङ्गीये क्रूराश्रितक्रूरविमुक्त
विद्धंगंतव्यधिष्ण्यं भऊमारिकाणां वदंतिपाणिग्रहणेषुनीडावेधव्यमहोत्रि
भिरेवमाद्यरिति अस्यापवादमाहके शावाकः उत्पातपापग्रहदूषितंभंयदी
ड्राक्रम्यपुनर्भुनक्ति तदातदर्हं किलमंगलेषु त्यज्जेत्तमंक्रांतिधनूरवीद्वारिति अथमवधिराक्रांतनक्षत्रभिन्नविष
वेदितव्यस्तत्रचंडाल एष तहस्तस्थानवक्रंडेभोगस्यानिर्णेज्ञकत्वात् तदुक्तं शार्ङ्गीये यद्धिष्ण्यदोषसंयुक्तं स्यात्तथापीडसं
युतं शुभकार्येषुतत्याज्यमन्यकर्मसुसिद्धिदं यथाहिचंडालधृतैकहस्ता मज्जन्नगात्रेपिसरित्प्रवाहे भवेन्नपूतःशशि
भोगतोपितथान्नशुद्धोडु दुपापयुक्तं स्पृष्टागतेतचंडालेशुद्धिरात्मावनाद्यथा तथाभुक्तागतेक्रूरेचंद्रभोगाद्धिशोध
नमिति अत एवोक्तं वसिष्ठेन गंतव्यधिष्ण्यंखलुभोग्यमुक्तं भंक्रूरैर्महोत्पातविदूषितंच चंद्रोपभोगादमलंतदानीं शुभे
षुकार्येषुशुभप्रदंचेति एतच्चसमानन्यायत्वात्क्रूरविद्धेनचंद्रभोगादपिशुद्धिर्नास्तीत्यत्रापिध्येयं यत्तुनारदेनोक्तं ग्र
हणोत्पातभंत्याज्यंमंगलेषुऋतुत्रयं यावच्चरविणाभुक्तानमुक्तंदग्धकाष्ठवदिति तद्यावद्वामेवाचनिकमिति
न्यायेनग्रहणोत्पातभयोः षण्मासपर्यंतंनिषेधस्ततोपियावद्रविणाभुक्तानत्यक्तंतावन्नत्यज्येत् तत्रापिचंद्रग्रहण
एवसूर्यग्रहणएव सूर्यग्रहणीयनक्षत्रस्यतुषण्मासानंतरं सूर्यभोगासंभवएवावधार्यं अनेनक्रूरमुक्तादौ
रविभोगापेक्षा उत्पातभस्यतुचंद्रोपभोगोप्यावश्यकोवसिष्ठवाक्यालोचनात् अत्रक्रूरवेधेनिखिलंभंत्याज्यंनच
रणएव तदुक्तं कश्यपेन क्रूरविद्धयुतंधिष्ण्यंनिखिलंनैवपादतः अन्यैरपिगुणैर्युक्तं सर्वदोषविवर्जितं त्यजेदन्नर्हमा

इति सप्तशलाकाचक्रं
कृ रो मृ आ पु पु अ
म पू उ ह चि स्वा वि
श्र ध उ पू पू ज्ये अ
म अ रे उ पू श ध

णिकं च कलंकोपहतं यथेति अयं च क्रूराधिष्ठितत्वदोषः क्रूरग्रहचंद्रयोरेकराशिस्थितत्वे वेदितव्यः यदा तु चंद्रः प्र
थमपादे क्रूरग्रहस्तु तृतीयपादे एवं सति राशिभेदो यद्यपि नेत्तदा क्रूरग्रहाधिष्ठितत्वदोषो नास्तीति ध्येयं यथाश्व
िशिरसि प्रथमपादे चंद्रस्तृतीयपादे क्रूरग्रहस्तत्र सत्येकनक्षत्रत्वे राशिभेदो द्वयोः उक्तं च ज्योतिर्निबंधे एकस्मिन्नपि
धिष्ण्ये भिन्ने राशौ खलग्रहे शशिनि तत्र च दर्शेऽत्र योद्विवाहयात्रादिकं सर्वमिति मनूक्तेः अथ लत्तादोषमुपजातिकया
ह ज्ञराहुपूर्णेंदुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि संलत्तयंते र्कशनीज्यभौमाः सूर्याष्टतर्काग्निमितं पुर
स्तात् सप्तप्रसिद्धाः गावो नव जातयो द्वाविंशतिः शराः पंच एतैर्मितं भं स्वाक्रांतनक्षत्रात् ज्ञराहुपूर्णेंदुसिताः
स्वपृष्ठे संलत्तयंते यथा बुधः सप्तमं राहुर्नवमं पूर्णेंदुः पूर्णिमा तत्र चंद्रो द्वाविंशं तच्च गतकृष्णपक्षे पंचमीषष्ठी
सप्तमीनां अन्यतमस्यां संभवति शुक्रः पंचमं स्वपृष्ठे लत्तयतीत्यर्थः अर्कशनीज्यभौमाः क्रमेण पुरस्तादग्रे सूर्या
ष्टतर्काग्निमितं संलत्तयंते यथा सूर्यः स्वाक्रांतनक्षत्राद्द्वादशं शनिरष्टमं गुरुः षष्ठं भौमस्तृतीयमग्रतो लत्त
यतीत्यर्थः यदाह नारदः पुरतः पृष्ठतोऽर्काद्यादिनक्षत्रं लत्तितं च तत् अर्कात्कृतिगुणागं तद्बीणाष्टनवसंख्यमिति
सूर्यः पुरतः चंद्रः पृष्ठतः एवं क्रमेण भौमादयोपि पुरतोऽग्रतश्च लत्तयंतीत्यर्थः वराहोपि सूर्यो द्वादशमर्क्षं षष्ठं गु
रुर्भवनिजस्तृतीयं च संलत्तयति दिवाकरपुत्रोऽष्टममग्रतः पादैः पश्चाद्द्वाविंशतिमं पौर्णिमचंद्रस्तु पंचमं शुक्रः
स्वर्भानुरपि नवमं सप्तमम इंदुजः शशांकसुत इति प्रत्येकं वेधफलमाह स एव रविलत्ता वित्तहरी नित्यं कौजी विनि
हंति मरणं चांद्री नाशं कुर्याद्गुरोर्धीनाशं वदंत्येव सौरी मरणं कथयति बंधुविनाशं बुद्धस्य तेऽलत्ता मरणं लत्ता
राहोः कार्यविनाशं भृगोर्वदतीति ननु यल्लत्ता वा पृष्ठलत्ता वा वक्तव्या किमिति द्वैरूप्यकथनं अत्र समाधिर्वा त
रमेकेन वा कमेति सतिद्युमदाम मिलत्तने यदनुलत्तनं मुक्तं पृषित्रज्ञैः तद्दुपश्चिमपूर्वविभागयोरवधिकाधि
कदोषविवक्षयेति अनधिकः स्वल्पः अत्र राहोः सदा वक्रित्वान्नवमं गणनाक्रमेणैव ग्राह्यं यथाश्विन्यां राहुरश्ले
षां लत्तयति संमुखलत्तावादिमतेऽपि वक्रगामिना राहुणा संमुखमश्विनीं रेवतीत्यादिगणनया विंशतिमं अश्लेषैव

मु॰टी॰ नतुवन्यथाश्रमितव्यमिति सांप्रदायिकाः अथ पातदोषं संबोधंपद्यार्धेनाह हर्षणवैधृतिसाध्यव्यतिपातकगंड
वि॰प्र॰ शूलयोगानां अंते यन्नाडीत्रयं पातेन निपातितं तत्त्यजेत् व्यतिपातक इति स्वार्थे कः हर्षणोसाविष्वयोगानामंते यच्च
२॰ ड्यत्रयं तन्नाडीत्रयं भवेत् तत्पातेन चंडीशचंडायुधाख्येन निपातितं स्यात् यदाह त्रिविक्रमः साध्यहर्षणशूलानां वैधृतिव्यतिपात
योः यद्गंडस्य चांते स्यात्तत्पातेन निपातितमिति नारदेनैतत्प्रकारेणैतत्प्रकारसंवादकः पातोभिहितः सूर्यभात्सार्प
ऋक्षं त्वाष्ट्रमित्रोडुविष्णुभे संख्यायादिनभे तावद्धिष्ण्यभात्पातदुष्टभं वसिष्ठेनापि रविभाद्धि मित्रत्वाष्ट्रमहरियोष्ण्यभेषु
गणितेषु आश्विनभादिषु युते तावति वैयंति गणनया पातः अथ ममपि पातो दोषः चंडीशचंडायुधयोर्ज्ञेयः अखिलेषु
मंगलेष्वपि वर्ज्यो यस्माद्विनाशदः कर्तुरिति यद्यप्येषु वाक्येषु हर्षणादीनामुपादानं नास्ति तथाप्यभिहिताश्लेषादिन ग॰ =
क्षत्रसाहित्येन पाताभिधानात् तत्तुल्यसंख्याकेष्वेव योगेषु पातसंभवो ज्ञायत इति मत्वा हर्षणादीनामुक्तिः यद्येवं व्य
तीपातवैधृतिभ्यां स्वीयभोगघटिकात्मकाभ्यां तिथिनक्षत्रादिकं सर्वमेव सामान्यतो निषिद्धमुक्तं तत्किमत्रानयोर्योग
योः पुनर्ग्रहणेन उच्यते यदा नक्षत्रयोगयोस्तुल्यकाल एव प्रवृत्तिनिवृत्ती तदानयोर्योगयोरुपादानं व्यर्थमेव यदा तु
सूर्योदयादारभ्य कियद्घटीकत्वं दुष्टयोगयोर्न नक्षत्रभोगस्तु सूर्योदयादेव बहुकालव्यापी तदा पातासंभवे तावत्काल
स्यैव निषेधः सामान्यवाक्यात् पातसंभवे हि संपूर्णस्य नक्षत्रस्य निषेधो यथा स्यादिति तयोर्दुष्टयोगयोः पुनरुपादा
नं कृतं एवमन्येष्वपि योगेषु पातसंभवे हि संपूर्णस्य नक्षत्रस्य निषेधो यथा स्यादिति तयोर्दुष्टयोगयोः पुनरुपादानं
त्याग इत्यर्थः अयं च सर्वोपि विचार एकार्गलदोषेपि द्रष्टव्यः यदा तु पातैकार्गलोनक्षत्रं स्वल्पदा दुष्टयोगानामुक्तादि
मध्यरीत्यागः कर्तव्य इति अथ सूर्यचंद्रक्रांतिसाम्यापरपर्यायं महापातदोषं शालिन्याह पंचास्याजौ ५१ गोमृगौ
२१० तौलिकुंभौ ७११ कन्यामीनौ ६१२ कर्कालो ४८ चापयुग्मे ९३ तत्रान्योन्यं चंद्रभान्वोर्निरुक्तं क्रांत्योः साम्यं
नोशुभं मंगलेषु पंचास्याजौ सिंहमेषौ अन्ये प्रसिद्धाः एषु राशियुग्मेषु चंद्रभान्वोः पाठक्रमेण व्युत्क्रमेण वा स्थित राम॰
योः क्रांतिसाम्यं निरुक्तं तन्मंगलेषु नो शुभं स्यात् अत्र पंचास्याजावित्येवमादीनां ग्रहणमुदाहरणदिक्प्रदर्शनार्थत्वात् २॰

वेथा सूर्याचंद्रमसोः सायनयोर्योगः षड्राशिमितो द्वादशराशिमितो वा विवक्षितस्तदैव क्रांतिसाम्यस्य संभवात्
अतः संमतिवाक्यानवसरः नन्वेतावंत एव षड्राशियोगा द्वादशराशियोगा वा संभवंतीति चेन्न राश्यंत्यावक्रे दृष्टि
त्याधिका अपि योगा ज्ञायंते तथा हि २ ४ ३ ० २ ४ ३ ४ ५ ६ ० २२ २० २९ प्रत्यंशकलाविकलांतस्थितत्वे
नांतभेदसंभवाच्चातः प्रागुक्तं व्याख्या ५ ४ ३ ० २२ २० २९ ८ ७ ६ ६ ७ ८ ९ नन्वायः क्रांतिसाम्यस्यैव महापा
तइतिनाम एतस्य निंद्यतामाह वसिष्ठः दोषो महापातइति प्रसिद्धः सर्वेष्टनाशं निवर्ध्रुवं च नरहितं तल्लग्नगुणास्त
शक्ताः स्वबांधवास्तेषु निनोपयानमिति अथ निर्वंन्त्रे नारदोऽपि यस्मिन्दिने महापातस्तद्दिनं वर्जयेच्छुभे इति अत
एव पतनं पातः सकलशुभकर्मणामित्यन्वर्थतापि सा च स्पष्टा सोमसिद्धांते यद्भुभानोविनाशायनदत्तेव
पतत्ययं व्यतीपातः प्रसिद्धोत्र संज्ञाभेदेन वैधृतइति महापातशब्दस्य रूढिस्तु रवींदुक्रांतिसाम्येनत्वन्येषांग्र
हाणां क्रांतिसाम्ये यथाऽजलजशब्दस्य रूढिः कमलेन तद्भेकादौ क्रांतिः नाम ग्रहाणां दक्षिणोत्तरदृष्ट्येगमनं यावती
सूर्यस्य क्रांतिः सायनचंद्रक्रान्त्या तुल्या स्यात्स पातमध्यकालः तत्रोत्सर्गेतो रवींदुक्रांत्योः समानत्वं भुक्तसाम्ये
सति भवति भुक्तो नाम ऊनं भुक्तः स्यादधिके नहीनं भार्द्धं च भार्द्धादधिकं विभार्द्धं नवाधिकेनोनितमर्कं भंचेनि
लक्षणलक्षितः तत्साम्यं तु सूर्याचंद्रमसोः योगे षड्राशितुल्ये द्वादशराशितुल्ये वा सति भवति अत एव ग्रंथकृ
तातादृशा योगा एव पठिताः यदा भुक्तस्य न्यूनाधिकत्वं तदादिवौकसोरंतर लिप्तिकोद्याङ्गत्योर्वियोगेन हताः
त्यादिना प्रकारेण ग्रहद्युतिवद्भुक्तसाम्यमानेयं ननु भुक्तसाम्यमेव क्रांतिसाम्यसाधकं चेत्किं गणितग्रंथोक्ते
न बहुधायाससाध्येन पाताध्यायेनोच्यते विक्षेपापक्रमैकत्वे क्रांतिर्विक्षेपसंयुता दिग्भेदे वियुता स्पष्टाभा
स्करस्य यथागतेति सूर्यसिद्धांतवाक्यात्सूर्यव्यतिरिक्तानां ग्रहाणां शरसंस्कृता क्रांतिः स्पष्टेत्युच्यते तादृ
शी चंद्रक्रांतिः चेत्सूर्यक्रान्त्या समा यस्मिन्काले स्यात्स पातमध्यकालः तत्र तादृशक्रांतिसाम्यायनस्याति
कष्टसाध्यत्वात्तदध्यायोक्तिः सार्थिकैवेति एवं च ग्रंथकर्त्रा सूर्याचंद्रमसोः क्रांतिसाम्यमेव दोषाभिहितः पं

चास्य ज्ञानवित्यादि कथ्यते किमर्थमिति चेदुच्यते विनासम्पातेन विहायनांशकैर्युतो रविः शीतकरश्च गृह्यते समाप
मत्वे व्यतिपातवैधृतनामकयस्तयोरैक्यरसभेर्क भेकमात्रिति भास्कराचार्योक्तिमंगीकृत्य सामान्यतः क्रान्तिसाम्यादिवस
स्पर्शीत्रोपस्थित्यर्थं भुजसाम्यप्रतिपादकत्वात् नन्वेवं भुजसाम्यमेव क्रान्तिसाम्योत्पादकं भवेत्तर्हि यत्र सूर्याचंद्रम
सोः षड्राशिमितमंतरं द्वादशराशिमितमंतरं वा यथा मेषतुलयोर्मेषयोर्वा तत्रापि भुजसाम्यस्य तादृगवस्थ्या क्रान्ति
साम्यं भवत्येवेति मासमध्ये महापातचतुष्टयं वक्तव्यं स्यात्कुतो हेतोर्नोक्तं ग्रंथकृतेति चेत् अत्रोच्यते योगोत्पन्नो हि
पातो मुनिभिः स्नानदानादिकं फलमुक्तमतः स एव महापातो गृह्यते तदुक्तं वसिष्ठेन स्वसिद्धान्ते चक्रे चक्रार्द्धतुल्ये वा कि
यद्भागाधिकोनके सायनार्केन्दुयोगे चेत्तदा पातस्य संभवः शुभमंगलकर्माणि लोकानां च विनाशयेत् स्नानदाना
धिकास्तत्र जपश्राद्धादिकाः क्रियाः कदापि कुरुते मर्त्यः समहत्फलमश्नुते सूर्यग्रहे कुरुक्षेत्रे कोटिस्वर्णार्पणे फलं
तत्फलं लभते पाते स्नानश्राद्धजपादिना गत्वान्तो लक्षगुणितं श्रमेणैकादिसंगुणं पातेथार्बुदसंगुणं पतितेष्टतमस्त
यमिति तथा सूर्यसिद्धान्तेपि एकायनगतौ स्यातां सूर्याचंद्रमसौ यदा तद्युतौ मंडले क्रान्त्योस्तुल्यत्वे वैधृताभिधः विपरी
तायनगतौ चंद्रार्कौ क्रान्तिलिप्तिकाः समास्तदा व्यतीपातो भगणार्धे तयोर्युतौ तुल्यांशुजालसंपर्कात्तयोस्तु प्रवहा
हतः तद्दृक्क्रोधोद्भवो वह्निर्लोकाभावाय जायत इति अत एवांतरोत्पन्नक्रान्तिसाम्ये महापातदोषाभावस्त्वेव तदुक्तं
गणेशदैवज्ञैः पर्वांतात्प्रान्त्यान्तमध्ये द्वितीयं पूर्वैर्नोक्तं तद्यतो नैतिपातः सवैधृतोहं निवधूर्वं च त्रिसप्तवानिवज्ञा
मदग्न्यक्रोधोचिरात्त्रात्र कुलं समस्तमिति शास्त्रान्न लिखितं प्राग्रोक्तान्महापातादधिकारादित्यर्थः तत्र हि योगादेव म
हापातस्यातीतत्वात्तस्यैव दोषवत्त्वं नान्यस्येत्यर्थादुक्तं भवति किंच पंचांगीयोपि योगः सूर्याचंद्रमसोर्योगादेव साधि
तः स्पष्टाधिकारे अतस्तस्मान्महापातोपि साधयितुमुचित एव अथात्र ज्ञाते क्रान्तिसाम्ये कस्मिन्काले मंगलकृत्यं
निषिद्धमित्यत्र विचारो न्यूनाधिमासकुलिकप्रहरार्द्धपाता इत्यत्रास्माभिरभिहितोस्ति सततमेवावगंतव्य इत्यलम
तिप्रसंगेन अथ स्वबोधं खार्जूरदोषमिंद्रवज्रयाह व्याघातगंडव्यतिपातपूर्वे शूलान्त्यवज्रे परिघातिगंडे एकार्गला

ख्याह्य भिजित्तामेतो दोषः स्यात् श्रोचेद्विषमर्क्षगोऽर्कोनः अंत्यावैधृतिः अन्ये प्रसिद्धाः यस्मिन्दिने व्याघातादिके वि
रुद्धे ऋक्षेन सूर्येगतः चेत्स्यात्तदा खार्जूरचक्रोत्पन्न एकार्गलाख्योदोषः स्यात् यदा समे स्यात् यदा समेस्यात्तदा न दोषः इ
त्यर्थः यदा दुस्त्रिविक्रमः विरुद्धनामयोगेषु साभिजिद्विषमर्क्षगः अर्कादिंदुस्तदा योगानिंद्यएकार्गलाभिधइ
ति केशवार्केणापि न्यस्तेमहाभिजितीत्यादिना भिजिद्गणनोक्ता वसिष्ठेन त्वत्रचक्रमभिहितं अंत्यातिग
एउपरि चव्यतिपातपूर्वव्याघातगंड वरसूलमहाशनीषु चित्रानुराधपित्र्यपन्नगदस्रभेषु स्वाति
तन्य सूलशूशिसूरिषु मूर्धभेषु रेखामेकामूर्ध्वगां षड्गुसप्ततिर्यक्कृत्वायत्र खार्जूरचक्रे तिर्य
ग्रेखोसंस्थयोः चंद्रभान्वोर्देवक्षपातो दोषएवार्गलाख्यः चक्रोद्धारो यथा खरकरसुहिनांशी दृष्टि
संपातं ज्ञात स्वनलमयशरीरस्फुलिंगैरनग्रिसंज्ञात् भुविपततिजनानां मंगलध्वंसनाय गुण श्रान
मंचैरथ्यवायाग्निकोपइति अत्रवसिष्ठवाक्ये भिजिन्नाहित्यमस्ति नवेतिसंदेहः नारदस्त्व भि
र्जितंचक्रमाह व्याघातशूलपरिघपातपूर्वेषु सत्स्वपि गंडातिगंडऊलिशवैधृत्यासहितेषु जिद्
अदितीडुमघाह्यायमूलमैत्रेंद्रभानिच ज्ञेयानि सहचित्राभिर्मूर्ध्निभानियथाक्रमं लि च
र्ध्वगतामेकां तिर्यग्रेखास्त्रयोदश तत्र खार्जूरिकेचक्रे कथितं मूर्ध्निभान्यसेत् भान्यकारे खेट्
गलयोः सूर्याचंद्रमसोर्मिथः एतद्वाभिजिदृर्जितानि चोलांगले कमलेचक्रे फणिचक्रे त्रि खा
के अभिजिद्गणनानास्तिचक्रे खार्जूरिकेतथेति कश्यपेनापि एकार्गलोदृष्टिश्चाभिजिद्र नाडि
निवेइति तत्रपिविक्रमकेशवार्कवाक्ययोः समूलत्वशिष्टसंमतत्वानारदादिवाक्यैः सह विकल्पः ततोनयोः पद्य हिता
योः यथादेशाचारंव्यवस्थेति युक्तं प्रतीमः अथोपग्रहदोषमुपेंद्रवज्रयाह शराष्ट ८ दिक्कु १० शक्रनगा ७ नि
धृत्यनिष्ठिर्धृतिश्चप्रकृतेश्चपंच उपग्रहाः सूर्यभतोब्जताराः शुभानदेशेकुरुवाह्लिकानां सूर्यभतोब्जताराः ष्णुंद्रनक्ष
त्राणि पंचाष्टदशचतुर्दशसप्तैकान्नविंशतिपंचदशाष्टादशैकविंशतिद्वाविंशतित्रयोविंशतिचंतुर्विंशतिपंचविंश

वेधत्रि	
हू	स्वा
उ	वि
पू	अनु
मे	ज्ये
अ	मू
उ	पू
पु	उ
श्री	श्र
म	ध
रे	श
कृ	पू
भ	उ
अ	रे

इति खार्जूरचक्रं

मु·दी·
वि·प्र·
११

तिसंख्याकाः चेत्स्युस्तदोपग्रहा उपग्रहनामकादोषाः स्युः प्रकृतिरेकविंशतिः यदाह नारदः भूपेकंपः सूर्यभात्सप्तम
र्क्षे विद्युत्तु पंचमे शूलोष्टमे च नवमे शनिरष्टादशे ततः केतुः पंचदशे दंडश्चोल्का एकोनविंशतिः निर्घातपातसंज्ञस्तु द्वे
षः सनवपंचमे मोहनिर्घातकंपाश्च कुलिपरिवेषकं विद्युद्यांश्चैकदोषाख्या विंशाख्यादारभ्य च यथाक्रमं चंद्रयु
क्तेषु भेषु शुभकर्म न कारयेत् इति एतत्फलमाह वराहः उपग्रहर्क्षेषु विवाहिता स्त्री सूर्यर्क्षतोऽभंगतामुपैति अ
न्यत्रापि गृहप्रवेशे दारिद्र्यं विवाहे मरणं भवेत् प्रस्थाने विपदः प्रोक्ता उपग्रहदिने यदीति एवं सामान्यतो निषेधमभिधा
येदानीं देशभेदेन परिहारमाह शुभाइति स्पष्टार्थं वाह्लीके कुरुदेशे च वर्ज्ययेद्भमुपग्रहमिति कश्यपोक्तेः अथोपग्र
हापवादप्रसंगात्पातोपग्रहलत्तास्वप्यपवादं वारदोषभेदमर्धयामं चानुष्टुभाह पातोपग्रहलत्तासु नेष्टो घ्रिः खेटपत्त
मः वारस्त्रिघ्नोष्टभिस्तष्टः सैकः स्यादर्द्धयामकः पातः चंडीशचंडायुधाख्यो दोषः उपग्रहः प्रागुक्त एव लत्ता सङ्गः पू
र्णेद्वित्यादिनोक्ता सत्र खेटपत्तमः ग्रहचरणतुल्यो नक्षत्रचरणो निष्टः अयमर्थः पाते उपग्रहे च रविर्यस्मिन् नक्षत्रे स्या
त्तदा तन्नक्षत्रस्य एव चरणस्तस्य नक्षत्रस्य वर्ज्यो नान्यः लत्तायां तु येलत्ताकारिणो ग्रहा यच्चरणेस्युस्तत्समसंख्य एव चर
णो वर्ज्यो नान्यः उक्तं च मुहूर्तदीपिकायां उपग्रहेषु लत्तायां तथा चंडायुधाह्वये ग्रहोस्ति यत्प्रमाणोंशो विद्धांघ्रिस्तत्प्र
माणक इति उपग्रहचंडायुधयोः सूर्यकृतोंघ्रिग्राह्यस्तस्यैव संभवात् अयं च परिहारस्तुल्यन्यायत्वात् वारदूरके पिंड
ष्टव्यः सूर्यो यस्मिन् पादे भवेत् तत्समसंख्यः चरणस्यारेखावस्थितचंद्रनक्षत्रस्य वर्ज्य इत्यर्थः खाङ्कैरेकसमा त्रिभमि
तिनारदोक्तेः द्युपातिर्निर्बंधे गर्गः पूर्वाह्णे दंडदोषः स्यादपराह्णे तु मोहकः उल्कायामर्धरात्रे तु कंपो होरात्रदूषकः
कंपोल्कादंडमोहानां स्वरमासदशान्तवः २९ २० ६ आदितो घटिकास्तेषु वर्ज्जनीयाः पराः शुभा इति वार इति इष्टो वारः
त्रिघ्नः सैको ष्टभिः स्तष्टः शेषितो यामकः सोऽर्द्धयामाख्यो दोषः स्यात् वार्थकः यदाह श्रीपतिः मनीषिणोर्द्धप्रहरादि कुनी
यादारभ्य सर्वेष्वपि मंगलेषु भौमशनिसूर्येबुधार्किचंद्रसुरेज्यवारेषु विवर्जयंतीति अत्र कथं समानार्थते तिचेड्च्य
ते प्रथमो द्वप्रहरः कस्यापि वर्ज्यो नास्ति तत्र सूर्यस्य वारे तावत्प्रथमार्द्धप्रहरादारभ्य तृतीयोर्द्धप्रहर उक्तः अतस्त्रि राम·
११

गुणसैकद्रत्युपपन्नं ततस्तृतीयः चंद्रस्य वारे सूर्योदयात्सप्तम इति वारस्त्रिघ्नः सैकद्रत्यत्रापि सिद्धं ततः तृतीयो भौमस्य
वारे सूर्योदयात् अष्टमः रात्रौ चाद्ययामानुक्तेः दिवसस्याष्टावर्धयामाः इष्टभिः शेषितैः इत्युपपन्नं एवं बुधवारादिष्वपि द्रष्टव्यं अत्र
पुनरुक्तिपरिहारमधुनैव वक्ष्यामः कश्यपः शैलाक्षश्रुतयः सूर्ये चंद्रे षट्वेदपर्वताः भौमे बाणाग्निनेत्राणि सौम्ये वेदाक्षि
वायवः गुरुवारे सिचंद्रेमाः शुक्रे नेत्राद्रिवह्नयः शनौ चंद्रेमतर्काः स्युः कुलिकोयमकंटकः अर्धप्रहरसंज्ञास्तान्मंग
लेषु विवर्जयेत् वारदोषेण दुष्टं तल्लग्नं सर्वगुणान्वितं त्यजेद्यथाशुरोऽग्राशं वायसोपहतं यथेति फलमाह वसिष्ठः नि
धनं प्रहरार्धे तु निस्वत्वं यमकंटके कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदा इति अथ वारदोषभेदं कुलिकमनुष्टुभा
ह प्राक्प्रोक्तार्कदिग्वसुरसाब्ध्यश्विनः कुलिका एव रात्रौ निरेकास्तिथ्यंशाः शुभा चान्योपि निंदितः रवेरितिल्पज्ञोपं
चमी रविमारभ्य सर्ववारेषु क्रमादंकसंख्यास्तिथ्यंशा मुहूर्ताः कुलिकाः स्युः यथा दिवसे रवौ १४ सोमे १२ भौमे १०
बुधे ८ गुरौ ६ शुक्रे ४ शनौ २ एते पुनरात्रौ निरेकाः कार्याः यथा रवौ १३ सोमे ११ भौमे ९ बुधे ७ गुरौ ५ शुक्रे ३
शनौ १ त्वंत्यापि रात्रेः पंचदशापि मुहूर्ताः कुलिका एते कुलिका निंदिताः यदाह श्रीपतिः मन्वर्कवस्वृत्वेदपक्षैरेको
न्मुहूर्तैः कुलिका भवंति दिवा निरेकैरथ यामिनीषु ते गर्हिताः कर्मसु शोभनेषु रत्नकोशे दिवा द्वितीयः कुलिकोर्क
ज्ञाने रात्रौ प्रदिष्टः प्रथमः स एव रात्रेस्ततः पंचदशे विभागे एवं विवर्ज्यं कुलिकात्रयं चेति ननु सामान्यतः सूर्ये षट्स्व
इत्यागेत्यादिना दुर्मुहूर्तोर्धयाम कुलिका उक्ताः इदानीं किं पुनरुच्यंते इति सत्यं आवश्यकत्वद्योतनार्थं तथाहि
विवाहे एषां दोषानां सर्वथैव त्यागः विवाहे विधवा नारीत्यभिहितफलस्य दुःखहरत्वात् भर्तुर्मरणे हि यावज्जीवं पत्न्याः
सर्वप्रकारकदुःखानुभवसत्वात् यज्ञोपवीतादिशुभकर्मणि तु संस्कार्यमरणे संबंधिनां तात्कालिकं दुःखं पित्रा
स्तु पुत्रांतराभावे किंयत्कालमेव न तत्साम्ये पुनः किंयद्दिनमात्रं सर्वथा विधवासदृशं दुःखं कस्यापि नास्ति तदुक्तं पु
राणे किंच वारप्रकरणे सामान्येन मुनिभिर्दिनरात्रिसाधारण्येन कुलिकाद्युक्त्वा रात्रौ एते न दोषदा इत्युक्तं तस्या
पि बाधो यथा स्यात् अत एव कश्यपो वारप्रकरणे कुलिकयमकंटकार्धयामानभिधाय विवाहप्रकरणे पुनरप्यभि

धानेकृते किंच कुलिकाद्यत्र ह्यवश्यंवक्तव्याः रात्रौकुलिकज्ञानं यथास्यात्तत्रसाधारण्येन दिनरात्रिविभागेनश्रीविद्यो
पस्थित्यर्थंपद्येनाभिधाने सूर्येषट्स्वरनागेत्यादिनामुहूर्तत्यागे कुलिककंटकार्द्धप्रहरा इति पुनःसंदेहे कुलिकःका
लवेलाचेतिपद्यस्मरेणमयेहितमितिगौरवापत्तेश्च अतएवशिष्टाअप्येतेषांदोषाणांयथासंभवत्यागश्चैवकं कुलि
कार्द्धयामदुर्मुहूर्तानामवश्यंत्यागंविदधते तोग्रंथकर्त्रापिपुनरुक्ता इतियुक्तंप्रतीमइत्यलमतिप्रसंगेन अथपंचां
गदोषविशेषंदग्धतिथ्याख्यंदवज्रयाह चापांत्यगेगोघटगेपतंगेकर्कांगेस्त्रीमिथुनस्थितेच सिंहालिगेनक्र
घटेसमाःस्युस्तिथयोद्वितीयाप्रमुखाश्चदग्धाः तत्तद्राशियुग्मस्थितेपतंगेसूर्येद्वितीयाःप्रमुखाः शुक्लपक्षकृष्ण
पक्षसाधारणाः समास्तिथ्यादग्धाः स्युरितिवाक्यार्थः यथाचापांत्यगेधनुर्मीनगेसूर्ये द्वितीयादग्धा गोघटगे
वृषकुंभगेसूर्येचतुर्थी कर्कांगेकर्कमेषगेसूर्येषष्ठी स्त्रीमिथुनेकन्यामिथुनस्थितेसूर्येऽष्टमी सिंहालिगेसूर्ये
दशमी नक्रघटेमकरतुलागतेसूर्येद्वादशीदग्धेत्यर्थः यदाहवसिष्ठः एकांतरादिनपतेर्दिवसाद्वितीयाः पूर्वांत्यचा
पधरयोःघटगोक्षयोश्च कर्कांगयोर्मिथुनकन्यकयोश्चकीटहर्योस्तुलामकरयोःखलुमासदग्धाः मासदग्धा
स्तिथिषुकृतंयन्मंगलादिकं तत्सर्वंनाशमायाति ग्रीष्मेकुसरितोयथेति पूर्वांत्ययोस्तत्रपूर्वांत्येत्याद्यपेक्षितं तत्र
नमुनेत्यत्रनेतियोगविभागात्सिद्धत्वाभावेसंधिः गोक्षयोरिति उक्षावृषभस्तस्यायंराशिरौक्षः गोक्षमनपत्यइत्य
कारांतोनिपातितः अस्यापवादमाह कश्यपः मासदग्धाश्चतिथयोमध्यदेशेप्रकीर्तिता इति अथजामित्रदोषंश्रमन
रविलसितवृंदमाह लग्नाच्चंद्रान्मदनभवनगेखेटेनस्यादिहपरिणयनं किंबाणाबाणाशुभमितलवगेजामित्रं
स्यादशुभकरमिदं विवाहलग्नाच्चंद्राद्वासप्तमेभवनेग्रहे तत्रगतेखेटेपरिणयनेनस्यात् उक्तंच जामित्रंद्विविधंप्रोक्तं
गर्गगालवगौतमैः तस्माल्लग्नाच्चचंद्राच्चजामित्रंपरिवर्जयेदिति तत्स्वरूपमाह महेश्वरः लग्नाक्षीतकराद्गृहाद्युनग
तानेष्टाविवाहेस्मरात् इतिवसिष्ठोलग्नप्रकरणेसर्वंसजामित्रसंस्थाविदधतिमरणमित्याह लल्लः पापास्सप्तमगाःशु राम॰
भीयदिभवेत्पापेनयुक्तोथवायत्नेनापिविवर्जयेन्मुनिमतेदोषोपिसंकथ्यते उद्वाहेविधवाव्रतेनमरणंशूलंचपु ३२

स्कर्मणा यात्रायां विपदो गृहेषु निधनः शौरेपि रोगो महान् ॥ भुजबलः चंद्रात्सप्तमराशिगे दिनकरे त्यक्ताधनैः कल्पका
भौमेचप्रमदाप्रयाति विलयं सौरेणवंध्यासुतः ॥ जीवः शुक्रशशांकजौ शुभकराः केचिद्वदंति क्रमात् प्राङ्नत्रप्रेक्षित
दीक्षितास्तु भवने नित्यं प्रवासान्वितेति अस्यापवादमाह किंवेति किंवा शब्दो विकल्पे पूर्वं ग्रहाधिष्ठितराशेः सप्तमरा
शिस्थितः हि त्रिंशद्भागात्मकं लग्नं चंद्रश्च निषिद्धः उक्तः इदानीं तदधिष्ठितराशिस्थ यांशामयप्रभावाणा शुभाः पंच
पंचांशात् तस्मिन्नवांशके लग्ने चंद्रे च सति जामित्रं दुष्टं स्यात् यथा मेषराशौ पंचनवांशे भौमोस्ति तस्मात्तु ला
यां पंचमनवांशस्थे लग्ने चंद्रोपि निषिद्धो न्ये षष्ठो नवांशाः शुभाः एवं विधं दुष्टं जामित्रमिदमशुभकरं स्यात् यदाह
महेश्वरः कैश्चिन्नायनवांशकादिषु प्रारैस्तु तयेनवांशे स्थिताइति केशवार्कस्तु चंद्रनवांशादेवा हाहि मरश्मिनवां
शकाश्च लोयदिचंद्रोपि खलस्य मायकाप्ता ९९ केऽपयमन्यगुणैर्न हन्यते निविडे प्युपसर्गडंबर इति अपवादांतरमा
ह रत्नमालोः तुंगत्रिकोण भवने भवने निजे वा सौम्याधिमित्रगृहगोपि तदीक्षितो वा जामित्रवेधजनितानपकृत्य दो
षान् दोषाकरः सुखमनेकविधं विधत्त इति व्यवहारोच्चयेपि स्वोच्चे स्वगृहे वा स्वभवने स्फुरद्रश्मिजालः सौम्यालये हितगृहे
शुभवर्गगो वा जामित्रकाधिपरिसंधितदोषराशिं हत्वा ददाति बहुधा सुखमेव चंद्र इति कालखंडे वात्स्यायनः गुरु
शुक्रबुधज्ञा मित्रे निष्ठेयदि बलान्वितः धनसौभाग्यपुत्रांश्च लभते नात्र संशयः मणिमुक्ताप्रवालैश्च सुवर्णाभरणैः
शुभैः पूरामिता तु सदा तिष्ठेद्गुरुणापि निरीक्षिते सा तु भर्तुः प्रिया नित्यं बुधे चंद्रस्य सप्तमे इति अथैकार्गलादिदोषा
णामुक्तानां लग्नांतराभावे सत्यपवादभूतमिदं वज्रयाह एकार्गलोपग्रहपातलत्ताजामित्रकर्तर्युदयास्तदोषाः
नश्यंति चंद्रार्कबलोपपन्ने लग्ने यथार्कोभ्युदये तु दोषाः एकार्गलः खार्जूरचक्रे उपग्रहः शराष्टेत्यादिनोक्तः पातश्चं
डीशचंडायुधं लत्ताज्ञ राद्धिन्यादिनोक्ता जामित्रमधुनोक्तं कर्तरीलग्नात्पापाविमुक्ता उदयास्तदोषाव्यक्तंते एवं विधा
दोषा नश्यंति कदा विवाहादिलग्ने चंद्रार्कयोर्बलं स्वोच्चमित्रादिराशिस्थितत्वरूपं विहितस्थानस्थितत्वं चतेनोप
पन्ने सति तत्र दृष्टांतमाह यथेति अर्कस्य सूर्यस्याभ्युदये दोषा रात्रिर्यथा नश्यंतीत्यर्थः गाढांधकारयुक्तापि रात्रिरेका

मु॰टी॰
वि॰प्र॰
३४

किंनः सूर्यस्योदये स्वयमेव नश्यति अत एव दोषापवादः प्रयुक्तः निशादियोगे तु साधारण्येन शुक्लपक्षीया या अपि सवेः
संभवाच्चंद्रेणैव किंयन्न मसो निरस्तत्वादेव शिष्टांधकारनाशो सूर्यस्यापुरुषार्थत्वापत्तेरिति केचित्तन्न्यायमपि सू
चयति दोषापदं वसिष्ठवाक्यस्य मन्वादिवाक्यवत्प्रामाण्यान्न संमत्यंतरापेक्षा अथ केषांचिद्दोषाणां देशभेदेन प
रिहारमुक्तमुपजातिलक्षणाक्रांतं वसिष्ठपद्यमेवाह उपग्रहर्क्षं कुरुवाह्लिकेषु कलिंगवंगेषु च पातितं भं सौ
राष्ट्रसाल्वेषु च लत्तितं भं त्यजेत्तु विद्धं किल सर्वदेशे कुरवो वाह्लीकाश्च पश्चिमदेशास्तेषूपग्रहदोषाक्रांतं भं त्य
जेत्तदतिरिक्तसर्वदेशेषु तेषु शुभमेवेत्यर्थः कलिंगवंगश्च प्राग्देशौ बहुवचनात् मगधांगादयोपि तेषु चंडीशचं
डायुधापरपर्यायं पातं त्यजेत् न तु क्रांतिसाम्यरूपं पातं तस्य महापात इति व्यवहारात् सौराष्ट्रः सोरठ इति भाषा
साल्वदेशः पश्चिमदेशविशेषः बहुवचनग्रामवाक्षघातेषु लत्तितं लत्तासंज्ञानायस्यतं भं परित्यजेत् विद्धं क्रूरेण शुभेन
वा पंचशलाकादिचक्रद्वारा भिन्नं भं भूमीतलवर्त्तिसर्वदेशेषु त्यजेत् किल निश्चयेन न त्वस्य देशभेदेन परिहारः एत
दपि वाक्यसंमत्यंतरं नार्हति विवाहपटले लत्ता मालवके देशे पातः कोसलके तथा एकार्गलं तु काश्मीरे वेधः स
र्वत्र वर्जयेदिति वराहः युतेर्दोषो भवेद्गौडे ज्ञामित्रस्य च यामुने वेधदोषस्तु विंध्याख्ये देशे नान्येषु केचनेति एषां वा
क्यानां यथादेशाचारं व्यवस्था अन्यदशायोगदोषमुपजातिकयाह शशांकसूर्यर्क्षयुते भशेषे खभू २ युगा ४ गा
नि ६ दशेश तिथ्यः नागेंदवो केंदुमिता नखाश्च ह्यंवंति चैते दशयोगसंज्ञाः वेद द्वि चंद्र सूर्य नक्षत्रयोर्युते योगा
द्गैः सप्तविंशत्या भक्ताद्यच्छेषं तस्मिन्नूस्त्रैत्येकत्वतः षड् दशैकादशपंचदशाष्टादशैकोनविंशतिसंख्याके सति ए
ते एकादशयोगसंज्ञा भवंति नान्य इत्यर्थः शिष्टानां दशनामकानामभिहितत्वाद्दशयोग इत्यन्वर्थासंज्ञा तदुक्तं दी
पिकायां तिथ्यंगवेदैक दियूनवंशामेकादशाष्टाविंशसंख्याः इष्टा उ नाहस्त्र्ययुतेन तु नाच योगादर्मीच दशयोगदोषाः
लल्लोपि यस्मिन्नृक्षे रविस्तिष्टेद्यस्मिन्नृक्षे शशी तथा द्वयोर्योगे हृते धिष्ण्यैः शेषः स्यात्खादितो दश अन्यथेष्टन्त्रुपाणि दि राम॰
गुद्र तिथ्ययोध्धृतिः इनविंशो नखाश्चेति दशयोगाः प्रकीर्त्तिता इति अथ दशयोगानां फलं तदपवादं च शार्दूलविक्रीडितेनाह ३४

वाताग्न्यग्निमहीपचौरमरणं रुग्वज्रवादः क्षतिर्योगांके दलिते समे मनुयुते धिष्ण्यैर्जितैः सैकेर्द्धिते भं दास्यादथ संमि
ता त्र्यमनुभौ २७ रेखाः क्रमात्तं लिखेद्धस्मिन् ग्रहचंद्रयोर्न शुभदः स्यादेकरेखास्थयोः शून्ये शेषे वा ताडि
षः स्यादेके शेषे भ्रान्तेर्वात् चतुर्थे वह्निः षष्ठे महीपाद्भयं दशमे चौरात् एकादशे मरणं द्वयोरन्यतरस्य
वा पंचदशे रुक् अष्टादशे वज्रं एकोनविंशे वादः कलिः द्वादशे चौरात् एकादशे मरणं द्वयोरन्य
तरस्य वा पंचदशे रुक् कंटकं इति यावत् विंशतिशेषे क्षतिर्द्रव्यनाशः स्यात् यदाह लल्लः मरुद्भयाग्निभूपा
लचौरमृत्युरुग्वज्राशनिः कलिर्हानिर्निर्दिश्या द्वाहे दोषाः स्युः सदा बुधैः विवाहादौ प्रतिष्ठायां व्रते पुंसवने तथा
कर्णवेधे च चूडायां दशयोगं विवर्जयेदिति अथापवाद उच्यते योगांक इति खभूयुगांगादिरूपे योगांके समे यु
ग्मसंख्याके सत्यर्द्धीकृते तेनो मनुभिः चतुर्दशभिर्युते योगांकस्तद्दशास्तदश्विनीतो भं नक्षत्रं स्यात् यथा समांकोद
शयोगः ८ अर्द्धितः ४ मनुयुतः १८ मूलनक्षत्रं जातं अथ योगांके ओजे अयुग्मसंख्याके सति सैके एकयुक्ते त
तोर्द्धिते अश्विनीतो भं स्यात् यथा विषमांको दशयोगः १७ सैकः १८ अर्द्धितः ९ पुष्यनक्षत्रं जातं अथैतन्यन्नतं
मनुभिः संमिताश्चतुर्दश रेखास्तिर्यक् क्रमात्तं लिखेत् तद्यथा नेमप्रकारेण यन्नक्षत्रमागतं तत आरभ्य साभि
जिन्नक्षत्रचक्रं दमस्मिंश्चक्रे लेख्यं ततः सूर्यः स्वाक्रांतनक्षत्रे स्थाप्यः द्विनक्षत्रे च चंद्रः एवं सति यदि ग्रहचंद्रावेक
रेखास्थौ स्यातां तयोस्तादृशयोः परस्परावलोकनरूपो वेधो न शुभदः उक्तं च ज्योतिः सारसागरे योगांके विषमे सै
के समे सवसलोचने दलीकृतेश्विनीपूर्वं दशयोगमुदाहृतं दशयोगे महाचक्रे प्रमादाद्यदि विध्यते क्रूरैः सौम्यग्र
हैर्वापि दंपत्योरेकनाशनमिति दशयोगापवादांतरमाह भरद्वाजः गुरौ लग्नाधिपे शुक्रे सवीर्ये लग्नकेंद्रगे दशदोषा
विनश्यंति यथाग्नौ तूलराशयः तूलं कार्पासः व्यासोपि शुक्रेण गुरुणा वापि संयुतं दृष्टमेव च दशयोगसमायुक्तं
अपि लग्नं शुभावहमिति अथ बाणदोषं शालिन्याह लग्नेनाढ्या यातनिथ्यांकतष्टाः शेषे नागद्व्यग्नितर्केंद्र
२ ४ ६ २ संख्ये रोगो वह्नी राजचौरौ च मृत्युर्बाणश्चायं दाक्षिणात्यप्रसिद्धः शुक्लप्रतिपदारभ्य गततिथ्यो

मु॰टी॰ कैर्नवभिस्तष्टाः शेषे नाग संख्ये ऽष्टसंख्ये रोगाख्यो बाणः एवं द्विसंख्ये शेषे वह्न्याख्यः चतुः शेषे संख्ये शेषे राजाख्यस्त
वि॰प॰ कोः षट् तत्संख्ये शेषे चोराख्यः एकसंख्ये शेषे मृत्युसंज्ञो बाणः एवं द्विसंख्ये पंचबाणा दाक्षिणात्येषु महाराष्ट्रदेशी
३९ येषु लोकेषु प्रसिद्धस्तेन देशाचारव्यवस्थया बाणस्य त्यागः ननु प्राच्योदीच्यपाश्चात्यानां तदुक्तं सप्तर्षिमतविवा
हपटले गततिथियुतलग्नं पंचधा स्थापनीयं तिथिरविदिग्नागैर्वेदयुक्तं क्रमेण नवहृतशरशेषे बाणसंज्ञाः क्र
मेण रुगनलनृपचौराः पंचमो मृत्युसंज्ञ इति अथ प्राच्यमतेन बाणं सापवादं मालिनीछंदसाह रसगुणशशिना
गाब्ध्याढ्य संक्रांतियातांशकमितिरथ तष्टा कैर्यदा पंचशेषा नगनलनृपचौरा मृत्युसंज्ञश्च बाणो नवहृतशरशे
षे शेषकैक्ये सशल्यः अथ शब्दः पादपूरणे रसगुणशशिनागाब्धिभिराढ्या चासौ संक्रांतियातांशकमितिश्च
तिकर्मधारयः समासः स्पष्टनिरयनांशा सूर्यसंक्रांतिभुक्तांशानां मितिः संख्या पंचधा स्थाप्या कलादिकमुपे
क्ष्य सा क्रमेण षड्भिः काष्टचतुर्भिराढ्या संयोज्या कैर्नवभिः तष्टा सपंचशेषा यस्मिन्स्थले पंचावशिष्यंते तत्र क्र नीयदा
मेण रुगादिर्बाणो ज्ञेयः यथाद्ये पंचशेषे रोगबाणः द्वितीये पंचशेषे ग्निबाणः तृतीये पंचशेषे राजबाणः च
तुर्थे पंचशेषे चोरबाणः पंचमे पंचशेषे मृत्युबाणः तस्मात्तस्माद्भयं भवतीत्यर्थः यदाह संक्रांतियातांशक
नंदशेषस्तर्काग्निरूपाष्टयुगैः समेतः तष्टो ग्रहै रोगकृशानुभूपस्तेनामृतिश्चेति च पंच बाणा इति पंचेति षट्
कपदं पंचचेच्छिष्यंते तदा बाणाः स्युरित्यर्थः तत्र बाणो द्विविधः एकः काष्टशल्यो ऽपरो लोहशल्यस्तत्राभिहि
तो बाणः काष्टशल्य उच्यते अस्य नाम प्राच्यादौ दोषाबाण इत्याहुः तेन तादृशो बाणे लग्ने तथा पीडा न भवेन्न दर्थे
न दशवादशभूतो लोहशल्यसहितो बाण उच्यते नवेति यानि प्रागागतानि शेषाणि तेषामेकैव नवहृते पश्चाद्व्य
स्तशेषे पंचशेषे सति सशल्यः लोहशल्यसहितो बाणः स्यात् पंचव्यतिरिक्ते शेषे दोषाबाणः अथ चतुल्यता
यत्वात्प्राकाद्योक्तेपि बाणे सशल्यो बाणो ज्ञेयः तदुक्तं ज्योतिर्निबंधे तामपण त्यथा बाणोभिहितः तिथिवारभ राम॰
लग्नांको रसाग्न्याद्यष्टवेदयुक् ६ ३ १ ८ ४ नंदाप्तः पंचशेषे रुग्वह्निराड्चौरमृत्युकृदिति अथ समयभेदेन ३९

वारभेदेन वा त्रिविधं बाणपरिहारं शार्दूलविक्रीडितेनाह रात्रौ चौररुजौ बाणौ त्याज्यौ दिवा दिवसे अग्निनृपतीवह्नि
राजबाणौ त्याज्यौ संध्ययोः प्रातःसायं संध्ययोः सदा मृत्युर्बाणस्त्याज्यः अथ च शाड्भिभक्तिपरिणामः तदुक्तं ज्योतिः
प्रकाशे रोगं चौरं त्यजेद्रात्रौ दिवा राजाग्निपंचकं वर्ज्यः पुनः कुजे चौरं बुधवारे च मृत्युदमिति अथ कार्यभेदेन पञ्चा
रउच्यते अथेति क्रमत एषु शुभकर्मसु एते बाणा वर्ज्याः यथा व्रते यज्ञोपवीते रुक् गेहं गृहं तस्य गोपश्चाच्छादनं
तत्रानलोग्निः नृपसेवायां क्ष्मापालो राजा यानयात्रायां चौरः पाणिग्रहे मृतिः बाणो वर्ज्य इत्यर्थः तदुक्तं ज्योतिः
प्रकाशे नृपाख्यं राजसेवायां गृहगोपे ग्निपंचकं याने चौरं व्रते रोगं त्यजेन्मृत्युं करग्रहे इति केचिदेवं पाठमाहुः
व्रते विवर्जयेद्रोगं गृहगोपे ग्निपंचकं यात्रायां राजचौराख्यं विवाहे मृतिपंचकमिति अथोदयास्तशुद्धिं विव
क्षुस्तदुपयोगिनीं ग्रहदृष्टिमुपजातिकयाह आशां त्रिकोणे चतुरस्रमस्तं पश्यंति खेटाश्चरणाभिवृद्ध्या मंदो गु
रुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवंति खेटा ग्रहा यस्मिन्स्थाने तिष्ठंति तस्मात्कथ्यमानानि स्थानानि चर
णाभिवृद्ध्या पादवृद्ध्या पश्यंति तद्यथा आशां तृतीयं दशमं चैकचरणदृष्ट्या पश्यंति अनेन तत्र ग्रहोद्भवं शुभा
शुभफलं चरणाभिवृद्ध्यैव भवतीत्यसूचि तदुक्तं वराहेण दशमतृतीये नवमपंचमे चतुर्थाष्टमे कलत्रं च पश्यंति पा
दवृद्ध्या फलानि चैवं प्रयच्छंतीति मं इति मंदः शनैश्चरः स्वस्थानाद् आशां संपूर्णदृक् चतुश्चरणदृष्टिः एवं गुरुस्त्रि
कोणे भूमिसुतश्चतुरस्रे परे च चंद्रबुधसूर्यशुक्रास्तेऽस्तं संपूर्णदृश इत्यर्थः यदाह गर्गः दुश्चिक्यदशगान्सौरिस्त्रि
कोणस्थान्बृहस्पतिः चतुर्थाष्टमगान्भौमः शेषाः सप्तमसंस्थितान् भवंति दीक्षणे नित्यमेवाधिकफलाग्र
हा इति वराहोपि पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः चतुरस्रं भूमिसुतः सितार्कबुधहि
मकराः कलत्रं चेति अथावसरप्राप्तामुदयास्तशुद्धिं शिखरिणीभुजंगप्रयातमालिनीछंदोभिस्त्रिभिराह
यदा लग्नांशेशो लवमथ तनुं पश्यति युतो भवेद्वाथ वोढुः शुभफलमनल्पं रचयति लवद्यूनस्वामी लवम
दनं २ भं लग्नं मदनं प्रपश्येद्वा वधूः शुभमितरथा नेयमशुभं लवेशो लवं लग्नेशो लग्नं गेहं प्रपश्येन्मिथो वा

मु·टी·
वि·प्र·
७६

वाऽशुभं स्यात् इह रस्याल्लवद्यूनपो शयुनं द्यूनपोऽस्तमिथोऽवेक्षिते स्यात् शुभं कन्यकायाः लवपतिशुभमित्रैर्वीक्षितौ
शं तन्तुवापरिणयनकरस्य स्यात् शुभं शास्त्रदृष्टं मदनलवपमित्रं सौम्यमंशाद्युनं वा तनुमदनगृहं वीक्षिते पूर्ववद्धाः
प्रथमपद्यस्यायमर्थः यदा लग्नेशो लग्नांशास्तस्येशः स्वामी लवं नवांशं पश्यति वाऽथवा नवांशेन सह युतो वा
भवेत् तदा वोढुर्वरस्यानल्पं बहु शुभफलं रचयति यथा मेषलग्ने मिथुनांशस्तदीशो बुधस्तुलायां मिथुनं पश्य
ति तत्र तिष्ठति वा एतदुदयशुद्धेः प्रथमः कल्पः ननु फलं हि नवांबलवं तदिति केशवार्कोक्तन्यायात् तल्लाभे
तल्लग्नेशोऽशस्तनुं लग्नं पश्यति तेन [illegible] सह युतो वा भवेत् तदापि वोढुः शुभफलमनल्पं स्यात् यथा मे
षलग्न एव मिथुननवांशस्वामी बुधो मकरेऽस्ति नवांशं न पश्यति किं तु लग्नं पश्यति अथवा मेषे एव तिष्ठति
अयं द्वितीयः प्रकारः लवेति लवद्यूनस्वामी लवात् नवांशाद्यूनं सप्तमनवांशः तत्स्वामी लवमदनभं लवा
न्मदनभं सप्तमनवांशं पश्यति तेन सह युतो वा भवेत् तदा वध्वा अनल्पशुभं रचयति यथा मिथुननवांशात्सप्त
मो धन्वंशस्तदधीशो गुरुर्मेषे धनुः पश्यति तत्र तिष्ठति वा इतरथेति इतरस्या यदा लग्नांशेशो लवं लग्नं वा न
पश्यति किं तु सप्तममवनं तुलां पश्यति अथवा तुलायामेवास्ति अयमस्तशुद्धेर्द्वितीयप्रकारः इतरथे
ति इतरथा यदा लग्नांशेशो लवं लग्नं वा न पश्यति तत्र युतो वा न स्यात् तदा वरस्याशुभं हन्तुः स्यात् यदा त्वस्तांशे
शो लग्नांशमस्तभवनं वा न पश्यति तत्र युतो वा न स्यात्तदा कन्याया अशुभं हन्तुरित्यर्थः यदाह कश्यपः स्व
स्वेशेनांशयास्तांशौ वीक्षितौ वाथ संयुतौ लग्नं वास्तगृहं तत्तदंशेशेनेक्षितं युतमिति वसिष्ठः इष्टादयांशेशनि
पत्यहरीश्वरस्य हन्तुस्तदसंयुते च अस्तांशकेऽप्येवमदृष्टयुक्ते स्वस्वामिना नाशमुपैति कन्येति तुल्यन्याय
त्वाल्लग्नेऽप्यस्तलग्नेऽपि उदयनवांशास्तांशस्वामिनो दृष्ट्यभावेऽपि तदेव फलं ध्येयं द्वितीयपद्यस्यायमर्थः ल
वेशादिति नवांशस्वामी नवांशं प्रपश्येत् लग्नस्वामी लग्नं प्रपश्येत् तदा वरस्य शुभं स्यात् वाऽथवा मिथः परस्परं
लवस्वामी लग्नं लग्नेशो लवं प्रपश्येत् तदापि वरस्य शुभं स्यात् एवं लवद्यूनपो नवांशात्सप्तमनवांशस्वामी अ राम·
७६

शायुनमंशसप्तमराशिमीक्षते द्यूनपो लग्नसप्तमस्वामी अस्तं लग्नात्सप्तमभवनमीक्षते तदा कन्यायाः शुभं
स्यात् वाथवा मिथः परस्परं लवस्वामी लग्नं लग्नेशास्वं च पश्यपद्यूपनदापि वरस्य शुभं स्यात् एवं लवद्यूनपो नवां
शात्सप्तमनवांशस्वामी अंशायुनमंशसप्तमराशिमीक्षते द्यूनपो लग्नसप्तमाधीशः स्वांशात्सप्तममीक्षते तदापि क
न्यायाः शुभं स्यात् अत्रोदाहरणं स्पष्टत्वान्नोक्तमस्माभिः अत्राप्यन्यथात्वे दंपत्योरशुभमित्यर्थः यदाह नारदः
लग्नलग्नांशकौ स्वस्वपतिना वीक्षितौ युतौ नचेद्वान्योन्यपतिना शुभमित्रेण वा तथा वरस्य मृत्युः स्यात्ताभ्यां स
प्तमेशोदयांशकौ एवं तौ वीक्षितयुतौ मृत्युर्वध्वाः करग्रह इति वसिष्ठोपि उदयांशाः स्वनाथेन मित्रसौम्येन वायु
तः प्रेक्षितो वा तथास्तांशो दंपत्योः पुत्रपौत्रद इति परस्परवीक्षणेप्येतदेव फलं ध्येयं नारदवाक्यस्वरसात् अथपू
र्वोक्तप्रकारेणोदयास्तशुद्धेरभावेपि तृतीयप्रकार उच्यते लवपतीति शुभमित्रं शुभं च तन्मित्रं चेति कर्मधार
यः लवपतेर्लग्ननवांशेशस्य शुभग्रहः सोमबुधगुरुशुक्राणामन्यतरः चेन्मित्रं स्यात्तत् चेदंशं स्वनवांशं तनुं लग्नं
वा वीक्षते तदा परिणयनकर्तुर्वरस्य शास्त्रदृष्टं वसिष्ठोक्तपुत्रपौत्रादिरूपं शुभफलं स्यात् एवं मदनलवपस्या
स्तांशेशस्य मित्रं सौम्यं चेत्स्यात्तच्चांशायुनमंशं लग्ननवांशायुनं सप्तमनवांशं चेद्वीक्षते वाथवा तनुमदनगृहं
लग्नात्सप्तमभवनं चेद्वीक्षते तदा परिणयनकर्तुर्वरस्य शास्त्रदृष्टं वसिष्ठोक्तपुत्रपौत्रादिप्राप्तिरूपं शुभं फ
लं स्यात् तदा वध्वाः शास्त्रदृष्टं शर्म कल्याणं स्यात् यद्युभयत्रापि नवांशस्वामिनो मित्रं पापग्रहश्चेत्तस्य दृष्टि
रशुभैवेति फलितोर्थः यदाह वराहः शुद्धस्त्विह स्यान्नयदोदयांशो लग्नेन चास्तांशमुपैति सिद्धिं तदा सुहृत्सौ
म्यनिरीक्षितो यः शुभाय सस्यात्प्रवदंति संत इति नन्वत्र वाक्ये सुहृत्सौम्यनिरीक्षित इति पदे सुहृच्च सौम्यश्चे
ति कर्मधारयांगीकारे भवदुक्तं व्याख्यानं सत् यदा तु सुहृच्च सौम्यश्चेति द्वंद्वस्तदा तत्सुहृत्पापग्रहोपि स्यादिति
चेन्न प्रागुक्तवसिष्ठवाक्ये मित्रसौम्येन वा युत इति तृतीयैकवचनात्तस्य पार्थक्याप्रतिपादनात् मित्रं च सौम्यश्च
मित्रसौम्यस्तेन मित्रशब्दस्य विशेषणत्वात्पूर्वनिपातः द्वंद्वांगीकारे तु मित्रसौम्याभ्यां इति भवितव्यं तथास

मुहू॰ दी॰
वि॰प्र॰
३७

तिक्रुद्रोभंगोपि स्यात्तस्मात् माहारंद्रोभविष्यतीति चेन्नात्र किंचित्प्रमाणमस्ति अतः कश्यपेनैवमेवोक्तं राश्यंशैर्मित्र
सौम्येन वीक्षितौ वाथ संयुतौ उदयास्तांशयोः शुद्धिरिति विधा मंगलप्रदेति अत्रैव राहवाः केचिदपि कर्मधारयमेवं तिष्ठ
न्तं प्रतीमः वसिष्ठः लग्नात्सप्तमशुद्ध्या रहितः स दोषः करोति हत्युं वरकन्ययोश्च अत्र तु यथालग्नगुणास्तत्वशुक्रांशास्तंबधु
वर्गाद्यवसर्पदृष्टमिति केचित्तु विवाहादौ वज्रयोगं निषिद्धमाहुः तल्लक्षणं तिथिं वारं च नक्षत्रं नवभिश्च समन्वितं
सप्तभिस्तु हरेद्भागं शेषांके फलमादिशेत् त्रिशेषे तु ज्वलं विंद्यात्पंचशेषे प्रभंजनः सप्तशेषे वज्रपातो ज्ञेयं वज्रस्थल
ज्वलनमिति दैवज्ञमनोहरे अथ सूर्यसंक्रमणस्य दोषं मंत्रभाषिणीं छंदसाह विषुवायनेषु परपूर्वमध्यमान्हिवसास्त्यजे
दितरसंक्रमणेषु हि घटिकास्तु षोडश २६ शुभक्रियाविधौ परतोपि पूर्वमपि संत्यजेद्बुधः विषुवं तुलामेषसंक्रांती
अयने कर्कमकरसंक्रांती एवं च तस्तेषु विषुवायनाख्यासु संक्रांतिषु पूर्वापरमध्यमान्तामिवर्त्तिमानान्दिव
सान् बुधः शुभक्रियाविधौ विवाहयज्ञोपवीतादिशुभकार्येषु त्यजेत् संक्रांतिदोषत्वचिरात्स्थितय उद्वाह खिल
पूर्वो मंगलाय लाजाः समूहो ज्वलितानि मध्ये विलीय दुष्टदोषमेतदिति उद्वाहादिग्रहणात्स्नानदानादावपि
निषेधः नद्यावानि संक्रांतिप्रकरणे समाभिहितानि नद्दिनत्रयंत्याज्यं किं संक्रांतिकालाव्याप्तिदिनत्रयमुत तद
नंतरमुतमध्यमं चेति पक्षत्रयसंभवे निर्णय माहगुरुः अयने विषुवे पूर्वं परं मध्यं दिनं त्यजेत् अन्यसंक्रमणेषु
वोपराः षोडशनाडिका इति अयं च निषेधः सायंतसंक्रांतिष्वपि ध्येयः य राहवसिष्ठः यदायनप्रवेशः स्यात्तदान
ग्निसंक्रमः तस्मिंन्निपिदिने त्याज्यापा नाड्यः षोडशषोडशेति शौनकः अयनद्वयेसमूढाभर्तारं नाभिनंदते ना
री विषुवद्वयेपि विधवाषडशीतिमुखेषु साध्रियते विष्णुपदेषु विगीताकन्या विकलेंद्रिया व्यतीपाते वै
धृति विष्पोः भ्रष्टा सुभगापोषेषु करोणेषु इति विगीता पुंश्चली त्याद्यभिशापेन प्रसिद्धा अथ संक्रांति प्रसंगा
त्सकलग्रहाणां संक्रान्तिचटीरनुष्टुभाह देवद्युंकर्तबोष्टाष्टौ नाड्योकाः खन्नपाः क्रमात् वर्ज्याः सक्रमणेर्कादेः राम॰
प्रायोर्कस्यातिनिंदिताः अर्कादेः सूर्यादेर्ग्रहसमूहस्यैता घटिकास्त्याज्याः यथा सूर्यस्य संक्रमणकाला ३७

त्याक्यस्यात्कालो मिलित्वा त्रयस्त्रिंशद्घटिकास्त्याज्याः एवं चंद्रस्य द्वे घटिके भौमस्य नव बुधस्य षट् गुरा
वष्टौ अष्टाशीतिः शुक्रस्य नव शनेः खनृपाः षष्ट्यधिकं पानेच्छ घटिकावर्ज्याः तत्रार्कस्य घटिकाः प्रायोना
कल्पेनातिनिंदिताः अथ संमतिवाक्यं वासनासहिते अस्माभिस्तत एवावधार्यं अथ पंग्वंधकाणबधिरा
ख्यान् लग्नदोषानुपजातिकयाह दिवसे तुलाली बधिरौ मृगाद्यौ रात्रौ च सिंहाजवृषा दिवांधाः कन्यानृयुक्कर्कटका
निशांधा दिने घटोऽन्त्यो निशि पंगुसंज्ञौ दिवसे तुलाली तुलावृश्चिकौ बधिरौ स्मृतौ नतु रात्रौ मृगाद्यौ मकरधनुषी रात्रौ
बधिरौ नतु दिवसे यथा उक्ताः नतु रात्रौ कन्यानृयुक्कर्कटकानि शांधा रात्र्यंधा नतु दिवांधाः घटः कुंभो दिने पंगुसंज्ञो नतु
रात्रौ अंत्यो मीनो निशि पंगुसंज्ञो नतु दिवसे यथाह वशिष्ठः मेषादिरंध्रकं षट्कं चत्वारो बधिराः स्मृताः द्वौ पंगू चेति विज्ञे
या विल्पितद्राशिलक्षणं मेषो वृषो मृगेंद्रश्च दिवसांधाः प्रकीर्तिताः नृयुक्कर्कटकन्याश्च रात्र्यंधाः प्रकीर्तिताः तुला
थ वृश्चिकश्चैव दिवसे बधिरौ तथा धनुश्च मकरश्चैव बधिरौ निशि कीर्तितौ कुंभमीनौ च पंगू द्वौ दिवारात्रौ यथाक्र
ममिति कुंभो दिवा पंगुः मीनो रात्रौ पंगुः अनेन यस्मिन्काले लग्नस्य योऽधपंग्वादिदोषस्तस्मिन्नेव काले तल्लग्नदोषावहं
न कालांतरे इत्युक्तं भवति अथ परमतेन पंग्वादीन्लग्नदोषानुष्टुप्छंदसाह बधिरा धन्वितुलालयो धनुस्तुलावृश्चिका अ
पराह्णे दिवसस्यांतिमे तृतीयविभागे बधिराः स्मृताः अपराह्णे मिथुनकर्कटकोंगना निशांधा दिवसांधा हरिगोक्रिया
स्तु उक्ता मृगकुंभांतिमभानि संध्ययोर्हि धन्वितुलालयो धनुस्तुलावृश्चिका अपराह्णे दिवसस्यांतिमे तृतीयभागे
बधिराः स्मृताः मिथुनकर्कटकन्या निशांधाः स्मृताः हरिगोक्रियाः सिंहमेवृषमेषाश्च दिवसांधाः स्मृताः मृ
गकुंभांतिमभानि मकरकुंभमीनाः संध्ययोः प्रातःसायंसंध्ययोर्हि निश्चयेन कुब्जाः पंगवः स्मृताः अत्र मूलवाक्यं
नोपलभ्यते अथैषां प्रयोजनं सापवादं प्रहर्षिणीछंदसाह दारिद्र्यं बधिरतनौ दिवांधलग्ने वैधव्यं शिशुमरणं दिवां
धलग्ने पंगूदये निखिलधनानि नाशमीयुः सर्वत्राधिपगुरुदृष्टिभिर्न दोषः स्पष्टार्थं पद्यं पंग्वंगे पंगुलग्ने यथाह व
शिष्ठः अंधे वैधव्यमाप्नोति दारिद्र्यं बधिरे तथा अर्थनाशो भवेत्पंगौ नारी विधात्रा विनिश्चितमिति बादरायणः मा

सप्तम्यन्याङ्कयाम्ताराराशिरादयः स्वामिजीवबुधैर्दृष्टायुक्ता वा नैव दोषदा इति एवं परिहारो देशभेदेनाप्यभिहितः कु
श्यपेन कालपंचयवधिर्मासस्ससप्तम्या स्वराशयः गोऽमालवयोस्त्याज्याः त्वन्यदेशे न गर्हिता इति नास्य वाक्यतत्त्वं
पश्कु नैव प्रागुक्तं अथोदयास्तशुद्धिः प्रागुक्तान्तरावसरप्राप्तान्विहितनवांशांश्छित्रपदार्कंरसाह कार्मुकतौलिक
कन्यायुग्मलवे ऊषगेवा यर्हि भवेत्तूपयामस्तर्हि सती खलु कन्या कार्मुकं धनुः तौलिकं तुला कन्या प्रसिद्धा युग्मं
मिथुनं एषामंशेन वांशे ऊषगे वा यर्हि भवेत्तूपयामस्तर्हि सती खलु कन्या कार्मुकं धनुः तौलिकं तुला कन्या
प्रसिद्धा युग्मं मिथुनं एषामंशे नवांशे ऊषगे मीननवांशके विकल्पे नवांशाद्दूरत्वे कीदृशमतस्सूचनार्थः धनुरादिनवां
शाः सर्वमुनिसंमता इत्यर्थः तेषंशेषु यर्हि यर्हि यदोपयामो विवाहो भवेत्तर्हि कन्या विवाहोत्तरं सती पतिव्रता च
लनिश्चयेन स्यात् यदाह वसिष्ठः लग्नेहि सर्वे शुभराशयश्च शुभेक्षिता वाथ युताः शुभाः स्युः नवांशकास्तौलिचच्चु
ष्युवत्यः चापाद्यभागः शुभदो नचान्ये द्विभर्तृका मेषनवांशके सा ······ पश्चशीलयुक्ता धनान्विता चत्रवती
तृतीये अली रकांशे कुलटाप्यजस्रं सिंहांशके सा पितृमंदिरस्था कन्यांशके सा विदुषी लयुक्ता तुलांशके सर्वगु
णा स्वदासा कीटांशके निःस्वतरा विशीला चापांशका धनिनी द्वितीयभागेन्य सक्ता मलिना गदाह्या निःस्वा मृगां
शे विगुणा घटांशे विभर्तृका योगरता विशीला मीनांशके भर्तृसुता ढ्यहीना शुभग्रहै युक्तनिरीक्षितेवा तस्मात्
दैवज्ञनवांशके ऽ ऊर्ध्यो द्विवाहं गुणसंप्रदृष्ट्वा नवांशदोषाः सकलं गुणैश्च लग्नास्थसौम्यग्रहसंभवं च ध्रुवं निहंती
वष्ठकोणसंद्ये षष्ठे ऊर्ध्वे सौम्य विप्रयुक्तामिति पश्चशीलयुक्ता पशुवदाभिचारपरा गदोरोगः स्वंधनं एतेवचन
वांशाः सकलमुनिभिरुक्ताः तुला मिथुनकन्यांशा धनूराशार्ध संयुताः एते नवांशाः शुभदा यदिनान्त्यांशकाः स्व
ल्वितिनारदोक्तेः शौनकस्तु मीनांशकमपि शुभमाह सुदती सा भाग्यवती प्रहसितवदना च मीनांशे इति तत्र नि
षधविध्योस्तुल्यबलत्वात्षोडशिग्रहणाग्रहणवद्विकल्पः इत्याद्यः तत्र एकबाधेनापपत्तौ अनेकबाधोनन्याय्य
इति बहुमुनिवचनप्रामाण्यान्मीनांशत्यागत्याग एवोचितो नत्वेकतरमुनिवचनानुरोधात्पाक्षिको बाधः पाक्षिको

विधिस्तु कल्पः विकल्पस्याष्टदोषीयस्त्वात् कातर्हि शौनकवाक्यगतिरितिचेत् गुणबहुत्वोपलब्धौ लग्नासंभवे
च विचारितविहितनवांशानां दोषबहुत्वसद्भावाच्च गत्यंतराभावे मीनांशको निषिद्धोपि प्रशस्त इत्येवं युक्तायतिः य
हीति अनद्यतने र्हिल्न्यतरस्यामिति किं यतश्चोनद्यतने काले र्हिल्प्रत्ययः उपयामः यमः सत्पनिविडवेतिभाव
येत् विवाहोपयमौ समौ तथा परिणयोद्वाहोपयामाः पाणिपीडनमित्यमरसिंहः अथ विहितनवांशकाच्च न कन्या
न परिणयान विवाह्या यतंतवर्गोत्तममंतिमम पि नवांशं हित्वा तत्र कन्या विवाह उचित एव यथा मिथुनलग्ने मिथु
ननवांशेंतिमेपि च वर्गोत्तमं य दाहकश्यपः अंत्यांशका अपि श्रेष्ठाय दिवर्गोत्तमाह्वयाः अन्त्यांशास्तु न याह्यायतः
ते कुनवांशका इति वसिष्ठोपि वर्गोविनांत्यांशो विवाहे न शुभप्रदः वर्गोत्तमः चेरंत्यांशस्तु त्रयोत्रारिष्टहृदिइति अ
न्यच्च गोचरलग्ने इति नौलिष्टगस्थितलाभकरराशिस्थिते शशाभृति चंद्रे सति चरलग्ने विहितचरलवयोगं नो कुर्या
त् यथा मेषतुलांशः उक्तं च केशवार्केण चरलवं च वेष्ठमता मृच्छेत्रेन्मृगतुलाधरगेष्वगलक्षणि युवतिरत्र भवेत्कु
तकौतुका मदनवत्यनवत्यजनोन्मुखी निननवा नवाङ्गी एर्णोभजोत्यजनेत्यागे उन्मुखी परपुरुषरता स्यादित्यर्थः अथ
सर्वथा लग्नभंगयोगमुपजात्याह व्यये शनिः खे ९ वीतिजस्तृतीये भृगुस्तनौ चंद्रखला न शस्ताः लेनट् कविर्दौश्च
रिपौ मृतौ ग्लौ लये ८ ट् शुभा राश्च मदे च सर्वे व्यये द्वादशस्थाने स्थितः शनिर्न शस्तः शाकिनीधो शिवक इति केशवा
र्कोक्तेः तृतीये भृगुः शुक्रो न शस्तः धन्याधनगे शुक्रे हतपरास्त्वप्राप्नुयान्नारी दुश्चिक्यगते कन्या अवृष्टाङ्गतः कनीय
सा न्भञ्जते इति शौनकोक्तेः तनौ लग्ने चंद्रे खलाः पापग्रहाश्च न शस्ताः लग्नस्थेर्के कन्या विधवाष्टमे संवत्सरे भव
ति लग्नस्थो हिमरश्मिर्मृत्युं कुरुयात्त्रयोदशे मासे भौमः सद्यः विधवा लग्नस्था बृहन्नसौम्यदृग्योगात् कामयति नीच
वर्णान् लग्नस्थरविसुतेबहून्पुरुषान् शनिवद्धिधुं तद स्पत्तु विज्ञेयं मासदशदिनि विद्धे रितिशौनकोक्तेः लग्नेट् ल
ग्नस्वामी कविः शुक्रः ग्लौः चंद्रः च रिपौ षष्ठस्थाने न शस्तः रंध्रे कुजे सौम्यखेगे च मृत्युः षष्ठाष्टगे लग्नपतौ च मृत्युरिति
ज्योतिर्निबंधपष्ठेउक्तेः भृगुषट्त्वात्कयो दोषा लग्नान्त्यष्टगते सिते उच्चगे शुभसंयुक्ते तल्लग्नं सर्वदा त्यजेदिति नारदोक्तेः

अथ च तस्मान्मृत्युर्दंपत्योः षष्ठगे चंद्रे इति शौनकोक्तेः सौरिः चंद्रः लग्नेड्य शुभा बुधगुरुशुक्राः आरो भौमः चैते मृता वष्टम
मु॰दी॰ स्थानेन शस्ताः मासत्रयेण विधवां निधनस्थः सप्तदशाब्दाद्विधयोगरो जीवः पंचत्वं नयति भृगुर्निधनस्थः सप्तभिर्वर्षैरि
वि॰प्र॰ ति शौनकोक्तेः नारदः कुजाष्टमो महादोषो लग्नादष्टमगे कुजे शुभत्रययुते लग्ने त्वन्ते न तुंगगे यदीति अत्र संमतिः प्राग
७९ क्ता च पुनः सूर्यादयो ग्रहा मदे सप्तमस्थानेन शस्ताः निषिद्धाः सर्वे ज्ञामित्रसंस्था विदधति मरणमिति वसिष्ठोक्तेः कश्य
पोपि सप्तमस्थानगा ग्रहाः कुर्वंति शीघ्रतः दंपत्योर्मरणं वद्धा स्यादेकस्य न संशय इति अर्थादन्येषु स्थानेषु ग्रहाः समी
चीना अत्र केषुचित्स्थानेषु शुभा एव केषुचिन्मध्यमा एवेत्येतदपि वक्ष्यति अतोस्मदर्थमतिसंक्षिप्य त्रिविक्रमेण निषि
द्धस्थानान्येवोक्तानि त्याज्या लग्ने व्यये मंदात् षष्ठे शुक्रेंदुलग्नपाः रंध्रे चंद्रादयः पंच सर्वेस्ते ज्ञगुरू समाविति अत्र गुर्वोः
समत्वं शौनकमतेन तादृशविरुद्धफलाभावात् यदाह वसिष्ठः कन्यास्ति सौज्ञनयति सापत्न्यं चैव सप्तमेषु स्थितानि शौ
लचरितोपेत्यं करोति पत्युः कलत्रगो द्वेष्यामिति गुरुरित्यनुवर्तते अत्र वचनद्वयप्रामाण्यात् द्विकल्पः यद्वसिष्ठेनोक्तं जा
मित्रगो यदि भवेद्दशनाधिपो वा गीर्वाणनाथसचिवः सितचंद्रपुत्रो कन्या विवाहसमये परिहृत्य दोषान्सौभाग्यपुत्रस
हितां वनितां करोतीति तच्चेज्ज्ञामित्रविषयं तथा च भुजबलः स्त्रीणां विवाहेतु बलैकपेताः पत्युः प्रणाशं विदधाति विद
ध्युः त्यक्त्वा बुधं दैत्यगुरुं गुरुं च निशाकरादस्तगृहं प्रपन्नादिति दैत्यगुरुं शुक्रं अत एव दीपिकाः रविमंदकुजाक्रां
तस्थगां कान्तस्त्सप्तमं त्यजेत् विवाहयात्राचूडागृहकर्मप्रवेशने इति अथैवं निषिद्धस्थानान्यभिधायेदानीं रेखादाने
नाह भावसंततिलकया आह आयाष्टषट्सु रविकेतुतमोर्कपुत्राः त्र्याद्यायगः क्षितिसुतो द्विगुणायगो ज्ञः सप्तव्ययाष्टरहि
तो ज्ञगुरुः सितोष्टत्रिघूनषड्व्ययगृहान्परिहृत्य शस्तः तृतीयैकादशषष्ठाष्टस्थानेषु रविशुक्रतमोर्कपुत्राः शस्ताः शु
भफलदातारः यदाह शौनकः बंधुत्रने भवः सूज्ञां त्रिष्वडूषोनिसहज्ञगे त्वर्के प्राप्नोति धनं षष्ठेत्यब्दाद्दृद्धे हतोश्चैव दंप
त्योः सहमरणं निधनस्थेर्केष्ट सप्तन्या कार्यति धनविष्टद्विंशब्दाद्दृद्धे तथा यगः सवितेति इति रवेः धनधान्यपुत्रसु राम॰
ता पंचमसंवत्सरात्तृतीयस्थः षष्ठः षड्भिर्मासैरसपत्नीकन्यका कुरुते निधनगतो र्किः कुर्याद्दामरणादामयवियुक्तां ७९

आयगतोर्कि: अत इत्यत्र इत्नू संज्ञापूर्वकस्य विधेरनित्यत्वात् हृद्याभावः अथवा आयगतः शसौ वा आर्किरायगता
र्किरिति एकं पदं एवं निधनगतार्किरित्यपि अत्र राहुकेत्वोरशुभफलं श्रीनिवदेवेति स्वभानौ वाप्यथ शिखिनि वा ल
ग्नभावादिसंस्थे इति च सिद्धोक्तेः आयारिगः तृतीयैकादशषष्ठस्थानस्थितः क्षितिसुतो भौमः शस्तः सहजस्था भूमि
सुतः सौभाग्यकरस्तु यावदायुष्यं लग्नादेकादशगः कन्यामिंडुर्धनान्वितां कुरुते इति श्रीनेकोक्तेः इत्युक्त्वा धष्ठस्य
तीसप्तमद्वादशाष्टमातिरिक्तस्थानस्थितो शस्तो उक्तस्थानानामशुभत्वात्तु उक्तस्थानानां शुभदातृत्वात् वराहव
सिष्ठ: प्रीतिर्वृद्धिः स्वगणेन निवृत्तिर्बंधुश्च नाशसुताप्तिः सद्वेषद्वंद्वतनयरहितत्वं तथा भर्तृनाशः धर्मे वृद्धिर्भवति धरणी
लब्धिरत्वं तनुवृद्धिहानिः स्त्रीणां हिमकरसुते लग्नभावादिसंस्थे लक्ष्मीप्राप्तिर्भवति सुयशः प्रीतिरन्यान्यवृद्धिरिष्टा
वाप्तिर्बहुविधमयं चाश्रमाणां विरक्तिः पापासक्तिः सुकृतनिर्गतिर्भूरिलाभः सुरेज्ये स्त्रीणां सौख्यं रिपुकृतभयं लग्न
भावादिसंस्थे इति अथैतस्य भद्रदेवं अयः शुभावहो विधिरित्यमरः स्त्रीवत्त्ववार्षिके चिद्बहुधबहु विधमयमिति पठंति न
न्मकारे भशब्दः प्रांते: उभयत्र लानंदकरी करोति न चिरात्कुरुतः षष्ठे इति षष्ठस्थानस्थितगुरोः श्रीनकेनापि सम्यक्फ
लाभिधानाच्चक्षितिइति अष्टमतृतीयसप्तमषड्द्वादशस्थानानि परिहृत्य त्यक्त्वा सितः शुक्रः शस्तः तदुक्तं वसिष्ठेन ॥
भोगप्राप्तिर्विविधविभवं सैरवृत्तिर्महत्वं सुम्नाधिक्यं भवति निधनं सर्वनाशो व्यसुत्वं तथ्यप्रीतिर्बहुविधगुणाः सर्वसं
पत्समृद्धिरस्त्रं स्त्रीणामुशनसितथा लग्नभावादिसंस्थे इति द्युम्नं द्रविणं हिरण्यं द्रविणं द्युम्नमित्यभिधानात् स्त्रेलेष
हृशब्दः पुंलिंगः गृहाः पुंसि च भूम्न्येवेत्यमरः अतो गुरुवद्धस्य स्त्रीणां शुभाशुभस्थानोक्तेः शुभाशुभफलदातृत्वमेव
न कदाचिन्मध्यमत्वं अन्येषां शुभाशुभस्थानातिरिक्तस्थानसद्भावान्मध्यमत्वमप्यस्ति उक्तं शुभाशुभफलान
भिधानात् किंतु किंचिन्मध्यमफलाभिधानं तदुक्तं वसिष्ठेन वृत्तुर्नैस्त्यं बहुविधधनं भार्तृहानिः प्रजानां व्याधिः सौ
ख्यं बहुविधमतो भर्तृहानिः चिरायुः श्रेयोहानिर्भवति हृदयव्याधिरर्थागमश्च मानौ स्त्रीणामतिशयसुता लग्नभावा
दिसंस्थे नाशः संपद्बहुविधयशो बंधुवृद्धिः प्रजाप्तिः फलमभिहितं तत्रैव श्रीपतिना तथापि तद्वाक्ये सुखेन कथि

मु॰टी॰
वि॰प्र॰
७५

नो बंधुरतयः कैश्चिन्नेत्येकीयमतमनुकृत्य ग्रंथकृता चतुर्थस्थानस्य मध्यमत्वमंगीकृतं बंधुश्वशुरवियुक्तो चतुर्थे संस्थः
शशीत्वष्ट्रादिति शौनकोक्तेश्च विरुद्धार्थयोः शौनकवसिष्ठवाक्ययोः का गतिरिति चेत् बालचंद्रविषयमशुभफलं
तद्भिन्नचंद्रविषयं शुभफलं उक्तं च केशवार्केण प्रियविरहं ग्लानिः स्तनांभः श्वन्यत्वं स्वज्ञातिसुखेसुखवासिनामिति पुन
र्वसिष्ठः स्तनुः शशांको बहुविधधनं भ्रातृवैरं च बुद्धिर्लक्ष्मीप्राप्तिर्भवति मरणं चाभयोर्वंशनाशः स्त्रीणां दोषो व्यसन
निरतिः पुत्रपौत्रादिसिद्धिर्भीतिर्मृत्युर्मे बलिनि तनयेलग्नभावादिसंस्थे स्वकं द्रव्यं कदशनरतिः वल्लभत्वं विशील्यं व्या
धिः सुस्त्रीस्तुतिरथसुखं गर्भपातप्रवृत्तिः धूर्तासक्तिर्भवति रविजे चैभवं वज्ञरोगं स्वभीनो वाप्यथ शिखिनि वा लग्नभा
वादिसंस्थे इति अथ लग्नभंगिकर्तर्यादिमहादोषाणामपवादं शार्दूलविक्रीडितेनाह पापौ कर्तरिकारकौ रिपुगृहे
नीचे स्वगे कर्तरीदोषो नैव सितेतरिनीचगृहगे तन्वष्टदोषोपि न भौमेस्तेरिपुनीचमेन हि भवेन्नोमोष्टमो दोषकृन्नीचे नी
चनवांशके शशिनि रिष्फाष्टारिदोषोपि तत्र कर्तर्यपवाद उच्यते कर्तरीयामलग्नस्य लग्नात्पापाविन्दा दिनोक्तौ
योग्रहौ क्रूरौ रिपुगृहे शत्रुगेहस्थितौ नीचगौ स्वनीचराशिस्थितौ अस्तंगतौ वा तदा कर्तरीदोषो नैव स्यात् यद
क्तः कश्यपेनापि वसिष्ठेन पापयोः कर्तरीकर्त्रोः शत्रुनीचगृहस्थयोः यदा चास्तंगयोर्वापि कर्तरी नैव दोषदेति इदं वि
शेषणं शत्रुगृहस्थत्वादिकं समुच्चितव्यस्तं समस्तं वा ध्येयं ननु कर्तरिकारका विन्यत्र कथं ध्रुवत्वं यावता कर्तरीश
ब्द उणादयो बहुलमिति बहुलोक्तेः कृतोक्ते रनइत्यस्माड्डातो निष्पन्नस्तत्र यदीकारांतस्तदा अंतत्वाभावात् ध्रुवापा
ये ड्डाकं दसौ बहुलमिति ह्रस्वो न प्राप्नोति यद्यपि टिड्ढादिकादनिनइतिग्रतत्वं तदा संज्ञा कंदसोरवाभावात् अत एव वे
दे हि बंधो हृदयं विदन्ति कालिदासः स्यादेतदेवं प्रमदावनं मंतः पुरोचितमित्यसमासेपि होपि प्रयुक्तवान् अपवादांतरमुक्तं
दैवज्ञमनोहरे गर्गेः क्रूरकर्तरि संयुक्तं लग्नं चंद्रं च नत्यजेत् केंद्रत्रिकोणसंस्थेषु गुरुभार्गवविज्ञचेति अन्यत्रापि प
मते विधौ धनोपगे शुभग्रहे व्ययेथवान्यगे गुरौ न कर्तरी भवत्यहो लग्नादबादरायणः इति क्रूरग्रहस्थानगं विलग्नं शशि
प्रदं च रोगदं शुभैर्धनस्य रक्षयेथवान्यगे गुरौ न कर्तरी स्यादिति भागवविडइति अथ षष्ठशुक्रापवाद उच्यते नीचगशि

रा॰म॰
७५

गते शुक्रे शत्रुक्षेत्रगतेपि वा भृगुषट्कोत्थितो दोषो नास्ति तत्र न संशय इति ॥ अथाष्टमभौमापवाद उच्यते ॥ भौमे स्वंगते
रिपुनीचगे शत्रुगृहगे वा स्वनीचगृहगे वाष्टदोषो भृगुषट्कदोषोपि न स्यात् ॥ ज्योतिःकश्यपः ॥ अस्तंगे नीचगे भौमे शत्रुक्षे
त्रगतेपि वा कुजाष्टमोद्भवो दोषो न किंचिदपि विद्यते इति ॥ अथ षष्ठाष्टद्वादशस्थानस्थितचंद्रापवाद उच्यते ॥ शशिनि
चंद्रे नीचे वा नीचनवांशके वा सति रिष्फाष्टारिदोषोपि वा चंद्रे षष्टाष्टरिष्फस्थे दोषो नास्ति न संशय इति कश्यपोक्तेः ॥
अथ विवाहे अब्ददोषाद्यनेकदोषाणामपवादं वसिष्ठः तन्निलंकयाह ॥ अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यंध
काणबधिरांगमुखाश्च दोषाः नश्यंति विद्गुरुसितेष्विह केंद्रकोणे तद्वच्च पापविधुयुक्तनवांशदोषाः ॥ अब्ददोषास्तु
प्ताहृादिः अयनदोषो दक्षिणायनादिः ऋतुदोषो वर्षर्त्वादिः तिथिदोषो रिक्तादिः मासदोषो भदोषः क्रूरसाहित्यादिः
पक्षदोषो त्रयोदशदिनात्मकत्वादिः दग्धतिथिः प्रसिद्धा चापांत्यगे इत्यादिना अंधकाणबधिराख्यान्यंगानि ल
ग्नानि तन्मुखास्तदादयो अन्ये, कालदृष्ट्याद्या दोषा विद्गुरुसितेषु केंद्रकोणे केंद्रं सप्तमस्थानरहितं विवक्षितं जा
मित्रदोषसद्भावात् अतएवोक्तमत्र त्रिकोणे केंद्रे वा मदनरहिते इति कोणे नवमपंचमे सत्सु नश्यंति उक्तंच
कश्यपेन ॥ अब्दायनर्तुमासोत्थाः पक्षतिथ्युद्भसंभवाः ते सर्वे नाशमायांति केंद्रसंस्थे शुभग्रहे ॥ काणांधबधि
रोद्भूता दग्धलग्नतिथ्युद्भवाः ते दोषा नाशमायांति केंद्रसंस्थे शुभग्रहे इति ॥ अकालजाभ्रनीहारविद्युत्पांसुप्रसं
भवाः परिवेषप्रतिसूर्यशक्रचापध्वजादयः दोषप्रदा मंगलेषु काल ह्येते दोषदाः गुरुरेकोपि केंद्रस्थः शुक्रो वा
यदि वा बुधः हरेः स्मृतिर्यथा हंति तद्दोषानकालजान् लत्तापग्रहवेधांशचंद्रजामित्रसंभवान् तत्केंद्रगो गुरु
र्हंति सुपर्णः पन्नगानिवेति ॥ अकालजत्वनिर्णयं यात्राप्रकरणे यदि मासस्तु चतुर्ष्वित्यादिना वक्ष्यति तद्वदिति तथाप
दिपापः क्रूरखेटविद्धयुक्तः राशिर्नवांशः स्याद्यद्यपि चंद्रो मेषे सूर्यनवांशः तद्दोषाभिधानं यज्ञोपवीतप्रकरणे तदात
त्कृतदोषोपि नश्यति उक्तं च संहिताप्रदीपे ॥ सचंद्रराशिः शुभानवांशः प्रोक्तः सपापोपि विलग्नसंस्थः त्रिकोणकेंद्रे
बृगुरुः सितो वा यदा तदा स च शुभोपि शस्त इति ॥ अथोक्तानुक्तदोषाणां बहूनां परिहारान् शालिन्याह ॥ केंद्रे कोणे जी

व आये रवौ वा लग्ने चंद्रे वापि वर्गोत्तमे वा सर्वे दोषा नाशमायांति चंद्रे लाभे तद्वद् दुर्मुहूर्तांशदोषाः केंद्रे कोणे केंद्रप्रसिद्धं
मु॰टी॰ वि॰प्र॰ ७२ कोणं नवपंचमं तत्र चेज्जीवो गुरुः [illegible] स्यात्तदा सर्वे दोषा नाशमायांति उपलक्षण
त्वाद्बुधशुक्रयोरपि यदाह नारदः उक्तानुक्ताश्च ये दोषास्तान्निहंति बली गुरुः केंद्रसंस्थः सितो वापि पन्नगानाहडोऽथ
यथेति सितो वा बुधस्याप्युपलक्षणं उक्तं च कश्यपेन काव्ये गुरौ वा सौम्ये वा यदा केंद्रत्रिकोणगे नाशं यांति त्वखिला दो
षाः पापानीव हरिस्मृतेरिति तत्रापि लग्नस्य केंद्रस्यातिबलबलत्वात्तत्र स्थितो जीवः सर्वारिष्टहरः तदुक्तं वसिष्ठेन
ये लग्नदोषाः कुनवांशदोषाः पापैः कृता द्रहिनिपातदोषाः लग्ने स्थितान्विमलीकरोति फलं यथांभः कतकद्रुमस्येति अ
थवा य एकादशे रवौ सति दोषनाशः यत्रैकादशगे सूर्ये सर्वे दोषा नाशं ययुस्तदा स्मरणाद्देवरुद्रस्य पापं जन्मशतोद्भ
वमिति अथ लग्ने वा लग्ने वर्गोत्तमे स्वनवांशयुक्ते यथा मिथुनांशस्थे तदा दोषनाशः अथवा चंद्रे वर्गोत्तमे स्वनवांश
स्थिते वा सति दोषनाशः यदाह कश्यपः वर्गोत्तमगते लग्ने सर्वे दोषा लयं ययुः चंद्रे चोपचये वापि ग्रीष्मे कुसरितो
यथेति चंद्रेति तदुक्तेनैव प्रकारेण दुर्मुहूर्तार वर्ज्यमित्यादयः अंशदोषाः पापग्रहनवांशाख्या ह्न सर्वे चंद्रे लाभे ए
कादशस्थाने स्थिते सति नाशमायांति यदुक्तं कश्यपेन मुहूर्तलग्नषड्वर्गकुनवांशग्रहोद्भवाः ये दोषास्तान्नि
हंत्येव यत्रैकादशगः शशीति अन्यत्राप्याह कश्यपः लग्नायुस्थाने गंतव्यो सच रोदोषसंचयं शुभः केंद्रगतो हंति रा
वाग्नि विपिनं यथेति अथैवं विशिष्य दोषाभिधानपूर्वकं विशेषपरिहारानभिधायेदानीं सामान्यतो दोषसमुदायस्यै
कं परिहारं श्रीधरेणाह त्रिकोणकेंद्रे वा मदन ७ रहिते दोषशतकं हरेत्सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः
भवेदाये केंद्रे ३ गण उत लवे श्रेयो यदि तदा समग्रं हं दोषाणां दहन इव तूलं शमयति त्रिकोणे ५ ९ केंद्रे सप्तमरहिते १
४ १० यदि सौम्यो बुधस्तिष्ठेत्तदा दोषशतकं हरेत् उक्तस्थानस्थितः शुक्रोऽपि द्विगुणं दोषशतकं दोषद्विशतीं हरेत्त
तथोक्तस्थानस्थितो गुरुरपि लक्षं १···· दोषान्हरेत् यदाह नारदः दोषाणां द्विशतं हंति बलवान्केंद्रगो बुधः अ राम॰ ७२
पहाय द्युनं शुक्रो द्विगुणं लक्षमंगिराः अत्र शतशब्देनानेकसंख्यात्वं विवक्षितं अत एवाह कश्यपः बलवान्केंद्रगः

सौम्यो हंति दोषशतत्रयं यूनं विहाय दैत्येज्यः सहस्रं लग्नगो गिरा इति भवेदिति अंगपाल ग्रस्वामी उत शाष्टौ वा
र्थे लवेशो लग्नगतांशं मात्रा वा ये ११ केंद्रे ४ १ ४ १ यदि भवेत्तदा स दोषान् संग समस्तं शमयति तत्र दृष्टांतः दह
त्यग्निस्तूलकार्पासमिव शमं याति तदुक्तं नारदेन लग्नेट् लग्नांशनाथो वा वाचायगः केंद्रगोपि वा राशिं निहंति दो
षाणामिंधनानीव पावकः इति ज्ञातकेपि लग्नाधिपो यदा केंद्रे लग्नारेकादशालये सर्वग्रहकृतं रिष्टमेकोपि वि
लयं नयेदिति अथ लग्नविंशोपविंशोपकाननुष्टुभाह द्वौ द्वौ रविगुरुभृग्वोः पंचेंदौ रवौ सार्धत्रयो गुरौ रामा मं
दगुरुके वारे सार्धैकैकं विशोपकाः त्रिभृगोः रेखा शुद्ध्याः सतो ह्यौ द्वौ विशोपकौ यथा बुधस्य शुक्रस्यैवं विधे
चंद्रे पंच ५ तारेशे सूर्ये सार्धो द्वयः ३ ३ गुरौ रामा द्वयः ३ एकमेकं एकैकं च सार्द्धैकैकं एकशो हस्य नित्य
वीक्ष्ययोरिति प्रत्येकं सार्धैकमित्यर्थः यथा मंदशनौ सार्द्धैकं १३ अगौ राहौ १३ केतौ १३ आरे भौमे १३
एते विशोपकारेखादानं ग्रहाणां ज्ञेयानमध्यमानां निषिद्धानां नय यदाह वराहः रवौ सार्धो द्वया भागा चंद्रे पंच
गुरौ त्रयः द्वौ शुक्रे द्वौ बुधे चैव प्रोक्ता ह्येते विशोपकाः मंदभौमे तथा सार्धं प्रत्येकमुच्यते बलाबलवशादेवं वि
ज्ञातव्या विशोपकाः अत्र पद्ये राहो रुपलक्षणत्वे केतोरपि सार्द्धैकमेव बलं ग्राह्यमत एव मूले केतुत्वमिधानं नहि
दृष्टमुक्तं यत्तेन वग्रहप्राबल्यसार्धैकविंशति २१ ३ विंशोपकात्मको योगः स्यात्सर्वदैव विदनुमतः अन्युन्द्रा
ष्टहि लग्ने विंशति विंशोपकात्मकमेव बलं स्यात्तत्ततोधिकमिति उच्यते विवाहादिसमद्वयोरधिकेत्वोर्युगप
त्सामीचीन उक्त मायमानत्वा यदेकस्य शुभत्वमपरस्य शुभत्वमिति तदैव विंशति यस्य यस्य ग्रहस्य रेखादानत्व
हानिस्तस्य तत्तद्विंशोपकहानिरित्यर्थः तत्र पंचभ्यो विशोपकेभ्यो हीनलग्नं त्याज्यमेव पंचभ्योधिकं दशभ्यो
हीनं लग्नं निकृष्टं लग्नांतराभावे हि तद्दशभ्योधिकं पंचदशभ्यो हीनं मध्यमं ततोधिकं [illegible] समेवेति निष्कृष्टोर्थः
अथ ग्रहवशेन शुभाशुभादिविभागज्ञानेन सप्रयोजनमुपजात्याह शुभाः सितार्कः शुभ शुभस्तु उत्तमा मित्रपः
स्यादुधितामनः शशी एतद्बुले संप्रतिभाव्यतो त्रिकः तेषां सुखं संप्रवदेद्विवाहतः शुक्रः शुभ शू: सूर्यः शुभ शुभः

मु.टी.
वि.प्र.
५२

अत्र कन्यानिमित्तशुभाशुभस्य विचारास्पदत्वात्तस्याः कन्यायाः श्वश्रूर्वरमाता श्वशुरो वरपिता तत्तुलग्नं तत्र श्वशुरी
रञ्जामित्रपः सप्तमाधीशो दयितो भर्ता ज्ञेयः शशी मनो ज्ञेयं एतद्बलमेतेषां शुक्रादीनां बलं विचार्य तांत्रिकः तत्र सि
द्धांतः तंत्रप्रदाने सिद्धांते सूत्रवायेपरीक्षा इत्यमरः तं वेत्ति तांत्रिकः सिद्धांतवेत्ता ज्योतिर्वित् विवाहतो विवाहादनं
तरं तेषां श्वश्र्वादीनां सुखं स्यादिति प्रवदेत् वराहशौनकः श्वशुरः सहस्रकिरणः श्वश्रूर्भृगुनंदनोपि निर्दिष्टः होरा
गमार्थकुशलैर्जामित्रपतिः पतिः स्त्रीणां शशी रलग्नवशात्सुखदुःखमानसं शशांकवशादिति शार्ङ्गीयेपि श्वश्रूरो
र्कः सितः श्वश्रूः स्त्रीणामस्तपतिः पतिः एभिस्तेषां गेहेस्तेषां शुभं नीचारिगेरसदिति विशेषांतरमप्युक्तं शार्ङ्गीय एव
सूर्यात्पतिः स्त्रीच विधोस्तथा राड्वित्तं सुतो ज्ञाच्च सुखं गुरुश्च धर्मं सितात्स्वकेसुतात्स्ववेश्म ब्रूयात्समुद्वाहविधौ स्वयुक्त्या
एतैर्नीचस्थितैः शत्रुगेहैर्वलाद्यैकं न सत् खचरेहाखत्रिकोणस्थैः शुभमेषां यथादिनमिति अथ संकीर्णजातीनां
विवाहे नियतकालविशेषं मतमयूरकेंद्र आह कृष्णपक्षे सौरिकुजार्कविचवारे वर्ज्येन ह्युत्रैयदि वा स्यात्करपीडा
संकीर्णानां नहि सुतायुर्धनलाभप्रीतिप्राप्तिः सा भवतीह स्थितिरेषा कृष्णपक्षे शनिभौमार्कवारे विवाहोऽत्र न
स्तत्र भिन्ननक्षत्रेषु चकाराद्व्याघात श्लेत्यादि दुष्टयोगेष्वपि यदि संकीर्णानामनुलोमप्रतिलोमजानां करपीडा
विवाहः स्यात्तर्हि करपीडा सुतायुर्धनलाभप्रीतिप्राप्तिर्भवति एषा स्थितिराचारोस्ति अनुलोमजा मूर्धावसिक्ता
दयः प्रतिलोमजाः सूतचंडालादयः तल्लक्षणे निधर्मशास्त्रत एवावधार्याणि वाग्रहणमेतदभावे विवाहा आव
श्यकत्वेच प्रागुक्तदिने कार्यमिति सूचनार्थं तदुक्तं शार्ङ्गीये कृष्णपक्षे भानुभौमार्कजानां वारे योगं चापि धिष्ण्ये
निषिद्धे संकीर्णानां दारकर्मप्रशस्तं प्रीत्यर्थायुःप्राप्तये यद्भौनकाद्याः इति केशवार्कोपि प्रायेणैतं कुरभुवाभ
शुभर्क्षपक्षक्रूरवारेषु शुभकृत्करपीडनं स्यादिति अथ गांधर्वादिदुष्टत्रिपदीचक्रे नक्षत्रशोधनमत्र शुभा
ह गांधर्वादिविवाहे कौहृदेनेत्रगुणेंदवः उपुगाश्विभूरामा स्त्रिपद्यामशुभाः शुभाः गांधर्वादिविवाहाः स
लक्षणाः प्रागस्माभिरभिहिताः तेषु कीलर्क्षयोक्तान नक्षत्रमारभ्य चत्वार्यशुभानि ततो द्वे शुभे ततः त्रीण्यशुभा

राम.
५२

नि ततएकंशुभं ततः चत्वारिंशुभानि ततः षडशुभानि ततस्त्रीणिशुभानि ततएकमशुभं ततस्त्रीणिशुभा
नि एतान्यष्टाविंशतिभानि त्रिपद्यामशुभमशुभान्येवज्ञेयानि त्रयाणांपदानांसमाहारस्त्रिपदी तत्रब्रह्मविष्णुरु
द्राभिधचक्रत्रयेइत्यर्थः संमतिग्रंथादुपलंभः अथैवंमहताग्रंथसंदर्भेण विवाहेसकलदोषमहादोषरहितानादि
नशुद्धिमभिधायेदानींततः प्राक्कर्तव्यानामावश्यककर्मणांदिनशुद्धिंदृष्ट्वीकंदशाह विधोर्बलमवीक्ष्यवादल
नकंडनेवारकं गृहांगनविभूषणान्यथवेदिकांमंडपान् विवाहविवहितादुभिर्विरचयेत्तत्रैथाद्वाहतोनपूर्व
मिदमाचरेत्त्रिनवषष्ठमितेवासरे अत्रविधोःचंद्रस्यबलमवीक्ष्यगृहीत्वावाग्रहणात्तत्यक्ताशेचंद्रबलंग्राह्यंच
दलनं गोधूमादेः पिष्टीकरणं कंडनंतंडुलादेः मुसलाघातादिनाशोधनं एतयोर्द्वंद्वैकवद्भावः वारकोमंगल
कलशः गृहांगनविभूषणानि गृहभूषणानि चूर्णगैरिकचित्रादिलेखादीनि अंगनभूषणंसंमार्जनगोमया
द्यालेपः अथानंतरंवेदिकांचत्वरंवधूवरयोरुपवेशनार्थंस्थलविशेषः मंडपाश्छादकनेकटादिनाविता
नादिनावाबहुवचनात्कटाहाद्यारोपणगृहरिद्रावंदनकंज्ञिकाधारणादिसकलशुभप्रारंभात् उपलक्षण
त्वाद्यज्ञोपवीतादावपि ततः पूर्वंतेनैवनक्षत्रेरेतानभिहितशुभकर्मप्रारंभात्पूर्वंविरचयेत् तथेदंशुभं कार्यंज्ञा
तंत्रिनवषष्ठमिते तृतीयनवमषष्ठमितेवासरेदिनपूर्वंनरचयेत् य डकंशांईंधरीये दलनकंडनमंडनवेदिकागृ
हसंमार्जनवारकमंडपाः करतलग्रहमध्यगतागतंतदखिलंविदधीतविवाहभे विवाहकृत्यमखिलंविवा
हभेविलोकयेन्नात्रबलंहिमग्युतेः नवत्रिषष्ठेह्नि विवाहपूर्वंनोनवलोकामंडपतैलमंगलमिति देवज्ञमनोह
रनिषिद्धभान्युक्तानि चित्राविशाखाश्वानतारकाश्विनीज्येष्ठामरणेध्रुवभाद्वितष्टये हित्वाप्रशस्तंफलेन
लवेदिकाप्रदान कंडनमंडपादिकमिति कंज्ञिकाधारणमुहूर्तेपिनत्रैव मूलेंद्रहरुद्रश्रवणार्कपौष्णविश्वेश
चित्रानलरेवतीषु संस्थापनंकांजिककुंडिकायावारेरवेर्भूमिसुतस्यशस्तमिति वेदिकायांविशेषमाह के
शवार्कः वेदिकांविरचयेत्तथ्यान्तथास्यादियंप्रविशतःप्रदक्षिणा सुजेनाश्रययवोन्निवर्णकाः ध एनवत्रिदि

वसेषु नाग्नत इति यवोन्निरंकुरार्पणाख्यं कर्मे तेनाश्रयो मंडपः मंडपो स्त्रीजनाश्रय इत्यमरः अथावसरप्राप्त
मु.दी. वेदीलक्षणं तथा विवाहान्तरकर्तव्यमंडपोद्वासनमुहूर्त्तं शालिनीछंदसाह हस्तोछ्राया वेदहस्तैः समंतात्तुल्या
वि.प्र. वेदी सद्मनो वामभागे युग्मे घस्रे षष्ठहीने च पंचसप्ताहे स्यान्मंडपोद्वासनं सद्मनो गृहस्य वामभागे हस्तोच्छ्राया ए
४२ कहस्तमिता व्यासमंततः सर्वतः चतुर्भिर्हस्तैः कल्या समाना तादृशी वेदी विवाहादिमंगलकृत्ये स्यात् शोभाकारि
भिस्तंभचतुष्कसोपानादिभिर्युक्ता चेत्यनुक्तमपि ध्येयं एतदुक्तं नारदेन हस्तोच्छ्रिता चतुर्हस्तैश्चतुरस्रा समंततः
स्तंभैस्तु चतुर्भिः स्यात्स्वाम्योदीमभागेस्य सद्मनः समंडपाश्चतुर्दिक्षु सोपाने रुपशोभिता प्रागुदक्प्रवणा रंभास्तंभै
र्हंसशुकादिभिः विचित्रिता चित्रकुंभैर्विचित्रैस्तोरणांकुरैः एवंविधा समारोहेन्मिथुनं साग्निवेदिकामिति सा
ग्नीति भिन्नं वरं मिथुनस्य विशेषणं वसिष्ठः षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं मंडपं तोरणैर्युक्तं तत्र वेदिं प्र
कल्पयेत् अष्टहस्तं तरचयेत्मंडपं वा द्विषट्करमिति द्विगुणिताः षट्करा यस्य तं द्वादशहस्तं उत्तमः षोडशह
स्तो मध्यमो द्वादशहस्तोधमोष्टहस्तः अयं वैकल्पिकं मंडपो गृहमार्गेण एव कार्यो न तु स्वेच्छया तदुक्तं सप्तर्षि
मते विवाहपटले मंगलेषु च सर्वेषु मंडपो गृहमानतः कार्यः षोडशहस्तो वा द्विषट् हस्तो दशावधि स्तंभैः चतुर्भि
रेवात्र वेदी मध्ये प्रतिष्ठिता शोभिता चित्रिता कुंभैः समंताच्चतुर्दिशं द्वारविद्धावली विद्धा कृत्य वृद्धव्यपातथा
नकार्या वेदिका तद्वत् शुभा मंगलकर्मणीति वलीकाष्ठपाषाणादिनिर्मितस्तंभः व्रतबंधे संस्कार्यत्वाद्बटु
हस्तेनैव वेदीनिर्मितिः विवाहे तु कन्यागृहे एव वरपूजनस्यानंतरं गृहस्थाश्रमस्य तदायनत्वाच्च कन्याहस्तेनै
व वेदीनिर्माणं युग्मे इति विवाहान्तरं युग्मे समे द्वितीयचतुर्थादिके घस्रे दिवसे षष्ठदिवसहीने तथा विषमे तु पं
च सप्तमे चाहनि दिवसे मंडपोद्वासनं देवकोत्थापनं सकुंभफलदानं स्यात् यदाहकोपि समे तु दिवसे कुर्याद्देव
कोत्थापनं बुधः षष्ठं च विषमं नेष्टं मुक्त्वा पंचमसप्तमाविति समेषु षष्ठं विषमेषु पंचमसप्तमव्यतिरिक्तदिनं नेष्टमि राम.
त्यर्थः अथ प्राच्यशिष्टसंमतं मंडपादौ स्तंभनिवेशमिंद्रवज्रयाह सूर्येंगनासिंहघटेषु ६ ९ ० शैवस्तंभोलिकोदं ४२

उग्रमृगेषु वायौ मीनाजकुंभे निर्ऋतौ विवाहे स्थाप्याग्निकोणे वृषयुग्मकर्के कन्यासिंहतुलास्थिते सूर्ये शैवं ईशा
नकोणे वृश्चिकधनुर्मकरस्थिते सूर्ये वायुकोणे स्थाप्यं इत्यर्थः। यदाह शिल्पशास्त्रे विश्वकर्मा कन्यासिंहतुला
यां भुजगपतिमुखं शंभुकोणे कोणे ग्निवात्मवह्निः कोणे मखैव वृषमिथुनगते कर्कटे दक्षखातमिति एतद्यद्यपि गृहवि
षयकमुक्तं तथापि वेदीनिर्माणाश्रयेण स्तंभनिवेशनं वृषादित्रित्रिराशिगतस्तत्वेशानाग्निकोणे सर्पास्यं शिवको
णे त्वेवमन्यत्र राशिग्रहे निवेशनं सूक्ष्मं यदाह विश्वकर्मा वेद्यां वृषाद्गृहे सिंहात्त्रिकं मीनस्तुलाश्रये ईशानतो
न्यस्त्वगेत्या शृष्टिस्तस्य शुभावहेति तस्य भुजगगतिः अथैवं लग्ननिर्णयमभिधायेदानीं घटिकालग्नसाधनेऽवगु
णे गोधूलीकथनं च गणितप्रयासरहितत्वक्रमवक्ष्यते तत्र सूचीकटाहन्यायेन गोधूलीप्रशंसामन्दाक्रां
तयाह नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिंता नो वा वारो न च विधिलवविधिर्नौ मुहूर्तस्य चर्चा नो वा योगो न
मृतिभवनं नैव जामित्रदोषो गोधूलिः सा मुनिभिरुदिता सर्वकार्येषु शस्ता स्पष्टार्थमिदं पद्यं यदाह भागुरिः गोपै
र्यष्टाहतानां खुरपुटदलिता याति धूलीदिनांते सोद्वाहे हंति दोषान्विविधधनसुतारोग्यसौभाग्यदात्री तस्मिन्का
ले न चर्क्षं न च तिथिकरणं नैव लग्नं न योगाः ख्याताः पुंसां सुखार्थं शमयति दुरितान्युत्थितं गोरजस्तु ननु सकल
दोषनिराकरणे नातिशंसनाद्गोधूल्याघटिकालग्नानां महादोषनिराकरणपूर्वकमभिहितानां वैयर्थ्यप्रसंगः न
च गोधूल्यभावे घटीलग्नमवकाशवदिति वाच्यं गोधूल्यभावो हि दोषसत्त्वे सति स्यात् नर्क्षं न तिथिकरणमित्या
दिना स्थूलसूक्ष्मसकलदोषापवादार्थत्वात्तस्या दोषलेशोऽपि नास्ति वदयं नर्क्षमित्यादिस्तत्यर्थवादस्तेन गोधू
ल्याः प्रशंसा यातात्यर्थे न तु विधिरन्यथा निषिद्धेष्व अमावास्याभद्राभरणीत्यादिष्वपि गोधूलीलग्नं भवितुं युक्तः
स्यात् सामान्यवैयर्थ्यापत्ते रिष्टापत्तिरपि वक्तुमशक्या तस्मादभिहिततिथ्यादिष्वेव यावत्कृत्याखिलदोषपरिहा
रपूर्वकघटीलग्नं कार्यं तदभावे तु गोधूलीलग्नं कार्यं यदाह तत्र लग्नं यदा नास्ति विशुद्धमन्यद्गोधूलिकं साधु तदा व
दंति लग्ने विशुद्धे सति वीर्ययुक्ते गोधूलिकं नैव फलं विधत्ते शुभाशुभयुतं सर्वराशेर्दोषं च निर्दिशेत् विवाहलग्नवत्के

षंगोधूलीं प्राह भागुरिरिति किंच ऊलिकं क्रांतिसाम्यं च सूर्येणैव षष्ठाष्टमः शशी पंचगोधूलिके त्याज्याः अन्ये दोषाः शुभा
वहा इति दैवज्ञमनोहरे च वाक्यस्यापि वैयर्थ्यापत्तेः गोधूल्यधिकारिणः नारदः प्राच्यानां च कलिंगानां मुख्यं गोधू
लिकं स्मृतं गांधर्वादिविवाहेषु वैश्यशूद्रादि ह्येव योजयेत् चतुर्थमभिजिल्लग्नमुदयर्क्षाच्च सप्तमे गोधूलिकं हि भवति सं
यत्पुत्रादिसौख्यदमिति दैवज्ञमनोहरे घटीलग्नं यदा नास्ति तदा गोधूलिकं शुभं शूद्रादीनां बुधाः प्राहुर्न द्विजानां क
दाचन महादोषान्परित्यज्य प्रोक्तधिष्ण्याधिकेषु च कारयेन्नीरजां यावन्नावल्लग्नं शुभावहमिति लग्नशुद्धिर्यदा ना
स्ति कन्या यौवनशालिनी तदा वै सर्ववर्णानां लग्नं गोधूलिकं शुभमिति अत एव भूपालवल्लभे विधेयं घटिकाला
भे दातव्यं गोरजो बुधैः संकीर्णे गोरजः शस्तं परे शुद्धित्वं शुभमिति तत्र गोधूलीसूक्ष्मकालस्तु केशवार्केणोक्तः अ
र्धोदयत्र्यर्धघटिकादलमिष्टमाहुः प्राह्यं तदंबरमणेरपि चार्धबिंबादिति केचित्तु यावद्दिनांते दिशि पश्चिमायां पश्यंत
तीयं रविबिंबभागं तस्मात्परं नाडिकयुग्ममेके गोधूलिकालं मुनयो वदंतीति तदेतयोः पक्षयोर्यथादेशाचारं व्यव
स्था अथ पूर्णीतकालादिभेदेन गोधूलीभेदं जलधरस्थं करमाह पिंडीभूते दिनकृति हेमंततौ स्यादर्धास्ते तपसमये गो
धूलिः संपूर्णोऽस्ते जलधरमालाकाले त्रेधा योज्या सकलशुभाप्त्यै कार्ये हेमंताख्ये ऋतौ हेमंतशब्देन शीतकाल
उपलक्ष्यते मार्गशीर्षादिमासचतुष्टयेत्यर्थः तत्र दिनकृति सूर्ये पिंडीभूते दनगोलकसदृशे संध्यायां नीहारावा
वृतत्वेन निष्प्रभे इत्यर्थः तस्मिन्समये गोधूलिर्ज्ञेया तथा तपसमये उष्णकाले चैत्रादिमासचतुष्टये सूर्येऽर्धास्ते ईबि
बस्य दृश्यत्वे, दृश्यत्वे च सति या धूलिः जलधरमेघास्तेषां मालासमूहः सा यस्मिन् तादृके काले वर्षाकाले श्रावणादिमा
सचतुष्टये सूर्येऽस्ते, ईबिंबस्य संपूर्णोऽस्तादर्शनं यस्य तादृशे सति गोधूलिः जलधरमालाशब्देन छंदोऽपि सूचितं
न केवलमियं विवाह एव किंतु सकलशुभाख्यसमस्तशुभकामके कार्ये विज्ञेया यदाह वराहः गोधूलीं त्रिविधां वदं
ति मुनयो नारीविवाहादिके हेमंते शिशिरे प्रयाति मृदुतां पिंडीकृते भास्करे ग्रीष्मेऽर्धास्तमिते वसंतसमये भानौ ग
ते दृश्यतां सूर्ये चास्तमुपागते भगवति प्रावृट्शरत्कालयोरिति अथ गोधूलिसमये वर्ज्यदोषानाह कं

दशाह अस्तं याते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चेंदौ कन्यानाशस्तनुमदनमृत्युस्थे भौमे
वायुर्लाभो धनसहजे चेंद्रे सौख्यं गोधूलिरित्यनुवर्तते गुरुदिवसे बृहस्पतिवारे सूर्ये अस्तं याते सूर्यास्तादनंतरं गो
धूलिः शुभा स्यात् ननु सूर्यास्तात्पूर्वमर्धघटिकं गोधूलिलग्नं कार्यं अर्धयामासद्भावात् तथा सौरे शनिवारे सार्के
सूर्यदर्शनसहिते गोधूलिः शुभा ननु सूर्यास्तादनंतरं कुलिकसद्भावात् उपलक्षणत्वात्क्रांतिसाम्यमपि त्याज्यं न
चालग्नान्मृत्यावष्टमे रिपुभवने षष्ठे वा लग्ने वा चंद्रे सति कन्यानाशः स्यात् तदुक्तं दैवज्ञमनोहरे कुलिकं क्रांतिसा
म्यं च मूर्तौ षष्ठाष्टमः शशी पंचगोधूलिके त्याज्या अन्ये दोषाः शुभावहा इति अत्र कुलिकशब्देन तत्कालसंभव
ईयामार्ध्योपि वारदोषो गृह्यते अन्येषां त्वसंभव एव केचित्तु श्रीपादैः सार्कशनौ विरविचित्रशिखंडिसूनौ तत्केव
लं कुलिकवामदलोपलंभादिति केशवार्कोक्तवाक्यसंमतिः कस्मान्न भवतीत्यूचुः तच्चिंत्यं पूर्वापरग्रंथालोचन
या तस्य पूर्वपक्षग्रंथत्वाय मन्यथा पंच मंगतेहेतूपादानवाक्यमनर्थकं स्यात् एतस्माधुनैव निर्लोच्यते लग्ने इति
लग्नस्थे मदनस्थे वा मृत्युस्थे वा भौमे सति वोढुर्वरस्य नाशो भवति तदुक्तं श्रीपतिः सारसागरे षष्ठेष्टमे चूर्तिगते
शशांके गोधूलिके मृत्युमुपैति कन्या कुजेष्टमे सूर्यगतेथवांते वरस्य नाशं प्रवदंति गर्गाः इति अन्येपि विशेषस्त
त्रैव षष्ठाष्टमे चंद्रेत्र वंद्रजी वेश्मोणी हतेवा भृगुनंदने वा मूर्तौ च चंद्रे नियमेन मृत्युर्गोधूलिकं स्यादिह वर्जनीय
मिति धिष्ण्यक्रूरयुते त्याज्यं मूर्तौ षष्ठाष्टमः शशी गोरजस्तत्प्रशंसंति संतः शनिदिने विनेति नन्विदं न वक्तव्यं सप्तमसू
र्यस्यावीरा मस्तके इति फलमिति हितं अवीरा निःपतिति सुतेति कोशः एवं सतीदृशदोषदूषितस्य गोधूलिलग्नस्य
चेदिहादरस्तदा चेंदुशुद्धे रथ्यादरः किमर्थं किंच लग्नस्यास्य पि सूर्यभौमशनिराहुकेतवस्त्याज्याः स्युः उक्तं च केश
वार्केण गोधूलिकेपि विधुमष्टमषष्ठमूर्तिं यत्नाद्वदंति तदयं स्वहचिप्रपंचः पंचांगशुद्धिमयमेक विवाहधिष्ण्यर्थ
स्मादिदं सनतमस्तिगते पतंगे नाप्नोति लग्नमिह दृष्टयुतं स्वभर्तृनाकारसौरितमसामपि संगभंगः किं चेद्विचार
मयमेकमिहास्तु किं च नात्र प्रमाणवचनं किमपि श्रुतं नः सार्के शनौ विरविचित्रशिखंडिसूनौ तत्केवलं कुलि

मु.टी.
वि.प्र.
४५

कथामदोषमलंभादिति उच्यते विशेषविधेः सामान्यशास्त्रबाधकत्वात् न्यायसिद्धा तत्र सामान्यतः पंचघटिकात्म
कस्य सायंकालीनलग्नस्य सप्तमसूर्याख्यो महादोषस्तत्रापि पुनर्गोधूलिकाले सूर्यार्द्धबिंबरूपे सूक्ष्मे न सप्तमसू
र्यदोषो विशेषवचनात् तत्रापवादविशेषो यद्गोधूल्यां यथाशक्ति दोषहीने विधेयं घटिकालग्नं त्वखिलदोषहीनमत
एव गोधूलिलग्ने नक्षत्रमित्यर्थवादोपपत्तिः तस्याप्ययं षष्ठेष्टमे मूर्तिगते इत्यपवादो विशेषवचनात् नात्र प्रमाणव
चनं किमपि श्रुतं न इति तु श्रीहरवारमार्त्तंडमतार्हणीनां मूलभूतवाक्यानामनुपलंभात् सार्कशुनाविलत्यादि कुलिकं क्रा
न्तिसाम्यं चेति वाक्यात् कुलिकादित्यागे स्वयं हेत्वभिधानपरं न त्वत्र तात्पर्यं सप्तमसूर्यातिरिक्त सकलदोषनिराकर
णपरत्वं न त्वात्तस्य किंच यदि गोधूल्यां कोपिलग्नदोषो नास्तीत्यभिमतं स्यात्तदेकविंशतिमहादोषनिरूपणात्राङ्ग
रदोगोधूलीलग्नमभिदध्यात् न च व्यतीपातादिष्वपि गोधूलीलग्नं स्यादिति वाच्यं सामान्यवाक्यैरपि निषेधस
त्वात् किंचैवं ब्रुवतस्तवेष्टापत्तिरेव स्यात् दिवास्तांप्रसक्तानुप्रसक्तं स्याभइति चंद्रे लाभस्थे धने द्वितीयस्थे सद
नस्थे वा सति स्त्रीपुरुषयोः सौख्यं स्यात् उक्तं च संहितासागरे यत्रैकादशगः चंद्रो द्वितीयो वा तृतीयगः गोधूलिकासा
विज्ञेया शेषा धूलिरिति निष्फलेति अथावसरप्राप्तं घटिकालग्नसिद्ध्यर्थं प्रक्रियां हृत्पंचकेन वक्तुकामस्तावत्स्थू
र्यस्पष्टगतिमिंदवत्राह्रर्कं रसाह मेषादिगेर्के ष्ठशरानगा हुताः सप्तेषवः सप्तशरा गजाहिताः गोह्नावेतर्कोकृरसाकृ
नर्काः कुंगाति षष्टिर्नवपंच भुक्तिः स्पष्टार्थमिदं मेषादिद्वादशराशिषु सूर्याक्रांतासु स्थूला कलात्मिका स्पष्टग
तिरित्यर्थः उक्तं च नागेषवो नगशरा रसरंगेषवो द्विबाणभुजंगविषयाः क्रियतो गवाह्नाः शैसत्तेवः शशिरसाः
कुरहाः षष्टिर्वषवइत्यस्य गतेः कलास्युरिति इयं स्थूला मतिर्वासना सिद्धेति भाषावचनापेक्षा वासना च गणितस्प
ष्टा अथ सूर्यतात्कालिकीकरणमनुष्टुभाह संक्रांतिपातघस्राद्यैर्गतिर्निघ्ना खषड्हृता लब्धेनाद्यादिनाद्योऽकंयात
र्द्धं स्पष्टभास्करः संक्रांतयो मेषाद्याः पंचांगदृष्टाः यद्दिने यसंपाघटीचस्पृस्तत आरभ्याभीष्टस्थूलकालपर्यंत
यावंति दिनानि यावत्यो घटिकाः च भवंति तैर्मेषादीष्टराशिस्थे सवितरि सति तत्स्थूलस्पष्टगतिर्गणा खषड्भिः राम.
४५

षष्ट्याभक्ता यल्लब्धं तेंशाः अवशिष्टं कलादि येंशाद्यं वा स्ते आदिशब्दवाच्यास्तेन यातर्क्षां अर्कराशिः स्फुटभु
क्तमेषादिराशिर्युक्तः सन् तात्कालिकः स्फुटः स्पष्टभास्करः स्यात् अथेष्टकालिकलग्नमनुष्टुभाह ततो रिष्टांशा
कात्पूर्वं नवांशात् दशसंगुणः रामाप्तालब्धमंशाद्यं ततो वर्गादिसाधने ग्रहबलसहितस्य लग्नस्यैव विहितो नवां
शो दोषरहितो विचारितः सक्रियस्य गास्यतात्कालिकं इभवेत् ताननवांशा विधिरुच्यते बुधैरिति गणनया यावत्संख्या
गच्छेत् पूर्वे नवांशाद्यावंतः स्युस्ते दशभिः संगुणाः रामैस्त्रिभिराप्तायल्लब्धमंशाद्यमंशकलाविकलात्मकं तत्त
तो रिष्टकालिकं भुक्तं स्यात् नक्षत्रात्प्राग्गतं तत्स्फुटक्रमेणोत्पादिप्रकारेणेष्टं गंसाधनं स्यात् अत्रोपपत्तिः य
दि नवभिर्नवमांशेस्त्रिंशदंशा लभ्यंते तदेष्टेन नवांशेन किं यत इति अत्र प्रमाणमिच्छाचेत्यादिना इष्टनवांशानां
त्रिंशद्गुणको भाजकोनवसंपन्नः तत्रद्वयोरपित्रिभिरपवर्ते दशगुणकस्त्रयो भाजक इत्युपपन्नं फलमिष्टांशाः स्युः
उक्तं च मकरंदेन इष्टात्पूर्वं नवांशकाद्दशाहता रामैर्हृताः स्युर्लवा इति अथैवं साधिताभ्यां स्पष्टार्कलग्नाभ्यामि
ष्टघटिकानयने शालिन्याह अर्कोल्लग्नात्तायनांशाद्ग्यभुक्तैर्भोगैर्निघ्नात्खोदयात्स्वाग्निभक्तात् भोग्यं भुक्तं वांत
रालस्वांशं षष्ट्याभक्तं स्वेष्टनाड्यो भवेयुः सायनार्दयनांशसहितान्सूर्याद्राश्यादिभोग्यांशैः सायनांशसूर्याक्रांतरा
शेः स्वदेशीयउदयो मेषादिराशीनां पलात्मकं प्रमाणं गुण्यं खाग्निभिः त्रिंशता भक्तं लब्धानि पलानि भोग्यानि स्युरे
वं लग्नात्सायनांशाद्भुक्तांशैराक्रांतस्वदेशीयराशुदयो गुण्यः खाग्निभक्तो लब्धानि पलानि एवं ज्ञातानां भोग्य
भुक्तपलानां एकं कार्यं तत्सायनांशलग्नार्कयोरंतरालोदयपलैर्युक्तं कार्यं षष्ट्याभक्तं सूर्योदयादिष्टघटिका भ
वेयुः अत्रोत्तर यज्ञानभास्कराचार्येणोक्तं लंकोदयानांगतरंगदस्रा २७८ गोकाश्विनो २९९ रामरदाश्वि ३२३ ना
गाः क्रमोत्क्रमस्थाश्चरखंडकैः स्वैः क्रमोत्क्रमस्थैश्च विहीनयुक्ताः मेषादिषण्णामुदयाः स्वदेशे तुलादितो मीचषड्डुत्क्र
मस्थाइति स्वैः स्वदेशीयैः अत्र चरखंडानयनमपि तेनोक्तं अयनलवदिने आर्द्रक्षसंक्रांतिकालाद्भवति दिवसमध्ये
याप्रभा सा प्रभासा इष्टागाः दशनिघ्ना सा स्यात्मात्याश्विभक्ता प्रतिगृहचरखंडानीति अर्कस्यभोग्यस्तनुभुक्तयुक्तोम

मु.टी.
वि.प्र.
५६

योदयात्स्यः समयो विलग्नादिति च अथ घटिकानयने विशेषं शालिन्याह चेल्लग्नार्कौ सायनावेकराशौ तद्विश्लेषघ्नो
दयः खाग्निभक्तः स्वेष्टः कालो लग्नमूनं यदार्कात् ज्ञात्वेत्शेषार्कोत्थषड्भान्निशायां लग्नार्कौ सायनौ अयनांशसहितौ स
नौ यद्येकराशौ स्यातां तदा तयोर्लग्नार्कयोर्विश्लेषांतरांशास्तैर्गुणितः स्वदेशीयउदयः कार्यः खाग्निभिः त्रिंशता भा
जितो लब्धमिष्टकालः सूर्योदयात्स्यात् तत्र यदार्कात्सायनसूर्यादेकराशिस्थिते लग्ने ऊनं स्यात्तदा यः चेल्लग्नार्कौ साय
नावित्युक्तदिशा स्वेष्टकालस्त्वागतः सः सूर्योदयात्प्राक् रात्रिशेषो भवेत् अयमर्थस्त्वानीतइष्टकालः षष्ट्यां पात्यः शो
धनीयसूर्यास्यादनंतरमेतावानिष्टकालः एवमिष्टकाले सामान्येनानिर्णीते निशायां रात्रावर्कात्सषड्भाद्वाधिके
दृयुक्तात्त्वागुक्तप्रकारेणार्कोल्लग्नादित्यादिनेष्टकालः साध्यः ससूर्यास्तानंतरं भवेत् वराहभास्करः यदैकभेल
ग्नरवी तदा तज्ज्ञांशांतरघ्नोदयखाग्निभागः स्यादिष्टकालो यदि लग्नमूनं शोध्यात्पुरा रात्रदथवा रजन्यां स्वशरीरकाले
तु सषड्भसूर्याल्लग्नं ततोप्युक्त इष्टकाल इति अत्रांशप्रवृत्तेः पंचपलानि पात्यानि विहितनवांशप्रवेशसूचनार्थमिति
दैवज्ञसंप्रदायः एवमानीतइष्टकाले दंपत्योरन्योन्यवीक्षणं कार्यमित्याह कश्यपः अन्योन्यवीक्षणं सम्यक्सु
लग्ने कारयेदिति नारदोपि एवं सुलग्ने दंपत्योः कारयेत्सम्यगीक्षणमिति एतेन परस्परावलोकनं सुलग्ने कार्यमि
तरत्तु समयांतरेपि विधेयमित्युक्तं भवति तुल्यन्यायत्वादुपनयनादावपि साधितेष्टकाले संस्कार्याचार्ययो
रप्यन्योन्यवीक्षणं करणीयं प्रागुक्तमार्गेण सुलग्नकालं स्फुटमानीय तत्कालादि यंत्रैः संलभ्य तं मंगलसू
त्रकाले संवीक्षयेत तत्र मिथोपि दृष्टानि सामान्येन वसिष्ठो भिहितवान् कश्यपोपि तथैव अनेन सुलग्नका
लेन्योन्यवीक्षणमेव मुख्यं पाणिग्रहणादि गायत्र्युपदेशादिकं तत्तदुत्तरकालकर्तव्यतया गौणमिति प्रतिभाति
स चेष्टकालः कथं साधनीयस्तत्राह कश्यपः एवं गुणगणान्वीक्ष्य लग्नं निश्चित्य यत्नतः सिद्धांतोक्तेन मार्गेण
लग्नकालं प्रसाधयेत् स्वसंयंत्रेण तल्लग्नं दद्यात्तेनार्चितो द्विजः मुखं षडंगुलं द्वादशभिरंगुलैश्चषकं ततं घटार्धवत्ताम्र राम.
पात्रं ऊर्ध्वे दशभिः पलैः षष्टिमज्जेदहोरात्रे घटिकापात्रमुत्तमं माषत्रयं चतुर्गुणस्वर्णविनिर्मिताकया चतु ५६

भिरंगुलैरायतया विद्धं स्फुटं न्यसेत् रवेरर्धोदयं दृष्ट्वा काष्ठधातुमयं तथा पूर्वोक्तलक्षणं यंत्रं मंत्रेणानेन निक्षिपेत्
निक्षिपेज्जलपूर्णपात्र इत्यर्थः यदाह नारदः ताम्रपात्रं जलैः पूर्णैर्गंधपुष्पैरलंकृते तंडुलस्योपरि तत्युतं पूर्वचिह्नमावह
पितेः मंडलाद्बहिर्दिशं वीक्ष्य तज्जले पात्रं विनिक्षिपेदिति मंत्रमप्याह स एव यंत्राणां मुख्ययंत्र त्वमिति धात्रा पुरा कृतं रंभयो
रायुरारोग्यसौभाग्यधनहेतवे जलयंत्रकमंतस्य दिक्सिद्धिप्रदो भवेति ताम्रघटिकाद्यभावे द्वादशांगुलशंकुना कालः
साध्यः तदुक्तं कश्यपेनैव अथवा सूत्राधये त्कालो द्वादशांगुलशंकुनेति शंकुलक्षणं प्राह नारदः न्यग्रोधखदिरा
श्वत्थरक्तचंदनबिल्वजं श्रीखंडागरुदेवदारुजं अन्यमपि शंकुमकल्मषं द्वादशांगुलमुन्नेधं परीणाहं षडंगुलं एवंलक्षण
संयुक्तं कल्पयेत्कालसाधने इति शंकुना घटीज्ञानं तत्करणं कुतूहले भास्करेणाभिहितं यथा चरपलयुतहीनाना
ड्रिकाः पंचवेदाग्र दलमथ निशार्द्धं याम्यगोले विलोमं द्युदलगतघटीनामंतरं तन्नतं स्यान्नतरहितदिनार्धं चोन्नतं ना
यतेत्र दिनदलं विशरं खहरो भवेन्नतकृतिः पृथगग्रगुणाहता खखनवाष्टघ्यकुस्थिहृता खरतः पतिता भिमनो
हरः अथ नतं यदि पंच रसाधिकं दिनदलात्पतितं सहरस्तदा प्रथमखंडहृतं दलितं चरं स्वगुणितं स्वषडंशविवर्जितं
दृशाहुतं पलकर्णहृतं हतिर्हरहृता श्रवणांगुलपूर्वकः रवियुतोनितकर्णहतः पदं युतिशिनफलं तिवर्गयुतेश्रुतिः
विभक्तहतिस्तुहरो भवेत्सपतितः खहतद्वशोधकं पृथगिदं खखनंदहतं हरेत्खविषयैरवशेषविवर्जितैः फलरं
हितनतं यदि शोधकं द्विगधिकं हरएव तदुन्नतमिति अथ विवाहादिशुभकार्येषु आवश्यकान्द्वादश दोषानविस्मर
णार्थं शार्दूलविक्रीडितत्रयेणाह उत्पातान्सहपातदग्धतिथिभिर्दुष्टांश्च योगांस्तथा चंद्रेज्योशनसामथास्तम
यनं तिथ्याः क्षयर्द्धी तथा गंडांतं च सविष्टिसंक्रमदिनं तन्वंशपास्तं तथा तन्वंशेशविधूंतथा द्विरिगाम्यापस्व
गांस्तथा सैंडक्रूरखगोदयांशमुदयास्तांश्च छिद्रं रावधातुखार्जूरं दग्धायोगयोगसहितं जामित्रलत्ताभिधं वाणं
पग्रहपापकर्तरिस्तथा तिथ्यद्धवारोत्थितं दुष्टं योगमथार्धयामकुलिकाद्यान्वारदोषानपि क्रूराक्रांतविमुक्त
भं ग्रहणभं यत्क्रूरगंतव्यभं त्रेधोत्पातहतं च केतुहतभं संध्योदितं भं तथा तद्वच्च ग्रहभिन्नयुद्धगतभं सर्वानिमान्संत्य

तेडुद्वाहे शुभकर्मसु ग्रहकृतानूलग्नस्य दोषानपि उत्पातादीन्दोषानुद्वाहे विवाहे यज्ञोपवीतादिशुभकर्मसु च
संत्यजेदिति तृतीयश्लोके नान्वयः उद्वाहग्रहणं गोवलीवर्दन्यायेन शुभत्वसूचनार्थं उत्पातास्त्रिविधाः दिव्या
न्तरिक्षभौमाः लक्षणं यातत्कं बंधि सप्तवर्ज्यदिवसाः त्यजेत् वराहगुरुः दिग्दाहे वा महादारुणपतने चांबुवर्षणे
उल्कापाते महावाते महाशनिनिपातने अन्नअश्मनिपाते च भूकंपपरिवेषयोः ग्रामोपाते शिवाशब्दे दुर्निमित्ते न शो
भने केतवो यत्र दृश्यंते सधूमा वाश्वथ्विधाः चंद्रसूर्यग्रहे चैव वर्ज्ये दिनसप्तकमिति पातो महापातः क्रांतिसाम्य
मिति यावत् तल्लक्षणं तु प्रसिद्धं दग्धतिथय स्थापांत्ययोगो गंडांतो इत्यादिनोक्ताः एतैः सह संत्यजेदिति संबंधः तथाहु
रन्योगान्व्यतीपातवैधृतिपरिघार्द्धादीन् अथ वंद्यग्योशनसां चंद्रगुरुशुक्राणां अस्तमयनमस्तं च तिथ्याः त्र्यह्री(?)
तिथिह्रयं तिथिवृद्धिं च चतुर्गंडांतं नक्षत्रतिथिलग्नैस्त्रिविधं विष्टिर्भद्रा संक्रमदिनं सर्वग्रहाणां देवद्यकेत्यादिना
संक्रमकालादुभयतो वर्ज्या घटिकाः अयने विषुवे चैव पूर्वापरं दिनमिति विशेषोध्येयः ताभ्यां सहितमिति पूर्वेण सं
बंधः नन्वंशपापस्तनुलग्ने अंशोलग्नगतविहितनवांशः तत्पातः तत्वंशपात्रयोः इतलग्नाधीशस्तलग्नगतनवांशाधी
शस्तौ चेत्यर्थः तथा तन्वंशेशावित्यूनलग्नेशनवांशेशौ चंद्रान्नष्टरिपुमानष्टषष्टस्थानगान् तथापापस्यैकत्वमविवक्षितं
पापग्रहाणां वर्गोत्तमें दुक्रूरखेटगोदयांशः इंदुःसक्रूरखेटगस्तेउक्रूरखेगो उदयोलग्नं च अंशोनवांशश्च उदयांशाविति
समाहारद्वंद्वैकवचनं इंदुक्रूरखेटगाभ्यां सहितमुदयांशः इंदुसहितं लग्नं लग्नांशं च क्रूरग्रहेण सहितं लग्नं लग्नांशं चे
त्यर्थः उदयास्तशुद्धिं चं उग्रधाम् उदयशुद्धिमस्तशुद्धिं च अष्टोदयांशे नित्यपतेद्दृष्टकास्यमन्तुलतः संयुते
च अस्तांशके चेव मद्दृष्टयुते स्वस्वामिना नाशमुपैति कन्येति वसिष्ठाद्युक्तं इतरथा तत्रेयमशुभमिति अथ कुत्रीयु
क्तं प्राक् चंडायुधं हर्षणवैधृतिसाध्येत्यादिनोक्तं खार्जूरं व्याघातगंड इत्यादिनोक्तं दशयोगः सूर्यऋक्षचंद्रदत्त्यु
तेरित्यादिनोक्तः योगोग्रहयुतिश्चतत्सहितं जामित्रलत्ताव्यधं समाहारद्वंद्वैकवचनं जामित्रं द्विविधं लग्नजा
मित्रं चंद्रजामित्रं च लग्नाद्वेद्रादित्यादिनोक्तं लत्तां प्रागुक्तपूर्वेंदुमितादत्युक्तं व्यधं वेधं सप्तशलाकोक्तं पंचशला

कोणं च बाणाः पंचपंचकं उपग्रहः प्रसिद्धः पापकर्तरी क्रूरग्रहकर्तरी समाहारद्वंद्वैकवचनं तिथ्यृक्षवारोत्थ
त्रिदुष्टयोगं तिथिनक्षत्रवारैः ज्ञातोत्थितस्तु त्पन्नं दुष्टयोगं यथा तिथिनक्षत्रोद्भवे विश्वमादिमे इत्यादि तिथिवा
रोद्भवं हस्तं यमघंटे पंचेत्यादि नक्षत्रवारोद्भवं यथा स्यात्त्वाष्ट्रमित्यादि तिथिनक्षत्रवारोद्भवं हस्तार्के पंचमे तिथ्यां विचार्य
न कंटकदुष्टयोगं अथार्धयामकुलिकान् वारदोषानपि स्पष्टार्थं अग्रादिशब्दे न दुर्मुहूर्तादिकान् क्रूराक्रांतविमु
क्तभं क्रूराक्रांतं क्रूरविमुक्तं भं च ग्रहणभं यस्मिन्भे सूर्यचंद्रोपरागो जातस्तद्भं यत्क्रूरगंतव्यभं क्रूरग्रहेणाति
गमिषितं यन्नक्षत्रं त्रेधोत्पातहतं च त्रिविधोत्पातैर्दिव्यांतरिक्षभौमैर्हतं तस्मात्सषड्क्त्यात्स्यमेव केतुहतभं केतुना
हतं भं ननु केनोर्दिव्योत्पातत्वात्त्रेधोत्पातहतं इत्यनेनैव निषिद्धमिति किं पुनर्विशेषनिषेधेनोच्यते अशुभफ
लदं केतोराधूमनैः स्पर्शैः नक्षत्रांतरेऽपि दोषवत्त्वास्ति यदाह वराहः यद्येकायदि बहवः किमनेन फलं तु सर्वथा वा
च्यं उदयास्तमनैर्वर्णैः स्पर्शैराधूमनैः स्थानैः तथा संध्योदितभं अत्र संध्याशब्देन सायंसंध्या गृह्यते तस्मिन्काले यन्न
क्षत्रं प्राक्क्षितिजे उदितं तत्संध्योदितं सूर्याक्रांतनक्षत्राच्चतुर्दशमित्यर्थः तदुक्तं केशवार्केण तरणितारकतोऽपि
चतुर्दशं तदखिलेऽपि विलिं शुभकर्मणीति तारकशब्दः क्लीबेऽपि कनीनिकायां नक्षत्रेऽतारकं तारके निचेति विश्वो
क्तेः ननूपग्रहत्वादेव निषेधे सिद्धे पुनर्दोषाभिधानं किमर्थमित्युच्यते उपग्रहदोषस्य सत्यावश्यकत्वे ऊह
वाह्लीकविषयत्वाच्चतुर्दशस्य भस्य दोषाधिक्यसूचनार्थं अवश्यकेऽपि सर्वदेशविषयत्वेन निषेधो यथा स्यादिति
तद्वच्च ग्रहभिन्नयुद्धगतभं गृहीतं ग्रहयुद्धगतं भं च षण्मासान्निषिद्धं तथा ग्रहकृतालूलमस्य दोषान् व्ययेशानिः
खेवणित्रइत्यादिकां लग्नसंबंधिदोषान्संत्यजेत् अत्र मूलवाक्यानि सर्वाणि अस्मिन्नेव प्रकरणेऽभिहितानि का
निचिदाद्यप्रकरणे इति पुनरत्रोक्तानीति शिवं ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायस्तथा पुत्रेण हिमगौ
प्रसादितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने करपीडनप्रकरणे
संपूर्णतामध्यगात् इति श्रीविद्वद्दैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायां सु

हूते चिंतामणिटीकायां पीयूषधाराभिधायां विवाहप्रकरणं समाप्तिमगात्॥ संख्या २३७० शुभमस्तु
इति विवाहप्रकरणं षष्ठं समाप्तम् ६ ६ ६ शुभमस्तु सर्वजगतां लेखकपाठकयोश्च ॥ ॥ ॥ ॥

विवाहप्रकरण ४८

यात्रा. प्र.२

श्रीगणेशाय नमः ॐ पार्वतीहृदयपद्मभास्करं वक्रतुंडमघसंघवारणं संप्रणम्य क्रियते नयान्विता यात्रिकाप्र
करणस्य दीपिका अथ यात्राप्रकरणं व्याख्यायते तत्र किंचित्कार्यमुद्दिश्य देशांतरगमनं यात्रा सा च संक्षेपतो
द्विविधा एका समरविजययात्रा, परा सामान्ययात्रा तत्र शत्रुनगरजयार्थं वक्ष्यमाणयोगलग्नज्ञानेकोक्तप
एतयोलग्नेषु प्राधान्येन या यात्रा सा समरविजयाख्या यद्यपि कानिचित्रगणानि विनैव युद्धं कटकबाहु
ल्यादेव वर्णयति तथापि युद्धसंभावनास्त्येव याद्रव्यार्जनार्थं वा रणस्यादिनीर्थदर्शनार्थं वा तिथ्यादिशुद्धि
मंगीकृत्य या यात्रा सा सामान्ययात्रा न तदुक्तं वसिष्ठेन परविषये विजयार्थं गतं यात्रा तु समरविजयाख्या निखि
ला परयात्राख्या सामान्या साभवेद्द्विविधा कथिता तिथिवासरर्क्षेष्वभिमतफलदा भवेच्च सामान्या समराख्या
च यात्रायोगविलग्नैहितितीश्वायोगेष्विति तत्र यात्राप्रकरणमारिप्सुर्ग्रंथकृद्यात्राधिकारिणः तावद्ग्रहर्षिणीवृ
त्तेनाह यात्रायां प्रविदितजन्मनां नृपाणां दातव्यं दिवसमबुद्धजन्मनां च प्रश्नोदयहृदयनिमित्तमूलभूतैर्विज्ञाते
ष्वशुभशुभेषु ···· दायात् वैरिव्यतिरिक्तसकललोकहितकारित्वान्नृपस्य वक्ष्यमाणशुभाशुभसमुदायवि
चारस्य सकलशिष्टसंमतत्वेन तदधीनत्वाच्च तत्र ग्रहणं न चन्द्रग्रहणाज्ञातपवैषविचारो युक्त इति वाच्यं व
क्ष्यमाणयोगलग्नेषु प्रतिष्ठाकं राज्यपदानुपदानप्रसंगात् प्रकरणादेव तल्लाभात् अविस्मरणार्थमिति चेन्न दि
कशूलादावप्यविस्मरणार्थं नृपग्रहणं कर्तव्यं स्यात् तस्माद्यथासंभवं राजव्यतिरिक्तस्य ब्राह्मणादेरप्येष वि
चार उपयोज्यः एवमेव वसिष्ठादृषिवाक्येष्वपि समाधेयं प्रविदितं छायायंत्रटिकादिना ज्ञातं जन्मजन्मसम
यो लग्नं यात्कालीनलग्नकुंडलीस्थशुभाशुभग्रहसूचितशुभाशुभफलादर्क ज्ञानं येषां तेषां नृपाणां
यात्रायां दिवसंदातव्यं यात्रादिनं ध्येयमित्यर्थः वानक्तीवे दिव सवासरवितिदिवसशब्दोनपुंसकलिंगः त
च्च ज्ञानं जातकशास्त्राधीनं शुभफलस्य ग्रहस्य दशायामंतर्दशायां चराज्ञो यात्रा विधेया अशुभफलदग्रहस्य राम.
दशायामंतर्दशायां च यात्रा नैव विधेया यदाह वराहः विदिते होरा राशौ स्थानादिबलेग्रहाणां च शुभ्रपिच

रिज्ञाते शुभमशुभं यात्रादिह वाच्यमिति वसिष्ठोपि निखिलगुणगणानां राज्ञां कथयामि विधानमत्र यात्रायां
ज्ञातकमवलोक्यावलोक्य वदेत्फलसिद्धिस्त्वन्यथा नैषा भवतीति ननु यस्य दैवाज्जन्मकालो न विदितस्तस्य
कथं यथा स्यादित्यत आह अबुद्धेति अबुद्धमज्ञातं जन्म जन्मकालो येषां तेषामपि प्रश्नाद्यैः प्रश्नोपश्रुत्यादि
भिः शुभमशुभं विज्ञाते निर्ज्ञाते सति बुधो यात्रादिकं संप्रदद्यात् कीदृशैः उदयादिने दिने राश्याभिरङ्गिरथ वा लग्नं
निमित्तं शकुनादि एतदादीनि वस्तूनि मूलभूतानि निधानकारणानि येषां तैः यदाह नारदः अज्ञातजन्मनां नृ
णां फलाप्तिर्गुणवर्णवत् प्रश्नोदयनिमित्ताद्यैः प्रश्नोदयनिमित्ताद्यैस्तेषामपि फलोदय इति ननु त्वत्र नारदवाक्ये,
ज्ञातजन्मनः पुंसो यात्राफलं घुणाक्षरतुल्यमिति पूर्वार्धे उक्तं प्रश्नादिना तच्छुभनिर्णयसद्भावे तादृशस्यापि फ
लाप्तिरिति पूर्वापरविरोधः उच्यते प्रश्नादिना हि शुभाशुभनिर्णये कृते निष्पन्नमपि यात्राफलं घुणाक्षरतुल्यं
घुणः कीटविशेषः स यथा शक्तिकाष्ठं भित्त्वा दैवादेकः ककारादिको वर्णो जातः तद्वदिदं यदा तु प्रश्नादिना शु
भनिर्णयसद्भावे क्रियमाणा यात्रा वश्यफलदेति न कोपि विरोधः विशेषमाह बृहद्यात्रायां विवाहः तस्मान्नृपः कुसु
मपुष्पफलाग्रहस्तः प्रातः प्रणम्य स्वयमिह रिदिक्स्वस्थः होरांगशास्त्रकुशलानृतकारिणश्च संपृच्छ्य देवगण
कान्सकृद्दैवदृष्ट्या अथ नृपतिसमीपे दैववित्पृष्टमात्रः फलमुदयनिमित्तैस्तर्कयेच्छास्त्रदृष्ट्या सदसदिति
वाच्यं यद्यपि स्यादनिष्टं स्फुटमपि कथनीयं मंत्रिणे भूभुजे वेति अथ ज्ञाताज्ञातजन्मनां साधारणेन यात्रा वदन्ते
न ज्ञातजन्मनां ज्ञातकाद्यवगतशुभफलानां यात्राविचारोऽल्पायाससाध्यः अज्ञातजन्मनां तु ज्ञातकशास्त्रप्र
श्नाद्युक्तेः कथं तद्यात्रा निर्वाह इत्याशंक्य शुभफलयात्रां वदत्कं प्रश्नं द्रुतविलंबितेनाह जननराशितनू यदि
लग्नगे तदधिपौ यदि वा तनुपश्च त्रिरिपुखा[illegible]ः य ९९ गृहं यदि वोदये विजय एव भवेद्वसुधापतेः ननु त्वत्र कथ
मज्ञातजन्मत्वं यावता जन्मराशिलग्नज्ञानं विना समयज्ञानं नैव भवेत् सत्यं यद्यपि राशिलग्नज्ञानं विना समय
ज्ञानं नैव भवेत् सत्यं यद्यपि राशिलग्नज्ञानं तथापि विशिष्टज्ञातकावगतशुभफलस्याह दर्शनावगमादज्ञातज

न्मत्वमत एव राशिलग्नज्ञानाभावे यदिष्टं कीर्तितं प्रश्नं वक्ष्यति जननं जन्म तत्संबंधिनी राशिलग्ने ते यदि प्रश्ने स्यातां जन्म
राशिर्जन्मलग्नं वा यदि प्रश्नलग्नं स्यात्तदा वसुधापते राज्ञो विजय एव अथवा तदधिपौ जन्मलग्नजन्मराश्योः स्वामिनौ
यदि लग्नगतौ स्यातां तदापि वसुधापते र्विजयः वा,थवा तत एव ताभ्यामेव जन्मलग्नजन्मराशिभ्यामेव त्रिरिपुखाय
गृहं तृतीयषष्ठदशमैकादशानामन्यतमं यद्युदयो लग्नं स्यात् तदापि वसुधापते र्विजय एव शत्रुजय एव स्यादित्यर्थः
यदा हनारट: जन्मोदये जन्मराशीनयोरीशस्यापि वा आभ्यामायारिषष्ठेषु यातः शत्रुक्षयेपि चेति अत्र तदीशः शु
भग्रहः चेल्लग्ने कामितं हि तत्र न्यपि विशेषो ध्येयः वराहवसिष्ठः जन्मराशौ लग्नगते तदीशे वापि लग्नगे अथैलाभप्रदा
यात्रा लग्ने शशांकं शुभग्रह इति केचित्ताभ्यामित्यनेन जन्मलग्नजन्मराशिअधिपाभ्यामित्याहुः तत्र जन्मराशि
विलग्नाभ्यां लग्ने चोपचयगृहे संपूर्णफलदा यात्रा त्वथवा विजयप्रदेति वसिष्ठेनकं तत एव जन्मराशिविलग्ना
भ्यां लग्ने चोपचयगृह मिति उक्तत्वात् अथान्यं प्रश्नमंत्र भाषिणीं कंदसाह रिपुजन्मलग्नभमथाधिपौ तयोस्त
त एव चोपचयसद्म चेद्भवेत् हिबुके द्युने यः शुभवर्गकस्तनौ यदि मस्तकोदयगृहं तदा जयः रिपोः शत्रोर्जन्मल
ग्नभं जन्मलग्नभं जन्मराशिश्च तस्वे त्प्रश्नलग्नाद्धिबुके चतुर्थे द्युने सप्तमे वा स्यात्तदा राज्ञो जयो भवेत् अथवा तयोः श
त्रुजन्मलग्नराश्योरधिपौ स्वामिनौ प्रश्नलग्नाद्धिबुके द्युने वा स्यातां तदापि जय एव अथवा तत एव ताभ्यां शत्रोर्जन्म
लग्नराशिभ्यामेव चोपचयगृहं त्रिषडेकादशानामन्यतमं गृहं प्रश्नलग्नाद्धिबुके द्युने वा च स्यात्तदापि जय एव अ
थवा तनौ प्रश्नलग्ने शुभवर्गकः शुभग्रहाणां षड्वर्गकश्चेत्स्यात्तदापि जय एव अथवा यदि मस्तकोदयाः शीर्षो
दया राशयः प्रश्नगताश्चेत्स्युस्तदापि जय एव शीर्षोदयराशीन् नारदवराहः गोजाश्विकर्किमिथुनाः समृगा निशा
ख्याः पृष्ठोदया विमिथुनाः कथितास्त एव शीर्षोदया दिनबलाश्च भवंति शेषा लग्नं समेत्युभयतः पृष्ठतो मत्स्यम
मिति पृष्ठतो मा मीनः श्रीपतिः उदमपत्यरिसंभवं यदास्ते हिबुके वा विजयस्तदा प्रियातः शिरसोदयमेति यश्च रा
शिः जयकृत्सो प्युदये तथेष्टवर्ग इति यदा अस्तेति पदच्छेदः अस्ते सप्तमस्थाने उदं शब्देन प्राग्लग्नपर्योक्तार्थः

परामृश्यते जन्मराशिस्तज्जन्मविलग्नं तत्पती उदयगौ यदि वा स्तः आयकर्मरिपुभान्युततां गतौ शत्रुसंक्षयम
वेहि तदानीमिति जन्मराशीत्यादिकं सर्वं शत्रुसमुद्भवं चेदस्ति सप्तमस्थाने स्यादथवा हिबुके चतुर्थस्थाने स्या
त्तदापि यातुर्नृपस्य विजय इत्यर्थः दशोहोऽपि उदयमुदयपंचाजन्मभं जन्मपंच तदुपचयगृहं वा वीक्ष्यते नियिया
तोः विनिहतमरिपक्षं विद्धि शत्रोरिदं वा हिबुकगृहसमेतं पृच्छतो लक्षयितं वेति अथाज्ञातजन्मनो नृणां शुभफ
लं प्रश्नेनोदकाङ्क्षदसाह यदि दृष्टिश्चितनौ वसुधारुचिराशुभवस्तु यदि हि चिदर्शनगं यदि दृष्टिक्षतिचारदतोऽथ
शुभग्रहदृष्टयुतं चरलग्नमपि अत्र वसुधापतेर्जय इत्यनुवर्तनेन यदि दृष्टिश्चितनौ प्रश्नलग्ने वसुधाभूमिरुचिरास्या
त् अथवा यदि शुभवस्तुवस्त्राभरणशकुनिदर्शनगं श्रवणगोचरं दर्शनगोचरं वा दर्शनमत्र चाक्षुषं अथवाऽ
ष्टा, दरेतो देवज्ञं पृच्छति तदा वसुधापतेर्जयः स्यादिति सर्वत्र व्याख्येयं यदा हरिश्रीपतिः मनोरमा भूद्यदि दृष्टकृतः
स्यात्मांगल्यवस्तुशकुनिदर्शनेस्तः यद्यादरात्पृच्छति च गृहं तथा दिशोदक्ति जयस्तवेति अथवा चरलग्नं मेष
कर्कतुलामकराणामन्यतमं यदि प्रश्नलग्नं शुभग्रहैर्दृष्टं युतं वा तदा पिराज्ञो जयः करोति रणाभिगमनं फलं च चरो
विलग्ने शुभदृष्टयुक्त इति श्रीपत्युक्तेः अथ ज्ञाताज्ञातजन्मनां पुंसां साधारणेनाशुभफलं प्रश्ने मालिनीछंद
साह विधुयुतऊज्जलग्ने सौरिदृष्टे यथ चंद्रे स्थितिमदनसंस्थे, छूमसप्तमसंस्थे लग्नगे भास्करेऽपि हिबुकनिधनहो
राद्यूनगे वापि पापैः सपदि भवति भंगः प्रश्नकर्तुस्तदानीं चंद्रमंगलयुक्ते लग्ने सौरिणा शनिना दृष्टे तदा प्रश्नक
र्तुर्नृपादेर्भंगः शत्रुतः पराजयो नाशो वा स्यात् अथ चंद्रे स्थितिमदनसंस्थे, छूमसप्तमसंस्थे लग्नगे च भास्करेस
त्येवंविधे विशिष्टयोगे प्रष्टुर्भंगः स्यात् तथापिशब्दो व्ययानामनेकार्थत्वाद्विपर्ययार्थः तथाहि अपिविपर्यये
वा सति भास्करे स्थितिमदनसंस्थे चंद्रे लग्नगे च सति एवंविधे योगे प्रष्टुर्भंगः स्यात् उक्तं च वराहेण सचंद्रसुचिरलग्ने
भंगः सूर्यात्मजेक्षिते द्यूननैधने चंद्रे लग्नेऽथा तेदिवाकरे विपर्यये वा यातस्य त्रासभंगवधागमा इति वाथवा पापग्रहै
र्हिबुकनिधनहोरासप्तमे देवगुणा
चतुर्थाष्टमलग्नसप्तमस्थानानामन्यतमे सति प्रष्टुर्भंगः स्यात् उक्तं च वराहेण निधनहिबुकहोरासप्तमेदेवगुणा

मु.दी.
या.प्र.
३

पापस्य शुभफलकराः स्युः षष्ठे तामसानवानां दशमभवनेषु लग्नेषु सौम्याः प्रशस्ताः सदसदिदमशेषं यानकाले विचिं
त्यमिति अथ यातः कस्यां दिशि गमिष्यतीति प्रश्ने निर्णयं भुजंगप्रयातेनाह त्रिकोणे ऽत्रत्या सौरिशुक्रामरज्ञा जीवा
यदेकोपि वा नागमो केंद्रक्षीवा बलीयांस्तु मध्ये तयोर्यो ग्रहः स्यात्स्वकीयां दिशं प्रत्युतासौ नयेच्च उक्तान्प्र
गत्वा त्रिकोणे नवमपंचमे सौरिशुक्रामरज्ञा जीवाः शनैश्चरबुधगुरवश्चेत्स्युरथवा एकोपि वा सौरिशुक्रामरज्ञा जीवा नामन्य
तमश्चेत्त्रिकोणे स्यात्तदा यातायां दिशं प्रष्टा गंतुमिच्छति तत्र दिशि गमो गमनं न स्यात् वा अथवा केंद्रक्षीत्रिको
णे स्यात्तदा यातायामप्युद्दिष्टदिगागमनं न स्यादेव तर्हि कस्यां दिशि गमनं स्यादित्यत आह बलीयानिति तयोर्मध्ये
धुनोक्तो दृष्टदिक्प्रतिबंधकारकयोर्ग्रहयोर्मध्ये यो ग्रहो बलवान्स्यात्स स्वकीयां दिशं प्रत्युत सा प्रष्टारं नयेत् च पादस्य
रणे यदाह वराहः एकोपि ज्ञीवज्ञसितासितानां ऊत्रा त्रिकोणे रविनाथ केंद्रः यत्रोद्यतस्तत्र न याति यातात यो र्नयोमा
नयति स्वकाष्टां काष्टां दिशं ग्रहदिशस्तु सूर्यः सितो भूमिसुतः इत्यादिना वक्ष्यति अथैतदाह द्वितीयं द्वितीययोगंग
द्वलेबाकंदसाह प्रश्ने गम्यदिगीशात्खेटः पंचमगो यः वा वभूयाद्बलयुक्तः स्वमाशां नयते सौ गम्याशिगीशात् गंत
मिष्टायादिक्तस्या ईशः स्वामी प्रश्ने प्रश्नलग्ने यस्मिन्स्थाने यो ग्रहो बलयुक्तो वा भूयादतिबलयुक्तो भवेत्तदा सौम्य
ग्रहः स्वां स्वीयामाशां दिशं नयते प्रापयति यात्रादिगीशाद्यदि पंचमेन्यो गृहे ग्रहो वीर्ययुतस्तु तिष्ठेत् समुद्यतापाक
थितामथ काफलानि वीर्यात्रयति स्वकाष्टामिति अन्यदपि योगांतरं तेनैवोक्तं परस्परं सौरिजज्ञौ रवींदू त्रिकोण
गौ भार्गवलोहितौ वा फलं यदुक्तं तदशेषमेव विनाश्य पश्चान्नयति स्वकाष्टामिति अथैवं प्रश्नलग्नात्शुभाशुभा
शुभं निर्णीय यात्राकालादिभुजंगप्रयातेनाह धनुर्मेषसिंहेषु यात्रा प्रशस्ता शनिज्ञौ शनेस्ता शिगेश्चैव मध्या रवौ
कर्कमीनालिसंस्थे ति दीर्घा तनुः सप्तपंच त्रिताराश्च नेष्टाः रवौ धनुर्मेषसिंहस्थिते सति यात्रा प्रशस्ता शुभफलदा
शनिज्ञौ शनेरा शिगे मकरकुंभकन्यामिथुनवृषतुलागते रवौ यात्रा मध्या मध्यमफलदा नात्यशुभफलदेत्यर्थः
यदाह लल्लः यात्रा ज सिंहतरगोपगते वरिष्टा मध्या शनैश्चरबुधोशनसां गृहेषु भानौ कुलीरझषवृश्चिकगे तिं

राम
३

दीर्घा शास्तास्तु देवलमते धनिष्ठष्टगोऽर्कः प्रशस्त इति देवलाचार्यमते धनिमार्गेऽर्कः सूर्यः षष्ठगः शस्तः षष्ठगत्वं तु भ्रम
णवशेन सूर्यो ह्यहोरात्रमध्ये उदयकालादारभ्य प्रहराष्टकेन प्रदक्षिणं प्राच्याद्यष्टौ दिशो भ्रमतीति यदाह वसिष्ठ
ः दग्धादिगैशी ज्वलिताग्नेयी प्रधूमिता याऽनलदिक् प्रभाते इत्येवमेव प्रहराष्टकेन भुक्ते दिशोष्टौ सविता क्रमेण द
ग्धादिगुक्तादिशुक्ता दिननाथशुक्ता विवस्वदाशा भवति प्रदीप्ता संप्रधूमिता यां सविता प्रयाता प्रोषा दिग्गताः खलु पंच शा
न्ता इति एतेन भ्रमणप्रकारेण यस्यां दिशि यामस्य प्रहरे भ्रमणसंभवः सा दिक् सूर्यसंमुखोच्यते न त्वंचमी दिक् सूर्येष्ट
गतेत्युच्यते इति पितृचरणा व्याचख्युः वयं त्वेवं व्याकुर्मः शस्त इति द्वादशराशिचक्रभ्रमवशेन यस्यां दिशि अर्कः स्थि
तः तां षष्ठतः कृत्वा यायादित्यर्थः यथा लग्नस्थितेऽर्के पश्चिमां दिशं गच्छेत् चतुर्थस्थे सूर्ये दक्षिणं दिशं गच्छेत् सप्तम
स्थे सूर्ये पूर्वां गच्छेत् दशमस्थे सूर्ये उत्तरां गच्छेत् यदाह देवलः लग्नस्थे वरुणं शशाङ्क हिबुकस्थे दक्षिणं रवौ यायात् सप्त
मगे पूर्वाशामेषूरणसंस्थिते सौम्यामिति एवं विदिक्ष्वपि तुल्यन्यायत्वाज्ज्ञेयं यथा द्वितीयस्थे तृतीयस्थे वा सूर्ये
नैरृत्यां गच्छेत् पंचस्थ षष्ठस्थे वा सूर्ये आग्नेयीं गच्छेत् अष्टमस्थे नवमस्थे वा सूर्ये ऐशानीं गच्छेत् एकादशस्थे
वा सूर्ये वायव्यां गच्छेत् अथ तारानिषेध उच्यते नवरिति स्वजन्मनक्षत्रादिननक्षत्रं समयत्त्रीख्यस्यान्नवभक्तमव
शिष्टाः प्रथम पंचम तृतीयाख्याः ताराश्चात्युक्तदाने षष्ठा निषिद्धाः यदुक्तं रत्नमालायां श्रीपतिना त्यक्ताः त्रिपंचादि
मसप्तताराः इति तारेवाऽपि विपंचसप्तत्र्याद्येषु यात्राभीष्टफलप्रदेति नवरित्यादि नक्षत्रज्ञाने समीपे वक्तव्यं अथ
प्रोक्तं पादपूरणार्थं अथ तिथिनक्षत्रशुद्धौ भुजंगप्रयातेनाह न षष्ठी न च द्वादशी नाष्टमी नो सिताद्या तिथिः पूर्णि
मामा न रिक्ता हयादित्यमित्रेन्दुजीवान्त्यहस्तश्रवो वासवैरेव यात्रा प्रशस्ता सिताद्या तिथिः शुक्लपक्षप्रतिपत् अ
थोत्कृष्टपक्षप्रतिपदुत्तमा अमा अमावास्या अन्यास्तिथयो नामतः प्रसिद्धा ज्ञेयाः आसु तिथिषु यात्रा न प्रशस्ते
ति वाक्यार्थः पदार्थस्त्वयं षष्ठी न यात्रायां प्रशस्तेत्यर्थः एवं सर्वत्र कनकारकरणे कविना पदानां पुनरुक्त्या गौरव
लाघवविचारो नास्तीति द्योतयितुं न खरो वाऽनभूय सामुदुरितिवत् यदाह नारदः षष्ठ्यष्टमी द्वादशिका रिक्ता मावर्जि

मु.दी.
या.प्र.
४

तत्र च यात्रास्वशुक्लप्रतिपदि निधनायाधनाय वेति अर्थात् षष्ठ्यादिनिषिद्धतिथिव्यतिरिक्तास्तिथयो यात्रायां प्रशस्ता इत्य
र्थः अत्र प्रत्येकं तिथिफलान्याह वसिष्ठः बलक्षपक्षप्रतिपत्प्रयाणे भंगप्रदा वा निधनप्रदा वा यातुर्मतोभीष्टकरा द्विती
या संपूर्णयात्राफलदा तृतीया तिस्रो विरिक्तास्तिथयः प्रयातुर्मृत्युप्रदाश्चार्थविनाशदा वा यशस्करी भूरिधनप्र
दा च या पंचमी मृत्युकरी च षष्ठी सप्तमी विजयदा ह्यथाष्टमी शोकदुःखभयदा नवमप्रदा सर्वदुःखशमनी यशस्करी
लाभदा च शमनी निरंतरं पशुप्रदा मानकरी हरिगंधरक्तांबरानेकशुभप्रदा स्यात् एकादशी चित्रसुगप्रभूतधान्याके
राधुत्तमवस्त्रदा स्यात् भूरिविभूतिनाशिनी भूरिचमेहारिणी भूरिभीतिदायिनी द्वादशी प्रभंगदा त्रयोदशी सुभोगदा विप
क्षपक्षनाशिनी विनाशदाथ पूर्णिमा यशःक्षयं करोत्यमा बलक्षपक्षः शुक्लपक्षः यस्यां प्रतिपदि सत्यपि उदये चं
द्रस्यातीक्ष्णत्वात् भंगप्रदत्वं पदात्वचंद्रोदयाभाव एव तदा निधनप्रदत्वं मरणदात्वं अर्थात्कृष्णपक्षप्रतिपद्भत्या
आह्नस्य प्रतिपत्सु प्रयातानां सिद्धिरेव न संशय इति तत्कृष्णपक्षीयप्रतिपद्विषयं ह्येयेति ननु तिथयः प्रोक्ताः मध्ये
वारान्विहाय नक्षत्रोक्तिसंगच्छते किंच वसिष्ठेनोक्तत्वाद्वारा वक्तव्या एव हरेत्पदैत्येज्यसुधांशुजानां वाराश्च वर्गाः
शुभदाः प्रयाणे आदित्यभूमिसुतसौरिसुतानां वाराश्च वर्गा न शुभप्रदाः स्युरिति फलान्यप्याह हर मार्तंडः सूर्यदिने
ध्वनिनाशश्चंद्रे क्लेशः कुजेयोर्धनाशश्च ज्वलनात्सुकिंतरुजः कोत्ते बोधेस्वाप्तिः जीवे जयधनलब्धिः शुक्रेस्त्री
वस्त्रगंधधनलाभः दैत्यवधबंधरोगान्प्राप्नोति दिनेर्कपुत्रस्येति तस्माद्वारा वक्तव्या एवेति चेदुच्यते न वक्तव्या वा
च एव वारा इति वयं ब्रूमः उक्तः नारदकश्यपाद्यृषिभिरनुक्तत्वात् किंच नर्मदेंदुदिने प्राचीनव्रजेद्दक्षिणां गुरौ सि
प्रतीचीनां ताके घोनं व्रजेद्वीचीं ज्ञारयोरपीति नारदवाक्यबोधितं बहिनकरमंदवारे शक्रदिशं न व्रजेद्गुरौ याम्यां रविसितदिने
प्रतीच्यां सौम्यदिशं ज्ञारयोश्च वारशूलः स्यादिति वसिष्ठबोधितमपि पापग्रहवारशूलं सर्वमनेन निरर्थकमापद्ये
त सामान्यतएव निषेधसत्त्वात् दोषाधिक्यसूचनार्थमिति चेन्न भिन्नकर्तृकेषु मुनिग्रंथेषु मुनिवचनानां वैय राम.
र्थ्यानर्हत्वादेवं विधागतिरुचिता नन्वेककर्तृके ग्रंथे नत्र हि पूर्वापरविरोधे, ग्रंथांतरं वा कार्यं ग्रंथांतरेण सह कवा ४

क्ष्यता वा कार्या तत्रायं वसिष्ठवाक्यस्य रसः तुहिनकरमंदवार इति वाक्यात्तथा वारनिषेधो गौण इत्यनुमीयते तत्र
तस्य गतिस्त्वेवं यदा स्वजन्मराशेरुपचयस्थानस्थो यो ग्रहः स्यात्स तु शुभो वा पापो वा भवतु सर्वदिक्षु हितः परं
तु शूल दिशं विहाय यदात्वनुपचयस्थानस्थः स्यात्स तत्रापि न हितः यदाह रत्नमालायां उपचयकर ग्रह दिनेषु
द्विः क्रूरेष्वपि पापिनां भवति सौम्ये ष्वनुपचयस्थेन भवति यात्रा शुभाय यात्रा तु रिति एवं ग्रंथभेदेन चंद्रस्य शुभाशुभोक्तिरपि
विहितैव्या केचित्तु दृष्टं क्षीणचंद्र विषयेत्याहुः तस्मात्तार्थो वारो नत्या अतो ग्रंथकृता पि नोक्तो वार इत्यलमतिप्रसंगे
नेति प्रस्तुतमनुसरामः हयोऽश्विनी आदित्यं पुनर्वसुः मित्रोऽनुराधा इंदु मृगः जीवः पुष्यः अंत्यं रेवती हस्तादयः
प्रसिद्धाः एतैर्नवनक्षत्रैरेव यात्रा प्रशस्तोत्तमा यदाह वसिष्ठः पौष्णेंदुयादित्यकरेज्य मित्र विष्णि द्वस्राक्षनुभानि
यानि श्रेष्ठानि यात्रासु नवैव तानि मुक्त्वा त्रिपंचादिमसप्तभानि इति श्रेष्ठानीत्युक्तेः कियंतां नक्षत्राणां मध्यमत्वमपि
यतां निकृष्टत्वं चानुमीयते तदपि तेनैवोक्तं तिस्रोत्तरा वारुण नैरृतेंद्र पूर्वात्रयं ब्राह्मभयुक्तदृशेव मध्यानि नेष्टान्य
नलानिलपूष्णि द्विदैवचित्राहि मघांतकानीति तिस्र उत्तरा इति वक्तव्ये तिस्रोत्तरा इत्यार्षः संधिः गुरुस्तु बहूनि भानि
निषिद्धान्याह पूर्वासु तिसृषु याम्यहरीज्य पुष्टाग्निरौद्रभोरगे सर्वाशासु गते यात्रां प्राणहानिर्भविष्यतीति केचित्तु पूर्वा
त्रयं सानलमग्रजानां राज्ञां तु पुष्येण सहोत्तराणि सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानां आदित्य
हस्ताभिजिदाश्विनानि वणिग्जनानां प्रभवंति भानि मूलत्रिनेत्रानलवारुणानि भान्युग्रजातेः प्रभविष्णुतायाः सौ
म्येंद्रचित्रावसुदैवतानि सेवाजनस्वाम्यमुपागतानि सार्पविशाखाश्रवणाभरण्यः चंडालजातेरभिनिर्दिशंतीति
वराहोक्तेर्जातिविशेषेण यात्रानक्षत्राण्याहुः तच्चिंत्यं यतो वराहसंहितायां नक्षत्रव्यूहाध्याये पंचदश संख्याके
एतानि पद्यान्युक्तानि तत्र देशजातिवस्त्वायुक्तेः शुभोपपत्तौ तेषां देशानां जातीनां च गोधूमादिवस्तूनां च पीडा अन्य
था हितं शुभमिति तत्स्यार्थः उक्तं च तत्रैव वराहेण रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितं ग्रहणगतमथो
ल्कयाहतं नियतमुषाकरपीडितं च यत् तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययया तमेव वा तिगदितपरिवर्गसु

मु·ची·
या·प्र·
५

कथितविपर्ययं तं समूहद्वयमिति परिवर्गः स्ववर्गः अथ वारशूलनक्षत्रशूले स्पष्टीकुर्वन्नाह न पूर्वदिशि शक्रभे न विं
धु सौरिवारे तथा न वारुणपदभे गुरौ यमदिशि नैऋतदैत्येज्ययोः न पाशिदिशि धातृभे कुजबुधे यमदिशि न तथा न सौम्यककुभि
व्रजेत्स्वजयजीवितार्थी बुधः शक्रभं ज्येष्ठानक्षत्रे पूर्वदिशि न व्रजेत् तथा विधुसौरिवारे सोमशनिवारेऽपि पूर्वदिशि
न व्रजेत् अपरे भे पूर्वभद्रपदानक्षत्रे तथा गुरौ गुरुवारे पियाम्यां न व्रजेत् उत्तरे दैत्येज्ययोः शुक्ररविवारे तथार्यमर्क्षे उ
त्तराफल्गुन्यां सौम्यककुभि उत्तरदिशि न व्रजेत् कः बुधः पंडितो ज्ञाता वा राजादिः कीदृशो बुधः स्वजयजीवितार्थी स्वधनं
शत्रुजयः शत्रुपराजयपूर्वकः प्रोत्कर्षः जीवितमायुष्यं एतानि अर्थयते सो युगलं तस्य पुंसो जयनाशं द्रव्यनाशं मर
णं वा स्यादिति निष्कृष्टोऽर्थः यदा हमारः नमंदेंदुदिने प्राची न व्रजेद्दक्षिणां गुरौ सितार्कयोर्न प्रतीचीं नोदीचीं ज्ञारयो
रपीति राजमार्तंडे न विशेषमुक्तः तोयेशवह्निधनदांतकरात्रसानामायातोऽथवा निलशुतक्रतुशंकराणां दिग्भा
गमुग्रकिरणादिदिनेषु दैवैः संरक्षितोऽपि निधनं न चिरादुपैति सूर्ये शुक्रे ऊर्ध्वे राहौ मंदे चंद्रे बुधे गुरौ अयनःशोभ
नायात्रा हष्टतो मरणं ध्रुवं प्रतीचीं रविवारे प्राचीं च रविनंदने उदीचीं भूमिपुत्रेण न यायाद्दक्षिणां गुराविति तदेव
दृष्टिवाक्यसंज्ञाभावादुपेक्ष्यं वसिष्ठः पुरुहूतपुरंदरर्क्षे नैऋत्याग्नेय्यां दिशि प्राग्व्रजेज्ञधिपायै जलनाथदिशं पितामह
र्क्षे शूलाख्यान्यतथसौम्यमर्यमर्क्षे इति पितामहर्क्षे रोहिणी सोमं सोमदेवताकं दिशमुत्तरदिशमित्यर्थः एतत्पक्ष
मध्याह वसिष्ठः शूलसंज्ञानि धिष्ण्यानि शूलसंज्ञाश्च वासराः पापिनां मृत्युदः शीघ्रमथवार्थहानिदाऽनि वारशू
लसपरिहारमाह गुरुः सूर्यवारे घृतं प्राश्य सोमवारे पयस्तथा गुडमांगारके वारे बुधवारे तिलानपि गुरुवारे
शिप्राश्यं शुक्रवारे यवानपि माषान्नं भुक्त्वा शनैर्वारे गच्छन्नं शूलेन दोषभाक् तांबूलं चंदनं मृच्च पुष्पं दधिघृतं तिलां
वारशूलहराण्यर्कादीनां धारणतो दनादिति ननु हयादित्येत्यादिना न वैव भानि यानि यात्रायां प्रशस्तान्युक्तानि
तत्रैतासां ज्येष्ठापूर्वाभाद्रपदारोहिण्युत्तराफल्गुनीनां यात्रायां प्राशस्त्याभावः किंच अग्रे दिग्द्वारभानि सपरिहाराणि व
क्ष्यन्ते तत्र ज्येष्ठायाः पश्चिमास्यत्वात्प्राच्युदीच्योः परिघः उत्तराफल्गुनी दक्षिणा पूर्वाभाद्रपदोत्तरास्यत्वाद्दक्षिणपश्चि

राम·
५

मयोः परिघः उत्तराफल्गुनीदक्षिणस्थस्मरिपत्वात्स्यागुर्दीच्योः परिघः तत्र प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति न्यायाय
न्नक्षत्रशूलाभिधानंव्यर्थमितिचेत् उच्यते योगात्सिद्धिर्धरणिपतीनामितिवदत्पति तत्रयोगयात्राया आत्ययि
ककार्यविषयत्वात्तच्चांगशुद्धिमनादृत्यकेवललग्नशुद्धौराज्ञांयात्रायाःप्रशस्ततरत्वोक्तेः यदाहपराशरः आत्ययि
ककार्यपातेदैवेननिपीडितेचयानवा केवलविलग्नयोगादपियातासिद्धिमवाप्नोतीति तत्रयदिनक्षत्रशुद्धौदे
वाद्विहितनक्षत्रादन्यनक्षत्रेष्वपियात्राप्रसक्तौसत्यांकदाचित्पूर्वस्यांदिशिगंतव्येपिष्टानक्षत्रेपियात्रास्यात् एवंदक्षि
णादिदिग्गमनेपूर्वाभाद्रपदादिनक्षत्रेष्वपियात्रास्यात्सामाभूदित्येतदर्थंनक्षत्रशूलोक्तिः किंच तिस्रोत्तरेत्यादी
नोदशनक्षत्राणांनिंद्यानिंद्यव्यतिरिक्तफलत्वेनमध्यमत्वोक्तेविहितनक्षत्रालाभसंभवेमध्यमनक्षत्राणामपिप्रा
शस्त्यावगतेः आर्क्षगुणैरपिभूदेवानामितिवचनाद्ब्राह्मणनक्षत्रप्राशस्त्यस्यावश्यकत्वान्मध्यमनक्षत्रेषुसर्वथा
यानकार्यमितिसमाधिः अतएवदक्षिणदिशिधनिष्ठापंचकेनिषेधोपपत्तिः शतताराकापूर्वाभाद्रपदोत्तराभाद्रप
दानिषेधःसिद्धः किंपुनर्निषेधेनोच्यते दोषाधिक्यसूचनार्थमितिआर्जवः वयंतुयदाएकस्मिन्नेवाहनिप्रयाणेन
गरप्रवेशस्यसंभवस्तदाप्रावेशिकएवमुहूर्तोविचार्यइत्युक्तं यदाह गर्गः प्रवेशनिर्गमौस्यातांमेकस्मिन्नेववासरे
तदाप्रावेशिकंचिंत्यंबुधैर्नैवतुयात्रिकमिति एकस्मिन्नपिदिवसेयदिचेद्गमनंप्रवेशस्ततःशुक्रवारंशूलंनचिंत
येद्योगिनीपूर्वमिति तत्रयथाप्रतिशुक्रभद्रादिकोदोषोनास्ति तथेहदक्षिणदेशगमनेपंचकदोषोपिनास्ति
तादृशेपिगमनेपूर्वाभाद्रपदानिषेधोयथास्यादित्युपाग्रहणकृतमितिब्रूमः एतच्चयोगात्सिद्धिर्धरणिपती
नामित्यत्रकुल्माषांस्तिलतंदुलानित्यत्रापिचसम्यग्विचारयिष्यतइत्यलमतिप्रसंगेन अथध्रुवादिनक्षत्रैः पूर्वा
ह्लादिकालविशेषयात्रानिषेधंशार्दूलविक्रीडितेनाह पूर्वाह्णेध्रुवमिश्रभैर्नृपतेर्यात्रानमध्याह्नकेतीक्ष्णाख्यै
रपराह्णकेनलघुभैर्नोपूर्वरात्रेतथा मैत्राख्यैर्नचमध्यरात्रसमयेचोग्रैस्तथानाचरेत्रात्र्यंतेहरिहस्तपुष्यशशिभिः
स्यात्सर्वकालेशुभा शपतेःसर्वैत्रेसंबध्यते ध्रुवाख्यमिश्राख्यैश्चभैर्नक्षत्रैःपूर्वाह्णेयात्रानस्यात् तीक्ष्णाख्यैर्भैर्म

मु॰ दी॰
या॰ प्र॰
६

ध्याह्नके यात्रा न सत् मध्याह्नक इति स्वार्थे कः अपराह्णके यात्रा न स्यात् तथा पूर्वरात्रे मैत्राख्ये यात्रा न स्यात् मध्यरात्रस
मये उग्रनक्षत्रैर्यात्रा न स्यात् तथा रात्र्यंते रात्रितृतीयभागे चरनक्षत्रैर्यात्रा न स्यात् तथा रात्र्यां विशेषः हरिहस्तपुष्यशशि
भिः श्रवणहस्तपुष्यशशिभिः श्रवणहस्तपुष्यमृगैः सर्वकालेषु षष्टिघटिकात्मके होरात्ररूपे यस्मिन्कस्मिंश्चित्काले या
त्राशुभा स्यात् यदाह वसिष्ठः स्थिरसाधारणधिष्ण्यैः पूर्वाह्ने नैव गमनं ततः गमनं न दारुणैर्दिनदलसमये न कार्यमशु
भं स्यात् क्षिप्रैर्नापरवासरसमये मृदुभिरात्रिमुखे उग्रैर्निशि समये चरधिष्ण्यैरुषसि न श्रेष्ठं शशिसमये अहं रात्रे तथा
चाह श्रीपतिः पूर्वाह्ने ध्रुवमिश्रभैर्न गमनं तीक्ष्णैर्न मध्ये दिने श्रेष्ठं नापरवासरे च लघुभिर्मैत्रैर्न रात्रेर्मुखे उग्राख्यैर्न वमध्य
समये नेष्टं निशांते चरैः सर्वेष्वेव करेंदवेज्यहरिभिः कालेषु यात्राशुभा अहर्दिनस्य रात्रेश्च त्रिधा विभागं कृत्वा पूर्वाह्नादिव
व्यवहारः प्रसिद्धः तदेतदुक्तं स्पष्टं महेश्वरेण आद्ये ध्रुवक्षिप्रलव...वर्जमहितैर्मिश्रैर्न यत्राशुभा नो तीक्ष्णैरपरांशकेन ल
घुभैरह्नस्त्रिभागेंतिमे आद्ये पूर्वादिमके निशानमृदुभैरुग्रैर्न मध्येंशके नांत्ये प्रोचरभैः करश्रुतिमृगेज्यैर्दस्त्रशुभा सर्वदे
ति ननु प्राप्तिपूर्वकत्वात्प्रतिषेधकस्येति न्यायात् ध्रुववर्ज्येषु यात्रा प्राप्तिरेव नास्ति किं पुनः पूर्वाह्नादिकालविशेषनि
षेधेनेति चेत् उक्तोऽत्र समाधिः प्राक् अद्य ननु तिस्रो न रेत्यादिना ध्रुवादीनां मध्यमत्वमंगीकृत्य समाहितं मिश्रादीनां त
विशेषनिषेधात्कथं प्राग् उक्तः समाधिरत्र संगच्छेतेति चेत् सत्यं तुल्यन्यायत्वादावश्यकयात्रायां यथा भद्राव्यतीपाता
दिषु दुष्टेषु केवलालग्नशुद्धिमाश्रित्य यात्रा राज्ञां प्रशस्ता तथा निषिद्धनक्षत्रेष्वपि अस्मिन्नेवार्थे इदमेव वाक्यं ज्ञा
पकमिति वयं ब्रूमः एवं सति कालविशेषनिषेधोपपत्तिरपि संगता भवति पूर्वरात्र इति रात्रेः पूर्वं पूर्वरात्र इति पूर्वाधरो
त्तरमेकदेशेनैकाधिकरणे इत्येकदेशिसमासस्तत्पुरुषः तत्र समासे शास्त्रांतरे तस्य प्रथमांत पूर्वापरादिवाक्यस्थ
स्य पूर्वशब्दस्य प्रथमानिर्दिष्टं समास उपसर्जनमित्युपसर्जनत्वात् उपसर्जनं पूर्वमिति पूर्वनिपातः ततो हः सर्वैक
देशसंख्यातपुण्याच्च रात्रेरित्यच् प्रत्ययः समासांतः यस्येति चेतीकारलोपः अमुमेवाशयं मनसि निधाय ग्रन्थे: राम॰ ६
न च मध्यरात्रसमय इत्यत्र कृतसमासांतं मध्यरात्रशब्दं पठंति केचित् तच्चिंत्यं यतो रात्रेर्मध्यं मध्यरात्र इति विगृह्य त

तदेकदेशिसमासविधायकसूत्रे मध्यशब्दस्याभावादेकदेकदेशिसमासोऽनुपपन्नः अत एव पूर्वनिपातोऽपि न समासांत
स्यत्वं तु न्मेष एव तस्माद्रात्रिमध्यसमय इत्येवं पाठः स्यादिति कथमयं प्रयोगः उच्यते मध्यरात्रिर्मध्या चासौ रात्रिश्च मध्य
रात्रिरिति विशेषणं विशेषेण बहुलमिति समानाधिकरणतत्पुरुषः पुंवत्कर्मधारयजातीयदेशीयेष्विति पूर्वपदस्य पुंवद्भा
वः पूर्वादिकं पश्चिमं नभ इत्यादिवदेकैकदेशपर्यवसाने अर्धरात्र इत्यर्थः समासांतस्त्वत्र नैव भवति अहःसर्वैकदेशेत्य
त्र कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति न्यायादेकदेशशब्देन पूर्वापरादिसूत्रस्थः प्रतिपदोक्त एकदेशिसमा
सो गृह्यते तत एव च समासांतविधानाविधायकसूत्राभावात्समासांतविषये न्यायविरुद्धत्वाच्च चिंत्योक्तयोर्ध्येयाः
अत उग्राख्ये न च मध्यरात्रसमये इति श्रीपतिवाक्येऽपि मध्यरात्रिरितीकारांतः पाठः पाठ्यः एवं मूलेऽपीत्यलमतिविस्तरे
ण अथ तत्रापि कालविशेषे मध्यमानां निषिद्धानां कियतां च भानां वर्ज्यघटिका इंद्रवज्राछंदसाह पूर्वाग्निपित्र्यांतकता
रकाणां भूपैः प्रकृत्युग्रतुरंगमास्युः स्वातीविशाखेंद्रभुजंगमानां नाड्यो निषिद्धा मनुसंमिताश्च पूर्वात्रये प्रथमातिक्र
मे कारणाभावाद्द्विमाः षोडश नाड्यो निषिद्धाः एवमग्नेः कृत्तिकाः सएकविंशतिघटिकाः पित्र्यस्य मघाया एकादशघ
टिकाः अंतकस्य भरण्याः सप्तघटिकास्त्याज्याः यदाह भरद्वाजः भरण्यां सप्तघटिकास्त्याज्या इत्यर्थः स्वातीविशाखाज्ये
ष्ठाश्लेषाणां चतसृणां तारकाणां चतुर्दश घटिकास्त्याज्याः यदाह भरद्वाजः भरण्यां सप्तघटिका वह्निभे चैकविंशतिः ए
कादशघटीः पित्र्ये त्रिपूर्वासु च षोडश स्वातीसार्पविशाखासु ज्येष्ठायां च चतुर्दश वर्ज्येयेक्के षड्घटिका यातः शुभफलप्र
दा इति एतद्यात्रावश्यकगमनविषया च तेनैवोक्तं निषिद्धेष्वपि ऋक्षेषु त्यक्त्वाद्यघटीः क्रमात् तदन्याघटिका ग्राह्या अत्र
वश्यगमने समतीति अपि शब्दान्मध्यमेषु ऋक्षेषु अथ मतांतरेण वर्ज्यघटीस्त्विंद्रवज्रयाह पूर्वार्द्रमासे च मघानि
लानां त्यजेद्द्विचित्राहियमोत्तरार्धे नृपः समस्तागमनेऽजयेप्सुः स्वातीमघाद्वीशनसोमतेन स्पष्टार्थमिदं पद्यं यदाह
बृहद्यात्रायां वराहः विवर्जयेत्त्वाष्ट्रयमोरगाणामर्द्धं द्वितीयं गमने जयेप्सुः पूर्वार्द्रमाग्नेयमघानिलानां स्वातीमघाद्यो
शनसः समस्तामिति उशनसो मतेनेन विशेषः अथ भानां जीवपक्षादिकाः संज्ञा भुजंगप्रयातेनाह तमोभुक्तताराः स्मृता

मु·टी·
या·प्र·
७

विष्णुसंख्याः शुभो जीवपक्षो मृतश्चापि भोग्यः तदाक्रांतभं कर्तरीसंज्ञमुक्तं ततो द्वेंडसंख्यं भवेद्भुक्तनाम २७ ततो राहुणा
माग्रहो विपरीतगतिरस्ति आगमप्रामाण्यात् तेन भुक्ता भुक्ता एवंविधा विष्णुसंख्यास्त्रयोदशसंख्यास्तारा नक्षत्राणि जीवप
क्षो जीवपक्षसंज्ञानि तदाक्रांतभं तेन राहुणाक्रांतभं कर्तरीत्येवंनामकं ततो राहुणाक्रांतनक्षत्राद्द्वेंडसंख्यं पंचदशसंख्या
कं भं ग्रस्तनामकं स्यात् यथा राहुर्हस्तेस्ति तेन भुक्तानि चित्रा स्वाती विशाखानुराधा ज्येष्ठा मूल पूर्वाषाढोत्तराषाढाभिजि
च्छ्रवण धनिष्ठा शततारका पूर्वाभाद्रपदाख्यानि भानि जीवपक्षः तदाक्रांतभात् हस्तात् पंचदशमुत्तराभाद्रपदाभं ग्रस्तसं
ज्ञं तेन राहुणा भोग्यानि उत्तराफाल्गुनी पूर्वाफाल्गुनी मघाश्लेषा पुष्य पुनर्वस्वार्द्रा मृगरोहिणी कृत्तिका भरण्यश्विनीरे
वत्याख्यानि मृतपक्षाः हस्तस्तु कर्तरीसं ग्रस्तसंज्ञाः समरसारोक्तत्वात् स्वरोदये षडंगराहुभिधाने च कृताः अत्र जी
वपक्षमृतपक्षयोरन्वर्थसंज्ञाविज्ञानात् जीवपक्षे यात्रा कार्या मृतपक्षे यात्रा न कार्येति व्यंग्योर्थः कर्तरीग्रस्तयोस्तु फलं
स्वयमेव वक्ष्यति ग्रस्तर्क्षं मृतपक्षतः शुभकरं ग्रस्तात्तथा कर्तरी पायांडुस्थितिमानूरविजयकरौ तौ द्वौ तयोर्जीव
वर्गौ मृतपक्षगते मार्तंडे सति चंद्रः चेज्जीवपक्षे स्यात्तदा यात्रा शुभा स्यात् विपरीतगते मार्तंडे जीवगे सति चंद्रः च मृत
पक्षगस्तदा क्रियमाणा यात्रा यातुः क्षयकरी स्यात् उक्तं स्वरोदये जीवपक्षे स्थितो नाथे मृतपक्षे रवौ तथा तस्मिन्काले
शुभा यात्रा विपरीता तु हानिदेति द्वौ सूर्याचंद्रमसौ चेज्जीवपक्षे स्यातां तदा शुभाशुभगते त्वर्थः अर्थाद्द्वावपि सूर्याचं
द्रमसौ मृतपक्षे स्यातां तदा यात्रा निक्षयकरी स्यात् एतदप्युक्तं तत्रैव चंद्रादित्यौ यदा युक्तौ जीवपक्षे व्यवस्थितौ तत्र
क्षेमं जयो लाभो यात्राकाले न संशयः मृतपक्षे यदा काले संस्थितौ चंद्रभास्करौ तदा हानिर्भयं भंगं मृत्युर्यात्राफलं
मतमिति अस्यापवादमाह ग्रस्तर्क्षमिति मृतपक्षः मृतपक्षसंज्ञकनक्षत्रगणात् ग्रस्तर्क्षं राहुणाक्रांतभं न शुभकरं स्या
त् यथा श्वासमरिष्यमाणो देही प्रबलः तथा ग्रस्तात् ग्रस्तनक्षत्रात् कर्तरी राहुणाक्रांतं भं शुभकरं स्यात् तदुक्तं समरसारे प्रे
ताक्रांतं किमपि तु वरं कर्तरी त्वग्र्यतः स्युरिति एवं सामान्यतः सर्वेषां यात्राफलविचारमभिधायेदानीं विशेषमाह यायी
ति द्विविधो राज्ञा स्थायी यायी च यो राजा स्वदेशे दुर्गं कृत्वा तिष्ठति स स्थायी यो वैरिणमुद्दिश्य प्रतिगमिष्णुः स यायी त

राम·
७

र्येंदुश्चंद्रो यायी यायिनो राज्ञः स्वामी रविस्स्थितिमान् स्थायिनो राज्ञः स्वामी तौ द्वौ सूर्याचंद्रमसौ जीवगौ जीवपक्षगौ यस्
मिंस्तयो राज्ञोः स्थायियायिनोः जयकरौ संधिकरौ वा स्यातां अर्थाद्द्वावपि मृतपक्षगतौ तदा पराजयकरौ स्यातां यदा
ह वसिष्ठः जीवपक्षगयोः सूर्यचंद्रयोः संधिमादिशेत् उभौ पराजितौ ज्ञेयौ मृतपक्षगयोस्तयोरिति अत्रापि मातौ उ
भूतिपक्षग इत्यनुवर्तनत एव एवं सत्यर्थमर्थः मृतपक्षगते सूर्ये चंद्रः चेज्जीवपक्षगतस्तदा यायिनो राज्ञः शुभायात्रा जयः
स्यात् स्थायिनो पराजयश्च तदुक्तं वसिष्ठेन रविः स्थायी शशी यायी नष्टशाच जयाजयौ मृतपक्षगते भानौ जीव
पक्षगते विधौ स्थायिनो विजयस्तत्र यायिनां च पराजय इति विपरीतग इति चंद्रे मृतिपक्षगते सूर्ये च जीवपक्ष
गतस्तदा स्थायिनो राज्ञः शुभायात्रा जयः स्यात् अर्थाद्यायिनो पराजयः उक्तं च तेनैव जीवपक्षगते सूर्ये मृतपक्ष
गते विधौ स्थायिनो विजयस्तत्र यायिनां च पराजय इति यदा तु सूर्यो राह्वाक्रांतनक्षत्रे चंद्रो मुक्तं संस्पृष्टे तदा यायिनो
स्वल्पो जयः स्थायिनो नैव यदा तु चंद्रो राह्वाक्रांतनक्षत्रे सूर्यो मुक्तं संस्पृष्टे तदा स्थायिनां स्वल्पो जयो यायिनो नैव
यदा द्वावपि राह्वाक्रांतनक्षत्रे तदा द्वयोरपि पराजयः यदा त्वर्धमुक्तं संस्पृष्टमस्थितौ द्वौ तदा द्वयोरपि संधिरित्यपि वि
शेषो ध्येयः यदाह वसिष्ठः चंद्रे मुक्ते मुखे सूर्ये जयः स्वल्पो हि यायिनां व्यत्यये व्यत्ययफलं युद्धे ध्येवं विचिंतयेत् यात्रायाम
पि सर्वत्र चिंतनीयं प्रयत्नत इति तस्मादयं विचारो युद्धयात्रायां अर्थाज्ज्ञानादि सामान्ययात्रायां च ज्ञेयः सामान्यतो मंगल
कृत्येष्वपि ज्ञेयः उक्तं च स्वरोदये जीवपक्षस्थिते चंद्रे कार्यं स्यादमृतोपमं मृतपक्षे मृतं ज्ञेयं यतः चंद्रबलं बलमिति अत्र
स्वरोदयादियुद्धग्रंथेषु षडंगराहुः दंडाराहुः नक्षत्रराहुः चरराहुः फलान्यभिहितानि ग्रंथकर्त्रा ग्रंथस्य स्वभयान्नो
क्तानीति नास्माभिर्विविच्यंते शुश्रूषुभिः च तत एवावधार्याणीत्यलमतिप्रसंगेन अथ सफलसकुलकुलाकुलच
क्रं युद्धयात्रायां वसंततिलकाप्लुतशार्दूलविक्रीडिताभ्यामाह स्यात्यंतकाहि वहपोष्णकराजुराधादित्यध्रुवाणि वि
षमाश्च तिथयो कुलाः स्युः सूर्येंदुमंदगुरवश्च कुलाकुलज्ञौ मूलांबुपेशविधिभं दशषड्डितिथ्यः पूर्वाश्वीज्यमघेंदुक
र्णदहनद्वीशेंद्रचित्रास्तथा शुक्रारा कुलसंज्ञकाश्च तिथयो कोष्टेंद्रवेदैर्मिताः यायी स्यादकुलीजयी च समरे स्थायी

मु.टी.
पी.प्र.
६

चतुष्कुले संधिः स्यादुभयोः कुलाकुलगणे भूमीशयोर्युध्यतोः स्वातीप्रसिद्धा शतभं भरणी आश्लेषा वसुधनिष्ठा पौ
ष्णंरेवती करो हस्तः अनुराधा आदित्यं पुनर्वसुः ध्रुवाणि रोहिणी उत्तरात्रयं च एतानि द्वादशभानि विषमास्तिथयः प्रति
पत्तृतीयापंचमीसप्तमीनवमी एकादशीत्रयोदशीपंचदश्यः एतान्यष्टौ तिथयः वाराः सूर्येंदुगुरवः मंदः शनिः चत्वारो
वाराः एतानि नक्षत्राणि तिथयो वाराश्च प्रत्येकमकुलसंज्ञकाः स्युः अथ ज्ञो बुधवार एकः मूलं प्रसिद्धं अंबुपं शततारका
ईशा आर्द्रा विधिभमभिजित् एतानि चत्वारि भानि दशषट्द्वितिथ्यः दशमी षष्ठी द्वितीयास्तिथयः तिस्रश्च एते पदार्थाः
प्रत्येकं कुलाकुलसंज्ञकाः स्युः अथ पूर्वास्तिस्रः अश्विनो अश्विनी ईज्यः पुष्यः मघा इंदुः मृगः कर्णः श्रवणः दहनः
कृत्तिका द्वीशं विशाखा इंद्रो ज्येष्ठा चित्रा प्रसिद्धा एतानि द्वादशभानि शुक्रारौ शुक्रमंगलवारौ अर्कैर्द्विवेदैर्मिताः द्वाद
शी चतुर्दशी चतुर्थी संज्ञास्तिस्रस्तिथयः एते प्रत्येकं कुलसंज्ञकाः स्युः यदुक्तं स्वरोदये द्वितीया दशमी षष्ठी कुलाकुल
मुदाहृताः विषमा अकुलाः सर्वाः शेषाः स्युस्तिथयः कुलाः रविसोमौ गुरुः सौरिः चत्वारो ह्यकुला मताः सोमश्च क्रो कुला ख्यो
बुधवारः कुलाकुलः वारुणार्द्राभिजिन्मूलं कुलाकुलमुदीरितं कुलानि मास्यानि धिष्ण्यानि शेषभान्यकुलानि च अस्य
फलमाह स्थायीति अकुलसंज्ञके तिथिवारनक्षत्राणां गणे समरे युद्धप्रारंभे सति स्थायी राजा जयी स्यात् यदि कुलसंज्ञ
के तिथिनक्षत्रवारगणे सति समरे स्थायी राजा तदुक्तं यायी जययुक्तः स्यात् कुलाकुलसंज्ञके तिथिवारनक्षत्रगणे युध्यतोः
युद्धं कुर्वतोर्भूमीशयो राज्ञोरुभयोः परस्परं संधिः प्रीतिः स्यात् उक्तं च स्वरोदये तिथौ वारे च नक्षत्रे अकुले यायिनो जयः कु
लाख्ये स्थायिनो ज्ञेयः संधिश्चैव कुलाकुले इति वसिष्ठेनतु फलांतरमप्युक्तं कुलभेषु च ये जातास्ते मनुजा भवंति कुलमु
ख्याः उपकुलभे परविभवभोक्तारस्त्वन्यभेषु सामान्याः इति एतत्तुल्यन्यायत्वाद्वारेषु तिथिषु प्रपि ध्येयं अथ पथि राहुचक्रे
माह रयाद्द स्युर्धर्मे दस्रपुष्योरगवसुजलपद्वीशमैत्राण्यथार्थे याम्याजांघ्रीद्रकर्णादितिपितृपवनोडून्यथो भानि कामे व
ह्न्याद्रीबुध्न्यचित्रानिर्ऋतिविधिमगाख्यानि मोक्षे च रोहिण्यार्यमणाप्येंदुविश्वांतिमदिनकरर्क्षाणि पथ्यादिराहो अश्विनी पु
ष्याश्लेषा धनिष्ठा शततारका विशाखानुराधाख्यानि भनि धर्मधर्मस्थानेलेख्यानि स्युः अथ रोहिणी उत्तराफल्गुनी पूर्वाषाढा राम
८

रेवतीहस्तास्वातिभानिमोक्षमार्गेलिखानिस्युः पथिशब्दश्चात्रदिक्ष्यसमतातदग्रेराहोपथिराहावित्यर्थः चक्रे इतिवि
शेष्यमध्याहार्यं चक्रन्यासोयथा तदुक्तं राजविजये ऊर्ध्वगाः पंचरेखाः स्युः तिर्यग्रेखास्तथानव द्वात्रिंशत्कोष्टकैस्त्व
त्रपथिराहुः प्रकीर्तितः धर्मार्थकाममोक्षाः स्युरूर्ध्वकोष्टचतुष्टये विन्यसेत्सर्पचलनादश्विन्यादीनिभान्यथेति सर्पच
लनवदनुलोमविलोमाभ्यांभानिलिखान्यर्थः एतद्रूपमुक्तमादियामले अश्विन्यादीनिचत्वारिगणयेत्क्रमधापुनः
अनुलोमविलोमाभ्यांसाभिजितिपुनःपुनः धर्मार्थकाममोक्षाख्यामार्गाश्चत्वारएवचेति अत्रग्रंथकृत्पद्येगौर
वदर्शनात्पूर्वपद्योज्ञायते तदुपपत्तिस्तत्समाधिश्चांधात्वं वस्तुपुष्येत्यादिपद्यव्याख्यानेतिष्ठतिसातत्रएवावधीयो
अतएवादियामले निष्याश्चाहिर्विशाखाश्चमैत्रंशतभिषग्यस्तुः एतानिसप्तऋक्षाणिधर्ममार्गेनियोजयेत् आ
ज्ञपादमघाहस्तानियाम्यत्वाष्ट्रापुनर्वसुः श्रवणंसप्ततारास्युर्धनमार्गेप्रकीर्तिताः आहिर्बुध्न्याभिजिन्मूलमगस्तुश्वा
र्द्रकृत्तिकाः एतावत्यःसप्ततारा:काममार्गेव्यवस्थिताः अथैवंपथिराहुचक्रमुक्त्वातत्फलंसविशेषीकृत्साह धर्मे
गेभास्करेवित्त मोक्षेचशशीवित्तगेधर्ममोक्षस्थितःशस्यते कामगेधर्ममोक्षार्थगःशोभनोमोक्षगे
केवलंकेवलं धर्मगःप्रोच्यते धर्ममार्गेस्थितेभास्करेसूर्येसति चेद्वित्तमोक्षार्थमार्गेमोक्षमार्गे
वाप्यशुभीस्यात्त दाशोभनःचंद्रः अथवावित्तगेसूर्येगेभास्करेसतिधर्ममार्गेस्थितोमोक्षमार्गेस्थितो
वाचेच्छुभीस्या त्तदापिशुभः अथविपरीतावस्थितौवामोक्षमार्गेस्थितेभास्करेकेवलंधर्म
मार्गेस्थितः चेच्चंद्रःस्यात्तदापिशुभः अथवाविपरीतावस्थितौ द्वयोःसूर्याचंद्रमसोरशु
भत्वंस्यात् उ क्तंचादियामले सूर्येधर्मगतेचंद्रोधनेमोक्षेशुभप्रदः सूर्येधनगतेवित्तमोक्षमा
र्गेशुभःशशी कामेर्केधनमोक्षार्थसंस्थःचंद्रोजयप्रदः मोक्षेर्केधर्मगश्चंद्रःशुभोन्यत्रनशोभ
नइति राजविजयेतुशुभाशुभाख्यंफलद्वयमप्यभिहितं धर्ममार्गगतेसूर्येचंद्रेतत्रैवसंस्थिते हतंयुद्धंभ
वेत्तत्रकिंचिद्यायीजयीभवेत् धर्मेसूर्येर्थगश्चंद्रोयायिनोविजयप्रदो धर्मेर्कःकामगःचंद्रोविरोधोबांधवैःसह

ध	आ	का	मो
अ	भ	कृ	रो
पु	पु	आ	मृ
अ	म	पू	उ
वि	स्वा	चि	ह
अ	ज्ये	मू	पू
ध	श्र	अ	उ
श	पू	उ	रे

इतिपथिराहुचक्रं

धर्मेर्को मोक्षगः चंद्रोऽशुभयोगेन लाभकृत् अर्थेर्को धर्मगः चंद्रो निंद्यो यात्रादिकर्मसु अर्थेर्को मोक्षगः चंद्रोऽशुभ
षटी युग्भूमिलाभकृत् कामेर्को धर्मगः चंद्रः शुभयुग्रत्नलाभकृत् कामेर्कोऽर्थगतः चंद्रो बुधजीवगतो यदि स्त्रीलाभ
याप्र· दो समाख्यातो भृगुणा च समन्वितो चंद्रार्कौ कामगौ यत्र रिपुघातादिदुःखदः कामेर्को मोक्षगश्चंद्रः शुभयुक्तो
२१ ऽर्थलाभकृत् मोक्षेर्कः चंद्रमा धर्मे महालाभः शुभान्वितः मोक्षे सूर्योऽर्थगः चंद्रस्तथा यात्रा हि निष्फला मो
क्षेर्कः कामगः चंद्रो यात्रा दुःखप्रदा भवेत् चंद्रार्कौ मोक्षमार्गस्थौ घोरविघ्नप्रदायकौ यात्रादिसर्वकार्येषु
चैकमेतद्विलोकयेत् पथिराहुरिति ज्ञेयः शुभाशुभफलप्रदः इति अतएवास्य चक्रस्य निकृष्टमर्थमाङ्कूरस्म
त्यिता महानंतचरणाः धर्मे र्के विघ्नमोक्षे बुविग्नस्थ धर्म मोक्षगः कामे धर्मार्थमोक्षेषु मोक्षे धर्मगतः शुभ इति
इति पथिराहुचक्रं अथावश्यकतया तायां श्रायां तिथौ उष्ट्रायां तिथिचक्रं शालिनीवृत्त चतुष्टयेनाह पौषपक्षस्य त्य
दिकाद्वादशैव तिथ्यो माघादौ द्वितीयादिकास्ताः कामास्तिस्रः स्युस्तृतीयादिकाश्च याने प्राच्यादौ फलं तत्र वेद्यं सौ
ख्यं क्लेशो भीतिरर्थागमश्च शून्यं नैस्व्यं निस्वता मिश्रता च द्रव्यक्लेशौ दुःखमिष्टाप्तिरर्थो लाभः सौख्यं मंगलं वित्तलाभः
आपाद् व्याप्तिर्धनं सौख्यमुक्तं भीतिर्लाभो मृत्युरर्थागमश्च लाभः कष्टं द्रव्यलाभः सुखं च कष्टं सौख्यं क्लेशलाभौ सु
खं च सौख्यं लाभः कार्यसिद्धिश्च कष्टं क्लेशः कष्टात्सिद्धिरर्थो धनं च मृत्युर्लाभो द्रव्यनाशश्च शून्यं सौख्यं मृत्युर्दुः
खमत्यंतकष्टं अत्र पौषमासादितः प्रतिमासं द्वादशकोष्टका लेख्याः एवं कृते चतुश्चत्वारिंशदधिकं शतं कोष्ठकाः
स्युरित्यर्थः एवं चक्राकृतिर्भवति तत्र पक्षस्य शुक्लस्य कृष्णस्य वा शुक्लेऽपारंभः प्रतिपदि यावत् पक्षांतिरिति मूले अ
र्थेति प्रत्ययः प्रथमं पौषे पौषमासे पक्षतिः प्रतिपत् तदादिका द्वादश तिथयो यो ध्रुवा लेख्याः माघादौ माघादिमासे
षु द्वितीयादिकास्तिथयो लेख्याः यथा माघे द्वितीयादिकाः फाल्गुने तृतीयादिकाः चैत्रे चतुर्थ्यादिकाः वैशाखे पं
चम्यादिकाः ज्येष्ठे षष्ठ्यादिकाः आषाढे सप्तम्यादिकाः श्रावणे ष्टम्यादिकाः भाद्रपदे नवम्यादिकाः आश्विने द राम·
शम्यादिकाः कार्तिके एकादश्यादिकाः मार्गशीर्षे द्वादश्यादिकाः लेख्याः सर्वास्तिथयो द्वादशसंख्याता लेख्याः कामा २

स्तिस्रः स्युरित्यर्थः विशेषोक्ते त्रयोदशाद्यग्रहणादवशिष्टं स्थानानिप्रतिपदादिभिः पूरणीयानि तत्रत्रयोदशी चतुर्दशी पंचदश्यस्तिथयोवशिष्यंते तासां विभागमाह कामादिति कामात्त्रयोदशीतः तिस्रः त्रयोदशी चतुर्दशी पंचदश्यस्तृतीयादितिथयएवस्युः यथात्रयोदशीतृतीयावत् चतुर्दशीचतुर्थीवत् पंचदशीपंचमीवत्स्युरित्यर्थः फलार्थमितिशेषः अयं तिथिचक्रन्यासो यथा तत्रप्राच्यादौ प्राचीदक्षिणप्रतीच्युदीचीषु चतसृषु दिक्षु यानिगमने चिकीर्षिते सति फलं शुभाशुभरूपं सौख्यं क्लेश इत्यादिज्ञानत्रयं स्पष्टार्थमेव तत्रपौषमासे प्रतिपदादिचतुष्टये

सौख्यं क्लेशो भीतिरर्थागम इति फल
चतुष्टयं क्रमेण ज्ञेयं एवं द्वितीयादिष्व
पि क्रमेण दिक्चतुष्टये श्लोकनुयोगो
क्तं फलं स्यात् तदेतत्सर्वं पौषादिमासे
षु द्वितीयादितिथिषु ध्येयमित्यर्थः
यदाह अथ सर्वोत्कृष्टानेव संततिल
कयाह तिथ्यृक्षवारयुतिरिङ्गिताग्नि
तंष्टा स्थानत्रये त्रवियतिप्रथमेतिद्वौ
मध्येधनदातिरथोचरमेमृतिः स्यात्स्था
नत्रयेकथितिसौख्यजयौभवेतां तिथ
यात्रशुक्लप्रतिपदादितो ग्राह्याः त
त्र तिथिनक्षत्रवाराणां युतिः स्थानत्रये
स्थाप्या क्रमेण सप्तभिरष्टभिर्द्विभिस्त्रि

पौष	माघ	फा	चै	वै	ज्यै	आ	श्रा	भा	आ	का	मार्ग	पूर्व	दक्षि	पश्चिमोत्तर	
१	२	३	४	५	६	७	८	९	१०	११	१२	सौख्यं	क्लेशः	भीति	द्रव्याप्तिः
२	३	४	५	६	७	८	९	१०	११	१२	१	मृत्युं	नैस्स्व्यं	निःस्वता	मित्रता
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्यं	क्लेशः	दुःखं	मिष्टान्नं
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभः	सौख्यं	मंगलं	द्रव्यलाभः
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभः	द्रव्याप्तिः	धनं	सौख्यं
६	७	८	९	१०	११	१२	१	२	३	४	५	भीतिः	लाभः	मृत्युः	द्रव्याप्तिः
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभः	कष्टं	लाभः	दुःखं
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्टं	सौख्यं	क्लेशो लाभः	सौख्यं
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्यं	लाभः	सिद्धिः	कष्टं
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेशः	कष्टं	द्रव्यं	धनं
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्युः	लाभः	द्रव्यनाशः	मृत्युं
१२	१	२	३	४	५	६	७	८	९	१०	११	मृत्युं	सौख्यं	मृत्युः	कष्टं

मु.ची.
या.प्र.
९

नष्टा भक्तावशिष्टा सती प्रथमे स्थाने विद्यते शून्ये सति अतिदुःखी यात्राकर्ता स्यात् मध्ये द्वितीयस्थाने विद्यते सति मृत्युर्म
रणं स्यात् स्थानत्रये कयुक्तं कयुते सौख्यं तृतीये भवेत् उक्तं च दैवज्ञमनोहरे चंडेश्वरेण तिथिवारं च नक्षत्रं संयुक्तं स्थाप
येत्त्रिधा द्रुमेभाग्रामे सप्तशाखाद्विर्गुणं चाद्यत्वाथ तद्युतैः भाजितं चाष्टमुनिभिः तथाद्विगुणपावकैः आदिशून्ये भवेत्पीडा मध्य
शून्ये महद्भयं अंत्यशून्ये भवेद्धानिः सर्वशून्ये न जीवति सर्वांकविज्ञयो राज्ञो धनलाभो भवेदिति द्विगुणपावकाः ष
ट् ननु ग्रंथकर्त्रा स्थानत्रये शून्ययुक्तिफलाभिधानं कस्मान्न कारीति चेत् सत्यं असंभवादेव नोक्तमिति वयं ब्रू
मः अनेकधा हि तिथिवारनक्षत्रयुतौ कल्पितायां यथा कथंचित्स्थानद्वये शून्ययोगो भवति न कदाचित्स्थान
त्रये इति चंडेश्वरस्य कस्याशय इति चेत् सत्यं यद्यपि सर्वप्रकारे वस्तुगतं बहुत्वमाह तथाप्यत्र संभवादेकत्वव्यति
रिक्तसंख्यापरस्तथा सति स्थानद्वये शून्ययुक्तिमृत्युरित्यर्थः अत्र वा सर्वांकधूर्वा केयात्राकर्तुर्नेष्टत्र संयोज्य
मित्याहुः तद्वाक्यं अष्टदाक्षिणात्यप्रसिद्धान् किंच तादोषान् वक्तुमस्तावदाउलभ्रमणाख्यो दोषो प्रामाणिकाक्त्या
साह रवेर्भतो ब्जभोन्मितिं नगावशेषिता द्वग्गा महाउलो न शस्यते त्रिषष्टिमिता भ्रमो भवेत् सूर्यनक्षत्रादब्जभ
स्य चंद्रनक्षत्रस्योन्मितिर्गणना कार्या सा नगैः सप्तभिः शेषिता सती द्वग्गा द्विशेषमिता सप्तशेषमिता वा भवे
त् तदा महाउलादोषः स्यात् स न शस्यते प्रशस्तो न भवेत् प्रागुक्तप्रकारेण यदि त्रिषष्टिमिता त्रिशेषमिता षट्शे
षमिता वा स्यात्तदा भ्रमो भ्रमणाख्यो दोषः स्यात् सोपि न शस्यते एतन्निर्मूलं ऋषिवाक्याभावात् तथापि पीयूष
मवाक्यमेतत् सूर्यभाद्गणयेच्चांद्रं सप्तभिर्भागमाहरेत् एकं पंच च चत्वारि आउलो नास्ति निश्चयात् त्रिषट्के भ्र
मणं शेषे द्वौ सप्त स्यान्महाउलः इति तत्र भ्रमणाख्यं दोषं तु यात्रायामेव त्यजंति आउले बहूनि शुभकर्माणि त्यजं
ति आउलस्य यत्रायं त्र हलप्रवाहः समरे चौर्ये च संधौ तथा कूपारामतडागबंधनविधौ दोषान्न तस्य क्वचिदिति अथ
हिंबरांख्यदोषमुपजातिकयाह शशांकभं सूर्यभतोत्र गण्यं पक्षादितिथ्या दिनवासरेण युतं नवाप्तं नगशेषकं चे
त्स्याद्धिंबरं चेन्न मनेति शस्तं सूर्यनक्षत्राच्चंद्रनक्षत्रं गण्यं पक्षादितिथ्या दिनवासरेण पक्षस्य शुक्लकृष्णस्य वा आदिः

राम.
९

प्रतिपत् तस्याः सकाशाद्गतेमानायाः तिथ्यायुतां दिनवासरेण युक्त्वा राशिनाच युतं नन्नवभिराप्तं भक्तं नगशेषकं सप्तशे
षकं चेत् तदहिं बराख्यं तडिवरं गमने निशस्तं स्यात् उक्तं च सूर्यभाद्गण्येच्चांद्रं पक्षादि तिथिवारयुक् नवभक्ते सप्तशे
षहिं बराख्यं तत्र कीर्तितमिति तदेतन्निर्मूलं अथ घातचंद्राख्यं दोषं शालिन्याह भूपंचांकदंग दिग्वह्निसप्त वेदाष्टेशा
कीशबाणाख्यचंद्रः भूपादीनां राजसेवा विवादे वर्ज्यो युद्धादौ न नान्यत्र वर्ज्यः मेषादीनां राशीनां भूपंचेत्यादिको
घाताख्यचंद्रो ज्ञेयः यथा मेषस्य प्रथमो मेष एव वृषस्य पंचमः कन्या मिथुनस्य नवमः कुंभः कर्कस्य द्वितीयः
सिंहः सिंहस्य षष्ठो मकरः कन्याया दशमी मिथुनं तुलायास्तृतीयो धनुः वृश्चिकस्य सप्तमो वृषः धनुषः चतु
र्थो मीनः मकरस्याष्टमः सिंहः कुंभस्यैकादशो धनुः मीनस्य द्वादशः कुंभो घातचंद्राख्यो ज्ञेय इत्यर्थः सघातचं
द्रो राजसेवायां विवादे प्रतिवादिना सह ‾ कर्कटके विद्यासंबंधिनि वा विवादे युद्धादिषूद्देनगयादिषु वर्ज्यः अ
न्यत्र विवाहान्नप्राशनादि मंगलकृत्ये न वर्ज्यः उक्तं च अजाज्जन्मधीधर्मविन्नारिखत्रिस्मरांबुष्टलाभांत्यगो घातचं
द्रः नृपद्वारयात्रा विरोधागमादौ विचिंत्यो विवाहादिके नैव चिंत्य इति अन्यत्रापि भूपंचनंदाय मषड्दिशाष्ट
वह्निद्विवेदावसु रुद्रसूर्याः मेषादिकानां क्रमशो भवंति यात्रासु युद्धेषु च घातचंद्रः युद्धे चैव विवादे च कुमारी
पूजनेन तथा राजसेवावाहनादौ घातचंद्रं विवर्जयेत् तीर्थयात्राविवाहान्नप्राशनोपनयादिषु मांगल्यसर्वका
र्येषु घातचंद्रं विवर्जयेदिति अत्र मदीयं घातचंद्रपद्यं इदं मेषकन्याघटहरिनक्रयुग्मधनुर्वृषाः मीनसिंहध्व
कुंभान्घातचंद्रान्प्रजादितइति अत्र गणनाभावादर्थेतावं मूलपद्येत अमुकस्मादमुकसंख्याक इति गणनायाः
कदाचिद्भ्रमसद्भावाच्च गौरवमिति एतदपि निर्मूलं अथ घाततिथीरुपजातिकयाह गोस्त्रीऊषघाततिथिस्तु
पूर्णा भद्रा नृयुक्कर्कटे नंदा. कौर्पाजयोर्नक्रघटे च रिक्ता जयाधनुःकुंभहरीनशस्ताः गोर्वृषः स्त्री कन्या ऊषो
मीनः एतद्राशिमतिनरेपूर्णा तिथिः पंचमीदशमीपंचदशीच घाततिथिः नृयुक् मिथुनं कर्कटकः प्रसिद्धः
अनयोर्भद्रा द्वितीयासप्तमीद्वादशीच घाततिथिः अथ कौर्पि वृश्चिकः अजो मेषः तयोर्नंदा प्रतिपत्षष्ठ्येका

मु.दी.
या.प्र.
२२

दशीचघाततिथिः नक्रघटे मकरतुलयो रिक्ताचतुर्थीनवमीचतुर्दशीच धनुःकुंभसिंहानां तथा तृतीयाष्टमीत्रयो
दशीचघाततिथिः एताघाततिथयोयात्रायांनशस्ताः तदुक्तं भूपालवल्लभे अथघातवारानुमालिन्याह नक्रेभौमो
गोहरित्रीषुचंद्रश्चंद्रोद्वंद्वेकौलिमेज्ञश्चकर्के शुक्रःकोदंडालिमीनेषुकुंभस्तुकेजीवोघातवारायात्रायांनशस्ताः उक्तं
च एतदपिनिर्मूलं अथघातनक्षत्राण्यनुष्टुभाह मघाकरस्वातिमैत्रमूलश्रुत्यंबुपांत्यभं याम्यब्राह्मेशसार्पंचमेषा
देर्घातभंनसत् मेषादिराशीनांक्रमेणघातभमिदंस्यात् यथामेषस्यमघा वृषस्यहस्तः मिथुनस्यस्वाती कर्क
स्यानुराधा सिंहस्यमूलं कन्यायाःश्रवणः तुलायाःशततभं वृश्चिकस्यरेवती धनुषोभरणी मकरस्यरोहिणी
कुंभस्यार्द्रा मीनस्याश्लेषा घातनक्षत्रमित्यर्थः तद्यात्रायांसत् शोभनंनकिंतुदोषदमित्यर्थः उक्तंच मघार्कस्वाति
मैत्राणिमूलंश्रवणवारुणे रेवतीयाम्यधात्रीशसार्पमेषादिघृत्यवेदुनि क्वचिद्धात्रभिसार्पमितिपाठस्तत्राग्निः
कृत्तिकानक्षत्रं कुंभस्यघातभं तदायाम्यब्राह्माग्निसार्पंचेतिकल्प्यमिति तदेतेदोषादाक्षिणात्यप्रसिद्धानिर्मूलाः
अथयोगिनीदोषंस्कंदमाह नवभूम्यःशिववह्नयोक्षविश्वे ९ १३ केकृताः २२ ४ शक्ररसाः १४ ६ तुरंगतिथ्यः
७ १५ द्विदिशा २ १० मावसव ३० ८ श्वपूर्वतःस्युस्तिथयःसंमुखवामगानशस्ताः एतास्तिथयःपूर्वतः पूर्वादि
शमारभ्यत्यज्ञोपेपंचमी पूर्वादिनोष्टदिक्षुज्ञेयाः यथापूर्वस्यांनवभूम्यः नवमीप्रतिपच्च आग्नेय्यांशिववह्नयः
एकादशीतृतीयाच दक्षिणस्यामक्षविश्वे पंचमीत्रयोदशीच नैरृत्यामर्ककृता द्वादशीचतुर्थीच पश्चिमायां
शक्ररसाः षष्ठीचतुर्दशीच वायव्यांतुरंगतिथ्यः सप्तमीपूर्णिमाच उत्तरस्यांद्विदिशा द्वितीयादशमीच ऐशा
न्याममावसवः अमावस्याष्टमीच एतास्तिथयस्तत्तद्दिक्षुयोगिन्याख्याइतिजीर्णाः तास्तिथयःसंमुखवामगा
नशस्ताः यथाप्राच्यांगंतुः प्रतिपत्संमुखी दक्षिणस्यांगंतुर्वामा पश्चिमायांगंतुःपृष्ठगा उत्तरस्यांगंतुःदक्षिणा
एवंसर्वासुदिक्षुसर्वास्तिथयोविचार्यास्तत्रसंमुखावामगाश्चतिथयोनशुभाः अथोदक्षिणाः पृष्ठगाःचति राम.
थयःशुभाः उक्तंचस्वरोदये पूर्वस्यामुदयेब्राह्मीप्रथमेतिथौ माहेश्वरीचोत्तरस्यांतुद्वितीयादशमीतिथौ एकाद २२

प्रथमा तृतीयायां कौमारी वह्निकोणगा चतुर्थी द्वादशी प्रोक्ता वैष्णवी नैरृती तथा वाराही दक्षिणे भागे पंचमी च
त्रयोदशी षष्ठी चतुर्दशी चैव इंद्राणी पश्चिमे तथा पूर्णिमायां च सप्तम्यां वायव्यं चंडिकादयः नष्टचंद्रदिनाष्टम्यो
महालक्ष्मी शिवालये इति नष्टचंद्रदिनममावस्या विजयकल्पलतायां पृष्ठतो दक्षिणे वापि योगिनी गमने हि
ता वामसंमुखे योगिन्यौ वामपुमेवं विचिंतयेत् समरसारे, अर्धप्रहरयोगिन्यप्युक्ता यथा प्राक् सोमानलरक्षोवा
युकाशीशेशादिक्षु दर्शान्ते तिथिषु भिन्नतिथिपदतोऽर्धप्रहरैरिव नवतयोगिनीशस्तेति अस्यार्थः इं[illegible] समीरो वायुः
अत्र पूर्वार्धेन योगिन्युक्ता उत्तरार्धेनार्धप्रहरयोगिन्युच्यते तिथिपदत इत्यादिना पदं स्थानं स्थितिः यानि तिथिर्य
स्यां दिशि प्रागुक्तक्रमेणावस्थिता तद्दिशा तस्य तिथिप्रारंभादर्धप्रहरैस्तामेव तिथिमारभ्य सर्वयोगिन्यस्तेनैव
क्रमेण तत्तिथि मध्ये वा रव्युदये भ्रमंति यथा द्वितीयोत्तरस्यां योगिनीनां षोडशधा विभक्य प्रथमो विभागो द्वितीया
या एवोत्तरस्यामर्धप्रहरयोगिनीसंज्ञः द्वितीयो विभाग आग्नेय्यां तृतीयाया अर्धप्रहरयोगिनीसंज्ञेत्यादि
माः सर्वविभागा अर्धप्रहरयोगिनीसंज्ञा इत्यर्थः उक्तं च स्वरोदये यत्रोदयगता देवी ततो यामार्धभुक्तिगा भ्रमं
तीतेन मार्गेण भवेत्तत्कालयोगिनीति उदयः स्थानं देवी योगिनी विजयकल्पलतायामपि यत्रैवोदयं याति
ति भ्रमंत्येवं तिथिभ्रमात् ततो यामार्धभुक्त्यैव योगिन्यः स्वष्टकालिका इति नवतयोगिनीशस्तेतिस्पष्टार्थं
स्वरोदये तु वारयोगिन्यप्युक्ता इंद्रचंद्राग्निनैरृत्ययाम्यतोयानिले स्त्र्यादिषु च वारेषु वर्जयेद्वारयोगिनीमि
ति फलमपि स्वरोदय एव जयदा पृष्ठदक्षस्था भंगदा वामसंमुखी त्रिविधं योगिनीचक्रमित्युक्तं ब्रह्मयामल इति त्रिवि
धत्वं तु तिथियोगिन्यर्द्धप्रहरयोगिनीवारयोगिनीभेदतः अथ कालपाशाख्यो योगो शास्तिन्याह कौबेरीतो वै
परीत्येन कालो वारे अर्कादौ संमुखे तत्पाशः यात्रायुद्धे संमुखवर्जनीयावेतौ राज्ञो व्यसलसंज्ञौ तु चिंत्यौ कुबेरो देव
तायस्याः सा स्यादेव तत्त्यण् आदिवृद्धिः अणंतत्वात् ङीप् कौबेरी उत्तरादिक् ततः स्यब्लोपे पंचमी उत्तरां दिशमारभ्या
द्यवारे दिवसे वैपरीत्येन दिक्क्रान्तिलोमेन संहारमार्गेण यस्यां दिशि वारे पाशस्तिथिस्तस्यां दिशि कालः स्यात् य

मुहू
या प्र·
२२

थारविवारे उत्तरस्यां कालः स्यात् सोमे वायव्यां भौमे पश्चिमायां बुधे नैरृत्यां गुरौ दक्षिणस्यां शुक्रे आग्नेय्यां शनौ पू
र्वस्यामित्यर्थः अयमर्थः स्पष्टार्थस्तसारे रवावुत्तरतः कालः सोमे वायव्यभागके भौमे तु पश्चिमे भागे बुधे नैरृत्यकोण
के जीवे च याम्यदिग्भागे शुक्रे वाग्नेयकोणके जीवे च याम्यदिग्भागे शुक्रे वाग्नेयकोणके शनौ तु पूर्वदिग्भागे का
लचक्रं प्रकीर्तितमिति अथ पाशयोगः उच्यते तस्य कालस्य संमुखे संमुखे दिशि काल दिशातः पंचमदिशि तस्य का
लस्य पाशो गलके तेन स्थः स्यात् यथा रविवारे दक्षिणस्यां पाशः सोमे आग्नेय्यां भौमे पूर्वस्यां बुधे ऐशान्यां गुरावुत्त
रस्यां शुक्रे वायव्यां शनौ पश्चिमायामित्यर्थः अथ फलमुच्यते यात्रायामर्थयायायां युद्धे युद्धयात्रायां समाहारद्वंद्वः
तयोर्यात्रायुद्धयोः उपस्थितयोः सतोः तौ कालपाशौ शुभौ तत्रापि कालो दक्षिणभागस्थ एव शुभः पाशो वामभागस्थ
एव शुभ इत्यनुक्तोपि विशेषो ज्ञेयः उक्तं च स्वरोदये वारोद्भः पूर्वदिग्भागे सतः सव्येन मंदगः यत्रस्थः तत्र कालः स्यात्या
शस्तस्य तु संमुखः दक्षिणस्थः शुभः कालः पाशो वामदिगाश्रयः यात्रायां समरे श्रेष्ठ स्ततोन्यत्र न शोभन इति स
व्येन प्रदक्षिणमार्गेण मंदगः शनैश्चरः अन्यत्र संमुखपृष्ठगयोः अयं कालपाशविचारो दिवैव रात्रौ विशेष उच्य
ते तु विशेषे एतौ कालपाशौ तु रात्रौ व्यस्त संज्ञकौ विपरीतनामकौ चिंत्यौ ज्ञेयौ दिवा यस्यां दिशि कालस्तस्यां दिशि
रात्रौ पाशः दिवा यस्यां दिशि पाशः तस्यां दिशि रात्रौ कालः यथा रविवासरे दक्षिणस्यां काल उत्तरस्यां पाश एवं सर्वे
वारेष्वित्यर्थः उक्तं च सौम्यादौ वाममार्गेण रचितः कालसंस्थितिः तत्संमुखे भवेत्पाशो रात्रौ ज्ञेया विलोमत इति सौम्यादेव
ताथ स्याः सा सौम्या दक्षिणेति देवतार्थे ग्रहण लिनासादिवृद्धिः यणि यस्येति चेत्यलोपः सौमी उत्तरादिक् तदादौ सौम्यादौ
ननु वर्ग्रीत्वा विशेषाद्रात्रौ किं नामवैपरीत्येन व्यस्तत्वमिति चेत् उच्यते गंतव्य दक्षिण दिशि कालो दक्षिणभागस्थः शुभो
न नु वर्त्यां त्वा विशेषाद्रात्रौ किं नाम वैपरीत्येन नक्तं त्वमिति चेत् दक्षिणस्थः शुभः कालः पा
यथा भवेत्पाशो वामभागस्थः शुभो यथा स्यादित्येवमर्थ उक्तिरन्यथाशुभ इत्यर्थः दक्षिणस्थः शुभः कालः पा
शो वामदिगाश्रय इति वचनात् ननु कालपाशयोर्नाम वैपरीत्यं स्वरोदयस्थवाक्ये कुतो नोक्तमिति चेत्सत्यं साक्षा राम·
न्नोक्तं परंतु स्वरोदयकर्तुरभिप्रेतमस्तीत्यनुमीयते तथाहि यद्यपि तत्र साक्षान्नाहतो वा लक्षीवे दिवसवासरौ इति २२

कोशात् दशाहं शैवच मासे शैवं सपिंडेषु विधीयते इति धर्मप्रदीपोक्तेः अहःशब्दस्य रात्र्युपरतैव तथाप्याशुभ्रमिवर्तमा
नाह पुंसां यां निशि पक्षिणीत्यादिषु निशीतिपदेन पाठानादहःशब्दः सूर्यदर्शनपरिच्छेद्यकालवाचकोयं यथा सति तथे
हापि वा राहोः पूर्वदिग्भागस्तत्र वासरः पूर्वदिग्भागे इति वक्तव्ये अहःशब्दोपादानान्यथानुपपत्त्या अहःशब्दः सूर्य
दर्शनपरिच्छेद्यं कालमाह तेनाहनि दिवसे इत्येवं विचारो चिंत्या विति अथ कालपाशप्रसंगात् खंडराहुरुच्यते स्मा
भिः यथा स्वरोदये ऐंद्र्यां कृष्णतृतीयायां सप्तम्यां शूलिनो दिशि दशम्यां धनदाशायां वायव्यां भूतवासरे शुक्ल
पक्षे तु वारुण्यां च चतुर्थ्यां सप्तमे त्र्यसौ नैरृत्यां च तथाष्टम्यां एकादश्यां यमोकस्मि आग्नेये पंचदश्यां च मासे राहुर्व
येत् ति खंडरात्या भ्रमत्येवं खंडराहुस्तनोमन इति यमोकस्मि दक्षिणस्यां शूलिन ईशानस्य अतस्तस्यां दिशि त
तिथ्या राहुसद्भावान्न गंतव्यमिति वा कृपनान्य यार्थोः एतासु भद्रा तिथिषु भद्रामपहाय नैरृत्यां न्यस्यां दिशि संमुखे
न गंतव्यमिति खंडेति थिखंडे तिथ्यर्द्धे भद्राम हिते गमने गतिरित्यन्वयः त्वापि खंडरा श्रेष्ठाः प्रतीयते अथ स्स्कमा
र्द्धयामकाल उक्तः समरसारे हालानकामसखि यामदलेस्तु कालः सूर्याद्विमासरगतो युधिवर्ज्जनीयः भामप
मेट्लतियामदलानि भानुवारक्रमादपि नरः स्वहितार्थमुक्तमिति रवौ हाकारोपलक्षितोष्टमोर्द्धयामः ए
वं सोमे तृतीयः भौमे षष्ठः बुधे प्रथमः शनौ चतुर्थः शुक्रे सप्तमः पुनोद्वितीयायुरुर्वर्जनीयमिति पूर्वार्द्धस्या
र्थः उत्तरार्द्धं तु संहितिकार्द्धयामाउक्ताः समस्तशुभकर्मसुनिषिद्धाः ग्रंथकर्त्रापि विवाहप्रकरणे अभिहिताः
अर्द्धयामो नाम दिनस्य रात्रेर्वाष्टमो भाग इति अथार्द्धयामपाहुः पुनः स्वरोदये चंद्रवत्सुयमे रुद्र नायानिशा
पि भास्करे यामार्द्धपतितौ राहुर्भ्रमत्येवं दिगष्टक इति अयं यामार्द्धराहुर्भ्रमो दिवसे रात्रौ च तुल्यो ज्ञेयो विशेषा
नुक्तेः अथ तत्रैव मुहूर्तराहुरप्युक्तः ईशानयमवातेंद्ररक्षःसोमाग्निवारुणे पूर्वाह्णेपि भ्रमत्येवमपराह्णेप्ययं क्रमः
तुला मिथुने मनेत्य शुक्रानिलयमहरे पूर्वरात्रे भ्रमत्येवापररात्रेप्ययं क्रमः दिनस्याष्टषोडशांशेन मुहूर्तः परिकीर्ति
तः एवं मौहूर्तिको राहुर्ज्ञातव्यः स्वरवेदिभिरिति दिनस्य त्रपलक्षणेण रात्रेरप्येवमेवाच मुहूर्तराहो चतुर्थेच तु थेरि

मु॰टी॰
या॰प्र॰
२३

दिग्गणेनोक्ता रात्रौ तु षट्षष्टिरिग्गणेनोक्ता यत्तु रामवाजपेयिभिः समरसमये ऽर्के प्राग्यातां कुंभपाशिकं तथा कु
पोलस्य रक्षो दिशो या माडुरे राहुरक्षिपाषि कऊँभासोषष्टषष्टी निशि षष्टेर दक्षिणतः शुभो द्विजदिकोसौ तुर्यतुर्यो
ब्रजन्नीशावाक्यवनेंद्र राक्षसहिमसत्यग्नि प्रतीचीर्दिश इति अत्र यामार्द्धराहो दिने प्राच्याः सकाशात् षट्षष्टि
गणेनोक्ता रात्रौ तु प्रतीच्याः सकाशात् तथैवोक्ता उत्तरार्द्धे मौहूर्तिकराहोस्तु दिनरात्रिविभागेनोक्तस्तदीकाहस्ता
भरतेन तथैव व्याकृतस्तु यथा अथ द्विजदिकोसौ मौहूर्तिको राहुः प्रातरारभ्य प्राप्नोति तस्य तथैव तुर्ये दिशि मुहूर्तेषु
हूर्तैर्या निदिनरात्र्योर्द्वात्रिंशन्मुहूर्ता अष्टदिशां चत्वारो भ्रमाः तत्र क्रमेण ऐशानी दक्षिण वायव्य पूर्व नैरृत्यो तराग्ने
य पश्चिमास्विति ननु एतन्निर्मूलं मूलवाक्यानुपलंभात् ननु कस्तर्हि तदुक्तावाशय इति चेत् उच्यते स्वरोदये हिमा
मार्द्धराहोः षट्षष्टिदिग्गणेनोक्ता सानुचितेत्यभिसंधाय स्वयं स्वपद्ये षट्षष्टिरिग्गणनामुररीकृत्य दिनरात्रिवि
भागेन यामार्द्धराहुरुक्तः मुहूर्तराहुस्तु ईशानतः चतुचतुर्थीदिग्विभागेन दिनरात्रिविभागमनादृत्योक्त इति अथैवं
विधे पाठे मूलांतरस्तु यं आर्षीणां तु स्वतंत्रेच्छादांपर्यनुयोगानर्हत्वात् स्वरोदय एव मुक्तिः एतादृशः स्थूलः सूक्ष्मो वा
राहुः कस्यां दिशि शुभो ऽशुभो वेति स्वरोदय एवाभिहितं संमुखो वामसेस्थो वायस्यैयं राहुर्मंडली पराजयो भवेत् स वा
दधूतरणे दिशु यस्य दक्षिणपृष्ठस्थो ह्येषा राहुपरंपरा सहस्रं मनुतेनापि परे सैन्यं निहंततीति समरसमयेपि पृष्टेद
क्षे योगिनी राहुयुक्ता यस्यैकाये शत्रुलक्षं निहंति श्रेष्ठं सर्वेभ्यो बलेभ्यस्तदेव संदेपायं सर्वसारोऽभ्यधायीति ननु यो
गिनीकालपाशवारयोगिनीमृतपक्षखंडराहुरादिभिः स्थूलैर्दीर्घैर्यामराहादिभिः सूक्ष्मैश्च स्वरोदयस्थैः तथा
संहितिकेष्वायनस्थूलनिषिद्धमासवारस्थूलनक्षत्रनिषिद्धनक्षत्रपारिघदंडमृतपक्षादिभिश्च दोषैर्यात्रा दिनानु
न्मेषवर्षं तथाहि रवौ पूर्वस्यां वारयोगिनी दक्षिणस्यां पाशो दिवारात्रौ तु कालः पश्चिमायां वारस्थूले उत्तरस्यां का
लो दिवारात्रौ तु पाशः विदिशास्तु महादिग्गंतर्गता एव प्राग्दक्षिणं पंचैव मा शा विषूर्वी इति श्रीपत्युक्तेः एवं सति विवा
रे कस्यामपि दिशि यात्रा न स्यादन्येषु न दीर्घामृतपक्षादयो विचारणीया एवं सति एवं सोमवारादिष्वपि यथासंभ

राम॰
२३

वंदोषानुहतीयाइति प्रागुक्तदोषावज्ञायितः अत्र समाधिः अयं सर्वोपि स्वरोदयस्थो शतपदयोगिनीकालपाशादि
स्थूलसूक्ष्मदोषविचारो युद्धयात्रायामेव बहुधा विचार्यः प्रकरणस्यापि नियामकत्वात् तथाहि सर्वेष्वपि स्वरोदयग्रं
थेषु नरपतिजयचर्यायां तेसां चावयुद्धं विनान संभवति अत एव स्वरोदयबले प्रोक्तं पृष्ठेरपि नयोडव्यं यावद्धीनः स्व
रोदयः स्वरोदयबले प्राप्ते योडव्यं शास्त्रकोटिभिरिति तथा चतुरशीतिचक्रांतिप्युक्तं एतानि सर्वचक्राणि ज्ञात्वा युद्धस
मारभेत् जयेदिह न संदेहः शक्रतुल्योपि वैरिणीति तथा स्वपबले प्युक्तं इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे अ
रयस्तस्य नश्यंति मेघावातहतायथेति एवं सति सर्वतोभद्रकालदंष्ट्रासूर्यचंद्रराहुकालानलाचक्राणि युद्ध एव वि
चार्याणि यथासंभवमन्येष्वपि शुभकृत्येषु विचार्याणि उक्तंचनरेव लाभं लाभसुखं दुःखं जयं चैव पराजयं चंद्रका
लानले चक्रे ज्ञात्वा संशयवर्जितमिति तथा यात्राजन्मविवाहेषु संग्रामे विग्रहेपि च घोरकालानलेचक्रं ज्ञात्वा
कर्म समारभेदिति अथ सामान्ययात्रायां आवश्यकानावश्यकवशेन यथासंभवं साहितिकदोषहानिर्वि
चार्या अन्यथा सर्वेषां स्वरोदयस्थानां साहितानां च स्थूलसूक्ष्मदोषाणां त्यागो वर्षसहस्रेणापि दुःशक्यः स्यात्
तत्रापि गुणानां भूयस्त्वं दोषाणां चाल्पत्वमंगीकृत्य निखिलकार्यनिर्वाहः श्रीपतिना समस्तगुणसंपदां नव
नुलब्धिरस्ति रहिते गुणप्रचुरता तेनाबहुमता च दोषाल्पता न भूरिगुणसंचये प्रभवतीह दोषाल्पको म्बुदर्चि
षि कृताशने सलिलबिंदुरेकोयथेति तत्रापि महादोषः पापग्रहवेधयुतिकर्तरी महापातादिस्तु तदा वशुष्कके
वर्जयेव यदि तत्समः प्रतीकारकारको गुणो न भवेत् उभयसंभवे हि प्रबलदुर्बलविचारः कार्यः तदप्युक्तं श्री
पतिना प्रकोपि हंति गुणलक्षमपीह दोषः कश्चित्प्रोयदि गुणोस्ति न तद्विरोधी मद्यस्थबिंदुरपि पावनपंच
गव्यं संपूर्णमित्रकलशं मलिनीकरोतीत्यास्तां प्रसक्तानुप्रसक्तं अथ पारिघदंडाख्यं दोषमत्रसूचमाह भानि
स्याप्यानि अभिजिदित्य सप्तसप्तानलर्क्षतः वायव्याग्नेयदिक्संस्थं पारिघं तन्न लंघयेत् अभिजिदित्य चतुर्दिक्षु अनल
र्क्षतः कृत्तिकातः सप्तभानि पूर्वसंस्थाप्याप्यानि मघातः सप्तभानि दक्षिणसंस्थाप्याप्यानि अनुराधातः सप्तभानि

ऐ कृ रो मृ आ पु पु आ
पू
श्री
ह
उ
म्
प
रे
स्व
शे
ध
वा
मम
पू
उ
ह
चि
स्वा
वि
नी
परिघदंडः
३
अ अ उ पू म ओ अ

पश्चिमायां स्थाप्यानि धनिष्ठातः सप्त भान्युत्तरस्यां स्थाप्यानि तत्र वायव्याग्नेय
दिग्गतनिबद्धा रेखा परिघदंडः स्यात्तं सर्वथा न विलंघयेत् चक्राकृतिरियं यदाह स्मा
रदः क्रमाद्दिग्द्वारभानि स्युः सप्त सप्ताग्निभाद्दतः परिघं लंघयेद्दंडं नाग्निसप्तमनदिग्ग
तमिति कश्यपोपि अग्निधिष्ण्यात्सप्त सप्त क्रमाद्धिष्ण्यानि पूर्वतः वाय्वग्निदिग्गतं
दंडं परिघं तं न लंघयेत् ननु प्रागादिदिक्षु न्यस्तानां नक्षत्राणां प्रयोजनं किं नोक्तं पारि
घदंडाख्यानार्थं त्वेतद्धनिष्ठादिचतुर्दश भानि वायव्याग्नेयदिग्रेखापूर्वभागे स्थाप्यानि
मघादिचतुर्दश भानि तयोरेव दिशोः पश्चिमविभागे स्थाप्यानि इत्येवमर्थकपद्योपनिबंधनेन स्यात् उच्यते स्पष्टत्वा
न्नोक्तं तथा हि प्राग्द्वारिकैः कृत्तिकादिसप्तनक्षत्रैः पूर्वस्यां यात्रा प्रशस्ततमा एवं दक्षिणस्यां मघादिसप्तभैः पश्चिमाया
मनुराधादिसप्तभिरुत्तरस्यां धनिष्ठादिसप्तभिः अयमर्थो यात्राप्रकरणे क्रमाद्दिग्द्वारभानि स्युरिति नारदवचनेन
युक्तो लभ्यते किंच विविधप्रतिष्ठाविचारेपि दिग्द्वारभानामुपयोगोस्ति यदाहात्रिः यद्दिग्गतः प्रमुदयोडि चेद्युग्रगोल
के यद्द्वारभेषु विचरेत्त्रिविधं प्रतिमागवमिति श्रीपतिरपि विचरति च भवक्रे येषु दिग्द्वारभेषु इति अन्यच्च गृहप्रवेशप्राग्
वीदिदिग्द्वारेषु गृहेषु तत्तद्दिग्द्वारैः प्रवेशः प्रोक्तः तदुक्तं वसिष्ठेन यद्दिग्द्वारं मंदिरं तद्दिगृक्षैः स्यात्तन्निवेशानस
वैरित्यादीनि प्रयोजनानि ध्येयानि तत्र प्रस्तुते परिघदंडोक्तेरेवं यज्ञाग्नेर्यात् धनिष्ठादिचतुर्दशभानि प्रागुत्तरदिशो
र्यात्रायां प्रशस्तानि यथा मघादिसप्तभानि पश्चिमायां अनुराधादिसप्तभानि दक्षिणस्यां प्रशस्तानीत्यर्थः अत एवा
ह गर्गादित्यः प्राग्दिग्भैरुदग्दिग्गतैः प्राग्दिग्भवैरुत्तरैः दक्षिणगैरपरां दिशमपरगैर्दक्षिणां यायाद्दिशि भानि
प्रायोमेषा यान्ति नक्षत्राणि कृत्तिकादीनि यवनेश्वरोपि प्राचीमुदग्द्वारिभिरुत्तरयात्रा प्राग्द्वारभैः चोडुभिरपरां दिशं तथैव
वयाम्यामपराश्रितैर्भैर्यायान्याश्रयैश्चाप्यपरां प्रयायादिति एतेन नो गर्गकृ उत्तराद्याश्रितदक्षिणपतिक उत्तरैर्नयाम्यां प्रतीच्यामि
निवदन्महेश्वरः प्रत्याख्यातो भवति मूलवाक्यानुपलंभात् किंतु सर्वथा प्राग्दक्षिणोत्तरैर्दक्षिणपश्चिमां च नेवगा

च्छेत् तथा दक्षिणपश्चिमनक्षत्रैः प्राचीमुदीचीं चैवैव गच्छेत् परिघदंडसत्वात् यदाह ह यात्रायां वराहः दिशि दिशि च
हुताशास्तारकाः सप्त रेखाः पवनदहनदिक्स्थः तिर्यगत्र परिघदंडः स्पृशति न परिघं यानि तं लंघयित्वा न हि भवति विरो
धो दिक्षु दंडैकगास्विति अथ कस्यचिद्दिग्गमनं चिकीर्षितं नक्षत्राश्च स्थग्रहोपदेशभावास्तु विदिक्षु आग्नेयादिषु कोणे
नक्षत्रे गमनं स्यादित्याशंक्य विदिक्षु नक्षत्राणि आवश्यकत्वे परिघदंडापवादं च वसंततिलकयाह अग्नेर्दिशं नृप इयात्पु
रुहूतदिग्भैरेवं प्रदक्षिणमतो विदिशोऽथ कृत्वा आवश्यकेऽपि परिघं परिलंघ्य गच्छेच्छूलं विहाय यदि दिक्तनुशुद्धिरस्ति
नृपः पुरुहूतदिक् प्राचीस्थैः कृत्तिकादिसप्तनक्षत्रैरग्नेर्दिशमाग्नेयीमियाद्गच्छेत् एवमनेन प्रकारेण प्रदक्षिणगतान्
पि मार्गेण स्थिता विदिशोऽनैर्ऋत्यादीर्गच्छेत् यथा दक्षिणदिक्स्थैर्मघादिसप्तभिर्नैर्ऋतीं दिशं गच्छेत् प्रतीचीस्थैरनु
राधादिसप्तभिर्वायव्यां गच्छेत् उदीचीस्थैर्धनिष्ठादिसप्तभिरैशानीं गच्छेत् यदाह नारदः आग्नेयीं पूर्वदिक्संस्थैर्वि
दिशास्त्वेवमेव मेव हि अस्यार्थं स्पष्टमाह गुरुः प्राग्द्वारिकैश्च नक्षत्रैराग्नेय्यां शुभना गतिः दक्षिणस्थैश्च नैर्ऋत्यां वा
यव्यां च वारुणैरपि ऐशान्यां दिक्षूदक्संस्थैर्यात्रातीव शुभप्रदेति अथ परिघदंडापवादमुच्यते अथैतस्यावश्यके कार्ये
अवश्यकर्तव्ये गमनादिके तत्परिघमपि परिघदंडमपि प्रविलंघ्य लंघयित्वा नृपो गच्छेत् परं तु शूलं वार शूलं नक्षत्रशू
लं विहाय त्यक्त्वा यदि दिक्तनुशुद्धिरपि स्यात् अस्तीति स्यादित्यर्थः अयं पूर्वो दिक्चतुर्दिक्षु मेषादयः त्रिश उक्ता दिग्राशयः
स्युस्तत एव तस्यां तस्यां दिशि दिग्लग्नशब्देन व्यवह्रियते तेषां शुद्धिः शुभफलदात्वग्रहानुकूल्यसाहित्यं स्यात् यदाह श्री
पतिः प्रयोजने चात्यधिके च भूपतिर्विलंघ्य रेखामपि पारिघीं व्रजेत् विहाय दिक्शूलमसाध्ययानं तु दिग्विदिग्लग्न
शुद्धिराप्यते इति उडुशब्देन वारोऽप्युपलक्ष्यते यतो वराहेण उक्तं परिघदंडमपि काममियान्नरेंद्रः शूलं विहाय यदि दि
स्थविलग्नशुद्धिरित्यत्र शूलं विहायेति सामान्येनाभिधानात् अत्र दिग्राशीनाह नारदः दिग्राशयः स्युः क्रमशो मे
षाद्याश्च पुनः पुनरिति फलमाह वसिष्ठः पूर्वादिदिक्षु मेषाद्याः क्रमाद्द्विर्द्वादश राशयः सर्वे तद्दिग्यातुः शुभप्रदास्त
द्विगोश्च तदंशाश्च तदीशाश्च तथाविधा इति अथानावश्यकत्वे परिघदंडापवादे चिकीर्षिते सार्वदिग्द्वारिकनक्ष

त्राणि वक्रिग्रहस्य केंद्रगतत्वादि निषेधं चेंद्रवज्रयाह मैत्रार्कपुष्याश्विनभैर्निरुक्ता यात्रा शुभा सर्वदिशासु तज्ज्ञैः॥ वक्रीय
हः केंद्रगतो मस्यवर्गो लग्ने दिनं वास्य गमे निषिद्धं॥ मैत्रमनुराधा॥ अर्को हस्तः॥ पुष्यः प्रसिद्धः॥ आश्विनमश्विनी॥ एतैश्चतुर्भि
र्भैर्नक्षत्रैः कृत्वा सर्वदिशासु प्राच्यादिसर्वदिक्षु तज्ज्ञैर्ज्योतिर्विद्भिः यात्रा गमनं शुभा शुभफलदा निरुक्ता॥ यदाह वसिष्ठः पु
ष्यार्काश्विनमैत्राणि सर्वदिग्द्वारभानि च सर्वदिक्षु प्रियायात्रायां सर्वकामार्थदानि चेति नारदः सर्वद्वाराणि मैत्रार्कज्याश्वि
नानि चेति गर्गोपि पुष्यो मैत्रे करेश्विन्यां सर्वाशागमनं शुभं आशाप्रदिशः श्रीपतिरपि हस्तः पुष्यो मैत्रमथाश्विनं च चत्वा
र्योडुः सर्वदिग्द्वारभानि इति यत्तु बालबोधिन्यां पूर्वाशाः शनिचंद्रगीष्पतिबुधादित्येषु स्वकेंद्रस्थे नागम्याः क्रमशः स्तथाप
रिहरेत्प्राचीचमूलं द्वयोः याम्यां च श्रवणादिषट्कं विधिभे पुष्यप्रतीचीत्यक्तो सौम्यां चोत्तरफाल्गुणीश्च वितिथ्याहस्तेनया
याद्बुध इति प्रागादिचतुर्दिक्षु श्रवणाश्विनपुष्यहस्तानां क्रमेण त्याग उक्तः स निर्मूलत्वादुपेक्ष्यः॥ किंच यद्येषामपि
निषेधो वसिष्ठादीनामभिमतः स्यात्तदा पुरुहूतदिशं पुरंदरर्क्षे इत्यादिनक्षत्रशूलपद्ये शूलनक्षत्रद्वयाभिधानं स
हृदेव कृतं स्यात् पश्चात्पुरुहूतदिशं पुरंदरर्क्षे इत्यादिनक्षत्रशूलपद्ये हि विलग्नप्रकेनैया याम्यदिशा वज्राद्विदास्य त
लनाद्य दिशं विधात्वचेषा शूलाख्यान्यथसौम्ययमार्के इति एवमेव नारदादीनामाप्रायो व्याख्येयः बालबोधिनीवद्वि
वेवाक्यं तु हरपालस्यैव अन्यच्च पुष्याद्यष्टभानां क्वचित्सार्वदिग्द्वारिकत्वं स्मर्यते यदाह गुरुः पुष्याश्विहस्तमैत्राणि
पौष्णवैष्णववसौम्यभं वासवं सर्वदिग्द्वाराश्च यात्रायां प्रगमनानि हीति वराहोपि सर्वद्वारिकसंज्ञानि गुरुभं हस्ताश्वि
मैत्राणि च श्रेष्ठानि ऐंद्रवपौष्णविष्णुवसुभान्याद्यैः सहाष्टौ सदेति तत्राष्टानामपि सार्वदिग्द्वारिकत्वं स्मर्यते न चतुर्णां
काकथा बहुमुनिवचनसंवादात् तत्र मृगरेवती श्रवणधनिष्ठानां सर्वद्वारिकत्वमावश्यकत्वे गमनेभ्यनुज्ञानार्थं
तत्र यदि पुष्यादीनि भानि दिग्विशेषेणत्यक्तानि तदा बहुदिक्त्वं स्यात् न सर्वदिक्त्वं ननु को विशेषः सर्वदिक्त्वबहुदिक्त्वे
याः उच्यते सर्वशब्दस्य शास्त्रवस्तुमात्रवचनः तत्र वस्तुसंग्रहं गृहीत्वैकस्यापपत्तिः सर्वः पदार्थ इति तस्यैव बहुत्वे सर्वौपदा
र्थौ विनिभवति सर्वे इत्यत्र वस्तुगतं संख्यागतं नाबहुत्वं सर्वशब्देनोच्यते तदेव वचसायोत्यते अत्र सर्वे इति बहुवचनेन

अत्र सर्वे इति बहुवचनेन त्रिचतुरादयः परार्ध्या उच्यंते नाधिकाः बहूनामंत्रयस्वेत्युक्ते चतुरादिशब्दानां संनिधाने त्र
य एव त्रिमंत्र्यंते किमत्र प्रमाणमिति चेदुक्तम् एव मीमांसायामेकादशेऽध्याये वसंताय कपिंजलानालभेतेति वैदिके
वाक्ये वाशिंते वसंताय वसंतदेवत्यर्थः क्राद् संतरूपं कपिंजलाः पक्षिविशेषाः तानालभेत हन्यात् तत्र कपिंजलानिति
बहुत्वं तावदवगम्यते तेन त्र्यादयः परार्ध्यावधिकाः कपिंजला द्वयो या वा चत्वारो वा पंच चेति विकल्पेनालब्धव्या उत
त्रय एवेति संशयः तत्रैवं पूर्वपक्षः कपिंजलानिति बहुवचनेन द्वित्वातिरिक्तसंख्यासामान्यरूपं बहुत्वाभिधायिना त
द्विशेषाकांक्षायां सत्यां परार्धातिरिक्तसंख्याविशेषाभावात् तत्पर्यंतत्र्यादिसंख्याविशेषा आक्षिप्यंते न च तत्र त्रयो
पि चत्वारोपि पंचापि हंतव्या इति समुच्चयपक्षः संभवति इति वाच्यं समुच्चये हि त्रिचतुष्पंचानां योगे द्वादशत्वस्फुरणे द्वादश
हंतव्या इति संख्यांतरमेव तत्र प्रतीयेत न त्र्यादयः न च कपिंजलत्वावच्छेदकावच्छिन्नाः कपिंजला हंतव्या इति वाच्यं
तथा सत्येकस्मिन्नेव योगे कृते जगतीतलवर्तिनां सर्वेषां कपिंजलानां विनाशप्रसंगः तस्माद्यथाप्राप्तानां त्रिच
तुरादीनां तेषामेव विकल्पेनालंभ इति तदुक्तं जैमिनिना पूर्वपक्षसूत्रेण बहुवद् बहुवचनेन सर्वप्राप्तेर्विकल्पः स्या
दिति सिद्धांतस्तु त्रयाणानायेनि बहूच्चारितस्य बहुवचनांतस्य शब्दस्य चतुरादिशब्दोपादानमंतरेण त्रित्वमात्रे वा
च्यं तावतैव बहुत्वोपपत्तेः अतिरिक्ते त्वपि च प्रमाणाभावः तस्मात्त्रय एव कपिंजला हिंस्याः उक्तं चैतज्जैमिनिना प्र
थमं वा नियम्येत कारणाद् अतिक्रमः स्यादिति सिद्धांतसूत्रेण अत एव बहुत्वं त्रित्वे पर्यवसन्नमिति लोकोक्तिः सा
धीयसी एवं प्रस्तुते पि दीयते दृष्टिः नन्वत्र प्रकृतिवाच्यमेकं बहुत्वं अपरं विभक्तिवाच्यं तेन सर्वशब्दसाम्यमिति चे
न्न प्रातिपदिकार्थेति सूत्रे वचनमात्रे प्रथमोक्तेः साधुत्वाख्यानार्थं बहव इत्यादौ प्रकृतिगतबहुत्वस्य ज्ञापकं बहु
वचनोत्पत्तिः बहुरोदन इत्यत्र बहुवचनं कस्मान्न भवति सत्यं नात्र बहुशब्देन संख्योच्यते किंतु वैपुल्यं तस्माद्बहुश
ब्देन त्रित्वसंख्योच्यते सर्वशब्देन तु चतुरादिका अपि अतोऽत्र महान्भेदः नन्वेवं पुष्पादीनां सर्वदिक्के समर्थिते सत्य
पि नैव सर्वदिक्कोपपत्तिः यावता वारम्भूलसह्नान द्विगुणं ना द्विकृयमेवावशिष्यते तेन बहुदिक्कमेवोपपद्यते उच्य

मु·टी·
या·प्र·
२८

नेष्टइति नेतावता भवदिष्टं सिध्यति प्राचीश्रवणशक्राभ्यां इत्यादिना नक्षत्रविशेषोदिग्विशेषत्यागइति यत्तोवारशूलेना
वमर्थउच्यते रविवारे पश्चिमा शूलं सोमे पूर्वेत्यादि अतो बहुदिक्कसर्वदिक्कप्रतिपादकयोरन्यतरस्य सर्वदिक्कवाक्य
स्य सबलत्वे निर्णीते तृतीयेन वारशूलेन सर्वदिक्कव्याहतं यद्यपि तथापि नियतबहुदिक्कवाक्यात् सबलमेव नहि
यथा वालिसुग्रीवयोः युध्यमानयो भगवता रामेण वालिनि हते वालिनः सुग्रीवापेक्षया दौर्बल्यं मन्यते शूराभि
मानिनइति किंच दक्षिणशंपाधनिष्ठोत्तराधीदिपंचकं त्याज्यमित्युक्तं तत्राश्विनीत्यागे धनिष्ठादिषट्कं त्याज्यमित्येवं कस्मा
न्नोक्तं नच प्रेतदाहतृणकाष्ठसंग्रहादि तिनिषेधार्थं तथाभिधानमिति वाच्यं वाक्यांतरेहि प्रतिपदमेव पंचकस्य
निषेधात् यद्गाहवसिष्ठः वसुभस्योत्तराधीश्च पंचधिष्ण्येषु सर्वदा याम्यादिग्यायिना नृणां नसुहृन्नोजयप्रदइति अ
न्यच्चापरे आहुः पश्चिमे पुष्यस्त्याज्य इत्युच्यते यथा श्रीपतिनात हस्तः पुष्यः इत्यादिना पुष्यस्य सर्वदिग्द्वारकत्वं
मुक्त्वा नक्षत्रप्रकरणे विहितो पुष्य शुभान्वितोपि विरुद्धतारोपि विलोमगोपि करोत्यवश्यं सकलार्थसिद्धिं विहाय पा
णिग्रहमेव पुष्य इत्युक्तं अत्र हि विलोमग इति पदं टीकाकृन्महादेवो विलोमगः प्रतीच्यादिगमनविरुद्धोपि तत्र शु
भइत्यप्याह मर्थं व्याख्यत् तस्यायमाशयः पुष्यो हि प्राचीनक्षत्रं तद्दक्षिणस्यां पश्चिमायां वा पारिघदंडसत्वाद्गमनप्र
तिबंधकत्वसद्भावोच्यते तत्र द्विविधं शुभं भवतीति न्यायात् पुष्योपि सर्वदिग्द्वारकएव यद्येवं हस्तोप्यपवादरूप
त्वात्कार्यः स्यात् तुल्यन्यायत्वात् एककर्तृके हि ग्रंथे एकेनैव वाक्येन सर्वदिग्द्वारत्वेसिद्धे पुनरस्यनाभिधानं
व्यर्थं स्यात् तस्मान्नैव शक्यं वक्तुम् अतः प्रागुक्तमेवोद्दुलकं स्यात् यद्येवं कर्हि विलोमग इत्यस्यार्थः केचिदाहुः वि
लोमं विपरीतं गच्छतीति विलोमगः यथा तेषां संक्षेपोयं प्रकृतेरन्यत्वमुत्पातइति वराहोक्ते यदोत्पातेन विलोमगा
मित्वं पुष्यस्य स्यात् तदापि न दोषः यथा भौमस्योष्णादि पंचविधं वक्रत्वमुक्तं तत्रोष्णवक्रे स्वस्वर्क्षोदयस्योदयर्क्षान्नव
मेष्टमे वा सप्तर्क्षे वा क्षितितनयप्रतीपे तद्वक्रमुष्णाख्यमेव तत्र वक्रे भयं व्याधिभयं जनानामिति वसिष्ठेन सूल राम·
क्षणमुक्तं नत्वेतादृशं चक्रं न कदाचित्तं भवति तथापि तदुत्पातवशाद्गणितविरुद्धापि वक्रगतिः स्यात् तदर्थं श्लो २८

पन्यासः एवं पुष्यस्य वक्रत्वमथालोच्यं एतद्व्याख्यानेन निर्मूलत्वादुपेक्ष्यं यथोक्तस्य वक्रस्यासंभवस्तथापि तच्चरणे
ष्टादशानंदे भौमचारे सम्यक्प्रत्यपादि अन्ये त्वाहुः विलोमगोपि विलोमग्रहाधिष्ठितोपि शुभः एकार्गलहतं धि
ष्ण्यं क्रूराक्रांतं च विद्धभं उत्पातदूषितं यत्र यात्रायां भंगदं सदेति वसिष्ठादिवाक्यात् क्रूरस्य वक्रिणो मार्गिणो वा योगाद्दुष्ट
एव अत एवाशुभान्वितोपि पुष्यः सकलार्थसिद्धिदाता तेनोक्तं अनेन तु सौम्यस्य गुर्वादेर्वक्रिणो योगेप्यशुभफलदाता
सुष्यो न भवेदिति तथाह नारदः पुष्यः परकृतं हंतुं शक्तस्तेनापि यत्कृतं दोषं परो न शक्तस्तु चंद्रेप्यष्टमगे सति क्रूरैर्विद्धोयु
तो वापि पुष्यो यदि बलान्वितः विना पाणिग्रहं सर्वमंगलेष्विष्टदः सदेति वसिष्ठादिवाक्यान्यप्येवमर्थकानि संति नक्ष
त्रापि विलोमगत्वमभिहितं सौम्यवक्रग्रहाधिष्ठितोश्विन्यादिभगणश्च तदाश्विन्यादेर्दोषवत्त्वाभवन्मते प्रसज्येत सा च
प्रसिद्धा अन्यच्च विलोमग्रहाधिष्ठितत्वं लक्षणया वा क्रियते मुख्यार्थासंभवे सा प्रयुक्ता अस्ति च मुख्यार्थसंभवो यदु
त्पातादिना नक्षत्रस्य वक्रत्वमिति अपरे पुनराहुः विलोम उत्पातास्तैः सह गच्छतीति विलोमगः त्रिविधोत्पातैर्यदि पुष्यो
निहतोपि तदापि शुभ इति तदपि न पुष्यस्त्रिविधोत्पातहतो दुष्ट एव यदाह वसिष्ठः मृगगणमध्ये सिंहो यद्वदुडुगणमध्ये त
थैव पुष्यस्त्रि निजबलसहितोप्येवं त्रिविधोत्पातैर्न शक्तिमान्निहत इति तस्माद्विलोमगत्वस्यार्थः चिंत्यः ननु नक्षत्र
विशेषे श्विन्यादौ विहितत्वप्रतिषिद्धाभ्यां विकल्पः कस्मान्न भवति षोडशिग्रहणाग्रहणवत् उच्यते तुल्यबलयोर्हि
वाक्ययोर्विकल्पः यथा षोडशिग्रहणाग्रहणयोः श्रुत्योस्तुल्यबलयोः यथा वा औदुंबर्याः सर्ववेष्टनस्पर्शनप्रतिपादिक
योः स्मृत्योः तत्र हि स्पर्शनस्मृतेः प्रत्यक्षश्रुतिरूपो वेदः प्रमाणमौदुंबरीं स्पृष्ट्वोद्गायेदिति सर्ववेष्टनस्मृतेस्तु मूलवेदानु
पलंभः एतच्च स्मृतिचरणे सम्यगुपपादितं वार्तिककृता एवमश्विन्यादिविषयकसार्वदिक्द्वारकप्रतिपादकस्य हल
पुष्यत्वस्य वाक्यस्य वसिष्ठादिमुनिवाक्यानि प्रमाणानि निषेधवाक्यस्य तु चिंत्यं मूलमित्यतुल्यबलत्वाद्विकल्पो न
संभवति तस्मान्मैत्रार्कपुष्याश्विनेतानां भानां सार्वदिग्द्वारिकत्वं प्रसिद्धं तत्र सर्वशब्दग्रहणाद्ग्रे दिक्शूलपरघादित्यादि
नावाविद्ध्वाग्रे यात्रादिष्वपि मैत्रादिभिर्यात्रोचितेति भावः यदाह वसिष्ठः सर्वस्मिन्नपि समये सर्वासु च दिक्षु दिक्ष्वेव

सार्वद्वारिकधिष्ण्यान्यतिशुभफलदानृण्यखिलानृणामिति अत्र सार्वद्वारिकधिष्ण्यानामेव सर्वकालगामित्वमुक्तं रत्न
मालायां तु श्रवणमृगपौष्णहस्तपुष्याणामुक्तं तच्च गुरूक्तसार्वदिग्द्वारिकत्वाभिप्रायेण अनुराधाश्विन्योस्तु सर्वमतेन स
र्वकालगामित्वं तस्य कालविशेषनिषेधेऽपि ग्रहाणामश्विनीरहितं ध्येयं मृदुग्रहणमनुराधारहितं ध्येयं गुरुमते रे
वतीरहितमपि स्थिरग्रहणं धनिष्ठाव्यतिरिक्तं गुरुमते एव द्रष्टव्यं एवमष्टानां सार्वदिग्द्वारिकत्वं सर्वकालगमनार्थं च
तुल्यं पुनर्मैत्रादीनां सर्वदिग्यात्रार्थमपि सार्वदिग्द्वारिकत्वमित्यलमतिप्रसंगेन वक्रीग्रह इति वक्रं विपरीतगमनं
ग्रहस्य भौमादेः स वक्रीग्रहः सोऽपि चेत्केंद्रगतः स्यात्तं गमे यात्रायां निषिद्धः अथवास्य वक्रिग्रहस्य लग्ने वर्गः षड्वर्गः चेत्स्या
त्तदापि भंगदः अथवास्य वक्रिग्रहस्य दिनं वारोऽपि स्यात्सोऽपि निषिद्धः यदाह वराहः एकोऽपि वक्रोपगतो नराणां शुभोऽशु
भो वापि चतुष्टयस्थः वर्गोऽपि वास्योदयगो विनाशं बहुप्रकारं कुरुते ध्रुवगानामिति श्रीपतिः नेष्टः चतुष्टये वक्री तद्वर्गो
ऽपि विलग्नगः करोति बहुधा नाशं तद्वारोऽपि यियासतामिति चतुष्टयं केंद्रं यत्तु वसिष्ठेनोक्तं एकोऽपि वक्रगः खेटो ल
ग्नस्थो वारिराशिगः नीचस्थो वा न दृष्टस्थो यात्राफलविनाशनः इति वारिराशिश्चतुर्थस्थानं नारदोऽपि विलोमगो
ग्रहो यस्य यात्रालग्नोपगो यदि तस्य भंगप्रदो राज्ञस्तद्वर्गोऽपि विलग्नग इति तद्वक्रिग्रहस्य लग्नादिस्थितत्वे दोषाधिक्यं सूच
यितुं तर्हि कस्य वारे गमनं कार्यमित्याह वसिष्ठः बलप्रदस्य खेटस्य वारवर्गः शुभप्रदः इतरग्रहवारादियात्रायामशु
भप्रदमिति अत्र केचित् नेष्टश्चतुष्टये वक्र इति पाठमाहुस्तत्र वक्रं मंगलमिति व्याचख्युः आरो वक्रः क्रूरदृक्काश्वेय
इति वराहोक्तेः तन्न वक्रमस्यास्तीति वक्रः अर्शआदित्वादच् वक्रीग्रह एवेत्यर्थः अत्रार्थे एकोऽपि वक्रगः खेट इति
विलोमगो ग्रहो यस्येति वसिष्ठनारदादिवाक्यान्यनुकूलानि वक्रीति पाठे चतुर्थीये इनिप्रत्यये सति वक्रीति
रूपसिद्धो भौमस्य गंधोऽपि नास्ति अथायनशुद्धिमिंदुवंशांकदसाह सौम्यायने सूर्ये विधुस्तदोत्तरां प्राचीं व्रजेत्तौ यदि द
क्षिणायने प्रत्यग्यमाशां च तयोर्दिवानिशं भिन्नायनत्वे यदि वधोऽन्यथा भवेत् यदि सूर्यचंद्रौ सौम्यायने उत्तरायणे गतौ
स्यातां तदोत्तरां दिशं प्राचीं वा व्रजेत् तन्मुखयात्रा शुभेत्यर्थः यदा तु दक्षिणायने स्यातां तदा प्रतीचीं दक्षिणां च व्रजेत् यदा

ह पराशरः चंद्रार्कौ दक्षिणगतौ याम्यायाम्यायनं प्रति सौम्यायनगतौ यायात्प्राचीं सौम्यां दिशं प्रतीति अथ तयोः सूर्या
चंद्रमसोर्भिन्नायनत्वे पुनर्भेदमाह दिवा निशं व्रजेत् यथा सूर्यो यस्मिन्नयने तां दिशमुत्तरां दक्षिणां दिवा दिवसे यायात्
यदा चंद्रो यस्मिन्नयने तां दिशमुत्तरां दक्षिणां वा निशि रात्रौ यायात् अत्रोत्तरस्याः पूर्वस्याश्च न भेदः दक्षिणस्याः पश्चिमा
याश्चेत्यपि ध्येयं अत्र हेतुमनिर्वक्ष्यते अथान्यथा चेत्कुर्यात्तदा वधो मरणं भवेत् यथा भिन्नायनत्वे सत्यपि सूर्यो यस्मि
न्नयने तां दिशं यदि रात्रौ गच्छेत् चंद्रश्च यस्मिन्नयने तदा दिवसे गच्छेत्तदा यातुर्वधो भवेदित्यर्थः यदाह वसिष्ठः याते
ऽपि हि दार्के ह्येकायनगयोस्तयोः भिन्नायनयोर्गतयोरह्नि निशि चेद्गन्तुः पथा वध इति नारदोपि रवींद्वयनयोर्यानम
नुकूलं शुभप्रदं तदभावे दिवारात्रौ यात्रा यातुर्वधोन्यथेति तदभावे एकायनत्वाभावे दिवारात्रौ यात्रागमनं स्यात् स
ष्टं व्याख्यानं प्रायस्तु ध्येयं तदुक्तं रत्नकोशे दिनकरकरप्रतप्तां मकरादावुत्तरां च पूर्वां च यायाच्च कर्कटाद्यौ याम्यपश्चिमां
प्रतीचीं चेति अतो विलोमयोर्यात्रायां वधः स्यात् एतस्य नामायनप्रतिलोमयात्रेत्युच्यते तन्माहात्म्यमाह वराहः यातो
यनस्य प्रतिलोमकाष्ठां न स्यात्स्वतंत्रोपि जितः परेषां स केवलव्याकरणाभियुक्तः काव्यज्ञगोष्ठ्यामिव हास्यमेतीति
अथ राज्ञां यात्रायां संमुखशुक्रदोषस्य प्रज्ञानिकयाह उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाथ ककुद्भसंघे
त्रिधोच्यते संमुख एव शुक्रो यत्रोदितस्तां तु दिशं न यायात् शुक्रस्त्रिधा प्रकारत्रयेण संमुख उच्यते मुनिभिरिति शे
षः कथं शुक्रो यस्यां दिशि प्राच्यां प्रतीच्यां वा उदेति कालांशवशेन नोदयं करोति अतो गंतुः पुंसः शुक्रः संमुखः अ
यमेकः प्रकारः वाथवा गोलभ्रमात् उत्तरदक्षिणगोलभ्रमणवशेन यत्र यस्यां दिशि उत्तरस्यां दक्षिणस्यां वा याति गच्छति
तत्र गंतुः संमुखः शुक्रः स्यात् अयं द्वितीयः प्रकारः यथा प्रागुक्तोनुवर्तते अथ यत्र ककुद्भसंघे प्राच्यादिदिक्षु कृत्तिकादि
न्यासवशेन यद्दिङ्नक्षत्रे चरति तत्र दिशि गंतुः संमुखः शुक्रः स्यात् अयं तृतीयः प्रकारः यदाह [illegible] यद्दिग्गतः समुदयेद्विचरेद्यत्र
गोलके यद्वाथ भेषु विचरेत्त्रिविधं प्रतिभार्गवमिति एवं प्रकारत्रयेण शुक्रसंमुखत्वं निर्णीते उदयगतस्य शुक्रदोषाधिक्यमा
ह यत्रोदित इति तद्विशेषे एवं शुक्रे भिन्नक्रमः दिशमित्यनेन संबध्यते यस्यां दिशि उदितः शुक्रो दृश्येत तां दिशमेव न याया

यात्र गच्छेत् अन्यदिक्ष्वपि यथासंभवं न यायात् यदाह श्रीपतिः उदयति दिशि यस्यां याति यत्र भ्रमाद्वा विचरति च भचक्रे
येषु दिग्द्वारभेषु त्रिविधमिह सितस्य प्रोच्यते संमुखत्वं मुनिभिरुदय एवन्यज्यते यत्र यस्मादिति स्पष्टार्थं पद्यं याति यत्र भ्र
माद्वेति अत्र केचित् स्वोदयकालात् प्रदक्षिणं प्राच्याद्यष्टदिक्षु प्रहराष्टकेन सूर्यवत् शुक्रोपि भ्रमति सूर्यभ्रमणं च वसंत
राजेनोक्तं इत्यादि मैंद्रीं ज्वलिता दिगैशी प्रधूमिता चानलदिक् प्रभाते प्रत्येकमेवं प्रहराष्टकेन भुक्ते दिशोष्टौ सविता क्रमे
ण इत्यादि युक्तादिननाथमुक्ताविवस्वदाशा भवति प्रदीप्ता संधूमितायां सविता प्रयाता शेषा दिगंताः खलु पंचशांता इति
अनेन सूर्यभ्रमणप्रकारेण शुक्रोपि यस्यां दिशि स्यात्तां दिक्कं गतः संमुखः स्यात् अतस्तस्मिन्प्रहरे सापि दिक् त्याज्येत्य
र्थः इत्याहुः तन्न वसंतराजेहि सूर्यभ्रमणवत् शुक्रभ्रमणमप्यवसेयमित्येवंविधशुक्रातिदेशवाक्याभावात् तस्मा
द्भ्रमादिति गोलभ्रमादित्येव व्याकर्तव्यं अत्रार्थे त्रिरप्यनुकूलस्तद्वाक्यं च प्रागुपपन्नं प्रतिशुक्रदोषफलमाह वराहः
प्रतिशुक्रवुधाशनिहृष्टिहता दिगधः कुरुते नृपतिं गमने सदिरामुदितामदनाकुलितां प्रमदेव कुलं परवेश्मगतेति
नारदोपि सूढे शुक्रे कार्यहानिः प्रतिशुक्रे पराजय इति ननु वधूप्रवेशप्रकरणे दैत्येज्यो ह्यभिमुखदक्षिणेन शस्त
इति पद्येन शुक्रसांमुख्यदोषाभिहितः किं पुनर्दोषाभिधानेन उच्यते शिशुगर्भिणीनवोढाभिन्नानां लोकानां विशेष
तो राज्ञां च यथासंभवं त्रिविधशुक्रसांमुख्यदोषनिराकरणार्थं पुनरभिधानं किंच आवश्यकयात्रायां यत्रोचितस्ता
मेव दिशं न यायात् तथा सत्नि पश्चादभ्युदिते शुक्रे यायात् प्राचीं तथान्तरां प्राच्यामभ्युदिते शुक्रे प्रतीचीं दक्षिणां दिश
मिति वसिष्ठवाक्यमपि यथासंभवमादरणीयमनादरणीयं च भवति अनेन संमुखशुक्रव्यतिरिक्तदिक्त्रयाभ्युप
गमात् किंच वधूप्रवेशप्रकरणे शिश्वादीनां विशेषफलाभिधानं कृतं न तु सामान्यतो यात्रासाध्यासाधारण्येनान्ये
षामपि राजादीनां कृतं अत एव वधस्य विशेषणाव पुनरपेक्षावास्ति नगरप्रवेशविषया युपद्रव इति शृंगिरो वत्सेनाभ्या
भिहितस्य संमुखशुक्रापवादस्यतस्याभिधानमत्र पुनर्न कृतमेव तेनैव सिद्धेः अथैवंविधेपि शुक्रसांमुख्ये अवश्य
कर्तव्ये च गमने शांतिमाह वसिष्ठः तद्दोषशमनार्थाय शांतिं वक्ष्ये समासतः कृत्वा शांतिं प्रयत्नेन पश्चात्सर्वं समाचरेत्

भृगुलग्ने भृगोर्वारे भृगोर्वर्गे भृगूदये उपोष्य भृगुवारेपि यावच्छुक्रोदयं प्रति भक्तितेन च शुद्धेन कारयेत्प्रतिमां भृगोः
लिखेदष्टदलं पद्मं कांस्यपात्रे च तंडुलैः शुक्लसूक्ष्माम्बरैर्वेष्ट्य प्रतिमां तत्र पूजयेत् शुक्लपुष्पाक्षतैर्गंधैर्मुक्ताहारै
र्विचित्रितैः उपचाराणि कार्याणि शुक्रं ते अन्नादित्यृचा तन्मंत्रेण जपं कुर्यात्सहस्रमष्टोत्तरं शतं कर्मांते तेन मंत्रे
ण भक्त्या चार्घ्यं प्रदापयेत् घृतगंधाक्षतैः पुष्पैः क्षीरमिश्रेण वारिणा दैत्यमंत्री दिवादर्शी शोणानां भार्गवः कविः
श्वेतोथ्यमंडलीकाद्यो विधिस्थो भृगवे नमः दत्वेत्यर्घ्यं प्रयत्नेन प्रार्थयेद्देवमक्तितः अनेनैव च मंत्रेण प्रांजलिः प्रण
तः स्थितः त्वत्पूजयानया शुक्र संमुखत्वसमुद्भवं दोषं विनाशय क्षिप्रं रक्ष मां तेजसां निधे इति प्रार्थ्य प्रयत्नेन प्रति
मा सुवर्णान्विता दैवज्ञायैव दातव्या श्वेताश्वसहितैव च शिष्टेभ्यो दक्षिणां दद्याद्यथा वित्तानुसारतः ब्राह्मणान्भोज
येत्पश्चात्स्वयं भुंजीत बंधुभिः इतरेषां ग्रहाणां च पूजां कुर्यात्प्रयत्नतः तत्तत्संमुखजो दोषस्तज्ज्ञानेन नश्यति
सूर्याय कपिलां दद्यात् शंखं चंद्रमसे तथा कुजाय वृषभं दद्यात्स्वर्णं दद्याद्बुधाय च गुरवे पीतवस्त्रं चाश्वं सिता
य सितायगां एवं प्रयत्नतः कृत्वा सर्वान्कामानवाप्नुयादिति शुक्रवदितरग्रहसांमुख्ये तत्तल्लिंगस्वरूपाख्योक्त
वैदिकमंत्रैः पूजादिकं विधेयं अस्मादेव श्लोकात्कथनाज्ज्ञापकादितरग्रहसांमुख्येपि सांमुख्याभिधायकं वाक्यं
विनैव किंचिद्दोषोस्तीत्यनुमीयते बुधसांमुख्यदोषं तु स्वयमेव वक्ष्यति भौमसांमुख्यदोषं कंठेनावशिष्ट एवा
ह तद्वाक्यमधुनैव प्रदर्शयिष्यते इत्यास्तां प्रसक्तानुप्रसक्तं दीपिकायां तु दानमेवोक्तं सितमश्वं सितं छत्रं हेम
मौक्तिकसंयुतं ततो द्विजातये दद्यात्प्रतिशुक्रप्रशांतये इति एतत्प्रतिप्रकाराशक्तौ ध्येयं अथैवं संमुखशुक्र
दोषमभिधायेदानीं तस्यैव वक्रास्तादिदोषं सापवादमुपजातिकयाह वक्रास्तनीचोपगते भृगोः सुते राज्ञा व्रज
न्याति वशं हि विद्विषां बुधोनुकूलो यदि तत्र संचलन्रिपून्जयेन्नैव तु तत्त्वयः प्रनीडजेः भृगोः सुते शुक्रे वक्रोपगते अस्तो
पगते नीचोपगते वा उपलक्षणत्वाच्छत्रुगृहगे पराजिते वर्णरहिते वा सति राज्ञा परराष्ट्रं व्रजन्नृपः सन्नू हि निश्चयेन विद्वि
षां शत्रूणां वशं याति निबद्धो भवतीत्यर्थः यदाह भरद्वाजः विवर्णे विजिते नीचे शत्रुक्षेत्रेस्तितेस्तगे शत्रुग्रहयुते वा

मु·टी·
या·प्र·
२९

पितदंशेनत्निरीक्षिते यात्रांनैवप्रकुर्वीत लक्ष्म्यायुर्बलहानिदेति श्रीपतिरपि नीचगेयइति नेप्रतिलोमेभार्गवेकल्पि
तेस्तगते वा प्रस्थितो नरपतिः प्रबलोपि क्षिप्रमेव वशमेति रिपूणां इति अत्रविशेषमाह लल्लवसिष्ठः शुके वास्तं
गते जीवे चंद्रे वास्तमुपागते तयार्बाल्ये वार्द्धके च स्याद्यात्राभयरोगदेति अथ शुक्रास्तापवाद उच्यते बुधइति तत्र शु
क्रास्ते यदि बुधोनुकूलः पृथक्स्थो भवेत्तदा संचलन् गच्छन् राजारिपून् शत्रून् जयेत् यदाह श्रीपतिः एवंविधेप्या
स्फुजितिप्रयायाद्बुधोयदि स्यादनुकूलवर्तीति अपवादांतरमप्याह नारदः नीचगोरिगृहस्थो वा वक्रगोवा पराजि
तः यातृभंगप्रदः शुक्रः स्वोच्चस्थश्चेदनप्रदइति नैवेति प्रतीद्युज्ञे बुधसंमुखत्वे सति गंतूराज्ञो नैव जयः किंतुपरा
जयः यदाह नारदः प्रतीद्युज्ञस्थते दोषं हंतुं शक्रोप्यहानहीति वसिष्ठोपि प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतोनृपः ब
लेन शक्रतुल्योपि हतसैन्यो निवर्तते इति अमुं च प्रतिशुक्रादिविचारं नृणांप्रथगमने राज्ञां तु विजययात्रायामा
ह तथा चरैभ्यः प्रतिशुक्रादिदोषोयं नूतनेगमने नृणां राज्ञां विजययात्रायां नान्यदादोषमावहेदिति आदि
शब्दाद्बुधकालस्य प्रतिभौमप्रतिबुधादयस्तेषामप्येवंविधे विशेषे दोषः अथ कालविशेषे प्रतिशुक्रापवादं शुक्रा
स्ते च विशेषं शालिनीछंदसाह यावच्चंद्रः पूषभात्कृत्तिकाद्यपादे शुक्रोंधो नदक्षिणग्रदक्षे मध्येमार्गं भार्गवास्तेपि
राजा तावत्तिष्ठेत्संमुखत्वेपि तस्य चंद्रो यदा पूषभाद्रेवतीनक्षत्रादारभ्य कृत्तिकाद्यपादं रेवत्यश्विनीभरणीषु कृ
त्तिकाप्रथमचरणे च यावच्चंद्रस्तिष्ठति तावत्शुक्रोंधो ज्ञेयः दृष्टोपि शुक्रो दर्शनकार्यं न करोतीत्यर्थः तदेवाह
नदुष्टइति शुक्रोंधो यदा भवेत्तदाग्रे संमुखे दक्षे दक्षिणभागे च दुष्टो न स्यात् यदाह पराशरः पौष्णादिवह्निभाद्यां
घ्रिंयावत्तिष्ठति चंद्रमाः तावत्शुक्रोंभवेदंधः संमुखगमनंहितमिति मध्येमार्गमिति मार्गस्यमध्येमध्येमार्गं या
रेमध्येषष्ठ्या वेत्यव्ययीभावः समासः पूर्वपदस्येदंतत्वं निपातनात् पारेमध्येइति सूत्रात् प्रस्थितो राजा मार्ग
मध्ये यदि शुक्रास्तो भवेत्तदा तावत्कालं तस्मिन्नेव प्रयाणे तिष्ठेत् यावच्छुक्रोदयो भवेत् यदि शुक्रो गंतूराज्ञः संमु
खो देवात्तावत्तस्य शुक्रस्य संमुखत्वेपि तस्मिन्नेव प्रयाणे तिष्ठेत् उपलक्षणत्वाद्गुरावप्येवंविधे द्रष्टव्यं यदाहपराश राम· २९

रः जीवः शशांकः शुक्रो वा मार्गमध्ये ऽस्तगो यदि तत्रैव निवसेन्न जातु यावदभ्युदितो भवेदिति उदयानंतरं यदि संमुखः
शुक्रस्तदापि स्थेयमिति प्रागुच्चनाज्ज्ञायते ततः शुक्रास्तापेक्षायां तत्रैव स्थितिः ततः शुक्रोदयमपेक्ष्य तत्र च पृष्ठतः कृ
त्वाग्रे समुद्भूतेन गंतव्यमित्युक्तं सिद्धमध्ये तन्मार्गे ज्ञायत इति एवं मध्ये मार्गं बुधास्तत्वेन्स्यात्तदा दोषाभावः सामान्य
वाक्याभावात् यद्यत्तु मध्ये मार्गं बुधोदयो भवेत्तच पुनः संमुखः स्यात्तदा दोष एव एतदुक्तं च वसिष्ठेन संमुखे चंद्रजेथ
त्र मार्गमध्योदिते यदि यावदस्तंगते तस्मिंस्तावत्तत्रैव संवसेदिति अथैवं महता यासेन दिनशुद्धिमभिधायेदानीं
लग्नशुद्धिं वक्तुकामस्तावत्प्रयाणे निष्टलग्नं शुभमनुष्टुभाह ॐ भ ॐ भो शशांकोत्थादैत्या सर्वदा यत्नतो बुधैः तत्र
प्रयातुर्नृपतेरर्थनाशः पदेपदे स्पष्टार्थमिदं पद्यं वराहनारद: नियो निखिलयात्रासु ह्युदरलग्नं च दोषकृ इति श्री
पतिरपि नेष्टः ॐ भो युग्मे शस्थितो वेति वराहोपि न कुंभलग्नं शुभमाह सत्यानभागभेदाद्यवनावदंतीति अथान्यु
दनिष्टलग्नं च मंदुभाषिण्यीकुंदसाह अथ मीनलग्नउतवा तदंशके चलितस्य वक्रमिह वर्त्म जायते जनिलग्नजन्मभ
पती शुभग्रहौ भवतस्तदा तदुदयेष्वशुभोद्गमः मीनलग्ने वास्तत्यपि लग्नांतरे तदंशे मीनांशे वा चलितस्य राज्ञो वर्त्म वक्रं
स्यात् एवमशुभमलग्नमभिधायेदानीं शुभलग्नान्युच्यंते जनीति जनिर्जन्म तत्कालीनलग्नं जनिलग्नं जन्मराशिः
तयोर्जन्मलग्नजन्मराश्योः पती स्वामिनौ शुभग्रहौ सौम्यग्रहौ चेदुदयलग्ने भवतस्तदा गमो गमनं शुभः स्यात् जन्म
लग्नं जन्मराशिश्च यात्रालग्नं शुभमिति प्रागेवाभिहितं जनवरापि नूनं यदि लग्नग इति अथाजन्मलग्नजन्मराशि
स्वामिनौ पापग्रहौ यदि यात्रालग्ने स्यातां तदा तादृशे लग्ने गमनमशुभफलदमित्यर्थः यदाह वसिष्ठः जन्मराशौ
लग्नगते तदीशे वा विलग्नगे अभीष्टफलदा यात्रा राशीशश्चेच्छुभग्रह इति जन्मलग्ने जन्मलग्नगते तदीशे वा विलग्न
गे अर्थलाभप्रदा यात्रा राशीशश्चेच्छुभग्रह इति ननु जन्मराश्युद्गमो नैव जन्मलग्नोदयः शुभः तयोरुपचयस्थाने
यदि लग्नगतं शुभमिति हड्डना देन जन्मराशेर्यात्रालग्नावस्थितौ निषेधोभिहितः सत्यं राशेः पापग्रहस्वामित्वे दोषो
नशुभस्वामित्वे प्रागुक्तवसिष्ठवाक्यस्वरसात् एवं जन्मालग्नोदयः शुभ इत्यपि जन्मलग्नस्य शुभग्रहस्वामित्वे शुभफ
लता न पापस्वामित्व इति व्याख्येयं अथान्यदनिष्टलग्नं रथोद्धतयाह जन्मराशितनुतोष्टमे ऽथवा स्वारिभाच्च रिपु

मु॰टी॰
प्र॰प्र॰
२०

भेन तु स्थिते लग्नगास्तदधिपास्तदाष्टवास्तुर्गतं हिन्नपतेर्मृतिप्रदं स्वस्य जन्मराशेर्जन्मलग्नाद्वाष्टमे राशौ लग्नस्थिते
सति तथा स्वामिनां त्रिगामिभिः तस्य शत्रोर्भाद्वा शत्रोर्लग्नाद्वा रिपुभे षष्ठे राशौ तत्रस्थितेवा सति अथवा स्वराशिलग्ना
भ्यामष्टमभवने स्वशत्रोर्जन्मराशिलग्नाभ्यां षष्ठभवने तेषां स्वामिनो यात्रालग्नगताः स्युर्यदा तदा राज्ञां मृतिप्रदाः अय
दाह श्रीपतिः जननसमयलग्नान्नैधने जन्मभाद्वा निजरिपुभवनाद्वा शत्रुभे लग्नयाते पतिभिरुत तदीयैर्लग्नगैः पा
र्थिवानां गमनमथ विषं वा भक्षितं तुल्यमेवेति विषं वा भक्षितं मरणप्रदमित्यर्थः वसिष्ठेनत्तु स्वजन्मराशिलग्नाभ्यां
द्वादशभवनमपि निषिद्धमुक्तं यथा स्वाष्टलग्ने लग्नगे राशौ वा लग्नगे सति यातुर्भंगो भवेत् तत्र द्वादशे वाष्टलग्नगे इति
अथान्यत्कुंभलग्नं शालिन्याह लग्ने चंद्रे वापि वर्गोत्तमस्थे यात्रा प्रोक्ता वांछितार्थैकदात्री अंभोराशौ वा तदंशे प्र
शस्ते नौकायानं सर्वसिद्धिप्रदायि मीनकुंभव्यतिरिक्ते यस्मिन्कस्मिंश्चिल्लग्ने वर्गोत्तमस्थे वर्गोत्तमनवांशगते सति
वाथवा चंद्रे वर्गोत्तमस्थे सति यात्रा वांछितार्थस्य मनोभीष्टार्थस्यैकाद्वितीया दात्री यदाह वसिष्ठः वर्गोत्तमांशगे
लग्ने त्वथवापि सुधाकरे यात्राकामदुघा यात मानातपत्रस्य वैयष्ठेति वैनिस्थये अथ नौकायात्रायाम् असाधार
णत्वेन लग्नमुच्यते अंभोराशाविति जलचरराशौ लग्नगते सति अथवा लग्नांतरे तदंशे जलनाथे सति नौकायानं स
र्वसिद्धिप्रदायि स्यात् यदाह नारदः जलोदये जलांशे वापि जलपाने शुभप्रदं इति दुर्गादित्योपि नौकायानमाप्यभवने
शुविलग्नगेषु कुर्यान्तथान्यगृहगेषु तदंशगृहगेष्विति वराहोपि नौकायानमिष्टं जलराशिलग्ने तदंशके वान्यगृहो
गोदयापीति एतेन संमतिदर्शनेन लग्ने चाप्यंशे नौयानमिष्टमिति श्रीपतिवाक्यं चत्राप्ये इति पदस्केदेन स्याष्टार्थम
पि चापसंबंधिनि लग्ने धनुर्लग्ने धनुरंशे च नौकायानमिष्टमित्येवं केचिद्व्याकुर्वते तद्व्याख्यानमयोक्तं भवति
किंच तादृशवाक्यार्थे क्रियमाणे मूलवाक्यानुपलंभः प्रयोगाशुद्धिश्च स्यात् चापशब्दाद्धि यस्यामामादिस्तद्
द्धमिति ढुड संज्ञकादु इति विहित स्पशैषिकत्व प्रत्ययस्य यादेशे चापीय इति षामंस्यात्तथा च पादभंगः स्यात्
अथ मेषादीनां दिगनुलोमप्रतिलोमराशीनां लग्नावस्थितौ फलमिंद्रवज्रयाह दिग्द्वारभे लग्नगते प्रशस्ता राम॰
यात्रार्थदात्री जयकारिणी च हानिं विनाशं रिपुतो भयं च कुर्यात्तथा दिक्प्रतिलोमलग्ने दिग्द्वारभानि मेषादिराशयः २०

तद्दिग्लग्नेषु गंतव्यदिगवस्थितेषु सत्सु यात्रा प्रशस्ता प्रशस्तत्वमेवाह अर्थदात्रीं जयकारिणीं चेति यथा मेषः पूर्वस्यां
वृषो दक्षिणस्यां मिथुनः पश्चिमायां कर्क उत्तरस्यां एवं सिंहादयो धनुरादयश्च पूर्वादिक्षु ध्येयाः यदाह वसिष्ठः पूर्वा
दिदिक्षु मेषाद्याः क्रमाद्दिग्द्वारराशयः ॥ दिग्द्वारराशयः सर्वे तद्दिग्यातुः शुभप्रदा इति हानिमिति दिक्प्रतिलोमलग्ने वि
परीतदिगवस्थिते लग्ने सति यथा पश्चिमायां मेषः उत्तरस्यां वृषः पूर्वस्यां मिथुनः दक्षिणस्यां कर्कः एवं पुनः पश्चि
मादिक्षु दिक्षु सिंहादयो धनुरादयश्च ज्ञेयाः तादृशे लग्ने गंतुः पुंसो यात्रा हानिं द्रव्यादिनाशं रिपुतः शत्रुतो भयं च कुर्यात्
तथा शाब्दः पादपूरणे उक्तं च वसिष्ठेन दिग्द्वारभे लग्नगते यात्रार्थविजयप्रदा लग्ने दिक्प्रतिलोमे स्याद्धानिदा शत्रुभीति
देति रत्नमालायां वराहोपि यातव्यदिक्सनुगतस्य सुखेन सिद्धिर्व्यर्थः श्रमो भवति दिक्प्रतिलोमलग्ने इति अथ शुभल
ग्नान्यव वसंततिलकार्द्धेनाह राशिः स्वजन्मसमये शुभसंयुतो यो यः स्वारिभान्निधनगोपि च वेशिसंज्ञः लग्नोपगः स
गमने जयदोथ भूपयोगैर्गमो विजयदो मुनिभिः प्रदिष्टः त्रिगमिषोः पुंसः स्वजन्मसमये यो राशिः शुभग्रहैः चंद्रबुध
गुरुशुक्रैः संयुतो राशिः चेद्यात्रालग्नो लग्नोपगः स्यात् अथवा स्वारिभात् स्वषष्ठर्क्षात् राशिर्लग्नं वा ततोष्टमो यो राशिः
स चेद्यात्रालग्नोपगः स्यात् अथवा यो राशिर्वेशिसंज्ञः सूर्याक्रांतराशेर्द्वितीयो राशिर्वेशिसंज्ञः स चेद्यात्रालग्नोपगः स्या
त् तदा स राशिर्गमने जयदः स्यात् यदाह नारदः योग्रहो जन्मनि शुभो यो राशिर्वेशिसंज्ञकः तावुभौ जन्मलग्नं च यात्रा
यां शुभदं जयमिति शुभः शुभग्रहयुतः यदाह श्रीपतिः यः स्वजन्मनि शुभग्रहाश्रितो यश्च राशिरिह वेशिसंज्ञकः यः स्व
शत्रुभवनाच्च नैधने लग्नगः स गमने शुभावह इति वसिष्ठः शत्रोरष्टमलग्ने वा राशौ वापि विलग्नगे तदीशस्थितल
ग्ने वा यातुः शत्रुक्षयः सदेति वेशिलक्षणमाह वराहः दिनकरयुताद्भाद्द्वितीयं च वेशि रिति अथवा भूपयोगैर्जातको
क्तराजयोगैः यात्रालग्नावस्थितैः गमो मुनिभिर्विजयदः प्रोक्तः यदाह नारदः येन यायात्परीनूज्जेदं तेषां योगैर्नृपाश्रयैः
उपैति शुद्धानि को पार्श्विः शत्रुयोषास्तु वारिभिरिति वराहोपि जातकोक्तनृपयोगगतानां प्रतिदिनं भवति राज्यविद्
धिः वातचूर्णितमिवार्णवयानं परबलं समुपैति विनाशमिति ते च राजयोगा बृहज्जातके सारावल्यां च टोडरानंदे वसं

मुहू॰
या॰प्र॰
२२

त्यतस्ततएवावधार्याः अथलालाटिकयोगान्वक्तुकामस्तावद्दिक्स्वामिन उपजातिकयाह सूर्यः सितोभूमिसुतोथराहुः
शनिः शशीज्ञश्चबृहस्पतिश्च प्राच्यादितो दिक्षु विदिक्षुचामी दिशामधीशाः क्रमतः प्रदिष्टाः स्पष्टार्थमिदंपद्यं वराहव
सिष्टः दिगीश्वरा भास्करशुक्रभौमराह्वार्किचंद्रज्ञसुरार्चिताः स्युरिति अथदिगधीशकथनप्रयोजनंतत्रमध्याकं दत्ता
ह केंद्रेदिगधीशेगच्छेदवनीशः लालाटिनितस्मिन्नेयादरिसेनां दिक्स्वामिनिसूर्येसितइत्यादिनोक्ते केंद्रे केंद्रवर्तिनि
सति अवनीशोराजागच्छेत् तस्मिन्दिगधीशेलालाटिनिसति अरिसेनां नेयानगच्छेत् वराहश्रीपतिः ललाटगेनप्रव
सेद्दिगीशिगंतव्यमस्मिन्नुवन्तकंटकस्थइति अथलालाटिकयोगानुपजातिविक्रीडितेनाह प्राच्यादौतरणिस्तनोभृ
गुसुतोलाभव्ययेभूसुतः कर्मस्थोथतमोनवाष्टमगृहेसौरिस्तथासप्तमे चंद्रःशत्रुगृहात्मजेपिचबुधःपातालगोगी
ष्पतिर्वित्तभ्रातृगृहेविलग्नसदनाल्लालाटिकाःकीर्तिताः प्राच्यादौप्राच्याद्यष्टदिक्षुक्रमेण विलग्नसदनादेषुभावेषु
सूर्यादिग्रहस्थित्यालालाटिकाःस्युरितिवाक्यार्थः यथातनौलग्नस्थस्तरणिःसूर्यःप्राच्यांगंतुर्लालाटिकः एवमाग्ने
य्यां भृगुसुतोलाभव्यये एकादशद्वादशस्थानेलालाटिकः कर्मस्थोदशमस्थोभूसुतोमंगलोदक्षिणस्यां तमोराहुरष्टम
भवनस्थानस्थितोनैरृत्यांसौरिःशनिःसप्तमस्थःपश्चिमस्यांचंद्रः शत्रुगृहात्मजेषष्ठपंचमस्थोवायव्यां बुधःपाताल
गःचतुर्थस्थानस्थउत्तरस्यां गीष्पतिर्बृहस्पति वित्तभ्रातृगृहेद्वितीयतृतीयस्थानस्थईशान्यांलालाटिक इत्यर्थः
यदाहनारदः लग्नस्थोभास्करःप्राच्यांदिशियायात्तुलेलाटगः द्वादशैकादशेशुक्रआग्नेय्यांतुललाटगः दशमस्थःकु
जोलग्नाद्याम्यायांतुललाटगः नवमाष्टगतोराहुर्नैरृत्यांतुललाटगः लग्नात्सप्तमगःसौरिःप्रतीच्यांतुललाटगः ष
ष्ठपंचमगःचंद्रोवायव्यांतुललाटगः चतुर्थस्थानगःसौम्यउत्तरस्यांललाटगः द्वित्रिस्थानगतोजीवऐशान्यांतुलला
टगः लालाटिदिक्कीर्तितत्याज्याजीवितेप्सुर्व्रजेन्नृपइति वराहोपि लग्नेभानुस्तनरिपुगतश्चंद्रआरोनभस्थःपातालस्थो
हिमकरसुतःस्वत्रिगोदेवमंत्री तद्वच्छुक्रोव्ययभवगतोभास्करिःसप्तमस्थोराहुर्नित्यंनिधनवशगःस्वांदिशंवारयंती
ति यत्तुवसिष्ठवाक्यं राशीनेकंद्वाविनाक्रांतराशेःप्रादक्षिण्यान्न्यसेद्दिग्विदिक्षु यद्दिग्राशौलग्नगेसंमुखत्वंतद्दिग्या एम॰
२२

तत्र्मूर्त्युदस्तदिग्गीशा इति तदयुक्तं प्रतिभाति तथाहि सूर्याधिष्ठितराशेरप्रादक्षिण्येन द्वादशराशिचक्रे द्विरूपेको विदि
शि द्वौ सूर्यैः स्थित इत्यादिना प्राच्याद्यष्टदिक्षु ग्रहन्याससहिते सति सूर्याक्रान्तराशेः पृष्ठ एव तुर्यो
बुधः तदो तत्रस्थो लालाटिकः स्यात् स चासंभवी नहि केनापि गणितप्रकारेण सूर्याच्चतुर्थो
बुधः स्यात् अतएव वराहोपि चतुर्थभवने सूर्याच्च तुर्थो बुधः स्यात् सूर्यो द्वौ स्थितो भवतः क
थमिति अन्यच्च सूर्याधिष्ठितराशेः सप्तमः शनिः पश्चिमायां लालाटिकः तत एव दृष्ट
मस्या भौमो दक्षिणस्यां एवमेव सर्वे पि ग्रहाः लालाटिका इत्यापद्येत दृष्यते च लग्नराशेरेव

११ २ गु ह	सूर्यः ३	शु १२ १० शु आ
४ बु ७	ॐ	९ मंगलः
वा चं ५ चं ६	पु श्रा	६ रा ८ रा नै

एवं सति सकलमुनिविरोधः चापतेत् तस्माद्वसिष्ठसंहितापुस्तके इनाक्रान्तराशेरिति लेखकभ्रमसंभूतः पाठः तस्मा
द्राशीनेकें इत्यग्निलग्नराशेरिति पाठः साधीयान् कल्प्यः एवं सति चतुर्थस्थानगतबुधासंभवः सकलमुनिविरोधश्च
नास्ति रत्नकोशे येधिपतिर्दिशस्य स्यात्तस्मिंस्तत्स्थेन तां दिशं यायात् अनुकूले च दिग्गीशे गन्तव्यः कंटकोपगते इ
ति अत्र सूर्यभौमशनिबुधानामस्ति चकंटकोपगतत्वमस्ति लालाटिकत्वमन्येषां शुक्रादीनामुभयरूपत्वं संभ एव
तत्र लालाटिकस्थानव्यतिरिक्तस्थानत्रयं कंटकशब्देन व्यवहर्तव्यं बहुव्यापकत्वाल्पव्यापकत्वरूपसामान्यविशेषभाव
सत्वात्तस्माल्लालाटिकस्थानव्यतिरिक्तस्थानत्रयं कंटकशब्देन व्यवहर्तव्यं व्यतिरिक्ते कंटकस्थाने यदि दिग्गीशस्तदा श्
भफलदा यात्रान्यथा ह्यशुभमेनेति हृदयं अथ पर्युषितयात्रा योगाच नुष्टयमत्तुह्नमाहेंद्र वज्रयाच स्वेगत्वा शिवे
स्थित्वा दिनो गच्छन् जयेद्रिपून् मैत्रे प्रस्थाय शाक्रे हि स्थित्वा मूले व्रजंस्तथा प्रस्थाय वहस्ते निलतदाधिष्ण्ये स्थित्वा
न्नयार्थी प्रवसेद्दिवे वसंत्यपुष्ये नित्रसौम्ये चैकरात्रोषितः स्मां लभते वनीशः मृगशिरसि स्वगृहाद्यानव्यदिगभिमु
खं कस्यचिदिष्टस्य गेहे गत्वा प्रस्थाया द्रौ यां तस्मिन्नेव गृहे स्थित्वो षित्वा दिनोपुनर्वसौ गच्छन् नजेहेत्यत्काद्यामाद्वुहि
रेव गच्छन् सपत्नि पून् जयेत् अयमेको योगः एवमेव मैत्रेनुराधायां प्रस्थाय शाक्रे ज्येष्ठायां स्थित्वा मूले व्रजन् सत्रून्तथा
शत्रून् जयेदित्यर्थः अयं द्वितीयो योगः तथा हस्ते प्रस्थाय निलतदाधिष्ण्ये स्वातीचित्रानक्षत्रद्वये स्थित्वा द्विदैवे वि

मु॰टी॰ या॰प्र॰ २२

शाखायां जयार्थी भूपादिः प्रवसेद्देशांतरं गच्छेत्‌ अयं तृतीयो योगः वसुत्वं त्वपुष्ये धनिष्ठारेवतीपुष्येषु निजसीम्नि स्वनग
रसीते प्रस्थितः सन्‌ यद्येकरात्रोषितः स्यात्तदा वनीशो राज्ञा दत्तां भूमिं शत्रोरिति शेषः लभते जयेन प्राप्नोतीत्यर्थः अयं च
तुर्थो योगः यदाह बृहद्यात्रायां वराहः सौम्ये गत्वाथ पुष्ये रौद्रे दितीशे संप्रस्थानाबाधते शत्रुसंघान्‌ मैत्रं गत्वा पौरुहूते
सपुष्ये मूले यायाच्छत्रुनाशाय भूपः हस्ते गत्वा स्वाति चित्रे सपुष्ये प्राक्राम्यो भैः प्रस्थितो बाधते रीन्‌ ॥ तिष्ये पौष्ये वासवे
चैकरात्रं सीम्नि स्थित्वा भूतिमाप्नोति यानेति क्वचिन्मृगे प्रस्थाय याद्रीयां पुनर्वसौ च स्थित्वा पुष्ये गच्छेदित्युक्तं यदाह गुरुः
सौम्ये गत्वा समधुष्यरौद्रादित्ये व्रजेत्पुनः उष्यति संपदे विद्वांल्लभतेतीव संपद इति विशेषमाह वराहः यथेष्टवेलाग
मनं प्रशस्तं हस्तेंदवोपेंद्रसुरेंद्रभेषु कृत्वा प्रयाणं श्रवणे श्रियार्थी वसेन्न जातु क्षितिपः स्वसीम्नीति उपेंद्रः श्रवणः सुरेश
भं ज्येष्ठा अथ समयबलमनुष्टुभाह उषःकालो विना पूर्वां गोधूलिः पश्चिमां विना विनोत्तरां निशीथः सन्‌ याने याम्यां
विनाभिजित्‌ स्पष्टार्थं पद्यं सन्‌ शोभनः चरणचतुष्टयेपि संबध्यते निशीथोऽर्द्धरात्रं याने यात्रायां सर्वत्र विनायोगे द्विती
या पृथग्विनानाभिस्तृतीयान्यतरस्यामिति पक्षे द्वितीयापि विधानात्‌ अत्र हि दग्धादिगेपीष्वपि ज्वलितादिगेष्विति वर्ष
नरत्नमालीयं रीत्या सूर्य स्पष्टनं दिगवस्थानात्‌ संप्रातस्यां दिशि दिशि यात्रा निषिद्धेति युक्तिसिद्धोयमर्थ उपनिबद्धः वराह
ण दिग्विशेषे समयविशेषः प्रशस्तोभिहितः यथा पूर्वाह्ने पूर्वांतरां गच्छेन्मध्याह्ने पूर्वतो व्रजेत्‌ अपराह्ने व्रजेद्याम्याम
र्धरात्रे तु पश्चिमामिति गच्छेन्मध्यंदिनात्प्राची …… मध्यंदिने दक्षिणां चापराह्ने तु पश्चिमामर्धरात्रके न नक्षत्रा
गारका विष्टिर्व्यतीपातेन वैधृतिः सिध्यंति सर्वकार्याणि यात्रायां दक्षिणे रविरिति अत्राभिजित्प्रशंसामाह श्रीपतिः
अष्टमो ह्यभिजिदाह्वयः क्षणो दक्षिणाभिमुखयानमंतरा कीर्तितोपरककुप्प्रसर्पिभिर्यायिनामभिमतार्थसिद्धये इ
ति अथ लग्नादिभावानां संज्ञा अनुष्टुभाह लग्नाद्भावाः क्रमाद्देव कोशधान्यच्छत्रवाहनं मंत्रोरिर्मार्ग आयुश्च हृद्व्यापा
रागमव्ययाः हृन्मनः स्वांतं हृन्मान संमनः इत्यभिधानात्‌ आगमः प्राप्तिः अन्यत्स्पष्टार्थं पद्यं मूर्तिः कोशाद्धिनस्त्ववा
हनं मंत्रसंज्ञकः शत्रुमार्गस्तथायुश्च मनोव्यापारसंज्ञकः प्राप्तिरप्राप्तिरित्याद्याभावाः स्युर्द्वादशैव ते इति नारदोक्तेः एवं राम॰ २२

विधसंज्ञाकथनप्रयोजनं क्रूरग्रहसाहित्येपतनज्ञातानां पीडा शुभग्रहसाहित्येपतनज्ञातानां शुभमित्युक्तं॥ अ
थ विशिष्टाशुभाशुभफलं शौनिराह॥ केंद्रेकोणेसौम्यखेटाः शुभाः स्युर्यानेपापह्यायषट्खेषु चंद्रः नेष्टोलग्नां
त्यारिरंध्रे शनिःखेस्ते शुक्रोलग्नेट्नगांत्यारिरंध्रे॥ केंद्राणिकोणयदिसौम्यग्रहाः सुफलदा शुभफदाः स्युरर्थादन्येषुभा
वेष्वशुभफलदाः पापग्रहा ह्यायषट्खेषु तृतीयैकादशषष्ठदशमस्थानस्थाः शुभफलदाः अर्थादन्येष्वशुभ
फलदाः चंद्रोलग्नांत्यारिरंध्रे लग्नद्वादशषष्ठाष्टमेषु स्थितोनेष्टोऽशुभफलदः शनिः रोदनमिनेष्टौ अशुभफलदः
शुक्रोलग्नसप्तमेनेष्टः यदाह वसिष्ठः घ्नंतिक्रूरा हित्रिषष्ठायभावान्हित्वापरान्सदा पुष्णंति सौम्यखेचराः षष्ठाष्टांत्यवि
नापरान् लग्नषष्ठाष्टमं हंति चंद्रः शुक्रोस्तगस्तथा मृत्युलग्नस्थितः चंद्रो यातुर्मृत्युप्रदः सदेति अन्यत्रापि केंद्रत्रि
कोणगैः सौम्यैः त्रिभवारिगतैः परैः अलग्नरिष्फचंद्रेण यात्राभीष्टफलप्रदेति वराहोपि प्रायोंत्रगः सहजशत्रुद
शायसंस्थाः पापाः शुभाः सवित्तजंपरिहृत्यखस्थं सर्वत्रगाः शुभफलं जनयंति सौम्यास्त्यक्तारिसंस्थममरारिगु
रुं यियासोः मूर्त्यादिभावनिचयेसकलेपि सौम्याः श्रेष्ठाः भृगोस्तनयमस्तगतं विहायेति लग्नेडिति लग्नेट् यात्राल
ग्नस्वामी नगांत्यारिरंध्रे सप्तमद्वादशषष्ठाष्टमस्थश्चेत्तदानेष्टोऽशुभफलदो मृत्युद इत्यर्थः यदाह गुरुः लग्नपो
मृत्युदो याने रंध्रास्तारिव्ययोपगः केप्याङ्गभयदो धर्मे शेषस्थाने शुभावह इति अथात्र यात्राकालीनलग्नाद्यादि
द्वादशभावावस्थितानां ग्रहाणां फलानि बादरायणप्रोक्तानि लिख्यंते यथा राहुभौमदिवाकरेंदुरविज्ञाः प्रस्थाने
लग्नगताः हुतभुगग्निविषायुधज्वरभवा रोगाश्च नानाविधाः जीवः सोमसुतस्तथैव भृगुजो यात्रोदयस्था नृणां माया
त्राधनधान्यभोगसुखदाशुप्रेक्षनैर्लभ्यते कोशस्थाने नराणामसुरगुरुबुधौ धर्मकामार्थलाभं सोत्यंतिंचत्तीवोध
नसुखमतुलं शत्रुपदाद्यर्थंच मंदो बंधं सुदीर्घं मृतिमवनिसुतः कोशहानिं च भानुश्चंद्रः कुर्यान्नरेंद्रं प्रियजनसहितं
राहुः संपादरूपं प्रस्थाने भूमिपस्य द्वितिसहतरविज्ञौ तिग्मभानुश्च राहुः शुक्रः चेद्रात्मजोवा सुरगुरुरथवा शीनरश्मि
र्धनायुः दुश्चिक्यस्थानसंस्था गजतुरगरथान्प्राप्यसर्वार्थसिद्धिं जित्वाशत्रूनशेषान्विचरतिवसुधांगेगोकुलेनापवे

शुभः बंधुस्थानगतो ददाति विपुलान्भोगान्भृगोरात्मजो जीवः शत्रुविनाशमिच्छति महालाभं करोतीड्जः हानिं बंधुगतः
करोति रविजोऽरिवृद्धिं त्र्यं चंद्रमाराहुर्भूमिसुतस्तथाह्वकिरणः कुर्वंति दुःखं महत् कुर्याद्दुष्टस्य सिद्धिं सुतभवनगतो वाक्प
तिः शत्रुनाशं शुक्रः शीतांशुपुत्रः सुरगुरुसदृशं युद्धकाले करोति सूर्यः चंद्रश्च भौमो दिनकरतनयः सिंहिकानंदनो सौम
वैते पंचमस्था विविधभयकराः पार्थिवानां रणार्थ्यां शत्रुस्थाने नराणां दिनकरतनयो भूमिपुत्रस्तथार्कः शीतांशुर्दैत्य
मंत्री रजनिकरसुतः सैंहिकेयोथ जीवः कुर्वंत्येवार्थलाभं परबलमथनं सिद्धिमाप्नोति कार्ये शत्रुघ्नं भूमिपानां भवति
हि गमने धर्मकामार्थसिद्धिः ६ नाशं शुक्रदिवाकरार्कतनया राहुस्तथा भूमिजः क्षिप्रं शत्रुवशं नयंति पथिकं स्था
ने स्थिताः सप्तमे सौम्यो मित्रसमागमं हरसुतः स्त्रीवित्तलाभं नृणां चंद्रो भीष्टसुखं ददाति च धनं यात्रासु जामित्रगः ७ आ
रोग्यं चंद्रपुत्रो जनयति भृगुजः सर्वकामार्थसिद्धिं जीवो रत्नान्यशेषाण्यस्तमितवज्जनी यात्रिकं नैधनस्थः चंद्रार्कौ चेन्न
भौ वा जनयति निधनं शत्रुपक्षस्य वृद्धिं भौमः चार्कात्मजो वा जनयति सततं तस्करेभ्यो भयं च ८ शुक्रोऽतिसौम्यानव
मो बुधः च जीवो जयश्रीधनधान्यलाभं चंद्रार्कसौरा नवमाः सभौमाः कुर्वंत्यनेकान्पुरुषस्य दोषान् ९ कर्मस्थान
स्थितोऽर्कः प्रचुरजयकरः तुष्टिदः शीतरश्मिर्जीवः संग्रामकाले भवति शुभकरः सर्वकार्यप्रदो ज्ञः शुक्रः सौख्यानुफल
दं सौवित्तरतिं च महीनंदनः प्राज्यकीर्तिं राहुर्वैराग्यमनुनिं जनयति सततं दीर्घरोगं तथार्किः १० शशिबुधगुरुशुक्राः
सूर्यराह्वार्किभौमा व्रजति हि नरनाथः क्षिप्रमेकादशस्थाः हुतमिह रिपुवर्गं घ्नंति [illegible]ं प्रयातं विचरति गजराज्योष्
ट्र मध्यस्थितो वा क्षितिजरविसुतार्काः सैंहिकेयो मरणं जनयति रजनीशः श्रेष्ठ शुक्लेषु भेदं रिपुश्च यद्धनाशं भृत्य
नाशं च कुर्युर्यदि बुधगुरुशुक्रा द्वादशस्था भवंति इति बादरायणीययात्रायां भावफलानि, यात्रासु सर्वथा न विधेया त
था हि मृत्युमृत्यौ स्वंद्रस्य स्थितिर्लग्नभंगिनी सप्तमस्थानस्थितिः शुक्रस्य दशमस्थानस्थितस्तु द्रष्टा नैश्चरस्य एवं वि
धेयग्रहे, न्येषु ग्रहेषु शुभफलदातृष्वपि नेव कार्यो यात्रा अत्र केचिद्लग्नेशे लग्नाधीशः केंद्रे स्यात्तदा लग्नभंगी ग्रहो दोषदो
+ एवं सम्यग्यात्रायां लग्नं दत्वा यात्रा करणीयेति तात्पर्यार्थः तत्रैकस्मिन्नपि लग्नभंगिनि ग्रहे सति +

न भवति यथा मकरलग्नाधीशः शनिस्तु दशमे स्यात् कुंभलग्नाधीशो वृश्चिके तथा वृषलग्नाधीशो भृगुः सप्तमे
वृश्चिके स्यात् तुलाधीशश्च मेषे तथा कर्कराशिस्थितः चंद्रो यात्रालग्ने कर्काख्ये एतादृश्यां यात्रालग्ने दोषो नास्तीति
उक्तं च ज्ञातकेपि लग्नाधिपो यदा केंद्रे लग्ने दृशालये ······ सर्वग्रहकृतं रिष्टमेकोपि विलयं नयेदिति सत्यं इदं ना
वद्याख्यानं ज्ञातकविषयकमेवेति तत्रैवोत्पन्निसत्त्वात् यज्जातकान्क्षितिपालयोगैर्महीम्भुजो यान्ति रिपून्विजे
तुं तेषां प्रकोपाग्निरूपे निशांतिं विद्विषियोषास्तु जलप्रवाहैरिति वदन्ति दृशाभावाच्च प्राग्वाक्यं तु निर्मूलमेव
निबंधेष्व दृष्टत्वात् सत्यपि वा समूलत्वे सामान्यदूषस्य सामान्यत एव परिहार उचितः छिनत्ति क्रूरासद्या प्रियवर्ज्जं हिमा
वान व्यापारं सूर्यतः सूर्यभौमाविति वाक्यात्सर्वे क्रूरग्रहाः तृतीयैकादशस्थानवर्ज्जितानि स्थानानि घ्नंति तत्र सूर्य
भौमौ दशमस्थाने न वहंत इति वत्सूर्यो वा भौमो वा चेल्लग्नाधीशः सन् लग्न एव चेत् कर्के शनिर्वा लग्नाधीशः सन् द
शमाख्यः केंद्र एव चेत्स्यात् तदा निषेध एव प्रबलः सामान्यशास्त्रेतो नूनं विशेषो बलवान्भवेत् इत्युक्तेः अतो निषिद्धकें
द्रव्यतिरिक्त केंद्रेषु स्थितास्तेषामशुभकृशानयः सामान्यतो रिष्टपरिहारकर्तारः स्युरिति कथमस्य सामान्यवाक्यत्वं
उच्यते लग्नाधिप इत्यत्र लग्नपदेन द्वादशराशय उच्यंते तेषामधिप इत्यनेन समासिग्रहाः प्रोच्यंते केंद्रपदेन च चत्वारि स्था
नान्युच्यंते इति परिहारवाक्ये सामान्यतो भिहितमस्ति निषेधवाक्ये तु भयोः स्थानविशेषग्रहविशेषयोरभिधानमि
ति प्रागुक्तदोषो वज्राधितः एवं लालाटिकयोगेष्वपि ध्येयं यथा प्राच्यादौ तरणिहिमनो भृगुसुतो लाभव्ययेष्वस्तु तः
कर्मस्थ इति लालाटिकयोगवाक्येषु यदि प्राच्यां यातुः सिंहलग्नाधीशः सूर्यो लग्न एव चेत्तदा लालाटिके न दोष एव
प्रबलो न तु लग्नाधीशकेंद्रगतत्वेन सिंहलग्नं शुभदं एवं दक्षिणस्यां यातुर्मेषवृश्चिकयोरधीशो भौमः क्रमेण म
करस्य उच्चगतः सिंहस्य मित्रगृहगतो पि तथैवैवं पश्चिमायां यातुर्मकरकुंभयोरधीशः शनिः क्रमेण कर्के सिं
हे वा तथैव एवं पश्चिमायां याप्युत्तरस्यां यातुर्मिथुनकन्यालग्नयोरधीशो बुधः क्रमेण कन्यायां धनुषि वा चेत्तदापि
तथैव उच्चगत्वादिकं तदैवागतं केंद्राधीश इति परिहारवाक्यं तु क्रमेण तत्तत्स्थानविशेषव्यतिरिक्तकेंद्रपरं द्रष्टव्यं

यदीदं वा काम एव यपिकें इष्टप्रवर्तेन तदा प्राचीं दक्षिणां प्रतीचीं उत्तरां सु महादिक्षु लालाटिकदोषाभिधानं खण्डयापि तमे
वस्थानात् सु विफला भावः किं तु विदिक्षु चत त्सूष्व विशिष्टेष्व लालाटिकदोषाभिधानं वक्तव्यं स्यान्मुनीनां एवं च लग्नपो
मृत्युदोषयानैरंध्रा सप्ता रिपायामपग इति गुरुवाक्ये पिलग्नाधीशस्य सप्तमस्थानगतत्व मशुभमुक्तं तत्र सप्तमस्थानस्य
केंद्रत्वेन परिहारोनु चिन्त एव अन्यथा दोषाणांमेवावक्तव्यता भवेदिति ननु एको हि दोषो गुणसंनिपाते निमज्जतींदोः
किरणेष्विवांक इति दृष्टांतात् लग्नस्य समीचीनस्थानस्थित बहुग्रहसाहित्येन सबलत्वात् तद्दोषाभाव इति चेत् चिंत्य
मेतत् यतो वक्राः पंथा मीनलग्नेंशके वा कार्यो सिद्धिः स्यान्निष्ठितिः तत्र नेष्टः कुंभो घटक्रमेषः स्थिततो वा लग्ने चाप्यंशो
वर्नो यानमिष्टमिति स्वरूपतो दुष्टयोः कुंभमीनसंज्ञकयोर्यात्रालग्नयोग्यताभवन्मते प्रसङ्गेन न न्निष्टापत्तिरि
ति चेत् ज्योतिःशास्त्रे हि सामान्यशास्त्रेणैव सर्वस्य विषयस्य व्याप्तत्वाद्विशेषशास्त्रे दत्तजलांजलिना दोषप्रसंगः
स्यात् एवं च नस्यात्सर्वभूतानीत्यादि साधारणवैदिकवाक्यानां अग्नीषोमीयपशुमालभेतेत्यादि विशेषवाक्यैर्ब
धितव्यात् तत्वाद्विशेषशास्त्रोच्छेदापत्तिः अत्र ग्रहाणां फलदातृत्वे सबलानां वा दुर्बलानां वा यादृशानां दृशानां वा स्या
दिति संदेहस्तत्र निर्णयमाह **श्रीपतिः** अस्तंगता ग्रहजितारि गृहेष्टदेहा नीचस्थिता विरुचयो रिपुगेहसंप्रयाताः दृष्टा
न वस्त्र किमपि स्वफलं विलग्ने दातुं क्षमाः खलु भवंति न खेचरेंद्रा इति **सारावल्यामपि** उत्पातिकाः सविंदलप्रकरा
विरूक्षा नीचं गता रिपुगृहं च न मस्त्ररेंद्राः युद्धजिताः शुभफलानि विनाशयंति पापानि चाशुनितरां परिवर्द्धयंती
ति अत एव नादृशानां दृशाधिकारविशेषेण फलविशेषमाह श्रीपतिः स्वोच्चे तु पंचरणरहितं स्वत्रिकोणे स्वभेर्द्धं
नागांशहीनं त्रयमधिसुहृद्भे हृगे मित्रभे द्विः अंशोष्टानां समगृहगते शून्यभागोरिगेहे दंतांशः स्याद धिरिपुगृहे नीचगे
शून्यमेव एतत्शुभाख्यमशुभं च पुनर्ग्रहेषु स्वोच्चादिवर्तिषु वदंति तद्न्नेमकमिति अथ योगयात्रा व्याख्यायते
तत्र ग्रंथकृत् कुंदः प्राग्वत् तदुक्तराभ्यासस्य च यन्नानाविधैः छंदोभिर्मंजुभाषिणीप्रभृतिभिर्योगयात्रामावपुपकरणा
त्रा ज्ञ यया तो पयिकी योगयात्रा वक्तुकाम स्तदारंभ प्रयोजनमाह योगात्सिद्धिर्धरणिपतीनामुक्ता गुणैरपि भूदेवानां

चौराणामपि शकुनैरुक्ता भवति मुहूर्तादपि मनुजानां पादाकुलकं छंदः तल्लक्षणं छंदोरत्नाकरे यदतीव कृतविवि
धलक्ष्मयुतैर्मात्रासमादिपादैः कलितं अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सु पादाकुलकमिदं लक्षणं द्विगुणि
तवसुलघुरचलधृतिरिहित्येतत्प्रकरणे पठ्यते तेन चरणचतुष्टये प्रत्येकं षोडशमात्रा ज्ञेयाः तत्र गुरोर्मात्राद्वयं लघो
रेकामिलित्वा षोडश यथात्र पद्ये ऽऽऽऽ।।।।ऽऽ तत्र प्रथमतृतीयचतुर्थचरणेषु मात्रासमकलक्षणं मात्रासमकं न
वमो लांते लगांतमिति मात्रासमका ।ऽ।।ऽ।।ऽऽऽऽ विश्लोकः दृशि नवमो ल्लूलघुरित्यर्थः गंतं पादांते गुरुः द्वितीयचरणेउ
पचित्रालक्षणं उक्तं च उपचित्रा नव ।ऽऽऽ।।।।ऽऽऽ मे परयुक्तोपरोदशमी मात्रा तयायुक्तो नवमदशमात्राद्वयेनैको गुरुः
स्यादित्यर्थः अत एवोक्तं यदतीव ।।।।।ऽऽ।।।।ऽऽ कृतविविधलक्ष्मयुतैरिति तेन चास्यत्र मात्रासाम्यं परं तु वृत्तनय
तवृत्तपरिणामाणसहितं इति तेन पादाकुलकमन्वर्थसंज्ञाप्यस्ति धरणिपतीनां राज्ञां योगाद्गृह्यमाणयोगया
त्रालग्नवशाद्दृष्टेपि तिथ्यादौ सिद्धिर्वांछितकार्यनिष्पत्तिः स्यात् भूदेवानां ब्राह्मणानां आत्मगुणेनेंद्रगुणेः चंद्रब
लताराबलविहितनक्षत्रत्वादिभिः सिद्धिर्भवति अपि शब्दात्स्वयं गम्भ्याद्या दिष्टेनावश्यकत्ता चौराणां सर्वस्मा शकुनै
ण शुभसूचकशाकुनैः सिद्धिर्भवति केचित्तु शिवालिखितो मुहूर्तात्सिद्धिः स्यादित्याहुः वराहमिहिरः फलसिद्धि
र्योगबलाद्राज्ञो विप्रस्याधिष्ण्यतः मुहूर्ते शाक्तितो न्येषां शकुनैस्तस्करस्य चेति वराहोपि योगैः क्षितिपा विनिर्गताः शा
कुनैः तस्करचारणाद्यः नक्षत्रबलैर्द्विजात्मयः क्षणवीर्यादितरो जनोर्थमागिति द्विजातयो ब्राह्मणा इति अत्र द्विजात
यइति ब्राह्मणक्षत्रियवैश्यइति भट्टोत्पलो व्याख्यत् तन्न नारदवाक्ये साक्षाद्विप्रपदोपादानात् अत एव वसिष्ठोपि
फलसिद्धिर्धिष्ण्यगुणैरग्रजानां भवेत्सदा योगलग्नैः क्षितीशानां चौराणां शकुनैर्भृशमित्यग्रजपदं प्रायुंक्त नन्वत्र राज्ञां
योगैर्यात्राफलसिद्धिरेत्युक्तं तत्रेदं योगयात्रा किं सर्वदोषापवादिका उत विषयविवेचकइति सर्वापवादिकेतिचेन् किं
सर्वशब्देन शुभाशुभप्रकरणभिहितादोषा उच्यंते उत एतद्यात्राप्रकरणोक्ता नक्षत्रशूलवारशूलपरिघदंडप्रतिशु
क्रादिका दोषा उताविशेषात् सर्वेपि दोषाइति तत्र यदि शुभाशुभप्रकरणोक्तदोषापवादकत्वं सति योगयात्रालग्नेन

मु॰ दी॰ या॰ प्र॰ २५

द्विवारस्यत्यागप्रसंगात् अस्त्विति चेन्न नहिं स्यान्सर्वधूर्तानि अग्नीषोमीयं पशुमालभेतेति वदत्रोत्सर्गापवादस्य श्लि
ष्टसंमतत्वाभावात् अथ यात्राप्रकरणोक्तदोषापवादकत्वे सति नन्दात्र शूलप्रतिशुक्रादीनां राजविषयकाणामनभि
धानप्रसंगात् तथाहि ज्येष्ठायां पुरुहूतदिक्कुखगतः प्राप्तो बलिर्बंधनं यातो मामात्रपदे मुमुक्षुरिति त्रैयोगयानोक्तारेखे
शो रोहिण्यां नमुचिः प्रतीच्यभिगतः चूर्णीकृतो वज्रिणा सौम्यामर्यमदैवतेन गतवान् न्यूनात्वं शंबर इति प्रतिशु
क्रे प्रनिबुधं प्रतिभौमं गतो नृपः बलेन शक्रतुल्योपि हतसैन्यो निवर्त्तते इति नृपतिविषयत्वाड्डाष्टो वा नन्दात्र
शूलकथने वसिष्ठादिभिरात्राप्रदेशपादानंतादृशो दृष्टो तो वा नाभ्युपधायि कथं नृपतिविषयत्वं गीक्रियते सत्यं
सामान्यवाक्यस्य विशेषवाक्यात्संकोचात् द्विजेषु पर्यवसानं यथा पुरोडाशं चतुर्धाकरोति आग्नेयं चतुर्धा
करोतीति निवत् तेन न वैश्वदेवाख्यपुरोडाशस्य चतुर्धाकरणं किंच योगादेव चेत्फलसिद्धिस्तदा न षष्ठी न चतु
र्दशी नाष्टमीत्यनध्यायकरणप्रतिपन्ने तिथिशुद्ध्यादिकं व्यर्थमेव स्यात् न च विप्रायर्थं तिथिशुद्ध्यादिकं व्यर्थमेव
स्यात् न च विप्रायर्थं तिथिशुद्ध्यादिकं सार्थकं स्यादिति वाच्यं तत्रापि नन्दात्रशूलादिभिरेव प्राशस्त्यावबोधनात्
अष्टोभयदोषापवादकत्वे इष्टे शुभाशुभप्रकरणे यात्राप्रकरणे चोक्तं [illegible] स्थलान्तरेति देशं विना योगयात्रोपनिबं
धः कर्त्तव्यः स्यात् शावप्रतिकृतिदाहश्राद्धनिर्णयकथनवत् नहि तत्र पंचांगदोषा युज्यंते यद्येवं संस्कारप्रक
रणगृहप्रवेशप्रकरणादीनां पार्थक्येन पनिबंधात्पंचांगदोषापवादकता [illegible] नास्तीति चेन्न उच्यते तत्र हि पंचा
गसंशुद्धिदिनादिकं चेति वसिष्ठादिभिः पर्वाव्यतिक्रमो न तिथ्यायशुभाङ्गीति ग्रन्थकृता नाप्यनिर्देशोपनिबंधस्य हेत
त्वात् अतः सर्वापवादिके त्वयुक्तः पक्षः तस्मादबाधेनोपपत्तौ बाधोऽनन्याय्य इति हेतो विषयविवेक इत्येव यु
क्तः पक्षः सच यथा यात्रा हि द्विविधा एका साधारणयात्रा, परा समरविजययाख्या साधारणयात्रा वर्णचतुष्टय
स्य साधारणी तत्र बहुधा बहुनाकालेन बहुदोषहासेन बहुगुणोपादाने चेष्टितं द्वितीया समरविजयाख्या राज्ञा राम॰
मेव तत्र योगयात्रा समरविजयोपयोगिनी उपस्थिते युद्धे पंचांगशुद्धिर्बहुदिवसप्राप्येति तद्विचारानुपयोगा २५

तु उक्तं च वसिष्ठेन योगयात्राप्रारंभे उक्ता साधारणी यात्रा युद्धयात्रां ब्रवीम्यहं ब्रह्मं तिथि नृपाः सर्वे लग्नेनैव
यिनः सदा योगलग्नैर्युता राज्ञां यात्रा च विजयप्रदा विचित्रान्योगलग्नांस्तान्सम्यग्वक्ष्ये समासत इति अन्यत्तु बुद्ध
विनैवात्ययिककार्यविषये योगयात्रेत्याह: यदाह पराशरः आत्ययिककार्यापाते दैवेन विनिपीडिते च यात
व्ये केवलविलग्नयोगादपि यात्रासिद्धिमवाप्नोतीति तत्रापि केवलेन योगयात्राबलेनैवं विधे विषये यात्रा न वि
धेया किंतु यथासंभवं पंचांगसंबंधिनां द्विविधानां दोषाणां त्यागः तादृशानां ग्रहाणां चोपादानं विधेयं संति
हि द्विविधा दोषाः नैसर्गिका अन्याहिताश्च यथा तिथ्येन षष्ठी न च द्वादशीति नैसर्गिको दोषः चापां त्यगे गोच
टकगे इति ह्यर्थदोषोन्याहितः एवं वारनक्षत्रयोगचित्रायोगानां द्वैविध्यमूह्यं गुणएवं गुणस्त्री भे द्विविधा हया
दित्यादि विहितनक्षत्रत्वं नैसर्गिको गुणः शुभग्रहादिसाहित्यमन्याहितो गुणः एवमन्येषामपि गुणानां द्वैविध्यमूह्यं
तत्राप्यत्र यथासंभवं दोषहानं गुणोपादानं चांगीकृत्य योगयात्रा विधेया एवं ब्राह्मणादीनामप्यावश्यकका
र्यानिपातविषये नक्षत्रादिबलं ग्राह्यं यथासंभवं च लग्नादिसमस्तदोषगुणानां हानोपादानेन्यायेस्त इति त
था च लल्लः यानव्यसनगते ह्यनिष्टदैवे च भूपतिस्त्वरया लग्नैरभीष्टकल्पैः व्रजेन्निर्धनेषु च भेषु समभुक्ता
र्धेषु पराधीनेषु अनेकसाधारणेषु शीघ्रेषु प्रायेणागमनमिष्टं सदैव न तु तस्य दमचिंतास्तीति अत एव न तिथिर्न
चनक्षत्रं न ग्रहो नैव दैवं बलं योगमेव प्रशंसंति वसिष्ठात्रिपराशरा इति वराहवाक्यं योगयात्रालग्नप्रशंसापरं न
तु तिथ्यादीनामपवादकमिति तात्पर्यं ननु पूर्वं दोषहानपूर्वकं समीचीनलग्नाभिधानं कृतमेवास्ति को वि
योगयात्रालग्नेषु विशेष उच्यते शुक्रः सप्तमो लग्नभंगकर्तेत्युक्तं प्राक् अत्र तु षष्ठित्रिचतुर्थे सति शुक्रः सबु
धश्चेत्सप्तमस्थस्तदा तद्योगयात्रालग्नमतीव शुभं एतादृशं योगलग्नं ग्रंथकृद्वक्ष्यति यदा हस्वीपतिः यथा
हि योगादूष्मतादूष्मतायने विषं विषायते मध्वपि सर्पिषा समं तथा विहायस्व फलानि खेचराः फलं प्रयच्छंति
हि योगसंभवमिति योगान्नुदुष्टान्कृत्वा रिडष्टव्ययोगेन शोधनादित्यर्थः सर्पिर्घृतं स्वभावतो लग्नप्राबल्ये योगा

वृ॰टी॰
या॰प्र॰
२६

पि चेत्तत्संभवेत्तदांतीवशुभफलदं लग्नं अत एव योगेन यात्रा योगयात्रा इत्यन्वर्थसंज्ञा विज्ञानमपि प्रतीयते योगो ना
म कियतां ग्रहाणां नियतस्थानावस्थितत्वं एवं वक्ष्यमाणेषु सर्वेष्वपि योगयात्रालग्नेषु यथासंभवं किंचिद्दूष
णसद्भावेऽपि तस्मादेव वाक्याद्दोषाभावपूर्वकं गुणाधिक्यमस्तीति व्याकर्तव्यमित्यलमतिप्रसंगेन अथ योगयो
गयात्रालग्नमाह सहजे रविर्दशमभे शशी तथा शनिर्मंगलो रिपुगृहे सितः सुते हिबुके बुधो गुरुरपीह ल
ग्नगः सज्जयत्यरीनचलितो चिरान्नृपः मंजुभाषिणीछंदः तल्लक्षणं च सजसा जगौ भवति मंजुभाषिणीति अ
स्यार्थः सगण जगण सगण जगण गुरवो यस्य पद्यस्य चरणे तन्मंजुभाषिणीनामा यथा ॥ ॥ऽ० ।ऽ।० ॥ऽ०।ऽ
।०।ऽ ननु मंजुभाषिणीति पद्यनामधेयमुक्तं लक्षणं तु चरणस्यैवोक्तं न सकलस्य पद्यस्य सत्यं एतच्चरणलक्ष
णं पादचतुष्टयेपि ध्येयं समवृत्तत्वात् त्रिविधानि हि वर्णछंदांसि सममर्धसमं विषमं चेति सममर्धसमं वृत्तं वि
षमं च तथापरमिति तत्रैवोक्तत्वात् तत्र यस्य पद्यस्य चत्वारः चरणा एकलक्षणग्रथितास्तत्समं वृत्तं उक्तं च अंघ्र
यो यस्य चत्वारस्तुल्यलक्षणलक्षिताः तच्छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते तल्यमेकं यथा द्रुतविलंबितं नव
पलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजं द्रुतलतांतलतांतमलोकयत्ससुरभिं सुरभिं सुमनोभरैरि
ति लक्षणं चेदं द्रुतविलंबितमाह नभौभराविति यस्य पद्यस्य प्रथमचरणतृतीयचरणे एकलक्षणलक्षिते त
दर्धसमं वृत्तं प्रथमात्रिसमो यस्य तृतीयचरणो भवेत् द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते तत्रैवोक्तत्वात् ए
तेनार्धसममर्धसममित्यन्वर्थसंज्ञापि यथा पुष्पिताग्रा अनुगिरमृतुभिर्वितायमानामथ सविलोकयितुं वना
न्तलक्ष्मीं निरगमदभिराद्धुमादृतानां भवति महत्सु न निष्फलः प्रयास इति पुष्पिताग्रालक्षणं चेदं अयुजि नयु
गरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति यस्य तस्य पद्यस्य चतुर्षु चरणेषु प्रत्येकं भिन्नं भिन्नं पदं लक्षणं
तद्विषमं वृत्तं छंदःशास्त्रविशारदा इति यथोक्तता ननु सर्वएव समवेत्यकमपि गुणमेति शुद्धपता सर्वगुणाविरहि
तस्य हरेः परिपूर्णतया कुरुते न इंद्रकोपगुण इति लक्षणं चास्येदं सजसा दिमे सलघुकौ च नसजगुरुकाः अथोक्ता अ

राम॰
२६

त्रिगतभनजलागयुता सप्त मात्रा गोचरणमेकतः पाठः तदिति मगणादिकगणलक्षणमुक्तं भामहेनामस्त्रिल
घुस्त्रिगुरुस्त्रिनकारो भादिगुरुः पुनरादिलघुर्यः जो गुरुमध्यगतो रलमध्यः सोन्तगुरुः कथितोन्तलघुस्तः एवं सत्य
त्रमंत्रभाषिणीछंदसः समवृत्तत्वादेकचरणलक्षणाभिधानेनैव दोषेणेत्यलमतिप्रसंगेन अथ प्रस्तुतमनु
सरामः सहजइति रविः सहजे तृतीयस्थाने स्यात् चंद्रो दशमे दशमस्थाने शनिमंगलौ रिपुगृहे षष्ठस्थाने स्यातां
सितः शुक्रः सुते पंचमस्थाने बुधो हिबुके चतुर्थस्थाने गुरुर्लग्नगः चेत्स्याद्यदि तथा शत्रूपादस्परणे इहैवं वि
धेयोगयात्रालग्ने नृपो राजा प्रचलितः शत्रुनगरजयार्थं कृतयात्रः सन् चिरात्स्वल्पकालेनैवारीन् शत्रून् जहति
वशीकरोतीत्यर्थः यदाह वराहः लग्ने गुरुर्बुधश्च हिबुकात्मजस्थो षष्ठोऽर्कजार्के तनयोदिनकृत्तृतीयः चं
द्रश्च यस्य दशमे भवति प्रयातुस्तस्याभिवांछितफलाधिरलं नृपस्येति बुधो हिबुके भृगुरात्मजे इति यथाव्या
ख्यानान्वयः क्वचिद्गुरुबुधाविति पाठः संचिंत्यः भृगुर्हिबुके इति तावद्युक्तं परं तु रविस्तृतीये बुधः पंचमे इतीद
मयुक्तं नहि सूर्यो तृतीयो बुधः कदापि न संभवेत् तस्मात्प्रागुक्त एव साधीयान् पाठः अथान्ययोगयात्राल
ग्नमाह भ्रातरि सौरिभूमिसुतौ वैरिणि लग्ने देवगुरुः आयगते कै शत्रुजयः चेदनुकूलो दैत्यगुरुः अस्य गाथा
छंदः तल्लक्षणं च विषमाक्षरपादं वा पादैरसमं दशधर्मवत् यच्छंदो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तमि
ति अत्र ग्रंथे सर्वच्छंदोभ्यो यदन्यद्विषमाक्षरपादं पादैरसमं वा छंदस्तद्गाथाख्यमिति केचिदाहुः अपरे तु प्रागुक्ते
षु समानाक्षरपादेषु उक्तादिष्वपि विशिष्टयस्याभिधानं नोक्तं तद्गाथेत्यूचुः तदेतदर्थद्वयं यच्छंदो नोक्तमत्र गाथेतीत्ये
तस्याव्युत्पत्त्या लभ्यं अतएव पिंगलः सूत्रकारोपि सर्वगाथाकारेण आयुक्ते गाथेत्यवोचत् छंदोग्रंथांतरेस्य नामामालि
भ्रातरि तृतीये सौरिः शनिः स्यात् वैरिणि षष्ठस्थो भूमिसुतो मंगलः लग्ने देवगुरुः आय एकादशस्थानं तत्रगतो कैश्च
एवंविधे योगे राज्ञः शत्रुजयो भवेत् चेद्दैत्यगुरुः शुक्रोनुकूलो यातव्यादिकक्षवर्ती भवति यदाह वराहः होरातृतीयरि
पुलाभगतैः क्रमेण जीवार्किभौमरविभिर्भृगुजोनुकूले यातोत्ति दृप्तमपि शत्रुबलं निहंति नैशं तमिस्रमिव तिग्ममयू

मु॰टी॰
यात्रा॰
२२

खमालीति भृगुज्ञात्तक्रूरसंयातव्यादिकृष्टवर्तित्वं विवक्षितं यदाह बादरायणः लग्नत्रिलाभारिगतैः क्रमेण जीवार्कि
सूर्यावनिजैः सितेच यातव्यादिकृष्टगतेनानरेंद्रः शत्रोर्बलं हंति गतोचिरेणेति अथान्ययोगयात्रालग्नमाह (लग्नत्रिला
भारिगतैः क्रमेण) तनौजीवइंदुर्मृतौवैरिगोर्कः प्रयातः महीद्रो जयत्येव शत्रून् गाथाछंदः प्राग्वत्समतेग्रेग्रंथांतरेतु
तनौलग्नेजीवोगुरुः स्यात् मृतावष्टमस्थानेइंदुः स्यात् वैरिगः षष्ठस्थानगतोर्कः चेत्स्यादेवंविधेयोगे प्रयातागंता
महीद्रोराज्ञाशत्रून् जयत्येव यदाह श्रीपतिः गुरुर्लग्नेरविः षष्ठे रंध्रेणेंदुः चगाकृतः यस्यतस्यारिसेनाग्रेखलेमैत्रीव
नस्थिरेति रंध्रेणेत्युपलक्षणेनतृतीया अत्रगुरुरुदयेरिपुराशिगतोर्कोयादिनिधनेपिचशीतमयूखः भवतिगतोत्र
शशीवनरेंद्रोरिपुवनितानननामरसानामिति नारदोपि जीवार्कचंद्रालग्नारिरंध्रगायदिगाकृतः॥ तस्याग्रेखचलमै
त्रीचनस्थिरारिपुवाहिनीति बादरायणोपि गुरुर्विलग्नेरिपुराशिगोर्कस्त्वथाष्टमेशीतमयूखमाली॥ गतोत्रयोगेरिपु
कामिनीनांवक्त्रारविंदेषुशशित्वमेतीति अथान्ययोगयात्रालग्नमाह लग्नगतः स्याद्देकेचिद्रंध्रेनेंदुरितिपाठंपठंति
तत्ररंध्रेष्टमेस्थानेइंदुर्नोपेक्षितो यत्रउत्राप्यस्तुचंद्र इतिव्याकुर्वते तदशुद्धं तस्मात्स्यष्टमाह [illegible] वपुरोधाः लाभ
धनस्थैः शेषनभोगैः अत्रसुप्रतिष्ठायांपंक्तिछंदः तल्लक्षणंच भौगितिपंक्तिः यथा ऽ॥०ऽऽ इहस्यातिलेग्नगतः स्यात् अ
न्यग्रहालाभधनस्थानएकादशद्वितीयस्थानस्थाश्चेत्तदेवंविधेयोगेराज्ञोविजयः उक्तंचनारदेन लग्नस्थेत्रिदशाचार्येध
नायस्थैः परग्रहैः गतस्यराज्ञोरिसेनानीयतेयममंदिरमिति श्रीपतिनापि वाक्पतावतनुस्थितेवित्तलाभगैः परैः ग
तोरिवाहिनीनीयतेंतकालयमिति अथान्ययोगलग्नमाह द्यूनेचंद्रेसमुदयगेर्केजीवेशुक्रेविदिधनसंस्थे इं
द्रयोगेचलतिनरेशोजेताशत्रून्गरुडइवाहीन् अस्यपंक्तौमत्ताछंदः तल्लक्षणंच ज्ञेयामत्तामभसगयुक्ता यथा
ऽऽऽ॰ऽ।।॰।।ऽ॰ऽ चंद्रेद्यूनेसप्तमस्थानिसति अर्केसमुदयगेलग्नगेसति जीवेशुक्रेविदिबुधेएषुत्रिषुग्रहेषुधनसं
स्थेषुद्वितीयस्थानेषुसत्स्वएवंविधेचेन्नरेशः चलतितदाशत्रून्जेताजेष्यतिकःकानिव गरुडः अहीन्सर्पानिव यथाजय
ति यदाहवराहः शुक्रेवाक्पतिबुधेधनसंस्थेसप्तमेशशिनिलग्नगतेर्के निर्गतोनृपतिरेतिकृतार्थोवैनतेयवदरी

राम॰
२२

न्विनिहन्त्येति अथान्यदपियोगलग्नमाह वित्तगतःशशिपुत्रोभ्रातरिवासरनाथः लग्नगतेभृगुपुत्रेसु-
शलभाइवसर्वे अस्यानुष्टुभिचित्रपदाछंदः तल्लक्षणंच भोगितिचित्रपदागः यथा ऽ।।ऽ।।ऽऽ शशिपुत्रो
बुधोवित्तगतःद्वितीयस्थः वासरनाथःसूर्यो भ्रातरितृतीयस्थः भृगुपुत्रेशुक्रेलग्नसंस्थेसति एवंविधेयो
गेचेद्राजाचलति तदाशत्रवःशलभाइवसुः यथाशलभाअग्नौस्वयमेवापतंतितथाशत्रवोपितत्रराजप्रता
पानलेपतिष्यंति यदाहवराहः मूर्तिवित्तसहजेषुसंस्थिताःशुक्रचंद्रसुततिग्मरश्मयः यस्ययानसमयेर
णानलेतस्ययांतिशलभाइवारयइति अथान्ययोगलग्नमाह उदयेरविर्यदिसौरिरिगिः शशीदशमेपि
वसुधाधिपतिर्यदियातिरिपुवाहिनीवशमेति अस्यगाथाछंदः प्राग्वत्स्वमतेग्रंथांतरेतु यदिउदयेलग्नेरविः
स्यात् सौरिरिरिगः षष्ठगःस्यात् शशीदशमस्यस्यात् तदेवंविधेयोगे यदिवसुधाधिपतीराजायाति तदारि
पुवाहिनीशत्रुसेनावशमेतीति यदाहनारदः व्यापारशत्रुमूर्तिस्थैःचंद्रमंददिवाकरैः रणेगतस्यभूपस्य
जयलक्ष्मीःप्रमाणिकेति व्यापारोदशमं वराहोपि दिवाकरोलग्नगतोयदिस्यात्षष्ठेर्कसूनुर्दशमेशशीच
योगेत्रयातस्यनतिष्ठतेन्या बलेनहीनस्यबलान्वितोपीति अथान्ययोगयात्रालग्नद्वयमाह तनौशशिजोजी
रविर्दशमेबुधोभृगुसुतोपिलाभदशमे त्रिलाभरिपुभेषुभूसुतशनीगुरुज्ञभृगुजाःस्थावलयुता अस्यज
गत्यांजलोद्धतगतिछंदः तल्लक्षणं रसैर्जसजसाजलोद्धतगतिः रसैःषड्भिःषड्भिरक्षरैःयतिर्यतिर्विछेदः त
ल्लक्षणंच यथा ॥ ।ऽ।ऽ।ऽ। ।ऽ।ऽ।।ऽऽ तत्राद्यस्यवसुधाधिपतिर्यदियातिरिपुवाहिनीवशमेतीत्युत्तरार्द्धं सहजेषु
त्रइत्येतत्पूर्वार्धंतमनुवर्तते तेनयत्रश्लोकेफलनिर्देशोनास्ति तत्रजिगमिषोराज्ञोविजयःस्यादितिवाक्यार्थो
ध्येयः तनौलग्नेस्थितायथासंभवंस्थाने रविर्दशमभेस्यात् बुधोलाभेदशमेवास्यात् भृगुसुतोवालाभेदशमे
वास्यात् तदेवंविधेयोगेप्रचलितस्यराज्ञोजयःस्यात् यदाहवराहः सौरेभौमेलग्नगेर्केत्समध्येकर्मण्यायेमार्गे

वेचंद्रजेवा याया(द्)नृपः शत्रुदेशं निहंतुं दग्धुं शत्रुं कालवत्क्रूरचेष्टइति गुरुरपि आरेवास्तर्यज्ञेवापिलग्नेगेदशमेर
वौ कर्मण्यायेसितज्ञेवायोगोयंयात्नहतमइति अयमेकोयोगः त्रिलाभत्रिषु भेषु तृतीयेकादशषष्ठस्थाना
नामन्यतमस्थानइयंस्थितोभूसुतशनी मंगलशनैश्चरौ यदिस्यातां चेयस्मिन्कस्मिंश्चित्स्थानेस्थितागुरुज्ञ
भृगुज्ञाबलयुतास्युस्तदैवं विधेयोगेतथाराज्ञोविजयइत्यर्थः यदाह नारदः त्रिषडायेषुसौरारौबलवंतः शुभा
यदि यात्रायां नृपतेस्तस्यकरस्थाशत्रुमेदिनीति श्रीपतिरपि आयारिषु यमारौचेद्बकिभाज्ञः शुभग्रहाः प्र
याणेनृपतेर्यस्यहस्तस्थातस्यमेदिनीति शुभग्रहाः चंद्ररहिताविवर्जिताः यदा हरगुरुः यमारौत्रिषडायस्थौ
बुधजीवसिताःस्तदा महाबलयुतायोगोयात्नरिपुहंदेदसंदेति अथान्ययोगयात्रालग्नमाह समुदयगेविबुध
गुरौमदनगतेहिमकिरणे हिबुकगतौबुधभृगुजौसहजगताःखलचराः अस्यगाथाछंदः प्रायत्स्वमंत्र
गंथांतरेत्र समुदयगेलग्नस्थेगुरौसति हिमकिरणेचंद्रे मदनस्थेसप्तमस्थेसति हिबुकंचतुर्थस्थानं तत्रगतौ
बुध शुक्रौस्यातां खलखचरेणपापग्रहे सहजंतृतीयस्थानेतत्रगतेचसत्येवंविधेयोगेवसुधाधिपतिर्यदा
यातिरिपुवाहिनीतदावशमेति यदा हवराहः पापास्तृतीयेहिबुकेसितज्ञौजीवोविलग्नेशुगलांछनेस्ते य
स्यायमेतस्यबलंरिपूणांहृतंकृतघ्नेष्विवयातिनाशमिति अथान्ययात्रायोगलग्नमाह त्रिदशगुरुस्तनुगो
मदनेहिमकिरणेरविरायगतः सितंशशिजावपिकर्मगतौरविसुतमूमिसुतौसहजे अस्यत्रिष्टुभिसुमुखी
छंदः तल्लक्षणंच नजौलजगौदिनासुमुखीयथा ॥१०।३।१२।३।१॥ बृहस्पतिर्लग्नगतःस्यात् चंद्रःसप्तमेस्यात् शु
क्रबुधौदशमगतौस्यातां सूर्यएकादशस्थःस्यात् शनिमंगलौतृतीयस्थानेस्यातां एवंविधेयोगेराज्ञोविज
यएव यदाहवराहः चंद्रेस्तगेदेवगुरौविलग्नेज्ञशुक्रयोःकर्मणिलाभगेर्के सौरारयोर्धात्मगयोःप्रयातानृपःस्वश
त्यानिवशत्रून्निशत्रूनिति अथान्ययोगयात्रालग्नमाह देवगुरौवाशशिनितनुस्थेवासरनाथेरिपुभवनस्थे पं

गं

वमगे हे हिमकरपुत्रः कर्मणि सौरिः सुहृद्दिसितश्च अस्य त्रिष्टुभि श्रीकंठः तल्लक्षणं च पंचरसैः श्रीमतिनगगैः
पंचरसैः षड्भिरथैश्च यतिः यथा ऽ।।०।।ऽ० ।।।०ऽऽ गुरौ चंद्रे वा लग्नस्थे सति सूर्ये षष्ठस्थे सति बुधः च पंचमस्था
ने शनिर्दशमे स्यात् शुक्रः चतुर्थस्थाने स्यात् एवंविधे योगे जिगमिषो राज्ञो विजय एव यदा हरवाहः गुरौ वि
लग्ने यदि वा शशांके षष्ठे रवौ कर्मगते कपुत्रे सितज्ञयोर्बंधुसितयोः अश्वयात्रा जनित्री व हिता निधने जनित्री
माता अथान्ययोगयात्रालग्नमाह हिमकिरणसुतो बली चेत् नौ त्रिदशपाते ग्रहहीं केंद्रस्थितः व्ययग्रह
सहजारिधर्मस्थितो यदि भवति निर्बलः चंद्रमाः अस्य जगत्याप्रमुदित ... कंठः तल्लक्षणं च प्रमुदितवदना
भवेन्नौ रौ यथा ।।।० ।।।०ऽ।ऽ०ऽ।ऽ० बुधो बली संस्थः चेत् नौ लग्ने स्यात् हि निश्चये नष्टग्रहस्य निश्चं तत्केंद्रगतः
प्रथमचतुर्थसप्तमदशमानामन्यतमस्थानस्थः यदि ..नेर्बलीच .. शुभाधिकारप्राप्ता बलरहितः सन्
चंद्रो द्वादशतृतीयषष्ठनवमानामन्यतमस्थानस्थः तदैवंविधे योगे जिगमिषो राज्ञो विजय एव यदा हरवा
हः त्रिषण्नवांत्यषष्ठवस्तः शशांकः चांद्रिर्बली यस्य ग्रहश्च केंद्रे तस्यारियोषा मरणैः प्रियाणि प्रियः प्रियाणि
जनयति सैन्यमति तस्य सैन्यप्रियाः सैनिकाः अरियोषाभरणानि बलादपहृत्य स्वस्त्रीसात्कृत्वा रंतारं गप्रिया
णि जनयतीत्यर्थः अत्र यद्यपि बुधस्य स्थानविशेषो नाभ्यधायि तथापि लग्नस्थो बुध इति व्याकर्तव्यं यदा हरगु
रुः त्रिषण्नवांत्यगे चंद्रे लग्ने च सबले बुधे गुरौ केंद्रे तदायाता राज्यलक्ष्मीलक्ष्मीपदिति अथान्ययोगयात्रालग्नमा
ह अशुभखगैरनवाष्टमदस्थैर्हिबुकसहोदरलाभगृहस्थः कविरिह केंद्रगगीष्पतिदृष्टो वसुचयलाभकरः
खलु योगः अस्य जगत्यामभिनवतामरसाख्यं छंदः तल्लक्षणं च नरनजकरे अभिनवतामरसं नजजायः य
था ।।।०ऽ।०।।।०।।ऽऽ अशुभखगैः पापग्रहैर्हि निश्चितं नवमाष्टमसप्तमस्थानव्यतिरिक्तस्थानस्थैः सद्भिः यदा
कविः शुक्रः चतुर्थतृतीयैकादशस्थानस्थः सन् केंद्रस्थितो यो गीष्पतिर्गुरुस्तेन दृष्टो भवेत् एवंविधे योगे वसु
चयो द्रव्यसमूहः तस्य लाभस्य करः स्यात् विजिगीषो राज्ञो विजयोपि स्यात् उक्तं च वराहेण केंद्रोपगतेन वीक्षि

ते गुरुः लग्न आयच तुर्यगे सिते सिते पापैरनवाष्टसप्तगैर्वसनत्रिकं न यदा शुभयात्रापद इतिश्च चितु पापग्रहा नवमाष्टमस
प्तमस्थाः शुभा एवेत्युक्तं तथा च गुरुः भ्रातायगृहगे शुक्रे केंद्रे वा गुरौ स्थिते सप्ताष्टनवराशिस्थाः पापा यातुः शुभ
प्रदा इति गृहं च तुर्यस्थानं अथान्ययोगयात्रालग्नमाह रिपुलग्नकर्महिबुके शशिजे परिवीक्षिते शुभनभोग
मनैः व्ययलग्नमन्यथगृहेषु जयः परिवर्जितेऽपि शुभनामधरैः अस्य तु गणत्याप्रमिताक्षराछंदः तल्लक्षणं च प्रमि
ताक्षरा सजससैरुदिता यथा ॥ऽ०।ऽ।।।ऽ०॥ऽ० षष्ठलग्नदशमचतुर्थस्थानानामन्यतमस्थानस्थे शशिजे बुधे
शुभनभोगमनैः शुभग्रहैः स्वर्द्वग्गुरुशुक्रैः परिवीक्षिते दृष्टे सति द्वादशलग्नसप्तमस्थानेभ्यो व्यतिरिक्तस्थाने
स्थेः शुभनामधरैः पापग्रहैरुपलक्षिते सति एवंविधे विशिष्टयोगे जिगमिषो राज्ञो जय एव स्यात् यदाह वरा
हः लग्नारिकर्महिबुकेषु शुभेक्षिते शशियूनांत्यलग्नरहितेषु शुभग्रहेषु यातुर्भयं न भवति प्रतरेत्स शुद्धं यय
श्मना पि किम्युतारिसमागमेषु इति अथान्ययोगयात्रालग्नमाह लग्ने यदि जीवः पापाय दिलाभकर्मण
पि वा चेद्राज्याधिगमः स्यात् यूने बुधशुक्रौ चंद्रो हिबुके वा तद्वत्फलमुक्तं सर्वैर्मुनिवर्यैः अस्य तु गणत्यामणि
मालाछंदः तल्लक्षणं च त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः तगण यगण तगण यगण गुहः कार्तिकेयः तस्य
वक्त्राणि मुखानि षट् तैः षड्भिः षड्भिरक्षरैः भिन्ना यतिसहिता यथा ऽऽ।०।ऽऽ० ऽऽ।० गुरुर्यदि स्यात् उक्तं च वराहे
ण होराश्रिते देवगुरौ प्रयाता क्रूरग्रहैः कर्मणि लाभगैर्वा हत्वारिपूर्णां श्रियमद्भुतांगः श्रियं क्षितीशो व्ययको
शमेतीति क्षितीशो राजा रिपूनां श्रियं नाशं अद्भुतांगः क्षतरहितशरीरः सन् अक्षयकोशमक्षीणकोशं श्रियं स्व
गृहमेतीति आगच्छतीत्यर्थः अथवा यूने सप्तमे बुधशुक्रौ स्यातां चंद्रश्च हिबुके चतुर्थस्थाने स्यादेवं विधे यो
गे सर्वैर्मुनिवर्यैस्तद्वत्फलमुक्तं राज्याधिगमः स्यात् तथा च श्रीपतिः शशिनि चतुर्थे सविदि सिते स्ते जयति गतो
रीन्हरिरिव युद्धे इति वराहोपि शशिनि चतुर्थे गृहे सप्ते बुधसहिते लग्नगते भृगुपुत्रे गमनमवाप्य पति मनुजानां राम॰
जयति रिपून्स्मरेण विनैवेति अथान्ययोगयात्रालग्नत्रयमाह रिपुतनुनिधने शुक्रजीवेंदवो व्ययबुधभृगुजो २९

तुर्यगेहस्थितौ मदनभवनगः चंद्रमा वांबुगः शशिसुतभृगुजांतगौ तत्सुखं द्रमाः अस्यातिजगत्यां चंद्रिकाछंदः
नन्नजर्णच नननततगुरुभिः चंद्रिकाश्वर्तुभिः अश्वर्तुभिः सप्तभिः षड्भिस्त्वाहारैर्यतिः ।।।·।।।० ऽऽऽ।०ऽऽ।०ऽअ
त्रस्थानसाम्याद्गृहसाम्याच्च यथासंख्यं ज्ञेयं। यथारिपौ षष्ठे शुक्रः तनौ जीवः निधने सप्तमे इंदुः चंद्रः एवंवि
धे विशिष्टे योगे राज्ञो विजयः स्यादित्यर्थः यदाह वराहः गुरौ विलग्ने भृगुजेरिसंस्थे चंद्रे हिमे हंति गतोरिसेनां
वृषिंयथा रक्षिणमार्गचारी हृद्रो यथाङ्गस्वतनुस्थशुक्र इति अयं प्रथमो योगः अथ बुधभृगुजौ तुर्यगेहं चतु
र्थस्थानं तत्र स्थितौ चेत्स्यातां चंद्रमा मदनभवनगः सप्तमस्थानस्थितः चेत्स्यात्तदैवं विधेपि योगे रा
ज्ञो विजयः यदाह वराहः सितेंदुजौ चतुर्थगौ निशाकरः च सप्तमे यदा तदा गतो नृपः प्रशास्त्यरीन्विनारणमि
ति अथ तृतीयो योगः वा अथवा चंद्रमा अंबुगः स्वतुर्थस्थानस्थः सन् शशिसुतभृगुजयोर्बुधशुक्रयोरंतर्ग
तो मध्यवर्ती स्यात् एवंविधे योगे गंतू राज्ञो विजय एव यदाह वराहः बुधभार्गवमध्यमनेहिमगौ हिबुकोप
गते च बुधः प्रवसेत् गृहहृतरिपुंशयदि वा नहतः पुरहृतयमप्रतिमो भवति ननु चंद्रस्य बुधभार्गवमध्य
वर्तित्वं किं भिन्नराशिस्थितत्वे सति उतैकराशिस्थितत्वे सति विवक्षितं तत्र भिन्नराशिकृतमध्यवर्तित्वे वि
वक्षिते ह्ययमर्थः स्यात् बुधभार्गवयोरन्यतरस्तृतीयस्थाने परः पंचमे चंद्रः चतुर्थ इति एकराशिस्थितत्वेन
शुक्रंते पौर्वापर्यं चतुर्थस्थाने बुधः शुक्रो वा स्वल्पांशः स्यात् तयोरन्यतरो तिवडूंशस्त्रैव स्थाने चंद्रस्त
त्रैवांशे मध्यवर्ती स्यात् यथा बुधो राश्यादिः ३ ५ ९ चंद्रः ३ १५ २ शुक्रः ३ २४ ४ एवं पक्षद्वयसंभवे किं
युक्तमित्युच्यते यद्यपि वराहवाक्ये संदेहस्तथापि बादरायणवाक्यादेकराशिस्थ व धानकृतमेव मध्यव
र्तित्वं विवक्षितं यदाह बादरायणः पुत्रावुडश्चिक्यगतैः क्रमेण दुश्चिक्यतो यात्मजसंस्थितैर्वा बुधेंदुशुक्रै
र्यमप्राकृनाथ काष्ठां प्रयातस्य जयः प्रदिष्ट इति काष्टां दिशं एतच्चोपलक्षणं तेन लग्नस्थः चंद्रपार्श्ववर्तिस्था

मु॰टी॰
या॰प्र॰
३

नष्टये वर्त्तिनो बुधशुक्रयोर्मध्यवर्ती चेत्स्यात्तदासौ पि राज्ञो विजयदः इति यदाह गुरुः चंद्रेज्ञसितयोर्मध्ये हिबुके
लग्नगेपि वा प्रयातो श्रियमाप्नोति जित्वा शत्रून्महीमपि अथान्ययोगयात्रालग्नद्वयमाह सितजीवभौमबुध
भानुतनूजास्तनुमन्मथारिहिबुकत्रिशहे चेत् क्रमतोरिसोदरवशा नवहोरा हि बुकायगैर्गुरुदिने खिलखेटैः
अस्य गाथाक्षरः प्राग्वत्समते ग्रंथांतरेत लग्ने शुक्रः स्यात् सप्तमे जीवः षष्ठे भौमः चतुर्थे बुधः तृतीये शनिः
एवंविधे विशिष्टे योगे राज्ञो विजय एव यदाह वराहः यस्योदयास्तारिचतुर्हिबुसंस्थाः शुक्रांगिरोंगारकसौम्य
सौराः द्विषद्दलस्त्रीवदनानि तस्य क्रांतानि कांतानवलोकयंतीति नारदोपि शुक्रार्यज्ञार्कि भौमेषु लग्ना
स्ताम्बुत्रिशत्रुषु गतस्वपथे परिवत्स्यूरग्नौ लाक्षेव लीयत इति श्रीपतिरपि यमस्तशुक्रेज्यमहीसुतेषु त्रिबं
धुलग्नास्तरिपुस्थितेषु विलीयते वैरिचमूरणाग्रे लाक्षेव वह्नौ नृपतेर्गतस्येति अयमेको योगः अथान्यः
गुरुदिने बृहस्पतिवासरे अखिलखेटैः समस्तग्रहैः सूर्यादिभिः सप्तभिः क्रमतो योदिस्थानस्थितैः सद्भिरुप
लक्षिते सति यथा षष्ठे सूर्यः तृतीये चंद्रः दशमे मंगलः षष्ठे बुधः लग्ने गुरुः चतुर्थे शुक्रः एकादशे शनिरि
ति एवंविधे योगे राज्ञो विजय एव यदाह वराहः सूर्यादयो रिसहजांबरशत्रुलग्नषष्ठायगाः सहगुरोर्दिवसक्ष
यस्य॰ यातेरिसैन्यमुपयाति नितस्य नाशं मीमांसकश्रमणकेष्विव तीर्थमुख्यमिति मीमांसा विचारस्तन्मात्र
निष्ठा मीमांसकास्तेनु वेदसंबंधिविदः एवंविधाये श्रमणका बौद्धास्तेषां तीर्थेषु यथा वैदिकानां मुख्यनाशः अथा
न्ययोगयात्रालग्नद्वयमाह सहजे कुजे निधनगः च भार्गवो मदने बुधो रविरसौ तनौ गुरुः अथ चेत्स्युरीज्य
सितभानवो जलत्रिगता हि सौरिरुधिरौ रिपुस्थितौ अस्या तिजगत्या मंत्रभाषिणीछंदः तंत्रलक्षणमुक्तं
प्राक् यथा ॥३.।५।७।।५०।५।०५। तृतीये मंगलः स्यात् अष्टमे शुक्रः सप्तमे बुधः षष्ठे सूर्यः लग्ने गुरुः ए
वंविधे योगे राज्ञो विजय एव यदाह वराहः त्रिनिधनतनुसप्तमारिसंस्थाः ऊज्ञसितजीवबुधारविश्वयस्य राम॰
३

खस्तत्व जनितेन वलोकयात्रा न भवति तस्य चिरायशत्रुसेनेति अयमेको योगः अथान्यः अथेति योगान्तर
मुच्यते ईत्थसितभानवो वृहस्पतिशुक्रसूर्याः त्रलग्नात्रिगता चतुर्थे तृतीयस्थानगताः चेत्स्युः सौरिरुधिरौ शनि
मंगलौ रिपुस्थितौ षष्ठस्थितौ भवेतां एवंविधे विशिष्टयोगे हि निश्चितं राज्ञो जयः स्यात् यदाह वराहः कुजरवि
तनयुते रिभगतानां त्रलसहज्ञोपगतैः सितार्कजीवैः रिपुबलमुपयाति नाशमाशु श्रुतमधनस्य ऊर्द्धं बविनयेवेति
अथनामविशेषपुरस्कारेण योगयात्रालग्नमाह एकोऽत्र ज्यसितेषु पंचमतयः केंद्रेषु योगस्तथा द्वौ चेत्तेषु धियो
गपसु सकलायोगाधियोगः स्मृतः योगे क्षेममथाधियोगगमने क्षेमं रिपूणां वधं चाथाक्षेमयशोवनीश्च लभते
योगाधियोगे व्रजन् अस्यातिध्रुत्यां शार्दूलविक्रीडितेन छंदः तल्लक्षणं च सूर्याश्वैर्मसजस्ततः सगुरवः शार्दू
लविक्रीडितं सूर्याश्वैर्द्वादशभिः सप्तभिश्चाहारैर्यतिः यथा ऽऽऽ०।।ऽ०।ऽ।०।।ऽ०ऽऽ।०ऽऽ।०।ऽ० त्रैज्यसि
तेषु बुधवृहस्पतिशुक्रेष्वेकोपि योवा गुरुर्वा शुक्रो वा चेत्पंचमनयः केंद्रेषु स्यात्पंचमे वा स्थानेषु त्र्यज्यशु
क्रेषु द्वौ बुधगुरू बुधशुक्रौ वा चेत्पंचमतयः केंद्राणामन्यतमस्थाने स्थानभेदेन स्थाने केन वा स्थितौ स्यातां तदा
धियोगाख्यो योगः सकलाः त्रैज्यसिताः एषु पंचमतयः केंद्राणामन्यतमस्थानेषु स्थानभेदेन स्थाने केन वा स्थि
ताः चेत्स्युः तदा योगाधियोगाख्यो योगः अथमासफलमाह योग इति योगे व्रजन् राजा क्षेमं कुशलं लभते कुश
लेन गतागतं करोतीत्यर्थः अथाधियोगे व्रजन् राजा क्षेमं तथा रिपूनां शत्रूणां वधं च लभते अथो योगाधियोगे
व्रजन् राजा क्षेमयशोवनीश्च कारात्क्षत्रुवधं च लभते यदाह नारदः केंद्रत्रिकोणेष्वेकस्थयोगः शुक्रज्ञसुरेषु
अधियोगः स चेद्द्वाभ्यां त्रिभिर्योगाधियोगकः योगे यियासतो क्षेममधियोगे जयावहः योगाधियोगे क्षेमायु
र्विजयार्थी च भूतय इति वराहोपि एकेन वा बुधवृहस्पतिभार्गवानां योगो भवेन्नवमपंचमकंटकेषु द्वाभ्यां वा
द्वित्रिसुनयः स्वधियोगमेषां योगाधियोगमपरे त्रिभिरुद्दिशन्ति यातेन येन नृपतेर्यो रिपुरं व्रजंति क्षेमेनं तेगमनमा

सु·टी·
या·प्र·
१२

गमने च कर्तुं ह्यो मंयशो रिपुविनाशमथाधियोगे योगाधियोगगमने नज्ञ येद्धरिस्त्रीमिति अथ यशस्याधियो
गस्य च योगाधियोगस्य च भेदविचारः तत्र योगस्याष्टादश तथाहि अयोग्रहाः षट् स्थानानि तत्रैकस्तत्र ध
नस्थानषट्के स्थित्या षड्भेदाः एवं गुरोः षट् शुक्रस्यापि षट् एवं योगे अष्टादश भेदाः अथाधियोगस्याष्टो
त्तरं शतं भेदाः यथा ज्ञेज्यशुक्राणां द्वयोर्द्वयोर्योगे त्रयो भेदाः बुधगुरू बुधशुक्रौ तत्र बुधगुर्वोरेकैकस्थानस्थि
त्या षड्भेदाः स्थानभेदे तु बुधः प्रथमस्थाने गुरुः द्वितीयादिषु पंचसु स्थानेषु स्थितस्तदा पंच एवं गुरुः प्रथ
मस्थाने बुधो द्वितीयादिषु पंचसु तत्रापि पंचैव अथ बुधो द्वितीये गुरुस्तृतीयादिषु चतुर्षु तदा चत्वारो भेदाः
एवं वैपरीत्येपि चत्वारः तथा बुधस्तृतीये गुरुश्चतुर्थादिषु त्रिषु तदा त्रयः एवं वैपरीत्येपि त्रयः तथा बुधश्च
तुर्थे गुरुः पंचमे षष्ठे वा तदा द्वौ भेदौ एवं वैपरीत्येपि द्वौ तथा बुधः पंचमे गुरुः षष्ठे तदैको भेदः एवं वैपरीत्ये,
प्येकः एवं बुधगुर्वोः सर्वैर्मिलिताः षट्त्रिंशत्भेदाः स्युः अनेनैव प्रकारेण बुधशुक्रयोः षट्त्रिंशद्भेदाः एवं
गुरुशुक्रयोरपि तावंत एव मिलित्वाष्टोत्तरशतं भेदा भवंति अथ योगाधियोगभेदाः तथाहि ज्ञेज्यशु
क्राणां संघेनैकैकस्थानस्थित्या षड्भेदा भवंति अथ स्थानभेदेनोच्यंते भेदाः तत्र द्वयोः समुदाय एको भिन्न
श्चैवं ग्रहाणां त्रयो भेदाः स्युः यथा

बु	बृ	शु
बु	शु	बृ
बृ	शु	बु

तत्र द्विग्रहसंघः प्रथमस्थाने एको द्वितीयादिषु पंचसु स्थि
तस्तदा पंच भेदाः यदा त्वेकः प्रथम द्विग्रहसंघो द्वितीयादिषु पंचसु तदापि पंचैव अथ द्विग्रह
संघो द्वितीये एकस्तृतीयादिषु च तुर्षु तदा चत्वारो भेदाः एवं वैपरीत्येपि चत्वारः तथा द्विग्रह
संघस्तृतीये एकश्चतुर्थादिषु त्रिषु तदा त्रयः एवं वैपरीत्येपि त्रयः तथा द्विग्रहसंघश्चतुर्थे एकः पंचमे षष्ठे
वा तदा द्वौ भेदौ एवं वैपरीत्येपि द्वौ तथा द्विग्रहसंघः पंचमे एकः षष्ठे तदैको भेदः वैपरीत्येप्येक एव एवं बुध
गुरुसमुदायस्य शुक्रसहितस्य त्रिंशद्भेदाः एवमेव बुधशुक्रसंघस्य गुरुसहितस्य तावंत एव सर्वभेदैक्यं राम· १२

अथ त्रयाणामपि ग्रहाणां स्थानत्रयाक्रांतत्वेन भेदा उच्यंते तत्र बुधगुरुशुक्राः संचस्थ बुधसहितस्य तावं
तएव शुक्राणामन्यान्यपरिवर्तनात् षड्भेदा भवंति यथा एतदुत्पत्तिप्रकारो भास्कराचार्येण कपाशगणिते स्था
नां तमेकादिचयांकयान इत्यादिना अथवापि बु गु बु शु शु गु तत्र त्रिभिर्ग्रहैः षट्स्थानानां मध्ये निरंत
रस्थानत्रयाक्रांतेन चत्वारो भेदा एवं पंचभिरपि गु बु शु गु बु शु भेदैरित्येवं च चत्वारो ज्ञाताः सर्वे चतुर्विंशतिः
अत्रायं विचारः बुधः चतुर्थे उत्तरस्यां दिशि ला शु शु गु बु गु ७ लाटिकः केंद्रगतत्वाद्योगकर्तापि च तत्र किं
योगः प्रबल उत लाटिक इति तत्र सामान्यविशेषभावेन लाटिकदोष एव प्रबलः एवं सप्तमस्थः शु
क्रो लग्नभंगी प्रबल एव तथैवाधियोगे योगाधियोगे चोक्तं हे तत एव बुधशुक्रयोर्लालाटिकलग्नभंगिदोषौ प्रब
लाविति बालानामप्येतत्सुबोधं अत्र वसिष्ठकश्यपनारदाद्युषिभिर्वराहादिभिर्भूयांसि योगयात्रालग्नान्युक्ता
नि तानि तद्ग्रंथेभ्य एवावधार्याणि ग्रंथाधिक्यभयादत्र ग्रंथकृता नोक्तानि अथ विजयादशमीसंज्ञकं सिद्धमु
हूर्तमाह इषमासि सितादशमी विजया शुभकर्मसु सिद्धिकरी कथिता श्रवणर्क्षयुता सुतरां शुभदा नृपते
स्तु गमे जयसंधिकरी अस्य व्रतं गणनाटकाख्यं छंदः तल्लक्षणं च इह तोटकमंबुधिसैः प्रथितं यथा ॥ऽ०॥
ऽ० ॥ ऽ०॥ ऽ० स्पष्टार्थं पद्यं अत्राह नारदः वल्लक्ष्मपक्षदशमी आश्विने विजयाभिधा जयप्रदा सा यातॄणां संधिं वा
न पराजयमिति वसिष्ठेन तु श्रवणसाहित्ये प्राशस्त्यमुक्तं श्रवणर्क्षे यदा काले सा तिथिर्विजयाभिधा विजयादश
मी तत्र सर्वे कार्येष्वनिंदिता यात्रायां जयदा राज्ञां संधिं वापि प्रयच्छतीति अश्वयुक्शुक्ले इत्यनुवर्तते कालेकाल
स्वामिकायांतिथ्योर्दशम्यां अथैवं महता यासेन विचारिते पंचांगशुद्धिसहिते लग्ने सत्यपि मनोविशुद्धिमानव
ट्टयमाणे शकुनाद्यावश्यकत्वं तत्रापि प्रबलदुर्बलभावं च वसंततिलकाछंदसाह चेतोनिमित्तशकुनैः खलु सु
प्रशस्तैर्ज्ञात्वा विलग्नबलमुर्व्यधिपः प्रयाति सिद्धिर्भवेदथ पुनः शकुनादितोपि चेतोविशुद्धिरधिका न च तो वि

मु॰टी॰
३२
या॰प्र

नेयात् अथशकुनमंगलार्थमानंतयार्थेश्च चेतोंतःकरणं निमित्तमंगस्फुरणादि शकुनानि वक्ष्यमानानि एतैः ख
लु निश्चयेन सुप्रशस्तैः सद्भिः कृत्वा तथा समीचीनं विलग्नबलमपि ज्ञात्वा उर्व्यधिपो राजा प्रयाति तदा सिद्धिर्वां छि
तकार्यसिद्धिर्भवति यदाह नारदः मनोनिमित्तशकुनैर्लग्नं लब्धा रिपोः पुरं विजिगीषुर्यो व्रजति विजयश्रीस्तमे
त्यलमिति निमित्तमंगस्फुरणादि श्रीपतिरपि शकुननिमित्तमनोभिरनिंद्यैरुदयविशुद्धिमिह प्रतिपद्य रिपुवि
षयं प्रतियो विजिगीषुर्व्रजति तमेत्यचिराज्जयश्रीरिति यदा तु लग्नादिबलेसत्यपि निंद्यानि चेच्छकुनादीनि स्युः
स्तदा यात्रा निषिद्धैव यदाह वसिष्ठः अशुभानि निमित्तानि उत्पातशकुनानि च यात्राकाले तु णं तेषां निधनायाध
नायवेति यदा तु देवाच्छकुनलग्नादीनि अनिंद्यानि लब्धानि मनो विशुद्धिस्तु नास्त्येव तत्र कस्य प्राबल्यमित्यत
आहाथेति शकुनादिनो सकाशान्चेतो विशुद्धिरधिका तां चेतोविशुद्धिं विना नैयात् न गच्छेत् यदाह कश्यपः
निमित्तशकुनादिभ्यः प्रधानं हि मनोजयः तस्माद्यियासतां नृणां फलसिद्धिर्मनोजयादिति श्रीपतिश्च निमि
त्तराशितोनृणां मनस्तथैकतः अतो यियासतां बुधैर्मनोविशुद्धिरिष्यत इति अथ शुभसूचकसकलपदा
र्थसमवाये पियात्रायामवश्यं निषिद्धनिमित्तानि आह व्रतबंधनदेवतप्रतिष्ठाकरपीडोत्सवसूतकासमाप्तौ
न कदापि चलेदकालविद्युद्घनवर्षातुहिनेपि सप्तरात्रं अस्य विषमकं रसिवसंतमालिकाछंदः तल्लक्षणं च वि
षमे सयजा गुरु समे चेत्सभरा यश्च वसंतमालिका सा यथा विषमचरणे ॥।ऽ॥ऽ।ऽ।ऽऽ व्रतबंधनं यज्ञोपवी
तं देवताप्रतिष्ठा करपीडा विवाहः उत्सवो होलाकादिः समचरणे ॥ऽऽ॥ऽ।ऽ।ऽ।ऽऽ सूतकं द्विविधं जा
तनसूतकं मरणसूतकं चैतेषां पदार्थानां शास्त्रोक्तयावद्दिनसमासानां समाप्तौ समाप्तिं विना कदापि नैव चलेत्
गच्छेत् यदाह नारदः उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके असमाप्ते न कुर्वीत यात्रां तत्र जिगीषुरिति आ
शौचं मरणाशौचं सूतकं जननाशौचं च अकालेति विद्युत्प्रसिद्धा घनो घनगर्जितं वर्षो वृष्टिः तुहिनं नीहारः राम॰
३२

एषु पदार्थेषु अकालजेषु सत्सु सप्तरात्रं दिवसमात्रकं न चलेत् यदाह रत्नमार्तंडः पौषादिचतुरो मासान्प्राप्ता
वृष्टिरकालजा व्रतयात्रादिकं चैव वर्जयेत्सप्तवासरान् वृष्टिरकालप्रभवा च तुर्षु मासेषु पौषपूर्वेषु आसन्ना
हं त्याज्यं व्रतं चर्यादिकं तज्ज्ञेति नारदोपि अकालजेषु नृपतिर्विद्युद्गर्जितवृष्टिषु अकालजेषु सत्सु सप्तरात्रं न
तद्व्रजेदिति प्रयाणसमये वसिष्ठवाक्यं प्रयाणदिवसात्सप्तस्य विद्युदादेर्दोषातिशयसूचनार्थं तेन
तस्मिन्दिने नैव गच्छेदित्यर्थः वृष्ट्यादौ त्र्यहमेवाग्रेव स्थापति यदि मासद्वयं इति अथ राज्ञ एकदिनसाध्ये एकस्मान्
नगरान्नगरांतरगमने चिकीर्षिते तदिक्शूलाद्यभावं प्रश्नस्य विचारेणाह महीपतेरेकदिने पुरात्पुरे यदा भवे
तां गमनप्रवेशको भवारशूलप्रतिशुक्रयोगिनी विचारयेन्नैव कदापि पंडितः यथा वाराणसीनगराच्च र
णाद्रिगमनप्रवेशको स्यातां कार्यः यस्मिन्नेव दिने एकस्मात्पुरात् गमनं तस्मिन्दिने एव च नगरांतरे प्रवेशः तत्र
था कथंचित् पंचांगशुद्धिमालोच्य न तत्र शूलं वारशूलं च प्रतिशुक्रश्च योगिन्यश्च एतान्दोषान्पंडितः कदा
पि नैव विचारयेत् ३ अन्यच्च भूषणे एकस्मिन्नपि दिवसे यदि गमनप्रवेशौ स्तः ॥ प्रतिशुक्रवारशूलं न चिंतयेद्योगि
नीं सर्वमिति यदा च दिनभेदेन यात्राप्रवेशौ भवतः तदा यात्रायां प्रतिशुक्रवारशूलादि विचारो हेयः ॥ अथैकदि
नसाध्ये निर्गमप्रवेशरूपे कार्ये चिकीर्षिते किं विचार्यमित्याशंक्यो नरमनुष्टुभाह ॥ यद्येकस्मिन्दिवसे महीप
तेर्निर्गमप्रवेशौ स्तः तर्हि विचार्यः सुधिया प्रवेशकालो न यात्रिकस्तत्र स्पष्टार्थं पद्यं प्रवेशकालो हि प्रवेश
प्रकरणे वक्ष्यते यात्रिको यात्रासंबंधी कालः तत्र नगरान्नगरांतरगमने यदाह गर्गः प्रवेशनिर्गमौ स्यातामेक
स्मिन्नपि वासरे तदा प्रावेशिकं किंचित् बुधैर्नैव तु यात्रिकमिति प्राविशिकं वासरं वा पुंसि क्लीबे दिवसवासरा
विति वासरशब्दस्य नपुंसकत्वात्समानाधिकरण्येन संबंधः अत्राहुः एतत्पद्योपनिबंधनेन प्राक्पद्योपनिबंध
स्याज्ञागत्सलनायमानत्वं अस्त्येककर्तृकत्वात् भिन्नकर्तृके तु नायं दोषः यथा संमतिवाक्ययोरत्र समाधिः
एकस्मिन्नेव दिने यात्राप्रवेशकालयोः कियद्घटिकात्मको विलंबः तिष्ठत्येव परं तु यात्रासमये भद्राव्यतीपाता

दिकं महादोषजाते विचार्यं वा न वेति संदेहः यदि विचार्यं तदा विशिष्य प्रोक्तं प्रतिश्रुत्का यद्यपि विचार्यं यदि न वि
चार्यं तदेदमपि न विचार्यं एवं सति शृङ्गवाक्यमनर्थकं स्यात् ननु सामान्यविशेषभावेन प्रतिश्रुत्कादिकं बाध
कं भविष्यतीति चेन्न एतत्प्रकरणपठितानां शुभाशुभप्रकरणकर्मा च दोषाणां नास्ति सामान्यविशेषभावः अ
यं विचारो योगयात्रासिद्धिर्धरणिपतीनामिति पद्यव्याख्याने भिहितः तस्मात्प्रकरणद्वयपठितदोषविचारे प्रसक्ते
न विनावच्छेदे दोषत्यागोपादानविचारो न निर्णयपदवीमवगाहत इति प्राकाद्यापनिबंधः सार्थक इति अथ
प्रयाणे त्रिनवमीदोषमनुष्टुभाह प्रवेशान्निर्गमं तस्मात्प्रवेशं नवमे तिथौ नक्षत्रेषु तथा वारे नैव कुर्यात्कदाच
न त्रिविधा नवमी प्रयाणनवमी प्रवेशनवमी तिथिश्च नवमी तत्र गृहप्रवेशतिथितो नवमे तिथौ निर्गमनं
न कुर्यात् इयं च प्रवेशनवमी नवमीतिथिस्तु प्रसिद्धैव यदाह वसिष्ठः नवमी ज्ञेया त्रिविधा प्रवेशनवमी प्रया
णनवमी च नवमदिने निर्गमनतः प्रवेशनवमीति विख्यातं नवमदिने प्रवेशात्प्रयाणनवमी नवमदिनं च संतः
तेन नवमी त्रितयं यात्रायां प्राणहानिदं यातुरिति अत्र पद्ये तु नवमीदोषः प्रागुक्तपक्षे योपनिबद्धः ननु प्रयाणान
नु प्रयाणनवम्यां तिथौ नवम्यां यात्रा निषिद्धेति युक्तं प्रवेशनवम्यां तु बहिःस्थस्य पुंसो गृहप्रवेशनिषेधस्यै
व युक्तत्वात्कथं पुनस्तस्य स्वगृहाद्गमनसंभवो युक्तः अतो दोषाभिधानमपि न युक्तमुच्यते यदा गृहान्निर्गतः
पुमान् दैवाद्द्वितीयमेव तत्र तत्कार्यः सन् सप्तमे षष्ठे वा तिथौ गृहं प्रविष्टः सचेत्पुनः कार्यातिपातवशात्प्रवेशति
थेः सकाशात्तृतीयाद्वितीया वा तिथिः प्राग्निर्गमतिथितो नवमी तिथिस्तस्यां तिथौ यात्रां नैव विदध्यादित्यर्थः
नक्षत्रेपीति तथा तेनैव तिथितुल्येन प्रकारेण नक्षत्रे वारे वा कदाचन नैव कुर्यात् अयमर्थः यस्मिन्नक्षत्रे गृ
हप्रवेशः कृतस्तस्मात्तेनानवमे नक्षत्रे प्रयाणं न कार्यं यथा मृगे प्रवेशो हस्ते प्रयाणं निर्गमनक्षत्रान्नवमे नक्षत्रे प्रवे
शो न कार्यः यथा हस्ते गमनं तस्मात्पूर्वाषाढायां प्रवेशः अत्रापि प्रागभिहितरीत्या यात्रापि निषिद्धा एवं वारेपि ध्ये
यं यथा बुधवारे प्रवेशस्तेन नवमे दिवसे प्रवेशोपि न कार्य इत्यर्थः यदाह गर्गः प्रवेशान्निर्गमं चैव निर्गमाच्च प्रवे

प्राने नवमे ज्ञात नो कुर्याद्विहरेवारे तिथावपीति अथ यात्रादिनीयं विधिं शालिन्याह अभ्यंङ्ग कृत्वा देवतं श्रुत
यित्वा न त्वांप्रान विधियित्वा दिगीशं दत्वा दानं ब्राह्मणेभ्यो दिगीशं ध्यात्वा चित्ते भूमिपालो भ्यगक्रुत स्पष्टार्थं
२॥ वराहनारदः इन्ताशने तिलैर्कृत्वा पूजयेत्तद्दिगीश्वरं प्रणम्य भूदेवदेवानामाशीर्वादैर्व्रजेदिति वसिष्ठोपि
दिगीश्वराकृतिं कृत्वा स्ववर्णेन स्वमंत्रकैः स्वस्ववर्णैः सुगंधाद्यैर्धूपदीपैर्मनोरमैः तद्वर्णवस्त्रैर्नैवेद्यैर्भक्त्या स
म्यक्प्रपूजयेत् तद्दिगीशं समुद्दिश्य तिलहोमं च कारयेत् देवज्ञाय ततो दद्यात्प्रतिमां भूषणान्वितां देवान्गुरू
न्पितॄन्विप्रान्स्वस्ति वाचनपूर्वकं नत्वा तुष्टः प्रीतमना व्रजेन्मंगलनिःस्वनैरिति अत्र यात्रादिनात्प्राक्सप्तदिनम
ध्ये गुह्यकपूजनमुक्तं अहं पूर्वं कथितं वित्तयस्नानं सप्तमे दिने ग्रहमखं च यदाह वराहः यात्राकांक्षमाह।
गुह्यकमाह। ध्यानं अहं पूर्वं कथितं वित्तयस्नानं यद्दयज्ञः सप्तमे दिवसे इति तदेतद्वराहेण ह्यद्ययात्रायामद
ताग्रंथसंदर्भेणाभिहितं तत एवावधार्यं वसिष्ठादिभिस्तु दिगीशानां ध्यानानि उक्तानि तान्यपि तत्पूजायां प्राग
न्तेरेव पठितव्यानीति नास्माभिर्लिख्यंते गमनसमये ध्यानं इंद्रायनमः अत्र येन मत्स्यादिनापि संभवति
अथ नक्षत्राणां दोहदानि शार्दूलविक्रीडिताभ्यामाह कुल्माषान्तिलतंडुलानपि तथा माषांश्च गव्यं दधि त्वाज्यं
दुग्धमथैणमांसमपरं नस्यैव रक्तं तथा तद्वत्पायसमेव चाषपललं शाल्यं हविष्यं हयाद्यं स्वपाकं समं समुद्र
मपि वापिष्टं वानं तथा मत्स्यान्नं खलु चित्रितान्नमथवा दध्यन्नमेवं क्रमाद्भक्ष्याभक्ष्यमिदं विचार्य मतिमान्भक्ष्ये
द्या लोकयेत् अत्र प्रथमपद्ये च तृतीयचरणे प्रीत्यत्रक्तं दोषं भंगोस्ति समाणप्रक्षेपाकरणात् सत्यं प्रेक्षेवेतिपिंग
लसूत्रेण पकाररेफसंयोगे च प्राग्वर्णस्य लघुत्वाभिधानात् तथा च कालिदासः गृहीतप्रत्युद्गमनीयवस्त्रेति
तदुक्तापि ह्युक्तं दोषं भंगाभावः सूत्रे अकारोच्चारणं सुखमुखार्थं तेन प्रीत्यादावपि लघुत्वं अन्ये तु संयोगमात्रे पस्प
र्शे लघुत्वमतीव्रप्रयत्नतयेत्याहुः उक्तं च सरस्वतीकंठाभरणे यदातीव्रप्रयत्नेन संयोगादेरगौरवं न च्छंदोभं
गमप्याहुस्तदा दोषाय सूरय इति अत्रोदाहरणं रामायणे कृतार्थः चक्रतार्थानां मित्राणां न भवंतिये नाम

मु·चि·
याप्र·
३५

ता नृपविक्रमादाः श्रुतज्ञानेनोपलब्धं ज्ञातमिति एतच्च श्रुत्वा गदितो मया त्वं सीतोपलंभे कुरु प्रबुद्धमिति च ततो नीत्रप्रस्थवे
नात्र प्रीत्यस्योत्सारणे प्राप्ते स्वल्पच्युतैव तेन सगणप्रक्षेपव तथा मतिक्लेदो भंगाभाव इत्यलमतिप्रसंगेन ह
यायुक्ते, अश्विन्यादिसप्तविंशतिभेषु नक्षत्रदोहदं कुल्माषानित्यादिकमिदं भक्ष्याभक्ष्यवर्णभेदेन देशभेदेन वा इदं
भक्ष्यमेतदभक्ष्यमिति विचार्य भक्ष्यसंभवे भक्षेत् अभक्ष्यसंभवे आलोकयेत् पश्येत् स्पृशेद्वेत्यपि ध्येयं य
था अथाश्विन्यां कुल्माषान्नद्यात् स्विन्नमाषान् भरण्यां तिलमिश्रतंदुलान् कृत्तिकायां माषान् रोहिण्यां
मधु गोसंबंधि दधि मृगे गव्यमाज्यं घृतं आर्द्रायां दुग्धं गव्यमेव पुनर्वसावेणमांसं हरिणमांसं पुष्ये त
स्यैव मृगस्य रक्तं रुधिरं आश्लेषायां पायसं दुग्धमध्ये वह्निसंपर्केण पाचिततंदुलान् मघायां चाषस्य पक्षि
णः पललं मांसं पूर्वाफल्गुन्यां मृगस्येदं मार्गं मांसं उत्तराफल्गुन्यां शशस्येदं शाशं मांसं हस्ते षाष्टिकं ष
ष्टिकान्नं साठीति भाषायां चित्रायां प्रियंगुः फलिनी स्वात्यामपूपं घृतपक्वो भक्ष्यविशेषः विशाखायां चि
त्रांडजान् नानावर्णान् पक्षिणः अनुराधायां सत्फलमुत्तमफलमात्रादि ज्येष्ठायां कूर्मस्य कच्छपस्येदं कौ
र्मं मांसं मूले सारिकायाः पक्षिण्या इदं सारिकं मांसं पूर्वाषाढायां गोधायाः इदं गौधिकं मांसं शाल्यं श
ल्यस्य पक्षिण इदं शाल्यं पललं मांसं श्वाविच्छल्य इत्यमरः सारसलमिति भाषया अभिजिति हविष्य
मुद्गादि श्रवणे कृसरान्नं खिचरी धनिष्ठायां मुद्गान्नं मुद्गौदनं शतभिषायां यवानां पिष्टं पूर्वाभाद्रपदायां मत्स्य
मिश्रितमन्नमोदनं उत्तराभाद्रपदायां चित्रितान्नं नानाविधैर्वर्णैर्गौधूमादिभिः पक्वं मिश्रमिश्रमोदनं इ
ति केचित् वयं त्वेवं व्याकुर्मः यवतंडुलतिलामिषी दुग्धेन पक्वा मेषकर्णीयाः तेनारकांश्चित्रान्नशाकेन
उच्यते इति रेवत्यां दध्यन्नं दध्योदनमिति अपि च तथैत्यादीनि अव्ययानि पादपूरणार्थानि यदाह नारदः
कुल्माषांश्च तिलान्माषान् दधि गव्यं घृतं पयः मृगमांसं च तत्तारं पायसं चाषजं मृगं शशमांसं च षाष्टि
कं प्रियंगुकमपूपकं चित्रांडजानि फलं कूर्मं शारीगोधां च शल्यकं हविष्यं कृसरान्नं च मुद्गान्नं यवपिष्टकं
॥

राम·
३५

मत्स्यान्नं चित्रितान्नं च दध्यन्नं दुग्धभक्तमादिति तन्मांसं रुधिरं अत्र चित्रोऽन्ना फलमित्येकमेव दोहद
माहुः तन्न चित्रौइंच फलं तन्न इति कश्यपेन पृथग्युक्तेः अंशत्रं उन्ना उच्यते अंशगत वैचित्र्याभावात् यत्तु श्रीपति
वाक्ये चित्रं उन्नायाः फलमित्युक्तं तत्स्वार्थेन विरुद्धः प्राशुपाः प्रियंगु चित्रोऽन्नाफलं यावकं कुलित्था इति वराह
पद्यव्याख्याने चित्रानानाकाराः पक्षिणः चित्रा यां प्राश्याः फलानि प्रसिद्धानि स्वातावितिभट्टोत्पलो व्याख्यत्
चित्रान्नलक्षणमुक्तं दीपिकायां अन्नाक्षीरेण संस्विन्ना यवाः सतिलतंडुलाः अन्नकर्णस्यरन्नेन रक्तोऽश्विवान
संज्ञकाइति अत्र यदसमर्हृपंडः प्राप्तं तत्स्पृष्ट्वा दृष्ट्वा वा दत्वा वा वुगंतव्यमित्याह गुरुः ॥ अलभ्या लभ्यमन्नावा
स्पृष्ट्वा स्पृष्ट्वाथवा त्यजेत् दत्वा वा सिद्धिमाप्नोति दुष्टमादिषु भूपतिरिति आदिशब्दान्निथिवारदिग्दोहदेषु
स्मरणं स्पर्शनं दानं भक्षणं वा यथासंभवं ध्येयं नक्षत्रदोहदेषु वसिष्ठादिपद्येषु क्वचिद्भेदः तत्र विकल्पस्तु
ल्यबलत्वात् भक्षेदिति भक्षअदनइतिधातुश्चुरादिस्तस्मात्सत्यापपाशेति स्वार्थे णिजन्ताद्विधिलिङिति
पिशावादेश्चक्रते चेत्स्वतीकाररलोपे भक्षयेदिति भवितव्यं ननु भक्षेदिति कथमयं प्रयोगः उच्यते चुरादि
भ्यस्तु णिज्जनित्यास्ति अनित्यण्यंताश्चुरादय इत्युक्तेरेवं सति णिज्भावे भक्षेद्विधिलिङिन्न दिति सिद्ध
ति ज्ञापकं चाग्राचुरादौहि चितिस्मृत्यामिति चित्ते इत्तारिदित्करणं तद्धि चिंतितइत्यादाविदितोनुमस्था
नोरितिनुमिति अनिदितांहलउपधायाङ्क्तिति क्वितीति नलोपो माभूदित्येवमर्थं कृतं नित्यतु णिचि नलो
पस्य प्रासंगादिदित्वं व्यर्थेव भवति तु मर्थमिति चेन्न चिन्तस्मृत्यामिति तु अमेव पठितव्यं किमिदित्वेन एवं
सतीदित्वं कृतं ज्ञापकमुक्तार्थस्य संपन्नमिति अत्र तु घुषुण्णमाणवाइति विशब्दनार्थस्य चौरादिकस्य घुषे
र्घोषयामासुरित्यर्थं जघुषुरित्यादि महाकविप्रयोगोपपत्तिरिति वामनः पदेचारतीत्यादि प्रक्रियाकौमु
दीकृच्चेत्याह स्मेत्यलमतिप्रसंगेन अथवा अवक्रमेवं पठितव्यं स्यादेत् तथा लोकयेदिति अथदिग्दोहदम

एवं महीपालवचः श्रुत्वा

मु॰ दी॰
या॰ प्र॰
३९

नुष्टुभाह आज्यं तिलौदनं मत्स्यं पयश्चापि यथाक्रमं भक्षयेद्दोहदं दिक्षु प्रमाशांसु पूर्वादिकासु व्रजेत् आज्यं घृतं
पूर्वस्यां तिलौदनं तिलमिश्रमोदनं दक्षिणस्यां मत्स्यं प्रसिद्धं पश्चिमायां पयोऽदुग्धमुत्तरस्यां एतद्यथाक्र
मं दिक्षु प्रमभीष्टदिग्भवं दोहदं भक्षयेत्ततः पूर्वादिकामाशां क्षिप्रमिषितां व्रजेत् यद्वाह श्रीपतिः आज्यतिलौ
दनमत्स्यपयोभिः प्राक्प्रभवतिक्रमशः खलु भुक्त्वेति नारदेनत्वन्यथोक्तं घृतान्नं तिलपिष्टान्नं मत्स्यान्नं घृतपा
यसं पूर्वादिषु क्रमाद्भुक्त्वा यायान्नासिद्धिमवाप्नुयादिति अत्रैवं विरोधे विकल्पो वा यथादेशाचारं वा व्यवस्था अ
थवारदोहदमनुष्टुभाह रसालं पायसं कांजीघृतं दुग्धं तथा दधि पयोमिश्रितं तिलान्नं च भक्षयेद्वारदोहदं र
सालाः शर्करादधिमरिचकर्पूरैला संसृष्टालोके शिखरिणीति प्रसिद्धा तां रविवारे पायसं कांजी प्रसि
द्धं सोममंगलवारयोः घृतं पक्वं दुग्धं बुधे घृतं पाकं इति साधुः तत्रापि क्षीरं हविषा रेवेति वार्तिकात् घृतं
क्षीरसाधुत्वं दधि प्रसिद्धं गुरुवारे अघृतपक्वं दुग्धं शुक्रे तिलान्नं तिलमिश्रमोदनं शनौ एतद्वारदोहदं
रविवारादिक्रमेण भक्षयेत् यद्वाह श्रीपतिः मज्जिकां सघृतपायसं तथा कांजिकं घृतपयो दधिक्रमात् क्षी
रमक्कथितकं तिलौदनं वारदोहदविधिर्बुधैः स्मृतः वशिष्ठनारदाभ्यां दुग्धस्य पक्वविशेषो नाभ्यधायि म
ज्जिकां परमान्नं च कांजिकं च पयो दधि क्षीरं तिलौदनं भुक्त्वा भानुवारादिषु क्रमादिति मज्जिका रसाया स्या
द्रसाला तु मार्जिका इत्यभिधानात् गुरुस्तु विशेषमाह सूर्यवारे घृतं प्राश्यं चंद्रवारे पयस्तथा गुडमंगार
केवारे बुधवारे तिलानपि गुरुवारे दधि प्राश्यं शुक्रवारे यवानपि माषान्भुक्त्वा शनेर्वारे स्थलेगच्छेन्न दोषभा
गिति अथ तिथिदोहदं वसंततिलकावृत्तेनाह पद्मादितो र्कदलनद्यादिसर्पिश्चाणह विषामपि हेम
जलं त्वपूपं भुक्त्वा व्रजेदुच्चकमंबु च धेनुमूत्रं यावान्नपायसगुडान्नमृगान्नशुक्तान् पद्मादिः प्रतिपत् तस्या
स्तिलोपे पंचमी प्रतिपदादि पंचदशतिथिषु क्रमेण तिथिदोहदं भुक्त्वा व्रजेत् यथा प्रतिपदि अर्कस्य दलं हवि रा॰ म॰ ३९

शेषस्य दलानि पर्णानि रुद्रइति भाषा द्वितीयायां तंडुलवारि प्रक्षालिततंडुलजलं ॥ तृतीयायां सर्पिश्चूर्णं । चतु
र्थ्यां श्राणा यवागूः श्राविलि इति भाषा पंचम्यां हविष्यं तु ज्ञानादि षष्ठ्यां हेमजलं प्रक्षालितसुवर्णजलं ॥ सप्तम्या
मपूपं अष्टम्यां रुचकं बीजपूरफलं फलपूरो बीजपूरो रुचको मातुलिंगके इत्यमरः ॥ नवम्यां मधुजलं ॥ दशू
म्यां धेनुशृतं क्षीरं गवीशृतं नवदृष्टसमूत्रं धेनुशकृद्ग्रहणात् एकादश्यां पायसावान्नं यवविकारं ॥ द्वादश्यां पायसं ॥ त्रयो
दश्यां गुडमिश्रविकारं चतुर्दश्यां मस्तुयुक्तं पंचदश्यां मन्नमुद्गान्नमोदनमिश्रितमुद्गान्न यदाहटहस्पतिः प्र
कृपत्रं भवेद्यात्तुः प्रथमायां तु भक्ष्यणं द्वितीयायां भवेद्यात्तु भर्दिमसतंडुलोदकं तृतीयायां तथा सर्पिर्यवागूः
स्यात्ततः परं पंचम्यां तद्धविष्यं स्यात्षष्ठ्यां वा कांचनोदकं अपूपभुक्तिः सप्तम्यामष्टम्यां बीजपूरकं ॥ नवम्यां तो
यपानं स्याद्दशम्यां गोमूत्रं ततः परं एकादश्यां यवान्नं स्याद्द्वादश्यां पायसं भवेत् त्रयोदश्यां गुडं लेह्यं कृशरं स्याच्चतुर्दशी
मुद्गौदनं भवेद्गोज्यं पंचदश्यां विधीयते ततः पक्षयोरुभयोरेवं यात्रायोगे विधिः स्मृतः इति देवज्ञमनोहरेपि क्वचिच्छेदः य ई
थार्कदलतंडुलोदकसर्पींषि हविष्यं दधिसुवर्णपयः तिलवारि बीजपूरकमधाज्यकृशरापिष्टिकाद्यापि
तिलपिष्टकंदमूलानि शाकमथ शालिहस्तपर्णानि प्रतिपत्प्रभृतिषु भुक्त्वा प्रस्थानात्सिद्धिमाप्नोतीति ननु चा
लभ्यालभ्यभक्ष्या वा स्पृष्ट्वा दृष्ट्वाथ तान्व्रजेत् दत्त्वा वा सिद्धिमाप्नोति उष्ट्रभादिषु भूपतिरिति गुरूक्तेर्वारादिषु
दोहदाभिधानं सार्थकं विहितेषु पुनर्नक्षत्रतिथिनक्षत्रवारादिषु दोहदाभिधानं व्यर्थं दोषनिवारणफलको हि दो
हदस्तदभावेन दैयर्थ्यप्रसंगात् उच्यते उष्ट्रभादिषु भूपतिरित्यत्र उष्ट्रत्वं किं नैसर्गिकमुतान्याहितमिति विशेषा
नभिधानात्सत्यावश्यकगमने राज्ञा बलेनैव गमनप्राप्तस्याभिधानाद्यदि विहितनक्षत्रेपि क्रूरग्रहसाहित्यादि
महान्दोषः संभावितोस्ति तदा तद्दपाकरणाय दोहदाभिधानं चरत्नमालायां आद्यास्तु नक्षः क्रियपूर्वकाणां एषां चतु
र्णामिह पंचमी स्यात् पराः परेषां परतस्तथैव सक्रूरराज्योरस्तु भानि तिथिः स्यात् एवं वारदोहदोक्तिरपि वक्रिग्रहवा
सरशूलादिदोषहान्यार्थिका द्विग्दोहदोक्तिरपि विविधप्रतिबंधप्रतिभोमादिदोष [illegible]

मु॰दी॰
या॰प्र॰
३६

त्य

मनसमयमभवं विधिंप्रहर्षिणीक्षंदसाह उद्धृत्यप्रथमनवदक्षिणांघ्रिं द्वात्रिंशत्पदमभिगम्य दिक्स्थयानं आरोहेत्ति
लग्नेहेमताम्रपात्रे दत्वा दैवगणकवराय च प्रगच्छेत् राज्ञागमनसमय एव प्रथमेनादक्षिणांघ्रिं दक्षिणचरणं उद्धृत्य
पश्चाद्द्वात्रिंशत्पदपरिमितां भूमिं गत्वा दिक्स्थयाने वक्ष्यमाणं दिग्विशेषहस्त्यादियानमारोहेत् यदाह गुरुः पूर्वं
दक्षिणमुद्धृत्य पादं याया नराधिपः द्वात्रिंशत्पदं गत्वा यानमारुह्य संव्रजेत् वराहोपि कल्याणनामसचिवाप्त
जनायुधीयदैवज्ञविप्रजनकंचुकिमध्यसंस्थः द्वात्रिंशतं समुपगम्य पदानि भूमौ प्रागादिनागरथवाजिनरैस्तु
यायादिति तिलेति आरोहणसमये तिलघृतहेमसहिते ताम्रपात्रे मा दैवगणकवराय दत्वा तिर्विक्रमाय च का रा
दन्येभ्योपि ब्राह्मणेभ्यो यथाशक्ति दानं दत्वा प्रगच्छेत् यदाह गुरुरेव ताम्रपात्रे तिलान्कृत्वा सघृतान्हेमसंयुतान्
निवेद्य विप्रमुख्याय दैवज्ञाय विशेषतः इति अथावसरप्राप्तानि दिक्स्थयानान्यनुष्टुभाह प्राच्यां गच्छेद्गजेनैव दक्षिणस्यां
रथेन हि दिशि प्रतीच्यामश्वेन तथोदीच्यां नरैर्नृपः स्पष्टार्थं पद्यं नरैर्नरवाह्यैः सुखासनादिभिः यदाह श्रीपतिः हस्तिर
थाश्वनरैर्यदि राजा याति तदास्य भजन्त्यरिचक्रमिति वराहोपि प्रागादिनागरथवाजिवरैस्तु यायादिति अथ निर्गमन
स्थानानि पादाकुलकछंदसाह देवगृहाद्वा गुरुसदनाद्वा स्वगृहान्मुख्यकलत्रगृहाद्वा प्रास्थपह विधृत्य विप्रानुमतः प
श्चान्नृपः एवं मंगलमेयात् देवा विष्ण्वादयः पूज्यन्ते यस्मिन्गृहे तद्देवगृहं एषां मध्ये मनोभीष्टात् गृहात्सकाशात् भोजनसंभ
वेह विधृत्य मंत्रं प्रास्थभद्रां चित्वा विप्रैर्ब्राह्मणैरनुमतः कृतोत्साहः मंगलं मंगलद्रव्यं मनोभीष्टं पश्चान्नृपः स्पष्ट एवं सन्ननु या
यान्निर्गच्छेत् यदाह लल्लः स्वनिकेतात् देवगृहात्प्रधानदाराश्रयात् गुरुदाराद्ध्यायाग्न्याकृताग्निकार्यैः प्रास्थपह विधृत्य द्वि
जानुमतः द्विजोविष्णुक्रमाद्रूपं मंत्रेनानेन चालयेत् इदं विष्णुविचक्रमइत्येवं पादमुद्धरेत् मंगलानि ततः पश्चान्नृप एव
नूतनो व्रजेदिति वराहोपि अंतः पुराद्वा विवेश्मनाद्वा सिंहासनाद्वा ग्निपरिगृहाद्वा कुर्यान्नरेंद्रः प्रथमं प्रयाणं विप्रैः शातायैः
कृतमंगलाशीः इदं विष्णुर्विचक्रमे इत्येवं पादमुद्धरेत् अमुकस्य वधायेति दक्षिणं हि तिपान्म्यहे रिति अग्निपरिग्रहो राम॰
+गृहरध्यापकः स्वस्यकुलगुरुर्वा स्वगृहं स्वशाय्यागृहं वरस्त्रीत्वसंभवे मुख्यकंलत्रं यद्राज्ञीं तद्गृहं + ॥ ३६

सना ३

ग्निहोत्रगृहं अथ गमनकाले निर्गमे सत्यपि स्वस्यावश्यककार्यादिवशाद्गमनविलंबे वर्णक्रमेण प्रस्थानवस्तू
नि प्रहर्षिणीछंदसाह कार्यार्थैरिह गमनस्य चेद्विलंबो भूदेवादिभिरुपवीतमायुधं च क्षौद्रं चामलफलमाशु चा
लनीयं सर्वेषां भवति यद्वेद्वह्नित्रियं वा किंचिदावश्यकं कार्यं नाभूदिति गमनस्य चेद्विलंबः स्यात्तदा विचारितयात्रा
लग्ने भूदेवादिभिर्ब्राह्मणप्रभृतिभिरेतानि वस्तूनि आशु चालनीयानि प्रस्थापनीयानि यथा ब्राह्मणेनोपवीतं य
ज्ञोपवीतं क्षत्रियेण प्रयोजनापेक्षितया चैदैवात् तत्रैव तन्निर्गमनं च कार्यं क्षत्रियेणायुधं वैश्येन मधु शूद्रेण
मलं निर्मलफलं नारिकेलादि यदाह वसिष्ठः तस्मिन्मुहूर्ते स्वयमप्रयाणे प्रयोजनापेक्षितया च दैवात् तत्रैव त
न्निर्गमनं च कार्यं स्वीयासनाद्वा पितृद्रुच्यमानमिति राजमार्तंडः प्रस्थाने ब्राह्मणादीनां यज्ञसूत्रमथायुधं म
धामलफलं चैव प्रशस्तं स्याद्द्विकारणमिति वाथवा सर्वेषां वर्णानां यदेवह्नित्रियं मनोभीष्टं तदेव प्रस्थापनीयं उक्तं
च वसिष्ठेन अत्रातपत्रध्वजचामराश्वविभूषणेष्वीषमज्ञोवराणि आदोलिकारत्नरथाश्ववारानृशाय्यासना
यं मनसस्त्वभीष्टमिति नारदोपि अप्रयाणे स्वकं कार्यं मपेक्षीभूपतिस्तथा कुर्यान्निर्गमनं छत्रध्वजवाहनसंयु
तमिति अथ स्वयंगमने कियद्दूरं प्रस्थानं कार्यमित्येतदाशंक्य प्राच्यमतेन प्रस्थानपरिमाणं मंदाक्रांताछंदसा
ह गेहाद्गेहांतरमपि गमस्तत्र हि यात्रेति गर्गः सीम्नः सीमांतरमपि भृगुर्बाणविक्षेपमात्रं प्रस्थानं स्यादिति कथयते था
भरद्वाज एवं यात्राप्राक्ताबहिरिह पुराद्वसिष्ठो ब्रवीति स्वगृहात्परगृहगमनमिति समीपवर्त्यपि तत्रापि चेद्गमागमनं स्या
त्तर्हि यात्रा जातेति गर्गः कथयते अथवा स्वग्रामसीमां प्राप्य वसेदिति भृगुः कथयते अथवा महतां योद्धा स्वब
लेक्षिप्यमाणः शरो यावद्दूरं गच्छति तावन्मात्रं प्रस्थानं स्यादिति भरद्वाजः कथयते अथवा पुराज्जगराद्बहिर्यात्राका
र्या स्यादित्येवं वसिष्ठः कथयते यदाह राजमार्तंडः गृहाद्गृहांतरं गर्गः सीम्नः सीमांतरं भृगुः बाणक्षेपाद्भरद्वाजो व
सिष्ठो नगराद्बहिरिति एतच्च यथायोग्यं कार्यस्यावश्यकतायामनावश्यकतायां च ध्येयं अथ मुनिमतेन प्र
स्थानपरिमाणं वसंततिलकयाह प्रस्थानमत्र धनुषां हि शतानि पंच केचिद्वयं समुषंति दशैव चान्ये संप्रस्थि

मु.टी. तोयदिह मंदिरतः प्रयातो गंतव्यदिक्तत्तदपि प्रयतेन कार्यं धनुषः परिमाणमाह भास्करः यवोदरैरंगुलमष्टसं
या.प्र. ख्यैर्हस्तो गुलैः षड्गुणितैश्चतुर्भिः हस्तैश्चतुर्भिर्भवतीह दंडः क्रोशः सहस्रद्वितयेन तेषामिति अत्र गमनका
५२ लेनादृष्टानां धनुषां पंचशतानि हस्तसहस्रद्वयमिति यावत् स्वगृहाभावे दूरतोऽवधिप्रस्थानमित्याहुः अपरे तु
यात्राकाले मंदिरतः स्वगृहाद्दशैव धनूंषि चत्वारिंशद्वा तावद्यरे वा प्रस्थिताः प्रयात इव ज्ञेय इत्याहुः ॥ संख्यामाह व
सिष्ठः प्रस्थानं धनुषां पंचशतान्युतशतद्वयं स्वदेवसदनाद्रूप्यपि दशभिः प्रस्थितो गत इति ॥ नायं स्वेच्छाविकल्पः
॥ किंतु कार्यस्यानावश्यकावश्यकत्वाद्भाद्दशतादृशप्रस्थाना अत एव नारदोपि स्वस्थानान्निर्गमस्थानं दंडानां च श
तद्वयं चत्वारिंशत्पंचविंशत्प्रस्थितः स्वयं गत इति प्रस्थानविकल्पानाह अत एव प्रयाणे यस्यां दिशि गमनं चिकी
र्षितं तद्दिगभिमुखं कार्यं यदाह राजमार्तंडः गंतव्यदेशाभिमुखे स्वप्रदेशात्प्रस्थानमाहुः शुभदं नराणामिति अतः
स्वयं प्रस्थाने गुणमप्याह स एव स्वशरीरेण भयः कश्चिन्निर्गच्छेद्वृद्धयान्वितः तस्य यात्राफलं सर्वं संपूर्णं प्रसि
द्ध्यतीति यदा तु स्वयं प्रस्थानेच्छा तत्तोपरदिने शुभमचंद्रादिदोषसद्भावे दुष्टे दिने यात्रा न कार्येत्यर्थः येन तु व्यतीपात
वैधृतिभरण्यादिदोषसद्भावेन गर्हितेपि दिने यात्रा नेत्याह स तत्र पूर्वोर्धस्य वैयर्थ्यापातात् वाक्यभेदाय स्वगृहा
न्निर्गतो न प्रस्थानमाचरति तस्यैकेन क्रमेण प्रथमदिनमनमित्याह चंडेश्वरः क्रोशं वा यदि वाप्यर्धं प्रथमेहनि
शस्यते द्वितीये योजनं गत्वा निवसेत महीपतिः तृतीये योजने सार्धं वसेदाक्रम्य हस्तिनः ततः परं यथेष्टं तु मार्गे
यायान्महीपतिरिति अथ कृते प्रस्थानेऽधिकारिविशेषपुरस्कारेण कियद्दिवसनिषेधमुत्तरार्धेन मैथुननि
षेधं च स्रग्धराछंदसाह प्रस्थाने भूमिपालो दशदिवसमभिव्याप्यैकत्र तिष्ठेत्सामंतः सप्तरात्रं तदितरमनुजः पंच
रात्रं तथैव ऊर्ध्वं गच्छेत्तु भोहेह्य यगमनदिनात्सप्तरात्रालिपूर्वे वा शक्तो न दिने रिपुविजयमना मैथुनं नैव कुर्या
त् भूमिपाल एकत्र प्रस्थाने सप्तरात्रं न वसेत् तदितरमनुजो ब्राह्मणादिः तथैवैकत्र प्रस्थाने पंचरात्रं न वसेत् यदि रा.म.
दैवाद्वसेत्तदा किं कुर्यादित्यत आह ऊर्ध्वमिति अवधिदिवसातिक्रमानंतरं गच्छेद्गृहमागत्य शुभाहे पूर्वोक्तप्रका ५२

रेण विचारितशुभदिवसेगच्छेत् यदाह वसिष्ठः आरभ्य निर्गमाद्यावद्दशाहं न वसेन्नृपः ॥ मंडलीकं सप्तरात्रं प्रा
कृतः पंचरात्रतः अतऊर्ध्वं व्रजेद्भूयो भद्रेन्यदिवसे नृपइति भद्रे कल्याणकारिणि श्रीपतिरपि वसेन्नचैक
त्र दशाह्नितीशो दिनानि नो सप्त च मंडलीकः यः प्राकृतः सोपि न पंचरात्रं भद्रेण यात्रा परतः प्रयोज्येति ननु अत्र प्र
स्थाने दशदिवसातिक्रमे भूयः सुमुहूर्तेन यात्रा कार्येत्युक्तं तन्न युक्तिसहं प्रतिभाति यतो यात्रा हि शत्रुमारणा
दिद्रव्यार्जनाद्यर्थं शत्रुमारणादिकमनोभीष्टफलप्राप्तिर्यात्रासमाप्तिरित्युच्यते नहि तावता विना मुहूर्तविचारो यु
क्तः अत्रोच्यते अयुक्तमेतत्प्रतिभाति नूनं होराविदां युक्तिमतां बहूनां । यात्रासमाप्तिः खलु वांछितार्थफल
स्य सिद्धौ नियतं प्रदिष्टेति उच्यते वसिष्ठाद्यृषिवचः प्रामाण्यमंगीकुर्वद्भिः किमीदृशी युक्तिर्वक्तुमुचिता यतो
वधिकथनार्थकानां तन्न ऋषिवाक्यानामप्रामाण्यप्रसंगात् ॥ ज्योतिषसमुत्तुल्लंघने दुरितोत्पत्तिरपि स्यात्
किंच मासगम्यमध्वानमतिक्रम्य यदि कार्यवशाद्दशाहाद्यतिक्रमे सति तत्रापि तत एव स्थानात्सुमुहूर्ते नैवि
चारोस्ति किं पुनः प्रस्थाने यदाह वराहः एकत्राध्युषितस्य पत्तनगयीत्रामंत्रात्रिगौतमच्यवनाः पंचत्रिसप्तरात्रा
द्भूयो भद्रेण संयोज्यमिति अयुक्तमेतत्प्रतिभाति नूनमिति तद्वाक्यं निर्मूलत्वादुपेक्ष्यं नहि वचनबाधितेर्थे यु
क्तिः प्रभवेत् यथा । तस्मादवध्यतिक्रमे सति मुहूर्तेन मुहूर्तेन यात्रा विधेया ॥ अवधिमध्ये तु निषिद्धभद्राव्यती
पातादिमहादोषपरिहारार्था यात्रा स्यादित्यलमतिप्रसंगेन क्वचित्किंचिद्विशेषेण प्रस्थानदिवसनियमोभिहितः
यदाह रत्नमालाकारः प्राच्यां महामुनिगुणनयः प्रवदंति सप्त यस्यामतीवशुभदानि दिनानि पंच जीर्णे पवर्गाश्चिम
दिशि त्रितिनायकानां प्रस्थानकेषु दिवसद्वयमुत्तरस्यामिति । यदा तु स्वयं प्रस्थाय परावृत्य गृहमागच्छेत्तदा पुनः
सुमुहूर्तेन यात्रा कार्या यदाह रत्नमालाकारः यत्र संप्रस्थितो यात्रां निवर्तेत पुनर्गृहं कामाद्वा यदि वा कामात्तस
माप्तिमवाप्नुयात् इति दुर्गादित्यः कार्यवशाद्यदि निवर्तते प्रस्थितः स्वगृहमेव यायात्तदा विशुद्धैः पुनरपि ति
थिकरणदिवसाद्यैरिति अथ प्रस्थानकर्तृनियममाहाथेति अत्रैवाराज्यादीक्षितविप्रविद्यतयमनाशात्रुक्तखेटकृतोतः

मु·टी·
या·प्र·
३९

कारणः सन् यात्रादिनात्पूर्वं सप्तरात्राणि मैथुनं संभोगं नैव कुर्यात् यदाह च्यवनः त्रिरात्रं वर्जयेत्क्षौरं पंचाहं स्त्र
कर्म च त्र्यहं स्वावशेषाणि सप्ताहं मैथुनं त्यजेदिति ॥ वा अथवा शक्तौ सप्ताहमतिकामितया स्यात्तदशक्तौ तद्दि
ने यात्रादिवसे नैव कुर्यात् यदाह गर्गः यात्राकाले तु संप्राप्ते मैथुनं यो निषेवते रोगार्तः क्षीणकोशश्च स निवर्तेत
वा न वेति अत एवानयोर्वाक्ययोर्मैथुनपीडासहित्वविषयव्यवस्था मार्गमध्येपि मैथुननिषेधे विकल्पानाह
च्यवनः यावद्व्रजति चाध्वानं यावत्कार्यं न सिद्ध्यति ॥ यावद्धानं निवर्तेत तावद्वर्ज्यं हि मैथुनं यथा तु प्रथमदिने
स्त्री ऋतुस्नाता भवति गमने चावश्यकता तदा मैथुनं कार्यं न कार्यं वेति संदेहः तत्र यदि न कार्यमिति चेद्दूषणं तदा
धर्मशास्त्रविरोधः यदाह लल्लः ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां युज्यते नात्र
संशयः इति यदि कार्यमिति चेद्यात्रानिषेधवचनोल्लंघनं तद्वचः प्रागभिहितं अत्र निर्णयमाह च्यवन एव आत्ययिक
कार्यपाते पुष्पस्नाता समागमं कृत्वा प्रस्थितो गच्छन् फलं भते तु मनोरथान् अचिरकालेनेति शेषः यदा पुन
र्गमनार्थं कालांतरमप्यस्ति तदा तद्दिने मैथुनं कृत्वा कालांतरे मंगले याया यादित्यर्थः प्रसिद्धं यथा प्रस्थानका
ले स्त्र्यादिवस सप्तस्त्पूर्वं रात्रावपि मैथुनं न कार्यमित्याह लल्लः कृत्वा तु मैथुनं रात्रौ प्रभाते यो ऽधिगच्छति नासौ फ
लमवाप्नोति कृच्छ्रेण च निवर्तते कृच्छ्रेण कष्टेन अथान्यानपि प्रस्थानकर्तुर्नियमान्प्रपालित्याह इयं त्या
ज्यं पूर्वमेव त्रिरात्रं क्षौरं त्याज्यं पंचरात्रं च पूर्वं क्षौद्रं तैलं वासरेस्मिन्वमिश्रं त्याज्यं यत्नाद्भूमिपालेन नूनं या
त्रादिनात्पूर्वं भूमिपाले सर्वं क्षौरं दारसंबंधि कृत्यं मुंडनं श्मश्रुकर्म च त्याज्यं अस्मिन्वासरे यात्रादिने क्षौद्रं मधु
भक्षत्वेन तिलतैलस्नापनं त्याज्यं वसिष्ठस्तु देवोद्भूताशरीरशोधनार्थं बलात्कारकृतावा यात्रादिने निषिद्धा
नूनं निश्चितं यदाह च्यवनः वपनं वमनं क्षौद्रं तैलं चैव विवर्जयेत् त्र्यहं चावशेषाणि सप्ताहं मैथुनं त्यजेदिति
वपनं श्मश्रुकर्मेणाप्युपलक्षणं तथा च वसिष्ठेन याचाह वेतत्क टमू षिने च शुक्रोत्कटे रात्रि शुसंध्ययोर्वा क्षौ राम·
रं प्रकुर्यात्त्वखलु चात्मनो हि श्रेयोभिलाषी न कदाचिदेवेति क्षौरपदोपादानात् क्षौद्रमश्नुभपदार्थोपलक्षणं ३९

६

यदाह स एव कामं क्रोधं तथा लोभं मद्यं मांसं च रोदनमिति अथान्यानपि प्रस्थानकर्तुर्नियमानाह गीत्वाख्यक्कं दसा
ह भुक्त्वा गच्छति यदि चेत्तैलगुडक्षारपक्वमांसानि विनिवर्तते स गणः स्त्रीहिङ्गुत्वमवमान्य गच्छतो मरणं ॥ यदि तैलं
तैलपक्वानि वटकादीनि अन्नानि गुडमिश्रविकारं तत्पाचितमन्नं वा क्षारं सलवणं पक्वमांसानि रंधितमांसा
नि यो भुक्त्वा गच्छति स प्राणादीन् रुग्णो मेयसहितो निवर्तते यदाह गर्गः कटुतैलगुडक्षारपक्वमांसाशनं तथा
भुक्त्वा यो याति सो मोहाद्व्याधितः स निवर्तते इति ॥ अत्र मांसदुग्धादिनिषेधस्तत्र तत्रादि दोहदव्यतिरिक्तवि
षयः दोहदस्य विशेषविहितत्वात् ॥ स्त्रीहिङ्गुत्वमिति स्त्री च हिङ्गुश्च अनयोः समाहारः स्त्रीहिङ्गु स्त्रियं स्वीयां परकी
यां वा हिङ्गुत्वा ब्राह्मणाः ई त विप्रा इत्ता हिङ्गुत्वा इत्यभिधानात् अवमान्य धिक्शब्दताडनादिना मानभंगं कृत्वा गच्छतः पुं
सो मरणं स्यात् यदाह गर्गः यस्तु संप्रस्थितो यात्रां भार्यां नैवाभिनंदति भार्या वा नाभिनंदेत न स प्रतिनिवर्तते
परकीयां स्वकीयां वा स्त्रियं पुरुषमेव वा ताडयित्वा तु यो मोहाद्व्रजेत् तं न स्पृशेद्विनश्यति केचित्तु भाष्य भशाहु
न्यात्राकालेषु भाष्य भस्म च कानाङ्कः यदाह ___ः प्रापय गच्छ विसर्जय निर्गच्छ व्रज विमुंच संसर्प ॥ सिद्धिकराः
खल्वेते प्रमोदजनयतीव शाहोश्च मा गा स्निह्य निवर्तस्व गम्यते क्व ढ तुमिते मोहाद्यात्रायां नेच्छंति बुधाः इत कासितभी
न शाहे स्वेति कासितं रोगार्त्तं ध्वनिर्हिक्कादिः अथाकालवृष्ट्यादौ दोषं सलक्षणं वसंततिलकाछंदसाह यदि
मासत्रयेषु पौषमासादिषु वृष्टिर्हि भवेदकालवृष्टिरुच्यते यदाह राजमार्तण्डः पौषादिचतुरो मासान् प्राप्ता
वृष्टिरकालजेति ॥ तत्राकालवृष्ट्यां जातायां यदि वसुधा पृथ्वी यावत्पशवो गवादयः प्रदर्शपा मनुष्यास्तेषां पदैश्च
रणैरंकिता चिह्निता न भवति तावदकालवृष्टिदोषो नास्ति यदा पशुनरचरणैरंकिता वसुधा स्यात्तदाकालवृष्टेर्दो
षवत्त्वमस्त्येव यदाह राजमार्तण्डः वृष्टिः करोति दोषं तावन्नाकालसंभवा राज्ञां यावन्न भवति यानेन रपशुचरणां
किता न भवतीति वसुधेति अस्यार्थः अकालसंभवा वृष्टिः राज्ञां गमने तावद्दोषं न करोति यावद्वसुधा याने
गमने नरपशुचरणांकिता न भवतीति तेनातिस्वल्पया रजोपगममात्रं भवति तत्र पश्वादिचरणचिह्नाभा

मु.दी. याप. १९९ वा दोषाभावः यदा तु किंचिदधिका वृष्टिः स्यात्तदा कर्दमसद्भावात्पश्वादिचरणचिह्नानि ज्ञायंते तदा दोष एव स च स्था
॥ मनत्रिकदत्तपुत्रं प्राकृ॥ अत्र केचित् अल्पाद्वृष्टेर्दोषायनं महतीं निवदंति तत्रेयं युक्तिः अल्पवृष्ट्या कर्दमबाहुल्या
त्पश्वादिचरणचिह्नानामवस्थायां दर्शनादित्यल्पवृष्टेर्दोषवत्त्वं महत्वात्तु वृष्ट्या सकलकर्दमापाकरणात्पश्वा
दिचरणचिह्नादर्शनाद्दोषाभावः ॥ तदेतदृषिप्रणीतसंहितायां यथाभिहितविषयाज्ञाने केवलन्यायाभिनिविष्टम
नसां मतं तथा हि मार्गशीर्षशुक्लपक्षप्रतिपदादयः सार्धाः षण्मासा मेघानां गर्भग्रहणकालस्तदनंतरं वृष्टि
र्भवति यदाह कश्यपः ॥ सितादौ मार्गशीर्षस्य प्रतिपद्दिवसे तथा ॥ पूर्वाषाढागते चंद्रे गर्भाणां धारणं वदेदिति ग
र्गोपि शुक्लादौ मार्गशीर्षस्य प्रतिपद्दिवसे तथा ॥ पूर्वाषाढागते चंद्रे व्यवस्थिते निशाकरे तु गर्भाणां तदादौ लक्ष
णं वदेदिति गर्भप्रसवकालज्ञानं वराहेणोक्तं यन्नक्षत्रमुपगते गर्भश्चंद्रे भवेत्स चंद्रवशात् पंचनवते दिनशते
१९५ तत्रैव प्रसवमायातीति समाससंहितायां च पौषासितपक्षाद्ये श्रावणशुक्लादयो विनिर्दिष्टाः सार्धैः षड्भिर्मा
सैर्गर्भविपाकः स्वनक्षत्रेष्विति विशेषमाह वराहः सितपक्षभवाः कृष्णे शुक्ले कृष्णाद्युसंभवाः ॥ रात्रौ नक्तंप्रभवा
श्चाहनि संध्याजाताश्च संध्यायामिति कृष्णाः कृष्णपक्षोद्भवा गर्भाः एवं सार्धषण्मासा गर्भग्रहणकालः ॥ तदनं
तरं जायमाना वृष्टिरिति निर्वचनसंभवात् एतदेवाभिप्रेत्योक्तं ॥ सौदामिनी वर्षणगर्जितेष्विति पद्यव्याख्याने महादे
वेन गृहीतगर्भाणां मेघानां यो वृष्टिकाल उक्तस्तं विना यदि वृष्टिर्गर्भनिगलनरूपा स्यात्तदाकालवृष्टिरिति ॥ तत्र मा
र्गशीर्षशुक्लादितो मेघानामवश्यं गर्भसंभवात्तद्विरुद्धत्वात् किंचिद्वृष्टिरवश्यमपेक्षितैव यदाह वराहः पवन
सलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः ... रूपास्तु येतः विसृजति यदि तोयं गर्भकाले तु भूरि प्रसव
समयमित्वा शीकरांभः करोति तेन किंचिद्वृष्ट्या गर्भस्रावानिश्चयादल्पवृष्टेर्न दोषमावहतीति अल्पवृष्ट्यामपि
देशिकवशादल्पवृष्ट्यां नैव दोषः ततः किंचिदधिकायां दोषतारतम्यं तत्र मार्गशीर्षाद्या गर्भा मंदफलाः पौषशु॥ राम.
क्लजाताश्चेति बृहद्यात्रायां वराहोक्तं मार्गशीर्षगर्भाणां मंदफलत्वं तेन मार्गशीर्षमतिक्रम्य पौषादिवृष्टेरका १९९

लिकत्वं अत एवोक्तं पौषादिचैत्रोमासासान्प्राग्गर्भवृष्टिस्त्वकालजेति ॥ मंदफलत्वादिति तस्याय तयाच मार्गे वृष्टे
रथाकालिकत्वे एतदप्युक्तं राजमार्तंडेन मार्गान्मासात्प्रभृति मुनयो व्यासवाल्मीकिगर्गाः चैत्रं यावद्गमनस
मयेवृष्टिदोषं वदंतीति एवं सति गर्भनिर्गलनं विकृतिः सा यथा स्वल्पा सती न रथ्यं चरणं किं तत्वेन किंचिद्दो
षं जनयति तथाप्यपचीयमानापि विकृतिर्महांतं दोषमारदाति तेन महान्वृष्टिर्दोषवत्त्वमेव न दोषाभावः अ
त एवोक्तं वराहसंहितायां गर्भसमयेतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता द्रोणाष्टांशेनाभ्यधिके वृष्टे गर्भः स्रुतो
भवतीति निमित्तं शुक्रास्तादि वृहद्यात्रायामपि श्वभ्रं ह्यरं तो रुधिरास्रुणाभाः सशक्रचापाः खरं कृद्धनादाः र
णप्रयोत्पातकृति चित्रपारणायदृष्टागमनेंद्रवाहा इति अन्यदपि तेनैवोक्तं सप्ताहं सततमन्यतीवृष्टिर्हन्या
न्नराधिपमिति सततानिरंतरा मेघभेदे नापि फलभेदस्तेनैवोक्तः सप्ताहांतर्बलभयकरी वृष्टिरन्यत्र्यहाता के
चिद्यात्रामसितजलदैः संयुतां प्रशंसंति चित्राभार्यां बलपतिवधो रुक्सपीतां वृदायां शुक्ला शस्यानभव
तिचिराद्वा वृष्ट्यां च नाश इति चित्राभार्यां दृष्टावितिशेषः अनेनैवाशयेन क्वचित्पठ्यते वृत्तेप्यकालवर्षे
तु तावद्दोषा न जायते यावन्नयानसमयेन रणादौ किता महीति तस्मात्सिद्धमेतत् यदत्यल्पायामकालवृ
ष्टौ दोषाभावः अल्पायामकालवृष्टावल्पदोषः महत्यामकालवृष्टौ महादोष इति वसिष्ठोपि वृष्टिविशे
षफलविशेषमाह अकालसततं वृष्टिः सप्ताहं नृपतेर्वधः एकद्वैरात्रेणैव ग्रामं संवृष्टौ महादोष इति म
करस्थास्थियवर्षे स्याद्रुसावर्षे पितत्फलं ज्ञेयं वर्षे राष्ट्रनाशः तंगारैः पांसुभिर्गदः धान्याकफलपुष्पाद्यैर्लोहे
स्त्रादिमहद्भयं पर्णैस्तैः काष्ठवर्णैर्नदेवफलमादिशेत् पाषाणवृष्टिरश्वेषु प्राणिवृष्टिरथापि वा चित्रवृष्टि
दिभवेत्तस्यानामीतिकारणं अत्र रक्तवृष्ट्यादीनां वृष्टित्वादेव निषेधे सिद्धे पुनर्ग्रहणं कालवृष्टावप्यासां दोषस्तु च
नार्थं यत आसां नष्टीनां उत्पातत्वमस्ति तेषां संदेशोयं प्रकृतेरन्यत्वमुत्पात इति वराहोक्तेः अथ प्रसंगेवार्थस्य द्वीकृ
र्वन् सन्नावश्यकयात्रायां नक्षत्रनिकं प्रसंगाद्गुष्वद्याञ्जनो द्रुता विष्टशांतिकं चातिप्राकर्षीगाथाकंदसाह अल्पायां

मु.दी. याप्र. ५. दृष्टौ दोषोल्पो भूयस्यां दोषो भूयान् त्रीमूतानां निर्घोषे दृष्टौ वा ज्ञातायां भूपः सूर्येन्द्वोर्बिंबे सौवर्णे कृत्वा विप्रेभ्यो
दद्यात् दुःशाकुन्येष्वाज्यपूर्णं सुवर्णं दत्वा गच्छेत्स्वेच्छाभिः अल्पायामकालदृष्टौ स्वल्पो दोषः स्यात् भूयस्यामतिश
येन बह्वी भूयसी तया मकालदृष्टेर्भूयानतिशयेन महान्दोषः अतो यत्प्राच्याः पठंति तावत्प्रयाणादिषु भूपतीना
मकालदृष्टिः प्रकरोति निरोति दोषं यावद्भवेन्नीचरतां त्वनानां तथापि पश्चूनांचरणांकिता भूरिति तदेतन्निर्मलत्वा
युक्तमहत्वाच्चापेक्ष्यं अयं च कालदृष्ट्याद्यादिदोषः सप्तरात्रं यावद्विलोकनीयमिति महादेवेन व्याख्यातं न तत्र तत्र
पश्यामः किं तु ज्ञातायामकालदृष्टौ यात्रामेव न कुर्यात् कृते तु स्वयं प्रस्थाने मार्गमध्ये नास्त्ययं दोषः शु
क्रायस्मादिदोषो मार्गमध्ये जीवः शशांकः शुक्रो वेति वचनबलादंगीक्रियते प्राच्यास्तु महत्यामकालदृष्टौ
दोषाभावं वर्णयंति तेषामाशयं न विद्मः अथ सत्यथ्यकालदृष्ट्यादिनिमित्ते आवश्यकयात्रायां दानमाह त्री
मूतानामिति त्रीमूतानां मेघानां निर्घोषे दृष्टौ वा कालदृष्टौ ज्ञातायां वा सूर्येन्द्वोः सूर्याचंद्रमसोर्बिंबे स्वरूपे सौवर्णे
यथाशक्ति स्वसुवर्णनिर्मिते कृत्वा भूपो राजा विप्रेभ्यो ब्राह्मणेभ्यो दद्यात् यदाह मांडव्यः दुर्दिने गर्जिते दृष्ट्वा सूर्या
चंद्रमसोर्द्वयोः बिंबे विधाय पूर्णात्यर्थं श्रोत्रियायनिवेदयेदिति यद्यपि श्रोत्रियं छंदोधीयत इति पाणिनिवचना
च्छंदोध्येतृत्वेन श्रोत्रियत्वमुच्यते तच्च वर्णत्रयसाधारणं तथापि प्रतिग्रहाधिकारी ब्राह्मण एव श्रोत्रियशब्देन
व्याकर्तव्यः अत एव मूले विप्रपदोपादानं अकालदृष्टौ पूर्णांतिमिह तां ग्रंथसंदर्भेण हह यात्रायां वराहेणाप्यधायि
तत एवावधार्यो क्वचिदकालदृष्टेरपवादः पठ्यते एकेनैकमहः प्रोक्तं द्वितीयेन त्रिरात्रकं तृतीयेन तु सप्ताहं दशरा
त्रमतः परं पौषे दिनत्रयं वर्ज्यं माघे चैव दिनद्वयं फाल्गुने दिनमेकं तु चैत्रे तु घटिकाद्वयमिति तदेतदपि प्रात्य
यिककार्यविषयं ध्येयं अथ प्रसंगात् दुष्टेपि शकुने ज्ञाते आवश्यविधेयायां यात्रायां दानमाह दुःशाकुन्य इति श
कुन एव शाकुनं चतुर्वर्णादेराकृतिगणत्वात्ष्यञ् दुष्टं च तत् शाकुनं दुःशाकुनं तस्मिन् दुष्टे शकुने वक्ष्यमाणप्र
स्थानकाले संभूते सति साज्यं सघृतं स्वर्णं सुवर्णं श्रोत्रियाय दत्वा स्वेच्छं अभिगच्छेत् यदाह मांडव्यः पथि शकुने राम. ५.

पश्येत् विपरीतमुपस्थितं सद्वृत्तं कांचनं दत्वा निर्विशंकः ततो व्रजेदिति इति यात्रोपयोगिदोषविवरणं अथ
शुभाशुभसूचकत्वेन द्वैधा शकुनाः संति तान्वक्तुकामः तावच्छुभसूचकान् शकुनान् शार्दूलविक्रीडितेनाभा
माह विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्मांबरं वेश्यावाद्यमयूरचाषनकुलाबद्धैकपश्वामिषं स
द्वाक्यं कुसुमेक्षुपूर्णकलशच्छत्राणि मृत्कन्यकारत्नोष्णीषसितोक्षमद्यससुतस्त्रीदीप्तवैश्वानराः आदर्शांज
नधौतवस्त्ररजका मीनाज्यं च सिंहासनं शावं रोदनवर्जितं ध्वजमधुच्छागास्त्रगोरोचनं भारद्वाजनृयानवेदनिनदा
मांगल्यगीतांकुशा दृष्टाः सत्फलदाः प्रयाणसमये रिक्तो घटः स्वानुगः विप्राश्वेभफलान्नदुग्धदधीनि प्रसिद्धा
नि गौः स्त्रीगवी प्रसिद्धा सिद्धार्थाः सर्षपाः सिरस इति भाषा पद्मं कं कमलं अंबरं वस्त्रमुज्वलं वेश्या प्रसिद्धा
वाद्यं मर्दलादि मयूरचाषौ पक्षिणौ नकुलः प्रसिद्धः बद्धैकपशुः रज्ज्वादिबद्धो वृषः आरक्तादिवर्णे आमिषं
मांसं सद्वाक्यं कार्यसिद्धिरस्त्वित्यादिवाक्यं कुसुमानि पुष्पाणि इक्षवः प्रसिद्धाः जलपूर्णकलशः छत्रं प्रसि
द्धं मृत् आर्द्रमृत्तिका कन्या कुमारी रत्नं माणिक्यादि उष्णीषं शिरोवेष्टनं सितोक्षः श्वेतो वृषः अयमबद्धो
पि मद्यं प्रसिद्धं ससुतस्त्री सपुत्रा नायिका या काचित् दीप्तो ज्वलमानोऽग्निः शिखावान्नित्यर्थः आदर्शो दर्प
णः अंजनं सुरमा धौतवस्त्रं उज्वलीकृतवस्त्रो रजको वस्त्रनिर्णेजकः मीनो मत्स्यः आज्यं घृतं सिंहासनं दे
वादेः शावं शवमेव शावं मृतकं श्मशानगामि लोकरोदनरहितं ध्वजः पताका मधुः क्षौद्रं छागो मेषः अस्त्रं धनुरा
दि गोरोचनं प्रसिद्धं भारद्वाजः पक्षी नृयानं सुखासनं वेदनिनदः अधीयानानां ब्राह्मणानां मुखान्निःसृतो वेदध्व
निः मांगल्यं प्रसिद्धं गीतं गानं अंकुशो हस्तिनिवारणं अस्त्रं एते पदार्था गंतुर्दर्शपादेः प्रयाणसमये यात्राकाले
संमुखं दृश्यमानाः सत्फलदाः शुभफलदाः तथा रिक्तो जलरहितो घटः स्वानुगः स्वस्य पश्चाद्गामी सोऽपि
शुभफलदः जलेन भरिष्यमाणत्वात् यदाह नारदः प्रज्वालाग्निस्तुरगनृपासनपुरंगनाः गंधपुष्पाक्षतच्छत्र
चामरदोलिकागजाः भक्ष्येक्षुकुशशस्त्राणि मध्वाज्यदधिगोवृषाः मत्स्यमांससुराधौतवस्त्रशंखरवध्वजाः प

एषस्त्री पूर्णकलशः रत्नभृंगारदर्शनं ॥ भेरीमृदंगपटहशंखवीणादिनिःस्वनाः वेदमंगलघोषाः स्युर्याने वै कार्यसिद्धि
मु.ची. या.प्र. ८१ दा इति श्रीधरोपि भारद्वाजो नकुलः चाषसंज्ञक्रौंचो वर्हीशोभनो वीक्षितः स्यात् भृंगारांजनवर्धमानमकुरा
वडेकपश्चामिषक्षीबद्वीरनृयानपूर्णकलशाकुत्राणि सिद्धार्थकाः वीणाकेतनमीनपंकदधिक्षौद्राज्यगोरोच
ने कन्याशंखसितोक्षवत्सवृषभमेनो विप्राश्च रत्नानि च प्रज्वलज्ज्वलनं दंति तुरंगा भद्रपीठ गणिकांकुशच्छत्राः अ
हृतेनक्षुफलचामरभक्ष्याण्यायुधानि च भवंति शुभानि भेरीमृदंगमृदुमर्दलशंखवीणावेदध्वनिर्मधुरमंगलगीत
घोषाः पुत्रान्विता च युवतिः सुरभिः सवत्सा धौतांबरश्च रजकोभिमुखः प्रशस्त इति सुवर्णकलशः भृंगारः भृंगा
रः कनकालुकेत्यमरः वर्द्धमानः शरावः शरावो वर्धमानक इत्यमरः वसिष्ठः दृष्टे शवे रोदनवर्जिते च संपूर्णयात्रा
फलमेव तत्र दृष्टः प्रवेशतः शवः शिवत्वं करोति तद्रोदनवर्जितोपि कश्यपोपि कार्यसिद्धिर्भवेद्दृष्टे शवे रोदनव
र्जिते प्रवेशे रोदनयुतः शवः स्यात् शिवप्रद इति वृहन्नारदः आदाय रिक्तं कलशं जलार्थी यदि व्रजेत्कोपि सहाध
गेन पूर्णं समादाय निवर्तते सा यथा प्रस्थानार्थः पथिकस्तथैवेति एतानि शकुनानि यदि दैवात्स्युस्तदोत्तमान्येव
यदि वा स्वयं रचितानि तदापि शुभान्येव यदाह वराहः स्वयमथ रचितान्ययत्नतो वा यदि कथितानि भवंति मंग
लानि सज्जयति सकलं ततो धरित्रीं ग्रहगणदृशांकृतिपाठतो यथाह इति शकुनप्रयोजनमाह वराहः अन्य
जन्मांतरकृतं शुभं वा यदि वाशुभं यत्तस्य पाकं शकुनो निवेदयति गच्छतामिति लल्लोपि नद्युत्तरस्य शुभकृत्तस्यति
थेश्चकरणस्य च चतुर्णामपि चैतेषां शकुनो दंडनायक इति अत्र केचिल्लल्लवचनं शुभसूचकाः शकुनाः उक्ताः
लग्नेवाकृतिशुक्राणां ब्राह्मणाः संमुखाः स्त्रियः बुधशुक्रौ चक्रे दृश्यौ सवत्सा गौः प्रदर्शने चंद्रसूर्ये च भवति दश
मस्थाय सदा घ्यवा दीपादर्शोक्षिमनसो रजकाधौतवाससः स्तनस्थाने यदा सौम्या हरिषा बहुला संमुखाः गुरुः
चेत्पंचनवमो रक्षिणस्याद्वायसः चंद्रो गुरुश्च सहस्तेष्वानो वामांगभागतः सर्वकर्माणि नवमे भारद्वाजोथ नाकु
लः चाषस्पर्शनं वा स्याद्वामांगे स्यात् तंडुलीभं आदित्या राज्ञसो शेषा सहजस्थो कुमारिका प्रौढांगना सुभगानां वा राम. ८१

दर्शनं सर्वकामदं षष्ठे तृतीये कर्मायये भौमः चैतत्फलं भवेत् दास्यावेश्याः सुरा मांसं लाभःचैव हि निश्चितः स
प्तपंचमे यस्य जीवो ज्ञो वा प्रवर्तते आदर्शं दध्य मांसानि राहुदर्शस्य लाभदः एकः भौमःचर्म दृष्ट्वा लग्नाद्यरि
तृतीयगः उष्ट्रं तं गोमयं पश्येत् शीघ्रं लाभं च नंदिशोदिति एवमादीनि शकुनानि लग्नबलेन शाकुनग्रंथेष्वभिहि
तानि तान एवावधार्याणीति विस्तरभयान्नास्माभिर्लिख्यंते इति अथाशुभसूचकान् शकुनान् शार्दूलविक्रीडि
ताभ्यामाह वंध्या चर्म तुषास्थि सर्प लवणांगारेंधन क्लीबविट् तैलोन्मत्त वसौषधारि जटिल प्रव्राट् तृण व्याधि
ताः नग्नाभ्यक्त विमुक्तकेश पतित व्यंग क्षुधार्ता असृक् स्त्रीपुष्पं सरटः स्वगेहदहनं मार्जारयुद्धं क्षुतं काषायी
गुड तक्र पंक विधवा कुब्जाः कुटुंबे कलिर्वस्त्रादेः स्खलनं लुलाय समरं कृष्णानि धान्यानि च कार्पासं वमनं च गर्द
भरवो दक्षेऽतिरुड् भिल्ली मुंडार्द्रवस्त्रवर्चोंधबधिरोदक्या न दृष्टाः शुभाः वंध्या कदापि गर्भसंभावनारहिता चर्म
मृगादेश्चर्म तुषं धान्यादिषु अस्थिसर्पलवणानि प्रसिद्धानि अंगारो निर्धूमोऽग्निपिंडः इंधनं काष्ठादिः क्लीबो नपुं
सकं विट् विष्ठा अह्नी विष्ठाविशेषो स्मा विस्मरः तैलं प्रसिद्धं उन्मत्तो मद्यभूताद्यावेशवान् वसा शरीरमांसवि
शेषः वसा ग्रहादन्ये मांसविभागाः समीचीनाः औषधं प्रसिद्धं व्याधितोऽचिकित्स्यव्याधिमान् अरिः शत्रुः जटिलो
जटावान् प्रव्राट् संन्यासी तृणं प्रसिद्धं नग्नः प्रसिद्धः अभ्यक्तः कृततैलाभ्यंगः विमुक्तकेशाः प्रसृतकेशाः बद्ध
केशास्तु प्रशस्ताः पतितो मद्यपानाद्यभिशापवान् द्विजः व्यंगः छिन्ननासिकादिः क्षुधार्तः क्षुत्पीडितः असृक्
रुधिरं स्त्रीपुष्पं स्त्रीणामृतुः सरटः कृकलासः गिर्गिटान इति भाषा प्राच्यानां स्वगेहदहने स्वगृहदाहः मा
र्जारयुद्धं प्रसिद्धं क्षुतं छिक्का काषायी कषायो रागविशेषः तेन रक्तं वस्त्रं काषायं तद्वान् गुडतक्रपंकविधवाकु
ब्जाः प्रसिद्धाः कुटुंबे कलिः स्वपुत्रमित्रादिभिः सह कलहः वस्त्रं प्रसिद्धं आदिशब्देन पादुकाच्छत्रादिस्खलनं स्व
हस्तान्निर्निमित्तं पतनं लुलाया महिषाः तेषां समरं युद्धं कृष्णानि श्यामवर्णानि धान्यानि माषादीनि कार्पासं
वमनं च प्रसिद्धं दक्षे दक्षिणभागे गर्दभस्य रवः शब्दः अथो वामभागे गर्दभशब्दः साधीयान् अतिरुट् क्रोधाधि

कं गर्भिणी गर्भवती मुंडो मुंडितशीर्षो यः कः चित् आर्द्राम्बरो जलार्द्रवस्त्रः दुर्वचः स्वमुखोत्थं परमुखोत्थं वा दुष्ट
वाक्यं अंधबधिरौ प्रसिद्धौ उदक्या रजस्वला स्त्री एते पदार्था गंतुर्नृपादेर्यानसमये दृष्टाः संतो न शुभा न शुभफ
लदाः किंतु गमने सत्य शुभफलदाः य**दाह कश्यपः** गोषधच्छीवरुधिरैर्जटिलोन्मत्तपावकैः अभ्यक्तांगारका
ष्ठास्थि चर्मौघ चिररोगिभिः तैलकार्पासलवणगुडतक्रतृणोरगैः कषायकृष्णैकपादमुक्तकेशबुभुक्षितैः स
नग्नमुंडैर्दृष्टैस्तु यात्रा नैवफलप्रदेति श्रीपतिः तृणतुषफणिचर्मांगारकार्पासपंके लवणगुडवसास्थिक्लीबतै
॥१॥ लौषधेषु रिपुविलसितधान्यव्याधिताभ्यक्ततक्रैः पतितजटिलमुंडोन्मत्तवांतैर्न सिद्धिः विमुक्तकेशकाषाये
र्नग्नैर्धनबुभुक्षितैः कुब्जांधवंध्याबधिरैर्दृष्टैः सिद्धिर्न जायते कुडंबकलहो गृहजननमार्तवं योषितो बिडालस
मरं स्तुतं स्खलनमंबरादेस्तथा दुरुक्तमतिकोपता महिषयोश्च युद्धं भवेत्प्रयाणसमये क्षणमभिमतार्थविच्छि
त्तये इति बृहद्या**त्रायां वराहः** कार्पासौषधकृष्णधान्यलवणक्लीबास्थितालानले सर्पांगारगराहि चर्मशकृतः
केशारिसव्याधिताः वांतोन्मत्तजडांधकं तृणतुषक्षुत्क्षामनक्रारयो मुंडाभ्यक्तविमुक्तकेशपतिताः काषायिणः
चाशुभाः तालोहरितालः गरोविषं केशारिः क्षुरादिः ध्वजातपत्रायुधसन्निपातः स्थितो प्रयाणे यदि मानवानां
उत्तिष्ठतो वायुमेति संगं पतेत वा तन्नृपतेर्भयायेति योगयात्रा**यां वराहः** न सरहोदृष्टः शुभाय कचिदिति चिंत्यं शु
रः खरोष्ट्रमहिषारूढाश्रमं गत्यादिसंयुताः कर्णनासादिभिर्हीना विवशाः कृष्णवाससः मुक्तकेशा नरा ह्या
गाह्वे लाभ्यक्ता रजस्वलाः गर्भिणी विधवोन्मत्ता क्लीवांधबधिरा नराः एतेषां दर्शने ज्ञाने न गंतव्यं कदाचनेति
वसंतराजः सर्वं शुभं दक्षिणतः कार्यं निंद्यं न वामत इति अथ क्षुते विशेष उच्यते स्माभिः तत्र नारदः सर्वदि
क्षु क्षुतं नेष्टं गोक्षुतं मरणप्रदं अफलं तत्क्षुतं वाच्यं वृद्धपीनासकैतवइति सर्व शाकुने अथ क्षुतफलं वक्ष्ये दि
क्षु यामक्रमेण च लाभोवह्निर्धनं मित्रं च तुर्यामेषु पूर्वतः लाभो वह्निः हतो वह्निः क्रमाराग्नेयतो भवेत् याम
क्रमाद्दक्षिणस्यां धनमत्रं मृतिः कलिः लाभो मित्रं सुखं वार्ता लाभो नैरृत्यदेशतः गमनोत्साह कलहवस्त्राप्तिः राम. ४२

पश्चिमादिशि वायव्यायां जयो लाभः पूर्वाग्निर्मंगलं क्रमात् शत्रुनाशो रिपुप्राप्तिर्लाभो नं चोत्तरे दृष्टे संग्राम
बाणाहतः पुडिरीशायामक्रमेण च दृष्टे गतवदीवारतिथिषु ग्रहैर्मिर्हता विषमा लाभदा नित्यं समा विघ्नप्रदा इति प्र
दा गैरुपयेवाहनारोहे विवादे शयने शने वियारंभे बीजवापे दृष्टं तं सम्प्रहर्षेण भनमिति वसंतराजः निषेधमग्रे
क्षिणि दक्षिणे च पनत्वयं दक्षिण कर्णदेशे तत्पृष्ठभागे कृते रिष्टं डिंड्रितं तं कृकाद्याः शुभमादधाति भोगाय वाम
श्रवणस्य पृष्टे कर्णे च वामे कथितं जयाय सर्वार्थलाभाय च वामनेत्रे ज्ञातं दृष्टं स्यात्क्रमेणाष्टधैवमिति अथान
कृतेन शाकुंलविक्रीडितेनाह गोधा ज्ञाहकः सूकराहि शशकानां कीर्तनं शोभनं च कर्म पित्रादीर्णां ततो व्ययः
गोधा गोह इति प्राच्याः घोरपड इति दाक्षिणात्याः ज्ञाहकः गात्रसंकोची जंतु विशेषः सूकराहि शशकाः प्रसि
द्धाः यानसमये एषां गोधादीनां कीर्तनं स्वमुखेनान्यमुखेन वोच्चारणं शोभनं शुभफलदा तस्यात् च पुनरेषां
गोधादीनां हृष्टा दृष्टे हृतमथवा विलोकनं दर्शनं न शोभनं निषिद्धं कपिकृहाणं कपीनां वानराणां ऋक्षाणां
भल्लूकानां अनेगोधादिभ्यो व्यत्ययो ज्ञेयः कपिक्षाणामित्यत्र अत्विक इति प्रकृतिभावः यत्तु प्रक्रियायां
घनसमासे इत्युक्तं तन्नित्यसमासविषये यदाह वार्तिककारः सिन्नित्यसमासयोः शाकलप्रतिषेध इति नि
त्यसमासमात्रस्तु नित्यं तन्नित्यसमासविषयं यदाह वार्तिककारः नित्यं क्रीडाजीविकयोरित्यादिभिरुक्तः
व्यत्ययोर्यथा वानराणां भल्लूकानां कीर्तनं निषिद्धं तेषामेव शाकृतिं दर्शितं वा निषिद्धमित्यर्थः यदा दक्षीपतिः
ज्ञाहकाहि शशसूकर गोधा कीर्तनं शुभमुदाहृत मार्येः नो हृतं न च विलोकनमेषामन्यथा गदितमृक्षकपीना
मिति वसिष्ठः शाखामृगाख्यभल्लूकदर्शनं स्वरनाशनमिति शाखामृगो वानरः अथ विशेषमाह नयुक्तारद
ति नयागंगादेः सतरेण भये भयसंबंधिनि कार्ये पलायनादिके प्रवेशे गृहप्रवेशे समरे संग्रामे नष्टस्यार्थस्य द्र
व्यसंवीक्षणे गवेषणे एतत्कृत्यसंबंधि निगमने क्रियमाणे सति प्रागुक्ताः शुभाशुभाः शकुनाः [illegible]
[illegible] ज्ञेयाः शुभशकुना विपरीता इमे त्याज्याः शुभा ज्ञेयाः वंध्या चर्मेत्याद्यशुभशकुनाः शुभफलदा

ज्ञेयाः इत्यर्थः यदाह वसंतराजः नृपस्य नारेभयेयुद्धप्रवेशे नष्टवीक्षणे शकुनान्यस्त्रगाः शस्तानृणां लोके प्रयाणे
वदंति राजदर्शनभयस्थानत्वात्तदपवादोयं अथ कोकिलादीनां वामांगभागेन शाकुनमनुष्टुभाह वामांगे
कोकिला पल्ली पोतकी सूकरी रला पिंगला कुक्कुकाः श्रेष्ठाः शिवा पुरुषसंज्ञिताः कोकिलापल्ल्यौ प्रसिद्धे
पोतकी डुंगेति पितृचरणाः सूकरी ग्राम्यचरका रला पिंगला भैरवी कुक्कुका कुक्कुंदरी शिवा सृगाली पुरु
षसंज्ञिताः पुन्नामानः कपोतखंजननिरिहं सादयः एते गच्छतां राजादीनां वामांगे शरीरवामभागे शस्ताः शुभः
यदा हस्त्रीपतिः कुक्कुकाभवनगोधिकारला पिंगला पिकवध्वः च पोतकी सूकरी च पुरुषसंज्ञिताः शिवावा
मतः खंजयिया सतां शुभा इति श्यामा पोतकी भवनगोधिका पल्ली परपुष्टा कोकिला अथ दक्षिणभागा
वस्थितं शाकुनं चानुष्टुभाह छिक्कारः पिक्को भासः श्रीकंठो वानरो रुरुः स्त्रीसंज्ञकाः काक ऋक्षश्वानः सु
दक्षिणाः शुभाः छिक्कारो मृगजातिः पिक्ककः भासः श्रीकंठः पक्षिविशेषः वानरः प्रसिद्धः रुरुः मृगविशेषः
स्त्रीसंज्ञकाः काकः प्रसिद्धः ऋक्षो भल्लूकः अत्रापि ऋक्षयक इति प्रकृतिभावः श्वा कुक्कुरः एते यात्रायां
गंतुर्भूपादेः दक्षिणभागगताः शुभाः शुभफलदाः यदा हस्त्रीपतिः ऋक्षो भासछिक्कारो धुगरश्च श्रीकंठः श्वा
पिकाख्यो रुरुश्च ये स्त्रीसंज्ञा दक्षिणास्ते प्रशस्ताः प्रोक्ताः शैवैः स्वदिभिस्ते प्रयाणे इति वराहः स्त्रीसंज्ञाश्वाषभष
ककपिश्रीकर्ण छिक्काराः शिखिश्रीकंठपिप्पीक रुरुश्येनाश्च दक्षिणा इति भषकः श्वा वराहेण प्राच्यादि
कूपरत्वेन शकुना उक्ताः ऊर्क्कटे भचिरल्लाश्च शिखिवंजुलछिक्कराः वलिनः सिंहनादाश्च क्रूरपूरी च पूर्वतः
क्रोष्टुकोलूकहारीतकाककोकर्क्षपिंगलाः कपोतरुदितान्क्रंदक्रूरशब्दाश्च याम्यतः गोशशक्रौंचलो
माशाहंसक्रोशकपिंजलाः विलोमोत्सववादित्रगीतहासाश्च वारुणाः शतपत्रकुरंगाखुमृगैकशफको
किलाः चाषशल्यकपुण्याहघंटाशंखरवा उदगिति अथोक्तव्यतिरिक्तानां मृगपक्षिणां सामान्यतः प्राद
क्षिणेन शाकुनमनुष्टुभाह प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः ओजामृगा व्रजंतो हि धन्या वामे खरस्व

णः रुरुव्यतिरिक्ता मृगाः पक्षिणःच यात्रायां प्रादक्षिण्येन गता स्खलिताः श्रेष्ठाः शुभफलदाः स्युः परंतु मृगा
ओजा विषमसंख्या त्रिपंचसप्तादयः चेद्व्रजंतो दृष्टाः स्युस्तदातिधन्याः यदाह श्रीपतिः मृगा विहंगाश्च गताः
प्रदक्षिणं महीभृतां कांक्षितकार्यसिद्धये मृगा व्रजंतः परमोजसंख्ययेति वराहस्तु पक्षिणामपि विषमसं
ख्याकत्वमाह यथा ओजाः प्रदक्षिणं शस्ताः मृगाः सनकुलाण्डजाः इति अण्डजाः पक्षिणः चाषइति ॥ खरवामभा
गे खरस्वनो गर्दभशब्दो तिधन्यः यदाह अथ शकुनानां कियतां कालविशेषे नैफल्यमाह वराहः नग्राम्यो
रण्यगो ग्राह्यो नारण्यो ग्रामसंस्थितः दिवाचरो न शर्वर्यां न च नक्तंचरो दिवा द्वंद्वरोगार्दितत्रस्तकलहामिष
कांक्षिणः आपगांतरिता मत्ता न ग्राह्याः शकुनाः क्वचित् रोहिताश्वाजबालेयकुरंगोष्ट्रमृगाः शशाः निष्फलाः शि
शिरे ज्ञेया वसंते काककोकिलौ न तु भाद्रपदे ग्राह्याः सूकरश्वश्वकादयः शरद्यब्जादगोक्रौंचाः श्रावणे हस्ति
चातकौ व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः हेमंते निष्फला ज्ञेया बालाः सर्वे विमानुषाः इति अथ स्था
नविशेषे शकुनः शुभोपि दुष्टफलदः इत्याह वराह एव प्रभग्नशुष्ककद्रुमकंटकीवपूमशानभस्माग्निसमाकुले
षु प्राकारशून्यालयजर्जरेषु सौम्योपि पापः शकुनः प्रकल्प्य इति विरुद्धशकुननिंदाभिहितादेव ज्ञमनोहरे
वरं ज्ञयेद्दंडेन हतस्य सर्पो वरं क्षिपेत्सिंहमुखे स्वमंगं तदंतरे द्वारिनिधिं भुजंगात्संपानोल्लंघयेद्दुःशकुनं कदापीति
अथावश्यकर्तव्यायां यात्रायां विरुद्धशकुने संजाते किं कर्तव्यमित्यनुष्टुभाह आद्ये पशकुने स्थित्वा प्राणाने,
कादश व्रजेत् द्वितीये षोडश प्राणांस्तृतीये न क्वचिद्व्रजेत् ॥ निर्गमसमये यदा पशकुने वंध्याचमैत्यादिके विरु
द्धशकुने आद्ये प्रथमे संजाते सति एकादशसंख्याकान्प्राणान्स्थित्वा शुभशकुने व्रजेत् ततः पुनरपि देवाद्द्वितीयो
पशकुने सति षोडश प्राणान्स्थित्वा शुभशकुने व्रजेत् तत्रापि पुनस्तृतीये विरुद्धशकुने संदृष्टे न क्वचिदपि न व्रजे
त् किं तु परावृत्य स्वगृहमागच्छेत् यदाह वसंतराजः ज्ञाते विरुद्धशकुने ध्वनीनो व्याहृत्य कृत्वा करपादशौचं आच
म्य च धीरतो रथला निष्टत्वपशेपच्छकुनांतरालीति श्रीपतिः आद्ये विरुद्धशकुने प्रतीक्ष्य प्राणान्नृपः पंचषड्

यायात् अष्टोद्वितीये द्विगुणं स्तृतीये व्याहृत्यानूनं गृहमभ्युपेयादिति प्राणशब्देन विंशतिः लघ्वक्षराणि दश
गुर्वक्षराणि वा यावता कालेन पूर्यंते तावत्कालस्तुच्यते यदाह दीपिका: लघ्वक्षरैः स्फुटोच्चैः प्राणः कथितस्त्रिविं
शतिभिरिति भास्करः गुर्वक्षरैः खेंदुमितैरसुरिति अन्यत्रापि दशगुर्वक्षरैः प्राण इति कश्यपेन तु प्राणायाम
त्रयमेव प्रतीक्ष्यमित्युक्तं यथा यायी विकृडं शकुनमादौ दृष्ट्वा प्रयत्नतः प्राणायामत्रयं कुर्याद्द्वितीये द्विगुणं
स्मरेत् तृतीये पुनरावर्त्य शांत्वा यायाद्यायाद्विप्रांतरे इति प्राणायामस्तु वर्णत्रयाप्रसिद्धा शांतिरुक्ता दे वलमने
हो यदाहि शकुनेपपुष्ट्ये द्विपरीतमुपस्थितं सद्वृत्तकांचनं दत्त्वा निर्विशंको व्रजेदिति एतच्चास्पष्टमूले स्पष्टमुक्तं
दुःशकुनेऽसाध्ये सुवर्णं दत्त्वा गच्छेत्तेवच्छाभिरिति एवं निखिलदोषशुद्धिं विचार्य शुभलग्ने गंतुः नृपस्य शत्रुपरा
जयपूर्वकस्तन्मरणपूर्वको जयो वा भवत्येव तत्र शत्रुनगरे जिते सति राज्ञः किं कार्यमित्याह वसिष्ठः विगतंत
रंगभीतान्गुणलोकाभिलाषान्विरथशिथिलवस्त्रान्मुक्तशस्त्रान्सकेशान् तृणमुखगतसत्वान्प्रांजलीन्यु
द्धमानान्क्षितिपतितनतारीन्युद्धभूमौ न हन्यात् सपत्नदेशान्नगरान्प्रपश्य महीपतिर्देवगृहद्विजार्थं कुर्या
न्नवांछन्नकुलागतानां प्राणाभिलाषीव कदाचिदेवेति वराहोपि नान्नन भीताननृणानलाभ्व विमुक्तशस्त्रा
विपलायमानाः स्त्रीणयुधावाज्ञिगतावतीर्णाः हतेन वध्या न च पीडनीयाः कुलैकतंतुः शरणागतो वा कृ
तांजलिर्यस्तव देवदास्मि आयुध्यमानानवगम्य हन्यान्न लाभकान्स्त्रीपरिरक्षितांश्चेति अह वक्ता हतेनदध्य
कं पद्येनोपनिबद्धं मुहूर्ते विचारानुपयोगात् यदाह श्रीपतिरोक्तं नपरविषयप्राप्तौ राज्ञद्विजामरसज्जनद्वि
णहरणे चेतः कुर्यान्नवाकुलयोषितां विगतंतरंगानाज्ञान्हन्यान्नभीतनिरायुधांश्च मुदितमनाः सन्वैः शस्त्रेदत्ते
सुपरं विशेदिति तन्महतामनुरोधोन्यायः इति मनसालोच्याभिहितं तत्र शत्रोर्नगरे प्रवेशस्योक्तत्वाद्द्विजयं यथा
त्रायां प्रविधाय परात्स्वगृहमागत्य भूपस्य यात्रानिवृत्तिगृहप्रवेशयोस्तु मुहूर्ते जगत्यामुपजातिकाछंदसाह या
त्रानिवृत्तौ शुभदं प्रवेशं मृदुध्रुवैः क्षिप्रचरैः पुनर्गमः द्वीशानलेदारुणभे तथोग्रभे स्त्रीगेहपुत्रात्मविनाशनं क्रमात्

चतुर्धा प्रवेशः नववधूप्रवेशः अपूर्वप्रवेशः सपूर्वप्रवेशः द्वंद्वाभयप्रवेशश्चेति तत्र नववधूप्रवेशः प्रागुक्तः अपू
र्वप्रवेशद्वंद्वाभयप्रवेशौ वक्ष्यते इह तु सप्रवेशः सपूर्वप्रवेश उच्यते तत्र नववधूप्रवेशस्यान्वर्थसंज्ञाविज्ञानादेव तल्ल
क्षणं नोक्तं कैश्चिदपि अपूर्वादित्रिविधगृहप्रवेशलक्षणान्याह वसिष्ठः अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने च स
पूर्वसंज्ञः द्वंद्वाभयस्त्वग्निभयादिजातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्ट इति वास्तुप्रकरणोक्तविधिना गृहनिर्माणं विधाय
यः प्रवेशः प्रथमः सोऽपूर्वसंज्ञः यस्तु नृपस्य समरविजययात्रां विधाय गृहमागतस्य प्रवेशः स सपूर्वसंज्ञः यस्तु भ
यस्त्वग्निभयेनाग्निकृतदाहेनादिशब्देन नद्यादिसमीपवर्तित्वाज्जलाप्लवनेन वा कुड्यराज्ञादिपतनेन वा गृहनाश
कस्तु गृहं पुनर्यदा संपद्यते तस्मिन्यः प्रवेशः स द्वंद्वाभय इत्युच्यते अन्वर्थसंज्ञा चेयं द्वंद्वं शीतोष्णे अत्र शीतशब्देन ज
लमुष्णशब्देनाग्निरुच्यते लक्षणया जलाप्लवनेन वा अनवधि कियद्दिवसवृष्टिपातेन वा गृहनाशस्तज्जलभयं अग्नि
कृतदाहेन यो गृहनाशः तदग्निभयं तस्माच्छीतोष्णरूपाद्द्वंद्वान्नृपविद्रुतरूपत्याये येनेन यदभवं तद्द्वंद्वाभयमित्युच्यते द्वंद्व
भयं विघ्नं यस्मिन्निति दर्शआदित्वाज्जिति मत्वर्थीयोऽच्प्रत्ययः नाद्वशाप्रवेशो द्वंद्वाभय इति तत्र गुरुशुक्रास्तादिकाल
शुद्धिविचारस्तु नूतनोत्थापितगृहप्रवेश एव द्वंद्वाभयसपूर्वसंज्ञप्रवेशयोः वास्तुपूजा तु सर्वेष्वपि प्रवेशेषु यदा
ह वसिष्ठः नवप्रवेशोक्तमथकालशुद्धिर्न द्वंद्वसापूर्विकयोः कदाचित् प्रवेशपंचाग्निदिने सुलग्ने वास्त्वर्चनं पूर्ववदेव
कुर्यादिति पूर्ववत् पूर्वस्मिन्नपूर्वे गृहप्रवेशे यथा वास्त्वर्चनं तथा परयोरपि अमुमेवाशयं मनसि विधायाग्रे ग्रंथ
कृद्वक्ष्यति जीर्णे गृहे अग्न्यादिभयान्नवेपि मार्गोर्जयोः श्रावणिकेपि सत्स्यात् वेश्मांबुपेज्यानिलवासवेषु नावश्यका
स्तादिविचारणात्रेति अतोत्र यात्रानिवृत्तिप्रवेशमुहूर्तविचारे शुक्रास्तादिदोषविचारो नाभिहितः किंतु यथा
कथंचित्पंचांगशुद्धिमात्रामपेक्ष्यं विशेषतः च पंचांगशुद्धिं लग्नशुद्धिं चाग्रे वक्ष्यति साप्यत्र यथासंभवमूह्यान
न्तरशुद्धिस्त्वेवंविधे प्रवेशे विशेषाभिधानात् अत्र ग्रंथकृतोक्ता तत्र कालशुद्धिमाह श्रीपतिः अथ प्रवेशो नवमंदि
रस्य यात्रानिवृत्तावथ भूपतीनां सौम्यायने पूर्वदिने विधाय वास्त्वर्चनं भूतबलिं च सम्यगिति नारदः अथ सौम्यायने

मु॰टी॰
या॰प्र॰
५९

कार्येनववेश्मप्रवेशनं राज्ञोयात्रानिवृत्तौवेति सौम्यायनेइति उक्तराज्ञोयात्रानिवृत्तौकालविलंबसहत्वेबोद्धव्यंवसि
ष्ठस्वरसात् स्मृतौहि विरोधेविषयकल्पनेवोचितानतुविकल्पः यथोक्तं स्मृतिद्वैधंतुयत्रस्यात्तत्रधर्मावुभौस्मृतौ
स्मृतिद्वैधेतुविषयः कल्पनीयः पृथक्पृथगिति अलमतिप्रसंगेन यात्रानिवृत्तौवेति शृङ्गानिचित्राःतुराधाष्टगरेवत्यः
ध्रुवःप्रसिद्धः एभिर्नक्षत्रैराज्ञोयात्रानिवृत्तौप्रवेशनंशुभदं यदिदिशिप्रैरश्विनीपुष्यहस्ताभिजिद्भिःचरैःश्रवणधनिष्ठा
शततारकापुनर्वसुस्वातीभिः नक्षत्रैः प्रवेशनंकिंचिन्नपतितंस्यात्तदापुनरपिराज्ञोगमोयात्रास्यात् तस्मादेतानि
मध्यमानि ह्रीशादिनक्षत्रेषुप्रवेशक्रमात् स्थ्यादीनांनाशः यथाविशाखायांप्रवेशेस्त्रियोराज्ञोमरणं कृत्तिकायांप्र
वेशेगृहनाशनमग्निनागृहंदग्धंस्यात् दारुणाभेमूलज्येष्ठाद्रीश्लेषासुप्रवेशेपुत्रस्यराजकुमारस्यमरणं तथोग्रभेपूर्वा
त्रयभरणीमघासुप्रवेशेआत्मनःस्वस्यैवराज्ञोमरणंस्यादित्यर्थः य दाहश्रीपतिः शुभःप्रवेशोमृदुभिर्ध्रुवाख्यैःक्षि
प्रैःचरैःस्यात्पुनरेवयात्रा उग्रैर्नृपोदारुणभैःकुमारोराज्ञीविशाखासुविनाशमेतीति कृत्तिकासुभवनंकृशानु
नादह्यतेप्रविशतांनसंशयइति कश्यपगुरुरम्भिः अथार्थेयंयुक्तताप्राकाधिपंचांगशुद्धिरत्नोपयोगानन्मूलवाक्या
न्युच्यंते चंद्रतारार्यमितवासरेषुतु श्रीकरंसुखमहार्थलाभदं सूर्यसूनुदिवसेस्थिरप्रदंकिंतुचौरभयमत्रविद्यतइति
श्रीपतिः रिक्तातिथिर्भूसुतभानुवारौनिंद्याश्चयोगाःपरिवर्तनीयाः मेषःकुलीरोमकरस्तुलाचन्यायाःप्रवेशेहि
तथानदंशाइति अत्रमेषादिनिंद्यलग्नानांफलंसापवादंउक्तं रत्नमालायां मूयोयात्रामेषलग्नप्रवेशेनाप्रांगकेत्वं
तथानदंशाइति अत्रमेषादिनिंद्यलग्नानांफलंसापवादंउक्तं रत्नमालायां आर्कोकरोमकरः लग्नेन्यर्कोशके
र्कटस्यादयेच व्याधिंतौलिन्याश्विनेलग्नवर्तिन्याकर्कटेवामृत्युर्द्धान्यनाशं आर्कोकरोमकरः लग्नेन्यर्कोशके
येषामेतेदुष्टफलप्रदाः शुभान्यन्यानिलग्नानिप्रवेशेष्वनयाविदः निंदिताअपिशुभांशसमेताःतौलिमेषमकराः
सकुलीराः कर्तृभोपचयगाश्चविलग्नेराशयःशुभफलायभवंति वशिष्ठः त्रिकोणकेंद्रनिधनायसंस्थैःशुभैःत्रि
षष्ठायगतैःखलैश्च लग्नात्त्यषष्ठाष्टविवर्जितेनचंद्रेणलक्ष्मीनिलयःप्रवेशः ननैधनेमेपिनचाष्टलग्नेपंचेष्टकेष्य राम॰
ष्टमशुद्धियुक्तेकार्यःप्रवेशोनचरांशलग्नेशुभेदिनेवाप्ययसंयुतेवा प्रवेशलग्नात्रिधनस्थितोयःक्रूरग्रहःक्रू ५९
ष्टमशुद्धियुक्ते कार्यःप्रवेशोनचरांशलग्नेशुभेद्दिनेवाप्ययसंयुतेवा

स्वगृहे यदि स्यात् प्रवेशकर्त्तास्मथ त्रिवर्षाद्रूर्ध्वं पंचवर्षैः शुभराशिगश्चेति अन्यदप्याह वसिष्ठ एव कृत्वा शुक्रं पृ
ष्ठतो वामतोर्कं विप्रान् पुरस्कृत्य नयतः पूर्णकुंभं हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशेत्तदिति वा
मसूर्यज्ञानोपायमाह विश्वकर्मा लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् एकमेकं न्यसेत्कोणेषु सूर्यं वामे
विचिंतयेदिति अत्रेदं ध्येयं यत्र मासे यात्रा कृता तन्मासान्नवमे मासि यात्रादिनान्नवमदिने वा प्रवेशो निषिद्धः
यदाह गुरुः निर्गमान्नवमे मासि प्रवेशो नैव शोभनः नवमे दिवसे चैव प्रवेशं नैव कारयेदिति एतस्य विशेषं
नूतनगृहप्रवेशव्याख्यानावसरे अभिधास्यत इत्यलं प्रसक्तानुप्रसक्तमिति अथ विवाहप्रकरणोक्तदोषान्
तिदिशन्नस्यात्रशुद्धान्यात्राप्रकरणोक्तदोषान् शिष्याणामविस्मरणार्थं मंजुभाषिणीच्छंदसा ग्रथयाच संगृह्णी
ते अयनर्क्षमासतिथिकालवासरोद्भवशूलसंमुखसितज्ञदिक्कणाः भृगुवक्रतादिपरिघाख्यदंडकायुवतीर
तोप्यशुचिनात्मवाद्धिकं हतपक्षरिक्ता विनर्कसंख्याकास्तिथयः च सौरिरविभौमवासराः अपि वामपृष्ठग
विधुस्तथानुजो वसुपंचकाभिजिदथापि दक्षिणे लग्नेन्दुमध्येन्त्योष्टतिगृहमहिषद्वीपषष्ठतदीशा वाल
ग्रकुंभमीनदोर्बलवतत्तु वापि दिष्टदृष्टादयंच दृष्टाशासंस्थमस्तं दशामशानिरोधा सप्तमेपि च कार्याः केंद्रे वक्रा
खवक्रिग्रहदिवसविवाहोक्तदोषाश्च नेष्टाः एतेयनादयो दोषा विवाहप्रकरणोक्तदोषा यात्रायां कर्तव्यायां
नेष्टाः तत्रायनशूलः सौम्यायने सूर्ये विधूनदोत्तममित्यादिकः मासोद्भवः शूलो यात्रायां स्वरोदयशास्त्रे सर्व
तोभद्रचक्रे अभिहितः यथा त्रयस्त्रयोष्टषार्ध्यायाश्च पूर्वाशादिषु धैः क्रमात् राश्योर्द्वादशैवं तु मेषान्तः स्वपश्चिमार्ग
गाः यत्र पूर्वादिकाष्ठायां ष्वराशयादिगो रविः सा दिशा स्तमिता ज्ञेयाः तिस्रः शेषाः सदोदिता इति नक्षत्रवास्तु
लः न पूर्वद्विपिशाक्रमेन विधुसौरिवारेन थेत्युक्तः तिथिशूलं योगिनीन वसुमपः शिववद्रुमयकुत्युक्तः संमुखसि
तज्ञदिक्कणाः संमुखः शुक्रः संमुखो बुधः संमुखो दिक्स्वामी लालाटिकत्वेन यत्रोदितः ताक कुंभं न यायादित्या
दिनोक्तः भृगुवक्रता आदिशब्दात्क्षीणस्तमितनीचशत्रुपराजितत्वबाल्यादिकं वाक्यांशनीचेत्युक्तं परिघा

मु॰टी॰ ख्यदंडकः पूर्वादिषु चतसृदिक्षित्युक्तः युवतीरजः स्वपत्नीरजोदर्शने अशु आशौचं जननाशौचं मरणाशौचं
या॰प्र॰ च अशुचितेत्यत्र न हुंदरशुचितस्वभोक्तृचितस्य शुचिता पक्षादित्यनेन योनिषेधः सह्येन स्मात्सूत्रादनंतरं
५६ वक्ष्यमाणवस्यावप्रत्ययस्यात्सकोदीयात्सवादि आदिशब्देन विवाहव्रतबंधादिः मृतपदः तमोभुक्तताराऽ
त्युक्तः रिक्तरविनर्कसंख्यका चतुर्थीनवमीचतुर्दशी द्वादशीषष्ठ्यस्तिथयः उपलक्षणत्वादष्टमी पूर्णिमामाव
स्याशुक्लप्रतिपदः सौरिरविभौमवासराः शनिसूर्यमंगलवाराः अयं च निषेधो दिक्शूलेन सर्वत्रेति प्रागभि
हितं वामपृष्ठगविधुरपि वामभागे पृष्ठभागे च चंद्रो निषिद्धः उक्तं च संमुखेऽर्थस्य लाभाय दक्षिणे सुखसंपदः
पृष्ठे तो मरणं चंद्रे वामचंद्रे धनक्षय इति एतच्च निर्मूलत्वादुपेक्ष्यं सत्यपि मूलवचने एतत्सार्वद्वारिकनक्षत्रव्यति
रेकेण ज्ञेयमन्यथा सर्वत्र दिग्द्वारनिषेधे पुष्यादीनां सर्वदिग्द्वारकता भज्येत तथा डलः रवेर्भं तोऽज्ञ भोऽग्नि
तिरित्युक्तः उपलक्षणत्वाद्भ्रमणमपि निषिद्धं वसुपंचकं वसुशब्देन धनिष्ठोत्तरार्धमुच्यते तदादिकं नक्षत्रपं
चकं अभिजिदभिजित्संज्ञको मुहूर्तो दिवसेऽष्टमः एतद्द्वयमपि दक्षिणे एते पंचांगदोषाः अथ लग्नदोषाः ल
ग्नेइति लग्ने यात्रालग्ने विचारयितव्या इति जन्मर्क्षेतत्त्वो र्जन्मराशि जन्मलग्नसंबंधिमृतिगृहमष्टमस्थानं अ
हितर्क्षान्तु पत्रु राशेः शत्रुलग्नाद्वा षष्ठं षष्ठस्थानं नहीशाःस्वजन्मराशितोऽष्टमाधिपतिः स्वशत्रुराशितःषष्ठस्था
मी स्वशत्रुजन्मलग्नाद्वा षष्ठाधिपतिः एते लग्ने लग्नस्थिता स्युः कुंभमीनद्रौनवलवसननहू कुंभलग्नं मीनल
ग्नं वा लग्नं न स्यात् द्वा वेवा कुंभनवांशो मीननवांशो वा षष्ठोदयं च षष्ठोदयः राशयः गोज्या स्त्री ति वरा
होक्ताः षष्ठाशासेस्थमृत्यं दिस्त्रिलोमलग्नमित्यर्थः दशमशनिः दशमेस्थाने शनिः अथ सप्तमेस्थाने स्थि
तः कार्व्यः स्युक्तः केंद्रे वक्रा वक्रिणो ग्रहा वक्रिग्रहस्य वक्रिग्रहयोः वक्रिग्रहाणां वादिवसाः एते दोषा यात्रायां
नेष्टा अवश्यं वर्ज्याः अत्रार्थे मूलवाक्यानि प्राक् लिखितानि अथ च विवाहोक्तदोषा विवाहप्रकरणेऽभिहिताः राम॰
ते दोषास्तेऽपि निषिद्धाः ते इमे उत्पातान्सह पातं दग्धतिथिभिः इद्द्वियोगास्तथा चंद्रे इत्यो शनसा मध्यास्त ५६

मयनं तिथ्याद्यन्यद्वीनथा गंडांतं च सविष्टिसंक्रमदिनं तन्वंशपालं तथा तन्वंशेशविधूंस्तथाष्टरिपुगान्वा
पस्य वर्गांस्तथा सेंदुक्रूरखगोदयांश्चाप्युदयास्ताच्छुद्धिं च डायुधान्स्वोर्जूरं दृष्ट्वा योगयोगसहितं जामित्रलत्ताव्य
धं बाणपग्रहपापकर्तरि तथ्याति ध्यावृद्धावारोत्थितं दुष्टं योगमथार्द्धयं न कुलिकाद्यान्वारदोषानपि क्रूराक्रांत
विमुक्तभं ग्रहणभं सक्रूरगं न त्वभं वेधोत्पातहतं च केतुहतभं संध्योदितं भं तथा तद्वद्ग्रहभिन्नयुद्धगनभं स
र्वानिमान्संत्यजेत् उद्वाहे शुभकर्मसु ग्रहकृतांल्लग्नस्य दोषानपीति यदाह वसिष्ठः एकविंशन्महादोषास्त्वेते
ब्रह्ममुखोदिताः कदाचिन्नैव सिध्यंति गुणानां कोटिकोटिभिः तस्मादेतेषु दोषेषु कदाचिन्नाचरेत् शुभं वि
वाहे विधवा नारी मरणं व्रतबंधने ग्रामनाशः प्रतिष्ठायां सीमंते गर्भनाशनं नवान्नभोजने मृत्युः कृषौ तत्फल
नाशनं कर्तुर्नीश्वा गृहारंभे प्रवेशे पतिनाशनं ॥ यात्रायां कर्तृनाशः स्यात् युद्धयाने विशेषतः लग्नेतेषु महत्सु
एषमेषु श्राद्धादिकर्मभिरिति ॥ अत्र सप्तमशुक्रव्यतिरिक्तो जामित्रदोषो धनुरर्कादिमासदोषोपि नास्तीति ध्ये
यं यदुक्तं गणेशदैवज्ञैः ॥ सर्वमुद्वहनजं मासास्तदोषो विनेति मासदोषो धनुरर्कादिः अस्तदोषो जामित्र
दोषः तत्रापि शुक्रराहित्यं विवक्षितं यतः सप्तमशुक्रस्य यात्रायां विशिष्य निषेधोस्ति बुधगुरुलग्नप्रशस्तोए
व एवं मासदोषजामित्रदोषा विवाहोक्ता यात्रायां न निषिद्धाः किंतु विहिता उत्त्वेतद्व्यन्ये विवाहोक्तादोषा
यात्रायां निषिद्धा एवेति शिवं अथ यात्राप्रकरणं गद्येनोपसंहरति । इति श्रीविद्वद्दैवज्ञानंतसुतदैवज्ञराम
विरचिते मुहूर्तचिंतामणौ यात्राप्रकरणं समाप्तं ॥ स्पष्टार्थमेतत् ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिका
यास्तथा पुत्रेणाहिगवीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मितेन यनिधौ पीयूषधाराभिधे
व्याख्याने खलु यात्रिकप्रकरणं संपूर्णतामभ्यगात् इति श्रीविद्वद्दैवज्ञमुकुटालंकारश्रीमन्नीलकंठज्योति
र्वित्पुत्रगोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां यात्राप्रकरणं समाप्तिम राम:
गमत् ॥ संख्या २२०० शुभमस्तु सर्वजगतां लेखकपाठकयोश्च श्रीगणेशाय नमः श्रीगुरुभ्यो नमः ८७

यात्राप्रकरण ४७

मु·टी·
वा·प्र·
२९

पार्श्वे द्वे एव स्थिते महापार्माणावृक्षत्वेन आहुः इति भाषया द्वयोरपि संज्ञा ॥ एवं दीर्घे च तरसंद्वारं भवति पाषा
णसंभवे काष्ठादेरपि ॥ तत्र द्वारे चिकीर्षिते सूर्याधिष्ठितनक्षत्राद्युगमैः चतुर्भिः नक्षत्रैः शिरस्थैरवस्थितैः सद्भिः ल
क्ष्मीप्राप्तिरूपं फलं स्यात् ॥ ततस्तदग्रिमैर्नागैः कोणभैः द्वयोर्द्वयोरवस्थित्या च तत्कोणोद्धवस्थितैः अष्टसंख्याकै
र्नक्षत्रैः उद्वसनं तद्द्वारगृहं सर्वदा जनवासरहितं स्यात् ॥ ततः तदग्रिमैर्नागैर्मितैरष्टभिर्भैः शाखास्थैः भाषया साह इति
नाम तत्रावस्थितैः गृहस्वामिनः सौख्यरूपं फलं भवेत् ॥ ततस्तदग्रिमैर्गुणभैस्त्रिभिर्नक्षत्रैः देहल्याम् अवस्थितैः ग
हपतेर्मृतिः स्यात् ॥ ततः तदग्रिमैर्वेदभैः चतुर्भिर्मध्ये खरूपे अवकाशे स्थितैः सौख्यं स्यात् ॥ फलितार्थमाह ॥ चक्रमि
ति इदं द्वारचक्रं विलोक्य सुधिया शुभं शुभफलदात् द्वारं विधेयं कर्तव्यं ॥ तदुक्तं ज्योतिर्निबंधे ॥ द्वारचक्रं प्रवक्ष्या
मि भाषितं विश्वकर्मणा ॥ सूर्यभाद्द्वारचक्रं तु द्वारस्योपरि विन्यसेत् ॥ द्वे द्वे कोणे प्रदातव्ये शाखायुग्मे द्वयं द्वयं ॥ त्र
धः च त्रीणि देयानि वेदा मध्ये प्रतिष्ठिताः ॥ राज्यं स्यादूर्ध्वनक्षत्रे कोणेषूद्वसनं भवेत् ॥ शाखायां लभते लक्ष्मीमधः
वेवहृतिं लभेत् ॥ मध्यस्थेषु भवेत्सौख्यं चिंतनीयं सदा बुधैरिति ॥ द्वारचक्रं यथा

२	४	२
५	४	४
२	३	२

अथ द्वारस्थापनदि
द्वारशाखावरोपण
मुनि ... नंदा ... वसौ
त्रागतुच्यंते ॥ अश्विनी चानुराधा हस्तः पुष्यश्रुतिमृगाः शुभाः ॥ स्वाती मूलं क्षिप्रं रोहिण्यां
मिति ॥ ज्योतिर्निबंधे भिहितत्वात् ॥ तिथ्ययोपि तत्रैवाभिहिताः ॥ पंचमी धनदा चैव
ऽशुभं ॥ प्रतिपत्सु न कर्तव्यं कृते दुःखमवाप्नुयात् ॥ द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनं ॥ तृतीया रोगदा ज्ञे
या च तुर्थी भंगकारिणी ॥ कुलक्षयं तथा षष्ठी दशमी धननाशिनी ॥ विरोधकृन्माप्यूर्णो नस्यान्मूलशाखावरोपन
मिति ॥ एवं सति विरुद्धतिथीर्विहाय विहिततिथिषु विहितभेषु चक्रशुद्धेषु भेषु द्वारं विहितं शुभफलदातृ स्या
दिति निष्कृष्टार्थ इति शिवं ॥ अथ गृहारंभप्रकरणं गंभीरेणोपसंहरति ॥ ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तु
था पुत्रेण हि गर्वे प्रसारितधिया मौहूर्ते चिंतामणौ ॥ गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने गृह
निर्मितिप्रकरणेसशर्णतामध्यगात् ॥ इति श्रीमुहूर्तचिंतामणिटीकायां गृहारंभप्रकरणं समाप्तम् ॥ ॥

राम·
२९

चैव कृत्तिकाषाढमेव च पूर्वाफाल्गुनि हस्ते च मघा चैव तु समं मकं ॥ एषु भौमेन युक्तेषु वारे तस्यैव वेश्म यत्
अग्निना दह्यते क्षिप्रं पुत्रनाशश्च जायते इति अत्र विशेषमाह वसिष्ठ एव अग्निनक्षत्रगे सूर्ये चंद्रे वा संस्थि
ते यदि ॥ निर्मितं मंदिरं नूनं अग्निना दह्यते चिरादिति ॥ आवश्यकत्वाद्धि हि न नक्षत्रानुपलब्धौ मध्यमेषु
भेषु गृहप्रारंभः प्राप्तः सकृत्तिकायां माभूदिति निषेधः सूर्येन क्षत्रे कृत्तिकायां माभूदित्यर्थोपि सैहो
रिति रोहिण्यश्विन्युत्तराफल्गुनीचित्राहस्तैः सहैर्बुधयुक्तैस्तस्यैव वारे च कृतं गेहं धनदं पुत्रदं च स्यात्
यदाह वसिष्ठः हस्तार्यमत्वाष्ट्रदस्रवतुराख्याद्युभेषु च बुधेन सहितेष्वेषु धनपुत्रसुखप्रदमिति अथाशुभ
फलदमेकमेव योगमनुष्टुभाह अजैकपादहिर्बुध्न्यशाक्रमित्रानिलांतकैः समंदैर्मंदवारे स्याद्रक्षोभूत
युतं गृहं पूर्वाभाद्रपदोत्तराभाद्रपदाज्येष्ठानुराधास्वातीभरणीनक्षत्रैः समंदैः शनैश्चरयुक्तैर्मंदस्यैव वारे च प्रा
रब्धं गृहं रक्षोभिर्भूतैश्च युतं स्यात् यदाह वसिष्ठः अजपाद्बुध्नयाम्यमित्रेंद्रानिलभेषु च यत्कृतं शनिसंयुक्ते
दिह्यते यक्षराक्षसैरिति दिहृ उपचये नारदोपि ज्येष्ठानुराधिके चैव भरणीस्वातिपूर्वभे धनिष्ठास्वपि मंदे
युक्ते निर्मितं हि निस्वं च रूपेणानामतः प्रोक्तो धनधान्यादिके गृहे पुत्रो जातोथवा तस्मिन्गृह्यते यक्षराक्ष
सैरिति अत्रायं निष्कृष्टोर्थः पूर्वं गृहारंभनक्षत्राण्येव धेयानि ततो वृषवास्तुचक्रे शोध्यानि पश्चादिदं यो
गं च कं विचार्यमेव सति गृहारंभः उक्तफलदो नाम भवेत् अयं सर्वोपि गृहविचारः प्रासादवापीकूपादिषु
ध्येयः उक्तं च विद्वध मोहरे प्रासादेष्वेवमेव स्याद्वापीकूपेषु चैव हीति प्रासादो देवगृहं अथ केषांचिन्मते
नद्वारचक्रं सफलं शार्दूलविक्रीडितेनाह सूर्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः कोणभैर्नागैरुद्वस
नं ततो गजमितैः शाखासु सौख्यं भवेत् देहल्यां गुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रमिदं वि
लोक्य सुधिया द्वारं विधेयं शुभं अत्र द्वारस्य चत्वारः पाषाणा आवश्यकाः ऊर्ध्वाधोभावेनावस्थितौ समाव
स्थपरिमाणौ भाषया उत्तरंग इत्यूर्ध्वावस्थितस्य संज्ञा अधोवस्थितस्य तु देहलीति सर्वसाधारणं नाम द्वौ

व्ययान्तमरस्थः खचरो गृहमध्ये करोति गेहं परहस्तयातं स्याद्दुर्बलश्चेदिह वर्णनाथ इति यदा तु वर्णाधीशः स
बलः स्यात्तदा परहस्तगामि न स्यादित्यर्थः ततः सिद्धं अथ गृहारंभे नक्षत्रविशेषेण च फलविशेषमाह विवस्वः
न्मावसु भस्थ चक्रफलविशेषयोगद्वयं वसन्ततिलकाछंदसाह पुष्यध्रुवेंदुहरिसर्पजलेशजीवैः तद्वास
रेण च कृतं तु सुतराज्यदं स्यात् द्वीशाश्वितक्षवसुपाशिशिवैः सशुक्रैः वारे सितस्य च गृहं धनधान्यदं स्यात् पु
ष्याध्रुवाणि च प्रसिद्धानि इंदुर्मृगः हरिः श्रवणः सर्पोऽश्लेषा जलेशः पूर्वाषाढा एतैर्नक्षत्रैः सजीवैर्गुरुयुक्तैः
गुर्वधिष्ठितैः। तद्वासरेण गुरुवासरेण कृतं कर्तुमारब्धं गृहं सुतान्पुत्रान् राज्यं च ददाति तादृशं स्यात् यदा
ह वसिष्ठः॥ इज्येन्दूत्तरराज्यांहीर्बुविष्णुधातृजलोडुषु गुरुणा सहितेष्वेषु कृतं गेहं श्रियायुतमिति वारग्रहणं फ
लविशेषार्थं नारदवाक्ये श्रवणाषाढयोः चैव रोहिण्यां चोत्तरात्रये गुरुवारे कृतं वेश्म राज्यपुत्रमिहोच्यते
तद्गेहे जातपुत्रस्य राज्यं भवति निश्चयादिति नक्षत्रभेदो वचनप्रामाण्यात् द्वीशेति द्वीशो विशाखा॥ अश्वि अ
श्विनी वसुर्धनिष्ठा पाशीशतभं शिव आर्द्रा एतैर्नक्षत्रैः सशुक्रैः शुक्रसहितैः सितस्य शुक्रस्य वारे च कृतं गे
हं धनानि सुवर्णादीनि धान्यानि तंदुलादीनि तानि ददाति तादृशं गृहं स्यात् यदाह वसिष्ठः द्विदैवत्वाष्ट्रवारी
शार्द्रादितिवसूडुषु शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहमिति नारदोपि अश्विनी शततारासु विशा
खाभाद्रचित्रके धनिष्ठादितिभे शुक्रसंयुक्ते शुक्रवासरे गृहे नाटकशालाख्ये देवाकारं कृतं शुभं तद्वेश्म
निष्पन्नानल्पकुवेरसदृशो भवेदिति अत्रापि नक्षत्रभेदैः प्रागुक्त एव समाधिः अथान्ययोगद्वयमशुभशुभ
फलदं तु इंद्रवज्राछंदसाह सारैः करेज्यांत्यमघांबुमूलैः कौजेऽह्नि वेश्माग्निसुतार्तिदं स्यात् सज्ञैः कपाश्वा
ग्र्यमतक्षहस्तैर्ज्ञस्यैव वारे सुखपुत्रदं स्यात् हस्तपुष्यरेवतीमघापूर्वाषाढामूलैः सारैर्मंगलयुक्तैः कौजे भौ
मसंबंधिन्यह्नि वारे च कृतं वेश्म गृहं अग्निसुतार्तिदं अग्निपीडासुतपीडाच तां ददाति तादृशं स्यात् यदाह
वसिष्ठः पित्र्यमूलेज्यभाग्यार्कपौष्णभेषु च यत्कृतं कुजेन सहितेष्वेषु गृहं संदह्यतेऽग्निना नारदोपि मूलं च रेवती

केंद्रे गुरुः स्यात्तदैवं विधे योगे प्रारब्धमालयो गृहं वर्षशतमायुरवस्थानं यस्य तादृशः स्यात् यदाह श्रीपतिः
यदि विलग्नगतो भृगुजोंबरे शशिसुतः खलु केंद्रगतो गुरुः दिनकृदाययतश्च तदा बुधैः शतमितायुरुदी
रितमालयमिति अयं प्रथमो योगः अथ द्वितीयो योगः वेधाविति चतुर्थे गुरुः दशमे चंद्रः मंगलशनैश्च
रावेकादशे स्यातां तदालयो, शीतिसमायुरशीति ८० वर्षाण्यायुर्यस्य तादृशः स्यात् यदाह श्रीपतिः शशांका
कजीवौ खरसातलस्थौ कुजार्कजौ लाभगतौ च यस्य प्रारंभकाले भवनस्य तस्य स्थितिर्निरुक्ता खलु दा
सशीति आलयशब्दः पुंलिंगः गृहाः पुंसि च भूम्न्येव निकायनिलयालया इत्यमरः पुंसि चेति संबध्यते
रूपभेदेन वा पुंलिंगः अत एव नैषधीये प्रयुक्तो निश्चिमालिकामयालया इति पंक्तिविंशतीत्यादिना
शीतिशतशब्दौ संख्यावाचिनौ निपातितौ ॥२२॥ अथ लक्ष्मीयुक्तगृहयोगत्रयमनुष्टुभाह स्वोच्चस्थे शुक्रे लग्न
गे वा गुरौ वेश्मगतेऽथवा शनौ स्वोच्चे लाभगे वा लक्ष्म्या युक्तं चिरं गृहं स्वोच्चस्थे मीनस्थे शुक्रे लग्नगते गृ
हं चिरं लक्ष्म्या युक्तं स्यात् अथवा स्वोच्चस्थे कर्कस्थे गुरौ चतुर्थस्थानगते सति तादृशमेव गृहं अथवा स्वो
च्चस्थे तुलास्थे शनावेकादशस्थानगतेपि लक्ष्मीयुक्तं गृहं स्यात् एतत्प्रत्येकं योगत्रयं यदाह श्रीपतिः स्वो
च्चवर्तिनि भृगौ विलग्नगे देवमंत्रिणि रसातलेऽथवा स्वोच्चगे रविसुते च वायगे स्यात्स्थितिश्च सह चिरं स
ह श्रियेति अथ गृहस्य परगामित्वे योगमनुष्टुभाह शून्येंबरे यदैकोपि परांशस्थो ग्रहो गृहं अब्दांतःप
रहस्तस्थं कुर्याच्चेद्बली यो वसः एकोपि ग्रहोऽतुष्टफलदाता परांशस्थः शत्रुनवांशस्थितः सन् यदि
शून्ये सप्तमे स्यादथवांबरे दशमे स्यात्तदा सग्रहस्य गृहं प्रारब्धमब्दांतर्वर्षमध्य एव परहस्तस्थमन्यहस्तगा
मि कुर्यात् चेद्बली यो ब्राह्मणादिवर्गस्वामी विप्राधीशौ भार्गवेज्यावित्यभिहितः स चेद्बलः स्यात् उक्तं च
वसिष्ठेन ॥ एकोपि हेंद्रः परभागवर्ती शत्रुयस्मरस्थः खचरो गृहमध्ये जायागतः कर्मगतोऽथवा स्यात् करोति
गेहं परहस्तयातं करोति वर्षाद्विबल[illegible]खेट इति खेटो वर्गस्वामी तदुक्तं श्रीपतिना एकोपि नूनं परभागवर्ती

नैरृतीपश्चिमयोर्मध्ये उक्तव्यतिरिक्तसर्ववस्तूनां धाम गृहं कार्यं स्यादित्यर्थः यदाह वसिष्ठः इंद्राग्न्योर्मध्यतं म
ध्ये याम्याग्न्योर्घृतमंदिरं यमराक्षसयोर्मध्ये पुरीषत्यागमंदिरं राक्षसांबुपयोर्मध्ये विद्याभ्यासस्य मंदिरं तो
येशानिलयोर्मध्ये रोदनं मंदिरं ततः कामोपभोगसदनं वायुकौबेरमध्यमे कौबेरैशानयोर्मध्ये चिकित्सा
मंदिरं ततः पुरंदरेशयोर्मध्ये सर्ववस्तुगृहसंग्रहं सदनं कारयेदेवं क्रमाद्गृहाणि षोडशेति कश्यपोपि इंद्राग्न्या
र्मथनं गेहं यमाग्न्योर्घृतमंदिरं पुरीषत्यागसदनं मध्ये राक्षसकालयोः विद्यागृहं जलाधीशनैरृत्योर्मध्यमे
ततः रोदनं सदनं नूनं जलाधीशसमीरयोः कामोपभोगसदनं मध्ये वायुकुबेरयोः नवरत्नालयं मध्ये कुबे
रेश्वरयोस्ततः इंद्रेशयोर्धान्यगृहमिति अथ गृहारंभप्रसंगात्प्रसक्तं सामान्यतः प्रारब्धगृहबलमपि विधा
येदानीमारब्धस्य गृहस्य ग्रहाणां नियतस्थानावस्थित्या नियतायुर्दाययोगपृक्तानि कयाह जीवार्कवि
धुज्ञशनैश्चरेषु लग्नारिजामित्रसुखत्रिगेषु स्थितिः शतं स्यात् शरदां सितार्कीरेभ्यतनुत्रिगाहते शते द्वे
अत्र योगद्वये ग्रहस्थानयोर्यथासंख्यं संबंधः यथा जीवो लग्ने स्यात् अर्को रोषष्ठे विधुर्योत्तामित्रे सप्तमे शु
क्रः चतुर्थे शनैश्चरस्तृतीये एवं नियतस्थानावस्थितग्रहसहिते लग्ने प्रारब्धस्य गृहस्य स्थितिः शतं व
र्षाणां स्यात् अयमेको योगः यदाह श्रीपतिः उदये गुरुरस्तगृहे शशिजः सहजे तु शनैश्चरविस्फुरणो
जलगस्थितिमाभवनस्य तदा शतमायुरुशंति बुधा इति जलं च चतुर्थस्थानं अथ द्वितीयो योगः सितेति शु
क्रो लग्ने अर्कः तृतीये आरः षष्ठे इज्यः पंचमे एवंविधे लग्ने प्रारब्धगृहस्थितिर्द्विशते वर्षशतद्वयं स्यात्
यदाह श्रीपतिः लग्ने भृगुः पुत्रगतश्च जीवः षष्ठः कुजः तिग्मकरः तृतीयः निवेशने यस्य गृहस्य तद्विशत
द्वयं तिष्ठति वत्सराणामिति अथान्यनियतायुर्दाययोगद्वयमिंद्रवंशाछंदसाह लग्नांबरायेषु भृगुज्ञ
भानुभिः केंद्रे गुरौ वर्षशतायुरालयः बंधौ गुरुर्व्योम्नि शशी कुजार्कजौ लाभे नदाशीतिसमायुरालयः
अत्रापि योगद्वये स्थानग्रहयोर्यथासंख्यं संबंधः लग्ने भृगुः दशमे बुधः एकादशे सूर्यः लग्नव्यतिरि

आग्नेय्यां कूपे पुत्रनाशः दक्षिणस्यां कूपे स्त्रीविनाशः नैरृत्यां कूपे गृहकर्तुर्मृतिः पश्चिमायां कूपे संपत्स्या
त् वायव्यां कूपे शत्रुतः सकाशात् पीडा स्यात् उत्तरस्यां कूपे सुखं गृहस्वामिन एव न्यासः उक्तं च वसिष्ठेन
ऐश्वर्यं पुत्रहानिश्च स्त्रीनाशो निधनं भवेत् संपत् शत्रुभयं सौख्यं पुष्टिः प्रागादितः क्रमात् कूपे कृते
मध्यमे तु धनहानिस्तु वास्तुनः तस्मात्सम्यग्विचार्याथ कूपं कुर्यात्तु बुद्धिमानिति अथ गृहमध्ये करि
ष्यमाणानां गुणकरणगृहाणां दिक्क्रमत्वेन करणं वसंततिलकाछंदसाह स्नानस्य पाकशयनास्त्रभुजे

ऐशानी	पूर्वे	आग्नेयी
पुष्टिः	ऐश्वर्यं	पुत्रनाशः
उत्तर	मध्य	दक्षिण
स्वसुखं	अर्थक्षयः	स्त्रीनाशः
वायव्य	पश्चिम	नैरृतिः
शत्रुतःपीडा	संपत्	गृहेशमृतिः

श्च धान्यभांडारदैवतगृहाणि च पूर्वतः स्युः तन्मध्यतस्तु मथनाज्यपुरी
षविद्याभ्यासाख्यरोदनरतौषधसर्वधाम पूर्वतः पूर्वोक्तदिक्षु स्नानगृ
हादीनि गृहाणि स्युः यथा पूर्वस्यां स्नानगृहं आग्नेय्यां पाकगृहं दक्षिण
स्यां शयनगृहं नैरृत्यां शस्त्रगृहं नैरृत्यां भोजनगृहं वायव्यां धान्यसंग्र
हगृहं ॥ उत्तरस्यां भांडारस्य द्रव्यस्य गृहं ऐशान्यां दैवतगृहं स्यादित्यर्थः ॥ य
दाह वसिष्ठः ऐंद्र्यां दिशि स्नानगृहमाग्नेय्यां पचनालयः ॥ याम्यायां शयनं वे
श्म नैरृत्यां शस्त्रमंदिरं वारुण्यां भोजनगृहं ॥ वायव्यां धान्यमंदिरं ॥ उदीच्यां हाटकं सद्म ऐशान्यां देवमंदि
रमिति हाटकस्य सुवर्णस्येदं हाटकं कश्यपोपि प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयं शयनं याम्यदि
ग्भागे नैरृत्यां शस्त्रमंदिरं प्रतीच्यां भोजनगृहं वायुभागेन वा गृहं भांडारसदनं सौम्ये त्वैशान्यां देवताल
यमिति नारदस्तु विशेषमाह भांडागारं तूत्तरस्यां वायव्यां पशुमंदिरमिति विश्वकर्मा पुनरुत्तरस्यां जल
स्थानं पूर्वस्यां श्रीगृहं तथेत्याह तन्मध्यतस्त्विति पूर्वोक्तदिक्षु तन्मध्यतः तयोर्दिग्विदिशोर्मध्ये ष्टसं
ख्याके मथनाद्यष्टौ गृहाणि स्युः यथा पूर्वाग्नेय्योर्मध्ये मंथनस्य दध्यादिघालोडनस्य गृहं स्यात् आग्ने
य्यीदक्षिणयोर्मध्ये आज्यस्य घृतस्य संग्रहस्य गृहं दक्षिणनैरृत्योर्मध्ये पुरीषस्य विष्ठात्यागस्य गृहं

मु·टी·
वा·प्र·
२२

पिमकरार्के ततः त्रित्रिराशिष्ववस्थिते सूर्ये विलोमत ऐशान्यादिविदिक्षु राहुमुखं स्यात् अयाणमपि स्पष्टार्थं व्या
ख्यायाः फलमाह खाते इति देवालयादिविषये खाते भूमिशोधने कर्तव्ये सति राहुमुखाक्रांतदिशः सका
शात् पृष्ठवर्तिनी विदिक् शुभा भवेत् यथा देवालयविषये मीनादित्रिराशिष्ववस्थिते सूर्ये त्वैन ऐशान्यां राहुमुखं
तत्पृष्ठविदिक् आग्नेयी तस्यां प्रथमं खातप्रारंभः शुभफलदः एवं मिथुनत्रिराशिष्ववस्थिते सूर्ये राहुमुखं वाय
व्यां तत्पृष्ठविदिगैशानी तस्यां खातारंभः शुभः एवं सर्वत्र तथैव गृहविधौ जलाशयविधावपि राहुमुखं कस्यां
विदिश्यस्तीत्यवधाय तत्पृष्ठदिशि खातं शुभफलदं कार्यमित्यर्थः यतः सर्पेण विदिक्त्रयं व्याप्यते यत्र मुखाव
स्थितिः सा द्वितीया यत्र पुच्छावस्थितिः सा तृतीया यथा ऐशान्यां मुखं वायव्यां उदरं नैरृत्यां पुच्छं अतः आ
ग्नेयी मुखात् पृष्ठविदिक् एवमन्यत्राप्यूह्यं यदाह विश्वकर्मा ईशानतः सर्पति कालसर्पो विहाय सृष्टिं गणयेद्वि
दिक्षु शेषस्य वास्तोर्मुखमध्यपुच्छं त्रयं परित्यज्य खनेच्च तुर्यमिति ज्ञेया निश्चि[illegible] वृषार्कादित्रिके वेद्यां
सिंहादिगणये गृहे देवालये च मीनादि तडागे मकरादिकमिति वसिष्ठस्तु गृहारंभे वास्तुनरमाह त्रिषु त्रि
षु च मासेषु नभस्यादिषु च क्रमात् यद्दिग्मुखो वास्तुनरस्तन्मुखं सदनं शुभं अन्यद्दिग्मुखगेहं तु दुःखशोकभ
यप्रदं चेत् दिशापादिशालानामेष दोषो न विद्यते इति नभस्यादिग्रहणं सिंहाद्यर्कसंक्रमोपलक्षणं ॥ नागवस्तु
विदिशि खननार्थः नरवास्तुस्तु गृहस्य तत्तद्दिग्मुखार्थः तत्र खातारंभादिनक्षत्राण्याह मांडव्यः अधोमुखैर्भै
र्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्टं तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवर्क्षैरिति खातं
भूमिशोधने पट्टं अथ गृहे कूपनिर्माणे दिगवस्थित्या फलं शालिनीवृत्तेनाह कूपे वास्तोर्मध्यदेशेऽर्थनाशः
त्वैशान्यादौ पुष्टिरैश्वर्यवृद्धिः सूनोर्नाशः स्त्रीविनाशो मृतिश्च संपत्पीडा शत्रुतः स्याच्च सौख्यं वास्तुदिश्
यामिति वास्तुशब्दः पुंलिंगोऽपि वास्तोर्गृहस्य मध्यदेशे कूपे जलकूपे कृते सति स्वामिनोऽर्थनाशः स्यात् अथै
शान्यादिषु सृष्टिमार्गेणाष्टासु दिक्षु पुष्टिरित्यादि फलं यथा ऐशान्यां कूपे पुष्टिः पूर्वस्यां कूपे ऐश्वर्यवृद्धिः राम·
२२

धनिष्ठापंचके नैव कुर्यात्तत्र भसत्कृयं ॥ यदाह माण्डव्यः
चकनिषेधानुपपत्तिः सत्यं स्तंभोच्छ्रायविषयकोयं निषेधः । अन्यत्पुनरेवमाह । विवाहप्रकरणोक्तानि पंच
सूत्रधारशिलान्यासप्रकारादि समालभेदिति प्राकारे देवालये । अन्यत्पुनरेवमाह । विवाहप्रकरणोक्तानि पंच
चक्रानि रोगाग्निराजचौरमृत्युसंज्ञानि नैर हिते गेहलग्ने पंचकरहिते लग्ने इत्यर्थः ॥ उक्तं च गणेश दैवज्ञैः ॥ विमृत्यु
केंद्र खलगेहे वर्जिते पंचके रिति ॥ नात्रार्षं वाक्यं प्रमाणमस्ति व्यर्थमिति अष्टमद्वादशव्यतिरिक्तस्थानस्थैः
शुभैः खलैः पापैः तृतीयैकादशषष्ठस्थानस्थैः चोपलक्षिते लग्ने सति गेहारंभः कार्यः उक्तं च श्रीपतिना ॥
पापैः त्रिषष्ठायगतैः त्रिकोणकेंद्राश्रितैः साधुभिरालयस्य वदंति निर्माणमिहाष्टमस्थः क्रूरस्तु कर्तुर्मरणं
करोति अन्यदप्युक्तं दैवे छायागे स्थिरे वा भवने विलग्ने सौम्यग्रहैः शुभनिरीक्षिते च कर्मस्थितैर्वीर्ययुतैश्च सौम्यैः
निर्माणमाहुर्भवनस्य संतः शुद्धकेंद्रनिधनस्थिरोदये सौम्यवर्गमनुजोद्गमेपि च सन्निवेशमुदितो हि वालयनस्त्र
रिभिः नतु चरोदये कृतिरिति अथ देवालये गृहारंभ जलाशये च विदिगवस्थितं राहुमुखं सफलमिंद्रवंशगाः दृसा
ह देवालये गेहविधौ जलाशये राहोर्मुखं शंभुदिशो विलोमतः मीनार्क सिंहार्क मृगार्कतस्त्रिभे खाते मुखात्पृष्ठ
विदिक्शुभा भवेत् अत्र यथासंख्यसंबंधः देवालयप्रारंभे राहोर्मुखं मीनार्कतः त्रिषु राशिषु अवस्थिते सूर्ये ऐशा
नीतो विलोमतो विपरीतं विदिक्षु वा स्यात् यथा मीनमेषवृषराशिष्ववस्थिते सूर्ये ऐशान्यां राहुमुखं
एवं मिथुनकर्कसिंहराशिष्ववस्थिते सूर्ये वायव्यां राहुमुखं
कन्यातुलावृश्चिकराशिष्ववस्थिते सूर्ये नैरृत्यां राहुमुखं ध
नुर्मकरकुंभराशिष्ववस्थिते सूर्ये आग्नेय्यां राहुमुखमित्यर्थः
एवं गृहारंभेपि सिंहार्कतः त्रिषु राशिष्ववस्थिते सूर्ये विलोम
तः ऐशान्यादि विदिक्षु राहुमुखं स्यात् तथा जलाशयप्रारंभे

विदिशाः	ऐशान्यां	वायव्यां	नैरृत्यां	आग्नेय्यां
देवालये	मीन १२	मिथुन ३	कन्या ६	धनुः ९
	मेष १	कर्क ४	तुला ७	मकर १०
	वृष २	सिंह ५	वृश्चिका ८	कुंभ ११
गृहारंभे	सिंह ५	वृष २	वृश्चिका ८	कुंभ ११
	कन्या ६	मिथुन ३	धनुः ९	मीन १२
	तुला ७	कर्क ४	मकर १०	मेष १
जलाशये	मकर १०	मेष १	कर्क ४	तुला ७
	कुंभ ११	वृष २	सिंह ५	वृश्चि ८
	मीन १२	मिथुन ३	कन्या ६	धनुः ९

राहुमुखचक्रं

मु॰टी॰
वा॰प्र॰
२२

काशीतिपक्षद्वयं सामान्यविशेषभावपरः सर्वग्रंथसंदर्भेण वराहसंहितायामुक्तं॥ अपि नोक्तं एतस्मिं
श्लोके मुहूर्तविचाराप्रसंगात् केचित्प्रयोजनाभावान्नोक्तमित्याहुः तन्न तत्र हि वास्तुनरस्य शिरोमर्मवं
शादिदुष्टस्थानानामशुभफलदानात्त्यागोक्त्या तत्प्रयोजनत्वात् नंद्यातस्यैव शुभफलदानामन्येषां
बाह्वादिस्थानानां ग्राह्यत्वोक्त्या च वसिष्ठाद्यृषिसंहितास्वेतद्वास्तुशांत्यर्थमेव तस्याभिधानमित्यतो
ऽत्रानुक्तिः अथ गृहारंभप्रकरणे पंचांगशुद्धिं लग्नशुद्धिं चानुष्टुभाह भौमार्के रिक्तामाद्यूने चरोनेंगे
विपंचके व्यर्काष्टस्थैः शुभैर्गेहारंभः आयारिगैः खलैः भौमार्कौ वारौ रिक्ताः च प्रसिद्धाः अमावा
स्यादि अमाप्रतिपत् उपलक्षणत्वाद्दृष्टमपि एतैरूने काले तथा पंचकं धनिष्ठोत्तरार्धादिका पंच
नक्षत्री पंचकमित्युच्यते पंचन्शब्दात् संख्यार्थे संख्यायाः संज्ञासंघसूत्राध्ययनेषु इति कन्प्रत्ययः वि
गतं पंचकं यस्मिन्नेवंविधे च काले सति चरोनैश्चरराशिभिर्मेषकर्कतुलामकरैरूने अंगे लग्ने स्थिरे
द्विस्वभावे च गृहारंभः कार्यः यदुक्तं व्यवहारोच्चये॥ द्वितीया पंचमी पूर्णा तृतीया षष्ठिका तथा॥ सप्त
मी दशमी चैव द्वादशैकादशी तथा त्रयोदशी पंचदशी तिथयः स्युः शुभावहा इति अन्याः तिथयो
ष्यो निषिद्धाः तदप्युक्तं तत्रैव दारिद्र्यं प्रतिपत्कुर्याच्चतुर्थी धनहारिणी॥ अष्टम्युच्चाटनं चैव नवमी श
स्त्रघातिनी दर्शे राजभयं ज्ञेयं भूते दारविनाशनमिति वासिष्ठेपि चरलग्ने चरांशे वा रिक्तामारार्के
वासरे अंगोत्याष्टारिगे चंद्रे रंध्रे पापे क्षयः प्रभोरिति नन्वत्र धनिष्ठापंचकनिषेधोनुपपन्नः नक्षत्रप्र
कारेणोक्तधनिष्ठादिपंचकनिषेधेन गतार्थत्वात् न पुनरुक्तमिति वाच्यं एतद्गृहगोपनमिति पूर्वे
मुक्तं तत्र गृहस्य तृणकाष्ठादिभिराच्छादनं गोपनं तद्धि सिद्धस्यैव गृहस्य संभवेत् गृहारंभस्तु प्राग्भव
नन्नूपः सत्त्वसिद्धस्यैवेति ननु ध्रुवमृदुवरुणस्वातिवस्वर्कपुष्येष्विति गृहारंभनक्षत्रेषु धनिष्ठाशतता
रेकोत्तराभाद्रपदारेवतीनां विहितत्वेन एकस्या एव पूर्वाभाद्रपदाया निषेधोक्तौ कर्तव्यायां सत्यां पुनः पं

राम॰
२२

पर्यंतं क्रियमाणं गृहमुत्तरास्यं न शुभं ॥ अथ दर्शादितः शुक्लाष्टमीपर्यंतं पश्चिमास्यं गृहं न शुभं शुक्लान
वमीतः चतुर्दशीपर्यंतं दक्षिणास्यं गृहं न शुभं वदंति ॥ नारदतिथिषु तत्र विष्टिखट्वाहे न कर्तव्यमिति वाक्या
र्थः फलितः यदुक्तं व्यवहारोच्चये ॥ पूर्णिमातोऽष्टमीयावत्पूर्वास्यं वर्जयेद्गृहं उत्तरास्यं न कुर्वीत नवम्या
दिचतुर्दशीं अमावस्याष्टमीयावत्पश्चिमास्यं विवर्जयेत् नवम्यादौ दक्षिणास्यं यावत्तु शुक्लचतुर्दशी
मिति विहिततिथयोऽपि तत्रैवोक्ताः द्वितीया पंचमी मुख्या तृतीया षष्ठिका तथा सप्तमी दशमी चैव द्वा
दशैकादशी तथा त्रयोदशी पंचदशी तिथयः स्युः शुभावहाः ॥ दारिद्र्यं प्रतिपच्चैव चतुर्थी धनहारिणी
अष्टम्युच्चाटनं चैव नवमी शस्त्रघातिनी ॥ दर्शो राजभयं ज्ञेयं भूते दारविनाशनमिति ॥ पक्षफलं च तत्रैव
शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करतो भयमिति अथात्र प्रसंगात् द्वारवेधफलानि लिख्यंते ॥ तत्र वसिष्ठः
मार्गतरुकोणकूपस्तंभभ्रमविद्धमशुभं द्वारं ॥ उच्छ्रायाद्द्विगुणितां भूमिं त्यक्त्वा न दोषाय भ्रमोऽजलनि
र्गमप्रवेशाः प्रणालिकेत्यर्थः विद्धं सन्मुखावस्थितं अत्रोच्छ्रायो द्वारस्य गृह्यते ॥ तथा गर्गः द्वारोच्छ्रा
याद्द्विगुणितां भूमिं त्यक्त्वा बहिः स्थिताः न दोषाय भवंत्येत इति रथ्याविद्धं द्वारं नाशाय कुमारदोषदं त
रुणा ॥ पंकद्वारे शोको व्ययोंबुनिःस्राविणि प्रोक्तः कूपेनापस्मारो भवति विनाशश्च देवताविद्धे स्तंभेन
स्त्रीदोषः कुलनाशो ब्रह्मणोऽभिमुखे इति ॥ पंकविद्धं द्वारं पंकद्वारं यस्य द्वारस्याग्रतः निरंतरं पंकः तिष्ठति
देवतासुरप्रतिमाः ॥ नाशः स्वामिन एव ब्रह्मवेधः एकाशीतिपदचक्रस्थितब्रह्मस्थानवेधो गृह्यते यदाह
विश्वकर्मा गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनं इति विशेषमाह भरद्वाजः ॥ शिरामर्माणि वंशांश्च नालं
मध्यं च सवेशाः विहाय वास्तुमध्यं च द्वाराणि विनिवेशयेदिति वास्तुमध्यं च ब्रह्मस्थानं तन्निधनप्रदमिति
वसिष्ठोक्तेश्च अस्यापवादमाह विश्वकर्मा देवागारे विहारे च प्रपायां मंडपेषु च प्रतोल्यां च मखे चैव मध्ये
द्वारं निवेशयेदिति देवालयादिस्थानेषु कृतस्य गृहांतर्गतद्वारस्य ब्रह्मणो न वेध इति निष्कृष्टोऽर्थः अत्रैव

मु॰ दी॰
वा॰ प्र॰
९

वाक्यं माघे तपस्ये तपसि माधवे नभसि त्विषे ऊर्जे च गृहनिर्माणं पुत्रपौत्रधनप्रदमिति वसिष्ठवाक्यं चाश्विनकार्तिक
माघमासानां शुभत्वप्रतिपादकं तत्तु वृश्चिकमकरकुंभार्कसाहित्यप्राशस्त्यपरं वचनांतरबोधितो निषेधः प्रा
गुक्तविषय एव एवं फाल्गुनस्यापि शुभत्वं कुंभार्कविषयं मीनार्कसाहित्ये तु निषिद्धः स्मः ननु कार्तिकमाघमासौ श्रीप
तिना निषिद्धौ तयोः को विषय इत्यत आह अथेति ऊर्जः कार्तिको मासः कन्यायां कन्यागते रवौ न सन् शुभः च
पुनः तपा माघो मासो धनुषि धन्वर्के न सन् अपि पादपूरणे नन्वेतदयुक्तं प्रतिभाति यतः चांद्रमासेन चैत्रादिमा
ससंज्ञाः संति तत्र कार्तिके मासे कन्यासंक्रांति माघे मासि धन्वर्कश्च कदापि न संभवेत् यतः कार्तिकस्य माघ
स्य वा शुक्लप्रतिपदादि त्रिंशत्तिथ्यो यावत्तावत्तत्वं इत्यत आह कृष्णादिमासादिति अस्ति हि द्विविधो मासः शु
क्लादिः कृष्णादिश्चेति तत्र शुक्लप्रतिपदमारभ्यामावास्यापर्यंतं शुक्लादिः कृष्णप्रतिपदमारभ्यपूर्णिमांतं कृ
ष्णादिः यथा चैत्रशुक्लपक्षो मतद्वयेपि स एव चैत्रपौर्णमास्यनंतरं कृष्णपक्षः चैत्रमास एव एवं चांद्रो मासो
भवति स एवं कृष्णपक्षो यदि वैशाखकृष्णपक्षत्वेन व्यवह्रियते तदनंतभावी शुक्लपक्षो वैशाखशुक्लः सर्ववादि
सिद्धस्तदा कृष्णादिमासः संभवति उभयथापि हि शास्त्रव्यवहारः अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने इति अष्ट
मी कृष्णपक्षस्य रोहिणी संयुता भवेत्प्रौष्ठपदे मासि जयंती नाम सा स्मृतेति च अत्र यदि दर्शांतो मासो विवक्षि
तस्तदा भाद्रपदकृष्णपक्षे श्रावणमासे चेत्येवं ब्रूयात् तदेतन्मासस्य कृष्णादित्वे प्रमाणं अत ऊर्ध्वमसौ युक्ता गतका
लादिसंख्यया मासौ कृतावुतामासैर्मध्यशुक्लादिभिर्गतैरित्यादीनि बहुवाक्यानि शुक्लादित्वे प्रमाणं तत्राश्विनपू
र्णिमांतः कार्तिकपूर्णिमांतं कृष्णादित्वेन कार्तिकव्यवहारात्कन्यासंक्रांतिसंभवात् निषेध उपपन्नो भवति
एवमेव माघे मासि धनुरर्के संभवेत् तन्निषेधसार्थक्यं इत्यलमियता अथ तिथिपरत्वेन द्वारनिषेधमुपजातिक
याह पूर्णेंदुतः प्राग्वदनं नवम्यादिषूत्तरास्यं त्वथ पश्चिमास्यं दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं व
दंतीति पूर्णेंदुतः पूर्णिमातः कृष्णाष्टमीपर्यंतं क्रियमाणं गृहं प्राग्वदनं न शुभं वदंति कृष्णनवमीतः चतुर्दशी

एम॰
९

ति ग्रहे तु कूले त शौनरिक्षाषष्ठाष्टवर्जिते सर्वे चाप्यशुभाः केंद्रेष्वपापाः त्रिषडायगाः शुभांशेऽशुभसंदृष्टौ स्मृति
कावेशनं शुभमिति अथ प्रागभिहितानां सौराणां चांद्राणां वा मासानां प्रकारांतरेणैकवाक्यतां शार्दूलविक्रीडितेनाह
केचिन्मेषरवौ मधौ वृषभगे ज्येष्ठे शुचौ कर्कटे भाद्रे सिंहगते घटेऽश्वयुजि चोर्जे लौ मृगे पौषके माघे नक्रघटे शु
भं निगदितं गेहं तथोर्जेलिसत्कन्यायां च तथायशुष्यपि नसत्कुलादिमासाङ्गवत् पूर्वे दिग्द्वारविशेषेणैकवा
क्यतोक्ताइदानीमिताद्वपुच्यते मेषसंस्थे रवौ मधौ चैत्रे मासि गेहं प्रारब्धं शुभं स्यात् तथा वृषस्थे सूर्ये ऊर्जेका
र्त्तिके मासि मृगे मकरस्थे सूर्ये पौषमासे नक्रघटे शुभं निगदितं गेहं तथोर्जेलसत्कन्यायां च तथायशुष्यपि
नसत्कुलादिमासाङ्गवत् पूर्वे दिग्द्वारविशेषेणैकवाक्यतोक्ताइदानीमेताद्वपुच्यते मेषसंस्थे रवौ मधौ चैत्रे
मासि गेहं प्रारब्धं शुभं स्यात् तथा वृषस्थे सूर्ये ज्येष्ठे मासि कर्कस्थे सूर्ये शुचावाषाढे सिंहगते सूर्ये भाद्रप
दे मासि घटे तुलास्थिते रवौ अश्वयुज्याश्विनमासे अलौ वृश्चिकस्थे सूर्ये ऊर्जे कार्तिकमासे मृगे मकरस्थे सूर्ये पौ
षमासे नक्रघटे मकरकुंभस्थे सूर्ये माघे प्रारब्धं गृहं शुभं स्यादित्यर्थः इति केचिन्निगदितं अस्यायमाशयः मीनचापे
त्यादिना द्विस्वभावराशय एव निषिद्धाः शेषा कोधान्यमित्यादिना च कियंतः चांद्रा अपि मासा निषिद्धाः अतोऽन्ये सौराः
चांद्रा वा विहिता स्तेषामयं वाक्यताप्रकारः मेषस्थे रवौ वैशाखेऽपि शुभं गृहं यस्तु चैत्रनिषेधः स मीनार्कविषयः वृष
स्थे रवौ ज्येष्ठेऽपि शुभं वैशाखस्तु विहित एवास्ति यस्तु ज्येष्ठनिषेधः स मिथुनार्कविषयः कर्कटस्थे सूर्ये आ
षाढेऽपि शुभं आषाढनिषेधस्तु मिथुनार्कविषयः सिंहगते सूर्ये भाद्रपदेऽपि शुभं श्रावणः चेत्तत्र स्यात्स विहित
त्वादेव शुभः यस्तु भाद्रनिषेधः स कन्यार्कविषयः वृश्चिकस्थे सूर्ये कार्तिकेऽपि शुभं तुलागते सूर्ये आश्वि
नेऽपि शुभं यस्त्वस्य निषेधः स कन्यार्कविषयः निषेधविषयं त्वग्रमेव वक्ष्यति मार्गशीर्षे विहित एव मकर
स्थे सूर्ये पौषेऽपि शुभं धनुरर्कसाहित्ये सोऽप्यशुभः मकरकुंभस्थे सूर्ये माघेऽपि शुभं निषेधस्तु धनुरर्कविषयः
अत एव सौम्यफाल्गुणवैशाखमाघश्रावणकार्तिकाः मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदा इति नारद

मु॰दी॰
वा॰प्र॰
९

निर्माणविशेषमाह। सूतीगेहमिति। अदित्यां पुनर्वसौ सूतीगेहं सूतिकागृहनिर्माणं शस्तं शस्तमिति वक्ष्यमा
णस्यात्र नपुंसकत्वेन संबंधात्। तत्रेति। तत्र सूतीगृहे हरिमविधिभयोः श्रवणाभिजितोर्नक्षत्रयोः प्रवेशः शस्तः
उक्तं च श्रीपतिना। पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा। विरिंचिविष्णुमांतरे प्रवेशनं हि तं भवेदिति केचित्तु
विरिंचिः रोहिणी विष्णुः श्रवणः तयोरंतरे मध्यमवर्तिनि नक्षत्रसमुदाये इत्याहुः। तन्न। असंदेहार्थं विरिंचिमा
दिरूपेण इत्येवं ब्रूयात् तस्माद्धरिविरिंचिरभिजिन्नक्षत्रं अंतरे मध्ये विरंचिविष्णुनारत्नार्योरित्येवं सप्तमीविभक्त्या
दिकरणेन बोधिते अंतरपदप्रयोक्तिः स्पष्टार्था। तदेतद्ब्राह्मणव्यतिरिक्तवर्णत्रयसाधारणं यदाह नारदः। पुनर्व
सौ नृपादीनां कर्तव्यं सूतिकागृहं। श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति। आवश्यकत्वे तु श्रवणाभि
जितोर्मुहूर्तस्तु इदं योवा व्याख्यं इत्यर्थः ब्राह्मणस्य तु प्राजापत्यनक्षत्रे एव सूतिकागृहनिर्माणप्रवेशौ। तच्च सू
तिकागृहं नैर्ऋत्यां कार्यं यदाह वसिष्ठः। ऐंद्रे तु विक्रमस्थानं आग्नेय्यां पचनालयः। वारुण्यां भोजनगृहं नैर्ऋ
त्यां सूतिकागृहं। याम्यायां शयनस्थानं वायव्यां पशुमंदिरं। कौवेर्यां तु धनस्थानं ऐशान्यां देवतालय इति चं=
स्मृतिभास्करे गर्गः। वारे तु शुभे लग्ने राशौ च दिने दोषविवर्जिते स्वानुकूलदिशि प्रोक्तं सूतिकाभवनं बुधैरिति।
कालनियम उक्तो रत्नकोशे आसन्नप्रसवे मासि ऊर्ध्वं चैव विशेषतः तद्वत्प्रसवकाले स्यादिति शास्त्रेषु नि
श्चय इति वराहेण त्वानेकनक्षत्राद्यभिधानं कृतं। यथा। हस्तादित्यशशांकतिष्यपवनप्राजेशमित्रान्तरा
चित्राश्विश्रवणेषु वृश्चिककर्करोहित्वाविरिंचेतिथौ शुक्राचार्यशनैश्वरत्नशशिनां वारे तु शुभे लग्ने विधौ सद्धि
वेश्मनि सूतिकागृहविधिः होमंकारः कीर्त्यते इति। वेश्मनि चतुर्थस्थाने सद्भिः शुभग्रहैः। सूतिकागृहप्रवे
शे कालविशेषमाह ज्योतिर्वसिष्ठः। अथातः संप्रवक्ष्यामि सूतिकागारवेशनं। मासि तु नवमे प्राप्ते पूर्वपक्षे शु
भे दिने प्रसूतिसंभवे काले सद्य एव प्रवेशयेदिति पूर्वपक्षे शुक्लपक्षे नक्षत्रादीन्याह गर्गः। रोहिण्यैंद्रवपा
स्त्रिषु स्वातीवारुणयोरपि पुष्ये पुनर्वसौ हस्ते धनिष्ठायुत्तरासु च मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनमि

राम॰
९

श्रीपतिः शोकोधान्यमृतिपशुहतीद्रव्यवृद्धिर्विनाशो युद्धं भृत्यहानिः स्वं धनं श्रीः च वह्नेर्भयं च लक्ष्मीप्राप्ति
र्भवति भवनारंभकर्तुः क्रमेण चैत्राद्ये चेमुनिभिरिति फलं वास्तुशास्त्रोपदिष्टमिति अन्यच्च आषाढचैत्रा
श्वयुजोर्जमाघकृष्णेष्वेषु सप्रोष्ठपदेषु नूनं ॥ निकेतनानां घटनं नृपाणां योगेश्वराचार्यमतेन शास्त्रमिति मते
न इति पदच्छेदः अत्र सौराणां वा मासानां महान् शुभाशुभफलभेदेन विरोधः अत्र चिकीर्षितगृहद्वारानु
कूलरविसंक्रमसध्रीचीनविहितमासेष्वेव वैशाखादिषु गृहारंभः कार्य इति विरोधाभाव इति पितृचर
णाः तत्र द्वारनियममाह श्रीपतिः ॥ कर्किनक्रहरिकुंभगतेर्के पूर्वपश्चिममुखानि गृहाणि तौलिमेषवृ
षवृश्चिकयाते दक्षिणोत्तरमुखानि च कुर्यात् अन्यथा यदि करोति तु मेति व्याधिशोकधननाशमश्नुते
मीनचापमिथुनांगनागते कारयेन्न गृहमेव भास्करे इति तत्र कुंभार्कसहिते श्रावणेमासि तादृशमेव वृ
हत्क्रोडेनोः एवं मकरार्कसहिते पौषेपि अनेनैव हेतुना दक्षिणोत्तरमुखं गृहं मेषवृषार्कसहिते वैशाखे
स्यात् तुलावृश्चिकार्कसहिते मार्गशीर्षमासे तथैव गृहं स्यादित्यर्थः अथात्र सौराणां चान्द्राणां च मासानां
निषेधस्तृणादिनिर्मेयगृहाद्यारंभे नैव भवति यदुक्तं व्यवहारोच्चये निषिद्धेष्वपि मासेषु स्वानुकूलेषु भेदि
ने तृणदारुगृहारंभे मासदोषा न विद्यत इति जगन्मोहनेपि पाषाणेष्टयादिगेहादि निंद्यमासे न कारयेत्
तृणदारुगृहारंभे सदा दोषा न विद्यत इति अत्र केचिदनियतदिक्कगृहारंभे सर्वदा कालदोषा न प्रवर्तंत
इत्याहुः तन्न वचनाभावात् किंच दिङ्मूढे कुलनाशः स्यादित्यनियतदिक्कगृहस्य विचारकोटिसन्निवेशा
भावात् अथ गृहनिर्माणे नक्षत्राण्याह ध्रुवेति ध्रुवाणि मृदूनि च प्रसिद्धानि वरुणः शततारा स्वाती प्रसिद्धा
वसुर्धनिष्ठा अर्को हस्तः पुष्यश्च एषु भेषु गृहनिर्माणं सत् शुभफलदं यदाह गर्गः उत्तरेषु च रोहिण्यां पु
ष्ये मैत्रे करद्वये धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यते इति अत्र वाक्ये मृगानभिधाने तदुक्तिर्महेश्वर
वाक्यालोचनेन प्रारंभो भवनस्य वारुणमृदुस्वात्यर्कपुष्यध्रुवैः वस्वंत्येणयुतैरिति अथ सूतिकागृह

वास्तुचक्रं प्रवक्ष्यामि यच्च व्यासेन भाषितं यद्दक्षे वर्तते भानुस्तत्रादौ त्रीणि मस्तके चतुष्कमग्रपादे स्यात्पुनः
मु.टी. चत्वारि पश्चिमे पृष्ठे च त्रीणि भान्यद्धानि कुक्षौ चत्वारि वामतः मुखे भत्रयमेवं स्युरष्टाविंशतितारकाः शिरस्था
वा.अ. ग्निदाहाय गृहेशोद्वासोग्रपादयोः स्थैर्यं स्यात्पश्चिमे पादे पृष्ठे चैवं धनागमः कुक्षौ स्याद्दक्षिणे लाभः कुक्षे
८ चस्वामिनाशने वामकुक्षौ च दारिद्र्यं मुखे पीडा निरंतरमिति पितामहानंतचरणा अपि त्रिवेदवेदाग्नियुगा
ग्निवेदत्रिकेषु ३ ४४ ३ ४ ३ भानोः शशिभं गृहेषु दाहो विनाशः स्थिरता धनश्रीः शून्यं च दारिद्र्यवधो
क्रमेणेति अस्यैतस्य चक्रस्य प्रकारांतरेण निष्कृष्टमर्थमाह वेति अर्कधिष्ण्यादश्वैः सप्तभैः सत्फलं ततोष्ट
द्वैकादशाधिष्ण्यैः सत्फलं ततो द्विभिर्दशभैः सत्फलं उक्तं स्यादिति निष्कृष्टोर्थः उक्तं च रविभात्सप्तनेष्टा
नि शुभान्येकादशाष्टभात् दशाष्टौ भानि शेषाण्यनिष्टानि सामिजिद्वृषवास्तुनीति पूर्वं सविस्तरमुक्तिस्तु स्थूलवा
क्यानुरोधात् अथ सौरचांद्रमासैः केन प्राच्यादिदिक्षु द्वाराणि गृहनिर्माणनक्षत्राणि च सूतिकागृहनि
र्माणप्रवेशौ मृदूनि च सगृधराश्छंदसाह कुंभेर्के फाल्गुने प्रागपरमुखं गृहं श्रावणे सिंहकर्कयोः पौषे नक्रे
च याम्योत्तरमुखसदनं गोजगेर्के च राधे मार्गे जूकालिगे सद्ध्रुवमृदुवरुणस्वातिवस्वर्कपुष्यैः सूतीगृहं त्व
दित्याहरिभविधिमैत्रेयोत्तराः प्रवेशः कुंभे कुंभस्थिते सूर्ये फाल्गुने च मासि प्रागपरमुखं गृहं प्राङ्मुखं प
श्चिममुखं च गृहं सवस्तुभफलदं कार्यं स्यादित्यर्थः श्रावणे मासि सिंहकर्कि संक्रान्त्योः प्रागपरमुखं गृहं
स्यात् पौषमासे नक्रे मकरसंक्रांतौ च प्रागपरमुखं गृहं स्यात् ॥ अथ गोजगे वृषमेषगे सूर्ये राधे वैशाखे
मासि च तथा मार्गे मार्गशीर्षे मासि जूकालिगे तुलावृश्चिकगते सूर्ये सति याम्योत्तरमुखसदनं दक्षि
णमुखमुत्तरमुखं च सदनं स्यात् वराहनारदः गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् वृषस्थे धनवृद्धिः स्या
न्मिथुने मरणं ध्रुवं कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्धनं कन्यारोगं तुलासौख्यं वृश्चिके धनवर्धनं
कार्मुके च महाहानिर्मकरे स्याद्धनागमः कुंभे तु रत्नलाभः स्यान्मीने सद्मभयावहं इति चांद्रमासानाह राम. ८

शेषेषु नवराशय इति॥ शेषेषु भेषु रोहिण्यादिषु नवराशयो ज्ञेयाः॥ यथा रोहिणीमृगयोर्वृषः आर्द्रापुन
र्वस्वोर्मिथुनं॥ पुष्याश्लेषयोः कर्कः॥ एवं हस्तादिद्विके च कन्याद्या मकराद्याश्च राशयः स्युरित्यर्थः अयं च प
क्षो वास्तुशास्त्रे नवांशानुक्तेरुक्तः अत्र राशिकूटे नाडीवेधो न दोषाय उक्तं च चिंतामणौ सेव्यसेवकयोश्चै
व गृहतत्स्वामिनोरपि परस्परं मित्रयोश्चैकनाडी प्रशस्यते इति तिथिप्रयोजनं तिथ्यानयने प्रकारांतरं
च वास्तुशास्त्रे॥ पूर्वाक्ताहतं क्षेत्रफलं त्रिंशद्भक्तावशेषकं॥ तिथिः प्रतिपदाद्या ज्ञेया दर्शं रिक्तां च वर्जयेत् इति
तुल्यन्यायत्वात्कुमासशुभप्रकरणोक्तदुष्टयोगवर्जनं च योगानां प्रयोजनं स्पष्टमेव यावत्तावंतकालं गृह
स्थितिरिति अथ यत्र हस्तादिगणनया क्षेत्रफले क्रियमाणे॥ आयव्ययांशकादिशुद्धिर्नोपलभ्येत त
त्राद्यं गुलादिकं निक्षिप्य संशोध्य वा क्षेत्रफलं साध्यं यदाह भीष्मपराक्रमः करमानाद्गुणे चेन्न दो गुला
दि प्रदाय हित्वा वा क्षेत्रफलं गणितेन प्रसाधयेदिष्टसिद्ध्यर्थमिति अत्र गणमायव्ययादिगुणमभ्यूह्यमिष्ट
सिद्ध्यर्थमिष्टानामायव्ययांशकानां सिद्ध्यर्थं अत्र हस्तादिक्षेत्रेषु क्षेत्रफलानयनं लीलावतीप्रभृतिषु ज्ञेया
ति ग्रंथेषु द्रष्टव्यं अथ गृहारंभे वृषभवास्तुचक्रं शालिनीभ्यामाह गेहाद्यारंभेर्कभाद्वत्सशीर्षे रामैर्दाहो
वेदभैरग्रपादे शून्यं वेदैः पृष्ठपादे स्थिरत्वं रामैः पृष्ठे श्रीर्युगैर्दक्षकुक्षौ लाभो रामैः पुच्छगैः स्वामिना
शो वेदैर्नैःस्व्यं वामकुक्षौ मुखस्थैः रामैः पीडा संततं चार्क॰ दृष्ट्वे ७ रुद्रैर्दिग्भिरुक्तं समस्तम् गेहं गृहं आ
दिशब्देन प्रासादादि तदारंभे सति अर्कभात्सूर्याक्रांतनक्षत्राद्रामैस्त्रिभिर्भैर्वत्सस्य वृषभस्य शीर्षे स्थितैः
सद्भिर्दाहः फलं स्यात् ततो वेदभैश्चतुर्भिर्भैरग्रपादे पुरःस्थितपादद्वये स्थितैः शून्यं गृहं जनवासशून्यं
स्यात् ततः चतुर्भिर्भैः पृष्ठपादद्वयस्थितैः स्थिरत्वं गृहकर्तुः ततो रामैर्भैः पृष्ठे स्थितैः श्रीः स्यात् ततो युगैश्च
तुर्भिर्दक्षिणकुक्षौ स्थितैर्लाभः ततः त्रिभिः पुच्छगैः स्वामिनो गृहकर्तुर्नाशः ततो वेदैः चतुर्भिर्भैर्वामकु
क्षौ स्थितैर्नैःस्व्यं दारिद्र्यं ततः त्रिभिर्मुखस्थैः गृहकर्तुः पीडा संततमनवरतं स्यात् उक्तं च ज्योतिःप्रकाशे

धिष्ण्या

मु॰टी॰
वा॰प्र॰
७

मन्यथा कर्कः एवमुत्तराफल्गुन्यादिषु द्विराश्यात्मके त्वूहनीयं विद्वद्भिः ननु निःसंदिग्धेषु एकराश्यात्मकेषु अ
श्विन्यादिषु धनार्णयोरस्य धनाधिकं गृहं वृद्धौ निर्धनाय ऋणाधिकमिति नक्षत्रस्य चाविपत्प्रदा विपत्तारा प्रात्यरा
प्रतिकूलदा निधनाख्या तारका तु सर्वथा निधनप्रदा विवर्ज्यतारकास्वेतत्त्रिमेण मशुभप्रदं कुर्वन्नज्ञानतो मोहा
दुःखभाग्व्याधिभाग्भवेत् अयमर्थः गृहनक्षत्राद्दिनभं यत्संख्यं तन्नवभक्तमवशिष्टतारा विपत्ताराधिकाः स्युश्चेत्त
दानिष्टास्तद्दिने गृहारंभं न कुर्यात् अन्यस्मिन्दिने शुभतारास्तु गृहारंभं कुर्यादित्यर्थ इति केचित् अपरे तु गृहक
र्तुर्नामनक्षत्राद्गृहभं गणयेन्नवभक्तमवशिष्टं विपत्ताराधिकं स्यात् तदा तद्गृहमनिष्टमन्यथा शुभमिति यदाह
कश्यपः दन्तेन्द्वः खं त्रितीयर्क्षं पंचमर्क्षं यशः स्मृतं आयुर्दायं सप्तमर्क्षं कर्तृभाग्यं दिशन्नवममिति वास्तुशास्त्रेपि
गृहभात्स्वामिभं गण्यं मर्क्षं च नवभिः पुनः यच्छेषं सा भवेत्तारा सप्तपंचत्रिकाधमेति यदा तु गृहकर्तुर्गृहस्य
चैकं नक्षत्रं चेत्स्यात्तदा तत्कुम्भमशुभं भवेदिति निर्णयं स्वयमेवाह अथेति गृहेशो गृहस्वामी तस्यर्क्षं नक्षत्रं प्राग्
क्तप्रकारेणानीतं च भं गृहभं तयोरैक्यं द्वयोरेकमेव चेद्भं स्यात्तद्गृहकर्तुरिति प्रदं मरणकारं स्यात् यदाह
वसिष्ठः गृहस्य तत्स्वामिनश्चैकधिष्ण्यं चेन्निधनप्रदमिति निधनं मरणं राश्यैक्ये तु न दोषः ननु भिन्नराशित्वेन तद्वा
कस्य विवाहप्रकरणोक्तत्वात् कैश्चिदन्यदपि प्रयोजनमुक्तं तदुक्तं व्यवहारोच्चये त्रिभिः त्रिभिर्वा शुभमिश्रति
काधैनक्के दशमान्निधनानि शोकं शत्रोर्भयं राज्यभयं च मृत्युं सुखं प्रवासं च नवप्रभेदाः इति गृहभवशाद्राशि
ज्ञानेपि प्रयोजनमाह स एव राशिकूटादिकं सर्वं दंपत्योरिव चिंतयेत् नैस्वं द्विद्वादशे नूनं त्रिकोणे त्वनपत्यता
षष्ठाष्टके नैधनं स्यात् द्यूत्ये मध्यमं स्मृतं परेषु शुभदं प्रोक्तं गृहं तत्कर्तृराशितः इति व्यत्यये द्वादशाद्वितीयद्व
त्यादिके अन्यराशिकूटप्रभेदा वर्णावश्यमित्यादिका विवाहप्रकरणोक्ता ध्येयाः सर्वपदोपादानात् राक्षसामर
मर्त्याक्ते गणयोन्यादिकं पुनः ज्ञेयं ज्योतिषशास्त्रान्नदिग्भिन्नपत्रेनोदितमिति वास्तुशास्त्रोक्तेश्च यत्तु कृत्तिका शुभं॰
दिषु द्विराशिषु भेषु राशिनिर्णयो वास्तुशास्त्रे अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयं मूलादित्रितयं चापि

गुणितं सप्तभिर्भक्तं शिष्टं वारः पुनः षड्भिर्गुणितं नवभिर्भक्तं शिष्टोंशकः पुनरष्टभिर्गुणितं द्वादशभिर्भक्तं शिष्टं द्र
व्यं स्यात् पुनस्त्रिभिर्गुणितमष्टभिर्भक्तं शिष्टं मूलं पुनरष्टभिर्गुणितं सप्तविंशत्या भक्तं शिष्टमृक्षं पुनरष्टभिर्गुणि
तं पंचदशभिर्भक्तं शिष्टा तिथिः पुनः चतुर्भिर्गुणितं सप्तविंशत्या भक्तं शिष्टा युतिर्योगो विष्कंभादिः पुनरष्टभि
र्गुणितं क्षेत्रफलं खभानुभिः १२० भक्तं शिष्टमायुः स्यादित्यर्थः तद्यथा पिंडः ३० ३ नवगुणितः ३८ २७ अष्टभक्तो
लब्धं ४३८ अवशिष्टं ३ सिंहाद्योजातः २ एवं सर्वेष्वानीता इमे वारः ७ अंशकः ९ द्रव्यं ४ ऋणं ८ ऋक्षं ४ रोहि
णी तिथिः ४ चतुर्थी योगः प्रीतिः आयुः ६४ उक्तं च गोकल्वेष्टगुणा ष्टनागजलधिव्याले ९ ९ ६ ८ ३ ८ ८ ४
८ हृतं क्षेत्रफलं नागाग्नेकदिवाकराष्टभतिथीयोगैः खसूर्यैः ८ ७ ९ १२ ८ २७ १५ २७ १२० भजेत् आयं वारमे
थांशकं धनमृणं तारां तिथिं चिंतये योगं चायुरिती ह शेषकपदे भागेद्धृते नान्विके रिति वसिष्ठादिभिस्तु
षड्नेनेति दिष्टाः यदाङ्कः विस्तारसमगुणितं गृहस्य पदमुच्यते तस्माद्धनाङ्कना यद्धो वासराम्नवांशकाः ग
ग्रामांकवस्वकमनुभिः ८ ३ ९ ८ ९ ६ गुणितान्यदात् सूर्याब्धाब्धीशेलाकविभक्तादवशिष्टकाः संपूर्णाः
शुभदास्ते नेह्यसंपूर्णास्तनिष्टदा इति पदं क्षेत्रफलं अथ धनमृणं अंत्रायपत्तिशेणकानां च भाजकानां च आ
यात्रष्टावेव वारः सप्तैव अंशानवैव धनमृणं नक्षत्राणि सप्तविंशतिः तिथयः पंचदश योगाः सप्तविंशतिः
परमायुर्विंशत्यधिकं शतमिति अथैषामायादीनां प्रयोजनमुच्यते स्माभिः आयस्तावत् विषमायुः शुभा
येवसमायुः शोकदः खेद इति वसिष्ठोक्तेः वाराणां च सूर्यारवारराश्यंशाः सदावह्निभयप्रदाः शेषग्रहाणां वा
रांशाः कर्तुरिष्टार्थसिद्धिदा इति यथागणिते नागतो भौमवारः सोपि निंद्यः तत्राशौ मेषवृश्चिकौ निंद्यौ
तदंशाय स्मिन्क स्मिंश्चिल्लग्ने मेषवृश्चिकनवांशावपि निंद्यौ एवमन्येष्वपि वारेषु नवांशानां च गृहस्याग
तभंयत्न तद्विराश्यात्मकं यदि तन्नवांशवशान्नक्षत्रं ज्ञातव्यं सर्वदा गृहइति यथा कृत्तिका द्विराश्यात्मिका तत्रै
कावशेषे मेषः द्वादिशेषे वृषः मृगे पिद्यधिके मिथुनमन्यथा वृषः पुनर्वसावप्यंशकत्रयं यावन्मिथुन

मु॰टी॰
वास्तु॰
प॰६

८ अत्रार्था सामान्यलक्षणमप्यनुसंधेयं विशेषलक्षणस्य सामान्यलक्षणाधीनत्वात् निधनेप्रांते ध्रुवेत्यादिपद्यस्य स्पष्टा
र्थमेव तथापि विविच्यते यथा ध्रुवधान्ये ध्रुवनंदाविति चेतरेतरयोगद्वंद्वः खरकांतेत्यादि समाहारद्वंद्वः उग्रक्रू
रं अहितं विपक्षाख्यं विपुलविजयाख्यमिति समाहारद्वंद्वः ध्रुवसंज्ञं सुखं गृहं ऽऽऽऽ धान्यं पूर्वद्वारं द्वितीयं ।ऽऽऽ
जयं दक्षिणद्वारं ऽ।ऽऽ नंदं प्राग्दक्षिणद्वारं चतुर्थं ॥ऽऽ खरं पश्चिमद्वारं पंचमं ऽऽ।ऽ कांतं प्राक्प्रत्यग्द्वारं षष्ठं ।ऽ।ऽ
मनोरमं दक्षिणपश्चिमद्वारं सप्तमं ऽ।।ऽ सुवक्त्रं प्राग्दक्षिणपश्चिमद्वारं अष्टमं ।।।ऽ दुर्मुखमुत्तरं द्वारं नवमं ऽऽऽ। उग्रं
क्रूराख्यं पूर्वोत्तरद्वारं दशमं ।ऽ।। अहितं विपक्षाख्यं दक्षिणोत्तरद्वारमेकादशं ॥ ऽ।ऽ। धनदं पूर्वदक्षिणोत्तरद्वारं द्वा
दशं ॥ऽ। नाशं क्षयाख्यं पश्चिमोत्तरद्वारं त्रयोदशं ऽऽ॥ आक्रंदाख्यं प्राक्पश्चिमोत्तरद्वारं चतुर्दशं ऽ॥ विपुलाख्यं
दक्षिणपश्चिमोत्तरद्वारं पंचदशं ऽ।।। विजयं चतुर्दिग्द्वारं षोडशं ।।।।मिति। ननु ध्रुवाद्यद्वारहस्याज्ञाने प्राक्पश्चि
मोक्तं किं पुनर्ध्रुवादीनां नामग्रहणेनोच्यते नामसदृशफलसूचनार्थं तदुपादानमन्यथा द्वारानुरोधेन ध्रुवाद्यद्वा
रसंख्यायोगे भक्ते कीदृशानां ग्रहाणां विधिनिषेधौ वा निश्चीयेत तस्माद्येषां शुभफलदानि नामानि तेषां गृहाणां ग्र
हणं येषां चाशुभं फलं तेषां त्यागो विधेय इति निष्कृष्टोर्थः उक्तं च वसिष्ठेन ध्रुवसंज्ञं गृहं त्वाद्यं धनधान्यसुखप्रदं
धान्यं धान्यप्रदं नृणां जयं सपत्नजयप्रदं नंदं स्त्रीहानिदं नृणां खरं स्याद्विजयप्रदं संपद्विनाशनं पुत्रपौत्रप्रदं कांतं श्री
प्रदं स्यान्मनोरमं सुवक्त्रं भोगदं नृणां दुर्मुखं विमुखप्रदं सर्वदुःखप्रदं क्रूरं विपक्षं शत्रुभीतिदं धनदं धनदं गेहं क्षयं सर्व
क्षयप्रदं आक्रंदं शोकजननं विपुलं श्रीयशःप्रदं विपुलं नाम सदृशं धनदं विजयाभिधमिति अथ केषांचिन्मतेन गृह
स्यायादिनवकमुपजातिकापद्यावज्राभ्यामाह पिंडे नवांके कां ९ ग ६ गजाग्नि ३८ नाग ८ नागा ८ ब्धि ४ नागै ८
र्गुणिते क्रमेण विभाजिते नाग ८ नगा ७ कं ९ सूर्य १२ नाग ८ र्क्षे २७ तिथ्यु १५ क्षा २७ खभानु १२० भिस्त्र आयो
वारांशकाद्रव्यमृणर्क्षं तिथिर्युतिः आयुश्चाथ गृहेशर्क्षे गृहभैक्यं मृतिप्रदं पिंडे क्षेत्रफले नवधा स्थापिते क्रमेणान राम॰
वाभिरंकैर्भक्ते सति यदवशिष्टं तदायादिकं स्यात् यथा क्षेत्रफलं नवभिर्गुणितं अष्टभिर्भक्तं शिष्टमायः स्यात् पुनर्नवभिः ८

तत्र ग्रंथकृद्भिनापि प्रस्तारोक्तिं लाघवेन शालाध्रुवानानयति स्म यथा एकस्मिन्नेव द्वारे चिकीर्षिते पूर्वदिशि शा
लाध्रुवांकः १ एवं दक्षिणदिशि चार्यं २ पश्चिमदिशि च ४ उत्तरदिशि च ८ प्रत्यक्षतो दृष्टपने तत्र द्वित्र्यादिद्वारज्ञा
नार्थमुपायः यद्यद्दिग्द्वारेच्छा तत्तद्दिक्शालाध्रुवयोगः कार्यः यथा पूर्वस्यां पश्चिमायां च द्वारेऽभीष्टे शालाध्रुवौ १
४ अनयोर्योगः ५ एवं पूर्वदक्षिणोत्तरदिक्षु द्वारेऽभीष्टे शालानां ध्रुवाणां १ २ ८ योगः ११ एवं दिक्चतुष्टयेपि द्वारे शा
लाध्रुवांकयोगः १५ प्रस्तारलिखितक्रमेण प्रत्यक्षाउपलभ्यंते ध्रुवादिसंज्ञास्तु चतुर्गुरुप्रस्तारमारभ्योक्ताः तत्र
चतुर्गुरोः प्रथमभेदस्य दिग्द्वाराभावेन गणनाभावात्तन्त्यागस्य प्राप्तत्वात्तन्मा भूदित्येकयोगः कृतः सर्वत्र यथा पूर्व
पश्चिमयोः ६ कांताख्यं गृहं जातं एवं पूर्वदक्षिणोत्तरदिक्षु १२ धनदाख्यं गृहं दिक्चतुष्टये १६ विजयाख्यं गृहं अ
नएवोक्तं दिक्षु पूर्वादितइत्यादि अथैवं विवक्षितध्रुवानयनं अभिधायेदानीं ध्रुवादीनां नामाक्षरसंख्यां पथ्याव
क्त्रछंदसाह तिथ्यर्कोष्टाष्टिगोरुद्रशक्रेनामाक्षरत्रयं भूमिषष्टीषुगदिग्भूक्षि विश्वेष्वष्टौ २ नगे भुवः ४ ६ दि
क्षु पूर्वादितइत्यादिना यद्गृहमध्रुवादि समागतं तस्य शालाध्रुवांकसंयोगः सैक इत्युक्तदिशा संख्यामवधारये
त् सा चेत्संख्या पंचदशी द्वादशी अष्टमी षोडशी नवमी एकादशी चतुर्दशी वा स्यात्तदा गृहनामाक्षरत्रयात्म
कं स्यात् यथा १५ १२ ८ १६ ९ ११ १४ अत्र त्रीण्येवाक्षराणि पुनः सैव संख्या प्रथमा द्वितीया चतुर्थी पंचमी षष्ठी
दशमी तृतीया त्रयोदशी वा स्यात्तदा गृहनामद्वौ अक्षरद्वयात्मकं स्यात् यथा १ २ ४ ५ ६ १० ३ १३ अत्र द्वे अक्षरे
पुनः सा संख्या सप्तमी स्यात्तदा भूयः चतुरक्षरं गृहनाम यथा ७ चत्वार्यक्षराणि अत्र एतत्पद्ये ध्रुवधान्याद्यक्षर
गणनामूलमिति नात्र मूलवाक्यसमानार्थस्योपन्यासः अथैतेषां ध्रुवादिषोडशगृहाणां नामान्यार्यागीतिछंद
साह ध्रुवधान्ये जयनंदौ खरकांतमनोरमसुमुखदुर्मुखोग्रं अहितं धनदं नाशं चाक्रंदं विपुलविजयाख्यं स्यात् आर्या
गीत्याख्यं छंदः तल्लक्षणं वृत्तरत्नाकरे आर्यापूर्वार्द्धं यदि गुरुणैकेन निधने युक्तं इतरं तद्वन्निखिलं यदीयमुदिते
यमार्यागीतिरिति यथा ।।।ऽ॰ऽ।।॰ऽऽ०।।ऽ०।।ऽ०।। ।।०।ऽ।०ऽऽ० पूर्वार्द्धं उत्तरार्द्धं ।।ऽऽ० ।।ऽ०ऽऽ०ऽ।।०।०।।०ऽ०ऽऽ०।

येद्विशेन्गृहनामाक्षरैः पुनः ॥ युतेहरेत्रिभिर्भागं यच्छेषं सोंशको भवेत् इंद्रो यमः च राजास्याद्यमांशेनैव शोभ
नइति मूलराशिः क्षेत्रफलं ॥ अथ विवक्षितशालाध्रुवानयनं पथ्यावक्त्रेणानुष्टुभाह दिक्पूर्वादितः शा
लाध्रुवाभूः १ द्वौ २ कृताः ४ गजाः ८ शालाध्रुवांकसंयोगः सैको वेश्म ध्रुवादिकं ॥ पूर्वादितो दिक्षु प्राच्यादि
षु चतसृषु दिक्षु इमे शालाध्रुवाः स्युः यथा प्राच्यां द्वारे चिकीर्षिते शालाध्रुवांकः १ एवं दक्षिणस्यां द्वौ २ प
श्चिमायां कृताः ॥ ४ ॥ उत्तरस्यां गजाः ८ अथ यदि क्वचिद्वत्वेन यावंति द्वाराण्येकं द्वे त्रीणि चत्वारि वा चिकीर्षितानि ता
वतां शालाध्रुवकानां संयोगः कार्यः ॥ सैक एकयुक्तः सन् ध्रुवादिकं वेश्म गृहं स्यात् अत्रोपपत्तिर्नीलकंठ
गुरुचरणैः सादरमुच्यते यथा नारदः गुरोरधो लघुः स्थाप्यः पुरस्तादूर्ध्ववन्न्यसेत् गुरुभिः पश्चिमं पूर्यं सर्वल
घ्ववधिर्विधिरिति एतच्च सामान्यतो यस्मिन्कस्मिंश्चित्प्रस्तारे संभवति तथापि गृहेषु विशिष्टं द्वाराणां विन्या
दिक्ष्वेव द्वाराणां प्राशस्त्यात्केंद्रदिशां च चतसृणां चत्वार एव गुरवः स्थाप्याः तेना गुरोरधो लघुः
प्य इति विधिः कार्यः तत्र प्रथमातिक्रमे कारणाभावादाद्यगुरोरेवाधो लघुः स्थाप्य एवमग्रेपि
रुलघुस्वरूपं छंदोरत्नाकरे अत्रोसौ युक्तोऽस्त्योन्यामात्रको ज्ञ इति अस्यायुगुरुर्वक्रो ज्ञेयः
ख्यः यथान्या गुरुश्चातिरिक्तोल् लघुर्मात्रिक एवमात्रः मात्रः सरल ऊर्ध्वदंडाकृतिर्लेख्यः य
चतुर्णां प्रस्तारो यथा अत्र दिशां च चतसृणां क्रमेण लघुस्थाने नालिंदं गुरुमाश्रित्य प्रदक्षिणेऽष्ट
द्वारदलिंदैर्दश षड्विधा इति गृहभेदाः स्युरिति शेषः अलिंदं अलिंदशब्देन शालाभित्तेर्वाह्यप्र
निकाजालकाहतागणसंमुखाक्रियते सा ज्ञेया तत्पलः प्रतिशालाख्यमिति महादेवः प
णप्रघाणालिंदाबहिर्द्वारं प्रकोष्ठकं स्त्वमरः तत्र चतुर्गुरौ प्रथमभेदे सप्तलघुभावादिक्षु शराभावा
मुखं गृहं कोष्ठी सदृशं स्यात् अन्येषु पंचदशसु भेदेषु लघुस्थानावस्थितत्वात् तत्र दिक्षु द्वाराणि

१	ऽऽऽऽ	स्था
२	।ऽऽऽ	गु
३	॥ऽऽ	ले
४	ऽऽ।ऽ	ख्या
५	[illegible]ऽ	ह
६	।ऽ॥ऽ	गम
७	॥।ऽ	या
८	ऽऽऽ॥	र्द्धे
९	।ऽऽ॥	स्युः
१०	ऽ।ऽ॥	
११	॥ऽ॥	
१२	ऽऽ॥।	
१३	।ऽ॥।	
१४	ऽ॥।	
१५	॥॥	

दोषः सदा चांद्रेन मैत्रेऽप्यस्य नीचगतेति अन्नस्य चंद्रस्य कर्तुरिति विधिवास्तुनो भे यन्नक्षत्रे दिनचंद्रस्तद्धिष्ण्यं यद्गृहनिर्माताऽतस्मि
न्गृहे स्थिति र्निवासो न स्यात् । इष्टगतेवा विधुवास्तुनो भे सति खनिः खननं चौरकृतापहारं तद्दशा तत्र स्वहानिरित्यर्थः उक्तं च वास्तु
शास्त्रे अन्नंचंद्रस्य वास्तोश्च अग्रे इष्टेन शास्यन इति श्रीपतिस्तु चंद्रस्य फलमुक्तं द्वापाकरैनैव गृहं प्रवेष्टं कुर्याद्विसेन्नत्र न ज्ञातक
तो पतंति खन्यानि च इष्ट संस्थे यत्नेन तस्मादिदमत्र चिंत्यमिति पुरःस्थितत्वं लग्नवशादिति केचिद्व्याचख्युः यथा प्राङ्मुखगृहेक
तेष्वलग्नस्थः चंद्रो पुरःस्थितो भवति दक्षिणमुखे तद्गृहे वामगः पश्चिममुखे तु पृष्ठगः उत्तरमुखे तु दक्षिणगः एवं दशमस्थः चंद्रो
दक्षिणमुखगृहे संमुखः एवं सर्वास्वपि दिक्षु पृष्ठगत्वं संमुखत्वं च ध्येयं तत्रार्थात् दक्षिणवामगत्वं चंद्रस्य समीचीनमित्यर्थः रत्नमा
लाटीकाकारो महादेवस्तु दिग्द्वारभक्रमेण संमुखादिवावस्थैषेति व्याख्यत् यथा गृहद्वारं यस्यां दिशि विधित्सितं तद्दिङ्नक्षत्रे
षु गृहारंभो न कार्य इति अर्थाद्दिग्नक्षत्रवशेन वामदक्षिणगे चंद्रे गृहारंभः सुखेन कार्यः यदाह ब्रह्मशंभुः धनलाभः प्रवासः स्या
दायुः चौरभयं क्रमात् द्वाराग्रवामपृष्ठस्थे गृहभर्तुर्निशाकर इति केचित्सूर्ये प्येवमेव फलमाहुः यदाह ब्रह्मशंभुरेव भाना
वपि तथैव स्याद्धिकं चंनतदंतरे धनलाभो मतिर्व्याधिर्विनाशो विलोमत इति तदंतरे विदिक्षु विलोमतईशानवायव्यनैर्ऋत्या
ग्नेयदिक्क्रमेण धनलाभो मरणं व्याधिर विनाशः फलं स्यादित्यर्थः इदं दिग्द्वारनक्षत्रवशेन चंद्रफलं तदल्पत्वात्प्रायत्वाद्वास्तुनक्ष
त्रेपि ध्येयं कृत्तिकादिविक्रमे[illegible]यदुक्तं ब्रह्मशंभुना गृहायल्लक्षं मतो षु यत्र दत्रे च चंद्रमाः शालाकासप्तके देयं कृत्तिकादिक्र
मेण च वामदक्षिणभागे तु प्रशस्तं शांतिकारकं अग्रे पृष्ठे न दातव्यं यदीच्छेच्छ्रेय आत्मनः अन्नं चंद्रस्य वास्तोश्च अग्रे पृष्ठे न शस्य
त इति अथैव मायं फलमभिधाय व्ययकथनपुरःसरं अंशकज्ञानं सफलमुपजात्याह भैनागहृष्टं व्ययईरितो सौध्रुवादिनामा
क्षरयुक्तपिंडः तष्टोगुणैर्विदिक् तांत भूपाद्यंशा भवेयुर्नशुभोंतकोत्र प्रागुक्तदिशा कल्पितं यद्गृहं भं तन्नागैरष्टभिस्तष्टं भक्तावशि
ष्टं सव्ययईरितः यथा रोहिणीभं ४ नागतष्टं ४ अयमेव व्ययः असौ व्ययः ध्रुवादिनामाक्षरयुक् ध्रुवादीनां नामान्यग्रे वक्ष्
यति यत्संख्याकानि दिग्द्वाराणि चिकीर्षितानि तदनुरोधेन यदागतं ध्रुवादिगृहनाम तदक्षरसंख्यया युक्तः ततः स पिंडः प्रा
गानीतपिंडः युक्तः गुणैस्त्रिभिः तष्टो भक्तो वशिष्ट एक द्वि त्रि शेषेण इंद्रयमराजसंज्ञकाः त्रयोंशाः स्युः अत्र गृहारंभे तक्ष्वोयमा
ख्यांशकोन शुभः अर्थादिंद्रराजानौ शुभफलदौ यदाह श्रीपतिः धिष्ण्य विभक्ते वसुभिर्व्ययः स्याद्गृह्णाय मूनमयमालयं सन्
वयान्विते दैत्र फले गृहस्य ध्रुवादिनामाक्षरमिश्रिते च त्रिभिर्विभक्ते क्रमशोंशकः स्यादिंद्रोयमो भूपतिरंतकोत्र मिति वास्तुशा
स्त्रेपि मूलराशौ व्य

मुहू॰
वा॰प्र॰
५

ज्ञानां सदनं शुभं अश्वालये ध्वजाये च खराये वृषभे पिवा उष्ट्राणां मंदिरं कार्यं गजाये वा वृषे ध्वजे पश्वश्वस्
म्रहृषाये च ध्वजाये वा शुभप्रदा शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदः अमत्रकं वस्त्राणां वृषाये वा ध्वजे
पिवा पादुकोपानहां कार्यौ सिंहाख्येप्यथवा ध्वजे उक्तानामप्यनुक्तानां मंदिराणां ध्वजः शुभ इति अथ ब्राह्म
णादिवर्णपरत्वेन द्वारनिवेशनमुच्यते अथवेति द्विजादितः ब्राह्मणादिवर्णविभागेन पश्चादित्यादिदिक्षु गृ
हद्वारं स्यात् यथा ब्राह्मणस्य पश्चान्मुखं गृहद्वारं क्षत्रियस्योदग्दिशि वैश्यस्य पूर्वस्यां शूद्रस्य यमे दक्षिणस्यां
इत्यर्थः उक्तं च श्रीपतिना ध्वजे प्रतीचीमुखमग्रजानां उदङ्मुखं भूमिभृतां च सिंहे विशां वृषे प्राग्वदनं गजे तु शूद्र
स्य याम्याननमामनंतीति टोडरानंदे च्यवनः ध्वजे पराक्ष्यं विप्राणां राज्ञां सिंहोप्युदङ्मुखं गजे शूद्रस्य याम्या
स्यं वृषे पूर्वामुखं विशां इति अथ गृहारंभे विशिष्यकालनिषेधमुपजातिकयाह गृहेशतत्स्त्रीसुतवित्त
नाशोऽर्केंदुजीज्यभृगौ विबलेस्तनीचे कर्त्तुः स्थितिर्नो विधुवास्तुनोर्भे पुरःस्थिते पृष्ठगते खनिः स्यात् चे
द्गृहस्वामिनो जन्मराशिवशात् दुष्टे विबले निर्बले अस्ते अस्तंगते वा नीचे नीचस्थिते वा अर्कादिके ग्रहे स
ति गृहेशादिनाशः यथा सूर्ये निर्बले अस्ते अस्तंगते नीचस्थिते वा गृहेशस्य नाशः इंदौ चंद्रे निर्बले, स्तमिते नी
चगते वा गृहेशस्त्रीनाशः यथा इज्ये गुरौ तादृशे सति गृहेशसुखनाशः शुक्रे तादृशे गृहपतेर्वित्तं द्रव्यं तस्य नाशः य
दाह श्रीपतिः रवौ गृहस्थाः गृहिणी शशांके धनं सिते देवगुरौ च सौख्यं विनाशमायाति बलेन हीने नीचस्थिते वा
स्तमुपागते चेति वसिष्ठस्तु नेष्टमेवाह नीचे शत्रुगते जीवे शुक्रे वा यदि वा बुधे शशांके वा कृतं गेहमतिनिः
स्वप्रदं मतेति इदमस्तस्याप्युपलक्षणं अत्र अस्तगतत्वं किं क्षितिजसंनिधिकृतमुत सूर्यकृतं विवक्षितमि
ति उच्यते क्षितिजसंनिधिकृतमस्तगतत्वं तु दैनंदिनं तच्च सूर्यादिसकलग्रहसाधारणं तस्मिन्विवक्षिते स्त
गतत्वविशेषणानर्थक्यं अनेनैवाशयेन वास्तुशास्त्रे पठ्यते अस्तदोषो न ग्राह्यः प्रतिदैवसिको बुधैः नास्त राम॰ ५

हतं तैश्चैर्विभक्ते रष्टभिस्ततः यत्प्रोक्तं समवेदायो ध्वजाद्यालेख्यरष्टधा ध्वजो धूमो हरिः श्वा गौः खरेभौ वा
यसोष्टमः पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिरिति सर्वदिक्षीति ध्वजाख्ये आये आगते सति स
र्वदिशि दिक्षु तस्येपि गृहद्वाराणि कार्याणि स्युरित्यर्थः हरौ सिंहाये पूर्वदक्षिणोत्तरदिक्षु द्वाराणि स्युः
न पश्चिमदिशि तथा वृषाख्ये आये प्राच्यां दिश्येव मुखं नान्यदिक्षु गजाख्ये आये प्राग्यमयोः पूर्वद
क्षिणदिशोर्गृहमुखं कार्यं स्यात् यदाह श्रीपतिः गृहेषु चाया विषमाः प्रशस्ताः स्वस्थानगाः सर्वगतो ध्व
जस्तु ध्वजो हरौ नौ च वृषे गते ते वृषो हि नान्यत्र समाश्रितः स्यात् वसिष्ठोपि विषमायः शुभायैव स
मायः शोकदुःखदः ध्वजः सिंहे तौ च गजे ह्येते गविश्व मप्रदाः वृषो न पूजितो न्यत्र ध्वजः सर्वत्र पूजिताः
इति अस्यार्थः ध्वजः प्रागवस्थितत्वात्तत्र पूजित एव परं तु हरावपि दक्षिणस्यामपि पूजितः नौ च गजे नौ
ध्वजसिंहावायौ गजे उत्तरस्यामपि प्रशस्तौ स्वस्थाने किंतु न एते ध्वजसिंहगजाख्या आयाः पश्चि
मायामपि पूजिताः स्वस्थाने किंतु न वृषआयस्तु अन्यत्र पूर्वदक्षिणोत्तरदिक्षु न पूजितः किंतु स्वाव
स्थित्या पश्चिमदिश्येव ध्वजस्तु सर्वत्रैव पूजित इति अनयोरीत्या ये आयाः यत्रावस्थिताः स्युस्तत्तन्मु
खदिक्षु द्वाराणि स्युरित्यर्थः प्रत्यक् ध्वजे द्वारमथो हि पूर्वं हरौ उदक्स्याद् द्विरदे च याम्यामिति आप
स्तंभेः महेश्वरोपि सर्वद्वार इह ध्वजो वरुणदिग्द्वारं च हित्वा हरिः प्राग्द्वारो वृषभो गजो याम्यसुरेशाननः
स्यात्कुम इति आयानां प्रयोजनांतरमाह विश्वकर्मा वृषं सिंहं गजं चैव खेटकर्पटकोटयोः द्विपः पुनः
प्रयोक्तव्यो वापीकूपसरस्सु च मृगेंद्रमासने दद्यात् शयनेषु गजं पुनः वृषं भोजनपात्रेषु छत्रादिषु पुनर्ध्व
जं अग्निवेश्मसु सर्वेषु गृहे वह्न्युपजीविनां धूमं नियोजयेत्कैश्चित् श्वानं म्लेच्छादिजातिषु खरो वेश्यगृहे
प्रास्तो ध्वांक्षः शेषकुटीषु च वृष सिंहौ ध्वजश्चापि प्रासादपुरवेश्मसु इति वसिष्ठः गजायेवा ध्वजायेवाग

मु·टी·
वा·प्र·
२

द्वेत्रफलं सायमिष्टायसहितं मत्स्यादित्याह वदनि गोपिरात्रः अत्रोदाहरणं पूर्वोक्तं इष्टायः ३ ध्वोकः २ गो
मू २९ हतिः ३८ इष्टं रोहिणी तत्संख्यया ४ युतं ४२ २२ २ २३ अस्याङ्कैः २७ शेषं २५ एतत्संख्यायाः फलं २५

ईशान प्रावर्ग मेष कुंभराशिः	पूर्व अवर्गः गरुडः वृश्चिकः	आग्नेय कवर्गः मार्जार मीनराशिः
उत्तरे यवर्गः सिंहवर्गः कं वायव्ये पवर्गः मूषकः	मध्येन वैसित भूमि लिंग	दक्षिणे चवर्गः सिंहवर्गः कन्याराशिः
तुलाराशिः वायव्य पवर्गः मूष कः तुलाराशिः	पश्चिमे तवर्गः सर्पः धनुराशिः	नैरृतिः टवर्गः श्वा कर्कराशिः
	ग्रामचक्रं	

२४ २५ २६ १९ १८ २१ २० २२ २२ २३ २४ २५ २६ २७ अद्विहितं २०
२८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ कोष्ठे ध्रुवाः इष्टायसहितं
अष्टहताः १० २ २ २२ २३ १५ २२४ १९ ८ २० २१ ११ ३ २० ३ इदं त्वेष्टा
२२ २४ ६ २५ २० ११ ११ २० २२४ ३३ १५ ७१ ३६ यन हत्रभवंदे
११९ १० ११६ ११६ ११९ २०४ १७ ११६ २८ ६४ त्रफलं पूर्वसम
२२६ १९२ १८८ ३४ २०६ ११२ १७ १ २० २२३ ६ मन्वेव अथ
७२ १७२ १६० १९६ ३२ १२४ ११० १९६ २० ११ १७ ४१८ गृहप्रमाणार्थे
माह वेति वाडव्यथवा इष्टायसहितं ज्ञातं यत्फलं त अष्टिद्विष्टे ध्रुवं तं
अष्टिस्थ दत्ता स्वाष्टिदष्टाः षोडशाधिकद्विशती २१६ तयाहतो गुलि
तो यद्दष्टएकद्वि आयंक स्तेन युक्तं कार्यं तन्मतो भीष्टस्य महागृहदेव
फलं स्यात् इत्यर्थः अथेदं वंशेन राधेन ध्वजाद्या यान्नायैवर्णेन परतो
न च द्वारनिवेशनमुपज्ञान्याह आयाध्वजो १ धूमहरि २ श्व ४ गो ५
खरेभ ७ ध्वांक्षकाः पिंडइहाष्टशेषिते ४ ध्वजादिकाः सर्वदिशि ध्वजे मुखं
कार्यं हरौ पूर्वयमोत्तरे नरा प्राच्यांवृषे प्राम्यमयोर्गजेथवा पश्चाड्दक्पूर्वयमे द्विजादितः पिंडक्षेत्रफलं ष्टशेषि
ते अष्टभक्ते सति यदवशिष्यते तत्परिमिता आयाध्वजादिकाः स्युः ध्वजध्वमोप्रसिद्धौ हरिः सिंहः श्वा कुक्कुरः
गौर्वृषः खरो गर्दभः इभो हस्ती ध्वांक्षः काकः ध्वांक्षएव ध्वांक्षकः स्वार्थेकः यदाह विश्वकर्मा विस्तारेण

राम·
२

नयदिति वसिष्ठोक्तेः विवाहोक्तमेलापकविधिना शुभं स्यान्न दैवज्ञेष्टं कल्प्यं कल्पितनष्टहृतेनेन हता गुणिताः
द्वितिथ्यः ९२ कार्याः ततो रूपेणोनितोऽयमिष्टायोध्वजादिकस्तेन हता इंदुनागा एकाशीतिलयायुक्ताः कार्या
स्तेनोद्धृतैः सप्तदशभिरपि युक्तास्ततो रूपाश्विभिः षोडशाधिकद्विशत्या विभक्ताः शेषो भक्तः सति यच्छेषं तत्क्षि
तः पिंडः शेषत्रफलं स्यात् स च पिंडः स्वेष्टाय नक्षत्रभवः स्वस्य गृहकर्तुरिष्टं यन्नक्षत्रं इष्टमायस्तु नाम्ना भवती
नितराश्चाः स्यात् अथ सपिंडो दैर्घ्यहृत्कल्पितं दैर्घ्यं भक्ताः सन्न विसृति विस्तारः स्यात् अथ सपिंडो विसृति
हृत्कल्पितविस्तारभक्तो दीर्घता स्यात् उक्तं च सारसमुच्चये रूपाष्टभि ८ र्विनिहतो भवनस्य बंधो नक्षत्रमि
ष्टमिह युग्मशरेंदुनिघ्नं एकीकृतं रसनिशाकरयुग्म २१६ मिष्टलब्धो भवति मध्यगृहं इति अत्रोदाहरणे
नीलकंठस्यानुराधानक्षत्रं तस्य रोहिण्या सह मेलापकः संभवतीति इष्टं रोहिणी कल्पितं विषमआयः सिं
हः कल्पितनक्षत्रतीयः ३ इष्टहृत् ४ एकोनितं ३ अनेन द्वितिथ्या १९२ हताः ५७६ इष्टायः ३ रूपोनितः २ आ
भ्यामिंदुनागाः ८१ हता १६२ एतैर्युक्ताः ७३८ सनेर्युताः ७५५ रूपाश्विभिः २१६ विभक्ताः शेषमिदमेव क्षे
त्रफलं गृहस्य अथ कल्पितं दैर्घ्यं २९ अनेन भक्तो लब्धो विस्तारः अथ कल्पितविसृति ७ भक्तो लब्धं दैर्घ्यं २९
यदाह प्रकारांतरेण गोपिराजः विहितव्येकायगोभूहतिभयुक्तिफलं गोपिराज्ञो भशेषान्नायं वाहादिदृष्टप
युतमहिहृता दक्प्रकृत्याख्ये विश्वबाणासिद्धाष्टिनागो इति इति गिरिशआरूढे नीदृतु तत्त्वात्ययं कस्मान्नवे
नाशेव विहृतिदिना युक्तने भीडु काष्टा इति अस्यार्थः गोपिराज्ञो व्येकायगो भूहतिभयुक्ति सतिभशेषा
न्विलम हिहिता दक्प्रकृत्याख्या विश्वादयः फलं स्यादित्याह नियोजनाविगत एकोयस्मात् सव्येकः स
वास्तावायस्तु व्येकायः ध्वजादिरिष्टायः स च गोभुवस्तु १९ पर्वाहतिः परस्परगुणनं व्येकायगोभूहतिश्च
भं च व्येकायगोभूहतिर्भे नयोर्युक्तं व्येकायगोभूहतिभयुक्तं तस्मिन्सति भशेषाद् २७ भक्ते सति यच्छेषं तस्मा
द्विलमामाने शिष्यं अहिहृतास्वाष्टगुणिताः दक्प्रकृत्याख्याः एकविंशतिर्विश्वे त्रयोदशत्यादयोष्टह

मु.टी.
वा.प्र.
२

तेषां पूर्वदिशि वैश्यराशयो वृषकन्यामकरास्तेषां दक्षिणदिशि शूद्रराशयो मिथुनतुलाकुंभास्तेषां पश्चिमदि
शि नृपराशयो मेषसिंहधनुर्धरास्तेषामुत्तरदिग्विद्वारनिवेश इत्यर्थः यदाह अथ राशिपरत्वे ग्रामनिवासनि
षिद्धस्थानानि वसंततिलकाछंदसाह गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभो ऽलिझषांगनाश्च
कर्कोधनुस्तुलमेषघटाश्च तद्वद्वर्गाः स्वपंचमपरा बलिनः स्युरैंद्र्याः वस्तुमिष्टस्य ग्रामस्य वस्त्रविभागवन्नवधा
विभागं कृत्वा मध्यमभागे गोसिंहनक्रमिथुनं समाहारद्वंद्वः न निवसेत् वृषसिंहमकरमिथुनराशिमंतः
पुरुषा न वसेयुः अथ पूर्वककुभः पूर्वदिशातोष्टदिक्षु अलिझषांगनादिराशिमंतः पुरुषा न वसेयुः य
था पूर्वस्यां वृश्चिकः आग्नेय्यां झषा मीनः दक्षिणस्यां कन्या नैर्ऋत्यां कर्कः पश्चिमायां धनुः वायव्यां तुला उ
त्तरस्यां मेषः ऐशान्यां कुंभो न वसेदित्यर्थः अथ वर्गाः अकचटतपयशा वर्गाः अष्टावैंद्र्याः पूर्वादिशमारभ्याष्ट
दिक्षु बलिनः यथा अवर्गः पूर्वस्यां कवर्ग आग्नेय्यां चवर्गो दक्षिणस्यां टवर्गो नैर्ऋत्यां तवर्गः पश्चिमायां
पवर्गो वायव्यां यवर्ग उत्तरस्यां शवर्ग ऐशान्यां बलीत्यर्थः कीदृशाः वर्गाः स्वपंचमपराः स्वस्मात्पंचमः परः श
त्रुर्येषां ते यस्य वर्गः पूर्वस्यां बली तेन पश्चिमायां द्वारं निवासो वा न विधेयः एकैकवर्गादीनामाग्नेय्यादिस
प्तदिक्षु बलित्वं सप्रयोजनं ज्ञेयं यदुक्तं मुहूर्तमार्तंडे नामस्त्रीद्विहृतोकदिग्भवगतो ग्रामः शुभोन्योन्यघात
त्कोणेन्यभुवां शुभं निवसतां दोषः परेषामलं कन्याकर्किधनुस्तुलाक्रियघटाः कोण्याद्युक्तायाम्यतो मध्ये
न्यो न वसंत्यथेंद्रककुभो वर्गाः स्युरोजस्विन इति ओजस्विनो बलिनः कोण्यो वृश्चिकः चक्रोद्धारे यथा अथे
ष्टनक्त्रेष्टायाभ्यामिष्टभूम्या विस्तारायामाविंदुवह्नींद्रयेंदुवंशाश्वैर्धनिचाह एकोनितेष्टर्क्षहताद्वितिथ्या
८२ रूपोनितेष्टायहतेंदुनागैः ८८ युक्ताद्वने रथ्याप्तियुताविभक्ता भूपाश्विभिः २१६ शेषमितो हि पिंडः ३ स्वे
ष्टायनताचत्तवोथ दैर्घ्यहृत्स्पाद्विस्तारोहि चदीर्घता यत्र गृहं कर्तुमिष्टं भवति सा भूमीनाकारा संभवति समच
तुरस्रविषमचतुरस्रवृत्ताद्यनेकभेदेन तत्र यदेव नक्षत्रं स्वव्यवहारनाम्नो राशिस्तद्रादिकं सर्वदं पत्योरिविष्टं राम
२

विस्तृतिर

स्ववर्गमिति वर्गास्तु अकचटतपयशाः वर्गाः खगेशमार्जारसिंहशुनां सर्पाखुमृगावीनां निजपंचमवैरिणम
ष्टावित्युक्तास्तत्र यस्य पुंसो यत्संख्याको वर्गो गरुडादिः स्यात्तद्वर्गसंख्यां द्विगुणां विधाय कृत्वा परस्य ग्रामस्य व
र्गसंख्यया युतां च कृत्वा गजैरष्टभिः शेषितमवशिष्टं ताः काकिण्यो ज्ञेयाः पुंसः एवं ग्रामस्यापि स्ववर्गसंख्यां द्विगु
णां कृत्वा परस्य पुंसो वर्गसंख्यया युक्तां च कृत्वा गजभक्तावशिष्टाः काकिण्यो ग्रामस्य भवंति एवमनयोः पुरुष
ग्रामयोः काकिण्यः स्युः तत्र तद्विवरतः पुरुषकाकिणीनां ग्रामकाकिणीनां च विवरमंतरं तस्मिन्क्रियमाणे
यस्य ग्रामस्य दातृत्वात् पुंसः काकिण्यवशेषे पुंसो द्रव्यहानिर्ग्रामस्य प्रतिगृहीतृत्वादित्यर्थः यथा नीलकं
ठस्य वर्गः सर्पः तत्संख्या ५ द्विगुणा १० चरणाद्रेर्वर्गः सिंहस्तत्संख्यया ३ युक्ता १३ गजभक्ताच्छेषं ५ नीलकं
ठस्य काकिण्यः ५ एवं ग्रामवर्गसंख्या ३ द्विगुणा ६ नीलकंठवर्गसंख्यया ५ युक्ता ११ अष्टभक्ताच्छेषं ३ ग्राम
स्य काकिण्यः ३ द्वयोरंतरे शेषं २ नीलकंठस्य दातृत्वात् द्रव्यहानिरित्यर्थः उक्तं च स्ववर्गं द्विगुणं कृत्वा परव
र्गेण योजयेत् अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेदिति इतोऽन्यथाह कश्यपवसिष्ठनारदाः अकारादि
ष्ववर्गेषु दिक्षु प्रागादिषु क्रमात् गृध्रमार्जारसिंहश्वसर्पाखुगजशशकाः गामिथेयो निर्दिग्गुणा स्ववर्गात्पंच
मो रिपुः रिपुवर्गं परित्यज्य शेषवर्गः शुभप्रदः साध्यवर्गः पुरः स्थाप्य पृष्ठतः साधकं न्यसेत् विभक्ते दष्टभिः शेषं
साधकस्य धनं स्मृतं व्यत्ययेनागतं शेषं साधकस्य ऋणं स्मृतं धनाधिक्यं स्वल्पऋणं सर्वसंपत्प्रदं स्मृतमिति
गृध्रोऽत्र गरुडः गरुडसर्पयोर्महावैरसत्वात् साध्येत्यर्थं साध्यो वा सयोग्यो ग्रामादिः तस्य वर्गवर्गसंख्यां पुरः
संस्थाप्य साधकस्य नीलकंठादेर्वर्गसंख्यां पृष्ठतो न्यसेत् एवं विशिष्टोंकोऽष्टभिर्भक्तः शेषं साधकस्य ऋणं स्या
त् यथा साध्यवर्गसंख्या पुरः स्थापिता साधकवर्गसंख्या च पृष्ठतः सा चैवं ५३ जाता त्रिपंचाशत् अष्टभक्तावशि
ष्टं ५ धनं साधकस्य विपरीते स्थापितं यथा ३५ अष्टभक्तं शेषं ३ साधकस्य ऋणं स्यात् अथ द्वारनिवेशनमाह
यति द्विजादिराशिमतं तु संक्रमेण पूर्वतः प्राच्यादिदिक्चतुष्टये द्वारं हितं यथा द्विजराशयः कर्कवृश्चिकमीनाः

ॐ मु०टी० वा०प्र० २

श्रीगणेशाय नमः ॐ गौरीनंदनमिष्टसिद्धिसदनं विघ्नावलीभेदनं नत्वा ज्योतिषिकाग्र्यरामरचिते मौहूर्ते चिंता
मणौ गोविंदो बुधनीलकंठविधिवत्सूनुः स नामग्रणीः वक्ष्ये गृहनिर्मितिप्रकरणं व्याख्यातिविद्वन्मुदे ॥ अथ
वास्तुप्रकरणं व्याख्यायते तत्र त्रिविधप्रवेशो वसिष्ठाद्यभिहितः अपूर्वसंज्ञः प्रवेशः प्रथमस्तूक्तः स च गृहनिर्मा
णाधीनः इति वास्तुनिर्माणप्रारंभ उच्यते यदाह वसिष्ठः वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा ग्रामसद्मपुरा
दीनां निर्माणं सूक्ष्मेणाधुनेति गृहनिर्माणप्रयोजनमभिहितं भविष्यत्पुराणे गृहस्थस्य क्रियाः सर्वा न सि
ध्यंति गृहं विना यतस्तस्माद्गृहारंभप्रवेशसमयौ ब्रुवे गृहं स्वसत्ताकं न सिद्ध्यंति निष्फला भवंतीत्यर्थः एतद
पि स्पष्टमभिहितं तत्रैव परगेहे कृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः निष्फलाः स्युर्यतस्तासां भूमीशः फल
मश्नुते इत्येतत्सर्वं मनस्यालोच्य गृहारंभप्रकरणं विवक्षुर्ग्रंथकृद्ग्रामपुरादिस्थानेषु स्वस्य शुभमशुभं वा ला
भमलाभं वा द्वारनिवेशनं च शार्दूलविक्रीडितेनाह यद्भं द्व्यंकसुतेशदिग्मितमसौ ग्रामः शुभो नामभात्स्वंव
र्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितं काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकाः सोऽर्थदोऽथ द्वारं द्विज
वैश्यशूद्रनृपराशीनां हितं पूर्वतः ग्रामः स्वस्य शुभोऽशुभो वेति तावच्चिंत्यते व्यवहारप्रसिद्धं यन्नाम नीलकंठ
इत्यादिकं तस्यावकहडचक्रानुसारेण यद्भं अश्विन्यादिकं नक्षत्रं ततो यद्वृश्चिकादिकं भं राशिः स्यात्तन्नामभमेवं
यस्मिन्ग्रामे नगरे वा वस्तुमिच्छति तस्य च रामद्विरित्यादिकं यन्नाम तस्माज्ज्ञातो यो राशिर्मीनादिस्तद्ग्रामभं एवं ना
मद्वयं ज्ञात्वा नामभात्पुरुषनामराशेर्ग्रामकाष्ठा यद्भं यस्य ग्रामस्य भं राशिः स चेद्द्वितीयो नवमः पंचम एकादशसं
ख्या दशमश्च स्यात्तदासौ ग्रामः स्वस्य फलदाता स्यात् अन्यथा न भवतीत्यर्थः यथा नीलकंठस्य वृश्चिकराशितः
पंचमो मीनराशिरतः चरणाद्रिवासयोग्यः सन् शुभफलदो न वाराणस्यादिः उक्तं च मुहूर्तमार्तंडे नामर्क्षाद्द्विसु
तांक ५ दिग्भव ९ ११ गतो ग्रामः शुभोऽन्योऽन्यथेति अत्र काकिण्यादौ नामराशिरेव ग्राह्यः उक्तं च काकिण्यां वर्गे राम० २
शुद्धौ च वादे द्यूते स्वरोदये मंत्रे पुनर्भूवरणे नामराशेः प्रधानतेति अथ ग्रामात्मनोरुत्तमर्णत्वमधमर्णत्वं चाह

वास्तुप्रकरण १५

व प्रश्नतेयद्यपि शास्त्रदृष्टं वाङ्मलस्य तथाप्यर्थस्य निःसंदेहोपनिबंधादतीव लाघवमस्तीत्यस्मिन्योगे महान्गुणः अर्थो
धादिनक्षत्राणां फलान्यप्युक्तं दशाह विनष्टार्थस्य लाभो धैर्यशीघ्रं मे देयप्रयत्नतः स्याद्दूरे श्रवणं मध्ये कृत्यामीनस
लोचने अंधनक्षत्रेषु विनष्टेषु अपहृतस्यार्थस्य शीघ्रं लाभः प्राप्तिर्भवति मंदाक्षनक्षत्रेषु विनष्टार्थस्य प्रयत्नेन ला
भो भवति मध्ये मध्याक्षनक्षत्रेषु विनष्टार्थस्य दूरे स्वनगरादतीवदूरे भूभागे श्रवणं तदीयं द्रव्यमस्तुकेन हृतमस्तु का
स्मिन्नस्थले तिष्ठतीति लोकश्रुतिर्भवति लब्धिस्तु नास्त्येव सुलोचननक्षत्रेषु कृत्याप्ती न श्रवणमपि न लब्धि र
पि नेत्यर्थः उक्तं च रत्नमालायां लाभोंऽधमे निकट एव हृतस्य चौरैर्द्रव्यस्य लब्धिरिह केरमे प्रयत्नात् दूरे श्रुति
श्चिपिटभेषु कथंचिदेव न प्राप्तिरस्त विलोचनभे कदाचिदिति केकरमे मंदाक्षनक्षत्रे चिपिटभे मध्यनक्षत्रे अथ
धनप्रयोगे निषिद्धनक्षत्राण्यनुष्टुभाह तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यं दत्तं निवेशितं प्रयुक्तं च विनष्टं च विष्टिपाते च ना
प्यते तीक्ष्णमिश्रध्रुवोग्रसंज्ञकैर्नक्षत्रैर्यद्द्रव्यं स्ववर्णादिदत्तं नत्वच्छसत्ताया परित्यागेन तद्दत्तमित्युच्यते निवेशितं स्वगृह
समीपे प्रत्ययार्थं स्थापितं प्रयुक्तं कालांतरवृत्तिषु प्रवृत्तेर्ऋणमणाधमर्णव्यवहारेणकस्मैचिद्दत्तं विनष्टं चौरादि
नाहृतं स्वयमेव वा क्वचित्पतितं तद्द्रव्यं निश्चयेन कदाचिदपि नाप्यते तथा विष्ट्यां भद्रायां पाते व्यतीपाते महापाते वा
दत्तं द्रव्यं न प्राप्यते चकाराद्ग्रहणेपि न देयमिति व्याख्येयं वसिष्ठवाक्यस्वरसात् उक्तं च वसिष्ठेन ध्रुवोग्रसाधारण
दारुणर्क्षे निहितमर्थं त्वथवा प्रनष्टं चौरैर्हृतं त्वथ उपप्लवे वा विष्टौ च पाते च न लभ्यतेऽनत् उपप्लवे ग्रहणे यत्
केचिद्व्याकुर्वंति निश्चयेन चौरहृतस्य द्रव्यस्य प्राप्त्यप्राप्तिविचारोंऽधकादिनक्षत्रैरेव लाभोंऽधमे निकट एव हृत
स्य चौरैरित्युक्तत्वात् चौरानिर्णये त्वनेनैव विचारः तच्चिंत्यं वसिष्ठवाक्येपि चौरहृतमिति मात्रा चौरपदोपादानात्
न केनापि विचारः कर्तव्य इति युक्तमुत्पश्यामः एवं चौरानिर्णयेपि स्वेच्छया विचारः तत्रोभयैक्ये प्राप्त्यप्राप्तिनिश्चय
एव उभयैक्याभावेतु प्रयत्नेनेति अथ धनस्याशायधनं कृत्या रंभयोर्मुहूर्तो शार्दूलविक्रीडितेनाह मित्रार्कध्रुववास

मु॰दी॰
न॰प्र॰
९

वांबुपमखातोयांत्यपुष्येंदुभिः पापैर्हीनबलैस्तनौ खरगौ रौद्रे वाथ गौ खे विधौ आप्ये सर्वजलाशयस्य खननं व्यंभोम
ध्यैः संइभैः नैर्नृत्यं हिबुके शुभैस्तनुग्रहे इन्द्रेज्यराशौ शुभं मित्रेज्याधा अर्कौ हस्तः ध्रुवे रोहिण्युत्तरात्रयं च वासवं धनिष्ठा
श्रुतपःशततारका मघा तोयं पूर्वाषाढा अंत्यं रेवती पु[illegible]ः इंदुर्मृगः एतैर्नक्षत्रैः सद्योदशभिः सर्वेषां जलाशयानां
वापीकूपतडागनाम्नो तोयाधाराणां खननं शुभम् उक्तं व्यवहारतत्त्वे आप्यांबुपांत्यपितृमित्रवसूत्तरार्कवें
द्वीज्यभेषु खननं सलिलाश्रयाणामिति अथ जलाशयखनने लग्नविचारः पापैः पापग्रहैर्बलरहितैः सद्भिः तनौ
लग्ने खरगौ रौद्रे हस्यनौत्तेषु ये स्थिते सतीत्यर्थः लग्नात् खेदशमस्थाने आप्ये जलचरराशौ विधौ सति जलाशयख
ननं हितं उक्तं च रत्नमालायां लग्ने ज्ञे विज्ञेष्ये वाडबलैः स्युः क्रूरैः शुक्रे चापि मेषूरणस्थे आप्ये चंद्रे सर्वतोयाश्रया
णामारंभाः स्युः सिद्धये निर्विकल्पं कश्यपेनाप्युक्तं गुरौ ज्ञे वा लग्नगते शुक्रे कर्मगते विधौ आप्यभे जलका
र्याणामारंभः सिद्धिदः स्मृतः इति दीपिकायां तु विशेषः पुष्यामित्रकरोत्तरस्व वरुणब्रह्मांबुपित्र्येंदुभिः शास्तेर्के
शुभवारयोगतिथिषु क्रूरेषु वीर्यैषु च ॥ पुष्टे रोज्जलराशिगे दशमगे शुक्रे शुभांशोदये प्रारंभः सलिलाशयस्य शुभदो
जीवेंदुपुत्रोदये ग्रंथेषु तु वापीकूपतडागानामाकृतिभेदात्प्रत्येकं भिन्नानि नक्षत्राण्युक्तानि तत्र वापीकूपखननमा
ह उरहोऽस्य यः स्वात्यश्विपुष्यहस्तेषु सर्वदा च पुनर्वसौ रेवत्यां वारुणे चैव वापीकर्म प्रशस्यते कूपारंभमाह श्री
पतिः हस्तः पुष्या वासवं वारुणं च मैत्रं पित्र्यं त्रीणि चैवोत्तराणि प्राजापत्यं चापि नक्षत्रमाहुः कूपारंभं श्रेष्ठमार्यास्तु
नीद्राः तडागारंभमाह वसिष्ठः मैत्रेंदुपौष्णोत्तररोहिणीषु देवेज्यवारीश्वरवारिभेषु प्रारंभणं सर्वजलाशयानां
कार्यमिति इंद्राकवारलग्ने अत्र वापीकूपनक्षत्राणां पार्थक्ये नाभिधानात् तडागारंभार्थमिदं वचनमवसीयते बहुव
चनमाश्रयाभिप्रायेण सर्वशोभापादानेच्छेः परिहरणार्थं तत्र कूपतडागतद्भेदेषु सदृशानक्षत्रत्यागाद्वशिष्टानामे
लने त्रयोदशनक्षत्राणि भवंति तत्र संक्षेपकामेन व्यवहारतत्त्वकर्त्रा सर्वजलाशयानामारंभे सामान्येन जलाशयख राम॰ ९

साधर्म्यादेतानि त्रयोदश भान्युक्तानि तान्येव ग्रंथकृतोक्तानि तत्र वापीकूपतडागानां भेदो लोकप्रसिद्ध एव यत्तु
न वेश्मशिष्टे ॥ प्राशांकतोयेशकरार्यमित्रध्रुवांबुपित्र्यैव सुहस्तवेनीषु उद्यानवाप्यादितडागकूपकार्याणि सिद्ध्यं
ति जलं ध्रुवं स्यात् इति तज्जीर्णोद्धारविषयं प्रागुक्तवाक्यं प्रारंभणोपादानात् नूतनखननविषयमिति पुनरुक्तिप
रिहारः अथ नृत्यारंभः तैः प्रागुक्तैर्नक्षत्रैर्व्योमौमघैः पूर्वाषाढामघारहितैः सेंद्रभैर्ज्येष्ठासहितैः ॥ मित्रार्कध्रुव
वासवांबुपौष्णपुष्यैः ज्येष्ठानक्षत्रैः नृत्यं शुभं नृत्यारंभः शुभ इत्यर्थः नृत्यं नर्तनं यदाह वसिष्ठः ॥ तिष्योत्तरामित्र
गुरुप्रविष्टाहस्तेंद्रवारीश्वरपौष्णभेषु संगीतनृत्यादिसमस्तकर्म कार्यं विधौ माकेज्यवासरेषु श्रीपतिरपि हस्तः
पुष्या वासवं चानुराधा ज्येष्ठं पौष्णं वासवं चोत्तरास्त्र पूर्वाचार्यैः कीर्तिताः चंद्रवती नृत्यारंभे शोभनो यं भवर्गः अथ
लग्नशुद्धिः तत्र हिबुके लग्नाच्चतुर्थस्थाने स्थितैः शुभग्रहैः चतुर्थस्थैः वीक्षिते सति नृत्यारंभः यदाह कश्यपः लग्न
संस्थे बुधे चंद्रे बुधराशौ नवीक्षिते शुभग्रहैः चतुर्थस्थैर्नृत्यारंभः प्रशस्यते अत एव रत्नमालायामपि बुधे विल
ग्ने शशिनि त्रराशौ गुरुवीक्षिते हिबुकस्थैः शुभैर्नृत्यप्रारंभः सद्भिरिष्यते इत्यत्र पद्ये एवमेव व्याख्येयं अथ सेवकस्य
स्वामिसेवायां मुहूर्तं शालिन्याह क्षिप्रे मैत्रे विक्षितार्के ज्यवारे सौम्ये लग्ने केंद्रे ऊज्ञे वा खलाभे योनेर्मैत्र्यां राशिपाश्चा
पि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन क्षिप्रे मैत्रे अश्विनीपुष्यहस्तचित्रानुराधामृगरेवतीषु नक्षत्रेषु सितार्केज्य
वारे बुधशुक्रसूर्यगुरुवासरे तथा सौम्यग्रहे लग्नसंस्थे सति अर्के सूर्ये वा गुरौ वा ऊज्ञे भौमे खलाभे दशमैकादश
स्थे सति सेवकेन भृत्येन स्वामिनो राजादेः सेवा कार्या राजादिदर्शनं प्रागुक्तं वेतनग्रहणं कार्यं अंगीकाररूपा तु सेवा
स्मिन्मुहूर्ते कार्या तत्रापि स्वामिसेवकयोः योनिमैत्र्यां सत्यां च पुनः राशिपौ स्वामिसेवकयोर्यौ जन्मराशी तयोर्या
वधिपौ तयोरपि मैत्र्यां प्रीतौ सत्यां कार्या उक्तं च श्रीपतिना शुभे विलग्ने दशमायगे वा कुजे वा थ वशेन योनेः विद्याय
धाभ्यासरतेन कार्यः समाश्रयः स्वामिनि सेवकेन कश्यपोपि दशमैकादशे सूर्ये ऊजे वा शुभलग्नके विद्याबुधा

च

मु·टी·
न·प्र·
९

ध्यासयुक्तासेवाकर्मापिसिद्ध्यति राशिमैत्रीसाहित्यंतु वश्यर्क्षगंस्त्रीगणमिमेंद्रसिंह मोत्वाखरंशत्रवरत्नवानरंच गोव्याघ्रम
श्वोत्तमममाहिषंचवैरंस्वनाथीर्योपधत्यधोश्वेति वसिष्ठोक्तिमंगीकृत्य तुल्यन्यायत्वादत्राप्युक्तंग्रंथकृता योनिमैत्रीरा
शिमैत्रीचविवाहप्रकरणे॥ अश्विन्यंबुपयोहयोरिति मित्राणियुग्मगणेरिति चवक्ष्यति अथद्रव्यप्रयोगऋणग्रहणमु
हूर्तेशार्दूलविक्रीडितेनाह॥ स्वात्यादित्यमृदुद्विदैवगुरुभे कर्णत्रयाश्वेचरे लग्नेधर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगः
शुभः॥ नारेग्राह्यमृणंतुसंक्रमदिने वृद्धौकरेर्केह्नियत्तद्वंशेषुभवेदृणंनचबुधे देयंकदाचिद्धनं स्वातीपुनर्वसुचित्रा
नुराधामृगरेवतीविशाखापुष्यश्रवणधनिष्ठाशततारकाश्विनीषु एकादशनक्षत्रेषु द्रव्यप्रयोगःशुभः द्रव्यंपरस्मैऋ
णत्वेनदेयं यदाह श्रीपराक्रमः॥ मृदुपुष्याश्विनीचैवविशाखाश्रवणत्रयं पुनर्वसौचशंसंतिधनादिनिधिवर्तनं व
र्तनं ऋणादिरूपेणदानं मिश्रनक्षत्रत्वाद्विशाखानिषेधेप्राप्ते ऋणदानेएवनिषेध इतिशेषः हस्तनक्षत्रादौतुनिषि
द्धमेव अथलग्नेचरे मेषकर्कतुलामकराणामन्यतमे धर्मेनवमं सुतःपंचमं अष्टशब्देनलक्षणयाष्टमस्थान
मुच्यते तेषांशुद्धिःनवमपंचमस्थानयोः शुभग्रहसत्वंक्रूरग्रहराहित्यंचाष्टमेतुसर्वग्रहराहित्यमित्यर्थः एवंरूपयाशु
द्ध्यासहितेलग्नेऋणंदेयं उक्तंचरत्नमालायां॥ शुद्धेषुधर्मात्मजनैधनेषुचरेविलग्नेद्रविणप्रयोगइति अथारेमंगल
वारेऋणंनग्राह्यं तदुक्तंज्योतिःप्रकाशे॥ ऋणंभौमेनगृह्णीयान्नदेयंबुधवासरे ऋणच्छेदंतुकुर्यात्संचयंसोमनंदने
अथतुविशेषे संक्रमःसंक्रांतिःतद्दिवसे वृद्धौवृद्धियोगे करेर्के हस्तनक्षत्रसहितेरविवारे हस्तार्केइतियावत्तत्रापि
ऋणंनग्राह्यंइतिप्रत्येकंसंबंधः ननुकुतोनग्राह्यमित्यतआह यद्धिति यद्यस्मादेतेः तदृणंतद्वंशेषुऋणगृहीत
कुलेषुभवेत्तदृणं तत्पुत्रपौत्रादिभिरपिपरिहर्तुमशक्यमित्यर्थः अर्थादेषुभौमसंक्रांत्यादिदिनेषुऋणमवश्यं
परिहर्तव्यमितिनिष्कृष्टोर्थः हस्तेर्कवारेसंक्रांतौयदृणंस्यात्कुलेषुतत् वृद्धियोगेतथाज्ञेयं ऋणच्छेदंतुकारयेत
ज्योतिष्प्रकाशकारोक्तेः अथबुधेबुधवारेकदाचिदप्यृणंनदेयं नदेयंबुधवासरइत्यत्रनैवोक्तत्वात् अथहलप्रवाह

राम·
९

मुहूर्तं शार्दूलविक्रीडितेनाह मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्कं शनिं पापैर्हीनबले विधौ जलगृहे शुक्रे विधौ
मांसले लग्ने देवगुरौ हलप्रवहणं शस्तं न सिंहे घटे कर्कौडैणाद्वटे तनौ द्वयकरं रिक्तासु षष्ठ्यां तथा मूलविशाखा
मघाभिस्वरध्रुवमृदुक्षिप्रैश्च एकोनविंशतिनक्षत्रैर्हलप्रवहणं हलप्रवृत्तिं अर्थात् य [illegible]॥ मृदुध्रुवक्षि
प्रचरविशाखापित्र्यभेषु च हलप्रवाहं प्रथमं विदध्यान्मूलभे हृष्टैः विशेषमाह श्रीपतिः मृदुध्रुवक्षिप्रचरेषु
मूले मघाविशाखासहितेषु भेषु हलप्रवाहं प्रथमं विदध्यान्नीरोगमुष्कान्वितसौरभेयैः नीरोगाः पीडारहिताः
ये मुष्काः वृषणास्तैरन्विता ये सौरभेयास्तैर्विदध्यादित्यर्थः उक्तं चैतत् वृषाणां वृषणास्तु फलरूपा अतस्तादृशैर्वृ
षैः कृतं कर्षणं सफलं स्यात् चूर्णितवृषणैः वृषैः कृतं कर्षणं निष्फलमेव भवति अथार्कं सूर्यवारं शनिवारं विनान्य
त्का न्यवारेषु चंद्रमंगलबुधबृहस्पतिशुक्रवारेषु हलप्रवहणं शुभं दृष्टाश्विनानानाभिस्तनीयान्यनरस्यामिति
विनायोगे द्वितीया उक्तं च व्यवहारतत्त्वे पूर्वाद्वीशाग्निभेर्कयमयोरिक्तासु नेष्टा कृषिरिति अथ सामान्यतो
लग्नशुद्धिः तत्र पापग्रहे हीनबले निर्बले हतपलाशिने लग्ने विधौ चंद्रे शुक्रे मांसले बलिनि पुष्टे उदित इत्यर्थः त
त्र विधौ चंद्रे जलगृहे जलराशिस्थे सति देवगुरौ लग्नस्थे च सति हलप्रवहणं शुभं उक्तं च रत्नमालायां शशिनि स
लिलनिहिते थशीतगौ दुर्बलैरस्तितभौमभास्करैः आश्रिते शशिनि वारिजोदयं लग्नवर्तिनि गुरौ कृषिक्रिया कश्यपो
पि गुरौ लग्नगते शुक्रे बलिन्यापोदये विधौ शस्ता कृषिक्रिया तत्र दुर्बलैः क्रूरखेचरैः अथ विशेषतो लग्नशुद्धि
तत्र सिंहे घटे कुंभे कर्के अजे मेषे एणे मकरे धटे तुलायां एषु लग्नेषु कृषिकर्म न शस्तं यतः तद्द्वयकरं पीडाक
रं तथा रिक्तासु चतुर्थीनवमीचतुर्दशीषु षष्ठ्यां च द्वयकरं तथा शेषे तु कृतसमुच्चयार्थे स्तेनाष्टम्यामपि न शस्तं कृ
षिकर्म उक्तं च ज्योतिःसारसागरे मेषलग्ने पशून् हंति कर्कटे जलजं भयं सिंहे सस्यभयं ज्ञेयं तुलायां हलसंक्षयः म
करे सस्यनाशः स्यात् कुंभे चौरभवं भयं हंत्यष्टमी बलीवर्दान् नवमी सस्यघातिनी षष्ठी च कीटजननी पशून् हंति चतु
र्दशी न तत्र्यामपि इदमेव फलं ध्येयं अथ बीजोप्तिमुहूर्तं फलिचक्रं हलचक्राणि शार्दूलविक्रीडितेनाह एतेषु कृति

मु॰ टी॰
न॰ प्र॰
११

वरुणादिति विशाखोडु नि भौमं विना बीजोप्तिर्गदिता शुभा लघुभतोष्ट्राग्नीड्रुरामेंदवः एमेंऽग्नियमान्यसत्कुंभकराएषु मौ
हले कोज्झिताड्राह्यामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसत्संतिच ष्क्रानिः श्रवणः वारुणं शततारका अदितिः पुनर्वसुः
विशाखा प्रसिद्धा एतैरुडुभिर्नक्षत्रैर्नमूनेष्वेतेषु पूर्वोक्तनक्षत्रेषु मूलमघाध्रुवक्षिप्रधनिष्ठास्वातीषु पंचदशनक्षत्रेषु
बीजोप्तिर्बीजवापनं शुभं उक्तं च रत्नमालायां हस्ताश्विपुष्याद्रारोहिणीषु चित्रानुराधामृगरेवतीषु स्वातीधनि
ष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टफला प्रदिष्टा वसिष्ठेनाप्येतावंत्येव नक्षत्राण्युक्तानि धात्रद्वये कौणपपैत्रपुष्ये
हस्तत्रये श्रुतिरमैत्रभेषु पौष्णे धनिष्ठास्वथवाश्विनीषु बीजोप्तिरुत्कृष्टफलप्रदा स्यादिति कौणपो मूलं नारदेनाप्यु
क्तानि मृदुध्रुवक्षिप्रभेषु पित्र्यवायुवसूडुषु समूलभेषु बीजोप्तिरत्युत्कृष्टफलप्रदा कश्यपेनापि वसवाद्युक्त
नैऋत्यक्षिप्रध्रुवमृदूडुषु सीतास्थत्वाथ बीजोप्तिरिति व्यवहारस्तत्र उक्तत्वात् नेष्टा कृषिरित्यनेन नकारोऽत्रानु
वर्तते तेन बीजोप्तिर्नेष्टेत्यर्थः अत्र कालविशेषनिषेधमाह मार्तंडे रवौ रौद्रपादस्थे भूमेः संजायते रजः
तस्माद्दिनत्रयं तत्र बीजवापं परित्यजेत् इति अथ बीजोप्तौ फणिचक्रमुच्यते अगुभतो न विद्यते किरणा यस्यासा
वगुः यस्य स्वरूपाभावः तस्य ऋतः ताराः किरणाः नाद्दृशाग्रः राहुस्तस्य भं नक्षत्रं तस्मादित्यर्थः राहुधिष्ण्यतन
क्षत्रादष्टौ भानि असंत्यसमीचीनानि ततः त्रीणि शुभकराणि ततएकमशुभं ततः त्रीणि शुभानि ततोऽप्येकमशुभं
ततः त्रीणि शुभानि ततएकमशुभं ततः त्रीणि शुभानि ततः चत्वार्यशुभानि एवं बीजोप्तौ सप्तविंशतिनक्षत्राणां
शुभाशुभत्वमुक्तं उक्तं च नारदेन भवेद्भत्रितयं मूर्ध्नि धान्यनाशाय राहुभात् गले त्रयं कज्जलाय हृद्यष्टौ द्वादश चो
दरे निस्तुलत्वं लांगूले भवत्रष्टयमीरितं नाशो बहिः पंचके स्याद्बीजोप्ताविति चिंतयेत् इति राहुर्यस्मिन्नक्ष
त्रेऽस्ति तस्मान्नक्षत्रत्रयं मूर्ध्नि मस्तके स्याद्यं धान्यनाशकरं भवति ततः त्रयं गले स्याद्यं कज्जलायप्रयामिका
संपादकं स्यात् ततो द्वादशभानि बहिर्नक्षत्राहितानि उदरे स्याद्यानि तानि धान्यवृद्धौ स्युः ततो नक्षत्रचतुष्ट
यं पुच्छे निस्तुलत्वकरं स्यात् ततोऽवशिष्टं बहिर्नक्षत्रपंचकं धान्यनाशकरं स्यात् यथा राहुर्विशाखायाम

राम॰
११

वीजोप्तौफणि मस्तकं बहिः गलः त्रयं बहिः उदर उदरबहिः उदरपुच्छे
च क मेव
वि अ ड्रेपसूद्रउ अधशाप्ररे अमहरोष्ट आपुपुश्र मसूउहचिस्वा
बहिः बहिः

त्रि ततः सर्पाकृतिचक्रं लेख्यं रत्नमाला-
यामपि मूर्ध्नि त्रीणि गले त्रयं च उदरे धि-
ष्ण्यानि द्वादश पुच्छे च चतुष्टयं च बहि-
रतो भानां स्थितं पंचकं ॥ द्वे द्वे कण्ठलम-

त्रष्टद्विरधिकानि स्तंडुलत्वं क्रमात्स्युरीति प्रभवं भयं फणिभाद्बीजोप्तिकाले स्फुटमिति अत्र केचित् ॥ फणिभा-
त्सूर्येन त्तत्रादिति व्याचख्युस्तत्र युक्तिः सूर्यभाद्उरगः स्याप्यइति स्वरोदयवाक्यैकवाक्यभावात् ॥ तन्न ॥ नारद-
वाक्ये साद्याद्राद्रभादित्युक्तत्वात् राहुधिष्ण्यात्समारभ्य धिष्ण्यषट्कनिष्फलमिति कश्यपोक्तेश्च ॥ सूर्यभा-
द्उरगः स्याप्यइति तत्स्वरोदयवचनं बीजवापने लग्नशुद्धिमाह वसिष्ठः ॥ भवरिपुसहजोपपायैः त्रिकोणकेंद्रस्थि-
तैश्च शुभैः कथितेषु धिष्ण्येष्वपि शुभलग्ने बीजवापनं कार्यमिति अथ हलप्रवहणे चक्रमुच्यते हलइति ह-
ले हलचक्रे, कीर्तितान्सूर्यभुक्ताद्भानि त्रीण्यात्क्रमेण त्रीणि नक्षत्राणि अशुभफलानि ततोष्टभानि शु-
भफलदानि ततो नवभान्यसंति ततोष्टौ भानि संति यथा सूर्यस्थितार्द्रायां भुक्तं भं तद्गः ततआरभ्य त्री-
णि अशुभफलदानि ततो नवभान्यसंति ततःपुष्याश्लेषामघापूर्वाफल्गुन्युत्तराफाल्गुनीहस्तचित्रास्वातीनक्षत्रा-
णिष्टगार्द्रापुनर्वसुभान्यशुभानि ततःपुष्याश्लेषामघापूर्वाफल्गुन्युत्तराफाल्गुनीहस्तचित्रास्वातीनक्षत्रा-
णिशुभानि ततो विशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाभिजिच्छ्रवणधनिष्ठानक्षत्राण्यशुभानि
ततःशततारकापूर्वाभाद्रपदोत्तराभाद्रपदारेवत्यश्विनीभरणीकृत्तिकारोहिणीनक्षत्राणिशुभानि एवमष्टा-
ततःशततारकापूर्वाभाद्रपदोत्तराभाद्रपदारेवत्यश्विनीभरणीकृत्तिकारोहिणीनक्षत्राणि शुभान्येवमष्टा-
विंशतिभानि भवंति वराहवसिष्ठः अर्कगनागनसंख्यंभत्रितयं नेष्टमुभयतस्त्विष्टं षोडश [illegible] धिष्ण्यं न
वकं त्रिष्टमनिष्टं च लांगूले च क्रेइति अर्केणगतं भुक्तं अगतं भोग्यं संस्थमाक्रांतं एतद्भत्रितयं नेष्टं ततउ-
भयतःषोडशधिष्ण्यमिष्टं यथा सूर्यभुक्तमात् प्राग्क्रमेणान्यष्टौ शुभानि सूर्यभोग्यभादग्रे चाष्टौ भानि शुभा-
निस्युरित्यर्थः त्रिष्टमुर्वरितं मध्यगतं नक्षत्रनवकमनिष्टं एवमत्राप्यष्टाविंशतिभानि नारदोपि हलादौ

मु॰टी॰
न॰प्र॰
१२

षनाशायभत्रयं सूर्यभुक्तभात् अग्रेऋक्षत्रयं लक्ष्म्यै सौख्यं पार्श्वस्थपंचके शूलत्रयेपि नवकं मरणायान्यपंचकं श्रियै
पुच्छेत्रयं श्रेष्ठं स्याच्चक्रे लांगले शुभेऽइति अस्यार्थः हलप्रवर्तनसमये सूर्यभुक्तनक्षत्रादग्रे नक्षत्रत्रयं लक्ष्म्यै स्यात् तद
ग्रे पार्श्वनक्षत्रपंचकं सौख्याय स्यात् तदग्रे शूलत्रयगतं नक्षत्रनवकं मरणाय स्यात् तदग्रेन्यत्पार्श्वपंचकं श्रियै स्या
त् तदग्रे पुच्छगतं नक्षत्रत्रयं श्रेष्ठं शुभफलदमिति अनेनापि प्रकारेण मृगादीनि तान्येवाशुभशुभानि संभवंति
तत्र हलचक्रोक्तं तिलेख्यते कश्यपोपि त्रिषष्ट्स्त्रनवद्वेषु सप्तस्वर्कविमुक्तभात्
हानिवृद्धिकर्तृमृत्युर्लक्ष्मीप्राप्तिर्यथाक्रमादिति हलनक्षत्रोक्त्यनंतरं उक्तवान्
अस्यार्थः अर्कविमुक्तभात्त्रिषु भेषु हानिः ततोष्टसु भेषु वृद्धिः ततो नवसु भेषु क
र्तृनाशः ततः सप्तसु भेषु लक्ष्मीप्राप्तिरिति यथाक्रमं फलं ज्ञेयं अत्र सप्तविंशतिन
क्षत्रोक्तेरभिजिद्ग्रहणं नास्ति एवं बहुमुनिसंवादे सति इनप्रोज्झितर्क्षात्त्रिवह्नित्रीषुत्रीषु
त्रिशमाएय ३ ३ ५ ३ ५ ३ ३ शुभदाशुभभानि क्रमाल्लांगलाख्ये इति यदुक्तं केशवदैव
ज्ञेर्मुहूर्ततत्त्वे तच्चिंत्यं ऋषिवाक्यमूलाभावात् नन्वर्काक्रांतगतागतान्यनडुहां नाश
यभान्यग्नेर्वृद्धेर्भवंतीत्ययं तदत्र कथितं चक्रे शुभमलांगले इति श्रीपतिवाक्यालोचनेनोक्तं तथाहि अर्काक्रांतगतागत
तानि भान्यनडुहां वृषाणां नाशाय स्युः तदग्रेतो भत्रयं वृद्धौ ततः शूलत्रये धिष्ण्यानां नवकं लेख्यं कृषिकृद्विनाशाय स्यात् शू
लत्रयमध्यगते पंचके नक्षत्रदशकमित्यर्थः श्रियै स्यात् तानि पश्चादन्यत्रितयं नक्षत्रत्रयं
शुभं स्यात् एवं सति हलचक्रन्यासः अनेन प्रकारेण नप्रोज्झितर्क्षात् त्रीत्यादीनि
शुभाशुभानि भानि संभवंतीति चेत् तदेतदविचारितरमणीयं नह्ययं श्रीपतिवा
क्यशास्त्रार्थेऽव्याने किं तु मूलवाक्यादर्शनावबोधपरस्मरस्वाज्ञानप्रकाशकः शा
स्त्रार्थस्त्वयं अर्काक्रांतगतागतानि त्रीणि भानि वृषनाशकराणि स्युर्हलमध्यभाग

राम॰
१२

प्रांते ततस्त्रीणि दंडे हलदंडाधोभागे ततः पंचनक्षत्राण्यपास्याग्रिमाणि नवभानि शूलत्रये त्रिकं त्रिकं कृषिकृद्धानाय स्या
न्यानि नक्षत्रपंचनक्षत्रत्यागे को हेतुरित्यत आह तदंतरंगतइति तच्छूद्रेनेह लोर्ध्वदंडशूलोर्ध्वदंडान्युच्यंते तयोरंतरगा
ते मध्ये विद्यमाने पंचकं च पंचकं च पंचके श्रिये स्याद्ध्येनक्षत्रदशकमिति यावत् यस्मान्यङ्क्षितयं हलदंडोर्ध्वभागे शुभ
फलदं लेख्यं एवं सत्यृषिवाक्यैः सहास्यैकार्थता संपद्यते यत्तु महेश्वरः सूर्याधिष्ठितभाद्विवेदविषयांकाशाशाविश्वा
केकैस्तुल्यान्येषु गतानि भानि मुनिभिः प्रोक्तानि शस्तानि च आद्ये लांगलयोजने इत्युवाच तदपि चिंत्यमेव यत्त्वेवमे
वटोडशानंदे कृत्वाक्रांते त्यादि पद्यव्याख्यानं पितृचरणकृतं तदपि स्पष्टार्थ वसिष्ठाद्यृषिवाक्यविशेषादर्शने कृतं प्रति
भाति विशेषवाक्यादर्शने तु सामान्यवाक्यस्य विशेषणे पर्यवसानमित्यलं अतिप्रसक्तानुप्रसक्तेन अत्र हलच
क्रे बीजोप्तिचक्रे वा विहितनक्षत्राणि मिष्टफलदस्थानपाते सत्येवं परिग्रहो न्याय्यः अन्यथा त्वेत्यागः निषिद्धानां त
सर्वथैव त्यागइति निष्कृष्टोर्थः अथ शिरामोक्षविरेकादिधर्मक्रियामुहूर्तं च शार्दूलविक्रीडितेनाह त्वाष्ट्रान्मित्रक
भाहूयेंदुपलघुश्रोत्रे शिरामोक्षणं भौमेर्केज्यदिने विरेकवमनाद्यं स्याद्बुधार्कीविना मित्रद्विप्रचरध्रुवे रविशुभाहे
लग्नवर्गे विदोज्जीवस्थापितनोगुरौ निगदिता धर्मक्रिया तद्वेला त्वाष्ट्राद्वये चित्रास्वात्योः मित्रद्वये अनुराधाज्येष्ठे कभा
द्वये रोहिणीमृगे अंबुपः शततारका लघून्यश्विनीपुष्यहस्ताभिजितः श्रोत्रं श्रवणः एषु नक्षत्रेषु तथा भौमार्केज्य
दिने मंगलरविगुरुवारेषु शिरामोक्षणं रुधिरवाहिनी नाडी शिरा तस्य मोक्षणं सूक्ष्मशस्त्राघातेन शिरामोक्षणं
सूक्ष्मशस्त्राघातेन कुर्यादित्यर्थः उक्तं च ज्योतिःसारसागरे चित्राद्युगे विधियुगे मित्रयुगे लघुध्रुवाह्वेण विहिता वस्ति वि
रेचनवेधाः शुभदिनतिथिचंद्रलग्नेषु इतिवारेसंमत्यभावः अथ बुधार्कीबुधप्राने स्वरावपास्यान्यवारेषु पूर्वोक्तन
क्षत्रेषु च विरेकवमनाद्यं औषधेन सम्यक्प्रवृत्तिर्विरेकः वमनं प्रसिद्धमेव तदाद्यं कर्मकार्यं उक्तं च अथ मित्रद्विप्रच
रध्रुवे एषु त्रयोदशनक्षत्रेषु तथा रवौ रविवारेषु भाहे चंद्रबुधगुरुशुक्रवारेषु धर्मक्रियाकोटिहोमरुद्रानुष्ठानादिना
कार्या उक्तं च दीपिकायां शुभग्रहार्कवारेषु मृदुक्षिप्रध्रुवोडुषु शुभराशिविलग्नेषु शुभं शांतिकपौष्टिकमिति शांति

कंधर्मकृत्यं कोटिहोमाद्यं अथ विशेषबुधस्य जीवस्य गुरोर्लग्नवर्गे लग्नेऽस्मिन्कस्मिंश्चिल्लग्ने गुरुबुधयोः षड्वर्गे सति
तनौ लग्ने गुरौ च सति कर्तुःसुगुरुबले सति धर्मक्रिया हिता निगदिता उक्तं च रत्नमालायां हिबुके केंद्रे गुरौ लग्ने धर्मारंभो
ऽखिलो दिने अन्यच्च श्रुतिस्मृतिपुराणादिप्रोक्तानां धर्मकर्मणां गुरुज्ञलग्नवर्गेषु प्रारंभः तद्बले सतीति षड्वर्गज्ञानं विवाह
प्रकरणे ग्रंथकर्तैव वक्ष्यति अथ धान्यच्छेदमुहूर्तं वसंततिलकयाह तीक्ष्णाजपादकरवह्निवसुश्रुतीड्स्वा
तीमघोत्तरजलांतकतक्षपुष्ये मंदाररिक्तरहिते दिवसेऽतिशस्ता धान्यस्थितानिगदिता स्थिरभे विलग्ने तीक्ष्णसंज्ञा
नि मूलज्येष्ठार्द्राश्लेषाः अजपादः पूर्वाभाद्रपदा अन्यानि प्रसिद्धानि तक्षा चित्रा पुष्यश्च एतेषु एकोनविंशतिनक्षत्रेषु
तथा मंदः शनिः आरो मंगलः रिक्ताः तिथयः प्रसिद्धाः एतेषां समाहारो मंदाररिक्तं तेन रहिते विहीने दिवसे तथा स्थि
रभे स्थिरराशौ लग्ने सति धान्यच्छिदा छेदनं कार्यमित्यर्थः यदाह राजमार्तंडः रौद्रे पित्र्ये तथा सौम्ये हस्ते पुष्ये निलेत
था सस्यच्छेदं प्रशंसंति मूलश्रवणवासवे दीपिकायां तु याम्याजपादहिधनानलतोयशक्र चित्रोत्तरोडुषु उत्तरार्क
जवारवर्ज्ये प्राप्ते द्वियोगकरणेषु तिथावरिक्ते धान्यच्छिदा स्थिरनरस्वगृहोदयेषु अहिरश्लेषा तु पूर्ववाक्ये नव नक्षत्राणि
क्तानि द्वितीयवाक्ये एकादशभानि एवं विंशतिभानि ज्ञातानि वाक्यद्वयेन तु धनिष्ठापादानां तु त्यागे एकोनविंशतिभान्ये
व संपद्यंते तानि वचनद्वयप्रामाण्यात् पृथक् ग्रंथे निबद्धानि व्यवहारोच्चये तु वारा उक्ता धान्यानां लवनं कुर्याद्रौष्णु
क्रे च सर्वदेति अथ कणमर्दनसस्यरोपणमुहूर्तौ वसंततिलकयाह भाग्यार्यमश्रुतिमघेंद्रविधातृमूलमैत्रांत्यभे
षु गदितं कणमर्दनं सत् द्वीशाजपान्निर्ऋतिधातृशतार्यमर्क्षे सस्यस्य रोपणमिहार्किकुजौ विना सत् भाग्यं पूर्वाफल्गु
नी अर्यमोत्तरफल्गुनी विधाता रोहिणी अन्यान्यतिप्रसिद्धानि एषु नवस्वृक्षेषु कणखलकादयस्तेषां मर्दनं यष्टिद्या
तादिना निस्तुषीकरणं तत्समीचीनमित्यर्थः उक्तं च व्यवहारोच्चये फल्गुन्योः श्रवणे चैव मघामूलात्तथा मता अनू
राधात्वाष्ट्रज्येष्ठा रेवती धान्यमर्दने केवले सिंहलग्ने वा तु दूदये अथवा पुनः एवमत्राष्टौ भान्युक्तानि रोहिण्यां मर्दनं कुर्या
दुर्गण प्रवेशयेत् अत्र कर्मविशेषे तु राजमार्तंडोक्तेः रोहिण्युपाराणं च तद्वाक्यमिदं हस्ते च वापयेद्बीजं संग्रहं वेश्मदेव

ते रोहिण्यां मरणं कुर्यादुत्तरासु प्रवेशयेदिति अत्र कर्मविशेषेण एकैकस्यैव नक्षत्रस्योपादानमिति मुख्यतासूचनार्थं न
न्वितरनिषेधार्थं कुतः वाक्यांतराणां वैयर्थ्यापत्तेरिति अथ ह्रीशं विशाखा अजपात् पूर्वाभाद्रपदा निर्ऋतिर्मूलं धाता
रोहिणी शतं शततारका अर्यमा उत्तराफल्गुनी एषु षड्भेषु सस्यस्य धान्यस्यारोपणं पूर्वं वापितस्य स्थलात् स्थलांत
रे आरोपणं सत्कुंभे उद्वहसस्यारोहरो आर्कि कुजौ शनिभौमौ विनान्यस्य कालुप्य वारेषु सूर्यचंद्रबुधगुरुशुक्रवारेषु
कार्यं सस्यारोपणं उक्तं च रत्नमालायां उ पूर्वाभाद्रपदा मूल रोहिण्युत्तरफाल्गुनी विशाखा वारुणं चैव धान्यानां रो
पणे वरा इति अथ धान्यस्थितिधान्यवृद्ध्योर्मुहूर्तो वसंततिलकयाह मिश्राग्रहे द्रभुजगेंद्रविमिश्रभेषु कर्कांग
तौलिरहिते च तनौ शुभाहे धान्यस्थितिः शुभकरी गदिता ध्रुवेज्यह्रीशेंद्रदस्रचरभेषु च धान्यवृद्धिः मिश्रं विशाखा
कृत्तिके उग्रं पूर्वात्रयं भरणी मघाः रौद्रमार्द्रा भुजगोऽश्लेषा इंद्रो ज्येष्ठा एभ्यो दृग्भ्यो विभिन्नेष्वन्येषु सप्तदशसु भेषु
नक्षत्रेषु तथा कर्कः अजो मेषः तौलिस्तुला एतैर्विहीने तनौ मकरस्थिरद्विस्वभावराशिलग्नेषु तथा शुभाहे चं
द्रबुधगुरुशुक्रवारे धान्यानां स्थितिरेकराशीकरणं नामसा निगदिता उक्तं च दीपिकायां याम्याग्निरुद्राहिविशाख
पूर्वामाहेंद्रपित्र्येतरभैः शुभाहे धान्यादिसंस्थापनमेषु शस्तं स्थिरद्व्यंगगृहोदयेषु अथ ध्रुवाणि प्रसिद्धानि
इज्यः पुष्यः ह्रीशो विशाखा इंद्रो ज्येष्ठा दस्रोऽश्विनी चराणि प्रसिद्धानि एषु धान्यवृद्धिः तं मह्यमेतावत् धान्यं देहि न तो
ह मासद्वये नन्तुभ्यं तद्धान्यं सपादं सार्धं वा दास्यामीत्येवं रूपा सा निगदिता उक्तं च दीपिकायां श्रवणत्रयं विशाखा
ध्रुवपुष्यपुनर्वसूनि वायुषु अश्विन्यथ च ज्येष्ठा निधनधान्यादिवर्धने शस्ताः अथ शांतिकपौष्टिकादिक्षात्येषु
मुहूर्तं वसंततिलकयाह क्षिप्रध्रुवांत्यचरमित्रमघासु शस्तं स्यात् शांतिकं सह सपौष्टिकमंगलाभ्यां खेर्के विधौ
सुखगते तनुगे गुरौ नो मौन्यादिदुष्टसमयेपि शुभं निमित्ते २४ क्षिप्रादीनि मघांतानि प्रसिद्धानि तेषु पौष्टिकं पुष्टि
कामकं मंगलं विनायकशांत्यादि शांतिकं दुष्टफलस्य मूलनक्षत्राद्युत्पत्तेः शांत्यादि एतानि कर्माणि कार्याणि उ
क्तं च दीपिकायां मित्रादित्यमघांत्यशतभिषक्स्वातीविरिंचाच्युतस्वर्गाधीश्वरपूज्यपौष्णरविष्णुस्फीते तु वार

मु.दी.
न.प्र.
१४

त्विषि रिक्तां पर्व विहाय सौम्यदिवसे शस्तं नृणां भूतये सर्वं शांतिकपौष्टिकं निगदितं गर्गादिभिर्निश्चयात् अथ
तन्नशुद्धिः तत्रार्के सूर्ये खे दशमस्थे सति विधौ चंद्रे सुखगते चतुर्थस्थे गुरौ तनुगे लग्नस्थे सति शांत्यादिकार्यं उक्तं च र
त्नमालायां पूर्णे चंद्रे वेश्मगेर्के वरस्थे लग्ने जीवे वाक्पते वीसरेव स्त्रीमंत्या पुष्टाणि कार्याणि कार्याणीति तत्कांति
कादि मौढ्ये गुरुशुक्रयोरस्तास्तदादिके बाल्यवार्द्धक सिंहस्थगुर्वादिरूपे दुष्टसमयेपि शुभदं तथा निमित्ते केत्वाघ
त्यातदर्शने सति शुभदं उक्तं च दीपिकायां शांतिकर्माणि ऊर्वीन रोगे नैमित्तिके तथा गुरुभार्गवमौढ्येपि दोषस्तत्र नवि
यते युक्तं चैतत् यतोस्तीदं शांति नैमित्तिकं अनिमित्तकृता शांतिर्निमित्ताद्योपजायते इति स्मरणात् तत्र निमित्ते
रोगरूपे केत्वाद्युत्पातदर्शने च भवति नैमित्तिकं न च बहुदिनव्यापके गुरुशुक्रास्तादिदोषे पूर्ववच्छुभं विधेयं यतोज
न्मांतरीयदुरदृष्टसूचकमिदं निमित्तमुत्पन्नं तस्य शांत्या निरासाद्शुभादृष्टस्यापि निरासः बहुप्रायेनिदूषणे काले
क्रियमाणं शांतिकं किंचिद्दुरदृष्टशमकं यद्यपि भवति तथापि तावद्भिर्दिनैर्दुरदृष्टस्य प्राबल्याद्दुःखप्राप्तिः यथा
ल्पाप्यग्निरल्पेनैव जलेन शांतो भवति तथा सकलनगरदाहको मनुष्यैर्बहुभिर्युगपद्गृहीतजलपूर्णघटैरेकदे
शानिर्वापितोपि सकलोग्निर्न निर्वाप्यते इत्यतः सर्वथा मौढ्यादिदोषं विनैव यथाकथंचित्कथितप्रकारेण दिनशु
द्धिमंगीकृत्य शांतिकाद्यवश्यं विधेयं अथ होमाहुतिशुद्धे मुहूर्तमनुष्टुप्रोक्तं इत्याह सूर्यभात्रित्रिके चंद्रे सूर्यवि
कुक्रपंगवः चंद्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले सूर्यः स्पष्टमानेन यत्र नक्षत्रेस्ति तस्मात्रिके आदितो भत्र
यमेकं त्रिकमेवं सप्तविंशतिभेषु नवत्रिकानि भवंति तत्र सूर्ययुतनक्षत्रादारभ्य प्रथमद्वितीयादित्रिकस्थे चंद्रे सति क्रमा
देषां मुखे आहुतिः पतति यथा प्रथमत्रिके सूर्यस्य ततो बुधस्य ततः शुक्रस्य ततः पंगोः शनेः ततः चंद्रस्य ततआ
रस्य भौमस्य ततः इज्यस्य गुरोः ततो गोः राहोः ततः शिखिनः केतोः एवं सति यद्दिने पापग्रहमुखे होमाहुतिः पतति तन्ने
ष्टा न्शुभदा अर्थादेव शुभग्रहमुखे आहुतिपातः शुभफलदः उक्तं च कश्यपेन नक्षत्रे यत्र भानुः स्यात्तदाद्यत्रित्रिकं राम.
त्रिकं सूर्यज्ञशुक्रसौरीणां सूर्ये भौम बृहस्पतेः राहोः केतोश्च निर्दिष्टं वदनादौ शुभाशुभं सौख्यार्थनाशः सूर्यस्या १५

दिं दौ जलमयी कृषिः भौमेग्निदाहो राष्ट्रस्य बुधे वृद्धिविवर्धनं गुरौ लक्ष्मीरभीष्टस्य राज्यं सौभाग्यं नंदितं भार्गवे कार्यसंप
त्तिः शनैश्चरे हि कामशृष्मिकाभवेत् शनेर्मुखे कृते ताज्ञे यो राज्यभंगोधनक्षयः राहोर्मुखे कृते तो हानिः सर्वस्य परिकीर्तिता केतो
र्मुखे कृते तो ह्येयं दुर्भिक्षं देशविप्लवं मरणं प्राणिनां चैव राज्यभंगं तथैव च तस्मात्सर्वप्रयत्नेन ग्रहनक्षत्रसंगमे दृष्टेन कुं
धाद्भवनं इत्यादि भागवादत्र इति तदयमत्र निष्कृष्टार्थः सूर्याक्रांतनक्षत्राच्चंद्रनक्षत्रस्य त्रिकत्रिकगणनया पापमुखे
आहुर्निंद्या शुभग्रहमुखे समीचीना अत एव पितृचरणैरप्युक्तं विवस्वदृक्षात्त्रिकमेकमेकं विधोः स्थितेर्कज्ञसितार्के
ज्ञानां चंद्रार्की वाग्निशिखा वराख्ये होमाकृतिः पापमुखेन निषिद्धा गूर्जरदेशे प्रसिद्धमिदं अथ दैवात्कृतस्य पापग्रह
मुखे हवनस्य शांतिरक्तादि विद्वज्जनरत्ने क्रूरग्रहमुखे चैव संजाते हवने शुभे शांतिं विधाय गां दद्याद्ब्राह्मणाय कुंडवि
ने आयसीं प्रतिमां कृत्वा निक्षिपेन्नामधोमुखीं गोमूत्रमधुगंधाद्यैरर्चितां प्रतिमां ततः स्वाग्रे निधाय सूक्तेन तत्र हो
मो विधीयते इति अथ यद्दिने होमः चिकीर्षितः तद्दिने वह्निवासवशेन शुभाशुभफलज्ञानमिंद्रवज्रयाह सैकाति
थिर्वारयुता कृताप्ता शेषे गुणेभ्रे भुवि वह्निवासः सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च शुक्लादि
मासगणनया वर्तमानतिथिर्गणैकयुता वर्तमानवारयुता च तत् भक्ता यच्छेषं तद्गुणमितं शून्यमितं च तदा वह्नेर्वासो भाव
सतिस्थानं भुवि वर्तते फलमाह सौख्याय इति होमदिवसे भुवि वह्निवासः सौख्यजनको भवतीत्यर्थः अथ शशियु
ग्मशेषे क्रमेणैकमिते शेषे अग्निवासो दिवि स्वर्गे फलं कर्तुः प्राणनाशो मरणं भवेत् द्विमिते शेषे अग्निवासो भूतले पाता
ले स्थितस्तत्फलं कर्तुरर्थनाशो द्रव्यनाशः उक्तं च तिथिवारयुतिः सैका वेदभक्तावशेषकात् निवासोग्नेर्व्योम्नि रूपे वि
नप्राणविनाशकः संस्कारेषु विचारोस्य न कार्यो नापि वैष्णवे नित्ये नैमित्तिके कार्ये न चाह्निषु निमिः स्मृतः अथ प्र
तिवर्षोत्पन्ननवान्नभक्षणमुहूर्तमनुष्टुभाह नवान्नस्याचरक्षिप्रमृदुभे सन्नैष्टुभं विना नंदा विषघटी मधुपौषा
किंस्तुघ्नमिज्ञान् चरक्षिप्रमृदुसंज्ञक द्वादशभेषु तथा सत्तनो समीचीनलग्ने शुभग्रहैर्युते दृष्टे चेत्यर्थः परं तु नंदाः प्रतिप
त्षष्ठ्येकादशी विषघटी विवाहप्रकरणे वक्ष्यमाणाः मधुचैत्रमासः पौषं च आर्किंशनिं भूमिजं मंगलवारं एतान्विना

मु॰टी॰
न॰प्र॰
२६

व्याऊर्वते पुष्येणसहिते सत्पष्येभागेपमैत्रे च एतन्नक्षत्रत्रयसंस्थे शीतरश्मौ चंद्रे सति संधानं कार्यं अनेन भाग्यमैत्रपुष्यात्मकं नक्षत्र
यमुक्तं भवति यदाह वसिष्ठः स्मरगुरुमैत्रेभाग्येद्वादशपंचाबापत्तमध्यात्तिथ्यो मिनयुत वीक्षितलग्ने नैतिलकरणे च संधिः स्यात्
कष्टपयोधि भाग्येपुष्ये समैत्रे चलग्नेसुक्रेक्षिते युते करणे तौतिलेष्टम्यांद्वादश्यां संधिरिष्यते एतदेवचरत्नमालापद्यव्या
ख्यानं द्व्यापद्यःसंभवति वाक्ययोरविरोधित्वात् मैत्रेभाग्येपुष्येद्वादश्यां वाष्टमितेदिनेलग्नेष्टम्यांवा नैतिलकरणे संधानसिद्धिः स्या
दिति भट्टभास्करोप्याह भाग्येपमैत्रेशीतरश्मावितिवक्रोक्तौ आशयेन विघ्नः एवं च स्थूलपक्षे देवेज्यमित्रभाग्येषु तिथ्येवपञ्चमी
यं अथपरीक्षामुहूर्तेवसंततिलकाकुंदसाह त्यक्ताष्टभूतशनि विष्टिकुजानुजन्मर्भमासौ मृतौ रविविधू अपि भानि नाड्याः
क्ष्मेगोचरे तनुलवे शशिजीवताराशुद्धौ करादिति हरीद्रकपे परीक्षा अष्टाष्टमी भूतंचतुर्दशी शनि कुजौ वारौ प्रसिद्धौ विष्टि
र्भद्रा जन्मर्भमासौ जननकालीन नक्षत्रं जन्ममासं च मृतावष्टमस्थौ वैरविविधू जन्मराशेः सकाशात् दृष्टमस्थं सूर्यं चंद्रं च
तथा नाड्याः भान्यपि नाडीनक्षत्राण्यपि रविविधू अपि इत्यत्रेद्वे द्विवचनं प्रत्यक्षमितिप्रत्यक्षसंज्ञायाः स्वतः प्रत्यक्षस्यात्र प्रवी
ति प्रकृतिभावः एतावत्पदार्थकं त्यक्त्वा परीक्षा कार्या परीक्षा नामसुवर्णस्तेयादिमहापातकाभिशस्तस्य शुद्ध्यशुद्धिविचा
रात्मिका तत्रमाषादिद्व्यादिव्यामिति यावत् सामान्यतो भद्रानिषेधेपि पुनर्भद्रानिषेधो रात्रिभद्रा यदाह्नि स्यादित्यादि
परिहाराणामप्यनवकाशतां सूचयितुम् पानः जन्मभस्य नाडीनक्षत्रत्वादेव निषेधे पुनरुपादानमावश्यकत्वद्योतनाय
तं जन्ममासस्य तु पुनर्निषेधो नाद्यगर्भविषये पि यथा स्यादित्येवमर्थं सामान्यवाक्यमाद्यगर्भविषयमेव एतच्चाग्रे
निर्णेष्यते एवं परीक्षायां निषिद्धनिमित्तान्यभिधाय विहितनिमित्तान्याह क्ष्मेगे इति तनुलव इति प्रत्येकं संबंधः क्ष्मे
गे द्विस्वभावे मिथुनकन्याधनुमीनरूपे तनौ लग्ने अंशेन वांशेच द्विस्वभावे तथा चरे मेषकर्कतुलामकररूपे लग्ने न
वांशेतथा शशिजीवताराशुद्धौ चंद्रशुद्धौ गुरुशुद्धौ ताराशुद्धौ च सत्यां एषां शुद्धिः च गोचरप्रकरणे ऽभिधास्यते तथा
करादितिहरीद्रकपे करोहस्तः अदितिःपुनर्वसुः हरिःश्रवणः इंद्रोज्येष्ठा कपोवरुणः तद्देवततारका एषु च भेषु परी

राम॰
२६

द्वास्यादित्यर्थः अत्रानुक्तोपि प्रातःकालो निशास्तः उक्तंच दीपिकायां नोग्रक्षास्तेष्टमार्के गुरुसहितरवौ जन्ममासेष्टमे दौवि
ष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मताराशु चाथ नाडीनक्षत्रहीने हरगुरुरजनीनाथताराविशुद्धौ प्रातःकार्या परीक्षा
द्वितनुचरगृहांशोदये शास्तलग्ने इति व्यवहारोच्चयः अष्टम्यां च चतुर्दश्यां प्रायश्चित्ते परीक्षणे न परीक्षाधिवासश्च शनि
भौमदिने भवेत् ज्येष्ठा श्रवण हस्ताश्च तथा ज्ञेयः पुनर्वसुः तदृक्षेत्वभिषेकोक्ता त्वभियुक्त विचारणे इति अभियुक्तः स्व
र्णस्तेयादिपातक संभावनावांस्तस्य विचारणे शुद्ध्यशुद्धिनिर्णये नाडीनक्षत्राणि दीपिकायामुक्तानि जन्माद्यं कर्मतेनो
दशामभं संघातिचषोडशाकं समुदायमष्टादशभं विनाशमं ज्ञं त्रयोविंशं आधानतुर्यं च विंशं मानसमेवं षट्ऋक्षः स्यात् नव
नक्षत्रो नृपतिः स्वजातिदेशाभिषेकर्क्षैः इति एतानि नक्षत्राणि नाडीनक्षत्राणीति वाक्यशेषो दीपिकाकृताभिहितः
जातिर्ब्राह्मणादिका तन्नक्षत्राणि पूर्वात्रयं सानलमग्रजानामिति वराहोक्तानि तद्वाक्यं च मया यात्राप्रकरणे लिखिष्यते
देशो गलापुरादिकः तन्नक्षत्राणि शतपदचक्रानुसारेण ज्ञेयानि तद्वाक्यं च नामकर्मप्रकरणे मया लिखिष्यते यस्मि
न्पुष्यादिके नक्षत्रे भिषिक्तो राजा तदभिषेकर्क्षं अथ सामान्यतः शुभकार्येषु लग्नशुद्धिमनुष्टुभाह व्ययाष्टशुद्धोपच
ये लग्ने शुभदृग्युते चंद्रे त्रिषड्दशायस्थे सर्वारंभः प्रसिद्ध्यति व्ययो द्वादशस्थानं अष्टाष्टमस्थानं एतत्स्थानद्वयं
शुद्धं शुभपापग्रहसहितत्वदोषाहितं यस्मिन् एतादृशः स्वजन्मराशेः स्वजन्मलग्नाद्वोपचयभवने त्रिषडेकादशदशम
स्थाने लग्नगते शुभग्रहैर्दृष्टे युते च तथा चंद्रे त्रिषड्दशमायस्थानस्थिते सति सर्वेषां शुभकार्याणामारंभः प्रसिद्ध्य
ति यदाह वसिष्ठः उपचयभे लग्नगते व्ययनैधनशुद्धिसंयुते लग्ने उपचयगे शीतकरे मंगलकर्माणि कार्याणि अथन
क्षत्रेषु ज्वरोत्पत्तौ सत्यां तन्निवृत्तौ दिनसंख्यादिकं द्वितीया पद्मातिकयोपेंद्रवज्रार्कं दसाह स्वातीद्रपूर्वाशिवसार्पभे स्युति
ज्वरेंत्यमे त्रेस्थिरता भवेद्भुजः याम्यश्रवोवारुणतद्भमे शिवाग्रसाहिपक्षोद्यधियार्कवासवे मूलाग्निदास्त्रे नवपित्र्यभे नवा
बुध्न्यार्यमेज्याद्दितिधातृभे नगाः मासोऽजवैश्वेयमाहिमूलभे मिश्रेशापित्र्ये फणिदंशने मृतिः स्वातीइंद्रोज्येष्ठा पूर्वास्ति
स्रः शिव आर्द्रा सार्पभे आश्लेषायां एषु भेषु ज्वरे उत्ततःस्त्रियो वा ज्वरोत्पत्तौ मृतिर्भवेत्स्यात् उक्तं च वसिष्ठेन पूर्वात्रयस्वातिभुजंग

मु॰टी॰ रौद्रमूरेश्वार्द्रेषु च यस्य रोगः स्यादृश्लिष्टं तु देवचिकित्सकोऽपि द्विनावशक्तः खलु रोगिणं तं देवचिकित्सकौ देववैद्यौ धान्वंतरिः
१॰प्र॰ अश्विनौ त्वमेत्रे रेवत्यनुराधयोः ज्वरो रोगो रुजो रोगस्य स्थिरता भवेत् बहुकालेन रोगेण न निवृत्तिः स्यादित्यर्थः तथाभरण्यादि
१२ नक्षत्रेषु च वक्ष्ये शिवा एकादश घस्रादिवसाः रोगस्थैर्यस्य तदनंतरं रोगमुक्तिरिति सर्वत्र व्याख्येयं घस्रो दिनाहनी वा त्वित्यमरः द्वा
धिपं विशाखा अर्कोहस्तः वासवं धनिष्ठा एषु त्रिषु भेषु पक्षः पंचदशदिवसाः रोगस्थैर्यस्य मूलाशिरासे मूलकृत्तिकाश्विनीषु
त्रिषु नवदिवसाः पित्र्यभे मघायां नखा विंशतिदिवसाः नामैकदेशे नामग्रहणमिति न्यायेन तु ध्यो हिर्बुध्न्य उत्तराभाद्रपदा अ
र्यमोत्तराफल्गुनी इत्यादितिथात्मानि प्रसिद्धानि एषु पंचभेषु नगाः सप्तदिवसाः अत्रैवैश्वस्पृग्गोत्तराषाढयोर्द्वयो मासद्विं
शद्दिनानि रोगस्थैर्यं ततो रोगनिवृत्तिः यदाह वसिष्ठः हृत्क्रान्तस्फुरं प्राणनिमित्तपौष्णाधिष्ण्ये च मासान्क शिवविश्वधिष्ण्ये
रोगस्य मुक्तिः पित्र्ये देवधिष्ण्ये वारैर्भवेद्विंशतिभिः च नूनं प्राणितिजीवतीत्यर्थः पद्माठ सक्ष्ठीपाकरेषु भेषु मूलाश्विनाग्नि
त्रितयेन वाहात् तोयेशचित्रान्तकविष्णुभेषु नैरुज्यमेकादशभिर्दिनैश्च पुष्येत्वहिर्बुध्न्यपुनर्वसौ च अर्घ्यार्यमद्वैषु च सप्तरात्रा
त् अत्र शीघ्ररोगाविमुक्तये संहिताशांतिरप्यभिहिता वसिष्ठेन नक्षिंगमंत्रैश्च सुगंधपुष्पैर्वस्त्रादानैर्गुग्गुलधूपदीपनैवेद्यतांबू
लफलैः च सम्यक् स्त्रजं च कृत्वा भयनाशनाय द्विजाय दद्याद्दत्तलं शिवाय आमयो रोगः अनलमपरिमितं द्रव्यं प्रत्येकं नक्षत्र
शांतिविशदा नक्षत्रशांत्याध्येया वसिष्ठेनोक्ता सा तत एव सम्यगवधार्या अथ सर्पदंशेन नक्षत्राणपाह घेति अध्यानंतेरंयमाहि
मूलभेभरण्याश्लेषामूलेषु नय्यामिश्रेशपित्र्ये कृत्तिकाविशाखाद्रीमघासु एवं सप्तसु भेषु यस्य कस्य चित्फणिदंशनेसर्पदं
शो मृतिर्मरणमेव भवेदित्यर्थः यदाह वसिष्ठः मघाविशाखानलभेषु सार्पयाम्यनैर्ऋत्यरौद्रेषु च सर्पदंष्ट्रः सुरद्विनो विष्णुरथे
नसोपि प्राप्नोति कालस्य मुखं मनुष्यः विष्णुरथेन गरुडेन गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः नागांतको विष्णुरथः
सुपर्णः पन्नगाशन इत्यमरः अत्र सर्पदंशे यस्यैषु नक्षत्रेषु गोचरवशेन चंद्रबलं न भवति तस्यैव सर्पदंशे वधं मरणं स्यात् उक्तं
च दीपिकाटीकाकृता, चतुर्थमष्टेन यदयत्र चंद्रः तस्यैव गोचरेचाष्टमप्रदः तत्रत्नं भवेन्मृत्युस्सुधासंसिक्तदेहिनः इति अथ शी राम॰
घ्रं रोगिमरणे विशिष्टयोगद्वितीयोपजातिकयाह रौद्राहिशक्रांबुपयाम्यपूर्वाद्विदैववस्वग्निषु पापवारे रिक्ताहरिस्कंददि १२

नैव रोगे शीघ्रं भवेद्रोगिजनस्य मृत्युः रौद्रादीनि भानि प्रसिद्धानि पापवाराः सूर्यभौमशनयः रिक्ताः प्रसिद्धाः हरिर्द्वादशी
स्कंदः दिनं षष्ठी एतानि अथ एवं विधे विशिष्टे योगे यस्य रोगोत्पत्तिर्भवेत्तस्य रोगिजनस्य शीघ्रं मृत्युर्भवेत् उक्तं च दैवज्ञमनो
हरे उग्रवरुणरुद्राश्च सर्वेंद्रत्रिपूर्वी यमदहनविशाखाः पापवारेण युक्ताः तिथिषु नवमिषष्ठी द्वादशी वा चतुर्थी सहजमरण
योगो रोगिणां कालहेतुरिति चतुर्थीग्रहणं च चतुर्दश्युपलक्षकं मत्वा मूले रिक्ताग्रहणं कृतं अत एवाह वसिष्ठः आश्लेषा
द्रीत्रिपूर्वायमवरुणमरुच्छक्रतारानलाः स्युर्द्वादश्यर्कः संरिक्तातिथिषु चरविज्ञार्कवारेषु येषु रोगः संजायते तेय
मपुरमचिरात्प्राप्नुवंत्येव चंद्रे जन्मन्यष्टाख्यबंधुव्ययभवनगते मृत्युलग्ने च राशाविति अथ प्रेतदाहमुहूर्तं प्रेतदाह
निषेधदिनं चेंद्रवंशार्कं रसाह त्रिपाहि मूलेंद्रहरीशवायुभे प्रेतक्रिया स्यात् कषडंभगो विधौ प्रेतस्य दाहं यमदिग्गमं
त्यजेत् शय्याविताने गृहगोपनादि च अश्विनीपुष्यहस्ताश्लेषामूलज्येष्ठाश्रवणार्द्रास्वातीनक्षत्रेषु प्रेतक्रिया प्रेतानां ह
तानां प्रेतत्वविमुक्तिपूर्वकोत्तमलोकप्राप्तिकारकं श्राद्धादिकर्म क्रियाशब्देनोच्यते सा यदि कारणवशात् दशवदाहसम
ये कृता स त्वेषु भेषु कार्या स्यात् उक्तं च हेमाद्रौ उपानिष्ठराभारेण साधारणध्रुवाग्रेमैत्रेषु न शस्यते मनुष्याणां प्रेतक्रि
यान शास्त्रात् त्रिपुष्करे यमलधिष्ण्ये चेति अत्रैतानि निषिद्धानि कृत्तिकाविशाखारोहिण्युत्तरात्रयमघाभरणी मृगचि
त्रानुराधारेवतीत्येवं पंचदश भानि तथा त्रिपुष्करे त्रिपान्नक्षत्रे तत्रान्येषां त्रिपान्नक्षत्राणामुक्तभेष्वंतर्भूतत्वात् पुनर्व
सुरवशिष्टः तथा यमलधिष्ण्ये द्विपान्नक्षत्रे इति हेमाद्रिणा व्याख्यातं तत्र मृगचित्रयोर्मैत्रनक्षत्रेष्वंतर्भावात् धनिष्ठा
यमलधिष्ण्यमित्यत्र गृह्यते धनिष्ठापंचकनिषेधः साधुनैव वक्ष्यते एवमष्टादश भानि प्रेतक्रियायां निषिद्धानि अ
वशिष्टानीमानि अश्विनीपुष्यहस्ताश्लेषामूलज्येष्ठामूलार्द्राश्रवणस्वातीषु नवसु भेषु प्रेतक्रिया कार्या इत्यर्थादुक्तं
भवति इत्येतान्येव ग्रंथकर्त्रापि निबद्धानि त्रिपाहीत्यादिना अत एव कश्यपः हि सार्द्रपुष्यस्वातीन्द्रमूलहरिभेषु मृतक्रि
येष्टेति व्यवहारतत्त्वकर्त्रोक्तं अथ कषडंभगमीनकुंभराशिस्थिते चंद्रे सति धनिष्ठोत्तरार्द्धादारभ्य शततारकापूर्वा
भाद्रपदोत्तराभाद्रपदारेवतीषु प्रेतक्रिया प्रेतस्य मृतस्य दाहं ज्वालनं त्याज्येन कुर्यात् च पुनर्यमदिग्गमं दक्षिणदिशि

गमनं यात्रां त्यजेत् तथा शय्यायाः खट्वायाः वितानं वपनं तथा गृहगोपनं गृहाच्छादनं आदिशब्देन तृणकाष्ठसंग्रहं
च त्यजेत् तथाह वसिष्ठः वस्वग्रपरार्द्धात्पंचकधिष्ण्ये गेहस्य गोपनं नैव दक्षिणदिक्षु गमनं दाहः प्रेतस्य काष्ठसंग्रह
णमिति नारदः वस्वंत्यार्धादिपंचर्क्षे संग्रहं तृणकाष्ठयोः याम्यदिग्गमनं शय्यां न कार्यं गृहगोपनमिति श्रीपति
रपि॥ वासवोत्तरदलादिपंचके याम्यदिग्गमनगेहगोपनं प्रेतदाहतृणकाष्ठसंग्रहं शय्यकावितरणं च वर्जयेत्
त्रिविक्रमोपि शय्यावितानप्रेतादिक्रियाकाष्ठतृणार्जनं याम्यदिग्गमनं कुर्यान्न चंद्रे कुंभमीनगे इति ननु प्रेतदाहे
किं नक्षत्रांतरे मृतस्य धनिष्ठोत्तरार्धादिपंचके दाहो न कार्य इति उत पंचक एव मृतस्य पंचके दाहो न कार्य इति अत्र प
क्षाः संभवंति तत्र यदि विज्ञायते नक्षत्रांतरे मृतस्य पंचके दाहो न कार्य इति तत्र पंचके मरणस्य दोषवत्त्वान्न प्राप्नो
ति तच्चाप्युक्तं यस्मादुक्तं गरुडपुराणे॥ कुंभमीनस्थिते चंद्रे मरणं यस्य जायते न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भ
वेदिति अथ विज्ञायते पंचक एव मृतस्य पंचके दाहो न कार्य इति तदपि श्रवणे धनिष्ठार्द्धे वार्धे वा मृतस्य पंचके दाह
निषेधो न प्राप्नोति अस्त्वेवमिति चेन्न प्रेतस्य दाहं त्यजेदिति दाहस्यैव क्रियाकारकसंबंधेन प्राधान्येन निषेधात्
किंच त्रिगुणफलदो दाहदो नष्टे हृते च मृतेपि चेति त्रिपुष्करफलयोगफलवत्पंचकमरणनिषेध एव वक्तव्ये दाहनि
षेधस्य दृष्टस्योपादाना कर्तव्यतापत्तेः तस्माद्यस्मिन्कस्मिन्नक्षत्रे मृतस्य पंचके दाहो न कार्य इति तृतीयः पक्षः साधी
यान् प्राधान्याद्दाहस्यैव निषेध इत्युक्तं प्राक् अतः पंचकात्प्राक् मरणदोषो नास्ति तथा तत्रैव दाहोपि न दोषाय यदि
क्रियाकरणवशात्कालातिक्रमे सति पंचकप्रवृत्तिः ततः शांतिं विधाय दाहः कार्यः पंचके तु उभयमपि निषिद्धं मर
णं दाहश्चेति उक्तं च गरुडपुराणे॥ कुंभमीनस्थिते चंद्रे मरणं यस्य जायते न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत्
न तस्य दाहः कर्तव्यो विनाशः स्वकुलं तथा पंचकानंतरं कार्यं कार्यं दाहादिकं खलु अथवा तद्दिने कार्यो दाहस्तु विधि
पूर्वकं रेवतीप्रांते मृतस्य रेवतीमपहाय दाहः कार्यः धनिष्ठोत्तरार्धादिमृतस्य दाहस्तु समय एव पंचकस्य बहुकाल
व्यापित्वाच्च पर्युषितदाहनिषेधाच्च स च दाहः शांतिविधिपूर्वकः कार्यः स विधिरुक्तो ब्रह्मपुराणे दाहदेशोपवनी

त्वात्स्नापयेच्च प्रयत्नतः दर्भाणां प्रतिमाः कार्याः पंचोर्णासूत्रवेष्टिताः यवपिष्टेनानुलिप्ताः ताभिः सह शवं दहेत् प्रे
तवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्ता पंचकस्य नामान्येतानि चक्रमात् मरणनिषेध एव वक्तव्यो किंतु न दाह
निषेधेनोच्यते दोषाधिक्यसूचनार्थं हि पुनर्दाहनिषेधः अत एव पंचके मृतस्य पुत्तलकविधानं कृत्वा दाहः का
र्यः ततः सूतकांते पुत्रादिभिः शांतिकं च विधेयं उक्तं च गरुडपुराणे ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह सूत
कांते तदा पुत्रैः कार्यं शांतिकपौष्टिकं पंचके तु मृतो योसौ न गतिं लभते नरः तिलांश्चैव हिरण्यं च तमुद्दिश्य प्रदत्तं द
हेदिति अनेनानक्षत्रांतरे मृतस्य पंचके दाहप्राप्तौ पुत्तलविधिरेव भवति न तु सूतकांते शांतिकं च एवं पंचकांतमृ
तस्याप्यन्यदाहप्राप्तौ पुत्तलकविधिर्न किं तु सूतकांते शांतिकमेव विधेयमित्यलमतिप्रसंगेन अथ धात्रादीपि
कायां क्रेदनं संग्रहं चैव काष्ठादीनां न कारयेत् श्रवणादौ बुधः षट्के न गच्छेद्दक्षिणां दिशामिति यदुक्तं तच्चिंत्यं आर्ष
मूलवाक्यानुपलब्धेर्वसिष्ठादिमुनिवाक्यविरोधाच्च अत एव तट्टीकाकृताच्युतभट्टेनाप्यस्य श्लोकस्य व्याख्या
नातेकदाचित् श्रवणधनिष्ठापूर्वार्द्धयोरेतानि समाचरेत् न तु जातु धनिष्ठोत्तरार्धादिपंचके तथा च रत्नमालायां
वासवोत्तरदलादिपंचके इत्यादि संमतिवाक्यमुक्तं काष्ठादीनामित्यत्रादिशब्देन गृहगोपनं प्रेतदाहं खट्वाया वपनं
चनकुर्यादिति व्याख्यातं अथ त्रिपुष्करयोगं सकलं वसंततिलकयाह भद्रातिथीरविजभूतनयार्कवारे द्वीशार्य
माजचरणादितिवह्निविश्वे त्रैपुष्करो भवति मृत्युविनाशवृद्धौ त्रैगुण्यदो द्विगुणकृद्धसुतक्षचांद्रे भद्रासंज्ञकातिथि
द्वितीयासप्तमीद्वादश्यः अत्रत्रोरीति लोपे पूर्वस्य दीर्घोण इति पूर्वस्याणो दीर्घः तथा शनिभौमसूर्यवारे तथा द्वीशं
विशाखा अर्यमोत्तराफल्गुनी अजचरणः पूर्वाभाद्रपदा अदितिः पुनर्वसुः वह्निः कृत्तिका वैश्वमुत्तराषाढा
एषु षट्सु नक्षत्रेषु उक्ततिथिवारनक्षत्रत्रये विशिष्टयोगे सति त्रिपुष्कर एव त्रैपुष्करः प्रज्ञादिभ्यश्चेति स्वार्थेण्
त्रिपुष्करनामा योगो भवतीत्यर्थः कीदृशः मृत्युविनाशवृद्धौ त्रैगुण्यदः तद्दिने यदि कश्चिन्म्रियेत तदात्मीयाः तत्स
हितास्त्रयो म्रियेरन् यदि किंचिद्वस्तु विनष्टं तस्य तदा वस्तुत्रयनाशः तथा किंचिद्वस्तु लब्धं तदा त्रिगुणवस्तुला

मु॰टी॰
न॰प्र॰
२५

भद्रात्यर्थे॥ रविरविजभौमवारे भद्रायां विषमपादस्थर्क्षं चेत् त्रैपुष्कराख्ययोगः त्रिगुणफलो यमलभे द्विगुणं नारदेना
पि॥ अर्कार्किभौमवारेचेद्भद्रायां विषमांघ्रिभं त्रिपुष्करस्त्रिगुणदो द्विगुणं यमलांघ्रिभे अत्र यस्मिन्नक्षत्रे प्रथमपादं
तेन तृतीयपादं तेन वा राशिसमाप्तिस्तद्विषमपादस्थर्क्षमुच्यते तदेव स्पष्टं द्वीशार्यमेत्यादिनोपनिबद्धं अथ वसवो धनि
ष्ठा तक्षा चित्रा चांद्रं मृगः एतानि भानि भद्रातिथयः रविजभूतनयार्कवाराश्च अत्रापि विशिष्टयोगे सति द्विपुष्कर
नामयोगो भवति तत्फलं नष्टस्य विनाशहृद्धौ द्विगुणपक्वत्व मृते नष्टे हृद्धौ वा द्विगुणतां करोतीत्यर्थः द्विगुणं यमलांघ्रि
भे इत्युक्तेः यन्नक्षत्रे द्वितीयचरणांते राशिसमाप्तिस्तद्यमलांघ्रिभं तच्च मृगचित्राधनिष्ठारूपमेव अथ दैवात्त्रिपुष्करा
दिके तिथिवारनक्षत्रात्मके विशिष्टयोगे सति कस्यचिन्मरणसंभवः तदा तद्दोषशांत्यर्थं दानं विधेयं यदाह वसिष्ठः
त्रितयं गवां हि दद्यात् दोषस्यापनुत्तये विद्वान् द्वितयं द्विपुष्करेपि तिलपिष्टैर्विप्रमुख्येभ्यः द्वितयं गवामिति शेषः अत्र
तिथिवारयोरभावे केवलं विषमांघ्रिभे यमलांघ्रिभेण मरणसंभवे दोषो नास्तीत्यर्थः अमुमर्थं स्पष्टमाह नारदः॥
दद्यात्तद्दोषनाशाय गोत्रयं मूल्यमेव वा द्विपुष्करे द्वयं दद्यान्न दोषस्त्वक्षमात्रतः इति अत्र त्रिपुष्करयोगे कचिद्वृहस्प
तिवारोप्युक्तः यदाह कश्यपः भद्रातिथिः शनीज्यारवारे चेद्विषमांघ्रिभं त्रिपुष्करं त्रिगुणदं द्विगुणं द्व्यंघ्रिभे मृतावि
ति इदमेव दृष्ट्वा श्रीपतिनाप्युक्तं विषमचरणधिष्ण्यं भद्रातिथिर्यदि जायते सुरगुरुकुजमार्गणां कथंचन वासरे मु
निभिरुदितः सोयं योगस्त्रिपुष्करसंज्ञितः त्रिगुणफलदो वृद्धौ नष्टे हृते च मृतेपि वा अस्य पूर्वोक्तवाक्यस्य चैकवाक्यता
दैवात् कर्तुमर्हति कश्यपवाक्ये मृतावितिपदोपादानान्मरण एवायं विचारो न तु नष्टे वृद्धौ च यत उक्तं ब्रह्माण्डपुराणे
धनिष्ठापंचके जीवो मृतो यदि कथंचन त्रिपुष्करे यमभे च कुलवान्मारयेद्ध्रुवं तदनिष्टविनाशार्थं विधानं समुदीर्य
ते इति ग्रंथकर्त्रा तु श्रीपत्युक्तिमंगीकृत्य मृत्युविनाशवृद्धावित्युक्तं वसिष्ठनारदवाक्ययोः सामान्यतोभिधानं दानं च
मृतावेवेति विषयविवेकः अथ शवप्रतिकृतिदाहे निषिद्धकालं शार्दूलविक्रीडिताभ्यामाह शुक्रार्किगुरुदर्शभूतम राम॰
दनंदासु तीक्ष्णोग्रभे पौष्णे वारुणभे त्रिपुष्करदिने न्यूनाधिमासे यने याम्ये ह्यात्ययतश्च पातपरिघे वैज्यशुक्रास्तगे २५

भद्रावैधृतयोः शावप्रतिकृते दाहो न पक्षे सितेऽसिते प्रत्यरितारयोश्चेति सर्वांत्यजेचकर्तर्नेसन्मध्योमैत्रमगाखिलं ....
....मध्ये यथासंभवं एवंविधेऽशावस्य कृतस्य प्रतिकृतिः पर्णशरादिना सावयवत्वकल्पनेन तस्य दाहो न कार्यः कुतः य
तो द्विविधः प्रेतसंस्कारः प्रत्यक्षशरीरस्यैकः प्रतिकृतेरन्यः तत्र प्रत्यक्षशरीरसंस्कारे तो शुभाशुभमदिनविचाराभावः
यदाह गार्ग्यः प्रत्यक्षशवसंस्कारे दिनं चैव विशोधयेदिति प्रतिकृतिसंस्कारस्य हि कालत्रयं आशौचमध्ये वर्षमध्ये
वर्षानन्तरं चेति तत्राशौचमध्ये यदि प्रतिकृतिसंस्कारः चिकीर्षितस्तदा यथासंभवं दिनशुद्धिर्विचार्या वर्षमध्ये वर्षा
नन्तरं वा प्रतिकृतिसंस्कारे तु शुभकालशुद्धिर्विचार्या एतदप्याह गार्ग्य एव आशौचमध्ये क्रियते पुनः संस्कारकर्म
चेत् शोधनीयं दिनं तत्र यथासंभवमेव तत् आशौचविनिर्वृत्तौ चेत् पुनः संस्क्रियते मृतः संशोध्यैव दिनं ग्राह्यं मूर्ध्वं संव
त्सराद्यदि प्रेतकार्याणि कुर्वीतेति अत एवोक्तं आशौचात्परतो विचार्यमखिलं मध्ये यथासंभवमिति एतद्वाक्य
मत्रैव स्पष्टं व्याख्यास्यते तत्र दिनशुद्धिरुच्यते शुक्रारेत्यादिना शुक्रः प्रसिद्धः आरो मंगलः आर्किः शनिः एषां वारे
प्रतिकृतेर्दाहो नेति प्रत्येकं संबंधः तथा दर्शो मावस्या भूतेचतुर्दशी मदनस्त्रयोदशी नंदाः प्रतिपत्षष्ठ्येकादश्यः आ
सु तिथिषु दाहो न कार्यः यदाह मरीचिः नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे तत्र श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्
एकादश्यां तु नंदायां सिनीवाल्यां भृगोर्दिने नभस्यस्य चतुर्दश्यां कृत्तिकासु त्रिपुष्करे द्वितीयवाक्यमतिदुष्टताकथनार्थं
सिनीवाल्याममावास्यायां भृगोर्दिने शुक्रवारे इति संबंधो व्याख्येयः अत्र श्राद्धं न कुर्वीतेत्यनुषंगः श्राद्धशब्देनात्र प्रेत
क्रियाविवक्षिता तथा तीक्ष्णोग्रभे मूलज्येष्ठार्द्राश्लेषास्तीक्ष्णान्युग्राणि पूर्वात्रयभरणीमघाः पौष्णभे रेवत्यां वारुणे
शतभे त्रिपुष्करदिने भद्रातिथयः सूर्यभौमशनिवाराः कृत्तिकापुनर्वसूत्तराफाल्गुनीविशाखोत्तराषाढापूर्वाभाद्र
पदाः एतत्त्रितयसंहतिरूपे दिने प्रतिकृतिदाहो न कार्य इति केचिद्व्याकुर्वते पूर्वपद्येनैव निषेधसत्त्वात् नच प्रत्यक्षस्यैतो
सन्निषेधो न तु प्रकृतिदाहे एवं तर्हि समनिवाक्याभावापादमर्थ इति ब्रूमः यत्तु ज्योतिषसारसारेण साधारणे धिष्ण्यो
ग्रे मैत्रे नो शस्यते मनुष्याणां प्रेतक्रियाकथंचित्त्रिपुष्करे यमलधिष्ण्ये चेति अत्र त्रिपुष्करयोगेन विशिष्टयोगो विवक्षि
त इति चेत् अत्र ब्रूमः त्रिचरणनक्षत्राण्येव त्रिपुष्करपदेनोच्यन्ते तेहेमाद्रिणापि कृत्तिकादीन्येव त्रिचरणानि भानि त्रिपु

शु.टी.
न.प्र.
१.

कारशक्तेन व्याख्यातानि अतएव वाहकश्यपः मरणाद्दीमघाश्लेषामूलं त्रिचरणानि च प्रेतकृत्येति दुष्टानि धनिष्ठाद्यं च पंच
कमिति पराशरवाक्ये बहूनि प्रेतकृत्ये सामान्येनोनिषिद्धानि कश्यपवाक्ये त्वाद्यानि तिदुष्टान्युक्तानि इदमेवाभिप्रेत्य ग्रंथ
कृतोक्तानि तत्र धनिष्ठादौ ज्योतिर्निबंधे अग्रहणमधमेषु मेषु वक्ष्यमाणत्वात् अथन्यूनाधिमासे क्षयमासे धिमासे शु
वप्रतिदाहो न कार्यः उक्तं च ज्योतिर्निबंधे न कुर्याद्गुरुशुक्रास्ते पौषे स्वापे मलिम्लुचे विलंबितं प्रेतकार्यं गयां गोदावरीं वि
नेति अधिमासस्योपलक्षणत्वात् क्षयमासेपि न कार्यं प्रेतकार्यमित्यर्थः अतएव मलेन्यूनमासनिषेधः अथाशौचेक
स्माद्वर्षात्परतः ऊर्ध्वं याम्येयने दक्षिणायने कर्कादिषड्राशिस्थिते सूर्ये न दाहः कार्यः अथाप्युत्तरायणं सम्यगुपलक्षण
त्वादेवमदिनमपि निषिद्धं उक्तं वृद्धगार्ग्येण॥ ऊर्ध्वं संवत्सराद्यदि प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणं कृष्णपक्षश्च त
त्रापि वर्ज्येयेत्तु चदिनत्रयमिति गरुडपुराणेपि न कुर्याद्गुरुशुक्रास्ते पौषे स्वापे मलिम्लुचे विलंबितं प्रेतकार्यं गयां गोदा
वरीं विनेति अत्र वाक्ये पौषस्वापयोर्निषिद्धत्वान्मार्गशीर्षस्य मध्यमत्वं प्रतीयते तदावश्यकविषयकं प्रथमवर्षे तु दक्षि
णायनमपि शुभमेव अथपातपरिज्ञेयानि व्यतीपाताख्ये योगे गणितागते व्यतीपाताख्ये महापात इत्यपि केचित् परिघा
ख्ययोगे तथा देवेज्यशुक्रास्तके गुरुशुक्रयोरस्ते अत्र स्वार्थे कः तथा भद्रावैधृतयोः भद्रावैधृतौ प्रसिद्धौ गणितसा
ध्ये वैधृताख्ये महापात इत्यपि केचित् तथा सिते शुक्लपक्षे शवप्रतिकृतेर्दाहो न कार्यः यदुक्तं नारदेन श्राद्धलक्षणाध्याये
चतुर्दशीं तिथिं नंदां भद्रां शुक्रारवासरौ सितेज्ययोरस्तमयं ध्रुवं भं विषमांघ्रिभं शुक्लपक्षं संत्यज्य पुनर्दहनमुत्तमभि
ति अन्यत्रापि नंदामदनभूतामापातवैधृतिविष्टिषु शुक्रार्किभौमपरिघध्रुवमिश्रोग्रमैत्रभे कर्तुश्चंद्रेऽष्टवेदांते जन्म
प्रत्यरितारके त्रिपादभे सितेपक्षे यनेयाम्ये कृतःपरं शवप्रतिकृतेर्दाहः शुक्रेज्यास्ताधिमासके नेष्टो मघाद्विपान्मैत्रद्वी
पादिति भगध्रुवे इति तथा कर्तुः प्रेतश्राद्धाद्यधिकारिणो जन्मप्रत्यरितारयोः जन्मताराउत्पत्तिनक्षत्रं दशममेकोनवि
शं चेति तथा कर्तृमृतिसर्वाणोत्येत्र स्वजन्मराशेरष्टमचतुर्थद्वादशस्थे चंद्रे सति दाहो न सर्वप्रशस्तः तदुक्तं वराहपुराणे
चतुर्थाष्टमगे चंद्रे द्वादशे च विवर्जयेत् प्रेतकृत्यं व्यतीपाते वैधृतौ परिघे तथा करणे विष्टिसंज्ञे च शनैश्चरदिने तथा त्रयोद
श्यां विशेषेण जन्मतारात्रये तथा विष्टिसंज्ञं करणं भद्रा महाभारते नक्षत्रेण न कुर्वीत यस्मिन्जातो भवेन्नरः न प्रोष्ठ

राम.
२०

पदयोः पूर्वाभाद्रपदोत्तराभाद्रपदयोः आग्नेये कृत्तिकायां कालविशेषादिकं नारदोक्तं॥ दिनोत्तरार्द्धे तत्कर्तुं शुभं दृतारावला
न्विते पापग्रहे बलयुते शुक्रलग्नांशवर्जिते तत्पुनर्देहनं प्रोक्तमिति अथ शवप्रतिकृतिदाहे मध्यनक्षत्राण्युच्यंते मैत्र
मनुराधा भगः पूर्वाफल्गुनी अदितिध्रुवविशाखाः प्रसिद्धाः द्वीश्विभं मृगचित्राधनिष्ठाः ज्ञेपि बुधवारेपि शवप्रतिकृति
दाहो मध्यमः नशुभफलदो नाप्यनिष्टफलद इत्यर्थः उक्तं च कश्यपेन॥ फाल्गुनीद्वितयं रोहिण्युत्तराषाढा पुनर्वसुः द्वेआ
षाढे विशाखा च भानि द्विचरणानि च एतानि किंचिदुष्टानि वर्ज्ययेत्सति संभवे इति नेष्टो मध्येष्टिद्विपान्मित्रद्वीशादिति
भगाध्रुव इति चेत्युक्तेः बुधे संमतत्वभावः अथार्कज्यविधोरर्केज्याभ्यां सहितो विधुरिति मध्यमपदलोपी समासः सू
र्यगुरुचंद्राणां दिनेवारे दाहः श्रेष्ठः तथानेन प्रकारेण कृतिकास्वात्यश्विपुष्येष्वपि निषिद्धनक्षत्रगणाद्वहिरिति पंच
कभेषु शवप्रतिकृतेर्दाहः श्रेष्ठो नुष्टीयमानः शुभफलद इत्यर्थः आद्योचात्परत इत्यादिश्लोकव्याख्यानार्थं ननु प्रति
कृतिसंस्कारे किंनिमित्तं उच्यते दैवान्मानुषाद्वापराधान्मृतस्य विधिवद्दाहो नाभूत् किंतु काष्ठवद्दाहो जातो थवापरे
शागतस्य चोरदंष्ट्र्यादिहतस्य तज्ज्ञीनेरेव केनचित्काष्ठवद्दाहो नाभूदपि नकृतो थवैकाग्नित्वान्न ज्ञातस्तदा प्रतिकृतिदा
हो विधेय उक्तं च ब्रह्मपुराणे॥ अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः तदभावे पलाशोत्थैः पत्रैः कार्यः पुमानपि
सपिष्टैस्तिलसंमिश्रैर्दग्धव्यश्च तथाग्निना असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबांधवैः एवं पर्णशरं दग्ध्वा त्रिरात्रम
शुचिर्भवेदिति तदभावे देहाभावे तथाग्निनाद्गृह्याग्निना अपि शाकृहृतीत देहाभावेप्यपि पलाशोत्थैः पत्रैः कार्य
इत्यर्थः आहिताग्नेस्तु श्रौतसूत्रे विधिमाहापस्तंभः॥ यद्याहिताग्निः प्रोषितः प्रमीतो न प्रज्ञायेत सयां दिशमभिप्रस्थितः
स्यात्तामस्याग्निभिः कद्व्यं दहेयुरपि वा त्रीणि षष्टिशतानि पलाशवृंतानि तैः कृष्णाजिने पुरुषाकृतिं कृत्वा तामस्या
ग्निभिर्दहेयुरिति निवातसनेकमिति अत्र पक्षद्वयं यथा प्रवासगतो यदि न प्रज्ञायते प्रमीत इति ततो मृत इत्येव निर्णये
सयां दिशं प्रस्थितो भवेत्तां दिशं प्रति यः कदो, कृष्टो भूमिप्रदेशः तद्गणवांस्तं देशमस्य मृतस्य श्रौताग्निभिस्तूष्णीं दहेयु
र्बांधवा न पितृमेधविधिना अयमेकः पक्षः अपि वा थवा त्रीणि षष्टिशतानि ३६० पलाशवृंतानि पलाशानि

मुद्री· न·प्र· २९ पर्णानि यत्र तिष्ठंति तादृशानि वृंतानि संपाद्य तैर्वेष्टितैः पलाशवृत्तीयैस्त्रिपञ्चैर्वृंतैः कृष्णाजिनेन पुरुषाकृतिं कृत्वा तामाकृतिमस्याग्निभिः पितृमेधविधिना दहेत् पुरिनिवासूसनेयिनां मतमिति द्वितीयः पराशरेण तु कुशैः प्रतिकृतिः कार्येत्युक्तं कृष्णाजिने समास्तीर्य कुशैस्तु पुरुषाकृतिमिति कुर्यादिति विशेषः अत्र पलाशकुशविधेयोरन्यतरेणानुष्ठाने व्रीहियववत्तुल्यबलत्वात् शवप्रतिकृतिदाहानुष्ठानविधिस्तु शौनकाद्यैरुक्तः दिशान्तेयः नात्रापस्तत्तत्वात्स्विच्छंते अथ च पलाशवृंतादिभिः प्रतिकृतिविधिरस्थ्यलाभे यदा तु श्रूतास्थ्नां लाभस्तदा तैरेव प्रतिकृतिः कार्या तदुक्तं छंदोगसूत्रे अथातः पुनर्दाहविधिं व्याख्यास्यामो यदि शरीरं न श्येयदस्थीन्यादाया स्थीनि क्षीरोदकेन प्रक्षाल्यास्थिभिः कृष्णाजिनेन पुरुषाकृतिं कृत्वा चत्वारिंशता शिरो दशभिर्ग्रीवां विंशत्योरः त्रिंशतोदरं पंचाशता पंचाशता बाहू तयोरेव पंचभिः पंचभिरंगुलीः सप्तत्या सप्तत्या पादौ तथैवांगुलीरष्टाभिः शिश्नं द्वादशभिर्वृषणं तान्कुशैर्वेष्टयित्वा तस्मिन्नेव पूर्ववद्दहेदिति अस्यार्थः चत्वारिंशता पलाशवृंतैः शिरः संपाद्य दशभिर्ग्रीवां विंशत्योरः त्रिंशतोदरं पंचाशतैकं बाहुं तत एव पंचभिरंगुलीः तथा सप्तत्या सप्तत्या पादद्वयं तत एव पंचभिः पंचभिरंगुलीः एवं च पंचषष्ट्यैकः पादः संपन्नः अष्टाभिः शिश्नं द्वादशभिर्वृषणद्वयं एवं च षष्ट्यधिकत्रिंशत्या पलाशवृंतैरवयवकल्पनं भवति तां प्रतिकृतिं तस्मिन्नेव कृष्णाजिन एव पूर्ववद्दिति पितृमेधविधिना दहेदित्यर्थः एतादृशे विषये कालनियमः अकारादिषु इत्यादिनोक्तः यत अथातः संप्रवक्ष्यामि यत्पुनर्दहनं नृणां इति पद्यसमुदायेन कालशुद्धिमुक्त्वा अतीतविषये काम्येनुनेष्वाद्ये महालये एतत्सर्वं विचिंत्य शुक्लयोश्चाद्य मतं द्वितदृति कण्वपेन कालातीतविषयत्वेनाभिधानात् तत्राधिकारी पुत्रः यस्मिन्नेव दिने पित्रादिमरणं श्रूयात्तद्दिनमारभ्यैव यथोक्ताशौचाधिकारी भवति तदाह पैठीनसिः पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति अन्येषां तु देशांतरमरणे विशेषमाह वृद्धवसिष्ठः मासत्रये त्रिरात्रं स्यात् षण्मासात्पक्षिणी तथा अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुद्ध्यतीति पक्षिणी सार्धदिनं आगामिवर्तमानाहर्युक्तायां निशि पक्षिणीत्यमरोक्तेः अथ कृत्वेत्युक्तेमरणे श्रवण राम· २२

मेवाशौचनिमित्तं भवति निर्दिष्टं ज्ञातिमरणं श्रुत्वेति मनूक्तेश्च दशाहेभ्यो निर्गतं निर्दशं दशाहेभ्यो बहिरित्यर्थः द
शाहपरं स्वस्ववर्णाशौचोपलक्षणं षट्त्रिंशन्मतेपि ॥ उभाभ्यामापरिज्ञाते भोक्तुर्दोषस्तु यावेहेदिति यदि तु दशाहमध्ये
शृणुयात्तदा शेषाहोभिरेवाशौचं तस्य स्यात् उक्तं च मिताक्षरायां विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं यच्छे
षं दशरात्रस्य तावदेवाशुचिर्भवेदिति दशरात्रस्येत्युपलक्षणं वर्णापेक्षया वयोवस्थयापेक्षया वा यस्य यावानाशौच
काल उक्तः तन्मध्य एव विदेशागतमरणश्रवणे सत्याशौचावशिष्टैरेवाहोभिर्विशुध्यतीत्यर्थः अत एव वृद्धमनुना मरणे
नित्यमाशौचमनुधावति सपिंडांश्चैवं बंधूंश्च यत्र क्वचन गच्छतीत्याद्येवं विधानि देवलादेवलादिमुनिवाक्यानि श्र
वणनिमित्ताशौचपराणि व्याख्येयानि तत्र वर्णाशौचदिनसंख्यामाह हरीतः ॥ शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः
वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यतीति तत्र यदा मरणदिनादारभ्य यथोक्ताशौचदिनमध्ये एवं चेन्मरणं शृणुया
त्तदावशिष्टाशौचदिनमध्ये अथवा स्वस्ववर्णोक्ताशौचदिवसातिक्रमानंतरं चेन्मरणं शृणुयात्तत एव दिनादा
रभ्य यथोक्ताशौचदिनमध्ये प्रतिकृतिसंस्कारः चिकीर्षितस्तदा यथासंभवं दिनशुद्धिर्विचार्या अत एवोक्तं गर्गेण
आशौचमध्ये क्रियते इत्यादि भद्रा भरणी धनिष्ठापंचकादिदोषराहित्यमपेक्षितं नैव बहुकालव्यापि शुक्रास्तादिदो
षापेक्षा कार्येति गर्गवाक्ये यथासंभवपदस्यार्थः सर्वथा त्वाशौचदिनेषु दुष्टेषु दोषतारतम्येन महादोषत्यागेन स्व
ल्पदोषांगीकारो यथालोकप्रसिद्धिः तादृशे दिने एव प्रतिकृतिदाहो विधेयः सर्वथा दोषरहिते दिने तूत्तम एव सः अ
थ यदि मरणश्रवणानंतरमाशौचदिनानां राजिकदैविकब्राह्मणग्रलाभरूपप्रतिबंधादतिक्रमणमभूत्तदाशौचमस्ति
न वेति विचारः तत्र राजिकदैविकोपद्रवसंभावनायां सत्यां सद्य एव शौचं स्यान्नत्वाशौचं यदाह पराशरः ॥ दुर्भिक्षेरा
ष्ट्रसंपाते आपदां च समुद्भवे उपसर्गमृते चैव सद्यः शौचं विधीयत इति यमबृहस्पती अपि ॥ दैवेभये समुत्पन्ने प्रधानांशे
विनाशिते सद्यः शौचं समाख्यातं कांतारापरिसंयतीति पैठीनसिरपि विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि न तत्र
सूतकं तद्वत्कर्म यज्ञादिकारयेत् कालांतरालभ्यायां गयादियात्रायां तादृश एव तीर्थकर्मणि तीर्थस्नानदानादिक

मीणि तादृशेविषये आशौचग्रहाभावादेवशावप्रतिकृतिदाहाभावः यदा तु ब्राह्मणाय लाभस्तदाशौचपरिग्रहः स्यादेव प
रं त्वाशौचदिनानंतरं वर्षमध्ये दिनशोधमपेक्ष्यैव शावप्रतिकृतिदाहो विधेयः आशौचविनिवृत्तौ चेत्पुनः संस्क्रियतेऽतः
संशोध्यैव दिनं ग्राह्यमिति गार्ग्यैवकारसहितदिनपदोक्तेः अयमर्थः अत्रापि भद्राभरणीपंचकादिदोषः कतिपयदि
नव्यापीत्याद्य एव न तु शुक्रास्तादिकबहुकालव्यापिदोषप्रतीक्षा तदुक्तं ज्योतिर्निबंधे पितृमेधे शुक्रस्यास्तमनेचैव
देवेज्यस्य तथैव च प्रेतकार्यं प्रकुर्वीत प्रथमं वत्सरं विनेति अथ यदि वर्षमध्ये पिताज्ञिकर्तृविकाद्युपद्रवः संपन्नः तदाव
र्षांतरं निरवधिके दक्षिणायनशुक्रास्तादिमहादोषरहिते भद्राभरणीपंचकादिदोषरहिते च काले शावप्रतिकृतिदाहः
कार्यः उक्तं च गार्ग्येण ऊर्ध्वं संवत्सराद्यदि प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणमित्यादीनि मूलवाक्यानि प्रागभिहि
तानि अत एव मूलपद्येप्यूर्ध्वपरतोयामप्ययने तथा देवेज्यशुक्रास्तके शावप्रतिदाहो न कार्य इति व्याख्येयं प्रथमे
वर्षे तु नायं दोषः सर्वत्रापि गयागोदावर्योः तीर्थयोः प्राप्तयोः सतोरयं शुक्रेज्यास्तदक्षिणायनादिमहादोषविचारः
कोपि नास्ति तदुक्तं ज्योतिर्निबंधे प्रेतमंजर्यां प्रेतकार्याणि सर्वाणि व्रतस्नानजपादिकं वर्ज्यं शुक्रेज्ययोरस्ते गयां
गोदावरीं विनेति अन्यानि गयागोदावरीविषयाणि वचांसि प्राक् शुक्रानीत्यलमतिप्रसंगेन अथ नक्षत्रसंबंधेन
मुहूर्तानुक्त्वा नक्षत्रप्रसंगान्नक्षत्रविशेषोत्पन्नस्याभुक्तस्य मूलदोषमनेकविधं सफलमुपशांतिकाम्याह अभु
क्तमूलं घटिकाचतुष्टयं ज्येष्ठांत्यमूलादिभवं हि नारदः वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकं
अथोचुरन्येप्रथमा'' व द्योमूलस्य शाक्रांतिमपंचनाड्यः जातं शिशुं तत्र परित्यजेद्वा मुखं पिता स्याष्टसमा न प
श्येत् अत्राभुक्तमूलस्यानेके भेदाः तत्रैकस्तावदयं भेदः ज्येष्ठानक्षत्रांत्यभवं ज्येष्ठांत्यं मूलादौ भवं मूलादिभवं
ज्येष्ठांत्यजातं घटीचतुष्टयं मूलादिजातं घटीचतुष्टयं मिलित्वाष्टौ घटिकाः प्रहरइति यावत्तावान्कालोऽभुक्तमूला
ख्यइति नारद आह ॥ उपलक्षणत्वाच्छ्लेषांतिमघटीचतुष्टयं मघादिमघटीचतुष्टयं चाभुक्तमूलाख्यः कालः यदा
ह नारदः ॥ योज्येष्ठामूलयोरंतरालप्रहरजः शिशुः अभुक्तमूलजः सोपि मघानक्षत्रयोरपीति अथ यापरो भेदः एके

एकेति ज्येष्ठांत्य एकघटी मितं मूलादौ घटीद्वयमितं एवं मिलित्वा त्रिघटिकमभुक्तमूलं स्यादिति वसिष्ठमुनिर्जगौ य
दाह वसिष्ठः॥ ज्येष्ठान्त्यपादघटिकामितमेव केचिन्मूलं ह्यभुक्तमपरे पुनरामनंति मूलाद्यपादघटिकाद्वितयेन सार्धम
ष्टौ समाः परिहरेदिह जातमभाग्यमिति समा वर्षाणि अथान्यो भेदः एकेति ज्येष्ठांत्या एकघटिका मूलाद्या अर्धघटिका मि
लित्वा एकार्धघटीप्रमाणमस्य तदेकार्धघटीप्रमाणकं शेषाद्विभाषितिकमपि तादृशमभुक्तमूलं स्यादिति बृहस्पतिर्जगौ य
दाह गुरुः॥ ज्येष्ठान्त्यघटिकार्धं च मूलादौ घटिकार्धकं तयोः संगता नाडी ह्यभुक्तं मूलमुच्यते इति अथेतरो भेदः अथे
ति अथ शार्ङ्गः पारस्करेण मूलनक्षत्रस्य प्रथमा आदिमा अष्टघटिकाः शाक्रस्य ज्येष्ठाया अंतिमाः पंच नाड्यो घटिकाः
एवमुभयोर्ज्येष्ठामूलयोरंतरालवर्तिन्यस्त्रयोदशघटिका अभुक्तमूलमिति लोका ऊचुः ज्येष्ठांत्या घटिकाः पंच मूला
द्यावष्टनाडिकाः अभुक्तमूलमिति तत्र जातं शिशुं त्यजेदिति स्मरणात् एवमभुक्तमूलस्यानेकभेदसंभवे कः सा
धीयानयं इति चेत् उच्यते नारदोक्तः पक्ष एव साधीयान् किमत्र प्रमाणमिति चेत् शृणु बहुमुनिसंवाद एवात्र प्रमा
णं तदाह कश्यपः ज्येष्ठान्त्यमूलयोरंतरालयामोद्भवः शिशुरभुक्तमूलजः सोप्यश्लेषापितृभयोरपीति वसिष्ठो
पि भुजंगपित्र्योरिह दस्रपौष्णभानां तदग्रभानां च यदंतराले अभुक्तमूलं प्रहरप्रमाणं त्यजेत्सुतं तत्र भवां सुतां चेति अतएव
पूर्वपूर्वमुक्तं वसिष्ठवाक्यं चेति केचिन्मताभिप्रायेण यतः तद्वाक्ये केचिदिति अपरे इति चेति उक्तिरस्ति यद्येवं घटीन्यूना
धिकभावाभिधायिनां प्राग्युक्तवाक्यानां का गतिरिति चेत् उच्यते दोषाधिक्याल्पत्वसूचनमेव गतिः अथाभुक्तमूल
संज्ञाकथनस्य प्रयोजनमाह जातमिति तत्राभुक्तमूलाख्ये काले जातं शिशुं बालकं उपलक्षणत्वात्तत्र जातां कन्यां वा
पिता परित्यजेत् निष्कासयेत् त्यजेत्सुतं तत्र भवां सुतां चेति वसिष्ठोक्तेः यद्यशक्यं निष्कासनं स्यात्तदा किं कार्यमित्यत
आह वेति वा अथवा पूर्वपक्षकर्तव्यताशक्तो पितास्य शिशोः कन्याया वा मुखमष्टसमाः अष्टौ वर्षाणि संवत्सरो वत्स
रो हायनोऽस्त्री शरत्समाः इत्यमरः तावंतं कालं न पश्येत् यदाह नारदः॥ अभुक्तमूलजं पुत्रं पुत्रीमपि परित्यजेत् अथ
वाब्दाष्टकं तातः तन्मुखं न विलोकयेदिति च्यवनोपि अभुक्तमूलसंभवं परित्यजेच्च बालकं समाष्टकं पिता यथा न तन्मु

मु.दी.
न.प्र.
२३

ख्वविलोकयेदिति गंडांतदोषस्तु विवाहप्रकरणे वक्ष्यत इति कृत्वात्र नोक्तः अथ प्रसंगान्मूलाश्लेषाजातस्य बालस्य चरणव
शेन शुभाशुभफलमुपजात्याह आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी तृतीये धनं चतुर्थोस्य शुभोथ शांत्या
सर्वत्र सत्स्यादहिमे विलोमं मूलनक्षत्रस्याद्येपादे प्रथमचरणे चतुर्थांश इति यावत्तत्र जातस्य शिशोः कन्याया वा पिता ना
शं मरणमुपैति प्राप्नोति तथा मूलद्वितीयपादे जननी माता नाशमुपैति तथा तृतीये मूलपादे धनं द्रव्यं नाशमुपैति चतुर्थो
मूलपादोस्य शिशोः शुभः शुभफलदः उक्तं च त्र स्वप्रसारे मूलाद्येंशे पितृनाशो द्वितीये मातुरेव च तृतीये धनधान्यादि
नाशस्तुर्ये धनागम इति तुर्ये चतुर्थे रत्नमालायां च तदाद्यपादके पिता विपद्यते जनन्यथ धनक्षयः तृतीयके चतुर्थकः
शुभावह इति अत्र पितुर्बहुस्त्रीत्वे पितुर्मातुरेव नाशो वा व्यानसापत्नमातुः यदाह कश्यपः मूलाद्यपादजो हंति पित
रं तु द्वितीयजः मातरं स्वां तृतीयोर्थान्हरः चतुरीयज इति येतामातृपाहुः सापत्नमातरि वाचनिकः यदाह गौतमः
पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलास्तदपत्यानि मातुलेयानीति अतः स्पष्टार्थमेव कश्यपवाक्ये स्वामिति पदो
पादानं अत्र विशेषो वसिष्ठसंहितायां मूलाद्यपादे दिवसे यदि स्यात्तज्जः पितुर्नाशनकारणं स्यात् द्वितीयपादे यदि
रात्रिभागे तदुद्भवो मातृविनाशकः स्यात् मूलाद्यपादे यदि रात्रिभागे तदात्मनो नास्ति पितुर्विनाशः द्वितीयपादे दि
नगे यदि स्यात्तु मातुरल्पो पितरास्ति दोष इति नारदसंहितायां च दिवाजातस्तु पितरं रात्रौ तु जननीं तथा आत्मानं संध्य
योर्हंति नास्ति गंडो विपर्यये इति एतदेव मातापितृगंडमिति जीर्णा व्यवहरंति अथ दोषसत्त्वे किं कार्यमत आह अथे
ति अथ यानंतरं शांत्या मूलाश्लेषाशांत्या स्वनुष्ठितया सर्वत्र चरणचतुष्टयेपि शुभमनिष्टफलनाशकं कल्याणं स्यात्
उक्तं च वसिष्ठेन नैर्ऋत्यभौजंगभगंडदोषनिवारणायाभ्युदयाय नूनं पितामहोक्तां ऋषिराज शांतिं प्रवक्ष्मि लोक
स्य हिताय सम्यक् शास्त्रोक्तरीत्या खलु सूतकांते मासे तृतीये प्यथवत्सरांत इति नैर्ऋत्यं मूलं तद्दोषः भौजंगम
श्लेषा तद्दोषः गंडो वक्ष्यमाणः तद्दोषश्च द्वंद्वांते श्रूयमाणं प्रत्येकं संबध्यते इति न्यायात् अतः तद्दोषाणां निवारणं तद
र्थं अत एव कश्यपेन तद्दोषशमनार्थं हि शांतिं कुर्यात् प्रयत्नत इति सामान्यत उक्तं अत्र वसिष्ठवाक्ये कालत्रयकथ

राम.
२३

नेसामर्थ्यासामर्थ्ये ज्ञातंध्येयं तथाहि यदिमातुःशीतलोदकस्नाने सामर्थ्यंस्यात् तदा सूतकांतएव शांतिः तत्राप्यशक्तौ
तृतीयेमासि शांतिः दीर्घरोगादिना तदाप्यशक्तिश्चेत्तर्हि वर्षे समाप्ते द्विवसे शांतिः मातृगंडेतु विशेषः तेनैवोक्तः मातृ
गंडेस्तेनजाते सूतकांते विचक्षणः कुर्याच्छांतिं नहोचेत् तद्दोषस्यापनुत्तये इति शिष्टास्तु सर्वत्रयस्मिन् दिने जन्म तन्नक्ष
त्रएव शांतिरिति व्यवहरंति ननु मूलपादचतुष्टयेपि शांतिः कर्तव्येत्युक्तं तत्र चतुर्थचरणस्य शुभफलत्वात् शांतिरयुक्तेति
प्रतिभाति अनिमित्तकृता शांतिर्निमित्तायोपजायते इति स्मरणात् उच्यते यद्यपि चतुर्थचरणे धनागमरूपं शुभफल
मभिहितं तथाहि **कश्यपेन** सुहृदश्च तृतीयजः इति सुहृन्नाशरूपस्य फलस्य फलनिष्ठस्योक्तेस्तत्परिहारार्थमवश्यंक
र्तव्या शांतिः नहि कस्यचिद्धेतोर्विनाशवन्मातुलादीनेकसुहृन्नाशादृष्टः किंच मूलवृक्षविचारेपि चतुर्थपादे पुरुषकन्ययोर
शुभफलकथनाच्च मूलवृक्षस्तु समनंतरमेवमयावक्ष्यते किंच यदि मूलाश्लेषादिदोषसंभवे शांतिर्न क्रियते तदानिष्टंभ
वत्येव नारदस्त्वाह **[illegible]** मातरं तु त्रिवर्षतः द्युम्नं वर्षद्वयेनैव श्वशुरं नववर्षतः जातं बालं वत्सरेण वर्षैः पंच
भिरग्रजं श्यालकं चाष्टभिर्वर्षैरनुजातं तु सप्तभिः तस्माच्छांतिं प्रकुर्वीत प्रयत्नाद्विधिपूर्वकमिति द्युम्नं धनं तस्मा
द्वयं चरणचतुष्टयेपि शांतिर्विधेयेति अहिभे विलोममिति अहिभे आश्लेषायां उक्तं तत्फलमश्लेषाचतुर्थपादोत्प
न्नस्यात् मूलस्य द्वितीयपादे मातृनाश इत्युक्तं फलं तदश्लेषातृतीयचरणोत्पन्नस्य मूलस्य तृतीयचरणे धननाश इत्यु
क्तं तदश्लेषाद्वितीयचरणोत्पन्नस्यस्यादश्लेषाद्वितीयचरणोत्पन्नस्यस्यात् मूलस्य चतुर्थपादे शुभ इत्युक्तं तदश्लेषाप्र
थमचरणोत्पन्नस्यस्यादित्यर्थः **नारदकश्यपौ** फलंतदेवसार्प्येर्के प्रतीपंत्वन्यपादतः इति **वसिष्ठोपि** मूलाद्यपादजनि
तः पितरं निहंति द्वितीयजः स्वजननीं त्रिपदोर्थहंता तौर्यजः शुभकरः फलमेतदेव वैलोमतो भुजगधिष्ण्यभवस्य सर्व
मिति द्वितीयएव द्वैतीयः प्रज्ञादेराकृतिगणत्वात्स्वार्थेण् एवं तौरीयवैलोमशब्दौ साध्यौ अयमर्थः स्पष्टउक्तो मार्क
रव्यवहारे सार्पांशेप्रथमे राज्यं द्वितीये तु धनक्षयः तृतीये जननीनाशः चतुर्थे मरणं पितुरिति अश्वः चरणः अत्रल
ग्नेदोषसत्तिदुष्टफलमविकलं भवतीत्याह बादरायणः मूलसार्पादिजो दोषस्त्यात्संपूर्णं तु लग्नगे सक्रूरे लग्ने च विबले

मु·टी·
न·प्र·
२५

अभद्दष्टिवर्जितइति अनेनाश्लेषादोषेपि शांतिकं विधेयमिति अत्रसंमतिवाक्यंप्रागभिहितं तत्रमूलशांतिरश्लेषाशांति
श्चास्माभिः गंडांतेभद्रभेतिपद्यव्याख्यानामंतरं लिखिष्यते अथात्रप्रसंगान्मूलवृक्षविचारोभिधीयतेजयार्णवे मूलस्तं
भः त्वचाशाखापत्रंपुष्पंफलंशिखा अनयोष्टौदिशोरुद्राःसूर्याःपंचाब्धयोग्नयः मूलेतुमूलनाशःस्यात्स्तंभेवित्तविनाश
नं त्वचिमातृभ्रमेवेत्क्लेशः शाखायांमातुलस्यच पत्रेराज्यंविजानीयात्पुष्पेमंत्रिपदंस्मृतं फलेचविपुलालक्ष्मीःशिखायामल्प
जीवितमिति अथमूलाख्यस्यपुरुषस्यांगेषुघटीविन्यासस्तत्रैव मूलस्यघटिकान्यासोमूर्ध्निपंचनृपोभवेत् मुखेसप्तभ्र
तिःपित्रोःस्कंधेवेदा४महाबलः बाह्वोरष्टौबलीपाण्योस्त्रिस्रोहत्यान्वितोभवेत् हृदिखदाभूपमंत्रीनाभौद्वौब्रह्मविद्भवे
त् गुह्येदशातिकामीस्याज्जानुनोःषण्महामतिः पादयोःषण्मृतिस्तस्यत्युक्त्वान्कमलासनइति अथमूलोद्भूतायाःक
न्यायाःफलार्थंमूलांगविभागस्तत्रैव चनेत्रनाडिकाःशीर्षेऊर्ध्वेतिपशुनाशनं मुखेषट्धनहानिःस्यात्कंठेपंचधनागमः कौ
टिल्यंहृदयेपंच बाह्वोर्विज्ञागमंचतत वेदाः४ पाण्यादयाधर्मंवेदा४ गुह्येतिकामिनी ज्येष्ठमातुलनाशःस्यात् जंघयोर्युगना
डिकाः ज्येष्ठभ्रातृविनाशःस्याच्चतस्रोजानुयुग्मके पादयोरीशनाड्यःस्युस्तत्रवैधव्यमादिशेत् इतिमूलप्रसूतायाःसफल
मीरितमिति अस्यार्थः शीर्षेचनेत्राघटिकामुखेषट्६ कंठेपंचहृदयेपंचबाह्वोर्बाहुद्वयेपंचपंचेतिवीप्सा पाणौमिलि
बंधाद्वयोभागयोःस्युस्ततःचतस्रइत्यत्रवीप्सा गुह्येचतस्रः जंघयोर्जंघाद्वयेद्वेद्वे २२ एवंचतस्रः जानुद्वयेद्वेद्वे एवंचतस्रः पं
चपंचेत्येवंदश१० एवंमिलित्वाषष्टि६० घटिकाभवंति अथाश्लेषाजातयोःपुत्रकन्ययोरंगविभागेनफलंतत्रैवोक्तं मूर्ध्निपंचस
पुत्राग्निमुखेसप्तपितृहाखयः नेत्रेद्वेजननीनाशोग्रीवायांत्रिषुलंपटः स्कंधेवेदागुरौभक्तिर्हस्तेश्लिष्टौचबलीभवेत् हृदयेकादशभिः
चात्मघातीसंज्ञायतेनरः स्त्रीवानाभौभ्रमःषड्भिर्गुह्येदेनवतपोधनः पादेपंचधनंहंतिसापीदेतत्फलंक्रमात्इति अथाश्लेषाहेतो
पितृत्रिकोक्तः फलंपुष्पदलंशाखात्वक्स्तंभस्कंधवच मार्षवल्पादशाष्ठोकस्वरदिग्धार्कसागराः नाडिकास्तद्भवेद्बालेफलं
तेषांयथाक्रमं श्रीश्रीराज्ञभयंहानिर्मातृपित्रात्मसंक्षयइति अत्रचविभागोनक्षत्रस्यषष्टिघटिकात्मकत्वेज्ञेयः न्यूनाधिकत्वे राम·
तुत्रैराशिकसिद्धं वसिष्ठेनत्वन्यथापिकियत्तन तत्रपुजानस्यारिष्टमुक्तं विचार्यईश्वमध्येद्विपादेशूर्वीषाढादिघ्नपा २५

दे तृतीये जातः पुत्रः चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातरं चात्मनाशं द्विमासस्योत्तरे दोषः षष्ठे चैव त्रिमासिकः पूर्वाषाढा
ष्टमे मासि चित्राषाण्मासिकं फलमिति अत्रोत्तराशब्देनोत्तराषाढा गृह्यते पूर्वाषाढासाहचर्यात् अत एवापि नक्षत्रेषु
यथाशक्ति मूलवत् शांतिकं दोषपरिहारार्थं विधेयं परं तत्र देवताभेदेनैकैकवलं ध्येयः स च तत्तत्स्वामिकृतः तत्तन्मंत्रास्तु
वेदादेवावगंतव्याः संक्रांतिकं तिथिगंडांतशांतावस्माभिर्वक्ष्यत इत्यलमतिप्रसंगेन अथ मूलनिवासं फलसहितं च
वज्रांकुशः साह स्वर्गे शुचिप्रोष्ठपदेषमाघे भूमौ नभः कार्तिक चैत्र पौषे मूलं ह्यधस्तात्तपस्यमार्गे वैशाखशुक्रेषु शुभं
च तत्र शुचिराषाढः प्रोष्ठपदो भाद्रपदः इष आश्विनः माघः प्रसिद्धः एषु मासेषु मूलं मूलनक्षत्रं स्वर्गेस्ति स्वर्गेस्थिता
सस्तस्य नभः श्रावणः अन्ये प्रसिद्धाः श्रावणकार्तिकचैत्रपौषेषु भूमौ मूलं तिष्ठति एष मूलनिवास उक्तः एतत्फ
लं च मूलनक्षत्रं यदा यस्मिन्मासे यत्र वसति तत्रैव स्वर्गभूमिपातालेष्वेव स्वोक्तं शुभाशुभफलं ददाति ॥ अयमत्र
तात्पर्यार्थः द्रव्याद्यभावेन शांतिकं कर्तुमशक्नुवतः पुंसः स्वर्गपातालनिवासित्वेन मूलस्यारिष्टदोषः तथा न प्रभ
वेत् यदा तु भूमावेव निवासस्तदा दोषनिवारणेनैव स्यादित्यशक्तेनापि शांतिकं भवेत् नैतावता प्रागुक्तविषये
शांत्यभाव एव किंतु यथाशक्ति तत्रापि शांतिकं शक्तेन तु सर्वत्रैव विधेयं तदुक्तं ज्योतिर्निबंधे ॥ मार्गे फाल्गुनवै
शाखे ज्येष्ठे मूलं रसातले माघाश्विननभस्येषु शुचौ मूलं सुरालये पौषश्रावणचैत्रेषु कार्तिके भूमिसंश्रितं भूमिष्ठ
दोषबहुलं स्वल्पमन्यत्र संश्रितमिति क्वचित्संक्रांतिपरत्वेन मूलनिवासोऽभिहितः वृषालिसिंहेषु घटे च मूलं दिवि स्थि
तं युग्मतुलांगनांत्ये पातालगं मेषधनुःकुलीरनक्रेषु मृत्याविति संस्मरंति स्वर्गे मूले भवेद्राज्यं पाताले च धनागमं
मृत्युलोके यदा मूलं तदा शून्यं विनिर्दिशेदिति ज्योतिषरत्ने भिहितत्वात् अथ मूलप्रसंगात् दुष्टेषु गंडांतादिनिमित्तेषु
सत्सु जातस्यारिष्टं सपरिहारं शार्दूलविक्रीडितेनाह गंडांतेंद्रभशूलपातपरिघव्याघातगंडावमे संक्रांतिव्यतिपातवै
धृतिसिनीवालीकुहूदर्शके वज्रे कृष्णचतुर्दशीषु यमघंटे दग्धयोगे मृतौ विष्कंभे सोदरभे जनिर्नृपितृभे शस्ता शुभा शांतितः
एतेषु पदार्थेषु सत्सु जनिः शिशोरुत्पत्तिः न शस्ता अशुभफलदा गंडांतः संधिविशेषः स त्रिविधो नक्षत्रतिथिलग्नभेदेन त

लक्षणं ज्येष्ठायां सुभे इत्यादिना वक्ष्यति इंद्रज्येष्ठानक्षत्रं मूलं मूलाख्यो दुष्टयोगः पातो महापातः महागणितसाध्यो व्य
तीपाताख्यो वैधृताख्यश्च परिघव्याघातगंडाश्च पि दुष्टयोगाः श्रवमस्तिथिक्षयः संक्रांतिः सूर्यस्य राश्यंतरसंक्रम
णपुण्यकालः व्यतीपातवैधृती सप्तदश सप्तविंशतितमौ दुष्टयोगौ सिनीवाली दृष्टेंदुरमावस्या कुहूर्नष्टेंदुरमावास्या
दृष्टेंदु सिनीवाली सा नष्टेंदुकला कुहूरित्यभिधानात् दर्शः चंद्रदर्शनादर्शनरहितामावस्या एतच्चाग्रे सम्यक्प्रतिपा
दयिष्यते वज्रे दुष्टयोगे कृष्णे कृष्णपक्षे चतुर्दशी कृष्णचतुर्दशी बहुवचनमाद्यर्थाभिप्रायं यमघंटे मघाविशाखादइत्युक्ते
दुष्टयोगे केचित्तु चापांत्यगे गोच्चरे गोपतंगइति वक्ष्यमाणे दुष्टयोगइति व्याचख्युः एतो द्वौ शांतो यादित्यादिनोक्ते
मृत्युयोगे विष्टौ भद्रायां सोदरस्य भ्रातुर्भगिन्या वा भे नक्षत्रे पितृभे माता च पिता च पितरौ तयोर्भे मातृभे पितृभे
च एषु निमित्तेषु सुतस्य सुतायां वा जन्म चेत् स्यात्तदनिष्टकृत् स्यादित्यर्थः दुष्टनिमित्तस्योपलक्षणत्वात् सूर्यचंद्रग्र
हण जन्माप्यनिष्टं सजातीयापत्यत्रयप्रसवानंतरविजातीयापत्यप्रसवस्त्रीतरः यथा पुत्रत्रयप्रसवानंतरमेक
न्याया जननं कन्यात्रयप्रसवानंतरं पुत्रस्य जननं अतएव त्रिभ्यः सजातीयेभ्य इतरो विजातीयस्त्रीतरः त्रीचे त्रीतरे
ति सुत्यतिस्त्र त्रीतरस्त्र त्रीतरा च त्रीतरो पुमान्स्त्रियेत्येकशेषः अथ परिहारोऽप्युच्यते सा ज्ञनिः शांतितो च सिष्टाद्यृषि
प्रोक्तायाः शांत्याः स्वनुष्ठितायाः शुभा परिणामसुखदायिनी शारीरक्लेशानुभवपूर्वक नीरोगदीर्घायुष्यं शिशोः
स्यादित्यर्थः अत्र मूलवाक्यानि सशांतिकानि लिख्यंते तत्र प्राकाद्यप्रतिज्ञानासकलशांतिसामान्यकमौपयि
की च मूलशांतिस्तावदुच्यते शौनक उवाच अथातः संप्रवक्ष्यामि मूलजातहिताय च त्यागो वा मूलजातस्य स्या
दष्टाद्धात्पदर्शनं अभुक्तमूलजातानां परित्यागो विधीयते अदर्शने वापि पितुः सन्ततिष्ठेत्समाष्टकं एवं चेद्रहित
ज्ञेयं मूलजातफलं बुधैः मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने समा
ष्टे कु वा मतिमान्कुर्याद्दूर्शांतिमादरात् यदेव शांतिकं कुर्यात्कर्म प्रचक्ष्यते सुसमे पुण्यदेशे तु मंडपं कारयेद्बुधः मंडप
परिमाणं वसिष्ठेनोक्तं ईशान्यामथवा प्राच्यां उदीच्यां दिशि कल्पयेत् मंडपे च षडभिर्हस्तैः चतुर्भिर्वा समंततः चतुर्दश

चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतं पिष्टेन कल्पयेत्सर्वं तत्र गोमयमंडले ॐ उंच तद्बहिः कुर्याद्गृहयज्ञोक्तमार्गेण इति पुनःशौ
नकः शुण्याग्निर्मंत्रितैस्तायैः प्रोक्षिता याक्षितास्ततः तत्रोदकुंभं सुदृढं रक्तवर्णविवर्जितं अकृष्टस्थलं निर्णिक्तं पूरयेन्निर्मलां
भसा वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा कूर्चहेमसमायुक्तं चूतपल्लवसंयुतं स्वस्तिकोपरि विन्यस्य व्रीहिद्रुमसपल्ल
वैः द्रोणव्रीहीस्त्रीनिक्षिप्य ईशाने च निधापयेत् पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं तत्र
प्रतिरथं सूक्तं शतरुद्रानुवाककं रक्षामंत्रं पुण्यं रक्षोघ्नं च स्पृष्ट्वा जपेत् त्र्यंबिकं जपेत्सम्यक् अष्टोत्तरसहस्रकं एकवा
रं तथाज्ञापी पावमानीः स्पृष्ट्वा नु जपेत् जपस्य पंच ॐ भाश्च द्वयं वा तदलाभतः श्रीरुद्रस्यैकं ॐ भः च सूर्वसूक्तानि तत्र तु त
थान्यपंचमं ॐ भं पूर्वोक्तैर्लक्षणैर्युतं चतुःप्रस्थवणं कुर्यात्त्येव चतुर्द्वेत् वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा पंचरत्न
समायुक्तमाम्रपल्लवसंयुतं गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॐ भस्य
नैरृते देशे होमदेशं प्रकल्पयेत् गोमयालेपिते देशे कुर्यात्स्थंडिलमुत्तमं कृत्वाभिमुखपर्यंतमुल्लेखादि स्वशाखतः पूर्णे
पात्रविधानांतं कृत्वा प्रज्ञां समारभेत् नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः निष्कमानेन चार्धेन पादेनाथ स्वशक्तितः प्रति
मां लक्षणैर्नेकां कारयित्वा विचक्षणः यद्वा मूल्यं सुवर्णस्य स्थापयित्वा प्रपूजयेत् सुवर्णं सर्वदेवत्यं सर्वदेवात्मकोनलः
सर्वदेवात्मको विप्रः सर्वदेवमयो हरिः संस्मरेन्निरृतिं श्याममंसमुखं नरवाहनं रक्षोधिपं खड्गहस्तं दिव्याभरणभूषितं प्रति
माप्रजनार्थाय वस्त्रयुग्मं प्रकल्पयेत् पंकजं कारयेद्भूमौ रक्ताभैर्व्रीहितंडुलैः चतुर्विंशद्दलोपेतं शुक्लैर्बीजकर्णिकान्विते
तस्योपरिन्यसेत्पात्रं स्वर्णं वा रौप्यमेव च ताम्रं यं सूक्ष्मवस्त्रेण संछाद्य तत्र मूलानि निक्षिपेत् मूलानीति ग्राममूलानि तदलाभा
विष्णुक्रांता सहदेवी तुलसी तु शतावरी मूलानीमानि गृह्णीयात् शतावलाभे विशेषतः स्थापयेत्कर्णिकामध्ये वस्त्रगंधा
द्यलंकृतं कूर्चहेमजलोपेतं कुंभोषधिसंयुतं कुंभोपरिन्यसेत्पात्रं मूलनक्षत्रदैवतं अधिप्रत्यधिदेवौ च दक्षिणोत्तरदे
शयोः अधिदेवं जपेदादौ जपेद्वानक्षत्रदेवतां अधिप्रत्यधिदेवौ च दक्षिणोत्तरदेशयोः पूर्वाषाढायां जलं उत्तराषाढास्वहं
विश्वेदेवाः विष्णुः वसवः वरुणः अजैकपात् अहिर्बुध्न्यः पूषाश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः बृह

मु·दी·
न·प्र·
२६

स्पतिः सर्पाः पितरः भगश्चार्यमा सविता त्वष्टा वायुः इंद्राग्नी मित्रः इत्याद्या अनूराधांतमर्चयेत् ऐंद्रादीशानपर्यंतं पूजयेत्स्वस्व
नामतः स्वलिंगोक्तैःचमंत्रैश्च प्रधानादीन्प्रपूजयेत् पंचामृतेन संस्नाप्य आवाहनाद्यैः समर्चयेत् उपचारैः षोडशभिर्वा पंचो
पचारकैः रक्तचंदनगंधाद्यैः पुष्पैः कुसुमसितादिभिः मेषशृंगादिरूपैश्च धूपैर्दीपैः तथैव च सरापोलिकमांसाद्यैर्नैवेद्यैर्भोजना
दिभिः मत्स्यमांससुरादीनि ब्राह्मणो नाविवर्जयेत् सुरास्थाने प्रदातव्यं क्षीरं सैंधवमाश्रितं पायसं लवणोपेतं मांसस्थाने प्र
कल्पयेत् उक्तगंधाद्यलाभे तु यथालाभं समर्पयेत् पुष्पांतं तु समभ्यर्च्य होमं कुर्याद्यथोदितं निर्वापप्रोक्षणादीनि चरोः कु
र्याद्यथाविधि हविर्गृहीत्वा विधिवत्तेनर्त्यैव स्रुचाहुनेत् मोषुणः परापरेति यत्तेदेवेतिवा पुनः पायसं घृतसंमिश्रं हुनेद
ष्टोत्तरशतं हुनेत् होमयेत् समिदाज्यचरून्पश्चात् शक्तितः संख्यया हुनेत् अधिदेवतयोः चैव जुहुयात्स्वस्वमंत्रतः चतुर्थ्यं
तेन नमोंतैश्च स्वाहांतैः स्वस्वमंत्रकैः नक्षत्रदेवताभ्यः पायसेन तु होमयेत् समिदाज्यचरून्पश्चात्क्रमशश्चेति पंचदशाभिर्जु
हुयात्क्रमशस्ततः गायत्र्या जातवेदसे त्र्यंबकमिति क्रमात् सीरायुंजंतिताममिंवाक्षेत्रोष्यन्त्यभिमेव च तामग्निवर्णां तपसा
ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः क्षेत्रस्यपतिना गणानां त्वेंद्र तं तथैव च
श्रीसूक्तेन तथा विद्वान्समिदाज्यचरून्क्रमात् अष्टोत्तरशतेनाथ अष्टाविंशतिभिः क्रमात् अष्टाष्टसंख्यया वापि जुहुयात्तु श
क्तितो बुधः त्वं नः सोमेन पायसं तु जुहुयात्त्रयोदश चतुर्गृहीतमाज्यं च यातेरुद्रेति मंत्रतः स्रुवेणाज्जुहुयादाज्यं महाव्याहृतिभिः
क्रमात् हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्यो यजमानो वा अग्नौ पूर्णाहुतिं हुनेत् होमशेषं समाप्याथ
वह्निमारोपयेद्बुधः कुंभाभिमंत्रणं कुर्याद्दक्षिणेनाभिमंत्रयेत् मृत्युप्रशमनार्थाय जपेत्त्र्यंबकं शतं रुद्रकुंभोक्तमार्गेण
रुद्रमंत्रं स्पृशञ्जपेत् धूपं दीपं च नैवेद्यं कुंभयुग्मे निवेदयेत् प्रसादयेत्ततो देवमभिषेकार्थमादरात् तस्मिन्काले ग्रहाति
थ्यं कर्तव्यं भूतिमिच्छता पृथक्पृथक्शास्त्रं तत्रैव नक्षत्रेष्वास हैव च अभिषेकविधिं वक्ष्ये सर्वाचार्यैरुदीरितं भद्रासनोपविष्ट
स्य यजमानस्य चर्त्विजः दारपुत्रसमेतस्य कुर्युः सर्वेभिषेचनं अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च आपोहिष्ठेति नव
भिरापद्रुहाद्वयेन च सहस्राक्षेण चेनापि देवस्य त्वेति मंत्रकैः शिवसंकल्पमंत्रेण वरुणस्य मार्गैःचमंत्रकैः योसौ वज्रधरो देवोम राम· २६

हेंद्रो गजवाहनः मूलजातशिशोर्दोषं व्यपोहतु यमो मम यो ऽसौ खड्गधरो देवो निऋती राक्षसाधिपः प्रशामयतु मूलोत्थं दो
षं गंडांतसंभवं यो ऽसौ पाशधरो देवो वरुणश्च जलेश्वरः नक्रवाहः प्रचेता ऽसौ मूलोत्थाघं व्यपोहतु यो ऽसौ देवो जगत्प्राण
मारुतो मृगवाहनः प्रशामयतु मूलोत्थदोषं गंडांतसंभवं यो ऽसौ निधिपतिर्देवः खड्गशूलध्वजिवाहनः मातापित्रोः शिशोः
चैव मूलदोषं व्यपोहतु यो ऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः आश्लेषामूलगंडांतदोषमाशु व्यपोहतु विघ्नेशः क्षेत्रपाड
गोलोकपाला नवग्रहाः सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः तत्कुंभोदकाभिषिक्तं तु सर्वदोषोपशांतिदं सर्वकामप्रदं दिव्यमं
गलानां च मंगलं वस्त्रांतरितकुंभाभ्यां पश्चात्स्नापयेद्बुधः ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः यजमानो दक्षिणाभि
स्तोषयेदृत्विगादिकान् धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकां निऋतिप्रतिमां वस्त्रं कुंभं होमं च दापयेत् ग्रहार्थं वस्त्र
प्रतिमाः तत्तद्भ्यो भूसुरेभ्यो दापयेत् श्रीरुद्रजापिने देयः कलशान्यन्यानि यत्नतः तत्कुंभवस्त्रप्रतिमास्तस्मै दद्यात्प्रयत्नतः इतरे
भ्यो ऽपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणां उक्तालाभे तु तन्नो दद्यादाचार्यब्रह्मऋत्विजां तत्तन्मूल्यं प्रदातव्यं शक्त्या वा ऽथ प्रदाप
येत् आचार्याय च यद्दत्तं तदर्धं ब्रह्मणे भवेत् सदस्याय ब्रह्मणोऽर्धं ऋत्विग्भ्यश्च तदर्धकं आशीः च तेभ्यो गृहणीयाद्ब्राह्मणान्स्था
पद्भमापयेत् दद्यादन्नं पायसादि ब्राह्मणान्भोजयेच्छतं अलाभे सति पंचाशद्दशकं तदभावतः सर्वशांतेश्च पठनं ब्रा
ह्मणेभ्याशिषस्तथा गृहीत्वा मापयेद्विद्वान्निऋतिः प्रीयतामिति विधाने चरिते स्मिंस्तु ततः शांतिर्भवेद्ध्रुवं गंडांते ऽप्येवं
कृते कृत्स्नपुण्यार्जिते हृदेवता समाष्टके द्वादशाहे ज्येष्ठाशांतिमादरात् इत्युक्तमनुना सम्यक् मूलजातहिताय च माता
पित्रोर्धनस्यापि बंधोः शोकोपशांतये इति श्रीशौनकप्रोक्तमूलशांतिविधिः ॥ अथाश्लेषाशांतिविधिरुच्यते आश्लेषायां
तु जातायां शांतिं वक्ष्याम्यतः परं जातस्य द्वादशाहे च शांतिहोमं समाचरेत् असंभवे तु तज्जन्मर्क्षे ऽन्यस्मिन्वा शुभे दि
ने स्नातो मंगलादिभिस्तस्मिन्वरयेत्सुद्विजोत्तमान् विभवे पंचकुंभांस्तु द्वयं वा तदलाभतः देवतास्थापने चैकं कुंभकं तु
द्राभिमंत्रणे मूलदोक्तप्रकारेण कुंभं निक्षिप्य पूजयेत् गोमयालेपिते देशे धान्याद्यैः परिशोभिते पंकजं कारयेत्
त्र च तत्र विष्टरदलादिकं तंडुलैः कारयेद्धीमान् पीतसितासितैः कर्णिकायां न्यसेद्व्रीहीं स्थापयेत्तेषु कुंभकं आकल
शाद्यन्नया कलशस्थापने शुभं इमं मइति मंत्रेण पूरयेत्तीर्थवारिणा कुंभं च गंधवस्त्राद्यैस्तत्तन्मंत्रैः प्रपूजयेत् याः फलिनी

मु॰दी॰ न॰प्र॰ २७

रित्यनयाञ्जिपद्गन्नोषधाश्चिकान् कुंभोपरिस्थपात्रे तु अश्लेषाप्रतिमां न्यसेत् निष्कं निष्कार्धपादैर्वा कारयित्वा स्वशक्तितः तत्पूर्वा
न्नरेनदक्षत्रे दक्षिणेन तयोर्यजेत् ऐंद्रादीशानपर्यंतमितरक्षोणि पूजयेत् मूलोक्तेन विधानेन कुंभयोरभिमंत्रणं रुद्राद्वारुद्रकुंभे
तु पूर्ववच्चोषमाचरेत् नमोस्तु सर्पेभ्य इति पूजामंत्र इतीरितः सर्पी रक्तस्रग्विनेत्रश्च द्विभुजः पीतवस्त्रकः फलकाधिधरस्तीक्ष्णो
दिव्याभरणभूषितः एवं ध्यात्वा ततोभ्यर्च्य होमकर्म समाचरेत् कर्तृशाखोक्तमार्गेण आचार्यस्याथवाचरेत् सुखांतं कर्म निर्मा
य हविरादाय शुभस्ततः इदं सर्पेभ्यो जुहुयात्साधिप्रत्यधिदेवतं अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा मूलनक्षत्रवच्छेषं होम
शेषं समापयेत् पूर्णाहुत्यंतकर्माणि कृत्वा संपातकं तथा कुंभाज्जलं तु प्रक्षिप्य अभिषेकं समाचरेत् दारपुत्रसमेतस्य यजमा
नस्य पूर्ववत् अभिषिंचेन्नथाचार्य ऋत्विग्भिः सहितस्ततः अभिमंत्रितकुंभाद्भिरभिषेचनमाचरेत् तथा पौराणमंत्रैश्च पल्ल
वैरभिषेचयेत् अश्लेषाऋक्षजातस्य मातापित्रोर्धनस्य च पितृभ्रातृकुलस्थानां दोषं सर्वं व्यपोहतु योसौ वागीश्वरो नाम
अधिदेवो बृहस्पतिः मातापित्रोः शिशोश्चैव गंडांतं च व्यपोहतु पितरः सर्वभूतानां रक्षंतु पितरः सदा सर्पनक्षत्रजातस्य
वित्तज्ञातिचबांधवान् एवं कृते अभिषेके तु सर्पशांतिर्भवेद्ध्रुवं ततः शुक्लांबरधरो यजमानः सुभूषितः दक्षिणाभिस्ततो वि
प्रान्मूलवच्च प्रतोषयेत् भुक्तवद्भ्यश्च विप्रेभ्यः स्वीकुर्यादाशिषं गृही इत्युक्तेन विधानेन सर्वारिष्टं व्यपोहति सर्वकामा
श्च सिद्ध्यंति वेदोक्तायुर्भविष्यति इत्युक्तं सर्पशांत्यर्थं सारमागमचोदितं मानवानां हितार्थाय मनुना सार्वकामिकं सर्पाधी
श नमस्तुभ्यं नागानां च गणाधिप गृहाणार्घ्यं मया दत्तं सरिष्टप्रशांतये इत्यर्घमंत्रः मूलनक्षत्रवत्कुर्यात्तु पिंगदेवस्तनामतः
इति श्रीमानवसंहितायामश्लेषाशांतिविधिः॥ एतच्च मूलाश्लेषाशांतिकद्वयं विवाहे उपस्थिते श्वश्रूश्वशुरस्य श्वश्र्वाश्च
सत्वे मूलाश्लेषोत्पन्नयोरपि वधूवरयोस्तत्तदनिष्टनिवृत्त्यर्थं विधेयं॥ उपलक्षणत्वाच्चज्येष्ठाविशाखोत्पन्नायावध्वावर
स्य ज्येष्ठबंधुकनिष्ठबंधुपीडाशांतये च यदाह वसिष्ठः॥ नैऋत्यभोद्भूतसुतः सुता वा हिप्राद्वयं श्वश्रुश्वशुरं निहंति तद्द
त्यपादेज्जनितो निहंति नैवोत्क्रमेणाहिभवः कलत्रं॥ अहिश्लेषा अहिभव इति पुंस्त्वमविवक्षितं सुरेशताराजनिता ध
वाग्रजं द्विदैवताराजनितात्तु देवरमिति नारदोपि मूलजा श्वश्रुरं हंति व्यालजा च तदंगना ऐंद्री पत्यग्रजं हंति देवरं तु राम॰ २७
द्विदैवजा शांतिर्वा पुष्कला चेत्स्यात्तर्हि दोषो न कश्चनेति अथान्याः शांतयः श्लोकक्रमेणोच्यंते तत्र तावन्नक्षत्रगंडा

तच्छांतिविधिरुच्यते॥ गंडशांतिं प्रवक्ष्यामि सोममंत्रेण भक्तिमान्‌ कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवं अष्टाभिश्च चतुर्भिश्च
चतुर्भिश्च द्वाभ्यां वा शोभनं तथा तन्मध्ये पायसंपूर्णं खे नवनीतेन पूरिते राजतं चंद्रवर्मेति सितपुष्पसहस्रकैः देवज्ञः क्षौम
वाससा स्रक्‌शुक्लमाल्याम्बरार्चितः सोमोहमिति संचिंत्य पूजां कुर्यादतंद्रितः जपेत्साहस्रकं मंत्रं श्रद्दधानः समाहितः आप्या
यस्वेति मंत्रेण पूजां कुर्यात्समाहितः दद्याद्दक्षिणामिष्टां गंडदोषप्रशांतये शुक्लं वागीश्वरं चैव ताम्रपात्रसमन्वितं गंडदोषा
पशांत्यर्थं दद्याद्वेदविदे शुचिः इति श्रीनक्षत्रगंडांतशांतिविधिः॥ अथ नक्षत्रगंडांतलक्षणमन्यैर्मुनिभिरेवमुक्तं अश्विनीम
घमूलादौ त्रिषड्नवनाडिकाः रेवतीसार्पशाक्रांते मासाश्च ऋतुसाधकाः अश्विनीमघमूलादौ नाडिकाद्वितयं तथा रेवती
सर्पशाक्रांते नाडिकाद्वितयं तथा अश्विनीमघमूलानां पूर्वार्द्धे बाध्यते पिता पूषाहिशक्रपश्चार्द्धे जननी बाध्यते शिशोः पितृ
हा तु दिवा जातो वा रात्रिजातस्तु मातृहा आत्मघ्नं संध्ययोर्जातो नास्ति गंडो निरामयः सर्वेषां गंडजातानां परित्यागो विधीयते व
र्जयेद्दर्शनं तावत् नवषाण्मासिकं भवेत्‌ अथ तिथिलग्नगंडांतशांतिविधिरुच्यते अभुक्ते तत्र जातस्य स्नानकांत्यदिने तथा
शांतिश्च भक्तिवा कुर्यान्नावत्पुत्रं न लोकयेत्‌ तिथिगंडेत्वनड्वाहं नक्षत्रे धेनुरुच्यते कांचनं लग्नगंडेतु गंडदोषो विनश्यति आ
द्यभागे पितुर्गंडं त्रयाणामभिषेचनं इतरत्र शिशोर्मातुरभिषेकं च कारयेत्‌ उत्तरे तिलपात्रं स्यात्तिष्ये गोदानमुच्यते अन्ना
प्रधानं त्वाष्ट्रे च पूर्वाषाढे च कांचनं उत्तरातिष्यचित्रासु पूर्वाषाढे द्विजस्य च कुर्याच्छांतिं प्रयत्नेन नक्षत्राकारवान्बुधः स्व
वर्णेन तदर्धेन यथावित्तानुसारतः नक्षत्राधिपतेरूपं कृत्वा वस्त्रद्वयान्वितं वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकं शा
तौषधानि मृत्पल्लवसंयुतान्‌ पूजांते समिदन्नाज्यैर्होमं तिलवैस्तथा ततः पूर्णाहुतिं हुत्वा वेदाध्यायिकुटुंबिने उत्तरा
प्रथमे पादे तिलपात्रं तथैव च तिष्ये तु गां सवत्सां च सुशीलां च पयस्विनीं अन्नं चित्रासु वै दद्यात्पूर्वाषाढे तु कांचनं य
वांश्च व्रीहिमाषांश्च तिलमुद्गांश्च दापयेत्‌ यथावित्तानुसारेण कुर्याद्ब्राह्मणभोजनं पितुरायुष्यवृद्ध्यर्थं शांतिरत्र विधी
यते एवं यः कुरुते सम्यक्छांतिकर्म समाहितः न दोषैर्लिप्यते नूनं पद्मपत्रमिवांभसा॥ आयुरारोग्यमैश्वर्यं संप्राप्नोति
दिने दिने धनधान्यसमृद्धिं च पुत्रपौत्रसमृद्धिमान्‌ इत्युत्तरगार्ग्येणोक्ता तिथ्यादिगंडांतशांतिविधिः॥ अथ ज्येष्ठाशांतिविधिरुच्य

मु.दी. ते ॥ तत्र प्रत्येकं घटिकाषट्कस्य फलान्याह भरद्वाजः ज्येष्ठादौ मातृजननीं मातामहं द्वितीयके च तृतीये मातुलं हंति चतुर्थे जननीं त
न.प्र. था ॥ आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत् सप्तमे कुलनाशः स्यादष्टमे ज्येष्ठसोदरः नवमे श्वशुरं हंति सर्वत्र दशमे तथा इति शौन
२८ कउवाच ॥ सुखासीनमृषिश्रेष्ठं गर्गं मुनिगणान्वितं कृतांजलिपुटो भूत्वा पप्रच्छ किल शौनकः ज्येष्ठानक्षत्रसंभूतगंडदोषविनि
र्णयं तस्य शांतिविधानं च वद मे मुनिसत्तम शौनकस्य वचः श्रुत्वा प्रत्युवाच महामुनिः शृणु शौनक यत्नेन गंडदोषविनिर्णयं
तस्य शांतिविधानं च वद मे मुनिसत्तम शौनकस्य वचः श्रुत्वा प्रत्युवाच महामुनिः घटिकैका च मैत्रांत्ये ज्येष्ठादौ घटिकाद्वयं तयोः सं
धिरिति ज्ञेयं शिशुर्गंडसमीरितं प्रथमे च द्वितीये च ज्येष्ठर्क्षे च तृतीयके पादे ये जातनरः श्रेष्ठोप्यत्र प्रजायते श्रेष्ठांत्यपादजातस्त्वपि
तुः स्वस्य विनाशनः जायते नात्र संदेहो दशाहे प्यंतरे तथा ज्येष्ठर्क्षे कन्यका जाता हंति शीघ्रं धवाग्रजं तच्छांतिं तस्य वक्ष्यामि गंड
दोषप्रशांतये सुदिने शुभनक्षत्रे चंद्रताराबलान्विते सूतकांते तथा कुर्याज्ज्येष्ठाशांतिविधानतः वज्रांकुशधरं देवमैरावतग
जान्वितं कुर्याच्छचीपतिं रम्यं देवेंद्रं सुरनायकं कर्षमात्रसुवर्णेन कर्षार्द्धेनाथ पादतः तद्विधानं प्रकुर्वीत वित्तशाठ्यं न कारये
त् शालितंडुलसंपूर्णे कुंभस्योपरि विन्यसेत् इंद्रायेंद्रो मरुत्वत इति मंत्रेण वाग्यतः गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः पूज
येद्विधिना विप्रो लोकपालगणान्वितं रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं तत्र संस्थापयेत्कुंभांश्चतुर्दिक्षु विशेषतः तन्मध्ये स्था
पयेत्कुंभं शतच्छिद्रसमन्वितं पुण्योदकसमायुक्तान्वस्त्रयुग्मेन वेष्टितान् कुंभेषु विन्यसेद्धीमान्पंचगव्यं समंत्रकं पंचामृतं पंचरत्नं मृत्तिकाः
पंचसंख्यकाः पंचवृक्षकषायांश्च पंचपल्लवकांस्तथा सुवर्णकुशदूर्वाश्च शतौषधि विनिक्षिपेत् पूजयेद्वारुणैर्मंत्रैः कुंभान्धीमान्प्रय
त्नतः त्वं नो अग्ने जपेदादौ स त्वं नो पि द्वितीयकं समुद्रज्येष्ठा इति चैव मंत्रमेनं गते चतुर्थकं पूजयेद्ब्रह्मसूक्ताद्यैश्चतुरः कलशानपि जपं कु
र्युः प्रयत्नेन मंत्रैरेभिर्द्विजोत्तमाः आ नो भद्रा जपं चादौ भद्रा अग्ने द्वितीयकं इंद्रसूक्तं रुद्रजाप्यं जपं पश्चात्स्वयं ततः इत्थं संपूज्य देवेशं
वरुणं कुंभसंस्थितं स्वसंकल्पविधानेन होमकर्म ततश्चरेत् समिद्भिर्ब्रह्मवृक्षस्य शतमष्टोत्तरं तथा सर्पिषा चरुणा चैव मूलमंत्रे
णा वाग्यतः हुते जाप्यं च तेनैव यत इंद्र भयेति च तिलान्व्याहृतिभिर्हुत्वा शतमष्टोत्तरं पृथक् भार्याशिशुसमोपेतं यजमानं विशे राम.
षतः अभिषेकं प्रकुर्वीत सूक्तैर्वारुणसंज्ञितैः समुद्रज्येष्ठादिभिर्मंत्रैरिमं मे वरुण स्तथा द्यौः शांतेत्यादिभिर्मंत्रैरभिषेकं समाच २८

देत् अभिषेकनिर्वृत्तौ तु यजमानः समाहितः स्वच्छांबराणि धृत्वा च ऊर्ध्वीदाज्यावलोकनं रूपंरूपेति मंत्रेण चित्रं नत्वा च होदेवता
देवताश्च ततः स्थित्वा धूपदीपनिवेदनं दद्यादाचमनं सम्यक्कृतांजलिरचिंतः तथैव च नमोस्तु सहस्रनाथाय नमस्तुभ्यं शचीपते गृहा
णार्घ्यं मया दत्तं गंडदोषप्रशांतये कार्यं तत्पूजकादीनां कारितं यत्फलं शुभं लब्धा तत्फलं सर्वं देवेंद्राय समर्पयेत् आचार्यो
य च गां दद्यात्सुशीलां च पयस्विनीं रक्तवर्णां वत्सयुतां सर्वालंकारभूषितां वस्त्रयुग्मापिधानां च यथाविभवसारतः यज्ञांग
धर्मसिद्ध्यर्थं पूजितोसि शचीपते दानेनानेन देवेश गंडदोषं विनाशय अष्टोत्तरशतं संख्या ऊर्ध्वीद्ब्राह्मणभोजनं तेभ्योपि
दक्षिणां दत्वा प्रणिपत्य क्षमापयेत् इमां कृत्वा उपेष्टशांतिं यथाविधियुक्तमानतः गंडदोषं विनिर्जित्य आयुष्मान् जायते न
रः इत्युक्तं वृद्धगार्गेण शौनकाय विशेषतः ज्येष्ठानक्षत्रसंभूतगंडदोषप्रशांतये अज्ञानाद्वाथवाज्ञानाद्विकल्पाद्वाधनस्य
च यन्न्यूनमतिरिक्तं च तत्सर्वं क्षंतुमर्हसि इति श्री वृद्धगार्ग्यसंहितायां ज्येष्ठानक्षत्रप्रसूतिशांतिविधिः ॥ अथ मूलयो
गस्य महागणित साध्यायो वैधृतिव्यतीपातात्वयोः पातयोश्च परिघव्याघ्यातगंडवमानां भद्रायाश्च वज्रस्य यमघंटस्य मृ
त्युयोगदग्धयोगयोश्च शांतिविधिरभिधीयते अथातः संप्रवक्ष्यामि जन्मकाले विशेषतः गंडांतानां च नामानि महादो
षकराणि च दिनक्षये व्यतीपाते व्याघाते विधिवैधृतौ शूले मंडे च परिघे वज्रे च यमघंटके कालगंडे मृत्युयोगे दग्धयोगे
सुदारुणे तस्मिन्गंडदिने प्राप्ते प्रसूतिर्यदि जायते अतिदोषकरी प्रोक्ता तत्रापापयुते सति विचार्य तत्र दैवज्ञः शांतिं कुर्याद्य
थाविधि यजनं देवतानां च ग्रहाणां चैव पूजनं दीपं शिवालये भक्त्या घृतेन परिदापयेत् अभिषेकं शंकराय अश्वत्थस्य प्रद
क्षिणं आयुर्वृद्धिकरं ज्ञाप्यं सर्वारिष्टविनाशनं गुरुदेवतविप्राणां पूजनं गोत्रवर्धनं पुष्ट्यायुस्तुष्टिशांत्यर्थमभीष्टफल
सिद्धये सर्वारिष्टपरीहारार्थाय यज्ञं समाचरेत् शिवाय विधिवद्भक्त्या दीपदानं करोति यः अखंडे गोघृतेनैव स वै मृत्युंजये
नरः विघ्नमूर्तिं महाघोरं अश्वत्थं श्रीकरं सदा प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युंजयं जपेत् सर्वसंपत्समृद्ध्यर्थं नित्यं क
ल्याणवृद्धये अभीष्टफलसिद्ध्यर्थं ऊर्ध्वीद्ब्राह्मणभोजनं अभिषेकं शिवे शांतिं कृत्वा भक्त्या नरोत्तमः अकालमृत्युं नि
र्जित्य दीर्घायुर्जायते नरः गाणपत्यं पुरुषसूक्तं सौरं मृत्युंजयं शुभं शांतिजाप्यं पुनःचैव कृत्वा मृत्युंजयी भवेत् मूले वा सा

मु·यो·
न·प्र·
२९६

पैगंडे वा कृयो रेतानियतंततः आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये इति श्रुत्युत्तरगार्ग्यप्रोक्तमूलादिदुष्टशांतिविधिः अथस
र्यसंक्रांतिव्यतीपातवैधृतियोगानां शांतिरभिधीयते अथातः संप्रवक्ष्यामि जन्मकाले विशेषतः वैधृतौ व्यतिपाते च महा
दोषोभिजायते कुमारजन्मकाले तु व्यतीपातः च वैधृतिः संक्रांतिश्च रवेस्तत्र जातो दारिद्र्यकारकः दरिद्रत्वं महद्दुःखं व्याधि
पीडा महद्भयं अश्रियं मृत्युमाप्नोति नात्र कार्या विचारणा स्त्रीणां च शोकोद्दुःखं च सर्वनाशकरं भवेत् शांतिर्वा पुष्कला चेत्स्यात्त
त्रदोषात्तु कष्टं न गोमुखप्रसवं कृत्वा क्रांतिं कृत्वा प्रयत्नतः आयुर्वृद्धिकरार्थाय जपाभिषेकदानैश्च होमादपि विशेषतः नव
ग्रहमखं कृत्वा क्रांतिं कृत्वा प्रयत्नतः दोषोपशांतये प्रथमं गोमुखाज्जन्म ततः शांतिं समाचरेत् गृहस्य पूर्वदिग्भागे गोमयेना
नुलिप्य च अलंकृते तु स्वदेशे तु व्रीहिराशिं प्रकल्पयेत् द्रव्यत्रितयराशौ तु अष्टपत्रं लिखेद्बुधः पुण्याहं वाचयित्वा तु आचा
र्यं वृणुयात्सुरा आचारवंतं धर्मज्ञं कुलीनं च कुटुंबिनं मंत्रतत्त्वार्थतत्त्वज्ञं शांतिकर्मणि कोविदं पंचांगभूषणं दद्यात्स्वदेव
च्चांगुलीयकं राशौ प्रतिष्ठितं कुंभं सव्रणं सुमनोहरं तीर्थोदकेन संभृत्य सर्वौषधिपल्लवं पंचगव्यं पंचरत्नं वस्त्रयुग्मेन
वेष्टयेत् तस्योपरि न्यसेत्पात्रं सूक्ष्मवस्त्रेण संयुतं प्रतिमां स्थापयेद्धीमान् साधिप्रत्यधिदैवतं चंद्रादित्यावृतीपार्श्वे मध्ये
वैधृतिमर्चयेत् एवमेव व्यतीपातशांतौ संक्रमणस्य वा भानोरुत्तरतो रुद्रमग्निं दक्षिणतो यजेत् निष्कमात्रेण चार्धेन पा
देनापि स्वशक्तितः प्रतिमाः कारयेद्धीमांस्तत्तल्लक्षणलक्षिताः प्रतिमाः पूजनार्थाय वस्त्रयुग्मं निवेदयेत् अधिदैवं भवेत्सू
र्य इंद्रः प्रत्यधिदैवतं तत्र व्याहृतिपूर्वेण तत्तन्मंत्रेण पूजयेत् त्रियंबकेन मंत्रेण प्रधानप्रतिमां यजेत् उदुत्यमिति मंत्रे
ण सोमसूक्तं समाचरेत् आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत् उपचारैः षोडशभिर्यद्वा पंचोपचारकैः अर्चितं गंध
पुष्पाद्यैः फलनैवेद्यमर्पयेत् मृत्युंजयेन मंत्रेण प्रधानप्रतिमां स्पृशन् अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तथा अष्टाविंशति
वा चाथ प्रजप्याथ स्वशक्तितः सर्वे सौरं प्रजप्याथ सोमार्थं सोममंत्रतः आनो भद्रेति सूक्तं च भद्राअग्नेश्च सूक्तकं जपेच्च
पौरुषं सूक्तं त्रियंबकमतः परं कुंभस्य चैव चतुर्दिक्षु जपं कुर्युस्त्वथर्त्विजः कुंभस्य पश्चिमे देशे स्थंडिले ग्निं प्रकल्पयेत् स्व राम·
गृह्योक्तविधानेन कारयेत्संस्कृतानलं त्रियंबकेन मंत्रेण समिदाज्यचरून्हुनेत् अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तथा अष्ट २९६

विंशतिवाचाथ प्रजप्याथ स्वशान्तितः सर्वे सौरं प्रजप्याथ सोमार्थं सोममंत्रतः आनो भद्रेति सूक्तं च भद्रा अग्नेश्च सूक्तकं
जपेच्च पौरुषं सूक्तं स्वस्य शक्त्यनुसारतः मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत् ततः स्विष्टकृतं कृत्वा अभिषेकं च कारयेत्
समुद्रज्येष्ठाः सूक्तेन आपोहिष्ठेत्यृचेन च अश्वीम्पामिति सूक्तेन पावमानीभिरेव च त्रियंबकेन उत्सूर्य आप्यायस्वेति
मंत्रतः सुरास्त्वामिति मंत्रेण अभिषेकं समाचरेत् अभिषेकान्ते तु वस्त्रमाचार्याय प्रदापयेत् श्वेतवस्त्रधरो भूत्वा भू
षणाद्यैरलंकृतः यजमानः स्त्रियायुक्त आज्यावेक्षणमाचरेत् आचार्यं पूजयेत्पश्चात् ह्रस्वहोमाङ्गुलीयकैः गोदानं वस्त्र
दानं च स्वर्णदानं विशेषतः तद्दोषशमनार्थाय आचार्याय प्रदापयेत् प्रच्छादनपटं दद्यात्ततः शान्तिर्भविष्यति जापकेभ्यो
ब्राह्मणेभ्यो दक्षिणाभिस्तु तोषयेत् दीनान्धकृपणेभ्यश्च प्रदद्याद्भूरिदक्षिणां ब्राह्मणान् शतसंख्याकान् मिष्टान्नैर्भोजये
च्चतान् बंधुभिः सह भुंजीत यथाविभवसारतः एवं यः कुरुते मर्त्यो नैव दुःखमवाप्नुयात् आयुरारोग्यमैश्वर्यं मातापित्रोः
शिशोरपि सर्वदुःखनिवृत्त्यर्थं पुत्रपौत्रप्रवर्धनं सर्वान्कामानवाप्नोति शान्तिं कुर्वन्हि मानवः इति श्रीकृत्यसारगार्ग्योक्तव्य
तीपातवैधृतिसंक्रान्ति शान्तिविधिः ॥ अथ कुहूसिनीवालीरूपउभयलक्षणव्यतिरिक्तेश्चेति यतो द्विविधामावस्या अ
मावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः स्याद्दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूरित्यमरोक्तेः निशि चंद्रवती सा तु पूर्णि
मानुमतिश्च सा दिवाचंद्रवतीत्येकात्तद्वदेव द्विधाप्यमा सिनीवाली चंद्रवती नष्टचंद्रा कुहूर्मतेति कश्यपोक्तेश्च अमा
वास्याया द्विविधत्वमवसीयते युक्तं चैतत् दृष्टचंद्रात्वं नष्टचंद्रात्वं वा अमावास्यायाः संभवति न पुनरुभयाभावेन तृती
यामावास्येति नन्विदमप्ययुक्तं यतो रवीन्द्वोरंशाद्विप्रकर्षे चंद्रदर्शनं कालांशवशेनोक्तं न राहुभास्करः ॥ दस्रेन्द्वेशे
लभुवः चशक्रारुद्राः स्वचंद्रास्तिथयः क्रमेण चंद्रादितः काललवा निरुक्ताः ज्ञशुक्रयोर्वक्रगतौ द्विहीना इति द्वादशांश
नेन चांतरेणामावस्यालक्षणस्य तिथेर्निष्पत्तिः उक्तं च सूर्यसिद्धांते अर्काद्विनिःसृतः प्राची यद्यात्यहरहः शशी तच्चांद्रमा
नमंशैस्तु ज्ञेयो द्वादशभिस्तिथिरिति एवं च कथं दृष्टचंद्रा सिनीवालीत्युक्तं कथं नष्टचंद्रा कुहूरिति कथं चानयोर्भेद इति
विनाप्रयोजनं नैकस्य वस्तुनोऽनेकसंज्ञाकरणं न युक्तमिति चेदुच्यते नहि कालांशवशेन ग्रहाणामस्तोदयौ किंतर्हि

मु॰ चिं॰
न॰ प्र॰
३॰

द्देत्रांशावशेन तदुक्तं सूर्यसिद्धांते॥ अष्टादशशतांशाप्तास्ता दृश्यांशाः स्वोदयासुभिः विभक्ताः पलभं क्षेत्रांशास्ते दृश्यादृश्यताम
नैति तथाच सूर्यास्तकालिकौ पश्चात्प्राच्यामुदयकालिकौ दिवाकरग्रहौ कृत्वा दृक्कर्माथ ग्रहस्य त्वित्यादिना प्रकारेण द्वि
ध दृक्कर्मसंस्कारसंस्कृताच्चंद्रादेः राश्युदयवैषम्येन देशभेदेन चानियतत्वा कदाचिदमावस्यायामपि सार्द्धद्वादशभिरंशैः
रंतरितः चंद्रो दर्शनगोचरो भवति कदाचित्षोडशांशांतरितो द्वितीयामपि चंद्रो दृग्गोचरो न भवति एवमेव कदाचिच्चतुर्दशीशेषेच
न दृश्यते कदाचिदल्पावशिष्टायां प्रतिपद्यपि दृश्यते अत एव गर्गेण प्रतिपद्दिने तस्य चंद्रस्य फलविशेषोभिहितः तथाच ग
र्गसंहितायां यथा चंद्रः प्रतिपदि नो संप्रदृश्यते उत्तरोज्ज्वलशृंगः स्यात्स्निग्धः चातिमनोहरः क्षेमं सुभिक्षमारोग्यं सर्वभूतेषु
निर्दिशेदिति अत एव भारविणापि प्रणमंत्यनपायमुत्थितं प्रतिपच्चंद्रमिव प्रजा नृपमिति किरातार्जुनीये प्रयुक्तं अत्रैतस्य
टीकाकारः प्रतिपच्छब्देन प्रतिपत्सहचरिता द्वितीया गृह्यते प्रतिपदि चंद्रदर्शनाभावादिति व्याचख्यौ सोचिंत्योक्त्या ध्येयाः न
नु प्रतिपदि चंद्रोदय उत्पातः तद्दर्शनमशुभफलमिति चेन्न गणितविसंवादिवुधादिदर्शनं गणितज्ञानाशकमेव केत्वादिद
र्शनं चोत्पात इति तल्लक्षणं प्रागुक्तं मया चंद्रोदयस्तु कदापि गणितं न व्यभिचरतीति प्रत्यक्षदर्शनात् प्रतिपद्दिने चंद्रस्य गर्गे
ण प्रशस्तफलाभिधानाच्च न ह्युत्पातानां नाम समीचीनं फलं कुत्राप्युक्तं सर्वत्र उत्पातान्विहाय वचनात् येन प्रतिपदि चंद्रोदयउ
त्पात इत्युच्येत तेन चतुर्दशीशेषप्रातः चंद्रोदयाभावोप्युत्पातो वाच्य इति तन्नाप्युक्तं उक्तादेव हेतोः तस्मात्क्षेत्रांशवशेनैव ग्र
हाणामस्तोदयौ भवतः कालांशास्तु क्षेत्रांशानिदानभूतत्वाय सामान्यतउदयास्तज्ञानसिद्ध्यै च तदेतन्निपुणचरणैष्टोडरा
नंदे चंद्रवारविलासे सम्यक्प्रतिपादितं तस्माद्दृक्कर्मसंस्कारवशेन चतुर्दशीशेषप्रातः चंद्रोदयो दृश्यते न दृश्यते च एवं प्रात
दमावस्यायामपि चंद्रोदयो न दृश्यते दृश्यते तस्मात्तदुक्तं स्याद्दृष्टेंदुः सिनीवाली सा नष्टेंदुकला कुहूरिति कल्पतरोपि द्वि
धैवामावस्येत्याह स्म तस्मादिदं युक्तमेव यदमावस्यायां चंद्रो दृश्यते तदामावस्या सिनीवाली यदा चंद्रोमावस्यायां न दृ
श्यते कुहूरिति परं त्विदमयुक्तं यदुभयराहित्येनामावास्यांतरमप्यस्तीत्यसंभवात् अत्र समाधिर्वैदिकास्तावदाहुः यस्याः राम॰
कस्याश्चिदमावस्याया अष्टौ विभागान्कृत्वा प्रथमविभागे चंद्रदर्शनमस्ति न वेति यदा चंद्रदर्शनं तदा सिनीवाली यदाचं ३॰

दर्शनं तदामावास्या सकलचंद्रक्षये कुहूरिति तदेतदुक्तं कुंडेगणविशिष्टे इंदुक्षयकालः श्राद्धकाल इति प्रस्तावेन्य इंदु
क्षयकालपरिमाणमुक्तं अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः अमावास्याष्टमे भागे पुनः किल भवेदणुरिति आ
ग्रहायण्यमावस्या न ग्राह्या ज्यैष्ठ्यां याभवेत् विशेषमाभ्यां ब्रुवते चंद्रचारविदो जनाः अत्रेंदुराद्ये प्रथमे वर्तते ह्येते चतुर्थभा
गे न कलावशिष्टः तदन एव क्षयमेति कृत्स्नं एवं हि ज्योतिःशास्त्रविदो वदंतीति आभ्यामिति स्पष्टोपर्पंचमी एते माव
स्याप्रकृत्येत्यर्थः एतत्कारिकात्रयं तद्भाष्यकारेण व्याख्यातं प्रहरनवात्मकः चंद्रक्षयकाल इति तत्रामायाः सप्तमाष्ट
मयामौ कृत्स्नक्षयकालः चतुर्दशीशेषयाम दर्शाद्ययामौ चंद्रसूक्ष्मताकाल इति किल शास्त्राभ्यामयमर्थो द्योत्यते च
तुर्दश्यंत्याद्ये एपं सूक्ष्मं अमांत्यभागे कृत्स्नक्षयकाल इति अमावास्याविशेषे ज्यैष्ठ्यादावमाद्ययामे चंद्रो दृश्यत इत्यर्थः
ज्योतिःशास्त्रकृद्भिरुक्तस्यार्थः पितृचरणैरभिहितः देशकालगणनाकुशलाः यथा गणयंति तदेवांगीकार्यमिति सूच्यते तत्र
शास्त्रे ज्यैष्ठ्यादिकालभिन्नकालेप्येवंविधोपलंभः ज्यैष्ठ्यादौ च नोपलंभो देशकालभेदेन संभवंतीति तदयमत्र विषयविवेकः
यस्याममावास्यायां प्रथमप्रहरे शास्त्रात्प्रत्यक्षतो वा चंद्रदर्शनं स्यात् सिनीवाली सर्ववादिसिद्धा तत्रोत्पन्नस्य सिनीवालीज
ननफलमादेश्यं सिनीवालीप्रयुक्ताशांतिश्च विधेया अथ तस्याममावास्या यदा नष्टेंदुकला तु स्यात्तदा कुहूरिति तत्रैक
स्याः चंद्रकलायाः किं चिन्नाशो वाखिलनाशो वेति संदेहे विनिगमना विरहात् कृत्स्नकलाक्षयविवक्षितो मुख्यत्वात् न यदि किं
चिन्नाशस्त्वपचीयमानत्वाद्गौणः स्याद्गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायात् मुख्यस्यैव ग्रहणमुक्तं स च कृत्स्नक्षयका
लो मावस्यांतिमक्षण एव तस्याश्चातिसूक्ष्मत्वाद्दुर्ज्ञानत्वात् संक्रांतिकालवदित्यमावस्यायाः सप्तमाष्टमप्रहरयोः कृत्स्न
क्षयकालस्य भाष्यकारेण परिभाषितत्वात् सप्तमाष्टमप्रहरात्मकः कालः कुहूशब्दवाच्यः तत्रोत्पन्नस्य कुहूजननफलं तच्छां
तिश्चादेश्या पुनस्तस्यामेवामावास्यायां प्रथमप्रहरादनंतरं सप्तमप्रहरादर्वाक् प्रहरपंचकात्मकः कालो दर्शशब्दवाच्य
इति तत्रोत्पन्नस्य दर्शजननफलं शांतिश्चादेश्या एवमेकस्यामेवामावास्यायां कालभेदेन त्रयं संभवति यदा त्वमावास्या
यां चंद्रदर्शनाभावः तदाद्ययमे दर्शत्वं कुहूत्वरूपं संभवति अत्र केचित् सिनीवाल्या विशेषमाहुः चतुर्दशीशेषस्पर्शे यदा

सु·दी· न·प्र· ३१

त्राक् चंद्रदर्शने ज्ञाते सति परदिने यामावास्या सा सिनीवालीति तथा च तन्त्रोहने बोधायनेनैवमुक्त्वा पठितं मध्याह्नं समयं या
स्वात्तत्र दर्शपूर्णमासानुवर्तते सिनीति सा त्वेषा पितृकर्मणि शस्यते इति धर्मशास्त्रेप्येतावत्पूर्णानिष्ठयोः सिवचांसि संति तेषामिदं श्रा
द्धकालनिर्णयोपयोगि परिभाषकं सिनीवालीत्वं न पुनर्जननादौ अतः निरुक्तिविरोधात् तथाहि दृष्टेंदुः सिनीवालीत्या
दिवाक्येषु दृष्टः चंद्रो यस्यां सा सिनीवालीति बहुव्रीहिः स चानेकमन्यपदार्थे इति विहितस्तत्रान्यपदार्थे तयोपस्थितामा
वास्यैव गृह्यते प्रकरणात् न चैवं सति चतुर्दश्यां चंद्रोदये सिनीवालीत्वं स्यात् दृष्टचंद्रा सिनीवालीत्येतावतैव लक्षणेन स
र्वासामपि दृष्टेंदुत्वात् सिनीवालीत्वेतत्प्रसक्तौ तिकाक्तिरनर्थिका स्यात् ननु च दृष्टः चंद्रो यस्यामित्यन्यपदार्थे सप्तमी सामी
प्यपरेति व्याख्यायते इति चेत् तस्याः सामीप्यसप्तम्याः गौणाधारपरत्वात् मुख्यासंभवे हि गौणग्रहणं युक्तं अत्र तु मुख्य
एवाधारः संभवत्यमावास्यारूप इति गृह्यते गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः इति न्यायात् ननु दृष्टः चंद्रो यस्या इति ष
ष्ठ्यंतेन्यपदार्थे बहुव्रीहौ संबंधमात्रं मुख्यमेव षष्ठ्यर्थ इति सामीप्यसंबंधवाचिषष्ठ्यंतेन्यपदार्थे बहुव्रीहिरयं भविष्यती
ति चेत् उच्यते सामीप्यादिसंबंधे मत्वर्थीयः प्रत्ययो बहुव्रीहिर्वा भविष्यतीति चेत् न चैवमपि वैयाकरणैरिष्यते तदे
तत्र रसास्त्यस्मिन्निति मतुबित्यत्र महाभाष्यकारेण प्रत्यपादि ननु च येषां पितरः सिनीवाल्यपि नष्टदृष्टचंद्रे स्मन्नेवा
सितपंचदश्यादिवाक्येषु बहुव्रीहिर्निर्देशो मतुब्निर्देशो वा नास्ति तत्र कथं चतुर्दश्यामपि चंद्रोदयस्य दृष्टत्वाद
मावास्यायाः सिनीवालीति संज्ञा स्यादिति चेन्न संभवति समानाधिकरणेऽपि वैयर्थ्यं करणस्यान्यायात् चंद्रोदयकरण समानाधि
मावस्यायहस्यैव युक्तत्वात् किंच सिनीपरेन सितावर्चद्रकलोच्यते सितशब्दः श्वेतवर्णवाची तस्मात्स्त्रियां वर्णादनुदा
त्तोपधात्तो न इति ङीप् नकारो सिनीतां वलते प्राप्नोति व्युत्पत्तिश्चतुर्दश्युदितचंद्रा अथ यामामावास्यायां न युज्यते क्लृप्तङित सम्
साना मभिधानं नियामकमिति भाष्यकारस्मरणाद्धिति तस्माद्दृष्टेंदुः सिनीवालीत्यमावास्यैवाभिधीयते इति यद्यप्युक्तं तदेवदृष्टा
यः एवमेकस्यामेवामावास्यायां सिनीवालीकुहूदर्शरूपभेदत्रयमुक्तं अथ सिद्धांतविरोधापत्त्या समादध्मः तत्र स्याद्दृष्टेंदुः सि राम· ३१
नीवाली सा नष्टेंदुकला कुहूरित्यादिषु हि दर्शपक्षे दृष्टवाच्यमेवाग्रावरणे हि प्रोक्तेन वा चतुर्दशपरत्वेन विवक्षित तयोरयास्साधिका

ष्टीत्यादर्शनयोगपत्वेसति पूर्वदिनेतिक्तकांतिष्टत्तसंबंधवत्त्वं ग्रहादेर्दर्शनशब्दवाच्यं मेघाद्याघवलोहिमशास्त्रीयदर्शनदर्शिवर्तते
आत्मा द्रष्टव्य इत्यादिवत् अत्रार्थे पक्षाचार्यैश्च नालोचनेपाणिनिरप्यनुकूलः अतो भास्करेणाप्युक्तं॥ निजनिजोदयलग्नस
मुद्गमेप्रतिदिनेस्तमयःप्रवहभ्रमादिति भास्करेणोक्तं तदनन्तरं सदाक्रांतिष्टनपश्चिमक्षितिजसन्निधिवशेनास्तलक्षणमुक्तं
नत्वपूर्वक्षितिजे दर्शनाभावलक्षणमिति मयोक्तं दर्शनाभावलक्षणं अतो दर्शनलक्षणवत्यमावास्या सिनीवाली नाम अदर्श
नलक्षणवत्यमावास्या कुहूर्नाम लक्षणद्वयाक्रांतामावस्या दर्शशब्दवाच्या इति यदा खल्वमावास्या सूर्योदयात्प्राक् घटिकात्र
यं घटिकाचतुष्टयं वा प्रतिपत्संबद्धा तदा सिनीवाल्येव अथ तादृश्यामेव न्यूनायां वाधिकायां वामावास्यायां त्वदुक्तो मशसंस्का
रवशेन चंद्रस्यादृश्यत्वमागतं सामावास्या संपूर्णा कुहूर्नाम चंद्रादर्शनलक्षणसत्त्वादेव तत्र कुहूजननफलं शांतिश्चादे
पूणा यदा तु सूर्योदयानंतरं कियतीषु घटीषु अतिक्रांतास्वमावास्या प्रवृत्ता ततः पूर्वं चन्द्रदर्शपेवावस्थिता न स्यात्तु षष्टिदंडा
मेव प्राप्तः चंद्रो दृष्टो मा वा दर्शितथाप्यमावास्यायां चंद्रदर्शनादर्शनलक्षणाक्रांतत्वात्सामावास्या संपूर्णा दर्शनाम तत्र दर्श
जननफलं शांतिश्च विधेयेति एवममावास्याभेदेन सिनीवाली कुहूर्दर्श इति संज्ञात्रयं सावकाशमित्यसम्मतं॥ अथ स्वगम
प्रकारेणभेदत्रयं ब्रूमः तत्र सिनीवाली सर्ववादिसिद्धा सैव बहुप्रकारांतरेण पारिभाषिकी यदाह वसिष्ठः॥ नक्षत्रेयस्य द
र्शांतो विषनाड्यां भवेद्यदि कुहूयोग इति ख्यातो व्याधिमृत्युभयादिकृदिति अयमर्थः यस्मिन्नक्षत्रे या विषनाड्युक्तास्त
स्मिन्काले यदि दर्शस्य समाप्तिर्दर्शचरमानाडी भवेत् तन्नक्षत्रे यस्य पुरुषस्य जन्मर्क्षं जन्मकाले कालांतरे वास्यां तस्य
पुंसो व्याधिमृत्युभयादिकृत्कुहूयोगो ध्येयः तत्र कुहूजननफलं शांतिश्च कालांतरेपि कुहूयोगसंभवे शांतिर्विधेया अ
त्र कुहूयोगे विशेषमाह स एव जन्मांशे यदि कुहूः स्यात्षण्मासान्मृत्युमाप्नुयादिति जन्मलग्ने यज्जन्मांशे मृत्युर्मासत्रयाद्
वेत् इति पूर्वोक्तकुहूयोगकाले जन्मांशभागः चंद्रः स्वव्यवधसंभवेसमध्ये मृत्युः यदि जन्मलग्नं तस्मिन्काले जन्मांशभागः चंद्रश्च तु भ
वसंभवे मासत्रयेण मृत्युरिति भावः अत एवोक्तं जगन्मोहनेवसिष्ठेन॥ यस्य जन्मर्क्षगः चंद्रो विषनाड्यां कुहूर्भवेत् अभिचारे
ण किं न स्यात्स्वयमेव मरिष्यतीति अतो विषनाडिकात्तः पूर्वकालो दर्शशब्दवाच्य इति एवमस्माभिः प्रकारत्रयेण सिनीवाली

ज्यो॰ कुहूदर्शानां भेदद्वयपारितस्तत्रयथासंप्रदायच्चवस्येत्यलमतिप्रसंगेन ज्योतिःशास्त्रमहोदन्वदवगाहनिविष्टधीः नील
न॰प्र॰ कंठांशगोविंदहनूमान्केनवार्यतां अथप्राक्प्रतिज्ञाता सिनीवालीकुहूशांतिस्तावदुच्यते सिनीवाल्यांप्रसूतास्याद्यस्यभा
३२ र्यापशुस्तथा गवाश्वंमहिषीचैवशक्रस्यापिश्रियंहरेत् येवसंतिद्विजाःस्वान्येस्वप्रसादोपजीविनः वर्जयेत्तान्नशेषांश्च
पशुपक्षिमृगादिकान् द्विजाःपक्षिणः कुहूप्रसूतिरत्यर्थं सर्वदोषकरीनृणां यस्यप्रसूतिस्तेषां तस्यायुर्धननाशने
सर्वगंडसमस्तत्रदोषस्तुप्रबलोभवेत् नारीविनावशेषाणांपरित्यागोविधीयते गोमहिष्यादीनां सिनीवालीकुहूप्रसव
वतसां त्यागोनतुनारीणामितिभावः परित्यागात्तुशांतिंकुर्याद्धीमान्विचक्षणः तत्फलंतद्धणार्धेनपुनरेवविलीयते न
त्यजेत्पंडितोमोहात्स्थानदानेनतोपिवा तद्योगनाशायेदाशुस्वयंवानाशमृच्छति कल्याणकृशांतिःकर्तव्याशीघ्रंदोषापनु
त्तये रुद्रःशक्रःचपितरःपूज्यादेवताक्रमात् कर्षमात्रसुवर्णेनतदर्धार्धेनवापुनः अथवाशक्तितःकुर्याद्विजःशाठ्यवि
वर्जितः प्रतिमांकारयेद्रुद्रःचतुर्भुजसमन्विता त्रिशूलखट्वांगवरदाभयहस्तायथाक्रमात् श्वेतवर्णाश्वेतपुष्पाश्वेतांब
रवृषस्थिता त्र्यंबकेनमंत्रेणपूजांकुर्याद्यथाविधि इंद्रःचतुर्भुजोवज्रांकुशचापसमायकाः रक्तवर्णोगजारूढोयत
इंद्रेतिमंत्रतः पितरःकृष्णवर्णाश्चचतुर्हस्ताविमानगाः घटपुस्तककमंडलुअभयानांचधारिणः येसत्याइतिमंत्रेणपूजांकुर्यात्
नंतरं आग्नेयीदिशमारभ्यकुंभान्कोणेषुनिक्षिपेत् तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसमन्वितं तथैवपंचगव्यादीस्तत्तन्मं
त्रैश्चनिक्षिपेत् कल्याणकृशांतिःकर्तव्याकुर्याच्छीघ्रंप्रयत्नतः गोदानंचस्वर्णदानंचसुवर्णंचोत्तमंशुभं दर्शदानानिचोक्तानि
क्षीरमाज्यंगुडंतथा आज्याविक्षणमेतानितत्तन्मंत्रैश्चकारयेत् समिदाज्यचरोहोमंतिलमाषैश्चसर्षपैः अश्वत्थप्लक्षपा
लाशसमिद्भिःखादिरैःशुभैः अष्टोत्तरशतंमुख्यंप्रत्येकंजुहुयाद्विजः त्र्यंबकेनमंत्रेणतिलान्व्याहृतिभिःपुनः चतुर्भिःकल
शैर्युक्तंचहत्कुंभसमन्वितं शांतिवत्कलशंकार्यमभिषेकंचकारयेत् पितृमातृशिशूनांचअभिषिंचेच्चवारुणैः शांकर
स्याभिषेकंचकुर्याद्ब्राह्मणभोजनं अन्येषांचैवसर्वेषांब्राह्मणानांचतर्पणं यथाशक्त्यनुसारेणद्विजवाचनपूर्वकं इत्युत्तर
गार्ग्योक्ता सिनीवालीकुहूशांतिविधिः अथदर्शशांतिरुच्यते अथातोदर्शजातानांमातापित्रोर्दरिद्रता तद्दोषपरिहारा राम॰ ३२

थं शांतिं वक्ष्यामि नारदः पुण्याहं वाचयित्वादौ कृतसंकल्पपूर्वकं ॐ उं वामं उलं ऊ यो ततो द्रोणस्थापयेद्घटं तत्कुंभे निक्षिपेद्द्रव्यं
दधिक्षीरघृतादिकं न्यग्रोधोडुंबराश्वत्थास्तथा चूतनिंबकास्तथा एतेषां पल्लवान्नानात्वगादीन्पंचसर्वास्तथा पंचरत्नानि निक्षिप्य
वस्त्रयुग्मेन वेष्टयेत् सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः आयांतु यजमानस्य दुरितक्षयकारकाः आपोहिष्ठा त्वं चे
नाथ कया नश्चित्र इत्यृचा यत्किंचेदं वरुणाचैव समुद्रज्येष्ठ इत्यृचा अभिमंत्र्योदकं पश्चाद् दर्भैः पूर्वोपदेशके हारिद्रं रक्तकं चै
व कृष्णं श्वेतं च नीलकं एतेषां तंडुलैश्चैव सर्वतोभद्रमंडलेत् दर्शस्य देवताया [illegible] सोमसूर्यस्वरूपकाः प्रतिमा स्वर्णजानि
वा राजती ताम्रजा तथा सर्वतोभद्रमध्ये च स्थापयेद्दर्शदेवता ग्रहवर्णवस्त्रयुग्मेन दद्यात् गंधपुष्पकं आप्यायस्वेति मंत्रेण
सविता पश्चात्तमेव च उपचारैः समाराध्य ततो होमं समाचरेत् कृत्वा वह्निप्रतिष्ठां च कृतसंकल्पमीदृशं आयुरारोग्य
सिद्ध्यर्थं सर्वारिष्टप्रशांतये पुत्रस्य दर्शजनन दोषनिर्हरणाय च मातापित्रोः कुमारस्य सर्वारिष्टप्रशांतये तेषामायुःश्रि
यै चैव शांतिहोमं करोम्यहं समिधश्चरुद्रव्यं क्रमेण जुहुयाद्बुधः जुहुयात्सवितृमंत्रेण सोमायेति च मंत्रतः एतैर्मंत्रैश्च प्रत्ये
कं [illegible] नेदष्टोत्तरं शतं दर्शस्य देवताहोमं अष्टाविंशति संख्यया होममेवं तु कृत्वाथ विधिवच्चाभिषेचनं श्रीसूक्तमायुष्यसू
क्तं च समुद्रज्येष्ठ इत्यृचा एतैर्मंत्रैरभिषेकं मातापित्रोः शिशोस्तथा ततः स्विष्टकृतादिः स्याद्धोमशेषं समापयेत् हिर
ण्यं रजतं चैव कृष्णधेनुं सुदक्षिणां ब्राह्मणान्भोजयेत्तत्र कारयेत्स्वस्तिवाचनं इति श्रीना**रदोक्तदर्शशांतिविधिः॥** अ
थ कृष्णचतुर्दशीशांतिविधिरुच्यते मेरुपृष्ठे सुखासीनं गर्गं मुनिवरं शुभं नमस्कृत्वाथ पप्रच्छ शौनको मुनिपुंगवः
शांतिकर्माणि सर्वाणि त्वत्तो ज्ञातानि अहं गुरो अधुना श्रोतुमिच्छामि कृष्णपक्षचतुर्दशी दिवा वा यदि वा रात्रौ प्रसूतेः किंफ
लं वद **गर्ग उवाच** कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलं चतुर्दशीं च षड्भागं कुर्यादादौ शुभं स्मृतं द्वितीये पितरं हंति
तृतीये मातरं तथा चतुर्थे मातुलं हंति पंचमे वंशनाशनं षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनं तस्मात्सर्वप्रयत्ने
न शांतिं कुर्याद्विधानतः आचार्यं वरयेद्धीमान्पुत्रदारसमन्वितं स्वकर्मनिरतं शांतं आग्नेयं वेदपारगं सर्वालंकारसंयु
क्तं सर्वलक्षणसंयुतं ब्राह्मणान् ऋत्विजश्चैव स्वस्तिवाचनपूर्वकं रुद्राधिदेवता तस्याः कर्षमात्रसुवर्णतः तदर्धार्धेन

वा कुर्याद्वित्तशाठ्यविवर्जितः प्रतिमां कारयेत्कुंभोः सर्वलक्षणसंयुतां वृषभे च समासीनं वरदाभयपाणिकं शुद्धस्फ
टिकसंकाशं श्वेतमाल्यांबरान्वितं त्र्यंबकेन मंत्रेण पूजां कुर्याद्विधानतः स्थापयेच्चतुरः कुंभान्स्वस्तिद्वृद्धियथाक्रमं पु
ण्यतीर्थजलोपेतान् धान्यस्योपरि विन्यसेत् तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं पंचरत्नयुचरत्नानि पंचत्वकंच
पल्लवान् पंचधान्यं सुवर्णं च तन्मंत्रैर्विनिक्षिपेत् शतौषधानि निक्षिप्य श्वेतवस्त्रैः सुवेष्टयेत् सुरभीणि च पुष्पाणि
श्वेतानि परिवेष्टयेत् सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः आयांतु यजमानस्य दुरितक्षयकारकाः आवाह्य वारु
णैर्मंत्रैरेनेन च विधानतः इमं मे वरुणेत्यनया तत्त्वायामीत्यृचा तथा त्वन्नो अग्ने इत्यनया स त्वं न इति मंत्रतः आपो वकुम्
मारभ्य सूक्तं कुर्याद्यथाक्रमात् आ नो भद्रा इति सूक्तेन भद्रा अग्नेश्च सूक्तकं जप्त्वा पुरुषसूक्तं च कद्रुद्रं तु क्रमाज्जपेत् ई
श्वरस्याभिषेकं च ग्रहपूजां च कारयेत् पूजाकर्मसु निर्वर्त्य होमं कुर्याद्विधानतः गेहस्येशानदिग्भागे कुंडं कुर्याद्विधा
नतः विस्तारायामत्वोतं च अरत्निद्वयसंयुतं कुंडं कंठपरित्यक्तं समेतां द्वंगुलिक्रमात् मेखला कार्या विस्तारो चतुर्द्वि
द्व्यंगुलिक्रमात् पश्चिमे मध्यभागे तु योनिं कुर्याद्विधानतः समिदाज्यचरुं श्वेततिलमाषांश्च सर्षपैः अश्वत्थस्य पा
लाश समिद्भिः खादिरैः शुभैः अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा अष्टाविंशतिमितैश्च होमं कुर्यात्पृथक्पृथक् त्र्यंबके
न मंत्रेण तिलान्व्याहृतिभिः क्रमात् ग्रहाणां च होतव्या अस्मद्दक्ष विधानतः एवं क्रमेण होतव्यं होमशेषं समापयेत् सर्वालं
कारयुक्तानां त्रयाणामभिषेचनं चतुर्भिः कलशैरद्भिः शतकुंभसमन्वितं धौतांबराणि धृत्वाथ कुर्यादाज्यावलोकनं पूर्णाहुतिं च
जुहुयाद्यजमानः समाहितः तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् सर्वालंकारसंयुक्तां सवत्सां गां पयस्विनीं धौतांबराणि
धृत्वाथ कुर्यादाज्यावलोकनं पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् सर्वालंका
रसंयुक्तां सवत्सां गां पयस्विनीं प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणभोजनं तस्माद
नेन विधिना वित्तशाठ्यविवर्जितः एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते सर्वान्कामानवाप्नोति स्थिरजीवी सुखी भवेत् इत्यु
नरगार्ग्योक्तिः कृष्णचतुर्दशीशांतिः अथैकनक्षत्रजननशांतिविधिरुच्यते एकस्मिन्नेव नक्षत्रे भ्रातृर्वा पितृपुत्रयोः

प्रसूतिस्तु तयोर्मृत्युर्भवेदेकस्य निश्चयः तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्यादभिषेचनं च संपूज्य ऋक्षप्रतिमां तदीशयो
नंच कुर्याद्विभवानुरूपं तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु शुभेऽह्नि शुभवारे च चंद्रताराबलान्विते रिक्ताषष्ठीविवर्ज्ये तु प्रा
रंभेद्दिवसे सुधीः आचार्यं वरयेत्पूर्वं चतुरो वा द्विजोत्तमान् पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत् अग्नेरीशानदिग्भागे
नक्षत्रप्रतिमां ततः तन्नक्षत्रोक्तमंत्रेण अर्चयेत्कलशोपरि रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् स्वशाखोक्तेन मार्गेण
कुर्यादग्निमुखं ततः अनेनैव तु मंत्रेण हुनेदष्टोत्तरं शतं प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तांतमेव च अभिषेकं ततः कुर्यादावा
येः पितृपुत्रयोः वस्त्रालंकारगोदानैराचार्यं पूजयेत्पुनः ऋत्विग्भ्यो दक्षिणां दद्यात् माषत्रयसुवर्णकं देवताप्रतिमादानं यथा
न्यवस्त्रादिभिः सह यानशय्यासनादींश्च दद्यात्तद्दोषशांतये भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः इति वृद्धगार्ग्यो
क्तैकनक्षत्रजननशांतिविधिः अत्रैकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोरिति गर्गवाक्ये भ्रात्रोरिति पदे किंच भ्राता च स्व
सा च भ्रातरौ स्वसा दुहितृभ्यामित्येकशेषः उत भ्राता च भ्राता च भ्रातरौ सरूपाणामेकशेष एकविभक्ताविति एकशेषः तत्र प्र
थमपक्षे सोदरयोर्भ्रातृभगिन्योरेवैकनक्षत्रजनननिषेधः स्यात् न तु पुंभ्रात्रोः द्वितीयपक्षे तु सोदरयोः पुंभ्रात्रोरेव निषेधः स्या
त् न तु भ्रातृभगिन्योः इष्यते च द्वयोरपि भ्रात्रोर्निषेधः न च भ्रातरौ च भ्रातरौ चेति द्वंद्वे सत्येकशेषेण सिद्धमिति वाच्यं तथा स
ति तेषां चतुर्णां भ्रातृणामिति पाठः स्यात् एवं पितृपुत्रयोरित्यत्रापि पिता च पुत्रश्चेति द्वंद्वे पितापुत्रयोरेकनक्षत्रजनननि
षेधः स्यात् न तु मातापुत्रयोः न च माता च पिता च पितरौ पितामात्रेत्येकशेषः पितरौ च पुत्रश्चेति द्वंद्वे मातापित्रोरप्ययम
ष्यायाश्चैकनक्षत्रजनननिषेधः स्यात् यतः प्रथमपक्षे पितृपुत्राणामिति बहुवचनांतपदं पाठः स्यात् द्वितीयपक्षे तु सदो
षास्त्येव परं तु यथासंख्यमपि लगति यथा मातापुत्रयोरेव पितादुहित्रोरेव चैकनक्षत्रजनननिषेधः स्यात् न तु मातादु
हित्रोः पितापुत्रयोश्चेति इष्यते चानयोरपि निषेध इत्यतो नैतद्वचनं निर्णीयपद्वीमवगाहते सत्यं गर्गवाक्यस्य त्वेतावानेवा
र्थः परं तु वचनांतरानुरोधाद्दिष्टविषयोऽपि संगृहीतो भवति यदाह वसिष्ठः पित्रोश्च जन्मकर्मर्क्षे जातस्तु पितृमातृहा जन्म
र्क्षे भ्राता च तज्ज्येष्ठो जातः सद्यो मृतिप्रद इति देवकीर्तिः यद्येकस्मिन्धिष्ण्ये जायंते दुहितरो यद्वा पुत्राः पितुरंतकराह्येते यद्यपरेपी

शु·दी·
न·प्र·
३४

तिरत्नलाभ्यादिति अपरेऽप्यन्यनक्षत्रे पूर्वादिभ्योऽन्वयभावेतिस्मिन्नभावेऽपह्नेरूपं गर्गसंहितायामपि यस्यैव जन्मनक्षत्रे जा
येद्भ्राता सुतोऽपि वा सजातीयः सजात्या वा सोऽस्य प्राणान्प्रसाधयेदिति यस्येति पुंस्त्वमविवक्षितं तेन मातुरपि निषेधो वसिष्ठ
वाक्यस्वरसात् अथ मूलाश्लेषाकेऽष्टनिमित्तस्यापलक्षणत्वेन व्याख्यानात् सूर्यचंद्रग्रहणसमयजननशांतिविधिरुच्यते ग्र
हणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् इत्थं संजायते यस्तु तस्य मृत्युर्न संशयः व्या
धिपीडा च दारिद्र्यं शोकः चकलहो भवेत् शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया यस्मिन्नृक्षे विशेषेण ग्रहणं संप्रजाय
ते तदृक्षाधिपतेरूपं सुवर्णेन प्रकल्पयेत् यथाशक्त्यनुसारेण वित्तशाठ्यं न कारयेत् सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः चां
द्रं चंद्रग्रहे धीमान् रजतेन विशेषतः राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः नागेन सीसकेनाशु चोरेशे प्रयत्नेन गोमयेन प्रलेपयेत्
तस्योपरि न्यसेद्धीमान् नववस्त्रं सुशोभनं त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत् रक्तांबरं रक्तगंधरक्तपुष्पांबराणि च सूर्यग्र
हे प्रदातव्यं चंद्रप्रीतिकरं च यत् राहवे चैव दातव्यं कृष्णपुष्पांबराणि च दद्यान्नक्षत्रनाथाय श्वेतगंधानुलेपनं सूर्यं संस्तुत्य धी
मानाकृष्णेनेति मंत्रतः चंद्रग्रहे च पालाशैः समिद्भिर्जुहुयान्नरः दूर्वाभिर्जुहुयाद्धीमान् राहोः संप्रीणनाय च समिद्भिर्वा स्वहेज्जा
त्येभेशाय तु जुहुयाद्बुधः भेशाय नक्षत्राधिपतये आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः पंचगव्यैः पंचरत्नैः पंचत्वक्पंचपल्लवैः
जलैरौषधकल्कैश्च सहितैः कलशोदकैः औषधिकल्कैः सर्वौषधिकल्कैः अभिषेकं प्रकुर्वीत यजमानं प्रयत्नतः मंत्रैर्वारु
णैर्देवस्यत्वेत्यापोहिष्ठादिभिस्त्रिभिः इमं मे गंगे पितरः तन्वायामीति मंत्रकैः अभिषिक्तो नितांतं वै यजमानः समाहितः आचार्यं पू
जयेत्पश्चाच्छांतो विजितेंद्रियः तस्मै दद्यात्प्रयत्नेन भक्त्या प्रतिकृतित्रयं दक्षिणाभिश्च संयुक्तं यथाशक्त्यनुसारतः ब्राह्मणा
न्भोजयित्वा तु प्रणिपत्य क्षमापयेत् तेभ्योऽपि दक्षिणां दद्याद्यजमानः समाहितः अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः
अकालमृत्युं शोकं च व्याधिपीडां न चाप्नुयात् सौख्यं सौमनस्यं नित्यं सौभाग्यं लभते नरः इत्थं ग्रहणजातानां सर्वारिष्टविना
शनं कथितं भार्गवेणेदं शौनकाय महात्मने ॥ इति श्रीशौनकविरचितः चंद्रसूर्यग्रहणसमयजननशांतिविधिः ॥ अथ त्रीतरशां
तिरुच्यते सा च शांतिः सर्वत्र विहिता सुतत्रये सुता चेत्स्यात् तत्रये वा सुतो यदि मातापित्रोः कुलस्यापि तदारिष्टं महद्भवेत् ज्ये

राम·
३४

धनाशोथवहानिर्दुःखंचाशुमहद्भवेत् तत्रशांतिंप्रकुर्वीतवित्तशाठ्यविवर्जितः जातस्यैकादशाहेतद्द्वादशाहेशुभेदिने
आचार्यमृत्विजो ···· ग्रहयज्ञपुरस्सरं सहवाग्रहयज्ञःस्याद्यथावित्तानुसारतः ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः
पूजयेद्धान्यराशिस्थकलशोपरिशक्तितः पंचमेकलशेरुद्रंप्रजपेद्रुद्रसंख्यया जप्याश्चरुद्रसूक्तानिशांतिसूक्तानिसर्वशः
द्विजएकोजपेद्धोमकालेशुचिःसमाहितः आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरुं अष्टोत्तरसहस्रंवाशतंवाविंशतिंतु
वा देवेभ्यश्चवरुणेंद्रादिभ्योग्रहपुरस्सरं ब्रह्मादिमंत्रैरिंद्रस्यपतइंद्रंभयामहे ततःस्विष्टकृतंकृत्वाबलिंपूर्णाहुतिंततः
अभिषेकंकुटुंबस्यकुर्यादाचार्यःप्रपूजयेत् हिरण्यंधेनुरेकाचऋत्विग्भ्योदक्षिणाततः प्रतिमाश्चवेदयाउपस्कारसमन्विताः
कांस्याज्यवीक्षणंदत्वाशुभंतिपाठंतुकारयेत् ब्राह्मणान्भोजयेत्कन्यादीनानाथांश्चतर्पयेत् एवंशांतिविधानेनसर्वारिष्टंप्रलीय
तेइति ज्येष्ठशांतिविधिः आलोक्यार्षीपौरुषीश्चग्रंथान्मूलादिशांतयः नीलकंठतनूजेनगोविंदेनोदिताःक्रमात् अथनक्षत्रप
संगादश्विन्यादीनांभानांतारकामानमुपजातिकयाह त्रित्र्यंगपंचाग्निकुवेदवह्नयःशरेषुनेत्राश्विशरेंदुभूकृताः वेदाग्निरुद्रा
श्वियमाग्निवह्नयोप्यःशतंद्विद्विरदाभतारकाः अश्विन्यादीनांभानांतारकाःक्रमतोज्ञेयाः यथाश्विन्यास्तारकास्तिस्रः ३ भ
रण्यास्तिस्रः ३ कृत्तिकायाःषट् ६ रोहिण्याःपंच ५ मृगस्यतिस्रः ३ आर्द्रायाएका १ पुनर्वसोःचतस्रः ४ पुष्यस्यतिस्रः ३ आश्ले
षायाःपंच ५ मघायाःपंच पूर्वाफल्गुन्याद्वे २ हस्तस्यपंच ५ चित्रायाएका १ स्वात्याएका १ विशाखायाश्चतस्रः अनुराधायाश्च
तस्रः ४ ज्येष्ठायाःतिस्रः ३ मूलस्यैकादश ११ पूर्वाषाढायाद्वे २ उत्तराषाढायाद्वे २ अभिजितस्तिस्रः ३ श्रवणेतिस्रः ३ धनि
ष्ठायाःचतस्रः ४ शततारकायाःशतं १०० पूर्वाभाद्रपदायाद्वे २ उत्तराभाद्रपदायाद्वे २ रेवत्याद्वात्रिंशत्तारकाः ३२ एतावतीभिः
ताराभिरश्विन्यादीनांस्वरूपसत्वात् उक्तंच रत्नमालायां वह्नित्रिऋत्विषुगुणेंदुकृताग्निभूतबाणाश्विनेत्रशरभूकुयुगाब्धिरामाः
रुद्राब्धिरामगुणवेदशतद्वियुग्मदंताबुधैर्निगदिताःक्रमशोभताराइति नन्वत्रसंमतिवाक्येसप्तविंशतिभानिप्रतीयंते ग्रंथकृद्भि
रष्टाविंशतिरितिविरोधः अत्रसमाधिः उत्तराद्वैरुद्राद्वीत्यत्राब्धयःचतस्रस्ताराःपूर्वाषाढोत्तराषाढयोः तत्रद्वेपूर्वाषाढायाःद्वे
उत्तराषाढायाइत्यर्थः एवमष्टाविंशतिर्नक्षत्राणि नारदेनापि द्वयोराषाढयोर्द्विद्वितारात्वमुक्तं यथा रामाग्निऋत्तुबाणाग्निभूवेदा

मुहू.
न.प्र.
३५

ग्निश्चारेषवः नेत्रं बाहुशरेंद्रियं ढ्युगवेदाग्निशंकराः बाहुनेत्राग्न्यब्धिशत बाहुनेत्ररदाः क्रमात् भानां संख्या च विज्ञेया दस्रादीनां द्ध
ग्धकृत्यमिति अवयवं चैतेन देवं विज्ञेयं तुरंगमुखसदृशं इत्यादिनाष्टाविंशतिनक्षत्राणां माकृतिकथनात्तन्नविंशतिनक्षत्राणां
च ताराश्चोक्ताः शिति पूर्वापरशंकोत्तं तारकामानोक्तिप्रयोजनं विवाहे नक्षत्रतारकातुल्यैर्वर्षैस्तत्सदसत्फलावाप्तिरित्यादितु
नं वराहेण नक्षत्रमुद्वाहे फलमब्दैः तारकामितैः सदसत् दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्य इति तद्यथा शौनकेन विवाहे
प्रत्येकं नक्षत्रफलान्यभिहितानि तत्र प्राजापत्ये सुभगा भोगयुता, तिप्रिया भर्तुः पुत्रधनानि च लभते सा कन्या पंचमे वर्षे इति रोहिण्या
मुद्वाहफलमुक्तं तद्रोहिण्याः ताराः पंच तावद्भिर्वर्षैर्भवति अष्टात्म्याण वियोगं त्वाष्ट्रे प्राप्नोति भर्तृसंसर्गात् त्यक्तास्व ज्ञातिकुलं का
मपराया तिदासत्वमिति चित्रायामसत्फलं तच्चित्रातारैकात एकेन वर्षेण भवति एवं ज्वरादिरत्यतोऽपि तारकामानदिवसैर्ज्व
रस्यान्यस्य व्याधे रोगस्य वा नाशो वाच्य इत्यायूह्यं ननु नक्षत्रभेदेन पूर्वमपि ज्वरनाशका दिवसाः प्रोक्ताः अत्र तु तारकामितैः सं
ख्यादिवसा उक्ता इति गुण्यविरोध इति चेन्न चरणभेदान्नविरोध इति वयं ब्रूमः अथाश्विन्यादीनामाकृतिमुपजात्याह योऽङ्गतेनचा
ह अश्वमुखादिरूपं तुरगास्य योनी क्षुरो नुरएणास्य मणी गृहं च पृष्टात्मकं चक्रभवने च मंचः शय्याकरो मौक्तिकविद्रुमं च तोरणं
वलिनिभं च कुंडलं सिंहपुच्छ गजदंत मंचकाः त्र्यस्त्रि च त्रिचरणाभ मर्दलो हृत्तमंचयमलाभमर्दलाः अश्विन्यादीनां नक्षत्रा
णां रूपमाकृतिरुच्यते॥ तत्राश्विन्यास्तुरगास्यमश्वमुखसदृशं रूपं भरण्यायोनिर्भगस्तद्रूपं कृत्तिकायानापितक्षुराकृतिः रो
हिण्याः शकटरूपं मृगस्य एणास्यं हरिणमुखसदृशं आर्द्रायां मणिसदृशं पुनर्वसो गृहतुल्यं पुष्यस्य पृष्ठचक्रो बाणस्तत्तु
ल्यं अश्लेषायाः चक्राकारं मघायां भवनं गृहसदृशं पूर्वाफाल्गुन्यां मंचः खट्वा तदाकारं उत्तराफल्गुन्याः शय्याकारं हस्तस्य
हस्ताकारं चित्रायां मौक्तिकाकारं स्वात्यां विद्रुमं प्रवालस्तदाकारं विशाखायां तोरणाकारं अनुराधायां बलिर्भक्तपुंजकस
दाकारं ज्येष्ठायाः कुंडलाकृतिः मूलस्य सिंहपुच्छाकारं पूर्वाषाढायां गजदंतसदृशं उत्तराषाढायां मंचकसदृशं अभिजितस्त्रि
कोणाकारं श्रवणस्य त्रिविक्रमस्त्रिचरणो वामनस्तत्तुल्यरूपं धनिष्ठायां मर्दलसदृशं शततारकायां वृत्तं वर्तुलं पूर्वाभाद्रपदा
यां मंचसदृशं उत्तराभाद्रपदायां यमलाभं रेवत्यां मर्दलाकारं स्वरूपमित्यर्थः उक्तं रत्नमालायां॥ तुरगमुखसदृशं योनिरू

राम.
३५

पंद्मनाभं प्राकारमुखमथैणस्योत्तमांगेन तुल्यं मणिग्रहशरचक्राभा निशालोपमं भं शयनसदृशमन्यच्चात्र पर्यंकतुल्यं
हस्ताकारमनतश्च मौक्तिकसमं चान्यत्प्रवालोपमं धिष्ण्यं तोरणवत्स्थितं बलिनिभं सत्कुंडलाभं परं क्रुध्यत्केसरिविक्र
मेणसदृशं शय्यासमानं परं चान्यद्दंतिविलासवत्स्थितमतः शृंगाटकव्यक्ति च त्रिविक्रमाभं च मृदंगरूपं तत्ततोन्ययम
लाढ्ययाभं पर्यंकरूपं मुरजानुकारमित्येवमश्व्यादिभचक्ररूपमिति अथ जलाशयारामदेवप्रतिष्ठामुहूर्तं सपादोपजातिक
याह जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशांकशुक्रे दृश्ये मृदुक्षिप्रचरध्रुवे स्यात्पक्षे सिते स्वर्क्षतिथिक्षणे वा रि
क्तारवर्ज्ये दिवसेतिशस्ता जलाशयोत्सर्ग आरामोत्सर्गश्च देवानां विष्णवादीनां प्रतिष्ठा वक्ष्यमाणप्रकारेणोच्यते तत्र त्रया
णमपि सामान्यतो दिनशुद्धिरियं विचार्या यथा सौम्यायने उत्तरायणे मकरादिषड्राशिस्थिते सूर्ये सति तथा जीवशशां
कशुक्रेषु दृश्यमानेषु सत्सु तथा मृदुगणक्षिप्रगणचरगणनक्षत्रेषु तथा सिते शुक्लपक्षे स्वर्क्षतिथिक्षणे यस्य देवस्य प्र
तिष्ठा कर्तुमिष्टा तस्य तत्स्वामिके नक्षत्रे तिथौ वा क्षणे मुहूर्ते वा तथा रिक्तारवर्ज्ये रिक्ताः पूर्वोक्तास्तिथयः आरो मंगलः ए
तान्वर्जयित्वा तु तिथिष्वन्यवारेषु च एवंविधेषु दिनेषु जलाशयस्तडागादिः आराम उपवनं सुरा देवाः तेषां प्रतिष्ठा क्रमेण
कर्माहत्वात् उपभोगयोग्यत्वपूजायोग्यत्वरूपातिशस्तानि विहितानि अत्र दक्षिणायनशुक्रास्तगुर्वस्तत्वं ग्रस्तानां सामान्य
तः शुभकार्येषु निषेधात् विशेषात् गुरुचंद्रशुक्रोदयोत्तरायणानि प्रशस्तानि दक्षिणायननिषेधः चोले वक्ष्यते तत्र जलप्र
तिष्ठायां दीपिकामार्तंडे इंदुशुद्धौ मुरजिदयनमाघषट्कस्य शुक्ले मूलाषाढोत्तरास्विश्रवणगुरुकरे पौष्णशाक्रानुराधे
मैत्रे ब्राह्मे च पूर्णा मदनरवितिथौ सद्वितीयात्तृतीये कार्या तोयप्रतिष्ठा गुरुसितदिने कालशुद्धे सुलग्ने इति मुरजिद्विष्णुस्त
स्याशयनं शयनाभाव विष्णुशयनव्यतिरिक्तकाल इत्यर्थः मार्गः देवतारामवाप्यादिप्रतिष्ठा उत्तरायणे माघादिपंचमा
सेषु कृष्णेपि यावत्पंचमीदिनं दक्षिणायने ऊर्ध्वं न तत्फलमवाप्नुयात् अयं चोत्तरायणे जलं जलाशयेस्यास्यतीत्येवं निश्चितेनि
येधः मत्स्यपुराणेपि॥ चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे पि वा माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् प्राप्य पक्षं शुभं शु
क्लं अतीते चोत्तरायणे देवानामित्युपलक्षणं तेन देवारामवाप्यादिप्रतिष्ठा शुभदेत्यर्थः मकरसंक्रम उत्तरायणपदेनोपलक्ष

ते अतो मकरसंक्रमोत्तरकालः शुभ उच्यते अन्यथा माघादिपंचकं साक्षाद्विहितमुत्तरायणातिक्रमे हि दक्षिणायनसंग्रह इति स
मु॰दी॰ र्वकालसंग्रहे वर्ज्याभावात्कालोपदेशानर्थक्यमापद्येत उपलक्षणत्वं भविष्यत्ययने पुण्यमतीते वोत्तरायण इत्यत्र दृश्यते यदा तु
न॰प्र॰ दक्षिणायन एव जलस्थितिसंभवस्तदा न कालनियमः न कालनियमस्तत्र प्रमाणं सलिलं यत इति भविष्यपुराणोक्तेः तत्रापि का
२६ र्तिकमासे शुभफलदसंक्रांतौ वा शुभतिथौ मेषधनुःसिंहवर्जिते लग्ने वापीकूपतडागादिप्रतिष्ठाप्यस्त्विति ध्येयं उक्तं च भविष्य
पुराणे तस्मिन्सलिलसंपूर्णे कानि कुंच विशेषतः तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः अग्निपुराणे संक्रांतिभेदे
न फलभेदोऽभ्यधायि वापीकूपतडागानां तस्मिन्काले विधिः स्मृतः सुदिने शुभनक्षत्रे प्रतिष्ठा शुभदा स्मृता कर्कटे पुत्रलाभ
स्त्रीसौख्यं तु मकरे भवेत् मीने यशोऽर्थलाभश्च कुंभे च सबहूदकं वृषे च मिथुने वृद्धिं वृश्चिके च जलं भवेत् पिबन्ति तु कन्या
यां तुलायां शाश्वती गतिः सिंहे मेषे धनुर्लग्ने लक्ष्मीस्तु द्विजगच्छतीति देवप्रतिष्ठायां तु विशेषस्तत्र वसिष्ठः अथ प्रतिष्ठां
कथयामि सम्यक् शिवस्य विष्णोस्त्वथवा परेषां सौम्यायने देवगुरौ च शुक्रे संदृश्यमाने परिचारकाणां शिवविष्णुग्रहणं प्राधा
न्यस्थापनार्थं अत्र सौम्यप्रशस्तीनां तु दक्षिणायनेऽपि कार्यं तदुक्तं वैखानससंहितायां मातृभैरववाराहनारसिंहत्रिविक्र
माः महिषासुरहंत्री च स्थाप्या वै दक्षिणायनेऽपि कार्यमिति शैवसिद्धांतशेखरे तु श्रेष्ठोत्तरे प्रतिष्ठा स्यादयने भुक्तिमिच्छतां
दक्षिणे तु मुमुक्षूणां मलमासेन साधुयोरित्युक्तं अत्र दक्षिणे तु मुमुक्षूणामित्यपि मातृभैरवेत्यादिपरतया योज्यं अन्यथा
प्रतिपदं मासगणना च वसिष्ठादिषु न युज्येत यदाह वसिष्ठः माघे तपस्ये तपसि प्रतिष्ठा धनायुरारोग्यकरी च कर्तुः चैत्रे मस्य
रुग्भयदा च शुक्रे समाधवे पुत्रधनप्रदा स्यात् नारदोऽपि विचैत्रेष्वेव मासेषु माघादिषु च पंचसु वसिष्ठः आषाढमासादिचतु
ष्टयेऽपि कलत्रसंतानविनाशदा स्यात् ऊर्जे च कर्तुर्निधनप्रदा च सौम्ये सपौषे खिलदुःखदा स्यात् बलक्षपक्षः शुभदः समस्तः
सदैव तत्रादिदिनं विहाय अंत्यत्रिभागं परिहृत्य कृष्णपक्षोऽपि शस्तः खलु पक्षयोश्च रिक्तां च मत्यक्त दिनेषु निंद्ययोगेषु वैनाशि
कवर्जितेषु दिने महादोषविवर्जिते च शशांकताराबलसंयुते च वैनाशिकनक्षत्राणि नारदेनोक्तानि जन्मभाद्दशमं कर्मभं सां राम॰
घातर्क्षं तु षोडशं अष्टादशं सामुदायं त्रयोविंशं विनाशभं मानसं पंचविंशर्क्षं नाचरेच्छुभमेषु त्विति अथ तिथीनाह नारदः २६

यद्दिने यस्य देवस्य तद्दिने तस्य संस्थितिः द्वितीयादिषु योः पंचम्यादितिस्तिस्रषु क्रमात् दशम्यादि च तस्रषु पंचदश्यां विशेषतः
उक्तनिष्ठ्यसंभवे मुख्येति थ्यास्थापनं कार्यमित्यर्थः अथ वारानाह नारदः॥ ऊज्ञवर्जितवारेषु कर्तुः सूर्ये बलप्रदे चंद्रताराब
लोपेते पूर्वाह्ने शोभने दिने इति प्रत्येकं वारफलमाह वसिष्ठः॥ कीर्तिदं क्षेमकरं कृशानुभयप्रदं वृद्धिकरं दृढं च लक्ष्मीकरं स्थि
रदं त्विनादिवारेषु संस्थापनमामनंति अथ नक्षत्रविवेकः तत्र जलप्रतिष्ठार्थं दीपिकायामुक्तान्यधुना नक्षत्राण्यारामप्रति
ष्ठार्थं नक्षत्राणि अथ देवप्रतिष्ठानक्षत्राणि वसिष्ठेनोक्तानि हस्तत्रये मित्रहरित्रये च पौष्णद्वयादित्यसुरेज्यभेषु तिसो
त्तराधातृशशांकभेषु सर्वामरस्थापनमुक्तमेतत् अत्र षोडशाभानि ध्रुवमृदुक्षिप्रलघुरूपाण्येवोक्तानि तत्र ग्रथकर्त्रो
जलाशयारामसुरप्रतिष्ठा नक्षत्राणि बहुधा तल्पत्वादेतान्युक्तानि छिद्राणि तु भिन्नानि तान्युक्तविशेषवचनेभ्योवसेयानी
ति तत्र जलाशयारामयोर्निमित्याधीनत्वान्न मुहूर्तः प्रागभिहितः देवताघटनमुहूर्तस्तूच्यते मया तत्र दीपिका ध्रुव
लघुमृदुवर्गे वारुणे विष्णुदैवे मरुदहिति धनिष्ठे शोभने वासरे च त्रिदशमदनजन्मैकादशे ३ ९ ७ १ ११ शीतरश्मौ वि
बुधकृतिरभीष्टा नाडिनक्षत्रहीन इति नाडीनक्षत्राणि वैनाशिकनक्षत्राणि अथ देवताप्रतिष्ठायां सामान्यतो लग्नशुद्धिं
देवताविशेषाणां लग्नविशेषं नक्षत्रविशेषं च पादेनोपजातिकाभ्यामाह रिःकाम्बकुंभौ दिवसेति शास्त्रा शशांकपापैस्त्रिभ
वांगसंस्थैः व्ययांत्यगैः सत्वचरे शुगेंद्रे सूर्योद्गते कोयुवतौ च विष्णुः शिवो'' युग्मे द्वितनौ च देव्यः क्षुद्रा स्वरे सर्व इमे स्थिर
र्ते पुष्ये ग्रहा विघ्नपयक्षसर्पभूतादयोंत्ये श्रवणे जिनश्च जलाशयप्रतिष्ठायामारामप्रतिष्ठायां च सकलग्नमात्रं विचार्यं दे
वप्रतिष्ठायां तु शशांकः चंद्रः पापाः सूर्यभौमशनिराहुकेतवः तैस्त्रिभवांगसंस्थैः तृतीयषष्ठैकादशस्थानस्थितैः उपलक्षितेन
ग्ने तथा सद्भिर्देवप्रतिष्ठा नियुक्ता तदुक्तं रत्नमालायां॥ केंद्रत्रिकोणभवमूर्तिषु सद्ग्रहेषु चंद्रार्कभौमशनिषु त्रिषडायगेषु
सान्निध्यमेति नियतं प्रतिमासु देवः कर्तुः सुखार्थसुतसंपदरोगता च सौम्यालयाद्याश्रिता मूर्तिर्हि वीन्भावान्वीर्यैर्हत्कदा
वर्धयंति षष्ठं हित्वा भावमेते हि तत्र शत्रुध्वंसिकर्तुं कुर्वंत्यारयंति शनिग्रहणं राहुकेत्वोरप्युपलक्षकं यदाह वसिष्ठः॥ सूर्ये
दुभौमार्कजहिके नवस्वलग्नस्थितानैधनराश्यभर्तुः सौम्यग्रहाल ग्नगतास्तदेव व्याघुबलारोपकराश्च नूनं सर्वे ग्रहा नैधन

मु॰ दी॰
न॰ प्र॰
३०

दारुत्वजन्यं सौम्यात्र सौम्याः खलु मृत्युसंस्थाः इति अथ प्रसंगान्नवांशविचारः तत्र स्थिरद्विस्वभावनवांशा ग्राह्या न चरांशाः तत्रापि
तलांशः साधीयान् तदाह वसिष्ठः पंचेष्टके जीवशशांकसूर्यमुख्यैर्ग्रहैः सौम्यनवांशयुक्ते लग्ने स्थिरे चोभयराशियुक्ते नवांशके चो
भयगे स्थिरे वा उभयगो द्विस्वभावे चरोदये लग्नगतेन कार्यं संस्थापनं नैव चरांशकेपि चरोपि मुख्यः स्वतलांशकश्च सदा मृदुत्वात्स्व
रसन्निवेशे इति मृदुत्वात् शुभस्वामित्वात् नारदोपि शुभलग्ने शुभांशे च कर्तुर्न निधनोदये राशयः सकलाः श्रेष्ठाः शुभग्रहयु
ते ह्यतिनाः इति अथ लग्नदोषेष्वपवादो वसिष्ठेनोक्तः एकोपि जीवो बलवांस्तनुस्थः सितोपि सौम्योप्यथवा बली चेत् दोषानशे
षान्विनिहंति सद्यः स्कंदो यथा तारकदैत्यवर्गमिति नारदः॥ गुणाधिकतरे लग्ने दोषात्यल्पतरे यदि सुराणां स्थापनं तत्र क
र्तुरिष्टार्थसिद्धिदमिति सूर्योद्रेइति सूर्योष्टगेन्द्रे सिंहलग्ने स्थाप्यः तथा को ब्रह्मा घटे कुंभलग्ने विष्णुर्युवतौ कन्यालग्ने शि
वो महादेवो नृयुग्मे मिथुनलग्ने चपुनर्द्वितनौ मिथुनकन्याधनुर्मीनलग्नेषु देव्योऽङ्गगोरद्विणाम्मूर्तयः चरे मेषकर्कतुलामक
रलग्नेषु क्षुद्रदेव्यः चलच्छिद्धियोगिनीप्रभृतयः सर्व इमे उक्ता अनुक्ताश्च देवा इत्यर्थः उक्ता महादेवादयः अनुक्ता इंद्रादयः ते स्थि
रर्क्षे वृषसिंहवृश्चिककुंभलग्नेषु स्थाप्याः यदाह श्रीपतिः सिंहोदये दिनकरो मिथुने महेशो नारायणश्च युवतौ घटभे विधाता
देवो द्विमूर्तिभवनेषु निवेशनीयाः क्षुद्राः चरे स्थिरगृहे निखिलाश्च देवाः पुष्ये ग्रहा इति ग्रहाः चंद्रस्योष्ठो पुष्यनक्षत्रे स्थाप्या इ
त्यर्थः उपलक्षणं चैतत् तत्र सूर्यस्य हस्तनक्षत्रे स्थापनं महादेवब्रह्मणोः पुष्यश्रवणाभिजित्सु स्थापनं कुबेरस्कंदयोरनु
राधायां दुर्गाप्रभृतीनां मूले स्थापनं सप्तर्षीणां स्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासवाल्मीकागस्त्यानामपि सप्तर्ष्यधिष्ठित
नक्षत्रे स्थापनमित्यर्थः उक्तं रत्नमालायां पुष्यश्रुत्यभिजित्सु चेश्वरकयोर्विघ्नाधिपस्कंदयोर्मैत्रे तिग्मरुचेः करे निरृतिभे
दुर्गादिकानां शुभं को ब्रह्मा पुष्यः श्रुतिश्चाभिजिच्चैतेषु पुष्यश्रुत्यभिजित्सु महादेवब्रह्मणोः स्थापनं कार्यमित्यर्थः
तथा सप्तर्षयो यत्र चरंति धिष्ण्ये काष्ठाप्रतिष्ठा खलु तत्र तेषां श्रीव्यासवाल्मीकिघटोद्भवानां तथा स्मृता वाक्पति भे ग्रहाणा
मिति सप्तर्षयस्तु कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृता इति स्वतेस्ते पर
स्मिन्नृक्षे संचरंतो दृश्यंते तस्मिन्नक्षत्रे तेषां स्थापनं श्रीव्यासवाल्मीकिघटोद्भवानां तथा सप्तर्ष्यधिष्ठितनक्षत्रे ग्रहाणां

मु॰टी॰
न॰प्र॰
३८

वाक्पतिर्भेषुष्वो यद्रोऽद्भवो गरुत्मः विघ्नपेति विघ्नपो गणेशः यक्षो देवयोनिः सर्पा वासुक्यादयः भूतो देवयोनिः विद्याध
राप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचः गुह्यकः सिद्धो भूतोमी देवयोनय इत्यभिधानात् आदिशब्देन राक्षसासुरप्रमथ
सरस्वतीप्रभृतयो गृह्यंते तेषां देवत्वात् स्थाप्याः तथा श्रवणे श्रवणनक्षत्रे जिनो बौद्धः स्थाप्यः उपलक्षणं चैतत् इंद्रकु
बेरवर्जितानां लोकपालानां धनिष्ठायां स्थापनं इंद्रो वशिष्टानां अनुत्तरे रोहिणीषु स्थापनं स्यादित्यर्थः एतद् प्युक्तं रत्नमा
लायां ॥ गणपरिवृढहरंद्रो यक्षभूतासुराणां प्रमथफणिसरस्वत्यादिकानां च पौष्णे श्रवसि सुगतनाम्नो वासवे लोकपा
नां निगदितमखिलानां स्थापनं हि स्थिरेषु इति परिवृढः स्वामी प्रभौ परिवृढः स्वामीति साधुः गणपरिवृढो गणेशः
प्रमथा महादेवस्य पारिषदाः श्रवसि श्रवणनक्षत्रे सुगतो बौद्धः सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः समंत
भद्रो भगवान्मारजिल्लोकजिज्जिन इत्यमरः स्थिरेषु रोहिणीत्र्युत्तरास्वित्यर्थः इति शिवं अथ नक्षत्रप्रकरणं गद्येनो
पसंहरति इति दैवज्ञानंतसुनरैवज्ञरामविरचिते मुहूर्तचिंतामणौ नक्षत्रप्रकरणं इदं पूर्वं व्याख्येयं ज्योतिर्वि
द्वरनीलकंठविदुषः श्रीचंद्रिकाकायास्तथा पुत्रेणाहिगवीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मि
तेनयनिधौ पीयूषधाराभिधे व्याख्याने तिथिवारभप्रकरणं संपूर्णतामभ्यगात् इति श्रीविद्वद्दैवज्ञमुकुटालं
कारनीलकंठज्योतिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां सविचारं
तिथिवारनक्षत्रप्रकरणं समाप्तिमगात् संख्या १८०० शुभमस्तु सर्वजगतां लेखपाठकयोश्च ॥ । ॥

३

मु॰टी॰
दृ॰प्र॰
२०

तेनोब्रह्मैकतां शिवाभेदतां एतद्व्यवस्थापितत्रैव सलोकतां च सारूप्यं सान्निध्यं चापि सत्तमाः कल्पं कल्पमवा
प्नोति ततो ब्रह्मात्मको भवेदिति अन्यत्क्षेत्रभेदेन सालोक्यादिमुक्तितारतम्यं एतत् स्कंदपुराणे चतुर्विधे
पि क्षेत्रेस्मिन्न मीनो गर्भयातनां नैवाप्नोति मुनिश्रेष्ठ विशेषोयं ब्रवीमि वेति तत्र काश्यात्मके क्षेत्रे सालो
क्यमुक्तिः वाराणस्यात्मके क्षेत्रे सारूप्यमुक्तिः अविमुक्तात्मके क्षेत्रे सान्निध्यमुक्तिः अंतर्गेहात्मके क्षेत्रे कै
वल्यमुक्तिः उक्तं च पद्मपुराणे चतुर्थाविति ते क्षेत्रे सर्वत्र भगवान् शिवः व्याचष्टे तारकं वाक्यं ब्रह्मात्मैक्यप्र
बोधकं काश्यां मृतस्तु सालोक्यं साक्षात्प्राप्नोति सत्तमः वाराणस्यां मृतो जंतुः साक्षात्सारूप्यमश्नुते अ
विमुक्ते विपन्नस्तु साक्षात्सान्निध्यमाप्नुयात् अंतर्गेहे विपन्नस्तु साक्षात्केवलमाप्नुयात् साक्षाच्छिवस्व
रूप एव भवतीत्यर्थः काश्यादिक्षेत्रपरिमाणानि पद्मपुराणीय पातालखंडे परिमाणं च वक्ष्यामि तन्निबो
धत सत्तमाः मध्यमेश्वरमारभ्य यावद्देहलिविघ्नपं सूत्रं संस्थाप्य तद्दिक्षु भ्रमयेन्मंडलाकृति तत्र यावज्जाय
ते रेखा तन्मध्ये क्षेत्रमुत्तमं काशीति यद्विदुर्वेदास्तत्र मुक्तिः प्रतिष्ठिता काश्यंतं परमं क्षेत्रं विशेषफलसा
धनं वाराणसीति विख्यातं तन्मानं निगदामि वः विश्वेश्वराच्च तद्दिक्षु धनुःशतयुगोन्मितं अविमुक्ताधि
कं क्षेत्रं मुक्तिस्तत्र न संशयः गोकर्णेशः पश्चिमे पूर्वतः च गंगामध्ये ह्यन्तरे भारभूतः ब्रह्मेशानाद्दक्षिणे
न प्रतिष्ठस्तत्र प्रोक्तं भवनं विश्वभर्तुरिति काशीपरिमाणवाक्ये मुक्तिपदं सान्निध्यमुक्तिपरं अविमुक्तप
रिमाणवाक्ये मुक्तिपदं सान्निध्यमुक्तिपरं पूर्वाभिहितवाक्यैकवाक्यताबलात् अस्या वाराणस्याः धनु
ष्षट्सहस्रमितं एवं सति विश्वेश्वरस्थानाच्चतुर्दिक्षु ष्टशतहस्तमितमित्यर्थः विश्वभर्तुर्भवनमंतर्गेहं
तत्स्वरूपं याथार्थ्याय मुक्तीनां सालोक्यसारूप्यसान्निध्यकैवल्यरूपाणां पूर्वपूर्वापेक्षयोत्कृष्टत्वं तथा तथा
काशीवाराणस्यविमुक्तांतर्गेहाख्यानां चतुर्णां क्षेत्राणां पूर्वपूर्वान्तर्भावि पूर्वपूर्वापेक्षया न्यूनपरिमाण
मिति संपिंडितार्थः तस्मात्सर्वमथुरादिमुक्तिक्षेत्रापेक्षया काशी श्रेष्ठेति सिद्धमित्यास्तां प्रसक्तानुप्रस

राम॰
२०

वरेनयोनयोर्लब्धं फलाप्तौ नरशाक्रमादाविति एवमनेकेषु स्थलेषु दुष्टाशयनिकाकरणं कृतमिति अत एव र
म्यादोषापकरणेनातिसुंदरीयव्याख्यापि राज्ञादिः पद्धतिं मार्गं चौरादिदुष्टनिराकरणेनातिसुंदरं करोतीति ध्वनिः
किंच यउत्तमकामधेनुगणितेति उत्तममत्यर्थं न ब्रह्मार्यमदपञ्चीयपंचांगानयनप्रतिपादकं त्यक्त्वा कामधेनुना
मकं गणितशास्त्रं तत्र टीकां तदभिप्रायविवृतिमकार्षीत् किमर्थं सतां गणितशास्त्राभिज्ञानां प्रीत्यै तुष्ट्यै अने
नास्यानेकग्रंथकरणप्रयासकर्तृत्वं नस्तार्थमत्यभ्यासेन दृढतरं ज्योतिःशास्त्राभिज्ञत्वात् किंतु सतुष्ट्यर्थमेव
यावत्स्वीयशास्त्राभ्यासो ग्रंथकरणद्वारा लिप्रकाशेनावत्तकलसंतुष्टिर्न भवतीत्यनेकग्रंथकरणप्रयास
इति सूचितं करोतीति अत इति गवाविति इनिः नञ्पीकारहरात्कृतो ज्ञानेः सप्तम्या चतनोस्मृता विन्दुकैः कृतशाह्
स्य कृदंतत्वात्कथमत्रोनिः उच्यते माथमयं सम्मुच्चयः कृतो ज्ञानेश्चुति किं तर्हि ज्ञातविशेषणं कारुहणं कथोज्ञा
तिरिति एवं च कार्थीकार्यिकः तंडुली तंडुलीक इत्यपि सिद्धानि नेनव्याघ्रवानित्यादावेव नियमो निषेधो नान्यत्रे
ति महाभाष्यकारेणैव वार्तिकव्याख्यानाइ वचे वात्रेनिः अहस्करा इति दिवाविभानिशेत्यादिना कर्मण्याणा बा
धकट्प्रत्ययः समकरोदिति डुकृञ्करणे इत्यस्मात्लुङ् भूतेवादनद्यतेः लडितिलङ् अकार्षीदिति तस्मादेव निटो
लुटः च्लिः सिच् सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः तरणपरइतिपरत्वं ॥ अथ स्वनामकथनपूर्वकं मंगलं सूचय
न्मुहूर्तचिंतामणिनामकं ज्योतिषग्रंथं समाप्तिं श्लोकेन दसाह तदाज्ञन्मउदारधीर्विबुधनीलकंठानुजो गणेशप
दद्वंद्वकं हृदि निधाय रामाभिधः गिरीशनगरे वरे भुजकुवेषुचंद्रैर्मिते शके विनिरमादिमं खलु मुहूर्तचिंताम
णिं तदाज्ञन्मज्ञ्लाघ्यानंतज्योतिर्विदः आत्मजः पुत्रो रामाभिधो रामसंज्ञकः गिरीशनगरे ईशमहादेवस्तस्य नग
रे वाराणस्याख्ये मुहूर्तचिंतामणिं मुहूर्तचिंतामणिनामकं ज्योतिषग्रंथं इमं प्रत्यक्षं दृश्यं विनिरमात् अकार्षीत् ख
लु शब्दे वाक्यालंकारे कीदृशो रामाभिधः उदारधीः उपयत अनेकशिष्यविद्यादिदानकारिका धीः बुद्धिर्यस्यासौ
तथा पाठितानेकशिष्य इत्यर्थः पुनः कीदृशः विबुधनीलकंठानुजः विबुधः ज्योतिषव्याकरणाद्यनेकविद्यायां पंडि

मु·टी· तत्कीलाधिकारविहितं तंत्रं विधाय गम्यादीनामिष्टिरिति गम्यादेराकृतिगणत्वात् गुणयोगेषष्टभावात्तु द्वितीयान
रु·प्र· तत्पुरुषः समास इत्यलमतिप्रसंगेनेति शिवं ८ अथ क्रमप्राप्तं नानवगणेनं शार्दूलविक्रीडितेनाह ज्योतिर्विद्गणवंदि
८ तांघ्रिकमलस्तत्सूनुरासीत्कृतीनाम्नानंत इति प्रथामधिगतो भूमंडलाहस्करः योरम्यां जनिपद्धतिं समकरोद्दुष्टा
शयध्वंसिनीं टीकां चोत्तमकामधेनुगणिते कार्षीत्सतां प्रीतये तत्सूनुस्तस्य चिंतामणिदैवज्ञस्य सूनुः पुत्रोऽनंत इति
प्रथां ख्यातः प्राप्तः आसीत् कीदृशः ज्योतिर्विद्गणवंदितांघ्रिकमलः ज्योतिर्विदां ज्योतिषकानां यो गणः तेन वंदिते
अंघ्रिकमले चरणसरोरुहे यस्य तादृशः सकलज्योतिर्विदां ज्योतिःशास्त्राध्ययने एष एवाध्यापक इत्यर्थः पुनः कीदृ
शः भूमंडलाहस्करः भूमंडलस्य पृथ्वीमंडलस्याहस्करः सूर्यः प्रकाशकत्वात् यथा सूर्यः स्वकिरणैरखिलां पृथ्वीं
प्रकाशयति तथा ज्योतिःशास्त्राध्यापनद्वारप्रथया प्रकाशक इति भावः पुनः कीदृशः कृतीकुशलः कृती
कुशल इत्यपीत्यमरः नानाग्रंथकरणकुशल इत्यर्थः ग्रंथकर्तृत्वमेवोत्तरार्धेन प्रकाशयति योरम्यामिति
योऽनंतः जनिपद्धतिं जनिर्जन्म जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः तस्य पद्धतिर्मार्गः भावादिनोत
द्दर्शांतेन गणितेन ज्ञातकशास्त्रोक्तशुभाशुभफलकालोपदेशप्रतिपादको ग्रंथो जन्मपद्धतिः तां समकरोत् स
म्यक्प्रकारसम्पन्नामेवाह कीदृशीं जनिपद्धतिं दुष्टाशयध्वंसिनीं दुष्टः जन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषा
माशयोऽभिप्रायो युक्त्यावैयर्थ्यत्वाख्यातं तं ध्वंसितं शीलं यस्याः सा तादृशी यथा आद्याद्दशावेत्स वित्तः विधोर्वा
तदाबलं सत्त्वं तमेव तस्येति श्रीपतिवाक्यं संस्कृतमिष्टकष्टबलांतरेण गुणितमिति ज्ञानकालं कारख्या
टीकाकृतं व्याख्यातं तत्रापि शर्मोपद्धतिवाक्यं संमतित्वेन दर्शितं तदुभयमपि चिंत्यं चिंत्यप्रकारस्त्वत्र वादश
र्वकः स्वपद्यैरेवोपनिबद्धः यथा यद्इष्टकष्टांतरनिघ्नवीर्यो द्वशाक्रमं रिष्टमनिष्टभंगं विचारयंतीह नमोऽस्तु
तेभ्यः श्री श्रीधरोक्तं बहुसंमतं सत् यस्येष्टकष्टे सदृशे भवेतां तदंतरघ्नं बलदैवशून्यं तदा तदासौ बलवान्
वीर्यो वेत्यं विचिंत्या शुभदो चितं हि यतः शुभं वाप्यशुभं ग्रहस्य सहैव नास्ति न नतस्य हानिः तस्मान्नाशेन वि राम· ८

रणः कर्मधारय इति कर्मधारयः समासः अध्येतृशब्दे इङ् अध्ययने इत्यस्मादिङिकावध्युपसर्गतो व्य
भिचरत इत्युक्तेरधिपूर्वकात् ण्वुल्तृचाविति कर्तरि तृच् सार्वधातुकयोरिति गुणः ततो यणादेशः ततः षडंगनि
गमस्याध्येता इति षष्ठीति षष्ठीसमासः ननु अत्र कथं षष्ठीसमासः यावता कर्तृकर्मणोः कृतीति कर्मणि विशेषष
ष्ठी ततः षष्ठी शेष इति संबंधसामान्यषष्ठी तत्र यदि विशेषषष्ठी तदा कर्तरि चेति कर्तर्यर्थात्यनाभ्यां तृजकाभ्यां
कर्मषष्ठीसमासनिषेधप्रसंगात् नच त्वचमंगीकृत्यैतद्दूषणद्वयारपितमेव नांगीकुर्मः किं तु तच्छीलाधिकार
विहितं तृनं विधास्यामः उपयोगे प्रागेव षष्ठीं विधाय षष्ठीसमासो भविष्यतीति वाच्यं एकं संधित्सतो परं प्र
च्यवतीति न्यायेन लोकाव्ययनिष्ठाखलर्थतृनमिति तृनो योगे षष्ठ्या एव नास्ति कुतस्तरां षष्ठीसमासः किं
तर्हि षडंगमधीयते इति विग्रहे तस्यत्यानीते उपपदमतिङ् इत्युपपदसमासे कृते षडंगनिगमाध्येता इति भविष्य
त्येव किं कल्पनांतरेण सह दूषणेन न च सोपपदाद्धातोः तृज्विधानं नास्तीति वाच्यं हिमवच्छेत्तृ आदित्यद्रष्टेत्या
दि महाभाष्यकारप्रयोगेषु समाधानं स्यादिति अत एव तर्हि कर्मण्युपपदे कर्मण्यणित्यण् प्रसज्येत ततश्च षडं
गनिगमाध्याय इति स्यात् तस्माद्विशेषषष्ठीमंगीकृत्यानुपपन्नः षडंगनिगमाध्येता इति प्रयोगः सत्यं ज्ञाप
काद्भविष्यति समासः किं ज्ञापकं इति कर्तुः प्रकृतिरिति अनेन कर्तरि चेति षष्ठीसमासप्रतिषेधस्य मनसि
निधाय साधुत्वमंगीकृत्य वा तस्य प्रयोगस्य प्रयोगस्य ग्रंथकृता अत एव भीष्मः कुरूणां भयशोकहर्ता का
लचक्रप्रयोक्तारं सैव सिद्धांतवेत्तेत्यादयो महाकविप्रयोगा उत्पन्ना भवंति एवमेव विवाहप्रकरणे भवति वि
वाहविनाशकारकोयमिति प्रायो कर्तरि कारकाविति तत्र विवाह विनाशकारक इति कर्तरि कारकाविति अनयोः
प्रयोगयोरिदानीमुक्तं पूर्वपक्षं योजयित्वा न त्वयो जकाहे तद्धेति ज्ञापकान्निषेधानित्यत्वमंगीकृत्य समाधिरं
गीकार्यः अत एव नित्यं त्रिनेत्रावनरत्नबोधिकामिति प्रयोगोपपत्तिः यदि तु संबंधमात्रे षष्ठीमतं तदा षष्ठ
कर्मभावादेव कर्तरि चेति निषेधाभावात्सुखेन षष्ठीसमासः अथवा षडंगमध्येतुं शीलं येषां त इति विग्रह

मु.टी.
ग्र.प्र.
२

नं शार्दूलविक्रीडितेनाह आसीन्मातृपुरे षडंगनिगमाध्येतृद्विजैर्मंडिते ज्योतिर्वित्तिलकः फणींद्ररचिते भा
ष्ये कृतातिश्रमः तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजां तत्कालंकृतिवेदवाक्यविलसद्बुद्धिः स
चिंतामणिः सुप्रसिद्धः चिंतामणिः चिंतामणिर्नाम मातृपुरे विदर्भदेशविशेषे मातृपुराख्ये आसीत् कीदृ
शे धर्मपुरे षडंगनिगमाध्येतृद्विजैर्मंडिते निगमो वेदः षट् अंगानि यस्यासौ षडंगः षडंगानीमानि शिक्षाक
ल्पो व्याकरणं निरुक्तं छंदो ज्योतिषां चेति षडंगः चासौ निगमः षडंगनिगमः तस्याध्येतारो ध्ययनकर्तारः
अध्येतृभिरध्यापका अप्युपलक्ष्यंते नहि विनाध्यापकं वेदाध्ययनं कश्चित् दृष्टं तादृशा द्विजा ब्राह्मणाः ब्राह्म
णक्षत्रियवैश्यास्तैर्मंडिते भूषिते कीदृशः चिंतामणिः ज्योतिर्वित्तिलकः ज्योतींषि नक्षत्राणि लक्षणया तत्प्र
तिपादकं ग्रंथजातं ज्योतिःशब्देनोच्यंते तानि विंदंति जानंतीति ते ज्योतिर्विदः सत्सूद्विषेत्यादिना क्विप् ज्योतिर्वित्सु
तिलक इव ज्योतिर्वित् श्रेष्ठः इत्यर्थः पुनः कीदृशः फणींद्ररचिते फणींद्रः शेषमहानागस्तेन रचिते भाष्ये व्याकर
णमहाभाष्ये कृतोतिश्रमोभ्यासो येन सः महाभाष्याध्यापनपारंगम इत्यर्थः पुनः कीदृशः तत्तज्जातकसंहि
तागणितकृत् तानि तानि स्वल्पबृहदादिभेदेन अनेकविधानि ज्ञातानि कानि जातकशास्त्राणि संहिताः संहिता
शास्त्राणि गणितानि गणितशास्त्राणि करोति तादृशो होरासंहितगणितरूपस्कंधत्रयात्मकस्य ज्योतिःशास्त्रस्य
पद्यैर्निर्मितेत्यर्थः अनेन महाकविरित्यपि सूचितं पुनः कीदृशः महाभूभुजां सकलजंबुपतिराजमुकुटमणीनां
महतां राज्ञां (विता) पानि महादीनां मान्यः पूज्यः महाराजमान्य इत्यर्थः पुनः कीदृशः तत्कालंकृतिवेदवाक्यविलसद्बुद्धिः
तर्को न्यायशास्त्रं अलंकृतिरलंकारशास्त्रं वेदवाक्यं वेदविचारप्रतिपादको ग्रंथो मीमांसाशास्त्रं वेदांतशास्त्रं च
तेषु विलसंती विलासयुक्ता बुद्धिर्यस्य सः द्वंद्वांते श्रूयमाणं पदं प्रत्येकं पदमभिसंबध्यते इति न्यायतर्कशास्त्रज्ञाः
अलंकारशास्त्रज्ञाः मीमांसाज्ञो वेदांतज्ञश्चेत्यर्थः आसीदिति असभुवीत्यस्माल्लङि आडजादीनामित्याट् अ
सोरल्लोप इत्यकारस्य लोपः षडंगनिगमाध्येतृद्विजैरित्यत्र समस्तपदे षडंग निगम इत्यत्र तत्पुरुषः समानाधिक राम:
७

अथ गृहप्रवेशप्रकरणोपसंहारं सूचयन्प्रवेशोत्तरकालीनकर्तव्यविधिमुपजात्याह एवं सुलग्ने स्वगृहं प्रविश्य वि
तानपुष्पश्रुतिघोषयुक्तं शिल्पज्ञदैवज्ञविधिज्ञपौरान् राजार्चयेद्भूमिहिरण्यवस्त्रैः एवं प्रागुक्तप्रकारेण विहितेसु
लग्ने निर्दूषणे सकलगुणयुक्ते च शोभनलग्ने स्थिरराश्यादिके राजा वितानपुष्पश्रुतिघोषयुक्तं वितानानि वस्त्र
मंडपाः पुष्पाणि सतूनानि मालत्यादीनि श्रुतिघोषो वेदध्वनिः चैतैर्युक्तमुपलक्षणत्वात्तोरणध्वजदाममंगल्यवस्त्र
सहितमेतादृशं स्वगृहं स्वसत्ताकं गृहं प्रविश्य पश्चात् शिल्पज्ञान् गेहोत्थापकान् स्थपतिवर्धक्यादीन् दैवज्ञान्
ज्योतिर्विदः विधिवास्तुपूजाकृतबलिगृहप्रवेशनीयविधिज्ञान् पुरोहितप्रभृतीन् पौरान् नागरिकान् पंडितादीनां ध
कृपणांश्च भूमिहिरण्यवस्त्रैर्यथाशक्त्या भूम्या हिरण्येन वा वस्त्रैर्वा समुचितैर्वा उपलक्षणत्वादश्वगजादिभिर्वार्चये
त् पूजयेत् यदाह वसिष्ठः हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेन्नृदिति राजमार्तंडेपि भूरिपु
ष्पनिकरं सतोरणं तोयपूर्णकलशोपशोभितं गंधपुष्पबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद्गृहमिति की
दृशं गृहं प्रवेशयोग्यं न भवतीति विशेषो वसिष्ठेनाभ्यधायि यद्वास्तुपूजारहितं त्वदत्तबलिं त्वनाच्छन्नगृहं विरूपं
कपाटहीनं न विशेद्यतः तत्सर्वापदामालयमेव तत्स्यादिति नारदेनापि अकपाटमनाच्छन्नमदत्तबलिभोज
नं गृहं न प्रविशेद्धीमान्विपदामालयं हि तदिति तस्मात्सकपाटसुपरिच्छादाच्छादितं कृतवास्तुपूजां दत्तबलिमे
व गृहं प्रविशेत् प्रवेशोत्तरकर्तव्यविधिमाह श्रीपतिः ततो नृपो विप्रसुहृत्पुरोधसः शिल्पज्ञभूगोलविदः स्वलि
गिनः धनैश्च रत्नैः पशुभिः समर्चयेत्तदा दीनान्सुखवासिनस्तथेति शिवं ७ ज्योतिर्विद्वरनीलकंठविदुषः
श्रीचंद्रिकायास्तथा पुत्रेणाहि गवीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मिते नयनिधौ पीयूषधा
राभिधे व्याख्याने गृहवेशनप्रकरणं संपूर्णतामागमत् इति श्रीविद्वद्दैवज्ञमुकुटालंकारश्रीनीलकंठज्यो
तिर्वित्सुत गोविंदज्योतिर्विद्विरचितायां पीयूषधाराभिधायां गृहप्रवेशप्रकरणं समाप्तिमगमत् अथ मुहूर्त
चिंतामणौ ज्योतिषग्रंथस्य समाप्तिं कर्तुकामो ग्रंथकृत्तन्त्ररचनालंकारभूतस्वपितामहचिंतामणिदैवज्ञवर्णं

मु॰टी॰ गृ॰प्र॰ ६

नि फलं गृहपतेर्लाभोद्व्याप्तिः ततः कृत्ताः पश्चिमे तदग्रिमाणि चत्वारि भानि पश्चिमायां स्थाप्यानि फलं गृहपतेः
श्रीप्राप्तिः ततो वेदा उत्तरे तदग्रिमाणि चत्वारि भानि उत्तरस्यां स्थाप्यानि फलं कलिः लोकैः सह गृहसंबंधे निरर्थको
वा गृहकलहः स्यात् ततो युगमितास्तदग्रिमाणि भानि चत्वारि गर्भे कलशमध्ये स्थाप्यानि फलं विनाशः कस्येत्या
कांक्षायां गर्भोपादानाद्गुर्विणीनां गर्भाणां विनाश इत्यर्थः ततो रामास्तदग्रिमाणि भानि त्रीणि गुदे बुध्ने स्थाप्यानि फ
लं स्थैर्यं गृहपतेः बहुकालं तत्र गृहे निवासः अतोऽनलास्तदग्रिमाणि त्रीणि भानि कंठे स्थाप्यानि फलं स्थिरत्वं सर्व
दा गृहपतेर्भवेत् एवमभिजिद्रहितानि सप्तविंशतिभानि स्युः उक्तं च विश्वकर्मणा कुंभाकारं लिखेच्चक्रं रविधिष्ण्य
क्रमेण च मुखैकं दिक्षु चत्वारि त्रीणि गुदकंठयोः एवं चक्रं समालेख्यं प्रवेशार्थं सदा बुधैः अत्र चत्वारीति वीप्सा
द्रष्टव्यानि दिक्षु इत्यनेन न गर्भोप्युपलक्ष्यते तथा च फलानि देशस्तत्रैव अग्निनाशो मुखे प्रोक्तः उद्वासः पूर्वतो भवेत्
दक्षिणे चार्थलाभाय पश्चिमे श्रीप्रदो भवेत् उत्तरे कलहश्चैव गर्भे गर्भविनाशनं स्थिरता च गुदे कंठे कलशस्य प्र
कीर्तितेति ज्योतिःप्रकाशेपि भू वेदपंचकं त्रिस्त्रि १ ४ ४ ४ ४ ४ ३ ३ प्रवेशार्के भान्मृतिर्गतिर्धनं श्रीः स्याद्वैरं
स्थिरता सुखमिति वेदपंचकं वेदचत्वारः तेषां पंचकं पंचवारं चत्वारि चत्वारि भानि लिख्यानीत्यर्थः मृत्यादीनि अ
ष्टौ यथासंख्यं फलानि अत्र कलशचक्रे शुभफलदस्थाने सत्येव विहितनक्षत्राणां परिग्रहो युक्तस्तत्रापि यदि
मुखप्रवेशो विधित्सितस्तर्हि मुखविहितनक्षत्रपरिग्रहः यथा पूर्वदिगभिमुखगृहप्रवेशे विधित्सिते रोहिणीमृ
गे एव ग्राह्ये दक्षिणाभिमुखगृहप्रवेशे उत्तरफल्गुनीचित्रे एव पश्चिमाभिमुखे अनुराधोत्तराषाढे एव उत्तराभि
मुखे उत्तराभद्रपदारेवती ग्राह्या इति निष्कृष्टार्थः अत एवोक्तं वसिष्ठेन यद्दिग्द्वारं मंदिरं तद्दिगृक्षैस्तदुक्तैः स्यात्प्र
वेशो न सर्वैरिति तद्दिगृक्षैरिति उक्तर्क्षैरिति वानयोः समानाधिकरण्येनान्वयः भिन्नवाक्यत्वेन विवक्षितेन च
कारः कर्तव्यः स्यात् संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति न्यायः च अत एव अर्कानिलाद्योदितिदस्रविष्णु
ऋक्षे प्रविष्टं नवमंदिरं यत् अब्दत्रयात्तत्परहस्तयातं प्रोषेषु धिष्ण्येषु च मृत्युदं स्यात् इति निषेधोऽप्युपपन्नो भवति ६ राम॰ ६

गृहप्रवेशः कर्तव्यो वामः सूर्यः तथाच यस्मिंल्लग्ने प्रवेशः कर्तुमिष्यते तस्माद्द्वितीयस्थानं तस्मात्पंचमस्थानेषु स्थिते सूर्ये पश्चि
माभिमुखं गृहप्रवेशः कर्तव्यो वामः सूर्यः तथैवच यस्मिंल्लग्ने प्रवेशः कर्तुमिष्यते तस्मादेकादशस्थाने ततः पंचसु स्थानेषु
स्थिते सूर्ये उत्तराभिमुखं गृहप्रवेशः कर्तव्यो वामः सूर्यः यथाच कोडारः उक्तंच रंध्रात्तु त्र्यङ्गनादाद्यात्पंचस्वर्के स्थिते क्रमात्
पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः इति विश्वकर्मापि लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् एकमेकं न्यसेत्को
णे सूर्ये वामे विचिंतयेत् इति प्राच्यां लग्नाद्द्वौ राशी स्थाप्यौ कोणे चैकः पूर्णातिथ्याविति प्राग्वदनेन पूर्वाभिमुखे गेहे पूर्णाति
थ्यां पंचम्यां दशम्यां पूर्णिमायां वा प्रवेशः शुभः नंदादिके तिथिगणे याम्यजलोत्तराननेन गृहप्रवेशः यथा दक्षिणा
भिमुखे गृहे नंदायां प्रतिपदि षष्ठ्यामेकादश्यां वा प्रवेशः शुभः जलं पश्चिमादिक् तद्दिगभिमुखे गृहे भद्रायां द्विती
यायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः उत्तराभिमुखे जयायां तृतीयायां अष्टम्यां त्रयोदश्यां वा प्रवेशः शुभ इत्यर्थः य
दाह गुरुः नंदायां दक्षिणद्वारं भद्रायां पश्चिमामुखं जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेदिति मूले नंदादिके इति पदेन पा
नाद्रिक्तायां ग्रहणं यद्यप्यायाति तथापि विदिग्द्वारं निषेधात् दिक्षु वतश्चैव चतुर्णां द्वाराणां संभवात्स्वरूपेणो निषेधाच्च रिक्ताग्र
हणं संभवदेव ध्येयः सोपि संमतिर्वाक्येष्ट एव अथ गृहप्रवेशे कलशवास्तुचक्रं शार्दूलविक्रीडितेनाह वक्त्रे
भू रविभात्प्रवेशसमये कुंभेग्निदाहाः कृताः प्राच्यामुद्वसनं कृतायमगता लाभः कृताः पश्चिमे श्रीर्वेदाः कलिरुत्त
रे युगमिता गर्भे विनाशो गुदे रामाः स्थैर्यमतः स्थिरत्वमनलाः कण्ठे भवेत्सर्वदा कलशस्याष्टधा विभागः परि
कल्प्यः मुखं कंठो गर्भो गुदं चेति चत्वारो विभागाः पूर्वादिदिक्चतुरत्वेन चत्वारो विभागा एवमष्टसु तत्र वि
भागपरत्वेन सूर्यभान्नक्षत्रन्यासे फलमुच्यते वक्त्रे इति गृहप्रवेशसमये इति सर्वत्रापि संबध्यते कुंभे कलशाकृतौ वा
स्तुनि रविभात् सूर्याक्रांतनक्षत्रादिति ल्यब्लोपे पंचमी रविभमारभ्य नक्षत्रन्यासः इत्यर्थः तत्र कलशस्य वक्त्रे मुखे
भूरेकं सूर्याक्रांतनक्षत्रमेव स्थाप्यं तत्फलं गृहस्याग्निदाहः ततः सूर्यभात्कृता अग्रिमाणि चत्वारि भानि प्राच्यां स्था
प्यानि फलमुद्वसनं जनवामशून्यं गृहं स्यात् ततः कृता यमगताः तदग्रिमाणि चत्वारि भानि दक्षिणस्यां स्थाप्या

मु·टी·
गृ·प्र·
५

योः स्वरूपतो निषिद्धत्वात् विशेषांतरमाह वसिष्ठः यज्जीर्णचंद्रांत्यषष्ठसंस्थः पापेक्षितः पापयुतोथवास्पात् क
र्तुः श्रियं हंति सवत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेदिति अथ राज्ञां यात्रा(विशेष)प्रवेशे विशेषो ध्येयः यत्र मासे यत्र कृता तत
स्मान्नवमे मासि यात्रादिनान्नवमे दिने वा प्रवेशो निषिद्धोस्ति यदाह गुरुः निर्गमान्नवमे मासि प्रवेशो नैव शोभनः नव
मे दिवसे चैव प्रवेशं नैव कारयेत् वामरविरिति गृहप्रवेशसमये रविः सूर्यो वामो यद्दिगभिमुखात्प्रवेशः गृहाद्वामभागस्थ
वेश्म गृहं विशेत् तथा पुरोग्रे स्वसम्मुखं पूर्णघटं जलपूर्णं कलशं उपलक्षणत्वात्पूगीफलादिभिः पूर्णं पात्रं वा कृत्वा च
कारस्यानुक्तसमुच्चयार्थत्वाद्ब्राह्मणांश्च सकलशानपि ब्राह्मणानग्रे कृत्वा, अत्र शुक्रः पृष्ठगः कार्य इत्यनुक्तोपि विशे
षो ध्येयः यदाह वसिष्ठः कृत्वा शुक्रं पृष्ठतो वामतोर्के विप्रान्पूज्यानग्रतः पूर्णकुंभं हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः
सार्धं गीतमाल्यैर्विशेन्नदिति गुरुस्तु वामगो ग्रगो वा शुक्रो निषिद्धः पृष्ठगो दक्षिणगतो वा शुभ इत्याह यथा पृष्ठ
गं दक्षिणं वापि भृगुं कृत्वा विशेत्सदा पुरोगं वामगं वापि शुक्रं कृत्वा विशेन्नचेति अत्र शुक्रदिक्कालस्थयस्थत्वाज्ज्ञानं च
द्रवदेव ज्ञेयं विशेषानुक्तेः तच्च गृहारंभप्रकरणेस्माभिरुक्तं अयं च सर्ववर्णानां त्रिविधेपि प्रवेशे विधिः राज्ञां तु यात्रानि
वृत्तौ विशेषमप्याह श्रीपतिः कृत्वा विप्रान्सजलकलशान्स्वाग्रतो वामतोर्कं स्नातः स्रग्वी विमलवसनो मंगलैर्वेदघोषैः स
त्स्यैर्योज्ञाकथितशकुनैर्द्वारमार्गेण राज्ञा हर्म्यं पुष्पप्रकररुचिरं तोरणाद्यं विशेच्चेति कीदृशं भकूटदुष्टं षडष्टकादि तेन दुष्टं उप
लक्षणत्वाद्विवाहप्रकरणोक्तं वर्णवश्यं तथा तारेत्येवमादिकं च तेनापि दुष्टं ध्येयं यदाह वसिष्ठः राशिकूटादिकं सर्वं दंपत्यो
रिव चिंतयेत् इति ४ अथावसरप्राप्तं वामगतार्कज्ञानं तिथिपरत्वेन पूर्वाद्यभिमुखगृहप्रवेशं चेंद्रवंशयाह वामो रवि
र्मृत्युसुतार्थलाभतोर्के पंचमे प्राग्वदनादिमंदिरे पूर्णातिथौ प्राग्वदने गृहे शुभे नंदादिके याम्यजलोत्तराननेः अष्टमपंचम
द्वितीयैकादशस्थानेभ्यः पंचसु स्थानेषु स्थिते रवौ सति प्राग्वदनादिके मंदिरे प्रवेष्टव्ये गृहप्रवेशकर्तुर्वामो रविर्ज्ञेयः तद्य
था यस्मिंल्लग्ने प्रवेशः कर्तुमिष्यते तस्मादष्टमं यत्स्थानं तस्मात्पंचसु स्थानेषु स्थिते सूर्ये पूर्वाभिमुखगृहप्रवेशकर्तु
र्वामः सूर्यः तथा च यस्मिंल्लग्ने प्रवेशः कर्तुमिष्यते तस्मात्पंचमं स्थानं तस्मात्पंचसु स्थानेषु स्थिते सूर्ये दक्षिणाभिमुख राम· ५

यगेगुरौ लग्नेष्टगौ वा केंद्रे वा स्थिरग्राम्प्रोदये विशेदिति केंद्रस्य शुद्धत्वमुक्तं तत्पापग्रहराहित्यरूपं ध्येयं लग्न
स्य गुरुशुक्राभ्यां युक्तिस्त्वतिप्राशस्त्याभिधानार्था कीदृशे लग्ने विजनुर्भाष्टत्यो भराशिः लग्नं च जनुषि जन्मका
ले भं जनुर्भं भाभ्यां मृत्युरष्टमभवनं जनुर्भाष्टमौ यस्मिन् स्वजन्मलग्नात्स्वजन्मराशेर्वाष्टमो राशिः प्रवेशलग्न
गतो नापेक्षित इत्यर्थः पुनः कीदृशे अर्कारविरिक्ताचरदर्शचैत्रे अर्कारौ प्रसिद्धौ वारौ रिक्ता ४।९।१४ उपलक्ष
णत्वात्कृष्णपतिथयोऽपि चरलग्नानि मेषकर्कटतुलमकराः उपलक्षणत्वान्नरंशा अपि दर्शो मावस्या चैत्रो मासः
उपलक्षणत्वादाषाढोऽपि विगता अर्कादयो यस्मिन् अर्कादयः प्रवेशदिने निषिद्धा इत्यर्थः यदाह वसिष्ठः
नैधने भे पिनचाष्टलग्ने पंचेष्टके प्यष्टमशुद्धियुक्ते कार्यः प्रवेशो नचरांशलग्ने शुभेक्षिते वाप्यथ संयुते वा
रिक्तासमादग्धतिथिं दिनेशभूसूनुषड्भिर्नेंदुदृष्टिं क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधं प्रवे
शे वारफलमप्याह स एव दह्यते प्रविशतां च मंदिरं वह्निना नियतमेव वह्निभे ब्रध्नभूमिसुतवासरे तथा
शीतरश्मिदिवसे हि हृद्धिमत् चंद्रजार्यसितवासरेषु तु श्रीकरं सुखमहार्थलाभदं सूर्यसूनुदिवसे स्थिर
प्रदं किंतु चौरभयमत्र विद्यते एषां निष्कृष्टमर्थमाह श्रीपतिः रिक्तातिथिर्भूसुतभानुवासरौ निंद्याश्च यामाः
परिवर्जनीयाः मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवेशे हितयातरंश इति निषिद्धलग्नफलान्यभिहितानि
राजमार्तंडे भूयो यात्रा मेषलग्ने प्रवेशो नाशं गच्छेत्कर्कटस्योदये च व्याधिस्तौलिन्याश्रिते लग्नवर्तिन्या
केकोरो वा प्रयाह्यान्यनाशं लग्नेन्यत्रांशके प्येषां एष दुष्टफलप्रदाः शुभान्यन्यानि लग्नानि प्रवेशे मुनयो
विदुरिति अन्यानि स्थिरराशिद्विस्वभावानि च उक्तं च वसिष्ठेन पंचांगसंशुद्धिदिने निशेशताराबले चाष्टकव
र्गयुक्ते सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेथवा द्व्यंगगृहे विलग्ने इति राजमार्तंडे विशेषः निंदिता अपि शुभां
शसमेताः तौलिमेषमकराः सकुलीराः कर्तुरोपचयगाश्च विलग्ने राशयः शुभफलाय भवंतीति एतल्लग्नां
तराशुद्धौ वक्ष्यमाणा सहित्वे वा द्रष्टव्यं शुभांशा वृषमिथुनकन्याधनुर्मीनानामंशा इत्यर्थः कर्कतुलांश

त्रेण गंधपुष्पाक्षतादिभिः प्रणवेनार्चयेद्वापि अथवास्य स्वनाममिः शुक्लं वस्त्रयुगं देयं धूपदीपफलैः सह अपूपैः
भूरिनैवेद्यैर्वीच्यैश्चैव समर्पयेत् तांबूलं च ततो दद्याद्देवेभ्यश्च पृथक् पृथक् दत्वा पुष्पांजलिं वा तोप्रार्थयेद्वास्तुपुरु
षं वास्तुपुरुष नमस्तेऽस्तु भूमिशय्यारत प्रभो तद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा इति प्रार्थ्य ततो दद्याद्दक्षि
णामर्चकाय च ॥ विप्रेभ्यो भोजनं दद्यात्स्वयं भुंजीत बंधुभिः एवं यः कुरुते सम्यग्वास्तुं चैव प्रपूजयेत् यत्नतः आ
रोग्यपुत्रपौत्रादि धनधान्यं भवेन्नरः वास्तुपूजामकृत्वा यः प्रविशेन्नवमंदिरं रोगान्नानाविधान्क्लेशान्प्राप्नु
ते सर्वसंकटं ॥ इति वसिष्ठसंहितायां वास्तुशांतिः विशेषस्त्वन्यसंहिताभ्यो वसेयः एवंभूतबलिरपि उपक्र
मोपसंहाररूपो वास्तुशांतिप्रकारः प्रयोगरत्नादिनाम्नीषु स्वस्वशाखाभेदेन भिन्ना सुपभृतिं च द्रष्टव्यः ग्रंथ
विस्तारभयान्नेह लिख्यते इत्यलमतिप्रसंगेन केचित्तु पंचांगशुद्धिमात्रायुक्ते सर्वदिन एव वास्तुपूजामाहुः य
दाह नारदः ॥ विधाय पूर्वदिवसे वास्तुपूजां बलिक्रियामिति श्रीपतिरपि अथ प्रवेशो नवमंदिरस्य यात्रा
निवृत्तावथ भूपतीनां सौम्यायने पूर्वदिने विधाय वास्त्वर्चनं भूतबलिं च सम्यगिति २ अथ लग्नशुद्धिं तिथि
वारशुद्धिं चोपजातिकोत्तरार्धेनेंद्रवज्रया चाह त्रिकोणकेंद्रायधनत्रिगैः शुभैः त्रिषष्ठलाभोपगतैश्च पापकैः
शुद्धाष्टरंध्रे विजनुर्भमृत्यौ व्यर्कारिक्ताचरदर्शचैत्रे वामं रविं पूर्णघटं पुरस्तात्कृत्वा विशेद्वेश्म भकूटशुद्धे
नवपंचमप्रथमचतुर्थसप्तमदशमैकादशद्वितीयातृतीयस्थानानामन्यतमस्थैः शुभग्रहैः पूर्णचंद्रबु
धगुरुशुक्रैरुपलक्षिते सति तत्र चंद्रस्य लग्नराहित्यं ध्येयं तथा तृतीयषष्ठैकादशस्थैः पापग्रहैः क्षीणचं
द्रसूर्यभौमशनिराहुकेतुभिरुपलक्षिते च तथाष्टं च चतुर्थस्थानं रंध्रमष्टमस्थानं शुद्धे सर्वग्रहरहिते
अष्टं तु रंध्रे यस्मिंस्तादृशे लग्ने वेश्म गृहमाविशेत् यदाह वसिष्ठः केंद्रत्रिकोणायधनत्रिसंस्थैः शुभैस्त्रिषष्ठा
यगतैः खलैश्च लग्नात्यषष्ठाष्टमवर्जितेन हिमांशुनेति प्रवेशः स्यादिति पूर्वेण संबंधः गुरुः सप्तमं शुद्ध
द्वाहे यात्रायामष्टमं तथा दशमं च गृहारंभे चतुर्थं सन्निवेशने इति श्रीपतिः केंद्रत्रिकोणव्ययैः शुद्धैः क्रूरैः षष्ठा

धातथैव च वास्तुपूजनमेतेषु न द्वयेषु करोति यः स प्राप्नोति नरो लक्ष्मीमिति प्राह पराशरः इति वास्तुपूजा प्रकारमा
ह वसिष्ठः निर्माणे मंदिराणां च प्रवेशे त्रिविधेपि च वास्तुपूजा च कर्तव्या यस्मात्तां कथयाम्यतः गृहमध्ये हस्तमात्रं
समं तावत्तुलोपरि एकाशीतिपदं कार्यं तिलैस्तु लघुशोभनं एकद्वित्रिपदाः पंचचत्वारिंशत्सुरार्चिता द्वात्रिंशद्बाह्य
तो वक्ष्यमाणास्तत्र त्रयोदश तेषां स्थानानि नामानि वक्ष्याम्यीश्वरकोणतः तत्राग्निः शंभुकोणस्थः त्वसौ चैक
पदेश्वरः तस्माद्द्वितीयः पर्जन्यः चासावेकपदेश्वरः जयंतेंद्रार्कसत्याख्यास्त्वथ भृशश्च द्विपदेश्वराः आकाशकाय
परतः क्रमादेकपदेश्वरौ एवं प्राच्यां नव ज्ञात्वा त्वेवमेवान्यदिक्षु च आद्यास्त्वाद्यावेकपादौ द्विपदाः पंचम
ध्यगाः पूषाद्द्वेष्टौ यमांताः स्युरमरा याम्यभागगाः आद्यः चांत्यावेकपादौ द्विपदाः पंचमध्यगाः अष्टौ पितृग
णाधीशाः पापांताः पश्चिमे सुराः आद्यंतौ च द्वावेकपादौ द्विपदाः पंचमध्यगाः रोगादिदित्यंतसुराः सन्ति सौम्य
दिशि क्रमात् तत्राद्यस्थः च तत्कोणेष्वीशानादिषु च क्रमात् आपः सवित्रविजयरुद्रश्चैकपदेश्वरः मध्येन
वपदो ब्रह्मा तस्येशानादिकोणगः आपवत्सोथ सविता विबुधाधिपसंज्ञकः राजयक्ष्मा च चत्वारः सुराश्चैव
पदेश्वराः ब्राह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अपि अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात् सुरस्थले
षु देवेषु स्थापितेष्वीदृशं भवेत् कोणेषु पंचपंचैव च चत्वार्येकपदाः सुराः प्रागादिदिक्षु द्विपदाः पंचपंच यथाक्रमं
ब्राह्मणः पूर्वतो दिक्षु त्रिपदाः स्युः समीपगाः हिरण्यरेताः पर्जन्यो जयंतः पाकशासनः सूर्यः सत्यो भृशाकाशा
वायुः पूषा च वै तथा गृहक्षतः पितृपतिर्गंधर्वो भृंगिराजकः मृगः पितृगणाधीशः तथा दौवारिकाह्वयः सुग्री
वः पुष्पदंतश्च जलाधीशो निशाचरः शोषः पापः च रोगोहिर्मुख्यो भल्लाटएव च सोम सर्पादितिर्दितिर्द्वात्रिंशदम
राः स्मृताः आपःचैकपवत्साश्च जयो रुद्रस्तथैव च मध्ये नवपदो ब्रह्मा तस्य तस्य समीपगाः प्राच्यांद्यंतरिता देवा
परितो ब्रह्मणः स्मृताः अर्यमा सविता चैव विवस्वान्विबुधाधिपः मित्रोथ राजयक्ष्मा च तथा पृथ्वीधराः क्रमा
त् आपवत्साष्टमः पंचचत्वारिंशत्सुरोत्तमाः ज्ञात्वैवं स्थाननामानि ब्राह्मणैः सहितान्यसेत् वास्तुज्ञो वास्तुम

श्री.
गृ.प्र.
२

गुर्वास्तबाल्यवार्धसिंहस्थगुरुमकरस्थगुरुलुप्तसंवत्सरादीनां दोषाणां विचारेण विचारो नास्ति अस्तादयः काल
दोषाः संतु वा मा वा तथापि गृहप्रवेशः कार्यः परंतु सोपि यथाकथंचित्पंचांगशुद्धिमात्रं अंगीकृत्य विहितनक्षत्रेषु
कार्यः वास्तुपूजात्वेवंविधेपि गृहप्रवेशो भवतीत्यपि ध्येयं यदुक्तं ज्योतिषप्रकाशे प्रवेशो नूतने हर्म्ये नित्ययाने गृ
हे जीर्णे प्राशने परिधाने के वधूप्रवेशे मांगल्ये न मौढ्यं गुरुशुक्रयोरिति वसिष्ठेनाप्युक्तं नवप्रवेशे ह्यथ काल
शुद्धिर्न द्वंद्वसौपूर्विकयोः कदाचित् प्रवेशपंचांगदिने सुलग्ने वास्त्वर्चनं पूर्ववदेव कुर्यात् अस्यार्थः नूतनगृहप्र
वेशकालशुद्धिर्विचार्या द्वंद्वं द्वंद्वभयाद्यो गृहप्रवेशः सौपूर्विको राज्ञो यात्रासमाप्तौ गृहप्रवेशः नादृशयोर्गृ
हप्रवेशयोः कालशुद्धिः कदाचिदपि नापेक्षिता सति संभवे तु खेनास्तु किंतु प्रवेशदिनीयपंचांगशुद्धिसहिते
सुलग्ने गृहप्रवेशः कार्यः पूर्ववदेव पूर्वस्मिन्नाद्ये नूतनप्रवेशे यथा वास्तुपूजा तथा द्वंद्वसौपूर्विकयोरपि का
र्येत्यर्थः नारदस्तु यात्रानिवृत्तिप्रवेशे कालशुद्धिरपेक्षितैवेत्याह नक्षत्रकं प्रागभिहितं तदेतयोर्वाक्ययोरावश्य
कानावश्यकत्वेन व्यवस्था त्रयाणां गृहप्रवेशानां लक्षणमुक्तं वसिष्ठेन अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसा
ने तु सपूर्वसंज्ञः द्वंद्वभयात्वग्निभयादिजातः प्रवेश एवं त्रिविधः प्रदिष्ट इति एतद्व्याख्याने यात्रानिवृत्तौ इति प
क्ष्याक्तनावस्तितत एवावधार्यं अत्रेदं ध्येयं यत्त्रिविधेपि प्रवेशे प्रवेशदिनीयं नक्षत्रं क्रूराक्रांतं क्रूरविद्धं ताव
त्सर्वथा वर्ज्यमिति उक्तं च वसिष्ठेन क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे इति २ अथ गृहप्रवेशादि
नात्प्राक्नैवं वास्तुपूजां विवक्षुस्तन्नक्षत्राण्युपजातिकाश्लोकार्धेनाह मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्चनं
भूतबलिं च कारयेत् मृदूनि ध्रुवाणि क्षिप्राणि चराणि नक्षत्राणि प्रसिद्धानि मूलभं च एतेषु सप्तदशसु भेषु वा
स्तोर्वास्तुपुरुषस्यार्चनं भूतबलिं च कारयेत् गृहपतिर्वास्तुपूजां वा कुर्यात् पुरोहितो गृहपतिं वास्तुपूजादिकं
कारयेत् हृक्रोरन्यतरस्यामित्यणौ कर्तृकर्मत्वं यदाह श्रीदोम्बयः चित्राशतभिषास्वातिहस्ताः पुष्यः पुनर्वसुः
रोहिणी रेवती मूलं श्रवणोत्तरफल्गुनी धनिष्ठा चोत्तराषाढा तथा भद्रोत्तरान्विताः अश्विनी मृगशीर्षं च ह्यनुरा

रा.म.
२

कर्त्रे भोपचयगः च विलग्ने राशयः शुभफलदाय भवंति इति नारदः कर्तुर्जन्मर्क्षलग्ने वा ताभ्यामुपचये ऽपि वा प्रवे
शलग्ने स्याद्वृद्धिरन्यभे शोकनिस्वतेति पुनर्वसिष्ठः सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्ने ऽथ वांऽशगृहे विलग्ने इति
सौम्ये सौम्यग्रहयुक्ते द्व्यंगगृहे द्विस्वभावराशौ अत्र विवाहप्रकरणोक्ता एकविंशतिमहादोषा वर्ज्याः इत्यपि ध्येयं ए
कविंशतिदोषानुपक्रम्य वसिष्ठेनोक्तं कर्तृनाशो गृहारंभे प्रवेशे पतिनाशनमिति अथ जीर्णगृहादिविषयके
प्रवेशे विशेषं सिंद्धवंशाब्धैः दसाह जीर्णगृहे ग्न्यादिभयान्नवे ऽपि मार्गोर्जयोः श्रावणिके ऽपि सन्स्यात् वेशो त्रु पेज्या
निलवासवेषु नावश्यमस्तादिविचारणात्र जीर्णे पुरातने, नवनिर्मिते गृहे ऽथवा सिद्ध एव गृहे ग्न्यादिभयात् अश्विन्
तं भयं दाह ॥ आदिशब्देन बहुवृष्टिपातभयं राजकोपोत्थ इत्याद्युपद्रवैः पतितेषु गृहेषु पुनरपि सम्यङ्निवेशने उत्था
पिते गृहे ऽपि प्राक्पश्चात्योक्ताः सर्वे ऽपि मासाः तादृशगृहप्रवेशे ध्येयाः ॥ किंच मार्गोर्जयोर्मार्गशीर्षकार्तिकयोः श्राव
णिके श्रावणे ऽपि मासि वेशः प्रवेशः स्यात् शुभफलदः श्रावणेन नभः श्रावणिकः च स इत्यमरः यदाह सनत्कुमा
रः गृहारंभोदिते मासे धिष्ण्ये वारे विशेद्गृहमिति अत्र तु सामान्यतो गृहारंभोदिता मासा गृहप्रवेशे ऽभिहिता नारदे चेमे
सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदा इति नारदोक्तेः मार्गशीर्ष
फाल्गुनवैशाखमाघश्रावणकार्तिकविहिताः तत्रोत्तरायण एव गृहप्रवेशस्य वाक्यांतरेण विहितत्वात् श्राव
णकार्तिकमार्गशीर्षाणामुत्तरायणत्वाभावाद्विरोधे नूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था कथं प्रागभिहिताना
द्वाक्येनोत्तरायणसाहचर्येण नूतनगृहप्रवेशस्याभिधानात् उत्तरायणीया मासास्त्रिविधगृहप्रवेशमध्य
मत्वमाह अथो देवजीर्णगृहप्रवेश उत्कृष्टत्वमध्यवसीयते ध्रुवं त्वथेति ध्रुवं मृदुः शततारकः ईज्यः पुष्यः अनिलः
स्वाती वासवं धनिष्ठा एषु ऽपि भेषु जीर्णगृहे ग्न्यादिभयान्नवे ऽपि गृहप्रवेशः शुभः प्राक्प्रोक्तेषु तेभेषु शुभ एवेति के
षुचित्कन्यायां दृश्यते उक्तं च ज्योतिर्निष्प्रकाशे ॥ प्रासादे नूतने नेष्टं ध्रुवैर्मैत्रैः सखाग्नेये पुष्यस्वातियुतैर्जी
र्णे स्याद्वासवद्वये इति नावश्यमिति अत्रैवंविधे जीर्णगृहे ग्न्यादिभयान्नवे ऽपि गृहे वाद्यमस्तादिविचारणा शुक्रास्त

मु॰टी॰
गृ॰प्र॰
२

काऽंभे दिने शेन विशेद्गृहं ग्रामं वा नगरं वापि पत्तनं वा सराधिपेति गुरुवाक्यमप्येवं व्याख्येयं ननु पौषचैत्रादिषु वि
रुद्धफलेषु चांद्रमासेषु विहितसंक्रांतिश्चेन्न स्यात्तदा नूतनगृहप्रवेशः कार्यो वा न वेत्यत आह न सौरमिति खलु निश्चये
न सौरमानं सन्निवेशगृहप्रवेशे नेष्टं न शुभफलदं विरुद्धशुभफलयोः चांद्रसौरमासयोः साहित्ये विहितचांद्रमासे
रेव गृहप्रवेशः कार्य इत्यलमतिप्रसंगेन द्वास्स्थेति द्वारनक्षत्राणि भानि स्थाप्यानि अश्विन्यादिनोक्तानिष्ट
रूनि ध्रुवाणि चोक्तानि प्रसिद्धानि द्वास्स्थानि च तानि मृदुध्रुवोग्राणि चेति कर्मधारयः तादृशैर्भैः प्रवेशनं हितं स्या
त् अथ समर्थः यस्मिन्गृहे प्रवेशः कर्तुमिष्यते तस्य द्वारं यद्दिगभिमुखं तद्दिङ्नक्षत्रैः प्रविहितैः प्रवेशः कार्यः य
दाह **वसिष्ठः** यद्दिग्द्वारं मंदिरं तद्दिशि प्रोक्तर्क्षैः स्यात्तत्प्रवेशनं सर्वैर्द्धिति उक्तं ही नाह स एव चित्रोत्तराधान्त्व
शशांकमित्रवस्वन्त्यवारीश्वरभेषु नूनं आयुर्धनारोग्यसुपुत्रपौत्रसत्कीर्तिदः स्यात्त्रिविधप्रवेश इति **नारदः**
वस्वीज्यान्त्येषु वरुणत्वाष्ट्रमित्रस्थिरोडुषु शुभः प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोरिति । अत्र पुष्यधनिष्ठाश
ततारकाग्रहणं जीर्णगृहप्रवेशविषयं उक्तं च ज्योतिः **अप्रकाशे ॥** प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सखाश्विपुष्य
स्वातिषु नैतेष्विह जीर्णस्याद्वास्वद्ये एतद्ग्रन्थकृद्ध्यग्रिमपद्ये वक्ष्यति अशुभे वा शयने सन्निधायाह श्रीपतिः
शुभः प्रवेशो मृदुभिर्ध्रुवाख्यैः क्षिप्रैश्चरैः स्यात्पुनरेव यात्रा उग्रैर्नृपोत्राहणभैः कुमारी राज्ञी विशाखा स्वविनाशमे
ति कृत्तिकास्तु भवनं कृशानुना दह्यते प्रविशतां तान संशयः यन्मुखं च सदने हितं त्वक्ष उद्धारमेषु शुभकृत्प्रवेश
नमिति **वसिष्ठोपि** अर्कानिलार्योदितिनिर्ऋतिसविलु ... प्रविष्टं नवमंदिरं यत् अग्न्युत्तयान्तपरहस्तयातं शेषेषु
धिष्ण्येषु च शस्तं स्यात् प्रवेशलग्नान्याह जन्मर्क्षेति जन्मर्क्षं जन्मराशिः जन्मलग्नं प्रसिद्धं ताभ्यामुपचये ॥ त्ती
यषष्ठैकादशदशमस्थानेषु तथा स्थिरराशिषु राशिषु लग्नगतेषु सत्सु नव गृहप्रवेशनं शुभं यदाह **वसिष्ठः ॥**
कर्तुर्विलग्नाद्यथ जन्मराशेः लग्नस्थितो राशिरिप्रतिष्ठः निर्व्याधिदारिद्र्ययशस्कराष्ट्रोगप्रदाः सिद्धिकरो
ष्टदः च क्रमाद्वैरामयदः क्रमेण सदैव नूनं त्रिविधप्रवेशे इति अनेनानिष्टमर्थमाह गृहप्रवेशे राजमार्तोः राम॰
२

सौम्यः मार्गशीर्षः मध्यमोक्तिरावश्यकविषयः चांद्रमासफलमाह वसिष्ठः॥ माघेऽर्थलाभः प्रथ
मप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभः ज्ये
ष्ठेषु मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च शुक्ले च पक्षेऽतितरां विवृद्ध्यै कृष्णे च यावद्दशमी च तावद्दिनि
शुक्ले चेत्याद्युक्तेरेवं ग्रंथकृता पक्षविशुद्धिर्नोक्ता तिथिवारशुद्धिस्त्वग्रे वक्ष्यते वसिष्ठेन गृहप्रवेशे
सौरमानमनूद्य दूषितं यथा मृगादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव कुंभं विनान्येषु
पिके विरुद्धं च नैसौरमिष्टं खलु सन्निवेशे इति अस्यार्थः नूतनगृहप्रवेशो मकरादिषड्राशिसंस्थितेऽर्के
शुभफलदो भवति तत्रापि माघादिविहितेषु चतुर्षु मासेषु शुभः नन्वर्थप्रवेशो नवसद्मनश्च सौम्या
यने इति स्वयं प्राक्सौम्यायनस्थे कृत्वा त्विति मतं पुनरुक्तमित्यत आह कुंभं विनेति सत्यमुत्तरायणे कुंभ
संक्रांतौ नूतनगृहप्रवेशो न भवतीत्येतदर्थं पुनरुक्तमित्यर्थः नन्विदं पूर्वापरविरुद्धं तथाहि माघे
ऽर्थलाभः प्रथमप्रवेश इत्यादिना माघफाल्गुनयोः चांद्रमासयोः शुभफलाभिधानात् तत्रैव कुंभसंक्रां
तिसद्भावद्वयोरन्यतरस्या शुभत्वं प्रतिपद्यते उभयमासनिष्ठः कुंभस्तु नास्त्येवेति चेत् उच्यते सन्ति हि
द्विविधाः चांद्रमासाः शुक्लादयः कृष्णादयश्चेति तत्र फाल्गुनपूर्णिमोत्तरमासस्य कृष्णादिमासगणनया
चैत्राद्यास्तस्य च विरुद्धफलत्वात् द्विविधयेकार्यं कुंभसंक्रांतिनिषेधः चांद्रमासस्य शुक्लादिकृष्णाद्यभिधा
यकानि वाक्यानि गृहारंभप्रकरणेऽस्माभिरुक्तानि अयमपि निषेधो मासस्य कृष्णादित्वज्ञापकः अ
थकर्कादिसंक्रांतिषु मतांतरमाह अन्येष्वपीतिके चिदाचार्या अन्येष्वपि कर्कादिषड्राशिस्थिते सूर्येऽपि
नवगृहप्रवेशः कार्य इत्यूचुः तदेतद्द्वंद्वं सौपूर्विकगृहप्रवेशविषयं तदुक्तं स्वयमेव नवप्रवेशोऽथ काल
शुद्धिर्न द्वंद्वसौपूर्विकयोः कदाचित् नूतनतृणागारगृहप्रवेशविषयं वा तदुक्तं ज्योतिषप्रकाशे गृहा
रंभादिने मासे विहितावारे विशेद्गृहे विशेत्सौम्यायने हर्म्यं तृणागारं तु सर्वदेति अतएव ऊशीरकन्य

मु॰टी॰
गृ॰प्र॰
१

ॐ नमः सरस्वत्यै ॥ ॐ लंबोदरं नमस्कृत्य गोविंदं नविंदं नविदां मुदे गृहप्रवेशप्रकरणं सम्यग्व्याख्यायतें
तिमं अथ गृहप्रवेशप्रकरणं व्याख्यायते तत्र चतुर्धा प्रवेश इत्युक्तं प्रागस्माभिः तत्र नववधूप्रवेशो विवा
हप्रकरणे निहिताः अन्यः प्रवेशत्रयमुहूर्तोऽत्राभिधीयते ननु यात्रानिवृत्तौ शुभदं प्रवेशनमित्यादिना
सुपूर्वप्रवेशस्याभिहितत्वात्प्रवेशद्वयमेव वक्तव्यं स्यान्न तु प्रवेशत्रयमिति उच्यते यात्रां कृत्वा प्रतिनिवृत्तस्य
भूपादेरान्मुहूर्तेन नगराद्बहिः स्थानमशक्यं वर्तते दैवादागतत्वेष्टाद्यभिभूतस्य यथाकथंचिच्छुभाशुभमप्रक
रणोक्तां पंचांगशुद्धिं विचार्यैवोक्तपद्यविहितनक्षत्रैरेव प्रशस्तः प्रवेशोऽभिहितः न तु विशिष्य तादृशप्रवेशका
लशुद्धिः लग्नशुद्धिर्वोक्तेत्यतः पूर्वस्यापि प्रवेशस्याभिधानं तत्रापूर्वप्रवेशप्रायाः कालशुद्धिकमिदं वशिष्ठो
ऽत्र साह सौम्यायने ज्येष्ठतपोऽन्त्यमाधवे यात्रानिवृत्तौ नृपतेर्नवगृहे स्याद्वेशनं द्वाःस्थमृदुध्रुवोडुभिर्जन्म
र्क्षलग्नोपचयोदये स्थिते एषु सौम्यायन इत्यादिकेषु पदार्थेषु सत्सु नृपतेर्यात्रानिवृत्तौ अथवा नवे नूतने
त्यापिते गृहे वेशनं विशावेशने प्रवेशनं स्यात् सौम्यायने उत्तरायणे अत्र शुक्रास्तबाल्यादिको दोषो
वाच्यो रामतनयोगेत्यादिनोक्त इति न पुनरुक्तः एवं गीर्वाणांबुप्रतिष्ठेत्यादिना दक्षिणायननिषेधोऽपि
अतः परिशेष्यात्सौम्यायनग्रहणं सिद्धं तदुक्तिमेद्बुद्धीनां शीघ्रप्रतिपत्त्यर्थं तदुक्तं वसिष्ठेन ॥ अथ
प्रवेशो नवसद्मनः च सौम्यायने जीवसितेबलान्वे इति नारदः अथ सौम्यायने कार्यं नववेश्मप्रवेश
नं राज्ञां यात्रानिवृत्तौ वेति केवलं याम्यायां मूलगोक्रीनायां प्राग्नायां स्वतः सिद्धायां वोत्थापिते गृहे नूतन
मित्युच्यते ॥ ज्येष्ठेति ज्येष्ठमाघफाल्गुनवैशाखेष्वेव ज्येष्ठे च सत्यप्युत्तरायणे प्रवेशनं शुभं यदाह ना
रदः माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोरिति राम॰
१

गृहप्रवेश १

उतः
वधूप्रवेश प्रकरण ३ तत्रैप्रकरणत्रयं ॥
आदौ वधूप्रवेशस्ततो द्विरागमनं ततो गत्वा
धानं राजाभिषेकं चेति ॥ ॥ ॥

मु.दी.
तु.प्र.
२

श्रीगणेशाय नमः ॐ गणनायकमाराध्य विघ्नसंघनिवारणं वधूप्रवेशप्रकरणं व्याख्यातिविधिवन्मुदे अथ वधूप्रवेश
प्रकरणं व्याख्यायते तत्र वध्वा ऊढनपरिणीतायाः कन्यायाः प्रथमतः केरिष्यमाणो भर्तृगृहप्रवेशो वधूप्रवेशशब्दवाच्य
स्तदधुनावसरप्राप्तत्वात्तन्मुहूर्तमुच्यते इव ग्राह्यं दसाह समाद्विपंचांकदिने विवाहाद्वधूप्रवेशोऽष्टि १६ दिनांतराले शुभः
परस्ताद्विषमाब्दमासदिने त्ववर्षात्परतो यथेष्टं ९६ विवाहाद्विवाहदिवसादारभ्याष्टिदिनानि षोडशदिनानि तेषामंत
राले समाद्विपंचांकदिने समदिनानि द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशसंख्यानि विषममध्ये सप्त
मपंचमनवमदिनानि तेषु वधूप्रवेशः वध्वा ऊढनपरिणीतायाः कन्यायाः भर्तृगृहप्रवेशः शुभफलदः यदाह नारदः आर
भ्योद्वाहदिवसात्षष्ठे वाप्यष्टमे दिने वधूप्रवेशः संपत्त्यै दशमे च समे दिने षष्ठादीनां समत्वादेव ग्रहणात्पुनरुक्तिरिति प्राश
स्त्यसूचनार्थं ज्योतिर्निबंधे तु विशेषः वधूप्रवेशनं कार्यं पंचमे सप्तमे दिने नवमे च शुभे वारे सलग्ने शशिनो बले इति
परस्तात्तु तिबंधवशात्षोडशदिनाभ्यंतरे वधूप्रवेशो न जातस्तदा तदनंतरं विषमाब्दमासदिने विषमवर्षे प्रथमतृती
यपंचमवर्षेषु विषममासे विवाहमासात्प्रथमतृतीयपंचमसप्तमनवमैकादशमासेषु विषमदिनानि सप्तदशादीनि
तेषु वधूप्रवेशः शुभः तत्रापि यदि प्रतिबंधवशात्कालातिक्रमः पंचवर्षात्मको जातस्तदा पंचवर्षादनंतरं यथेष्टं विषम
वर्षादिनियमो नास्ति किं तु दोषरहिते काले वधूप्रवेशः प्रविधेयः उक्तं वसंग्रहे विवाहमारभ्य वधूप्रवेशो युग्मे दिने षो
डशवासरांतः ऊर्ध्वं ततोब्दत्रितिपंचमां तत्पुनः परस्तान्नियमो न चास्तीति अत्राब्दे युग्मीतिपदद्वके दोषश्रवः यदुक्तं ज्योतिर्ग
विवाहपटले वधूप्रवेशः प्रथमे त्ववर्षे तथा तृतीये प्यथपंचमे वा सूर्येंदुदेवेज्यबलेन कुर्यात्तु सोमुनिर्गौतम आह स्त
त्यमिति समवर्षे दोषस्मरणाच्च यदाह धर्मशास्त्रे नारदः समे वर्षे समे मासे यदि नारी गृहे व्रजेत् आयुष्यं हरते भर्तुः सा ना
रीमरणं व्रजेत् अथ वधूप्रवेशोयं युग्मवत्सरनिषेधः पंचवर्षात्प्राक् ज्ञेयो न पश्चात् तद्वाक्यस्य प्रागभिधानात् अथ व
धूप्रवेशे नक्षत्रादि शुद्धिमनुष्टुभाह ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले वधूप्रवेशः सन्नेष्टो रिक्तारार्कबुधे परैः ध्रु
वाणि रोहिण्युत्तरात्रयं च क्षिप्राण्यश्विनीपुष्यहस्ताः मृदूनि चित्रानुराधारेवतीमृगाः श्रोत्रं श्रवणः वसु धनिष्ठा मूलं प्रसि ग १
द्धं अनिलः स्वाती एषु भेषु वधूप्रवेशः सन् शुभफलदः अथो रिक्तास्तिथिषु कौ राभ्यामन्यवारेषु वधूप्रवेशः प्रशस्तइत्यर्थः २

उक्तं व्यवहारतत्त्वे पौष्णात्कभात्त्व श्रवणाच्चयुग्मे हस्तत्रये मूलमघोत्तरासु पुष्ये च मैत्रे च वधूप्रवेशो रिक्तेतरे व्यर्कजे
च शस्तमिति कर्मरोहिण्यां बुधे परे रीति अन्यैः शिष्टैः बुधवारे वधूप्रवेशो नेष्यते कस्मिंश्चिद्देशे विशिष्टाचारो यद्बुधवारे व
धूप्रवेशो नेष्यते न विधीयते केचिदत्र हेतुमपि वर्णयंति यद्बुधो नपुंसक इति तच्चिंत्यं शनेरपि नपुंसकत्वात्तस्यापि निषेधो
वाच्यः स्यात् एवं निर्णीतो वधूप्रवेशो रात्रावेव कार्यो न दिवेत्युक्तं स्मृत्यर्थसारे वधूप्रवेशो न दिवा प्रशस्तो रात्रौ प्रवेशो न निशि
प्रशस्तः दिवा च रात्रौ च गृहप्रवेशः सत्कीर्तिदः स्यात्त्रिविधः प्रवेश इति अथ विवाहानंतरं प्रथमेषु केषुचिन्मासेषु वध्वाः
पित्रादिगृहनिवासे फलमिंद्रवंशयाह ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हंत्यादिमे भर्तृगृहे वधूः शुचौ श्वश्रूं स
हस्ये श्वशुरं क्षये तनुं तातं मधौ तातगृहे विवाहतः विवाहतो विवाहानंतरं भर्तृगृहे स्थिता यदि आदिमे प्रथमे ज्येष्ठमा
सि तिष्ठंती वधूः पतिज्येष्ठं भर्तुर्ज्येष्ठभ्रातरं हंति एवमादिमेऽधिके मासि स्थिता वधूः पतिं भर्तारं हंति आदिमे शुचावाषा
ढे श्वश्रूं भर्तृजननीं हंति आदिमे पौषे श्वशुरं भर्तुः पितरं हंति आदिमे क्षयमासे भर्तृगृहे तिष्ठंती तनुं निजशरीरं हंति
म्रियत इत्यर्थः तथादिमे मधौ चैत्रे तातगृहे पितृगृहे तिष्ठंती तातं पितरं हंति यदि कन्यायाः पित्राद्यभावः तदा तत्तन्मा
से तत्तद्गेहावस्थितायास्तस्यामपि न कोपि दोष इत्यर्थः उक्तं च मुहूर्तमार्तंडे उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तृगृहे कन्यका हन्या
त्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं पौषे च श्वशुरं पतिं च मलिने चैत्रे च पित्रालये तिष्ठंती पितरं निहंति न भयं तेषाम
दृष्टे भवेदिति मलिनेऽधिकमासे क्षयमासाधिकमासयोर्लक्षणं संक्रांतिप्रकरणेऽभिहितं तस्मान्नवध्वा विवाहानंतरं
वध्वा आषाढपौषाधिकमासक्षयमासेषु भर्तृगृहे न स्थातव्यं किंतु पितृगृहे एव स्थातव्यं चैत्रमासि पितृगृहे न स्थातव्यं
यदा तु भर्तृगृहे एव स्थातव्यमिति फलितार्थः तदुक्तं ज्योतिर्निबंधे विवाहात्प्रथमे वर्षे पौषे आषाढेऽधिमासके न सा भर्तृगृहे
तिष्ठेच्चैत्रे पितृगृहे तथा ॥ आषाढो ज्येष्ठोपलक्षकः अधिकमासः क्षयमासोपलक्षकः अत्र प्रमाणं प्रागुक्तमेवेति शिवं ॥
ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेण हि गवी प्रसादितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मिते
नयनिधौ पीयूषधाराभिधे व्याख्याने हि वधूप्रवेशसमयाध्यायः समाप्तिं गतः इति श्रीविद्वद्दैवज्ञमुकुटालंकारनीलकंठज्यो
तिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां वधूप्रवेशप्रकरणं समाप्तिमगमत्

मु.
४५४.

श्रीगणेशाय नमः ॐ गणनायकमारभ्य नीलकंठं गुरुं तथा द्विरागमप्रकरणं व्याख्यामि विदुषां मुदे अथ द्विरागमप्र
करणं व्याख्यायते तत्र पूर्वं नववधूप्रवेशो ज्ञातो नन्दनं परन्त्वपि पितृगृहं प्राप्तायां वध्वां घष्ठवर्षाणि स्थिता याः पुनर्भर्तृ
गृहप्रवेशो द्विरागमशब्दवाच्यः अयं चाचारः प्राच्योदीच्यपाश्चात्यानामेवेत्यधुना वसरप्राप्तत्वात्तन्मुहूर्तं प्रपंचयामर
कंदसाह चरे दृथोऽज्ञहायने वटालिमेष २९ ८ २ गोरवौरवीज्यशुद्धियोगतः शुभग्रहस्य वासरे नृयुग्ममीनकन्यकातु
ले वृषे विलग्नके द्विरागमं लघुध्रुवे चरे स्वपे मृदूडूनि अथ वधूप्रवेशकथनानंतरं वक्ष्यमाणत्वात्तत्रादिषु द्विरागमं चरेत्
मत् कदा ओजहायने विषमवर्षे प्रथमे तृतीये पंचमे वा वर्षे सति तथा वटालिमेषगे कुंभवृश्चिकमेषस्थिते रवौ तथा
शस्य रवीज्यशुद्धिः रवेः सूर्यस्य ईज्यस्य गुरोश्च शुद्धियोगतः शुभग्रहस्य सोमबुधगुरुशुक्राणामन्यतमस्य वासरे च स
ति मिथुनमीनकन्यातुलावृषाणामन्यतमे लग्ने शुभग्रहावलोकिते शुभयुक्ते वा सति लघून्यश्विनीपुष्यहस्ताः ध्रु
वाणि प्रसिद्धानि चराणि श्रवणादित्रयपुनर्वसुस्वात्यः अस्वपाः हस्तमूलं मृदूनि प्रसिद्धानि एतेषु भेषु च द्विराग
मः प्रशस्त इत्यर्थः यदाह श्र लोश्रयः तिष्यादित्यसमीरणादितिवसुत्रीण्युत्तराण्यश्विनी रोहिण्यः शुभदाश्च वर्षम
समं मेषालिकुंभे रविः कन्यामन्मथमीनभे नववधूयानं वृषे नो लिके देवाचार्यसितेन्दुसौम्यदिवसे शुद्धे गुरौ भास्करे इ
ति ग्रंथकर्त्रात्र कानिचिद्भान्यधिकान्युक्तानि तानि राजमार्तंडेनोक्तानि नीहारांशुधनोत्तरादितिगुरुब्रह्मानुराधा
श्विनीमूलाहस्करवारुणानिलहरित्वाष्ट्रेषु प्रोक्ता तिथौ कुंभाजालिगते रवौ शुभकरे प्राप्तोदये भार्गवे सूर्ये कीटयु
टाद्गते शुभदिने पंसोच्चके लग्नेरे हित्वादिकप्रतिलोमगौ बुधसितौ लालाटिगौ दिक्प्रतिं चानीता गुणशालिनी नवव
धूर्नित्योत्सवैर्मोदते लालाटिकानूयोगाद्यात्रायां वक्ष्यति शुक्रास्तनिषिद्धस्तस्मान्यतो वा प्यारामेन्यादिनोक्त एवेति
न पुनरुक्तः यद्यपि प्रोक्ता मान्येन कालशुद्धिरुक्ता तथाप्यावश्यकत्वे चैत्रे पौषे हरौ सुप्ते गुरोरस्ते मलिम्लुचे नवोढा
गमने नैव कुर्यात् पंचत्वमाप्नुयादिति बादरायणवाक्यान्नैव वधूप्रवेशः कार्यः अथ द्विरागमने संमुखशुक्रदोषं प्रहर्षि
णी छंदसाह दैवेज्योह्यभिमुखदक्षिणे यदि स्यात् गच्छेयुर्न हि शिशुगर्भिणीनवोढाः बालश्चेद्व्रजति विपद्यते नवोढा चेद्वंध्या भव रा.
ति च गर्भिणी त्वगर्भा यदि शुक्रोऽभिमुखे दक्षिणे गंतव्यदिगभिमुखे गंतुर्दक्षिणभागे वा स्थितः स्यात्तदा शिशुर्बालः गर्भिणी १

गर्भवती नवोढा नूतनपरिणीता च दूरेने दावं ध्या प्रत्यसंभावनारहिता स्यात् यदाह बादरायणः अस्तं गते भृगोः पुत्रे तथा
संमुखमागते नष्टे जीवे निरंशे च नैव संचालयेद्वधूं गुर्विणी बालके नापि नववध्वा द्विरागमे पदमेकं न गंतव्यं शुक्रे संमु
खदक्षिणे गुर्विणी स्रवते गर्भे तो वास्य मरणं भवेत् नवा वधूर्भवेद्वंध्या शुक्रे संमुखदक्षिणे यदि शुक्रः पूर्वस्यामुदितस्तदि
शो गंतुं संमुख एके मधु दक्षिणपश्चिमां गंतुः पृष्टे दक्षिणं गंतुर्वामे स्यात् तदा पूर्वोत्तरे दिशे न गच्छेत् किंतु पश्चिमदक्षिणे दि
शो न गच्छेत् यदि पश्चिमायामुदितः शुक्रः पश्चिमां गंतुः संमुख एव दक्षिणं गंतुर्दक्षिणः पूर्वां गंतुः ततउत्तरां गंतुर्वामं तदा
पश्चिमदक्षिणे दिशे न यायात् किंतु पूर्वोत्तरे दिशे पृष्टे भृगौ पुत्रवती प्रयाणे कांता कुलीना सुभगां करोति अग्रे सुदुःखवि
दधाति शुक्रो वैधव्यशोकौ खलु नास्ति शुक्रमिति केचिद्दीपोत्सवप्रतिपदि नक्षत्रादिनियमं विनैव वधूप्रवेशं वांछंति उक्तं च
अस्तं गते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ दीपोत्सवबले नैव कन्या भर्तृगृहं विशेदिति तदेतच्छिष्टाचारतो ध्येयं अत्र लग्नशु
द्धिमाह बादरायणः उपचयगते जीवे भृगौ केंद्रमुपागते शुद्धे लग्ने शुभाक्रांते गंतव्यं भर्तृमंदिरमिति अथ शु... प्रतिशुक्रा
पवादं मेदुभाषिणीकं दसाह नरप्रवेशविषयायुपद्रवे करपीडने विबुधतीर्थयात्रयोः नृपपीडने नववधूप्रवेशने प्रतिभार्ग
वो भवति दोषकृन्नहि नगरप्रवेशविषयादेशः आदिशब्देन ग्रामस्तस्योपद्रवे तु परराजकृतोपद्रवे सति दुर्भिक्षादिना वा उपद्रवे
सति गंतव्यदिशि प्रतिशुक्रदोषो नास्ति करपीडने विवाहोद्देशेन यात्रायां सत्यां वा विबुधादेवास्तेषां यात्रा यथा नगरको
टयात्रा देवयात्रा तीर्थयात्रा प्रयागादिका तयोः नृपपीडने नृपाद्राज्ञः सकाशात्पीडने पीडायां दंडादिकृतायां सत्यां नववधूप्र
वेशने नूतनपरिणीतायाः कन्याया भर्तृगृहप्रवेशे एतेषामन्यतमसद्भावे प्रतिभार्गवः संमुखशुक्रो दोषकृन्नहि भवति
यदाह बादरायणः स्वभवनपुरप्रवेशे देशानां विभ्रमे तथोद्वाहे नूतनवध्वागमने प्रतिशुक्रविचारणा नास्ति एकग्रामे पुरे वा
पि दुर्भिक्षे दृष्टविप्लवे विवाहे तीर्थयात्रायां प्रतिशुक्रं न दुष्यतीति नूतनवधूग्रहणाभिगमनं स्त्रीणां प्रतिशुक्रयात्रायाम
हान्दोषः तद्वाक्यं प्रागुक्तं अथ प्रोह स्त्रीणां द्विरागमने तथा गोत्रपरत्वे न च प्रतिशुक्रापवादांतरमिंद्रवंशाछंदसाह पित्र्ये गृहे
चेत्कुचपुष्पसंभवः स्त्रीणां न दोषः प्रतिशुक्रराशयः स्वस्वं गिरावत्सवसिष्ठकश्यपाः स्त्रीणां भरद्वाजमुनेः कुले तथा चेत्पित्र्येपि
तद्दिं पित्र्यं वाप्यहृत पिचुवसो यदि तियत्प्रत्ययः तस्मिन्पित्र्ये गृहे कुचौद्गतौ पुष्पमृतुस्तत्संभवः स्यात्तदा स्त्रीणां प्रतिशुक्रसंभ

वोनास्ति उपलक्षणत्वाद्गतेः सूर्यगुरुशुद्धिराहित्यसंभवोपि दोषो नास्तीत्यर्थः तदुक्तं चंडेश्वरेण पित्र्याभ्यारे ऊचकृत्तमयोः संभवो वा यदि स्यात्पत्युःशुद्धिर्न भवति रवेः संमुखत्वाथ शुक्रः शस्तलग्ने गुणवति तिथौ चंद्रताराविशुद्धौ स्त्रीणां यात्रा भवति सफला सेवितं स्वामिसद्मेति वा शास्त्रानुरूपशुद्धिरपि चेन्न भवतीत्यर्थः अथ भृग्वंगिरा वत्सो वसिष्ठः कश्यपो त्रिश्च तेष्वषयस्तेषां कुलेवंशे तथा भरद्वाजमुनेः कुले कोर्थः भृग्वंगिरोवत्सवसिष्ठकश्यपोत्पन्नानां तथा भरद्वाजवंशोत्पन्नानामपि प्रतिशुक्रसंभवो दोषो नास्ति यदाह बादरायणः कश्यपेषु वसिष्ठेषु भृग्वंगिरस्सेषु च भारद्वाजेषु वत्सेषु प्रतिशुक्रं न दुष्यतीति अयं चापवादो यात्रामात्रसाधारणः न द्विरागमन एव संमतिवाक्ये विशेषानुक्तेः एवं प्राक्तद्योक्तेप्यपवादो ध्येयः कंचित् शुभा यदाह महेश्वरः केतेषां प्रतिशुक्रयानमशुभं येवत्सभृग्वंगिरोभारद्वाजवासिष्ठकश्यपकुलोत्पन्नास्तथात्रेः कुले दुर्भिक्षेविषयाक्षवे प्रतिसितं तं न स्याद्विवाहे तथा तीर्थानां गमने तथैकनगरे ग्रामे च सौम्यं तथेति सोमस्यापत्यं सौम्यो बुधः सोमात्रिग्रहणं इतिग्रहणं बुधसंमुखत्वेपि भृग्वादिगोत्रोत्पन्नानामपि तथा यानमशुभं नास्ति चकारात् दुर्भिक्षाद्युपद्रवसद्भावेन्येषामपि यानमशुभं नास्तीत्यर्थः तच्चिंत्यं मूलवाक्यस्यापवादस्यानुपलंभात् किंच यथा साधारण्येन यस्यां कस्यांचिद्दिशि यात्रायां प्राप्तायां शुक्राधिष्ठितादिङ्निषिद्धा सा च बादरायणवाक्ये रपोद्यते तथा बुधसंमुखे गमननिषेधानुक्तेरेव तदपवादस्यायुक्तत्वदर्शनात् ननु प्रतिशुक्रं प्रतिबुधं प्रतिभौमं नृपः गतः बलेन शक्रतुल्योपि हतसैन्यो निवर्तते इति वसिष्ठोक्तिरेव सा बुधसंमुखे दोषनिषेधबोधिकास्ति किंच कुजाय वृषभं दद्यात्स्वर्णं दद्याद्बुधाय च तत्र संमुखत्वजो दोषः तज्जपादेव नश्यतीति बुधसंमुखत्वदोषनिराकरणार्थोपि तदुक्तिरेवास्ति प्रमाणमिति चेत्तत्वं प्रतिशुक्रं प्रतिबुधमित्यादिवाक्ये बुधसंमुखत्वमपि दोषावहमेवेति प्रतीयते अत्रार्थवादोप्युक्तं श्रीपतिना प्रतीडुजन्मभूमिगतस्य नान्यग्रहास्त्राणविधौ समर्था इति त्राणं रक्षणं नारदेनापि प्रतीडुजकृतं दोषं हंतुं शक्ता ग्रहा नहीति तत्र गोत्रादिविषयत्वेन परिहारोयमभिहितः सशुक्रसंमुख एव न बुधसंमुखे यतो गोत्रपरिहारवाक्ये प्रतिशुक्रं न विद्यत इत्युक्तं ननु प्रतिशुक्रमित्यादिवाक्योपात्तस्य प्रतिबुधदोषस्याप्ययं परिहारोस्तु दोषकथनानंतरमेव तस्याभिधानात् प्रतिशुक्रपदं तमुख्यतो सूचयितुमुपात्तं तदभिप्रायेण सौम्यं तथेति महेश्वरोक्तिः साधीयसीति चेन्न यद्येषोभिप्रायोभिहितः स्यान्नैसौम्यं तथेतिवद्भौमं तथेति वक्तव्यं स्यात् तच्च नोक्तं किंच प्र

त्रिशुक्रपदं शुक्रत्वेनात्र सूचयितुमुपात्तमित्युक्तं तदप्ययुक्तं अतः शुक्रास्तदोषस्य महत्त्वोक्तेनैतद्विषयकोऽयं गोत्रादिपरिहा
रः कामं व्रजेद्वा प्रतिशुक्रमस्तंगतेन यायान्न जिगीषुरत्रेति श्रीपत्युक्तेः अथान्यच्च शुक्रास्तदोषस्यापवादो बुधानुकूल्य
ममापि तेनैव अस्तंगतेप्यास्फुजिति प्रयायाद्बुधो यदि स्यादनुकूलवर्तीति अनुकूलवर्तीयात्रव्यादिकं सुष्ठुवर्ती बुधप्रातिकू
ल्यं तु महादोषावहमेव तद्वाक्यं प्रागभिहितं परं तु बुधास्तः समीचीनो न समीचीनो वेति कैरपि वचनं युक्तिर्वा काचिदप्यधायि
तस्माद्वाचनिकेऽर्थे न युक्तिः प्रभवेदिति बुधसांमुख्ये गोत्रादिपरिहारेण शिरोमणिपदवीमारोहति आदिशब्दात्स्वभवनपुर
प्रवेशादेशानां विभ्रमे तथोद्वाहे नूतनवध्वागमने न प्रतिशुक्रविचारणमस्ति एकग्रामे पुरे वापि दुर्भिक्षे राष्ट्रविप्लवे विवा
हे तीर्थयात्रायां प्रतिशुक्रं न दुष्यतीत्यादि तुल्यन्यायत्वाद्धोमसांमुख्येऽपि वसिष्ठाद्यृषिवचनाभावात् किंतु शुक्रसांमुख्य
एव स परिहारः सोऽपि सर्वेषां यात्रामात्रसाधारणः परं तु शिशुगर्भिणीनववधूनामस्तंगते भृगोः पुत्र इत्यादिबादरायणादि
वाक्यात्तु विशेषफलावगतिमात्रं तत्रैषां शिश्वादीनां बुधसांमुख्यविचारस्तु दूरापास्त एवेति अलमतिप्रसंगेनेति शिवं अ
थ द्विरागमनप्रकरणं गद्येनोपसंहरति इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंतामणौ द्विरागमनप्रकरणं
स्पष्टार्थमिदं ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेण हि गवीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदे
न विनिर्मितेनयनिधौ पीयूषधाराभिधे व्याख्याने पुनरागमप्रकरणं संपूर्णतामागमत् ॥ इति श्रीविद्वद्वृंदवंद्यमुकुटालंकारनील
कंठज्योतिर्वित्सुतगोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां द्विरागमनप्रकरणं समाप्तिमगमत् ॥
श्रीगणेशाय नमः गणनायकमाराध्य नीलकंठं गुरुं तथा अग्निहोत्रप्रकरणं व्याख्याति विदुषां मुदे अथाग्न्याधानप्रक
रणं व्याख्यायते तत्राग्निराधीयते श्रौतेन स्मार्तेन वा कर्मविशेषेणेत्यग्न्याधानं तत्र विवदंते केचित्पाणिग्रहणसमय एवा
ग्न्याधानमाहुः अपरेऽपि पितृभ्रातृभिः सह वा विभागकाल एवाहुः उक्तं च श्रुतौ आवसथ्याधाने दारकाले दायाद्यकाल
एकेषामिति पारस्करः दायाद्यकाले विभागकाले एतदेवाभिप्रेत्योक्तं महेश्वरेण अग्न्याधानं दारकाले विधेयं केचित्प्रो
क्तं न च दायाद्यकाले इति अन्ये वसंताद्यृतुपुरस्कारेण वर्णविशेषमाहुः तदुक्तं श्रुतौ वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः
शरदि वैश्यो वर्षासु रथकार आदधीतेति इतरे त्वाश्रद्धोदय एवाहुः एतदुक्तं श्रुतौ यदहरेवैनं श्रद्धोपरमेत तदहरेवादधीतेति

मु.
दी.प्र.
४

एतच्च सोमाधानविषयं यदाह वत्सः सोमेन यक्ष्यमाणेन नर्क्षं प्रतीक्ष्येत न नक्षत्रमिति तत्र पाणिग्रहणकालस्य प्रागुक्तत्वा
न्नक्षत्राण्यारभ्यमाणाधानार्थं न मुहूर्तं गवेषणं एवं पित्रादिभिः सह यस्मिन्काले विभागजातः तस्मिन्काले यथाकथंचिद्व
नीयानलभ्य द्वादिदोषरहिते आधानं कार्यमेव तदाप्युत्तरायणादिकालशुद्धिर्नापेक्ष्या तत्रापि यदि प्रतिबंधवशादाधाना
भावो जातस्तदा कालशुद्धिर्वक्ष्यमाणविधया विचार्यैव अथ येषां वर्णानां वसंताद्यृतवः सोमयागार्थं नियता एवोक्ताः
तेषां यद्यप्युत्तरायणे विचारो नास्ति संभवव्यभिचाराभावात् तथापि शुक्रास्तादिदोषनिवारणार्थं मुहूर्तो गवेष्य एव ये
षां श्रद्धोदय एवाधानमिति पक्षस्तेषां सोमाधानमेव श्रद्धोदये इति यथाकथंचित्यं चांगशुद्धिर्विचार्या ननु नक्षत्राणि
प्रतीक्षा शरदि वाजपेयेन यजेतेति वाजपेयादीनां यागविशेषाणां शरदाद्यृतुविशेषविहितानामपि सोम्याय न प्रतीक्षा
मुक्त्वा शुक्रास्तादिदोषराहित्यं विचार्यं तद्द्वयमत्र निर्णयः संपन्नः यत्र तु कालनियमेनाधानादि विहितं न दर्शमुहूर्तं विचा
रः यदा तु कालनियमाभावस्तदा मुहूर्तो विचार्य एवेत्यभिसंधाय आधानासोमयागादिमुहूर्तं वसंततिलकावृत्तेनाह
स्यादग्निहोत्रविधिरुत्तरगे दिनेशे मिश्रध्रुवान्त्यशशिशक्रसुरेज्यधिष्ण्ये रिक्तासु नो शशिकुजेज्यभृगौ न नीचे नास्तंगते
न विजिते न च शत्रुगेहे उत्तरगे उत्तरायणगते दिनेशे सूर्ये अग्निहोत्रविधिः स्यात् यदाह नारदः गृहप्रवेशवैवाहप्रतिष्ठामौंजिबं
धने मखादिमंगलं कर्म विधेयं चोत्तरायणे इति मखस्याग्निहोत्रपूर्वकत्वात्तदारंभोपि विवाह एव वैवाहः स्वार्थे अण् प्रतिष्ठा
देवताप्रतिष्ठा मिश्रेति मिश्रं कृत्तिकाविशाखे ध्रुवाणि प्रसिद्धानि अंत्यं रेवती शशी मृगः शाक्रो ज्येष्ठा सुरेज्यः पुष्यः एतेषा
मन्यतमेषु धिष्ण्येष्वग्निहोत्रविधिः स्यात् यदाह श्रीपतिः प्राजापत्ये पूषभे सद्द्विदैवे पुष्ये ज्येष्ठास्वैंदवे कृत्तिकासु अग्न्याधा
नं स्यादुत्तराणां त्रयेपि श्रेष्ठं प्रोक्तं प्राक्तनैर्विप्रमुख्यैरिति रिक्तास्विति रिक्तासु चतुर्थी नवमी चतुर्दशी एतास्वग्न्याधानं नो कार्यं
तदुक्तं दीपिकायां पुष्योत्तराविशाखासु ज्येष्ठांत्याग्निकवंद्विभे अग्न्याधानमरिक्तासु कार्यं वार्कज्ञेह्नीति को रोहिणी
प्राणिनीति चंद्रमंगलगुरुशुक्रेषु नीचगतेषु तथास्तंगतेषु तथा ग्रहांतरैर्विवर्जितेषु तथा शत्रुगृहस्थितेषु अग्न्याधानं नो का
र्यं उक्तं च रत्नमालायां कुजेंदुजीवेरिपुराशिसंस्थैः पराजितैर्नीचगृहोपगैर्वा अस्तंगतैर्वाग्निपरिग्रहो यः करोति हास्य विदुषां रा. २
स यातीति कश्यपस्तु शुक्रदोषमप्याह अत एव सल्लपयेच्च तद्गुणाभिधाने अग्न्याधाने लग्नशुद्धिं वसंततिलकयाह नार्कर्क्षे

नक्रझषकुंभनवांशलग्ने नाब्जे तनौ रविशशीज्यकुजैस्त्रिकोणे केंद्रेऽर्थषड्भिभवनेऽगोचपरैस्त्रिलाभषट्खस्थितैर्निधनशु
द्धियुते विलग्ने कर्कः प्रसिद्धः नक्रो मकरः झषो मीनः कुंभः प्रसिद्धः एतेषामन्यतमे लग्ने नवांशे चाग्न्याधानं नो कार्यं न
थाब्जे चंद्रे तनौ लग्नस्थे सति च नो आधानं कार्यं तथा चोक्तं श्रीपतिना राशौ विलग्नेऽवुचरे घटे वा तदंशके वाप्यथवा शशां
के आधानकाले द्विजपुंगवानां ज्ञातोऽपि निर्वाणमुपैति वह्निरिति नवांश एवकारेण चरस्यांशुचरत्वाभावात् पृथग्
ग्रहणं वराहस्तु नैतन्मन्यते मकरस्य पश्चिमार्धं कुंभो मीनश्च जलचराख्याता इति अत एवैतद्दूषणमयात् साप्युक्तं महेश्व
रेण कर्कनक्रघटमीनविलग्ने वांशगे तनुगतेऽथ तदीये लग्नगे कुमुदिनीदयिते वा नाशमेति जनितोऽपि हुताशः लग्नचंद्र
स्यापलक्षणत्वाद्वृश्चिकोऽपि विलग्ने निषिद्धः यदाह कश्यपः यस्य वाधानलग्नस्थे चंद्रे वाष्टगुनंदने उपैति तस्य ज्ञातोऽग्निर्निर्वाणं
सततं त्वत्र त्रिति रवीति सूर्यचंद्रगुरुभौमेषु त्रिकोणस्थितेषु सत्सु परैः चंद्रबुधशुक्रशनिराहुकेतुभिः त्रिलाभषट्खस्थि
तैस्तृतीयैकादशषष्ठदशमस्थितैः सद्भिराधानं हितं स्यात् यदाह श्रीपतिः त्रिकोणकेंद्रोपचयेषु सूर्ये बृहस्पतौ प्रीतिकरो
ऽनलो वा पापग्रहेषूपचयस्थितेषु धूमध्वजोत्पादनमामनंतीति धूमध्वजोऽग्निः निधनस्थे केचिदाहुः अग्न्याधानलग्ने निध
नशुद्धियुते ऽष्टमस्थाने सकलग्रहराहित्यं निधनशुद्धिरित्याहुस्तेन तत्राधानं शुभं तस्मादष्टमस्थाने यः कश्चिद्ग्रहः स्यात्तदा
शुभमेव उक्तं च श्रीपतिना चंद्रे पत्नीष्टत्युगे मृत्युमेति हि प्रवं अग्न्याधायको यजमानः ध्माधानारघुन्तचाविति लिंग्रा
नायुक्तश्चिरं हुतारिति युगागमः अन्ये त्वेवमाहुः निधनमष्टमलग्नं कस्मान्निधनमित्याकांक्षायां आधानकर्तुर्जन्मरा
शिजन्मलग्नाभ्यामष्टमलग्नमित्यर्थः तस्य शुद्धौ राहित्यं तदभाव इति यावत् तेन युते लग्ने इति यदाह कश्यपः पंचांगशुद्धि
दिवसे चंद्रताराबलान्विते चंद्रशुद्धियुते लग्ने चाष्टमोदयवर्जिते इति अत्र व्याख्याद्वयेऽपि प्रमाणसद्भावाद्द्वयमपि युक्तमिति
वयमुत्पश्यामः तत्र निधनशुद्धिश्च निधनशुद्धिश्च निधनशुद्धी ताभ्यां युते लग्ने इति मूलस्थस्य निधनशुद्धिपदस्य
इत्यर्थः सरूपाणामेकशेष एकविभक्ताविति एकशेषः यथा स्वर्थो वा बाध्यः स्मृता इति तृतीयपदव्याख्यानावसरे वादयः
चवादयश्चेति तत्राहत्येकशेषाणामन्यतमाश्रयेण नवपदमंजरीकारादिभिर्भ्वादीनां धातुत्वमुक्तं अथाग्निहोत्रिणामाधान
लग्नवशाद्योगकर्तृतानयोगाननुष्टुभाह चापे जीवे तनुस्थे वा मेषे भौमे वरे घुने यात्राग्न्येध्मोरवैवास्याज्ञाताग्निर्यज्ञति ध्रुवं

जीवे गुरौ चापस्थे धनुःसंस्थे सति तनुस्थे लग्नस्थे आधानलग्ने धनुराख्ये गुरुवधिष्ठिते सतीत्यर्थः अयमेको योगः वाथवा
भौमे मेषे मेषलग्ने सति अयं द्वितीयो योगः अथवाधानलग्नस्थानस्थे सप्तमस्थानस्थे वा भौमे सति योगद्वयमेतत् अथवा
ऽब्जे चंद्रे षष्ठतृतीयैकादशस्थानान्यतमस्थानस्थे योगत्रयमेतत् अथवार्के षष्ठतृतीयैकादशान्यतमस्थानस्थे सति योगत्र
यमप्येतत् एवंविधे लग्ने ज्ञाताग्निहोत्रकर्ता स्यादिन्द्रवत् ध्रुवं निश्चयेन यजति ज्योतिष्टोमादियागं करोतीत्यर्थः उक्तं च श्रीपतिना
लग्नस्थे धनुषि गुरावथ क्रियेवा भूसूनौ दशमगतेथ सप्तमे वा त्रिंशांशे सहजषडायगे विधौ वा ज्ञाताग्निर्यजति न संशयं द्विजेंद्र
इति केचिदेवमाहुः ध्रुवं निश्चितं निरंतरमिति यावत् यजति देवतोद्देशेनावदानत्यागो यागस्तं करोति निरंतरमग्निहोत्रकर्म क
रोतीत्यर्थः यदाह कश्यपः लग्नस्थे चापगे जीवे मेषे वा सप्तके मेषे उक्तेर्के त्रिषडायस्थे चंद्रे वाग्निर्ज्वलत्यलमिति शिवं ज्योतिर्विद्व
रनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेणाहितगीर्वीप्रसारितधिया मौहूर्तचिंतामणेः गोविंदेन विनिर्मिते नयनिधौ पीयूष
धाराभिधे व्याख्याने ग्निपरिग्रहप्रकरणं संपूर्णतामध्यगात् इति श्रीविद्वद्दैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्पुत्रगोविंदज्यो
तिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायामग्न्याधानप्रकरणं समाप्तिमगात् ॥ श्रीगणेशाय नमः ओं गौ
रीतनयमाराध्य गोविंदेन सतां मुदे राज्ञाभिषेचनाध्यायः सम्यग्व्याख्यायतेधुना अथ राज्ञाभिषेकप्रकरणं व्याख्यायते तत्र वैदिके
नाभिषेकाख्येन विशिष्टकर्मणा राजशब्दवाच्यः शुद्धवंशगतसंस्कारविशेषो राज्ञाभिषेकशब्देनोच्यते तत्र तन्मुहूर्तं वसंततिलका
मः कालशुद्धिं तावद्वंशस्थयाह राज्ञाभिषेकः शुभ उत्तरायणे गुरुविड्शुक्रैरुदितैर्बलान्वितैः भौमार्कलग्नेशदशेशजन्मपै
र्नो चैत्ररिक्तारनिशामलिम्लुचे उत्तरायणगते सूर्ये सति तथा गुरुविड्शुक्रैरुदितैर्बलान्वितैः भौमार्कलग्नेशबृहस्पतिचंद्र
शुक्रैरुदितैः सद्भिः राज्ञोभिषेकः शुभः शुभफलदः स्यात् यदाह कश्यपः अथातः संप्रवक्ष्यामि भूपानामभिषेचनं सौम्यायने
सिते जीवे नास्तगे न च वृद्धगे इति ननु गीर्वाणांबुप्रतिष्ठेत्यादिना प्रागुदग्दक्षिणायननिषेधादेवोत्तरत्वात् पुनस्त्वानां प्रयोजनत्वादि
ना च शुक्रादिदोषरहिते काले भूपाभिषेको ज्ञास्यत एव किमनेन पुनरुक्त्यर्थेन न च कश्यपादिरुक्तमिति वक्तव्योक्तमिति वाच्यं
तेस्तु सामान्यप्रकरणस्थत्वात् किं तु तत्र तन्मुहूर्तविशेषाभिधानमेव कर्तव्यं उच्यते गीर्वाणांबुप्रतिष्ठेत्यादिना वाप्यारामतडा रा॰ ५ रा॰ २
गेत्यादिना च सामान्यत एव युक्तत्वेषु दोषराहित्यमुक्तं तत्र कस्यचिदेव भ्रांतिः स्यात् यदुदग्दक्षिणायने शुक्रास्तादिदोषरहिते शुभं

कर्मेवा प्यारामादिकार्यं शुक्रास्तादिदोषसहितेउत्तरायणेपिकार्यमिति तन्निरासार्थमाह राज्ञाभिषेकः शुभ उत्तरायणेगु
र्विंदुशुक्रैरुदितैर्बलान्वितैरिति सिंहस्थमकरस्थंच गुरुं यत्नेन वर्जयेदित्यादिदोषाणां मगधगौडदेशेचेत्यादिनादेशभेदेक्ष
तपरिहारस्यप्रवचनत्वादितिनतेषांपुनरुक्तिः ननुसदाकृतयुगंचात्रसदावैचात्रराघवः नग्रहास्तोद्भवस्तत्रदोषाविशुद्धेपुरा
लयेइत्यादिभिर्व्यासवाक्यैः शुक्रास्तादिदोषसहितेउत्तरायणेपिकार्यमेवेति तन्निरासार्थमाह राज्ञाभिषेकः शुभ उत्तरा
यणेगुर्विंदुशुक्रैरुदितैर्बलान्वितैरिति सिंहस्थंमकरस्थंचगुरुं यत्नेनवर्जयेदित्यादिदोषाणामपिवाराणस्यादिदेशभेदे
नपरिहारसत्वात्किमित्युक्तिरितिचेन्न काशीखंडेहितीर्थयात्राप्रस्तावात्तद्विषयकएवापवादस्तेनवाराणस्यादाव
ल्पदिनस्थास्नोः पुंसः कोटिहोमदेवप्रतिष्ठादिशुभकर्माणिसुखेनस्युः बहुदिनस्थास्नोः पुनरखिलदोषराहित्यएवस्युः
ननुमकरस्थगुर्वादौमगधदेशहानार्थमेवकर्तव्यावश्यंपुनरुक्तिः सत्यं नहितेत्येव वस्तुतस्तद्दोषाविस्मरणार्थमेतावत्य
पुनरुक्तिः नन्वेतावद्दोषहानमेवावश्यकं विवाहप्रकरणोक्तानांवेधादिदोषाणामपिनिरासस्यावश्यकत्वात् उक्तंच
वसिष्ठेन तस्मादेतेषुदोषेषुकदाचिन्नाचरेच्छुभमित्यलमतिप्रसंगेनबलान्वितैरिति बलंस्वगृहादिस्थितत्वं तेनान्वितैर्गु
र्विंदुशुक्रैः सद्भीराज्ञाभिषेकः शुभः उक्तंचवसिष्ठेन मूल[illegible]त्रिकोणस्वगृहोच्चमित्रगृहस्थितैर्वापितदंशसंस्थैः शु
भेविलग्नेसततंग्रहेंद्रादिशंतिलक्ष्मींविपुलांचकीर्तिमिति अर्थान्नैर्बल्येग्रहाणामशुभंस्यात् तदप्युक्तं तेनैव स्वनीच
गैःशत्रुगृहोपगैर्वातदंशकैर्वास्तगृहोपगैर्वा पापोदयेशोकभयत्वकीर्तिंदिशंतिराज्ञांध्रुवशर्मवराय इति भौमेति भौमार्की
प्रसिद्धौ लग्नेशोजन्मलग्नस्वामीदशेशोवर्तमानजातकीयमहादशांतर्दशेशः स्वामिनोजन्मपोजन्मराशिस्वामी एतेरु
पिबलान्वितैः सद्भीराज्ञाभिषेकः शुभः बलान्वितमधुनाव्याकृतमेव यदाहवसिष्ठः आधानजन्मेशदशाधिनाथरवींदुभौ
मेज्यसितैर्बलस्थैः उत्पातदोषादिविवर्जितेषुपराधिपानामगति ...... आधानंजन्मलग्नंजन्मजन्मराशिरनयोरीशावा
धानजन्मेशौ यदाह श्रीपतिः विलग्नजन्मेशदशाधिनाथमार्तंडधात्रीतनयैर्बलिष्ठैः गुर्विंदुशुक्रैःस्फुरदंशुजालैर्महीपती
नामभिषेकइष्टइति नाचैत्रेति चैत्राख्यामासः रिक्ताः आरोभौमवारः निशारात्रिः मलिम्लुचोधिकमासः एषुराज्ञाभिषेको
नोशुभः यदाहचंडेश्वरः नाभिषेच्यानृपःचैत्रेनाधिमासेनभूसुते नप्रसुप्तेतथाविष्णौनरिक्तायांनरात्रिषु वसिष्ठेनबुधवा

रस्याममावस्यायाञ्च निषेध उक्तः स यथा रिक्तास्वमायां बुधभौमवारवर्ज्जेषु वारेषु दिनेषु चैव बलेदिने अद्यानिशेशयोश्च
नैनैधने मेत्वभिषेक इष्ट इति यत्तु भीमपराक्रमे प्रोक्तं राज्ञाभिषेकाहवदुष्टदंतिमतङ्गक्रियाणां कृषिकर्मणां च वास्यच
त्यमातनयस्य वारे प्रारंभसिद्धिं मुनयो वदंतीति अत्र भौमवारे राज्ञाभिषेकविधानं सेनापत्याभिषेकविषयं द्रष्टव्यं भौमस्य से
नाधिपतित्वात् राज्ञा नैर विपरीत यूद्धिनिषुतानेनेति वराहेणोक्तत्वात् अन्यथा वसिष्ठदंडेश्वरोक्तो भौमनिषेधो निर्विषयः
स्यात् यत्तु रत्नमालायां मंत्र्यौषधानि शाक्तैनाच सपौष्टिकानि गोविप्रराज्यपित्र्यकर्म च तत्स्यादेतु अत्र हि चतुष्पदाख्ये करणे
राज्यं कर्तव्यमित्युक्तं तच्चामावस्यायामवश्यंभवत्येवेत्ययुक्तं श्रीपतिवाक्यं प्रतिभाति उच्यते जीर्णराजमरणे संजाते अत्रा
देः शीघ्रमेवाखिलदोषनिरासपूर्वकशुभमुहूर्तालब्धौ कालांतरप्रतीक्षायां च द्विषदादिकृतसर्वनाशः स्यादित्येवं विषये,
पि चतुष्पदकरणे पुत्रादिरभिषेक्तव्य एवेत्येवंपरं व्याख्येयमिति युक्तं प्रतीमः उक्तं च दैवज्ञमनोहरे मृते राज्ञि न कालस्य नि
यमोऽत्र विधीयते नृपाभिषेकः कर्तव्यो दैवज्ञेन पुरोधसेति अथ राज्ञाभिषेकनक्षत्राणि लग्नशुद्धिं चेंद्रवंशायाह शाक्रश्र
वः क्षिप्रमृदुध्रुवाद्युभिः शीर्षोदये वोपचये शुभे तनौ पापैः त्रिषष्ठायगतैः शुभग्रहैः केंद्रत्रिकोणाग निधनत्रिशस्थितैः शा
क्रं ज्येष्ठा श्रवः श्रवणः क्षिप्राण्यश्विनी पुष्य हस्ताः ध्रुवाणि रोहिण्युत्तरात्रयं च एतैः उडुभिः सद्भी राज्ञाभिषेकः शुभः यदाह
कश्यपः उत्तरात्रयमैंद्रं धातृचंद्रकरोडुषु सप्तस्वप्यश्वियुक्तेषु कुर्याद्राजाभिषेचनमिति ऐंद्रं ज्येष्ठा अत्र वाक्ये द्वादशभानि ग्रंथ
कृद्वाक्ये त्रयोदश चित्रैकाधिका सा च महेश्वरवाक्यालोचनेन यथा श्रवः क्षिप्रमृदुध्रुवेषु शुभग्रहस्याह्नि तिथावरिक्ते इति ना
त्र प्रमाणं च पश्यामः रत्नमालावाक्ये मविष्यतीति चेन्न मैत्रः शाक्रः करपुष्यरोहिणीवैष्णवेषु तिसृषूत्तरासु रेवती मृगशिरोऽश्वि
नीषु पित्र्या भृतां सममभिषेक इष्यत इति चंडेश्वरोऽपि मैत्रं शाक्रं श्रवणः पुष्यं त्रीण्युत्तराणि चाश्विकरैः पौष्णं प्राजापत्यं मृग
शिर इति शोभनो भगणः इति तस्माच्चित्राग्रहणं निर्मूलं शीर्षोदये इति शीर्षोदया मिथुनसिंहकन्यातुलावृश्चिककुंभाख्याः
यदाह वराहः गोजाश्विकर्किमिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव शीर्षोदया दिनबलाश्च भवं
ति शेषा लग्नसमेत्युभयतः पृथुरोमयुग्ममिति एषु शीर्षोदयराशिष्वभिषेकलग्नगेषु अथवोपचये विशेषात् उक्तेः स्वजन्मलग्ना
त्स्वजन्मराशितो वोपचयभवनेभिषेके कादशमानामन्यतमे तनौ लग्ने गासति शुभे शुभग्रहाक्रांते शुभग्रहेक्षिते वा राज्ञाभिषेकः

शुभः यदाह वसिष्ठः शीर्षोदये वोपचये गृहे वा स्वजन्मलग्नाद्यथ लग्नगोपि शुभग्रहैर्युक्ते निरीक्षिते वा स्थिरं पदं स्यात्सततं हि रा
ज्ञामिति अपि शब्दात्स्वजन्मराशेरपि उपचयभवनं ग्राह्यं यदाह कश्यपः जन्मराशेरुपचये लग्ने शीर्षोदये स्थिरे शुभग्रहे हि
नयुते नयुक्ते वा क्षिते परैरिति परैः पापग्रहैः पापैरिति पापग्रहैस्तृतीयषष्ठैकादशस्थानस्थितैः शुभग्रहैः प्रथमचतुर्थसप्त
मदशमनवमपंचमैकादशद्वितीयतृतीयस्थानस्थितैः राज्ञाभिषेकः शुभदः यदाह वसिष्ठः त्रिकोणकेंद्रनिधनेषु सौम्यैर्हि
षष्ठलाभहर्गतैः च पापैः षष्ठाष्टलग्नव्ययवर्जितेन चंद्रेण राज्ञां शुभदोभिषेक इति अथ स्थानविशेषपापग्रहैरशुभं फलं
सापवादं इदं वशिष्ठ आह पापैस्तनौ १ रुक् क्लि धने मृतिः सुते ५ पुत्रार्तिरर्थव्ययगैर्दरिद्रता स्यात्खेलसो भ्रष्टपदो द्युनाबुभैः सर्वे
....केंद्रगतैः शुभग्रहैः तनौ लग्नस्थितैः पापग्रहैः रुग्योगः स्यात् राज्ञ इति शेषः निधने पापग्रहैर्मृतिः स्यात् सुते पंचमे पा
पग्रहैः पुत्रार्तिः पुत्रपीडा स्यात् अर्थव्ययगैर्द्वितीयद्वादशस्थैः पापैर्दरिद्रता स्यात् खे दशमे पापग्रहैरलसो निरुद्योगः स्य
द्युनावुगैः सप्तमचतुर्थस्थानस्थितैः पापग्रहैर्भ्रष्टपदो भ्रष्टैश्वर्यः स्यात् उपलक्षणत्वात् षष्ठाष्टमद्वादशस्थानस्थितैः चेंद्रा
मृत्युदः यदाह वसिष्ठः पापग्रहैः स्वांत्यगतैश्च निःस्वो रोगी विलग्नोपगतैर्भवेत्सः पराच्युतः सप्तचतुर्थगैः स्वपुत्रस्थितैः सर्वैस्व
तैर्विहीन इति नूनं व्ययाष्टारिगतः शशांकः क्षितीश्वरं हंति न दा बली चेदिति बलिशब्दोपादानान्निर्बलत्वं व्ययाष्टमषष्ठग
तो न इष्टफलद इति तात्पर्यमर्थापवादमाह सर्वमिति केंद्रगतैः शुभग्रहैः सर्वप्रागुक्तं दुष्टं फलं शुभं शुभोदर्कं स्यात् उक्तं च अ
प्याभिषेके राज्ञः संपत्त्यैश्वर्यकर्तृ योगद्वयं भुजंगप्रयातेनाह गुरुर्लग्नकोणे उत्तरेति सितः खे स राजा सदा मोदते राज्यलक्ष्म्या
तृतीयायगौ सौरिसूर्यौ खबंधौ गुरुश्चेद्धरित्री स्थिरा स्यान्नृपस्य लग्ने गुरुश्चेत्स्यादथवा कोणे नवमे पंचमे वा गुरुः स्यात् कुजो
मंगलो रोः शत्रुगृहे षष्ठे स्यात् सितः शुक्रः कर्मगो दशमगः स्याद् तादृशेभिषेकयोगे यो राजाभिषिच्यते स राजा सर्वदा सर्व
कालं राज्यलक्ष्म्या मोदते यमेको योगः यदाह वसिष्ठः यस्याभिषेके गुरुलग्नमंत्री लग्ने त्रिकोणे यदि वा भवेत्सः षष्ठः कुजः
र्मगतः च शुक्रः समोदते विक्रमराज्यलक्ष्म्येति अथापरो योगः सौरिः सूर्यौ तृतीयायगौ स्यातां यथासंख्यं शनिस्त्र
गमं एकादशे स्यात् गुरुः खबंधोः खे दशमे बंधौ चतुर्थे वा चेद्गुरुः स्यादेवंविधे योगे नृपस्य राज्ञो धरित्री पृथ्वी स्थिर
गता स्यात् यदाह कश्यपः त्रिलाभस्थौ सौरिसूर्यौ चतुर्थे वांबरे गुरुः यस्याभिषेकः क्रियते तत्र तस्य मही

स्त्र

रस्यामाव[...] त्रिलाभसंस्थो शनिस्तिग्मरश्मी मेषूरणे बंधुगृहे गुरुस्स्य यस्यात्रयोगे क्रियतेभिषेकः संपत्स्थिरातस्यन

नै- नि मे षः स्यादिति मेषूरणेरश्मे केचित्लाभारिगौ सौरिसूर्यौ इत्याहुः अन्यत्समानं तृतीयैकादशषष्ठानामन्यतमस्थ

मु-टी- यस्थितौ सौरिसूर्यौ स्यातामित्यर्थः एतद्वयमुक्तमेव यदा [...] इष्टिकालाभारिगमाविनार्कौ खस्थामरेज्या

वधूप्र- बंधुगेहे यस्यात्रयोगे क्रियतेभिषेकः संपत्स्थिरातस्यचिरायुषः स्यादिति अत्रवचनद्वयप्रामाण्याद्विकल्प इतिशिवं

७ अथराज्ञाभिषेकप्रकरणंगद्येनोपसंहरति इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितेमुहूर्तचिंतामणौ राज्ञाभिषेक

प्रकरणं स्पष्टार्थमेतत् ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेणाहिगवीप्रसारितधियामौहूर्तचिंता

मणेः गोविंदेनविनिर्मितेनयनिधौपीयूषधाराभिधे व्याख्यानेह्यभिषेचनप्रकरणंराज्ञागमत्पूर्णतां इति श्रीविद्व

द्दैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्सुतगोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधारा

भिधायां राज्ञाभिषेकप्रकरणंसमाप्तिमगमत् ॥ संख्या ॥ ३८ ॥ इ ॥ व ॥ प्र ॥ प्रा ॥ क ॥ रणं ॥ स ॥ माप्तम् ॥ शुभमस्तु लेखकस्य

राज्ञाभिषेकस्तोति

१

गो॰ वस्त्रकरण॰ ११

श्रीगणेशाय नमः विघ्नराजमभिवंद्य सिद्धिदं नीलकंठतनयेन धीमता शिष्यमोहविनिवृत्तिकारणं गोचरप्रकरणं विवि
च्यते अथ गोचरप्रकरणं व्याख्यायते तत्र जन्मराशितः प्रोक्तनिषिद्धस्थानस्थितेदानीं तत्र ग्रहवशेन शुभाशुभनिरूपणं
गोचर इत्युच्यते तत्र ग्रहाणां गोचरफलं शुभाशुभरूपमुपजातिकाद्वयेनेंद्रवज्रया चोपजातिकापूर्वार्धेन चाह सूर्यो रसांत्य
खयुगेग्निनंदे शिवाद्ययोर्भौमशनी तमश्च रसांकयोर्लाभशरे गुणांत्ये चंद्रोंबराद्येऽलनंदयोश्च १ लाभाष्टमे चायशरे रसां
त्ये नगद्वयेज्ञो द्विशरे द्विरामे रसांकयोर्नागविधौ खनागे लाभद्वये दैवगुरुः शराब्धौ २ द्व्यंत्येऽथवा शौडि गुणे शिवाद्रौ शुक्रः कुना
गे द्विनगेग्निरूपे वेदांबरे पंचनिधौ गजेषौ नंदेशयोर्भान्तरसेष्विवाग्नौ ३ क्रमाच्छुभो विद्ध इति ग्रहः स्यात्पितुः सुतस्यात्र न वे
धमाहुः ४ रसांत्य इत्यादौ द्वंद्वे सर्वो द्वंद्वो विभाषैकवद्भवतीति समाहारद्वंद्व एकवचनांतः शिवाद्ययोरित्यादौ इतरेतरयोग
द्वंद्वः अंबराद्यावित्यादिषु त्वनित्यमागमशासनमिति नुमभावो ध्येयः एवं सर्वत्र व्याख्येयं अत्र च तुर्यश्लोकेनान्वयः स्व
जन्मराशेरिति पंचमश्लोकस्य पदमत्राध्याहार्यं तत्र सूर्यो ग्रहः स्वजन्मराशौ रसांत्ये क्रमात् शुभो विद्धश्च स्यात् सूर्यः स्वज
न्मराशेः सकाशाद्यदि षष्ठस्थाने तदा शुभः तत एव जन्मराशौ द्वादशस्थानस्थितश्चेदन्यग्रहाः स्युस्तदा विद्धः शुभोऽप्यशुभफ
लदाता अत्र शनेश्चरस्य सूर्यपुत्रत्वात्तद्वेधो नांगीकार्यः यतः पितृजनकस्य सुतसंबंधिनैव वेधनाङ्कः सुतस्यापि पितृसंबंधि
नैव वेधनाङ्कः तथा खयुगे जन्मराशेर्दशमे सूर्यः शुभः चतुर्थस्थानस्थितश्चेदन्यग्रहाः शनिवर्जिताः स्युस्तदा विद्ध एवं श्लोक
त्रयं सम्यग्व्याख्येयं तथाग्निनंदे तृतीयनवमयोः शिवाद्ययोरेकादशपंचमयोः सूर्यः क्रमाच्छुभो विद्धश्च ज्ञेयः ३ यच्च नारदेन शु
भौको जन्मनद्यायदशाषड्सु न विध्यते जन्मतो नवपंचाद्युव्ययगैर्व्योकिभिस्तदेति अथ भौमेति भौमशनी तमो राहुश्चेत्येते ग्र
हाः स्वजन्मराशितः रसांकयोः षष्ठनवमस्थानयोः लाभशरे एकादशपंचमयोः गुणांत्ये तृतीयद्वादशयोः क्रमाच्छुभावि
द्धाश्चेत्यर्थः परंतु शनेः सूर्यवेधो नास्तीत्युक्तमेव यदाह वसिष्ठः त्रिषडेकादशसहितो धरासुतो रिःफधर्मसुतसंस्थैः दिनकर
तनयोपि शुभो न विध्यते खचरैर्विनोष्णकरमिति शनिवद्राहुकेत्वोर्य इति वचनाद्राहोरप्येवमेव वेधविचारः राहोरुपलक्षणत्वात्के
तोरप्युक्तं च शार्ङ्गधरेण॥ राहुकेत्वोः फलं सर्वं मंदवत्कथितं बुधैः वेधोपि तद्वदेवोह्यो वामवेधस्तथैव चेति अथ चंद्र इति जन्मराशि

तः अंबराद्रौ दशमचतुर्थयोः गुणानंदयोः नगाद्र्योः तृतीयनवमयोः लाभाष्टमे एकादशाष्टमयोः आद्यषूरे प्रथम
पंचमयोः रसांत्येषष्ठद्वादशस्थानयोः नगाद्वये सप्तमद्वितीययोः स्थानयोश्चंद्रमाः शुभोविद्धश्च ज्ञेयः परंतु चंद्रस्यबु
धवेधोनास्ति उक्तंचनारदेन विध्यते जन्मतो नेंदुः सूनाद्याद्यारिखत्रिषु स्वषष्ठांत्यायबुधर्मस्थैर्विबुधैर्जन्मतः शुभइति
अथज्ञइति जन्मराशेः द्विधारे द्वितीयपंचमयोः अद्रिरामे चतुर्दशात्तृतीययोः रसांकयोः षष्ठनवमयोः नागवि
धावष्टमप्रथमयोः खनागेदशमाष्टमयोः लाभव्यये एकादशद्वादशाख्ययोः स्थानयोर्ज्ञोबुधः क्रमात् शुभोवि
द्धश्च ज्ञेयः परंत्वत्र चंद्रवेधोनास्ति वराहनारदः ज्ञः स्वाद्यर्यष्टखायेषु जन्मतः चेन्नविध्यते स्वनाद्यकाद्यमांत्यसंस्थि
तैर्वेदुभवः शुभइति अथदेवगुरुरिति जन्मराशितः शराब्धौ पंचमचतुर्थयोः द्व्यंते द्वितीयद्वादशस्थानयोः नवांशे
नवमदशमयोः अद्रिगुणे सप्तमतृतीययोः शिवाष्टावेकादशाष्टमयोः स्थानयोर्देवगुरुर्बृहस्पतिः क्रमाच्छुभो
विद्धश्च ज्ञेयः उक्तंचनारदेन जन्मतः स्वायगोध्याद्रिधीव्यत्याष्टखेलत्रिभैः जन्मराशेर्गुरुः श्रेष्ठोग्रहैर्यदिनविध्यत इति धीः
पंचमं अथशुक्रइति जन्मराशेः ऊनागे प्रथमाष्टमयोः द्विनगे द्वितीयसप्तमयोः अग्निरूपे तृतीयप्रथमयोः वे
दांबरे चतुर्थदशमयोः पंचनिधौ पंचमनवमयोः गजेषौ अष्टमपंचमयोः नंदेशयोर्नवमैकादशयोः भानुरसे द्वा
दशषष्ठयोः शिवाश्मावेकादशतृतीययोः शुक्रः क्रमात् शुभोविद्धश्च ज्ञेयः वराहनारदः जन्मभादासुताष्टांकांत्याद्य
द्विष्टानविध्यते भार्गवो मृत्युसंसाद्यस्वांकेषायरिपुत्रिगैरिति अत्राह तेत्यभिविधावाङ् सहतेनेत्यभिविधिरिति तेनप्रथम
द्वितीयतृतीयचतुर्थपंचमानांग्रहणमित्यर्थः रदमत्राकूते सूर्येरसांत्यरेत्यादौ प्राक्पठितस्थानेषु विद्यमानासप्तग्रहाःशु
भदः शुभस्थानव्यतिरिक्ताखिलस्थानेषु विद्यमानः सप्तग्रहो शुभफलदाता अतएव वाहश्रीपतिः सर्वेलाभगृहस्थिताद्वि
त्वरिपुष्वर्कः ऊज्ञार्कीत्रिषट् प्राप्तौ आद्यखमन्मथारिषुशशी खात्स्वारिवजी भृगुः धीधर्मास्तधनेषु वाक्पतिररिस्वाष्टांबुख
स्थोबुधः श्रेष्ठंजन्मगृहाद्विगोचरविधौविद्वानचेत्स्यात्सयूहैरिति अर्थादेवानुक्तस्थानेषु शुभः सप्तग्रहः अत्रग्रहाणां
विहितनिषिद्धस्थानफलानिविधिरत्ने स्यान्जन्मनिनाशयेद्धिनकरः ऊर्थाद्वितीयेभयंदुश्चिक्ये श्रियमातनोतिहिबुके

पु.टी.
ग्र.प्र.
२

मानक्षयं यच्छति दैन्यं पंचमगः करोति रिपुहा षष्ठोऽर्थहा सप्तमे पीडामष्टमगः करोति परुषं कांतिक्षयं धर्मगः कर्मसि
द्धिं ज्ञानकस्तु कर्मगो वित्तलाभकृदथायसंस्थितः द्रव्यनाशजनितां महापदं व्यच्छति व्ययगतो दिवाकरः इति रवेः
जन्मन्यन्नपदिशति हिमरश्मिर्वित्तनाशं द्वितीये द्रव्याद्व्यं सहजभवने कुक्षिरोगं चतुर्थे कार्यभ्रंशं तनयगृहगो वित्तलाभं
च षष्ठे द्यूने द्रव्यं युवतिसहितं मृत्युसंस्थोपि मृत्युं नृपभयं कुरुते नवमः शशी दशधामगतस्तु महत्सुखं विविधमायग
तः कुरुते धनं व्ययगतस्तु रुजं इति चंद्रस्य प्रथमगृहगः शोणीसूनुः करोत्यरिजं भयं क्षपयति धनं वित्तस्थाने तृतीयगतो
ऽर्थदः अरिभयमतः पातालेऽर्थाश्चिरेणाति पंचमे रिपुगृहगतः कुर्याद्वित्तं रुजं मनसि स्थितः जनयति निधनस्थः शस्त्रव्या
धाधराज्ञादिशति नवमसंस्थः कायपीडामतीव शुभमपि दशमस्थो लाभगो भूरिलाभं व्ययभवनगतोरो व्याधिनर्था
र्थनाशान् इति भौमस्य बुधः प्रथमगो भयं दिशति बाधमर्थे धने धनं रिपुभयान्वितं सहजगस्तु तुर्येऽर्थदः अनिष्टं निकरो
भवेत्तनयगो रिगः स्थानदः करोति मदनस्थितो बहुविधाधारोरिपदं अष्टमे शशिसुतो धनवृद्धिं धर्मगस्तु महतीं तनुपीडां
कर्मगः सुखमथायगतोऽर्थं द्वादशो भवति वित्तविनाशः इति बुधस्य भयं जन्मन्यार्थी जनयति धनस्थोऽर्थमतुलं तृतीयेंग
केशं दिशति चतुर्थेऽर्थविलयं सुखं पुत्रस्थाने रुजमपि तनूर्यादरिगृहे गुरुर्द्यूने स्त्रीं धननिचयनाशं च निधने धर्मगतो
धनवृद्धिकरः स्यात्प्रीतिहरो दशमे मरसूज्यः स्थानधनानि ददाति सचाये द्वादशगः तनुमानसपीडां इति गुरोः जन्मन्यरि
क्षयकरो भृगुजोऽर्थदोऽर्थे तुष्टिक्षयगः सुखकरो धनदश्चतुर्थे स्यात्पुत्रदस्तनयगो रिगतो रिवृद्धिं शोकप्रदो मदनगो निधने
र्थदाता जनयति विविधांबराणि धर्मे न सुखकरो दशमस्थितस्तु शुक्रः धननिचयकरः सलाभसंस्थो व्ययभवनेपि धना
गमं करोति इति शुक्रस्य वित्तभ्रंशं रुगाप्तिं दिनकरतनयो जन्मराशिं प्रपन्नो वित्तक्लेशं द्वितीये धनहरणकृतं वित्तलाभं तृती
ये पाताले शत्रुवृद्धिं सुतभवनगतः पुत्रभृत्यार्थनाशं षष्टस्थानेर्थलाभं जनयति दोषसंघातमार्किः शरीरपीडां निधने
च धर्मे धनक्षयं कर्मणि दौर्मनस्यं उपांत्यगो वित्तमनर्थमंत्ये शनिर्ददातीत्यवदद्वसिष्ठः इति शनेः राहुर्जन्मगतो भयं च
कलहं सौम्यमानक्षयं वित्तभ्रंशमहासुखं नृपभयं चार्थक्षयं यच्छति संतापं कलहं च वित्तमधिकं शीघ्रं विनाशं तृणं

राम.
२

केतोस्तत्फलमेव राशिषु वदेदृक्षे संतिगर्गोदयश्च इति इति राहोः एतत्तु भाशुभफलं ग्रहा नक्षत्रसंधिगतास्तथा राशिसंधिगता
एष्यराशेः फलं ददति वक्रिणस्तु प्राग्राशेरित्याह कमलासनः नक्षत्रसंधिगताः खेटा राशिसंधिगता ग्रहाः एष्यराशेः फलं
ददयुश्चक्रे न ह्रिपरीतगमिति राशिग्रहणेन नक्षत्रस्याप्युपलक्षकं वसिष्ठोपि भवनान्तगतास्तु यदाधिष्ण्यान्तगतास्तु गग
नचराः ददयुः परभवनफलं प्राग्भवनफलं च वक्रिणश्चेति अस्यार्थः नक्षत्रान्ते नक्षत्रसंधिः एकस्मान्निर्गत्य परत्र संक्रम
णं संधिरेवं राशिसंधिश्च नक्षत्रसंधिर्ज्ञानं देवज्ञैः कर्तव्यो हे भानाञ्योंकाः खट्टयाङ्क्रमात् वक्ष्याः संक्रमणे अर्कादेः प्रागर्क
स्यांति निंदिताइति विवाहप्रकरणे वक्ष्यति ग्रंथकृत् संक्रमकाल एव संधिकालः सर्वेषां ग्रहाणां षष्टिघ्नबिंबयद्भुक्ति
भक्तं इत्यादिना भास्करेणोक्तत्वात् तदेतदस्माभिः संक्रांतिप्रकरणे सप्रपंचं निरूपयिष्यते तत एवावधार्यं तत्र सूर्यादि
ग्रहाः देवज्ञैः केतिपयोक्ता ईदृक्चरिकोपलक्षिते नक्षत्रांते राश्यंते वा स्थिता जिगमिषतस्य नक्षत्रस्य राशेः च फलं प्रयच्छंति
वक्रिणस्तु पूर्वोक्तलक्षणोपलक्षिते नक्षत्रादौ राश्यादौ वा स्थिता भुक्तस्य नक्षत्रस्य राशेर्वा फलं ददातीति तत्र भौमाद्या ग्रहा
वक्रातिचारयोः प्राग्राशिफलं कियंति दिनानि प्रयच्छंतीत्याह वसिष्ठः दशादिवसं पंचदिनं त्रिपक्षं मनिचारवक्रयोर्ददयुः भौ
माद्याः पंचदिनं प्राग्राशिफलं च पंचमासांश्चेति भौमादिग्रहा यावता कालेन राशिं जहति ततोस्य न्यूनाधिकभावेन
स्पष्टगत्या राशिं यदा जहति स चारः यदा त्वसमये एव राशिं जहति सोतिचारः वक्रं प्रसिद्धमेव अथवामवेधं शुभक्रपदो चंद्र
बलं चापद्यात्यो नराईनाह दुष्टोपि खेटो विपरीतवेधाच्छुभोद्विकोणे शुभदः सितेब्जे दुष्टोपि स्वजन्मराशेः सकाशादनि
ष्टस्थानस्थितोपि खेटग्रहो विपरीतवेधाद्वामवेधाच्छुभः शुभफलदाता अयमर्थः सूर्यो रसांत्ये खयुग्निनंदे शिवाद्याया
रित्वप्राक्यागितस्थानेषु षष्ठदशमतृतीयैकादशेषु स्थितः सूर्यः शुभफलदाता तद्भिन्नान्यष्टौ स्थानान्यशुभान्येव तत्र
द्वादश च चतुर्थनवमपंचमाख्येषु अनिष्टस्थानेषु स्थितः सूर्यः तदैवानिष्टफलदः स्यात् यदा प्राक्यगितैः क्रमेण षष्ठादिस्था
नस्थितैः शनिवर्जितैर्ग्रहैर्न विद्धः यदा तु विद्धस्तदा शुभफलदोपि षष्ठादिस्थानशुभफलदातैव स्यात् अन्येषु स्थानेषु
प्रथमद्वितीयसप्तमाष्टमेषु तु स्थितः सूर्यो निष्टफलदातैव एवं चंद्रबुधयोः षडेव विरुद्धस्थानानि षडेव शुभस्थानानीति

मु·टी·
गा·प्र·
२

क्रमवेधवामवेधौ स्यातां भौमस्य तत्र त्रीण्येव शुभस्थानानि तेन तान्यशुभान्येव तत्र नवमपंचमद्वादशस्थानस्थितभौमस्या
शुभस्य क्रमेण षष्ठैकादशतृतीयस्थानस्थैर्ग्रहैर्वामवेधनः शुभत्वमेव अन्येषु शुभस्थानेषु शुभ एव भौमः एवं शनिरा
हुकेतवो बोध्याः गुरोरप्येवमेव तत्र तु प्रथमषष्ठस्थानस्थो गुरुरशुभ एव शुक्रस्य तु तत्र स्थानानां नाशुभत्वात्तद्यानिरि
क्तानि त्रीणि षष्ठसप्तमदशमस्थानान्यशुभानि तेषामेव क्रमेण द्वादशद्वितीयचतुर्थस्थानस्थग्रहजनितवामवेधेन शु
भत्वमेवान्येषां तु तत्र पगतस्थानानां शुभत्वादेव न वामवेधविचारार्हत्वमिति परिशिष्टोर्थः यदाह कश्यपः अपि विद्धोग्र
हः कः चिन्न ददाति शुभं फलं वामवेधविधानेन त्वशुभोपि शुभप्रदः अतस्तद्द्विविधं वेधं विचार्याथ फलं वदेदिति वसिष्ठो
पि वेधसमन्वितखचरा न नृणां प्रदिशंति सत्फलं किंचित् व्यत्ययवेधविधानादप्यशुभास्ते शुभप्रदाः सततमिति व्यत्ययवेधो
वामवेधः द्विकोणा इति सितेस्य शुक्लपक्षे चन्द्रो द्विकोणे द्वितीयनवमपंचमस्थानेषु स्थितः शुभदः अत्रापि क्रमेण षष्ठाष्ट
मचतुर्थस्थानस्थितैर्बुधवर्जितैर्ग्रहैर्यदि न विद्धस्तदापि ध्येयं यथोक्तं नारदेन शुक्लपक्षे शुभः चंद्रो द्वितीयनवपंचमे रिपुमृत्यु
बुसंस्थैश्च न विद्धो बागनेचरैरिति यदि विध्यते तदा शुभफलद एव अथ द्विविधवेधमतद्वयमुपज्ञात्याह स्वजन्मराशेरिह
वेधमाकरयेद्ग्रहाधिष्ठितराशितः सः हिमाद्रिविंध्यांतर एव वेधो न सर्वदेशेष्विति कश्यपोक्तिः इह द्विविधवेदविधावन्यमता
ददादयः स्वजन्मराशेः सकाशाद्द्विविधं वेधं क्रामिकं वेधं वामवेधं चाहुः तथा चोभयत्रापि नारदेन जन्मत इत्युक्तं अथ क
श्यपादिमतमुच्यते सत्वनर्द्विविधो ग्रहाधिष्ठितराशितो ज्ञेयः यथा सूर्यो जन्मराशेः सकाशात्षष्ठस्थितः शुभः स सूर्यः संक्रां
तराशितो द्वादशस्थानस्थितैः शनिवर्जितैर्ग्रहैर्न विद्धः तथा सूर्यो जन्मराशेर्द्वादशस्थितोनिष्टः स सूर्यः स्वाक्रांतराशेः
षष्ठस्थानस्थितैश्चेव शनिवर्जितैर्ग्रहैर्विद्धश्चेत्तदा शुभफलद इत्यर्थः अथैतस्य द्विविधवेधस्य देशविशेषविषयत्वमुच्य
ते हिमाद्रीति हिमाद्रिविंध्यनामानौ पर्वतौ प्रदेशविशेषौ वस्थितत्वात्प्रसिद्धौ तयोरंतरालवर्तिन्येव देशे सद्विविधोपि वेधो
ज्ञेयः सर्वदेशेषु हिमाद्रिविंध्यांतरविषयकमेवेत्यन्ये एतज्ज्ञानं दुर्घटमित्याह तन्नो ररकश्यपे अंतरालबहिर्भूते सर्वदेशे रा
षु द्विविधोपि वेदरोषा नास्तीति कश्यपमुनेरुक्तिर्वचनास्ति यदाह कश्यपः ज्ञातव्यं जन्मराशेस्तु निखिलं यद्बलाबलं हिम ३

द्विविधयोर्मध्ये वेधजं तद्ग्रहालयादिति वयं तु सूर्योरसात्यइति क्रामिको वेधो जन्मराशिगत एव ज्ञेयः वामवेधस्तु यत्रा
धिष्ठितराशिगत एवेति ब्रूमः तदाह गुरुः जन्मतः क्रमवेधः स्याद्वामवेधो ग्रहालयादिति इदमपि हि मादि द्विविधानां विषय
कमेत्यन्ये एतज्ज्ञानं दुर्घटमित्याह त्वनोरस्कस्थ्यपौ अज्ञात्वा द्विविधं वेधं यो ग्रहज्ञो बलं वदेत् सम्यग्भावचनाभाषी हास्य
यातिजनैः सदेति एवंप्रकारेण गोचरबलं ज्ञात्वा ग्रहदोषे यात्रादिकं न कार्यं श्रीपतिनापि अकालचर्यां मृगयां च सा
हसं सुदूरयानं गजवाजिवाहनं गृहे परेषां गमनं विवर्जयेद्ग्रहेषु राज्ञा विषमस्थितेषु हि अत एव तत्र ग्रहशान्तिर्विधेया
यदाह नारदः ग्रहेषु विषमस्थेषु शान्तिं यत्नात्समाचरेत् हानिर्वृद्धिर्ग्रहाधीना तस्मात्पूज्यतमा ग्रहा इति विपर्यये चानि
ष्टफलमाह वसिष्ठः ग्रहेषु विषमस्थेषु यः शान्तिं न करोति सः अर्थहानिं च मरणं चाप्नुते सर्वसंकटानिति साध्वशान्ति
र्वसिष्ठसंहितोक्तप्रकारेण वा गृह्येयात्र शान्तिकालमाह वसिष्ठः मासि मासि यनेचंद्रसूर्ययोर्ग्रहणेऽपि वा विषुवत्य
केसंक्रान्तौ व्यतीपाते दिनक्षये खचरेषु सदा विषमेष्वखिलं नृणां व्याधिरर्थहानिः स्यात् सम्यग्विचार्य मनसा ग्रहशां
तिं कारयेन्नृपतिरिति कदाचिच्छान्त्यविषयग्रहकृतशुभपापफलाभावोऽपि भवत्याह नारदः सौम्यदृष्टितो निष्टफलः
शुभदः पापवीक्षितः निष्फलो नाग्रहो स्वेन शत्रुणा वावलोकितः नीचराशिगतः स्वस्य शत्रुक्षेत्रगतोपि वा शुभाशु
भफलं नैव दद्यादस्तंगतोपि चेति अत्र ग्रहदोषाभावादेव शान्त्यभावः निमित्तापाये नैमित्तिकस्यापाय इति न्यायात् अ
निमित्तकृता शान्तिर्निमित्तापायापत्तायनइति विपक्षबाधकस्मरणं चेति भावः अथ गोचरप्रस्तावाद्ग्रहणीयनक्षत्रफल
कथनपूर्वकं ग्रहणीयराहुकेतुगोचरफलं ग्रहणशुभप्रतीकारं च इष्टग्रहणदर्शने च निषेधं च शार्दूलविक्रीडितेना
नाह जन्मर्क्षे निधनं ग्रहे जनिभतो घातः क्षतिः श्रीर्व्यथा चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशः सुखं लाभोऽपाय
इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्णगोदानं शान्तिरथो ग्रहं त्वशुभदं नो वीक्ष्यमाहुः परे अत्र ग्रहणीयनक्षत्रे निषेधस्तावदुच्य
ते यस्य पुंसो जन्मर्क्षे जन्मनक्षत्रे ग्रहः ग्रहणं उपरागो ग्रहो राहुग्रस्तेत्विंदौ च पूष्णि चेत्यमरः तस्मिन्ग्रहणे सति निधनं म
रणं स्यात् यदाह वसिष्ठः यस्यैव जन्मनक्षत्रे ग्रस्तौ तौ शशिभास्करौ तस्य व्याधिभयं घोरं जन्मराशौ धनक्षय इति ज्योतिर्निबंधे

मु.दी.
गा.प्र.
४

फलप्रदीपे ग्रहणं जन्मनक्षत्रे जायते शशिसूर्ययोः यस्याशुभं हानिर्वीररोगश्च संभवइति ज्योतिःपराशरः यत्र नक्षत्रगते राहु
ग्रस्तौ शशिभास्करौ नजातानां भवेत्पीडा ये नराः शांतिवर्जिता इति भार्गवीयविशेषोपि यस्य राज्यस्य नक्षत्रे स्वर्भानुरु
परज्यते राज्यभंगं सुहृन्नाशं मरणं चात्र निर्दिशेदिति राज्ञस्य नक्षत्रे अभिषेकनक्षत्रे यदा कदाचिद्ग्रहः स्पृज्यमाननक्षत्रमुपराग
नक्षत्रं चैकमेव तदा, संदिग्धः फलनिर्देशः यदा तु नक्षत्रभेदस्तदोपरज्यमाननक्षत्रे एव फलनिर्देशः एवं राशिभेदेप्युपरज्यमा
नराशिनैव ज्ञायतेऽस्मन्मते राहोर्दिग्देशकालावरणादिभेदान्नक्षत्रादेको राहुरिति ब्रुवंतीति एतदुपपत्तिर्भास्करेण स्वयमेवा
ऽपि पितृचरणैश्चटोडरानंदे राहुचारविलासे सप्रपंचं निरूपि परंतु राहुसाहित्यं विना ग्रहणं न यतस्तस्य शरसंस्कृत्यमाने
नचखंडग्रासानयने विशिष्टस्यास्फुरत्वात् इति साहित्यविवक्षैव राहोरुपरक्तत्वमुच्यते अत एवोक्तं वराहेण तस्मिन्का
ले सान्निध्यमस्य तेनोपचर्यते राहुर्याम्योत्तरशशिगतिर्गणितेनाप्युपचर्यते तेनेति अथ राशिफलमुच्यते जन्मभतइ
ति पंचम्यं तत्वा न जन्मराशेरारभ्य द्वादशराशिषु ग्रहणे सति क्रमादनुक्रमेण घातादिफलं भवति यथा जन्मरा
शौ ग्रहणे सति घातः शरीरपीडा द्वितीयराशौ हानिर्द्रव्यनाशः तृतीयराशौ श्रीर्लक्ष्मीः चतुर्थराशौ व्यथा शरीरपीडा पं
चमराशौ चिंता पुत्रादीनां षष्ठराशौ सौख्यं सप्तमराशौ कलत्रदोषः स्त्रीमरणं अष्टमराशौ मृतिर्मरणं नवमराशौ मा
ननाशः दशमराशौ सुखं एकादशराशौ लाभः प्राप्तिः द्वादशराशौ अपायो नाशः आत्मन इति केचित् द्रव्यस्येत्यपरे इ
दं च फलं षण्मासपर्यंतं इत्यनुक्रमपि ध्येयं तदुक्तं हि ग्रहणांतरसंभावनया तदुक्तं दैवज्ञमनोहरे घातं हानिमथ श्रियं च
ननभाङ्क्तिं च चिंतां क्रमात्सौख्यं दारवियोजनं च कुरुते व्याधिं च मानक्षयं सिद्धिं लाभमपायमर्कशशिनोः षण्मासम
ध्ये ग्रह इति केचित्तु स्थानान्येव शुभमध्यमाधमान्युक्तानि तदुक्तं दैवज्ञमनोहरे ग्रासस्तृतीयोष्टमगः चतुर्थे स्तथाय संस्थः
शुभदः स्वराशिः नवांत्यधीसप्तमगश्च मध्यम् ज्योदिषड्द्वादशमाद्यसंस्थ इति अत्र वाक्यपाद्यासराशेर्गणनोक्ता क्वचित्त
राशेरपि तदुक्तं च त्रिषड्दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवींद्वोः द्विसप्तनंदेषु तु मध्यमं स्याच्छेषेष्वनिष्टं मुन
यो वदंतीति अत्रावधायकाशायां स्वजन्मराशेरित्यध्याहार्यमेव अत्र ग्रहणीयराशेर्दशाविशेषेणाशुभफलानि व

राहसंहितायामभिहितानि तथाशुभफलं कूर्मोपदेशाद्दैदिनिवराहोक्तं ग्रहणीयनक्षत्राशुभफलानि स्वरोदयाभिहितकू
र्मचक्रे पराशरसंहितायामभिहितानि तानि सर्वाणि पितृचरणज्ञानयोग्यानि देशकालाचारविलसनोपधार्याणि नात्रप्रस्तुत
त्वाल्लिख्यंतेस्माभिः अथाशुभस्यचक्रग्रहणप्रतीकारमाह तदशुभेति तस्य सूर्यचंद्रयोर्ग्रहणस्य संबंधि वस्तुभूतं दुष्टफलं
तस्यविनाशाय जपस्वर्णगोदानं जपोगायत्र्यादीनां मंत्राणां स्वर्णं प्रसिद्धं गौः प्रसिद्धा भूमिर्वा उपलक्षणत्वादन्येषामपि
धान्यादीनां यथाशक्त्या दानं कार्यमिति शेषः उक्तं च दैवज्ञमनोहरे तद्दोषस्य प्रशमं कृत्वा जपविधिं स्वर्णादिदानं भवेदिति ज्योतिर्नि
बंधे कालनिर्णये यस्मिन्राशौ तपनशशिनोः सैंहिकेयावमर्दः तद्राशिपानां भवति नियतं ग्रामपुंसां विनाशः तस्माच्छांतिं
मुनिभिरुदितां तत्परालोकपूर्वां कुर्याद्दानादिभिरिह नृणां नाशमायात्यरिष्टमिति दानमपि तत्रैव सुवर्णनिर्मितं नागं स
तिलं ताम्रभाजने सदक्षिणं सवस्त्रं च श्रोत्रियाय निवेदयेत् सौवर्णं राजतं वापि बिंबं कृत्वा स्वशक्तितः उपरागोद्भवक्लेश
च्छिदे विप्राय कल्पयेत् दानमंत्रोपि तत्रैव तमोमय महाभीम सोमसूर्यविमर्दन हेमनागप्रदानेन मम शांतिप्रदो भवेति
स्कंदपुराणे गोदानं भूमिदानं स्वर्णदानं विशेषतः ग्रहणक्लेशनाशाय दैवज्ञाय निवेदयेदिति किं चात्र देशविशेषः पात्रवि
शेषाद्द्रव्यविशेषश्च नापेक्षित इत्याह व्यासः सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्य
योरिति तत्र स्नानदानादिकं कस्मिन्काले विधेयमित्याह माधवः ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते मुच्यमाने भ
वेद्दानं मुक्ते स्नानं विधीयत इति कस्मिन्काले जपादिकमपि विधेयं सूर्येंदुग्रहणं यावत्तावत्कुर्याज्जपादिकमिति शि
वरहस्येऽर्केशादिशब्दाद्धरार्चनमपि अत्र जन्मनक्षत्रजन्मराशौ ग्रहणे शांतिमाह वसिष्ठः यस्यैव जन्मनक्षत्रे ग्रस्येते श
शिभास्करौ तस्य व्याधिभयं घोरं जन्मराशौ धनक्षय इति द्रव्यमंत्रविधानेन तस्य दोषापनुत्तये उपरागस्नानविधिं सम्यग्वक्ष्ये
समासतः मंडलं चतुरस्रं तु गोमयेन विलेपयेत् गृहस्यैशानदिग्भागे वर्णकैः समलंकृते स्थापयेच्चतुरः कुंभानव्रणा
न्सागरात्मकान् सर्ववेदात्मकान्स्मृत्वा सर्वतीर्थात्मकांस्तु तान् पंचत्वक्पल्लवोशीरशतौषधिसमन्वितान् मृत्तिका
रत्नहेमभद्रंतगुग्गुलचंदनैः पंचगव्यामृतभाजनस्फटिकैः सर्षपांबुदैः शंखकुंकुमतीर्थांबुरोचकैःपद्मकैर्युतान् चत्वा

सु·दी·
गो·प्र·
५

रः प्राङ्मुखो विप्राः प्रार्थयेयुः पृथक् पृथक् अब्लिंगैर्वारुणैः सूक्तैः स्वस्तिवाचनपूर्वकं तिलहोमं व्याहृतिभिः सहस्रं चाष्टसं
युतं एवं कृत्वा प्रयत्नेन स्नानकर्म समाचरेत् आमंत्र्य नवभिर्मंत्रैः ॐ भानुसंकल्पपूर्वकं एतानेव ततो मंत्रानुच्चार्य पठेत्तु सलि
लैः तु कर्तुः शिरसि तं बध्वा वाब्लिंगैर्वेदमंत्रकैः समंत्रितैः ॐ भद्रैः स्नाप्य नीराजयेत्ततः दद्यात्तद्ग्रहहस्तेभ्यः शुक्लमाल्यां
बरः शुचिः ऋत्विग्भ्यो दक्षिणां दद्याद्विप्रेभ्यश्च स्वशक्तितः यो सौ वज्रधरो देवो आदित्यानां प्रभुर्मतः सहस्रनयनश्चंद्रग्र
हपीडां व्यपोहतु मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु यः कर्मसाक्षी लोकानां
धर्मो महिषवाहनः यमः चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु रक्षोगणाधिपः साक्षात्प्रलयानलसन्निभः खड्गव्यग्रोतिका
यश्च रक्षः पीडां व्यपोहतु रक्षोगणाधिपः साक्षात्प्रलयानलसन्निभः नागपाशधरो देवः सदा मकरवाहनः वरुणोंबुपतिः
साक्षाद्ग्रहपीडां व्यपोहतु प्राणरूपो हि लोकानां वायुः कृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु यो सौ नि
धिपतिर्देवः खड्गशूलगदाधरः चंद्रोपरागकलुषां पीडां चापि व्यपोहतु यो सौ विंदुधरो रुद्रः पिनाकी वृषवाहनः चंद्रोप
रागपापानि स नाशयतु शंकरः त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्ण्वर्कयुक्तानि तानि पापं दहंतु मे
आमंत्रणे मखलोकास्त्वेते वै नव मंत्रकाः अर्चयित्वा पितृन्देवान्गोभूस्वर्णांबरादिभिः अनेन विधिना यस्तु ग्रहस्नानं स
माचरेत् न तस्य ग्रहपीडा स्यान्न च बंधुधनक्षयः परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभां सूर्यग्रहे प्येवमेव सूर्यनाम्नाभि
धीयते इति वृद्धवसिष्ठप्रोक्ता ग्रहशांतिः अत्र यद्यपि जन्मराशेरादिनक्षत्रयुक्तं तत्र च दोषाल्पता प्रतिमानेन शांत्यकर्तव्य
ता प्रतीयते तथापि प्राग्लिखितबहुवचस्तु विरुद्धफलाभिधानादवश्यं जन्मराशावपि ग्रहणे शावपि ग्रहणे शांतिर्विधे
या उभयानुवादेन शांत्यभिधानात् उक्तं च मत्स्यपुराणे यस्य राशिं समासाद्य भवेद्याग्रावरणेन गृहमध्यावस्थितत्वाच
क्षुष्मतोपि पुंसो राहुदर्शनाभावेन सत्यरिष्टे रिष्टं नास्तीति एवं चांधस्य यत्र कुत्राप्यवस्थितस्य गृहाद्बहिर्गतस्य शास्त्रवनोह
ड्डात्तदा देश्च सर्वथाप्यरिष्टं स्नानादिनास्तीति तेषामाशयः अत्रेदं चिंत्यते किमेवेदं ग्रहणं दृष्टमेव स्नानाद्यधिकारसंपादकं
उत नेमेषाद्यावरणे नादृष्टमपि कृतः संदेहः उभयथावचनोपलब्धेः तथाहि वृद्धवसिष्ठः सर्वेषामेव वर्णानां सूतकं राहुदर्श

ने सचैलं तु भवेत्स्नानं सूतकान्नं विवर्जयेदिति षड्विंशन्मते सर्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत
शृतमन्नं विवर्जयेदिति शृतं पाके इति निपातनात् यद्यपि तस्मिन्सूत्रे क्षीरहविषोरेवेति महाभाष्य एवोक्तं तथापि महामु
निप्रयोगादन्यस्मिन्नपि द्रव्ये ओदनादौ पाकसामान्ये वृत्तिः विष्णुः राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकमिति शातातपः स्ना
नं तपः श्राद्धमनंतं राहुदर्शन इति एवमादीनि वचांसि दर्शनपदसहितानि उपलभ्यंते अन्यथापि वसिष्ठः ग्रहणे संक्रमे
वापि न स्नायाद्यदि मानवः सप्तजन्मसु कुष्ठी स्याद्दुःखभागी च जायत इति लिंगपुराणेपि चंद्रसूर्यग्रहे स्नायात्सूतके मृत
केपि च अस्नायी मृत्युमाप्नोति स्नायी पापं न विंदतीति एवमादीनि दर्शनपदाक्रांतेषु वचस्सु ग्रहणस्य निमित्तत्वं प्रति
पाद्यते ग्रहणे संक्रमे वापीति निमित्तसप्तम्युपलंभात् ज्ञानमेव च ग्रहणे स्नानदानादिकं प्रति निमित्तं भवति न तु ज्ञानापेक्षा
या च राहुदर्शनपदोपेतवचनालोचने न चाक्षुषज्ञानस्यैव निमित्तत्वं यतः चाक्षुष एव ज्ञाने दर्शशब्दमुख्यत्वं व्याप्तिः शास्त्रीयज्ञा
ने तु लक्षणाप्रसक्तिः एवं सति मेघाच्छन्नग्रहणदिवसज्ञानं चंद्रग्रहणरात्रिभवसूर्यग्रहणेषु स्नानदानादावधिकारः तस्मा
द्ग्रहणं दृष्ट्वा स्नानदानादिकं विधेयमित्यर्थः संपन्नो भवति नैतत्सम्यक् हृदयंगमं यतो वचनेषु राहुदर्शनग्रहपदयोः समा
नार्थकता नास्ति कथमदृश्यरूपाः कालस्वरूपिणो भगणाश्रिताः शीघ्रमंदोच्चपाताख्या ग्रहाणां गतिहेतव इति इति सूर्य
सिद्धांते चंद्रादिग्रहपातानामदृश्यतोक्ता पातो राहुस्वपर्यायः उक्तं च तत्रैव दक्षिणोत्तरयोरेवं पातो राहुः स्वरंहसा विक्षिप
त्येष विक्षेपश्चंद्रादीनामपक्रमादिति केशवार्केणाप्युक्तं पर्वपर्येण तु राहुपातयोनाम नीविदधुरेव तांत्रिका इति अतो रा
होर्दर्शनमेव गगनकुसुमायमानं ननु ग्रहणे चंद्रसूर्ययोः छादको राहुर्दृष्ट एव अत एव राहुग्रस्ते निशाकर इति पुरा
णोक्तिः साधीयसीति चेन्न भानोर्भार्द्धमहीछाया तत्तुल्येर्कसमेपि वा शशांकपाते ग्रहणं कियद्भागाधिकोनक इति उप
क्रम्य छादको भास्करस्येंदुरधःस्थो घनवद्भवेत् भूछायां प्राङ्मुखश्चंद्रो विशत्यस्य भवेदसाविति च सौरो भूछाया स्य चंद्र
स्य छादको भवेदित्यर्थः सू० इति सूर्यसिद्धांतोक्तः स्पष्ट एव छाद्यछादकभावाभिहितः पुराणेन सह विरोधपरिहारस्तु दि
ग्देशकालावरणादिभेदान्न छादको राहुरिति ब्रुवंति यस्मान्निनः केवलविज्ञास्तैः संहितावेदपुराणवाक्यमिति पूर्वपक्षं वि

वृ०।

मु·टी·
गो·प्र·
६

धाय ततो राहुः ऊ भामंडलगः शशांकं शशांकगः छादयतीति न बिंबं तमोमयः शंभुवरप्रदानात्सर्वागमानामविरुद्धमेतदि
दिति भास्कराचार्यैरेवोक्तः तस्मिन्काले सान्निध्यमस्य तेनोपचर्यते राहुरिति न वराहेणाप्युक्तः तस्माद्राहोर्दर्शनं तु नास्त्येव भव
न्मते दर्शनं चाक्षुषमेवोच्यते नान्यत् एवं च सति राहोर्दर्शनं राहुदर्शनमिति तत्पुरुषोनुपपन्नः अथ तत्समीपलक्षकदर्शन
शब्दमंगीकृत्य चेदर्थः क्रियेत तदापि यस्य स्वरूपमेवानुपपन्नं तस्य समीपे तत्सुतरामिति बालैरप्येतद्बुध्यते तस्माद्दर्शनशब्दे ग्रहन ४
न तेनोपरागो लक्ष्यते राहुदर्शनं राहूपरागस्तस्मिन्राहुदर्शने इति अयमर्थः राहुर्नाम पातस्तस्य तत्संबंधेन दर्शनमुपराग इ
ति न च राहुरेव लक्षणयोपरागपरस्तस्य दर्शनमिति पूर्वपक्ष्यभिमतार्थसिद्धिरिति वाच्यं लक्षणा त्वर्थान्तरासंभवे सति व
क्तव्या अत्यंतादर्शनेपि दोषस्तथा चात्यंतदर्शने प्रजापीडा विनिर्दिष्टा व्याधिभिर्ज्वरतस्करैरिति विष्णुधर्मोत्तरादि वाक्ये
षु पर्यंततरासन्निधानाद्राहुशब्देनोपरागो लक्ष्यते इह च राहोः पातनामकं ग्रहगतिहेतुत्वं यथार्थान्तरमस्तीति अतो राहुदर्शनग्र
हणपदयोः समानार्थकता स्तीत्यव्युत्पत्तिसिद्धमिति प्राशुक्तानां सर्ववचसां ग्रहणे स्नायादित्येव वाक्यार्थः फलितो भवति किंच
ग्रहणे चाक्षुषमेव दर्शनं विवक्षितं चेत्तदा नेत्रेनायंतमादित्यं नास्तं यान्तं कथंचन नोपरक्तं न वारिस्थं न मध्यं नभसो ग
तमिति मनूक्तोपरक्तसूर्यदर्शननिषेधो नोपपद्येतानन्वयं निषेधः सूर्योपरागदर्शनं एवं न चंद्रोपराग इति चेन्न नापु
चीराहुस्तारका इत्यत्र राहुमात्रग्रहणाद्द्वविंचंद्रोपरागद्वयविषयकोपसंहारस्य युक्तत्वात् अशुचेरजस्वलापतिता
दैर्ग्रहणं तु दोषाधिक्यसूचनार्थं यथाश्वादुरुलीनानां ब्राह्मणानामसुक्तेऽप्येषां निषिद्धत्वात् ओं उगोलक ब्राह्मणाना
मंत्रणे सिद्धे पुनर्निषेधो दोषाधिक्यार्थमेव भास्करालोकनाश्लीलपरिवादादि वर्ज्ययेदिति स्मृतिवाक्यस्य तु सुस्पष्टस्त
गाम्यादित्यदर्शनपरतयाव्याख्यानस्य युक्तत्वात् केचित्तु दर्शनादर्शनविषयको विध्योस्तुल्यत्वबलत्वान्सृष्टदृष्ट्वा स्ना
यादिति वाचनिषुस्तच्चिंत्य जन्मसप्ताष्टरिष्फांके त्यादिना सामान्यतो निषिद्धस्योपरक्तदर्शनस्य पुनर्निषेधात् प्रायुक्तदिशा
राहुदर्शनपदस्य राहूपरागलक्षकत्वेन तुल्यबलत्वाभावाच्च तस्मादुपरक्तयोः सूर्याचंद्रमसोर्यस्य कस्यापि दर्शननिषेध
सत्वाद्ग्रहणे च स्नानदानाद्युक्तेर्लक्षणं च ज्योतिःशास्त्रैकदेशगणितग्रंथेभ्योवबुद्ध्वा तस्मिन्काले स्नानादि विधेयमिति सि

ड्डानतः॥ अत एव मेधातिथ्याद्यैरप्युपरागे स्नानादिकं विधेयमेव ननु गणितग्रंथाधीनमुपरागज्ञानमेव चेत्स्नानादिप्रयोज
कं तदा रात्रौ सूर्यग्रहस्य दिवा चंद्रग्रहस्य ज्ञायमानत्वात्तदापि स्नानादिकं स्यात् सत्यमेवैतत् वचनात्तथा न यतो तदुक्तं
निगमे सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहो यदि तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति अत एव नाडीग्रहणे दृष्टे
पि दोषं नास्तीत्यपि सूच्यते न चैतदभागिप्रतिषेधादित्यधिकरणेन पृथिव्याममिश्चेतव्यो नांतरिक्षे न दिवीत्युदा
हृतवाक्यवन्नित्यानुवादइति वाच्यं विधिशेषत्वाभावात् यथा पृथिव्याममग्निश्चेतव्य इति निषेधविधिरस्ति तत्रांता
तरिक्षे न दिवीति दृष्टांतो निषेधविधेः शेषस्तथात्र सूर्यग्रहो यदा रात्राविति तद्वाक्यैकस्य विधेर्विशेष इति किं चैवं वु
वचनस्त्वमते तु नर्थकमेव वाक्यं स्यान्न चैतद्युक्तं अत एवाह जाबालिः संक्रांतेः पुण्यकालस्तु षोडशोभयतः कलाः ॥ चं ८
इ सूर्योपरागे तु यावद्दर्शनगोचर इति ग्रस्तस्यास्तमनपर्यंतं दर्शनगोचरत्वात् तावान्कालः पुण्यकालो भवतीति
माधवो व्याचख्यौ तदुक्तं विश्वरूपनिबंधे दिवा चंद्रग्रहो रात्रौ सूर्यपर्वतत्पुण्यदं संधिस्थं पुण्यवज्ज्ञेयं यावद्दर्शनगोच
र इति अन्ये तु मेधातिथिमेधाहते तत्र नाहते वोपरागे गणितनादि स्थितिघटिकाः पुण्यकाल इत्याहुः दर्शनं त्वेवं विधेनि
णये भुजंगतनाडपरिच्छेदितो तो दर्शनं स्मृतमिति अर्क इत्युपलक्षणं चंद्रादिग्रहनक्षत्राणां आकाशप्रदेशः सम
नाडूसंलग्न इव यत्र भाति स प्रदेशो भुजंगशब्दवाच्यः अत एव विष्णुधर्मोत्तरे अहोरात्रे न भोक्तव्यं सूर्यचंद्रग्रहो यदा मु
क्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति ग्रस्ताले व्यासः ग्रस्ते वास्तमानं तु रवौ हृष्टा शुतायदि तयोः परेद्युरुदये
स्नात्वाभ्यवहरेन्नर इत्यनयोर्वाक्ययोर्दर्शनोदयशब्दौ भुजंगतोपरिस्थितत्वोपलक्षकौ अन्यथा मेघाद्यावरणेन प
रदिवसेपि दर्शनाभावे उपवासः प्रसज्येत तथा यत्र स्पर्शकाले ग्रहणं दृष्ट्वा स्नानं विहितं तत्रांतरा मेघाद्यावरणात्सूर्य
चंद्रयोर्दर्शनाभावो दिवसद्वयं त्र्यं वा स्यात् तत्राप्युपवासप्रसंगो न च सर्वे पि शिष्टास्तथाचरंति तस्मात् हष्टादर्शनार्थ
मभ्युपेत्य शास्त्रीयज्ञानपरतैव व्याकर्तव्या तस्याश्च सत्त्वात्पूर्वोक्तरीत्या मेघानाद्यैरप्युपरागे तमदृष्ट्वैव प्रश्नस्तु चद्र
घा ग्रासं धेनचगतमशक्य वज्ञिष्टे द्वान्तरैस्तु स्नानदानादिकं विधेयमिति फलितोर्थः अत एव भागवते रविग्रहे कु

मु.टी.
गो.प्र.
७

द्वे द्वे स्थाने यद्यर्थं मिलितानां पांडवीयलोकानां मध्ये धृतराष्ट्रो विपरिणामेन इति शिष्टाचारोप्यस्ति एवं सत्यरिष्टजनक
त्वाभावे पि ग्रहणदर्शने निषेधः किंपुनरिष्टजनकत्वे तस्मात् जन्मसमनंतरकत्वादिपद्यं निर्मूलत्वाद्युक्त्यसहत्वाच्चोपेक्ष्यं प्रत्युतोप
लभ्यमानवसिष्ठमतस्य पुराणादिवाक्येषु दर्शनपदाभावाच्च अत एव मूले परे इति पदं प्रयुक्तं भ्रांतिस्तु दर्शनाभावेपि विधा
नस्तुचिता यतो रिष्टयोगानां स्वरूपसत्तामेवारिष्टजनकत्वमस्ति अन्यथा ग्रहवैषम्यात्पातारिष्टचिंतारिष्टनिष्ठत्वे हेतुः भ्रांति
दर्शनाभावेन विधीयतेत्यलमतिप्रसंगेन अथ चंद्रबले विशेषमनुष्टुभाह पापांतः पापयुग्द्यूने पापाच्चंद्रः शुभोप्यसन्
शुभांशे चाधिमित्रांशे गुरुदृष्टः शुभोपि सन् शुभोपि शुभफलदोपि चंद्रः पापयुक् द्यूने कोर्थः पापद्वयमध्यवर्ती पापग्रहयुक्तः
पापाद्द्यूने सप्तमस्थाने वर्तमानश्चेत्स्यात्तदा शुभोपि असन्नशुभ एव यदा त्वशुभो शुभफलदातापि शुभांशे सौम्यग्रहनवां
शे स्याद्यथवाधिमित्रस्य नवांशे स्यात्तदा गुरुणा बृहस्पतिना दृष्टः सन् शुभफलदाता भवेत् यदाह रत्नमार्तंडः पापग्रहेण सं
युक्तः पापयामित्र संस्थितः पापद्वयमध्यगतः शुभोप्यशुभदः शशी अनिष्टानसंस्थोपि भवेच्छुभकरः शशी सौम्यभागे
धिमित्रस्य नवांशे स्यात्तदा गुरुणा बृहस्पतिना दृष्टः सन् गुरुणा वापि वीक्षित इति अथ चंद्रबलस्य विधांतरमनुष्टुभाह सिता
सितादौ सद्दृष्टे चंद्रे पक्षौ शुभावुभौ व्यत्यासे चाशुभौ प्रोक्तौ संकटे द्विबलं त्विदं सितादौ शुक्लपक्षप्रतिपदि समीचीने चं
द्रे सति संपूर्णः शुक्लपक्षः शुभः असितादौ कृष्णपक्षप्रतिपदि दुष्टे चंद्रे सति संपूर्णः कृष्णपक्षः शुभः व्यत्यासे पूर्वोक्ताद्व्या
द्वैपरीत्ये द्वावपि पक्षावनिष्टौ यदा शुक्लपक्षप्रतिपदि चंद्रो दुष्टः चेत्तदा सकलः शुक्लपक्षोप्यनिष्टः कृष्णपक्षप्रतिपदि चंद्रः
शुभश्चेत्तदा संपूर्णः कृष्णपक्षोप्यनिष्ट इति उक्तं च रत्नमालायां बलप्रदं ह्यादिगमहिमांशोः शुभे शुभं पक्षमुदाहरंति सितेतरा
दावशुभे शुभं च पक्षावनिष्टौ भवतोन्यथा तौ कष्टपयोपि मासादींदुः शुभो यस्य तत्पक्षः तस्य शोभनः कृष्णादौ त्वशुभे दृश
मंत ह्यन्वयेनार्थोत इदमेतादृशमनुबलं चंद्रबलं तत्संकटे विवाहयात्रादावावश्यककर्तव्यतात्कालिकचंद्रबलाभावे च ग्राह्यं
नान्यथेत्यर्थः उक्तं च मुहूर्ततत्त्वटीकायां अथ ग्रहाणां दोषपरिहारपूर्वकं तुष्टिसंपादनार्थं नवरत्नसमुदायधारणं शालिन्याह
वज्रं शुक्रे ब्जे सुमुक्ता प्रवालं भौमे गोमेदमार्कौ सुनीलं केतौ वैडूर्यं गुरौ पुष्पकं ज्ञे पाचिः प्राङ्माणिक्यमर्के तु मध्ये अत्रैकांस ७

वर्णमुद्रिकां कृत्वा तत्र दृष्टभागे वर्तुलाकारेण यथाविभक्ते प्रागादिदिक्क्रमेण नवरत्नानि दृढं निधेयानि तत्र प्रागादितिर्यक्चमध्यंतम
ध्यं पंचमी चेयं त्यग्नोपे, तः प्रागादिदिक्क्रमत्य यमर्थो ज्ञातः तत्र शुक्रप्रीतये पूर्वस्यां दिशि वज्रं हीरकं निधेयं एवं चंद्रप्रीत्यर्थं
[illegible] शोणभनमुक्ताग्नेय्यां भौमप्रीत्यर्थं प्रवालं दक्षिणस्यां अथो राहुप्रीत्यर्थं गोमेदं नैरृत्यां आर्कीशनि
प्रीतये शोणभन्नीलं पश्चिमायां केतुप्रीतये वैदूर्यं वायव्यां गुरुप्रीत्यर्थं पुष्पकं पुष्परागं उदीच्यां बुधप्रीतये पाचिर्गारुडपा
चिरैशान्यां सूर्यप्रीतये माणिक्यं मध्यमकोष्ठके इति यदाह अथ सति द्रव्यसामर्थ्ये नवरत्नसमुदायधारणस्याशक्यत्वा
त्तद्रत्नकेदानीम सति सामर्थ्ये यद्ग्रहकृतं दौष्ट्यं तद्ग्रहरत्नधारणं इंद्रवज्रयाह माणिक्यमुक्ताफलविद्रुमाणि गारुत्मतं पुष्प
कवज्रनीलं गोमेदवैदूर्यकमर्कतः स्यु रत्नान्यथोज्ञस्य मुदे सुवर्णं सूर्यस्य प्रीत्यर्थं माणिक्यं धार्यं एवं चंद्रस्य मुक्ताफलं भौ
मस्य विद्रुमं बुधस्य गारुत्मतं गरुडपाचिः गुरोः पुष्पकं पुष्परागः शुक्रस्य वज्रं शनेर्नीलं लहसुनिज इति कान्यकुब्जभा
षया क्रः राहोर्गोमेदं केतोर्वैदूर्यमित्येवमर्कतो अर्कादीनां ग्रहाणां रत्नानि धार्याणि स्युः तत्र यद्ग्रहकृतं दौष्ट्यं तस्य तद्रत्नं धार्यमि
त्यर्थः यदाह कश्यपः सूर्यादीनां च संतुष्ट्यै माणिक्यं मौक्तिकं ततः सविद्रुमं मरकतं पुष्परागं च वज्रकं नीलं गोमेदवैदूर्यं धार्यं
शास्त्रदृष्टक्रमात् अथोज्ञस्य मुदे सुवर्णमित्यर्थिमश्लोकेन अथ स्वल्पमहामूल्यरत्नधारणे यस्य सामर्थ्याभावस्तदर्थम
ल्पमूल्यानि रत्नानि ताराबलं च शालिन्याह धार्यं तुलावर्तकं राहुकेत्वो रूप्यं शुक्रेंद्वोः मुक्ता गुरोः सलोहं मंदस्यारभा
न्वोः प्रवालं ताराजन्मदौस्थ्ये राहुत्विंतः स्यात् अथोज्ञस्य बुधस्य मुदे संतोषार्थं सुवर्णं यथाशक्ति धार्यं राहुकेत्वोः प्रीत्यै
तुलावर्तकं धार्यं एवं शुक्रेंद्वोः तुष्ट्यै रूप्यं गुरोस्तुष्ट्यै मुक्ता मंदस्य शनेस्तुष्ट्यै विद्रुमं भौमभान्वोः रूप्यं शुक्रेंद्वोः च हेममिंदुज
स्य मुक्ता सूरेर्लोहमर्कात्मजस्य तुलावर्तः कीर्तितः प्रोषधयश्चेति सूरेर्गुरोः शेषधारा राहुकेत्वोः दीपिकाकारस्तु औषधीमूला
नि धार्याणीत्याह मूलं धार्यं त्रिशूल्याः सवितरि विगुणे सारिकामूलमिंदौ जिह्वाहे भूमिपुत्रे रजनिकरसुते वृद्धदारस्य मूलं भा
र्ग्या जीवे यशुक्रे भवति शुभकरं सिंहपुच्छस्य मूलं वाक्षोल्कं चार्कपुत्रे तमसि मलयजं केतवे रोधसज्ञं गंधमिति त्रिशूली बिल्वः
सारिका क्षीरिणी जिह्वाहिर्नागजिह्वा वृद्धदारुर्विधारः भार्ङ्गी प्रसिद्धा सिंहपुच्छं वाद्योटं वरिवारेति मध्यदेशभाषया प्रसिद्धं मल

यत्नं वदने अश्वगंधप्रसिद्धं एतद्दोषधीमूलधारणं सर्वथारत्नधारणशक्तौ वेदितव्यं नारेति यद्दिने ताराबलमस्ति न वेति वि
चारचिकीर्षितस्तद्दिने या तारा सा जन्मर्क्षाज्जन्मनक्षत्रात् त्रिरावृत्तितः पुनः पुनरावृत्तित्रयेण गणनीया स्यात् त्रिरितिद्वित्रिचतुर्भ्यः
सुजितिसुज्जं तमवाप्य स्वजन्मनक्षत्राद्दिननक्षत्रे गणिते नवभिर्भक्ते तिस्र आवृत्तयो भवंति अवशिष्टतारयाशुभमशुभं वा
च्यमिति फलितोर्थः अथ शुभक्रमेण सफला स्तारा संज्ञा अनुष्टुभाह जन्माख्यसंपद्विपदः क्षेमप्रत्यरिसाधकाः वधमैत्राति
मैत्राः स्युस्ताराणाम सदृक्फलाः सष्टार्थमिदं पद्यं यदाह नारदः जन्म संपद्विपत्क्षेमप्रत्यरिसाधको वधः मित्रं परममित्रं तज्जन्मभा
त्पुनः पुनरिति एवं तारागणनीयाद् विशेषः तत्र तृतीया पंचमी सप्तम्यः तारा निषिद्धा अनिष्टफलश्रवणात् अथ तारन्याः समी
चीनाः समीचीनफलश्रवणात् उक्तं च जन्मतारा द्वितीया च षष्ठी चैव चतुर्थिका अष्टमी नवमी चैव षट् स्युस्ताराः शुभावहाः
ति जन्मनक्षत्रं तु कार्यविशेषगृहीतं प्रतिषिद्धं च तच्चाग्रे निर्णेष्यते तद्दिने ताराबलं कृष्णपक्षविषयं तत्र भयपक्षसाधारण
तदाह नारदः कृष्णे बलवती तारा शुक्ले पक्षे बली शशीति युक्तं चैतत् यतोऽत्राथर्ववादो रत्नमालायां नखलु बहुलपक्षे शीतर
श्मेः प्रभावः कथितमिह हि तारावीर्यमार्यैः प्रदानं सति विकलशरीरे प्रेयसि प्रोषिते वा प्रभवति खलु कर्तुं सर्वकार्याणि योषा
शुक्ले पक्षे शीतरश्मिर्बलीयान् प्राधान्यं तारकायास्तु तत्र शक्याशक्ये विद्यमाने पि कांते न स्वातंत्र्यं योषितः क्वापि दृष्टमिति
अथ अवश्यकर्तव्ये दुष्टताराणां प्रकारद्वयेन परिहारं शार्दूलविक्रीडितेनाह मृत्यौ स्वर्णतिलान् विपद्यपि गुडं शाकं त्रिजन्मसु
त्यादयादत्यरितारकासु लवणं सर्वो विपत्प्रत्यरिः मृत्युश्चादिमपर्ययेन शुभदो नैव द्वितीये शाकानादिप्रांत्यतृतीयका
अथ शुभाः सर्वे तृतीयेस्तु ताः मृत्यौ सप्तमस्यां वधतारायां स्वर्णतिलान् यथाशक्ति स्वर्णयुक्तांस्तिलान् ब्राह्मणाय दद्यात्
विपद्यपि विपत्संज्ञायां तृतीय तृतीयतारायां गुडमिक्षुविकारं दद्यात् त्रिजन्मसु त्रिष्वपि जन्मतारासु शाकं प्रसिद्धं दद्यात्
दद्यात् अथ प्रत्यरितारकासु पंचम्यां तारायां लवणं दद्यात् तदाह नारदः जन्मत्रिपंचसप्ताख्यातारा निष्टफलप्रदा अनिष्ट
परिहाराय दद्याद् द्विजातये शाकं गुडं च लवणं सतिलं कांचनं क्रमात् अत्र सतिलमिति विशेषणं कांचनपदस्य लवणपदस्य
तेन वधतारायां सतिलं कांचनं देयं उक्तं च दीपिकायां प्रत्यरे लवणं दद्याच्छाकं दद्यात् त्रिजन्मसु विपत्तारे गुडं दद्यान्निधने तिलकांच

नं अथ द्वितीयः परिहार उच्यते तत्रादिमपर्यये प्रथमा हन्तौ विपत्प्रत्यरिः मृत्युश्च तृतीया पंचमी सप्तम्यस्ताराः सर्वा अपि सामा
न्यतः षष्टिघटिकात्मिका अपि न शुभदाः स्युः अथ द्वितीयपर्यये द्वितीयाहन्तौ विपत्प्रत्यरिमृत्यूनामादिमांशान्यतृतीयकांशा
न शुभदाः विपत्तारायां प्रथमा विंशतिघटिका हेया त्याज्या इतराश्चत्वारिंशद्धुभाः प्रत्यरितारायां मध्यमा विंशतिघटिका हेया
त्याज्याः तदुभयतो विंशतिघटिकाः शुभाः वधतारायां अंतिमा विंशतिघटिका हेया त्याज्याः आद्याश्चत्वारिंशद्धुभा अत्र नवीनास्त्वा
ऊर्वते जीर्णे त्वंशशब्देन नक्षत्रचतुर्थांशमाहुः तथा सत्यादिमान्त्यतृतीयकांशं रणे निषिद्धाः इतरे शुभाः अथ तृती
यपर्यये तृतीयाहन्तौ विपत्प्रत्यरिमृत्यवस्त्रैनेसर्वषष्टिघटिकात्मका अपि शुभाः शोभनफलदास्मृताः न ख्यावनगमोह
नेगुरु रित्युक्तोपठिते पर्यये प्रथमे वर्ज्या विपत्प्रत्यरिनैधनाः द्वितीये त्वंशकावर्ज्यास्तृतीये त्वखिलाः शुभा इति द्वितीयप
येंशकानाह स एव आद्यांशा विपदित्याज्यः प्रत्यरेश्चरमो वधः शुभः वधेत्याज्यस्तृतीयांशः शेषांशाः सुशोभना इति
अत्रांशो नक्षत्रचतुर्थांश उच्यते किमत्र प्रमाणमिति चेत् उच्यते जन्मर्क्षाद्दशमं कर्मसंघातर्क्षं तु षोडशं अष्टादशं सामुदा
यं त्रयोविंशं विनाशभं मानसं पंचविंशर्क्षं नाचरेत् शुभमेषु तु इति नारदोक्तेर्वैनाशिकाख्य त्रयोविंशभस्य दुष्टत्वं न दपवा
दमाह च्यवनः वैनाशिकाख्ये नक्षत्रे अष्टाशीत्यंशकं विना इत्यनेन बाध्यते इत्यत एकत्र दृष्टः शास्त्रार्थो परत्रापि नियुज्यत इ
ति न्यायादत्रापि सैव व्याख्येति नवनीनमतं त्वयोग्यप्रमाणकत्वात् अथावस्थावशात्ताराणां नोपाय मत्तु शुभाह षष्टि
घ्नं गतभं भुक्तघटीयुक्तं भुगाहतं सूराब्धि ४५ हृत्वा लब्धे तोर्कशेषे वस्थाक्रियाद्विधाः अत्र चंद्रस्य राशौ राशौ द्वादशावस्थाः संति
यदाह नारदः चंद्रस्य द्वादशावस्था राशौ राशौ यथाक्रमात् यात्रोद्वाहादिके कार्ये संज्ञास्तुल्यफलप्रदाः तत्राश्विनीमारभ्य
गतभानि षष्ट्या ६० गुण्यानि वर्तमाननक्षत्रभुक्तघटीयुक्तानि कार्याणि तानि भूतनर्तुगैश्चतुर्भिराहतानि चत्वारिंशताभाज्या पंच-
नि यल्लब्धं यमागतं गतावस्थास्ताःशेषं वर्तमानावस्थायाः तत्र लब्धांकस्यापि द्वादशाधिक्ये द्वादशभिर्भागे प्रवासाद्यवस्था
स्ताः शेषं वर्तमानावस्थायाः तत्र लब्धांकस्यापि द्वादशाधिक्ये द्वादशभिर्भागे प्रवासाद्यवस्था गताः स्युः तास्त्ववस्था मेषरा
शिस्थचंद्रे प्रवासादिसंज्ञाः वृषराशिस्थचंद्रेन ष्टादिसंज्ञाः स्युरेवं मिथुनादिद्वादशराशिषु भ्रमणादिसंज्ञा ह्यवस्था भवंतीत्य

र्थः यदाहनारदः षष्टिघ्नं चंद्रनक्षत्रं तत्कालघटिकान्वितं वेदघ्नमिषुवेदाप्तमवस्थाभाजिनाः इति अत्रोपपत्तिः ए
मु॰टी॰ कैकस्मिन्नक्षत्रे द्वादशद्वादशावस्थाः संति सामान्येनानक्षत्रभोगषष्टिघटिकात्मकइत्येवं सति राशिभोगघटिकाः पंच
गो॰प्र॰ त्रिंशदधिकं शतं भवंति तत्त्रैराशिकं यद्येनाभि २३५ घटीभिर्द्वादशावस्थालभ्यंते तदेष्टघटीभिः किमिति तत्रैकया घटया
९ गुणनायां विकारानापन्नेद्वादशानामपवर्तके २३५ भाजको जातोयथा २२ अत्रानयोर्गुणभाजकयोः द्विभिरपवर्त्ते गुणकः
चत्वारः भाजकः पंचचत्वारिंशत् तत्कालघटीयोगस्तुन्यायप्राप्तएव तथाद्वादशभागोपि तदाधिकस्य निष्प्रयोजकत्वात्
अत्रेदमवधार्यं यद्यपिनक्षत्राणां घटीन्यूनाधिकभावः संभवति तथापिषष्टिघटिकात्मकत्वेन व्यवहारः कार्यः विद्यमा
ननक्षत्रं भुक्तं तु स्वभोगं ज्ञात्वा षष्टिघटिकात्मकत्वं कृत्वा तत्रयोज्यं यथा यदि स्वभोगेन षष्टिघटिकालभ्यंते तदेष्टघटी
भिः किमिति त्रैराशिकेनेष्टघटीनां षष्टिगुणकोनक्षत्रभोगोभाजकइति अथद्वादशावस्थानामानि सफलान्युपजात्याह
प्रवासनाशौमरणंजयश्च हास्यारतिक्रीडितसुप्तभुक्ताः ज्वराख्यकंपस्थिरताअवस्थामेषात्क्रमान्नामसदृक्फलाः स्युः
स्पष्टार्थमिदंपद्यं उक्तं च कश्यपेन प्रवासनष्टाचमृताजयाहास्यारतिर्मुदा सुप्ताभुक्ताज्वराकंपासुस्थितिर्नामसन्निभा
इति सुदर्शिष्ठित्यादिभ्योऽन्नतनष्टाशुभ्र अथग्रहाणां वक्रत्वपरिहारार्थं सौषधजलस्नानं दक्षिणेष्वशार्दूलविक्रीडितेनाह
लाजाकुष्टवचा प्रियंगुघनसिद्धार्थैर्निशादारुभिः पुंखालोध्रयुतैर्जलैर्निगदितं स्नानंग्रहोत्थापहृत् धेनुःकंबुहेम
वृषःचकनकं पीतांबरंघोटकाः श्वेतोगौरसितामहासिरजइत्येतारवेर्दक्षिणाः लाजाभृष्टशालयः कुष्टंप्रसिद्धं वला
वरियाराइतिकान्यकुब्जभाषया कुः प्रियंगुःराले घनोमुस्ता सिद्धार्थाः सर्षपाः श्वेतसइतिमहाराष्ट्राः सरसिव इतिका
न्यकुब्जाः निशाहरिद्राद्वयं दारुर्देवदारुकः पुंखः शरपुंखः लोध्रंप्रसिद्धं एतैरौषधैर्युतानि गंगादिजलानि तैः कृत्वास्नानं इत्थ्य
हहह चितारिष्टनाशकं स्यात् उक्तं च दीपिकायां सिद्धार्थलोध्रजनीद्वयमुस्तधान्यं लामज्जकं सफलिनी सवचासमांसी स्ना
नं कुर्यात् ग्रहगणप्रशमाय नित्यं सर्वैरविप्रमुखैः सुमुखो भवंति देवज्ञमनोहरेपि सप्रियंगुरजनीद्वयमांसीकुष्ठलाजसितसर्ष
पत्वैः वारिभिः सहवचैः सहलोध्रैः स्नानमत्रनिखिलग्रहपीडामिति वारिभिस्तीर्थोदकैः रत्नमालायांतु प्रत्येकंग्रहाणामौ

मु॰टी॰
गो॰प्र॰
९

रिकाश्च सूर्यायेदं घृतकलशं सितवस्त्रं दधि शंखं चैव मौक्तिकं सुवर्णं रजतं च संप्रदद्याच्च दारिष्ट्योपशमनाय चंद्रायेदं प्रवालगो
धूममहूरिकाश्च वृषश्च ताम्रः करवीरपुष्पं आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय भौमाय सचंदनं हि भौमायेदं अश्वः सुवर्णं शुभपी
तवस्त्रं सपीतधान्यं लवणं सुपुष्पं सशर्करं तद्धरितनीप्रयुक्तं दुष्टाय शांत्यै गुरवे प्रदेयं गुरवेइदं नीलं वस्त्रं सुवर्णं दानं बुधाय रत्नं पा
चीदासिका हेम सर्पिः कांस्यं दंतः कुंजरस्याथ मेषा रौप्यं सर्वं पुष्पजात्यादिकं च बुधायेदं चित्रवस्त्रमपि दानदानवार्चिते
दुष्टे गे मुनिवरैः परिगीते तंदुलं घृतसुवर्णरूप्यकं वज्रकं परिमलो धवलाश्च शुक्रायेदं नीलकं महिषं कृष्णवस्त्रं लोहं स
दक्षिणं दद्यात्त्वदक्षिणप्रयुक्तं शनिदोषप्रशांतये शनयइदं राहोर्दानं बुधैर्मेषो गोमेदं लोहकंबलौ सुवर्णं नागरूप्यं च सति
लं ताम्रभाजनं राहवइदं केतोर्वैदूर्यममलं तैलं मृगमदस्तथा दुर्गा तिलाश्च संयुक्तं दद्यात्केतोः शापशांतये केतवइदं अन्यच्च संहिता
प्रदीपे भानुः स्नानात्फलदानाद्वपहरति न्यूनं वैकृतं वासरोत्थं सोमः श्रीखंडदानादवनितनयो भोजनात्पुष्पदानात् सौम्यः शक्र
स्य मंत्रीह हरिहरनमनाद्भार्गवः शुभ्रवस्त्रैः तैलस्नानात्प्रभाते दिनकरतनयो ब्रह्मनत्पापरोचेति ब्रह्म ब्राह्मणः परो राहुके
तू अथ सूर्यादयो ग्रहाः गंतव्यराशेः प्राक्कति यद्दिनैः फलदाः स्युरित्येतदुपजात्याह सूर्यारसौम्यास्फुजितो हि नागस
प्ताद्रि चास्त्राश्विधुरग्निनाडीः तमोयमेज्या त्रिरसाश्विमासान्गंतव्यराशेः फलदाः पुरस्तात् सूर्यादयो ग्रहा गंतव्यराशेर्जिगमि
षितराशेः पुरस्तात्पूर्वमेव नागास्त्याक दिवसद्वादशमासान् अत्र कालाध्वनोरत्यंतसंयोगे इति द्वितीया ततो नैरंतर्येण तावंतं ता
वंतं कालं फलदाः शुभाशुभफलदाः स्युः तद्यथा सूर्यो गंतव्यराशेः प्राग्दशदिवसान्पंचदिवसान्फलदः एवमारोऽष्टदिवसा
न्पूर्वं फलदः एवं शनिः षण्मासान् गुरुर्द्विमासान् गुरुर्द्विमासान्पूर्वं फलदइत्यर्थः उक्तं च सूर्यः पंचदिने शशी त्रिघटिकं
भौमोऽष्टवैवासरान् सप्ताहानि भृगुः ससोमतनयो मासद्वयं वै गुरुः षण्मासान्गुरुतोपि सूर्यतनयो राहुश्च मासत्रयं केतुश्चै
व ददाति भाविसकलं गंतव्यराशेः फलमिति जगन्मोहनेप्येवमुक्तं आदित्यादिग्रहाद्युर्लग्ने वा गोचरेपि वा सप्तविंशतिभा २७
गोर्ध्वं पराशिफलं खल्विति अप्यत्र प्रसंगादावश्यकमंगलयात्रादिकृत्येषु कर्तव्येषु सक्रांतिष्ट्यादिविषयक दुष्टयोगस
द्भावे तत्तद्दोषनिवारणार्थं दानं शालिन्याह दुष्टे योगे हेमचंद्रे च शंखं धान्यं तिथ्यर्द्धे तिथ्यां तंदुलांश्च वारे रत्नं भे च गां हेमनाड्यां

षधस्नानमुक्तं यथा मनःशिलैलासुरदारुकुंकुमैरुशीरयष्टीमधुपद्मकान्वितैः सताम्रपात्रैर्विषमस्थिते रवौ शुभावहं स्नान
मुदाहृतं बुधैः सूर्यस्येदं पंचगव्यगजदानविमिश्रैः शंखशुक्तिकुसुमस्फटिकैश्च शीतरश्मिकृतवैकृतहृत्तत्स्नानमेतदुदितं नृप
दीनां चंद्रस्येदं बिल्वचंदनबलारुणपुष्पैर्हिंगुलकफलिनीबकुलैश्च स्नानमद्रिरिह मांसियुताभिर्भौमदोस्थ्यविनिवारणमा
हुः भौमस्येदं गोमयाक्षतफलैस्सरोचनैः होडश्शक्तिभवमूलहेमभिः स्नानमुक्तमिदमत्र भूभृतां बाधनाशुभविनाशनं बुधैः
बुधस्येदं मालतीकुसुमशुक्लसर्षपैः पल्लवैश्च मदयंतिकाढ्यैः क्षिप्रमंबुमधुकेन वसुक्रं दैवकृतं गुरुकृतं निहंति तत् मदयन्तिका
गुरोरिदं एलया शिलया समन्वितैर्वारिभिः सफलमूलकुंकुमैः स्नानतो भृगुसुतोपपादितं दुःखमेति विलयं न संशयः शुक्र
स्येदं असितालतिलांजनरोध्रबलाभिः शतकुसुमाघनलाजयुताभिः रविततनयकृथितं विषमस्थे दुरितहरं स्नवनं मुनिमुख्यैः
शनेरिदं लोध्रगर्भतिलपत्रकमुस्ताहस्तिदानमृगनाभिपयोभिः स्नानमार्तिमिह हंति राहोः साजमूत्रमिदमेव च केतोः
राहुकथितं तद्व्यामजमूत्रसहितं केत्वर्थं स्यात् राहुकेत्वोरिदं अत एवोक्तं दीपिकायां प्रयोक्त्रमौषधस्नानं ग्रहविप्रशार्थे
नं ग्रहाणां दृष्टिपहोमो वा ग्रहाणां प्रीतिमिच्छता तत्र ग्रहयज्ञाहोमो वसिष्ठसंहितायां महता प्रबंधेनोक्तो ततएवावगंतव्यो
वित्यलमतिविस्तरेण अथ रवेः रविमारभ्य दक्षिणा उच्यंते तत्र सूर्यप्रीत्यर्थं धेनुर्गौः चंद्रप्रीत्यर्थं कंबुः शंखः कंबुर्दूतिनच्छंस
कलिंगपृष्ठ्यकाष्ठे शंखः स्यात् कंबुरस्त्रियामित्यमरोक्तेः मंगलप्रीत्यर्थं महणे आरक्तवर्णो वृषः बुधप्रीत्यर्थं कनकं सुवर्णं
गुरुप्रीत्यर्थं पीतांबरं तच्च यथाविभवं कार्पासं कोशजं वा शुक्रप्रीत्यर्थं श्वेतोश्वोटकः शनिप्रीत्यर्थं असितश्यामवर्णा गौः
राहुप्रीत्यर्थं महासि मेहा हत्यरवड्गः केतुप्रीत्यर्थं मजः छागो दक्षिणेत्यर्थः यदाह वसिष्ठः धेनुशंखरक्तवृषहेमपीतांबरं
श्वेताश्वकृष्णधेनुं च कृष्णलोहमजं क्रमात् स्वर्णेनवासहीकृत्य दातव्या दक्षिणा ततः आचार्यार्थं जापकेभ्यो ब्राह्मणेभ्यो यथो
शक्तितइति अत्र प्रत्येकं दानमंत्रास्ते नैवोक्ताः ग्रंथभूयस्त्वभयान्न लिख्यंते सर्वे यः कुरुते सम्यग्ग्रहयज्ञं नृपोत्तमः सर्वान्कामान
वाप्नोति शुभस्थानफलं लभेत् यथोत्तमदशापलक्षणं तेन यः कश्चिद् दुहस्थापि कुर्यात् तत्र स्वविभवानुरूपाणि ग्रहदानानि
प्रोक्तानि केश्चित् यथा क्षौहं भवसंगुडहेमताम्रं माणिक्यगोधूमसुवर्णपद्मं सवत्सगोदानमिति प्रणीतं दुष्टाय सूर्याय मस्तु

मु॰टी॰
गो॰प्र॰
८८

हरति इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंतामणौ गोचरप्रकरणं संपूर्णं मध्यगात् इतिश्रीदैवज्ञस्य ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकाया स्तथा उत्तमा हि गवीप्रसारिन धिया मोहूर्तचिंतामणेः गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने खलु गोचरप्रकरणं संपूर्णतामध्यगात् इतिश्री विठ्ठदैवज्ञसुत अनंतालंकारनीलकंठज्योतिर्वित्सुत गोविंदज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां गोचरप्रकरणं समाप्तं समाप्त … ७ ग्रंथसंख्या ५८० ॥ ॥ गोचरप्रकरणं चतुर्दशं समाप्तं शुभमस्तु … ५ ५ ४ लेखकपाठकयोः शुभं ॥

दद्यान्निःस्वत्वं च नाराज्ञा दुष्टे व्यतीपातादिरूपे योगे सति हेमसुवर्णं यथाशक्ति राज्ञा दद्यात् च पुनः स्वेंद्रे दुष्टे विहितान्यतः स्था
नस्थिते तेंशे खं दद्यात् तिथ्यर्धकरणे भद्राख्ये दुष्टे धान्यं दद्यात् तिथौ दुष्टे च वर्ज्यादिरूपे तंडुलान् दद्यात् तिथौ दुष्टे हि नेसति गां द
द्यात् नाडीघटिकायां दुष्टेहं तोदिना दुष्टायां सत्यां हेमसुवर्णं दद्यात् च पुनर्लग्ने रसदुष्टा हु विपत्त्यादि विधदरूपा सर्वसिंधूत्थं
सैंधवं लवणं दद्यात् सर्वे दुष्टे ताराप्रत्येकं विशिष्य दानमुक्तमिदानीं नदृशां लवणं देयमेव देयमिति पुनरुक्तिपरिहारः
उक्तं चदीपिकायां योगस्य हेमकरणस्य च धान्यमिंदोः शंखं च तंडुलमणीतिथिवारयोश्च ताराबलाय लवणान्यथ गां च रा
शेर्दद्याद्द्विजाय कनकं शुचिनाडिकायाम् इति अथात्र गोचरप्रसंगात् सूर्यादयो राश्यग्रगताः संतः कदाशुभाशुभफलदातारो
भवंति तथा चोक्तं डमासाधिकरणे करविवारादौ स्वजन्मनक्षत्रप्रवेशे सति फलविशेषं च वसंततिलकावृत्तेनाह राश्यादि
गौ रविकुजौ फलदौ सितेज्यौ मध्ये सदा शशिसुतस्त्वसमेत्र मंदौ अथावनवह्निभयसान्मति वह्निसौख्यदुःखानि मासि जनि
भे रविवासरादौ रविकुजौ सूर्यमंगलौ राश्यादिगौ राशिप्रथमदशांशमध्यस्थितौ संतौ फलदौ निखिलफलदातारौ अ
वशिष्टेष्वीषदीषत्फलदौ एवं सितेज्यौ शुक्रबृहस्पती मध्ये मध्यगतौ राशिदशके निखिलफलदौ अन्यत्रेषदीषत् शशिसुतो
बुधः सदा त्रिंशदंशेषु निखिलफलदाता असमे त्वंतेमंदौ चंद्रशनैश्चरौ चरमे राशेः पतिमांशदशके निखिलफलदातारौ अन्यत्रेवी
षदीषत् उक्तं च वसिष्ठेन भवनादिगतौ फलदौ रविभौमौ मध्यगौ च गुरुशुक्रौ अंत्यगतौ शशिरविजौ सदैव फलदः फ
लदः शशांकसुतः वराहेणापि दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ रविसुतशशिनौ विनिर्ग
मस्थौ शशितनयः शुभदस्तु सर्वकालमिति रुधिरो भौमः अथैतेष्विन्यस्मिन्मासे स्वीये जन्मनक्षत्रप्रवेशे सति त
स्मिन्मासे धामागौरुनमिति यावत्तत्फलं तस्य पुंसो भवेत् बुधवारे सान्मतिः समीचीना धर्मयुक्ता बुद्धिर्भवेत् गुरुवारे
वस्त्रप्राप्तिर्भवेत् शुक्रे सौख्यप्राप्तिर्भवेत् शनिवारे दुःखप्राप्तिः स्यादित्यर्थः उक्तं च ज्योतिषरत्नसंग्रहे अथाभोजनमस्ति
भौः सुमतिनावस्त्रसुखं चासुखं मासे मासि फलं भवेज्जननभे सूर्यादिवारस्थित इति अत्र मासामासस्तथा च तिथ्यर्धस्तु हिता
स्मानादिनि भास्कराचार्यवाक्याद्वंद्वः शुक्लप्रतिपदादिदर्शांतो मासो ग्राह्य इति शिवं अथ गोचरप्रकरणं गद्येनोपसं

ॐ नमो भवान्यै ॐ गौरीनंदनमिष्टसिद्धिसदनं विघ्नावलीभेदनं नत्वा ज्योतिषिकाऽमरचिते मौहूर्तचिंतामणौ गो
विंदो बुधनीलकंठविधिवत्सूनुः सतामग्रणीर्बह्वर्थं खलु संक्रमप्रकरणं व्याख्याति विद्वन्मुदा अथ संक्रांतिप्रकर
णं व्याख्यायते तत्र ग्रहाणां प्राग्राशितोऽपरराशौ संक्रमणं संक्रांतिरिति संक्रांतिलक्षणं सा च द्विविधा मध्यमा स्प
ष्टा च षड्भिः संस्कृतो मध्यमग्रहो राश्यंतरं यदा संक्रामति सा मध्यमसंक्रांतिरुच्यते यदा तु स्पष्टीकृतिसंस्कारविशि
ष्टो ग्रहो राश्यंतरं गच्छेत्तदा स्पष्टसंक्रांतिरुच्यते तत्र मध्यममानस्य स्पष्टीकरणार्थत्वादेव तज्जनितसंस्कारसंक्रांत्या
नुपयोगात्तत्र तत्त्यागे स्पष्टसंक्रांतिरेव गृह्यते सापि द्विविधा सायनांशा निरयनांशा चेति तत्र यदा सिद्धांतगणनी
तायनांशसंस्कृतो ग्रहो राश्यंतरगमनमुखीकुरुते सा सायनांशा संक्रांतिरुच्यते यदा त्वयनांशसंस्काररहितो ग्र
हो राश्यंतरगतः तदा निरयनांशा संक्रांतिरुच्यते तत्रान्यासां चंद्रादिसंक्रांतीनां दैवज्ञैकनैवरेष्टाष्टानाद्योकाः
स्वनृपाः क्रमाद्रुर्व्याः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिंदिता इति वर्ज्येपि टीत्वमेव विवाहप्रकरणे वक्ष्यति अतः फल
कथने आसां संक्रांतीनां तु नक्षत्रवासरसमयभेदेन ववादिकरणभेदेन शुभाशुभफलकथनयोगपना पुण्यका
लता च संक्रांतिविशेषे वर्ज्यघटीन्यूनाधिकभावश्चास्तीत्यतो बहुव्यक्तत्वात्तत्स्वतंत्रमेव सूर्यसंक्रांतिप्रकरणमा
रिप्सुर्नक्षत्रवारभेदेन फलं तावत्साद्वैवसंततिलकयाह घोरार्कसंक्रमणमुग्ररवौ हि शूद्रान्ध्वांक्षी विशो न द्विवि
धौ च चरे सौमे चौरान्महोदरस्तु तान्नृपतीन्मृगे मैत्रे मंदाकिनी स्थिरगुरौ सुखयेच्च मंदा विप्रांश्च मिश्रभृगुगो तु पशूं
श्च मिश्रा तीक्ष्णार्कतेन्त्यज सुखा खलराक्षसी च अर्कस्य संक्रमणं निरयनांशा संक्रांति उग्रग्रहरवौ उग्रसंज्ञक
नक्षत्रे रविवारे वा चेत्स्यात्तदा घोरेति नाम्नीति सा शूद्रान्सुखयेत् सुखमुत्पादयेत् अत्रार्कसंक्रमणमिति पदोपा
दानसामर्थ्यात्सूर्यसंक्रांतिष्वेवायं विचार्यं विचारेणाखिलग्रहसंक्रांतिष्विति फलितोऽर्थः नक्षत्ररवौ इत्यत्र स
मस्तो द्वंद्वसमासोऽस्ति स किमितरेतरयोगद्वंद्वः समाहारद्वंद्वो वा नाद्यः इतरेतरयोगद्वंद्वस्योद्भूतावयवत्वाद्बहु
वचनांतः स्यात्तथा सत्युग्ररव्योरव्यो रिति भवितव्यं उग्रनक्षत्राणां बहुत्वादुग्ररविष्विति बहुवचनांतता स्याद्

संक्रान्तिप्रकरण १२